GOVERNMENT OF INDIA
DEPARTMENT OF ARCHAEOLOGY
CENTRAL ARCHAEOLOGICAL LIBRARY

16245

CALL No. Sa2Vs1 Kāt-Web
Vol. 1

D.G.A. 79.

Rare

Rs. 300

THE WHITE YAJURVEDA

EDITED

BY

DR. ALBRECHT WEBER

PROFESSOR OF THE SANSCRIT-LANGUAGE AT THE UNIVERSITY OF BERLIN, MEMBER OF THE ROYAL ACADEMIES OF SCIENCES IN BERLIN AND MUNICH AND OF THE GERMAN ORIENTAL SOCIETY, ASSOCIATED MEMBER OF THE ASIATIC SOCIETY IN PARIS, CORRESPONDING MEMBER OF THE AMERICAN ORIENTAL SOCIETY.

IN THREE PARTS.

PART I. The Vâjasaneyi-Sanhitá in the Mádhyandina- and the Káṇva-Çákhá with the commentary of Mahídhara.

PART II. The Çatapatha-Brâhmaṇa in the Mádhyandina-Çákhá with extracts from the commentaries of Sâyaṇa, Harisvâmin and Dvivedaganga.

PART III. The Çrauta-sûtra of Kâtyâyana with extracts from the commentaries of Karka and Yâjnikadeva.

Printed under the patronage of the Hon. Court of Directors of the East-India-Company.

BERLIN

FERD. DÜMMLER'S VERLAGSBUCHHANDLUNG.

LONDON

WILLIAMS AND NORCATE. 14 HENRIETTA-STREET COVENT-GARDEN.

1859.

THE ÇRAUTASÛTRA

OF

KÂTYÂYANA

WITH EXTRACTS FROM THE COMMENTARIES OF KARKA AND YÂJNIKADEVA

EDITED BY

DR. ALBRECHT WEBER.

CENTRAL ARCHAEOLOGICAL
LIBRARY, N. W. DELHI.
Acc. No. 16245
Date
Call No.
16245

श्रीशुक्लयजुर्वेदे
श्रीकात्यायनमुनिप्रणीतं श्रौतसूत्रम्
कर्काचार्ययाज्ञिकदेवादिकृतभाष्येभ्यः सारमुद्धृत्य
अल्बेर्तेन वेबेरेण शोधितम्
प्रुष्यनाम्नि जनपदे बेर्लीनाख्यायां राजधान्यां मुद्रितम्
संवत्सरे १९१६.

Sa2Vs1
Kat/Web
CENTRAL ARCHAEOLOGICAL LIBRARY New Delhi

BERLIN.
FERD. DÜMMLER'S VERLAGSBUCHHANDLUNG.
LONDON
WILLIAMS AND NORGATE. 14 HENRIETTA-STREET COVENT-GARDEN.

1859.

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 16245
Date 29/11/59
Call No. Sa2Vs1/Kat/Web.

TO

ALEXANDER von HUMBOLDT

THE EVERLIVING

AS A TOKEN OF THE DEEPEST GRATITUDE

DEDICATED

BY

THE EDITOR.

MUNSHI RAM MANOHAR LAL
Oriental & Foreign Book-Sellers
P.B. 1165, Nai Sarak, DELHI-6

The present Edition of the *Kâtiya-Çrauta-Sûtra* labours under two very serious disadventages, the fragmentary state of all the commentaries on the one hand, and their great voluminousness on the other.

There are six commentaries extant, none of them complete.

1. The oldest, insofar as it is quoted by the others (as well as by Sâyaṇa), is the *bhâshyam* of *Upâdhyâya Karka*, or *Karkâcârya*. Besides a small fragment in Chambers 401[a] (adhyâya XII. = D), I know only of the excellent, old copy in the Bodleyan library (Mill 118 = K.) which contains: 1) a fragment on 45 leaves extending from III, 8, 31 to IV, 15, 30: — 2) the *uttarârdham*, adhyâyas XII-XXVI, on 161 leaves: the last leaf, from अभिन्नेन २६. ७. ४८, is wanting and the five leaves at the end are much damaged.

2. The next in age, on account of its being quoted by the others, is the verbose *bhâshya* of *Çrî Ananta*, who assumes the proud title: *svarâṭsamrâṭsthapatimahâyâjnika*, and boasts of having celebrated 12 (or 11) vâjapeyas, 5 (or 3) agnicayanas, 110 (or by an other reading only 81) somas(*). Four adhyâyas (I-IV) are extant on 520 leaves, E. I. H. 759 (1-283) and 758 (284-520). In the introduction the author gives an account of his predecessors:

durdântânç cetaso doshân vedântair ye vyajigaman ।
tathâ pûrvagurûn naumi Vâsudevasarasvatîn ॥ 4 ॥
Sarasvatyeva mîmânsâ yair dattâ paramârthataḥ ।
munim Kâtyâyanam Karkam Pitribhûtim tathâdimân ॥ 5 ॥
Yaçogopi(m) Bhartṛiyajna(m) bhâshyakṛito'parân api ।

(*) रविसंख्यैरभिषिक्तो (रुद्रसं°) वाजपेयैः पञ्चाग्निचित् (°पेयैस्त्रिरग्नि°) । सोमानधिदशं शतमिष्ट्वा भाष्यपरोऽभवत् (एकाशीतिं च यः सोमानीजे भाष्यपरोऽपि सन्) ॥ सम्राजां वंशजो यस्य वाचस्पतिरिवापरः (°वार्थवित्)। वाचस्पतिरुपादानं योगिवान्नमवाश्रयः (?) ॥ अनेकक्रतुयाजिवादीयस्तोऽपि निवारकः । अन्यत्रगमनस्यासौ श्रीअनन्ताभिधः सुधीः ॥ These three çlokas are recurring (with some more variances) at the close of several kaṇḍikâs.

paddhatyâdipraṇetṛîṇç ca janakaṃ vedadân gurûn ‖ 6 ‖
vedârthayajnavidye ye daduḥ Samrâṭsutîḥ svayam ।
samrâjo 'gnicitas tyaktasarvasaṃgamadâ(n)s tu tân ‖ 7 ‖
vâcaspatyabhidhânatvâ(t) paramâtmânan apy atha ।
yajnajnânâṃ gurur yas tu karmapadmaravi tathâ ‖ 8 ‖
ekaikâdeçadân anyân gurûn buddhivivṛiddhaye ।
praṇamya kriyate yatnaḥ Kâtîyasûtrasansthitaḥ ‖ 9 ‖

To justify his own beginning he characterises them as follows:

kiṃ ca । *Bhartṛiyajnabhâshyam utsannaṃ sthitaṃ* । *vâlpanyâyayutam(!), na dṛiḍhanyâyanirûpyavaikṛitakarmakṛitisamartham* । *Pitṛibhûtikṛitaṃ ca çrutimâtralekhanaparaṃ, paryâyo'pi çabdântareṇa kvâcitka eva, tasmât sambhâvanâ'pi vaikṛitasiddher na ghaṭate* । *nanu Karkabhâshyam anekanyâyayutaṃ yuktibhiḥ sudṛiḍhaṃ sarvasaṃdigdhanirṇetṛi prayogavidhyapexitatattadançaprapûrakam bhavishyati? satyam, tad api Jaiminiçâstrasaṃskṛitabuddhiparinishpannatvât tyaktasûtraçrutyabhiprâyaṃ Jaiminipaxah(!) svaçrutisûtraviruddhasamâçritam, katham etachâkhâpramâṇapramâtṛiṇâ tad âçritya karmâ'nushṭhâtuṃ cittam utsahate* । *Vâsudevakṛitaṃ Karkapariçesha iti svayaṃ Vâsudevenoktam, tatpariçishṭatvât tadanurûpatvât tad api svaçâkhâviruddham* । *ato 'sty asyâ'vasaraḥ praṇayane, yenârjavena sûtrâny arthaparâṇi neshyante, çrutiviruddhaṃ tyaxyate, vidyamânaṃ svaçrutau vishayavâkyaṃ parigrahîshyate, chelayishyante ghanatarâḥ saṃdehâḥ, pûrvabhâshyebhyo bahulatarâ viçeshâ niravaçeshayishyante* । *iti ârabhyate bhâshyam* ।

3. The third of the series is the excellent *vyâkhyâ* of *Yâjnika-Deva,* son of *çrûtriragnicit samrâṭsthapatitriṇçatkratukṛinmahâyâjnika çrî Prajâpati.* This is a most valuable commentary, distinguished by the abundance of quotations from other ritual works, especially from the Âpastambasûtra, the Kaṭhasûtra or Kâṭhakam, the Mânavasûtra (= Maitrasûtra) or Manu, the Taittirîya (or Taittiri)-sûtra, Çâṅkhâyana, Lâṭyâyana and many others.

Only twenty adhyâyas are extant, viz. I-XI. XIII-XV. XX. XXI. XXIII-XXVI, in the following mss.:

I E. I. H.		747 (my copy २, second hand ३), on 165 leaves.
II	—	748 on 83 leaves, written in *Vârâṇasî Saṃvat* 1660.
III	—	749ᵃ on 49 leaves (22-49 by a second scribe, dated *Saṃvat* 1800).
	—	763, on 65 leaves, *Saṃvat* 1675.
IV	—	749ᵇ, on 133 leaves, *Saṃvat* 1708.
V	—	750, on 121 leaves. — My extracts from II-V = २, second hand ३.
VI	—	761 (A), on 71 leaves, *Saṃvat* 1640 *Vârâṇasyâṃ li. Devaji.* ।
	—	753ᵃ (B), on 44 leaves, *Saṃvat* 1639 *li. Gaṇeçena* ।
	—	755ᵇ (C), on 49 leaves, *Saṃvat* 1697 (altered in 1797).
VII	—	751ᵃ (A), on 68 leaves.
	—	753ᵇ (B), on 47 leaves, *Saṃvat* 1628 *Çake* 1493 *Sadâçivadîxitasuta Kâçînâthena.*

VIII E. I. H. 2669 (A), on 102 leaves, *Saṃvat* 1759 *li. Bhaṭapuruçottamena Gaṇgâtîre* ।

— 2667[c] + 753[e] (B), on 69 leaves (1-31 in 2667, the rest in 753[c]).

IX — 751[b] (A), on 67 leaves.

— 752[a] (B), on 54 leaves.

X — 762 (A), on 56 leaves, *Saṃvat* 1795 *li. Bhaṭamiṭhâkena* ।

XI — 1362[a] (A), on 16 leaves.

— 753[d] (B), on 8 leaves.

XIII — 752[b] (A), on 16 leaves.

— 1567[c] (B), on 11 leaves, *Saṃvat* 18 . . ।

XIV — 1555 (A), on 22 leaves, *Kâçyâṃ Gopinâthâtmajena* ।

XV — 1362[b] (A), on 72 leaves.

Bodley. Wilson (B) 508, on 55 leaves, *Saṃvat* 1642.

XX E. I. H. 1362[c] (A), on 50 leaves, *Saṃvat* 1672 *çrîvipragurjaramoḍhajnâtîyatavedi dîxita Rudradevena likhâpitam* ।

Bodley. Wilson 450[a] (B), on 48 leaves.

XXI Bodley. Wilson 450[b] (A), on 23 leaves (foll. 49-71), *Saṃvat* 1642 *adyeha çrî Vârâṇasyâṃ vâstavya udîcyajnâtîya vyâsaçrî* 5 *Raghunâthasuta Ravijî likhito 'yaṃ granthaḥ* । *miçraçrî* 6 *Ratneçvarair lishâpitaḥ* ।

XXIII E. I. H. 752[c] on 16 leaves (foll. 1-16[b]).

— 1362[e] (B), on 40 leaves.

XXIV — 752[d] (A), on 52 leaves (foll. 16[b]-68).

XXV — 764 (A), on 140 leaves, *Saṃvat* 1795 *li. Vârâṇasimadhye Bhaṭapuruçottamena Maṇikarṇitîre* ।

XXVI — 764 (A), on 37 leaves, *Saṃvat* 1650 *li. Nârâyaṇadîxitasya* । *vibhâgottarakâlaṃ likhitam* ।

4. A short extract from the *vyâkhyâ*, made by an anonymous writer, is the *saṃxiptasâra*, Chambers 639 (Ss. or 8), which extends from adhyâya II to XXIV, and thus supplies in part the wanting adhyâyas of the *vyâkhyâ*. The ms. is written (on 106 leaves) *Saṃvat* 1609 *Gaḍhânagare* (or *Gaḍhâdurge*, at the close of adhy. XIX) *du°çrî* 3 *çrîpatisuta Kṛishṇajîkena*, and is therefore the oldest of all the copies.

5. The *paddhati* of *Yâjnikadeva* treats the ritual for itself in its real succession, without relating to the single sûtras of the text, and gives therefore a much clearer oversight over the whole of the performances. Nineteen adhyâyas are extant, viz. I-IX. XII. XIII. XV-XXI. XXIII. XXV, in the following mss:.

I-IV E. I. H. 2589 (१.-१ second hand), on 126 leaves.
I Chambers 790^{b} (५.-२ second hand), on 13 leaves, *Saṃvat* 1772 *Vârâṇasîmadhye li.* ।
— 708^{c} (२.-३ second hand), on 17 leaves.
II-IV E. I. H. 757^{a}, on 16. 13. 43 leaves. A very incorrect copy.
V Chambers 391^{a} 1 (१.-१ second hand), on 82 leaves.
VII-IX E. I. H. 757^{b}, on 12. 24. 25 leaves. A very incorrect copy.
XII — 755^{a}, on 47 leaves, modern.
XIII Bodley. Wilson 69^{b}, on 6 leaves.
XV E. I. H. 756^{c}, on 29 leaves, *Saṃvat* 1797.
XVI-XVIII Chambers 392^{a}, on 23. 35. 21 leaves.
XVII E. I. H. 760^{b} on 34 leaves
XIX Chambers 391^{a} 3, on 32 leaves, *Saṃvat* 1797.
XX E. I. H. 756^{a}, on 31 leaves.
XXI — 18 on 34 leaves, and 756^{b}, on 19 leaves, *Saṃvat* 1797.
XXIII — 1362^{d}, on 13 leaves, *Saṃvat* 1795 *Vârâṇaçi Bhaṭapuruçottamena* ।
XXV — 754 on 77 leaves, modern.

The Chambers-Collection contains, besides, several extracts from parts of the paddhati, see no's 237-242 of my „Verzeichniſs der Sanskrit-Handschriften" of the Royal Library at Berlin: one of them, Chambers 737 (B), has been of great use in the fifth adhyâya.

6. The latest of all commentaries — for *Deva* is quoted therein, at IV, 14, 30 see pag. 411, 22 — is the *bhâshyam* of *Mahâdeva (sahasrodîcyajnâtîyadvivedi M.)*. Only three adhyâyas (II-IV) are extant, E. I. H. 2714 (Mah. or म) on 59 and 44 leaves. The first two leaves are wanting: there is indeed a leaf, marked by २, but it belongs to a different, still unknown commentary of the Kâtiyasûtra. The ms. is written: *saṃvat saptadaçatrayastrịnçadvarshe* (1733?) *mahâdevena:* should the writer perhaps be the author himself? — Mahâdeva seems to have considered himself a descendant from the family of *Va-*

sishṭha, for at ३. १. ९ he substitutes: *Vasishṭhasya* for the *amushya* of the text (pag. 367, 18).

7. The last to be named, not the least in value, is the *Vedadipa* of *Mahídhara* (, who lived *Saṃvat* 1654). This excellent commentary to the *Vâj. S.* furnishes us in general with a clear and comprehensive survey of the ritual to which the several verses of the *Vâj. S.* belong, and with a good explanation of the single rules quoted throughout from the Kâtîyasûtra. There are some instances, see e. g. ९. ६. २ २५. २. ७ Mahidh. at ९. १७ (compare Karka at ३. २. १२), where its Kâtiya-text seems to differ from ours. I suspect there either a fault of our (resp. my) copies of the *Vedadipa* or a nodding on the part of its author.

The text of the sûtras alone is given in the following mss.:

1. E. I. H. 2844 (१.-१ second hand), *adhyâyas* I-XI and XII-XXVI, a very inaccurate and defective copy, on 75 and 78 leaves, *Saṃvat* 1745 *citrabhânusaṃvats(ar)e Vîreçvaradevasya dharmakṛitasya li.* ।

2. British Museum 5350, 1 (R), *the same*, on 67 leaves, *Saṃvat* 1838 *Jaipure Harisukhena.* Incorrect.

3. Bodleyan. Mill. 85 (M), *the same,* on 112 and 94 leaves. The *pûrvârdham* is written: *Saṃvat* 1656 *purohitaparamânandena,* the *uttarârdham: Saṃvat* 1751 by *Jâgeçvaraçamghaji.* This copy was unknown when in 1846-47 I came, for the first time, to England. To Dr. Aufrecht's kindness I owe its first acquaintance and the collation of several passages. I have since myself examined it throughout.

4. Chambers 790s (३.-३ second hand), *adhyâyas* II. III, on 15 leaves, (4 and 5 wanting).

5. Chambers 732 (३.-३ second hand), *adhyâyas* XII-XXVI on 154 leaves, an excellent old copy, though sowewhat damaged, especially at foll 118-130 (२३. २. ३७-२५. ३. ३२): the foll. 3-6 (१२. १. ३-३. २३) are wanting. Many marginal glosses.

Seeing, twelve years ago, the incompleteness of all the commentaries and their immense bulk I considered when collecting the materials for this Edition, what I ought to do. After long hesitation I resolved to give to *Karka's* commentary on the *uttarârdham,* as the oldest, the shortest and the completest, the preference over the scattered and still voluminous fragments of *Deva's vyâkhyâ:* and as it appeared to me impossible too to copy as well as to publish the

whole of the *vyâkhyâ* on the *pûrvârdham,* I was obliged to content myself with extracts from it, copying only the introductory adhyâya (*) in its full length. Besides I resolved to give the whole of the *paddhati* of the five first adhyâyas, on account of their containing the groundwork of the whole ritual. *Ananta's bhâshya* I was obliged to put aside altogether: from *Mahâdeva's* I took occasional notes.

It is the nature of extracts, to be not always literal, but to shorten and to condense the original, where it is too prolix. Thus also my extracts from the *vyâkhyâ* have been made, partly a new *saṃxiptasâra* of their own stamp. But I neglected — and I must consider this a very serious defect — to mark these abridged passages, and to distinguish them thus from the far greater number of those, which were a mere literal transscript of the original. When therefore eight years later I came to arrange my materials for this Edition, I felt soon great uncertainty with regard to their real state. Truly I marked by crochets [] such passages or words as I now added — either from Ss., or by composing them out of fragmentary notes taken from the *vyâkhyâ,* or by mere conjecture —, but I became too late aware of the extent of those, which I had altered already in copying them. The munificence of His Excellency the minister for public instruction, *von Raumer,* enabled me to visit England once more, in the summer 1857, to collate the originals anew, and thus to compensate for my former neglect by the accompanying list (see the Appendix) of all those passages in the then already printed books (II-V), which ought to have been marked by crochets [] at first. I am happy to state, that the greater part of them is rather unimportant. Totally indifferent cases, as where for instance (owing to the abbreviations *çr. bh. juh.* and the like, used in my extracts) श्रुते: is given instead of श्रवणात् श्रुतत्वात् एवं श्रूयते — भवेत् भवति for भवति भवेत् स्यात् — जुहुयात् for जुहोति — कुत: for कस्मात् — कार्य for कर्तव्यं — विकल्पे for वाशब्दो विकल्पार्थ: — तत: तस्य तस्मात् and the like instead of long compounds —, or insignificant transpositions, by way of brevity I leave unnoticed. — From the *sixth* adhyâya I have in my extracts closely adhered to the original, faithfully marking all deviations from it by the two crochets []. Besides I have given there (as I had done already in adhyâya V) in full length all quotations taken from the *Âpastamba-*

(*) In the Edition of which I derived afterwards much assistance from the *Çâstradîpikâ,* a short commentary on the *Jaiminisûtra* by *Pârthasârathimiçra* (Chambers 337).

sûtra, the *Kâṭhakam,* the *Mânavam,* in order to provide ample specimens of these important works, of which only the first appears still to exist, the two others seeming irreparably lost for ever.

Karka's bhâshyam I had copied from the beginning in full length. The extracts I give are always literal. On account of its deficiency with regard to the mere explanation of the words I have added to it the essential part of the *saṃxiptasâra* (सं॰), enriched — in the books where it could be done — by extracts [ ] from the *vyâkhyâ* itself. In adhyâyas XXV. XXVI these extracts from the *vyâkhyâ* take directly the place of the सं॰ which is failing there.

Quotations marked by four cyphers (१. १. १. १) are taken from the *Çatapatha Brâhmaṇa* (*Mâdhyandina*), those marked by three (१. १. १) from the *Kâtîyasûtra* itself, and those marked by only two (१. १) from the *Vâjasaneyi Saṃhitâ* (*Mâdhyandina*).

Thus I make over to the learned world a work, of whose deficiencies nobody can be more persuaded than myself, and for whose greatness — I am bound to avow it — I was not fully prepared when I began it. May this candid confession be at the same time my apology for having not yet fulfilled the different promises given already long ago about a translation of the *Vâjasaneyi-Saṃhitâ,* a partial one of the *Çatapatha Brâhmaṇa,* and separate researches on the *Yajur-Vedic* ceremonies. Be it allowed to me to affirm, that my labours are continually pursued in this direction: but the vastness of the materials, which increase on every step in an enormous size, hinders as yet any termination: for alone the copying and comparing of all the *brâhmaṇas* and *sûtras* of the several *Vedas* as they are extant here in Berlin — a most extensive but indispensable preparatory work — costs my already several years of patient labour and has not yet been quite finished.

Berlin, July 1859.

The Editor.

among the Kaṭhakas, the Mânavas — in order to preserve some specimens of these important works, of which only the first is [illegible] still in existence, the two others seeming irreparably lost for ever.

Where a Anukramaṇî had survived from the beginning in full length, the extracts I give are always literal. On account of its deficiency with regard to the more explanation of the names I have added to it the [illegible] part of the [illegible] Sarvânukrama — in the notes where it could be done — the extracts [illegible] from the [illegible] itself. In [illegible] these extracts from the [illegible] take directly the place of the [illegible] which is [illegible].

Quotations marked by [illegible] are taken from the [illegible] [illegible], those marked by three [illegible] from the [illegible] itself, and those marked by one two [illegible] from the [illegible] [illegible].

Thus I make part to the learned world a work, of whose [illegible] nobody can be more persuaded than myself, and for whose [illegible] — I am bound to avow it — I was not fully prepared when I began it. Also my candid admission be at the same time my apology for having not yet fulfilled the [illegible] promises given already long ago about a translation of the [illegible], a partial one of the [illegible], and separate treatises on the [illegible]. [illegible] allowed to me to affirm, that my labours are continually pursued in this direction, but the greatness of the materials, which increase by every step in an unusually rapid, hinders as yet any termination. [illegible] the copying and comparing of all the [illegible] and [illegible] of the several [illegible] as they are extant here in Berlin — a most wearisome but indispensable preparatory work — costs me already several years of patient labour and has not yet been quite finished.

Berlin, July 1858.

The Editor.

APPENDIX.

(See pag. XII, 18.)

Adhyâya II. 171, 5 अनयोश्च°शेषः. — 172, 3 क्वच°शेषः. — 20. 21 प्रातर्हो°त्रात्. — 178, 5. 6 वैदिका°ऽपेत्. — 7. 8 अध्वर्यु°त्त्रार्थम्. — 179, 23. 24 °माणं च°वत्तः. — 181, 5 विकल्पेन. — 14 त्यागः. — 182, 3 उदक°त्रूपम्. — 4 स च चमसश्चतुरस्रो. — 21. 22 ब्रह्मन्नपः°स्यानन्तरम्. — 183, 17 तेषां°सादनम्. — 184, 6 एकविं°पक्षे. — 19 हवि°दाय. — 20. 21 हवि°वति. — 185, 4. 5 प्रथमं°अथवा. — 19 युगपन्नोचैः. — 186, 4 अग्निहो°णीयम्. — 16. 17 गार्ह°नीयस्य. — 187, 6-8 धूरोपरि°येऽनसि. — 16-19 पित्र्यायां°कर्तव्यम्. — 188, 3 पवि°नूहित. — 5 तुल्य°णान्. — 7, 8 पवि°क्षति. — 11. 12 अत°णीषु. — 14 दक्षि°अप. — 193, 8. 9 न हि°नोति. — 11. 12 चर्मणः°वादः. — 14. 15 विहा°त्यं वा. — 18 शेषः°इति. — 20 इत्यूहः. — 194, 1 साम°धितुम्. — 9 न्यक्तो°ध्रं वा. — 11 शा°ग्नीध्रः. — 13-15 हविःकण्ड°हननस्य. — 197, 8 तेषु°क्रमः. — 198, 1. 2 उत्तरो द्वेधा. — 11 तप्यस्व°एतच्च. — 13. 14 भर्जन°ऊवात्. — 200, 23. 24 अग्नी°यति. — 202, 11 सा च तदा. — 13. 14 प्रा°दोषः. — 202. 9 वत्स°माणं वा. — 203, 8. 9 इदम°शति. — 204, 1 सहैव°माणेन. — 208, 12. 13 चतु°त्राम्. — 15 तिर्य°कमेव. — 211, 4 इतर°र्हिते. — 24 नत्तर°नम्. — 214, 5 प्रैषं ब्रूयात्. — 6 आहन°ग्नीध. — 12 वरु°पूहः. — 17 अध्व°ध्रश्च. — 215, 2 उत्क°ष्यति. — 216, 4 तत एव. — 7. 8 प्रत्यु°वेति. — 12 सम°क्रमः. — 14 सम°त्तम्. — 217, 10 आह°वा. — 221, 5 अने°के. — 6 नाभे°तेः. — 14. 15 पत्नीं°ष्यति. — 223, 16 and 18 मेध्योकरणार्थम्. — 224, 8 पञ्चधा सप्तधा. — 22 इतरथा°कल्पने. — 225, 7. 8 भूमि°रयति. — 9 अनुया°भावः. — 10 आह°र्थं च. — 227, 16. 17 उत्तरो°भावात्. — 21. 22 यदि तु°कर्कः. — 229, 2 अत्र तु°स्ति. — 231, 9 अनेक°विन्देति. — 16. 17 शाखा°मेण. — 232, 2. 3 अनेक°म्भनम्. —

Adhyâya III. 235, 11. 12 सर्वे°त्ताव्याः. — 236, 2 यद्यु°र्युः. — 237, 6 अनु°श्चेदिति. — 14 तेन°भावः. — 238, 13. 14 अपामु°प्राप्तस्य. — 17 °गमनमार्गः. — 241, 4 चतुर्गृहीतेन. — 247, 21 अन्ये°इति. — 249, 6 जुहूस्थेनैव. — 13. 14 आज्य°सौम्यम्. — 250, 7 तथैव. — 251, 3. 4 ब्रूयात्°इति. — 7 तेन°इति. — 9. 10 शस्त्र°ब्रूयुः. — 255, 12. 13 परि°रेण. — 13 त्र°गम्. — 15. 16 तु भवति. — 256, 1 तेषां. — 19 उप°त्रा. — 257, 6 मेव तस्या. — 11 आग्ने°मीयम्. — 258, 15 पठ्यमाने. — 24 प्रत्ये°नूहः. — 259, 6. 7 पवि°मिनश्च. — 264, 13 तेन च तं. — 14. 15 अग्ने°हहः. — 265, 2 निय°वणात्. — 267, 10. 11 अने°एव. — 16. 17 अत्रैवा°णार्थम्. — 268, 1 एके°तायाः. — 3 तत्पक्षे. — 271, 6 ज्ञात°वता. — 272, 13 ताभ्यां°च. — 14 विश्वे°वता. — 17. 18 सर्वाः स्रुचः. — 274, 20 उप°हः. — 22 किंतु. — 275, 22. 23 एके°ख्यते. — 277, 1 मन्त्र°गः. — 21 अग्नी°नीये. — 281, 21 सर्वे°क्षणम्. — 282, 13 कर्त्री. — 283, 21 तेन°पेयात्. — 22. 23 अत्र°मिनः. — 284, 15. 16 तनू°तथापि. —

Adhyâya IV. 289, 14. 15 परिस्त°र्व्वचनम् . — 22 मन्त्र°वर्ज्जम् . — 292, 10 ग्ला°त्तम् . — 295, 12 प्रक°त्वात् . — 299, 20 उभ°योः . — 301, 15 तत°रोति . — 303, 21 एवमिति . — 304, 13 अग्न°न्धनं . — 305, 5-7 न चामा°तस्यात् . — 306, 1. 2 न्या°धः . — 7 एत°रिति . — 312, 17 यज्ञ°परः . — 314, 1 तत्रैव . — 315, 2 तत्र ग्राह्यम् . — 317, 1 तेन द्रव्यं . — 10 पूर्वं . — 318, 4 न च°त्ताम् . — 12 कुतः°श्रूयते . — 319, 22 आसा°र्भवति . — 330, 7 क्रि°भावे . — 331, 4. 5 कृतशे°मेषु . — 332, 10 मांसं न भक्षेत् . — 337, 1 न सक°ष्टयः . — 339, 9. 10 उद्धरणादि . — 11 विमृ°पि . — 344, 19 वै°णाः . — 345, 13 अग्निहो°ह्वतः . — 15 अपरे . — 351, 6 न समुच्चयः . — 21 निष्कामस्य . — 352, 2 चत्वारः . — 7. 8 अर्था°रिते . — 364, 2 आत्म°त्वात् . — 368, 6 नाध्व°ख्या . — 369, 16 अथवा°स्पृश्य . — 375, 20 इष्टिः°ला . — 376, 1 अष्टा°लौ . — 13 द्वयोः तिस्रस्तिस्रः . — 22 तेन . — 377, 10. 11 अनृतम्°तेः . — 385, 22 सर्वानिति . — 386, 7 न दा°मेन . — 394, 13 येन . — 395, 5. 6 तत्स°स्कः . — 402, 13 अपरेषां तु . — 405, 19 उत्त°वा . — 408, 2 दीप्तायाः . — 410, 12. 13 हवर्णो°त्वाति . — 16 कूर्चैव . — 411, 1-4 होमारम्भे°त्यग्नि . — 416, 17 सा°ल्पेन . — 419, 5 अलाभे . — 420, 14 एते°त्रं . —

Adhyâya V. 435, 3. 4 एष वां° इति च . — 441, 25 तन्म°णां . — 451, 7 उत्तरवेदिं°त्वेन . — 460, 9 स्रुग्भ्यां°त्वा . — 465, 7 करोति . — 9 यद्वा°पं . — 10 °मानधुर्यः°रोति . — 474, 3 कृत्वा°यद्वा . — 475, 21. 22 ऐन्द्रा°मेण . — 504, 2 चतु°भावः . — 4 अष्ट°वि . — 507, 11 नोत्तरतः . — 15. 16 यत्र°मादौ . — 521, 21 न°वद्यः . — 525, 15 सर्व ऽएव . — 532, 25. 26 एतावत°भावाच्च . — 560, 7 अष्टा°वति . — 9 तृतीयं हविः . — 18 द्वितो°पेनैव . —

गुजराती प्रिंटिंग प्रेस लायब्रारी.

ओम्

ब्रह्माणमथ विष्णुं च शिवं गणपतिं तथा ।
अम्बिकां शारदां चापि वन्दे विघ्नोपशान्तये ॥
कात्यायनं नमस्कृत्य गुरून् श्रीश्रीपतींस्तथा ।
पितरौ भाष्यकर्तृंश्च पितृभूत्यादिसंज्ञकान् ॥
कात्यायनप्रणीतेऽस्मिन्सूत्रे यज्ञप्रकाशके ।
प्रजापतेस्तनूजोऽहं कुर्वे व्याख्यामिमां स्फुटम् ॥
जयन्ति ते गुरोर्वन्द्याः श्रीपतेः पादपांसवः ।
येषां प्रसादादज्ञोऽपि चापलं कर्तुमुद्यतः ॥
आलोच्य सूत्रभाष्यादि क्रियते संग्रहो यतः ।
स्वकल्पितत्वशङ्कात्र न कार्या विबुधैरतः ॥

इह पुण्यो वै पुण्येन कर्मणा भवति (१४. ६. २. १४.) तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनेति (१४. ७. २. २५.) अग्निहोत्रं जुहुयात्स्वर्गकाम इत्यादिभिर्वाक्यैः कर्मणां स्वर्गापवर्गादिश्रेयःसाधनत्वं प्रतीयते । तानि चाग्निहोत्रादिकर्माणि वेदवाक्यैकवेद्यानि · वेदवाक्यानि चानेकशाखावस्थिततया स्वतश्च प्रतिवाक्यं नानाविधपरस्परविरुद्धार्थस्फुरणेन दुर्बोधार्थानि बहुभिरर्थवादवाक्यैर्मिश्रितानि च । तथा हि अग्निहोत्रं जुहुयात्स्वर्गकाम इत्यत्र किं स्वर्गो होमाय उत होमः स्वर्गाय · तथा अग्निहोत्रशब्दो गुणविधानार्थो नामधेयं वेति । तथा स वै संवत्सरं दीक्षाभिरेतीत्यादौ (१२. ३. ३. ११.) क्वचित्संवत्सरशब्दस्य मुख्यार्थत्वम् सहस्रसंवत्सरादौ (१२. ३. ३. १.) तस्यैव गौणत्वम् । अर्थवादमिश्रपाठाद्विध्यर्थवादसंदेहोऽपि भवति किमयं विधिरुतार्थवाद इति । यद्यपि जैमिनिशबरस्वामिकुमारिलप्रभृतिभिर्मीमांसायां तानि वाक्यानि संदिह-

निरासपूर्वकं यथार्थं व्याख्यातानि सन्ति · अधीतशास्त्राणां च तदर्थावगमोऽपि सुकर एव · तथापि तेषां नानाशाखाव्यवस्थितत्वेनेदानीन्तनैः सर्वैः पुरुषैरध्येतुं ज्ञातुं वाशक्यत्वात्तदधीनं कर्मणां ज्ञानं दुःशकमिदानीन्तनानामिति मत्वा परमकारुणिको भगवान्कात्यायनाचार्यो नानाशाखागतविधिवाक्यसंग्रहरूपं कल्पसूत्रं प्रणीतवान् ॥

तत्र पूर्वमधिकारादिकस्य सर्वकर्मसाधारणस्य निरूपणानन्तरं विशेषस्य दर्शपूर्णमासादेर्निरूपणं युक्तम् · अन्यथा प्रतिविशेषमधिकारादिनिरूपणे ग्रन्थगौरवं स्यात् · तन्मा भूदिति कृत्वा प्रथमेऽध्याये यावत्किंचित्सर्वकर्मसाधारणं तदुपदिशति । तत्रैतदादिसूत्रम् ·

अथातोऽधिकारः ॥ १ ॥ वक्ष्यतऽइति सूत्रशेषः । तत्रायमथशब्दो मङ्गलार्थ आनन्तर्यार्थश्च · मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथेति अमरोक्तेः (३.४.३२.८.) । तत्र मङ्गलमुच्चारणमात्रेण साधयति दधीव दर्शनादिति आनन्तर्यं तु अभिधावृत्त्या वक्ति · तेनान्यार्थ्यं चानेकार्थत्वमिति दोषानवकाशः । अपेक्षितं च प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये प्रचयगमनाय च मङ्गलम् · आनन्तर्यं च न यतः कुतश्चित् अनुपयोगात् किं तु वेदाध्ययनापेक्षया तस्यात्रापेक्षितत्वात् । अतःशब्दोऽत्र हेत्वर्थस्तस्यैव वेदाध्ययनस्य वेदार्थविचारं प्रति हेतुतामाह । अधिक्रियतऽइत्यधिकारः स्वाम्यं फलभोक्तृतया कर्मण्यैश्वर्यमित्यर्थः । तेनायमर्थः अथ वेदाध्ययनानन्तरम् यतोऽधीतो वेदः अतो हेतोरधिकारो वक्ष्यते अभिधास्यते विचारपूर्वकं निरूपयिष्यतऽइत्यर्थः । अधिकारग्रहणं सर्वेषां वेदवाक्यप्रतिपाद्यानामर्थानामुपलक्षणार्थम् अधिकारादिकः सर्वोऽपि वेदवाक्यार्थोऽभिधास्यतऽइत्यर्थः । प्रतिज्ञासूत्रमिदम् · प्रतिज्ञाप्यतऽइदम् अधिकारो वक्ष्यतऽइति · प्रतिज्ञाकरणं च शिष्यबुद्धेरव्याकुलतार्थम् · अन्यथा हि किमिदमुच्यतऽइति बुद्धेर्व्याकुलता भवति ॥ ॥ केचित्त्वेवं व्याचक्षते । अयमध्यायः सूत्रकृता नित्यकाम्यप्रायश्चित्तोपदेशानन्तरमुपनिबद्धः · तेनाथशब्दः सर्वकर्मोपबन्धनानन्तर्ये · अतःशब्दस्तु हेत्वर्थ एव · यतो दर्शपूर्णमासादीनि प्रवर्ग्यान्तानि कर्माण्युक्तानि अतस्तेष्वेव कर्मस्वधिकार उच्यते । एषु पूर्वोक्तेषु कर्मसु अस्याधिकारः अस्य स्वामित्वमस्य कर्मजन्य-

फलभोक्तृत्वमिति वक्ष्यतऽइत्यर्थः । यत उक्तेष्वेव कर्मसु एवमपेक्षा जायते एते-
ष्वग्निहोत्रादिकर्मसु कस्याधिकार इति अत एवं प्रतिज्ञा । अथ सर्वकर्मोपबन्ध-
नानन्तरम् यतः कर्माण्युक्तानि अतस्तेष्वधिकारोऽभिधीयतऽइति अधिकारो वक्ष्यत
ऽइति प्रतिज्ञातम् ॥ ॥ कर्मजन्यफलभोक्तृत्वं चाधिकार इत्युक्तम् तच्च कर्मणां
फलवत्त्वे सिद्धे सति सिध्यति नान्यथा · तेन तत्साधनार्थमिदं सूत्रमारभ्यते । तत्रैवं
संदेहः किमफलवन्ति कर्माणि उत फलवन्तीति । अफलवन्तीति ब्रूमः · कर्मसम-
नन्तरं प्रत्यक्षेण फलस्यानुपलब्धेः । ननु मा भूत्प्रत्यक्षं कर्मणां फलवत्त्वे प्रमाणम् ·
आगमस्तु भविष्यति · कश्चासौ · अग्निहोत्रं जुहुयात्स्वर्गकामः दर्शपूर्णमासाभ्यां स्व-
र्गकामो यजेतेत्यादि · सत्यम् · भविष्यति · तथाप्यत्रैतद्विचारार्हम् अत्राग्निहोत्रादिषु
किं पुरुषस्याधिकारः स्वाम्यं कर्मजन्यफलभोक्तृत्वमस्ति न वेति । तदर्थमिदं विचा-
र्यते · यजेत जुहुयादित्यत्र येयं प्रत्ययोपात्ता भावना तस्यां किं धात्वर्थ एव भाव्यः
प्रधानम् यागं कुर्याद्धोमं कुर्यादित्येवम् स्वर्गादि तु तत्साधनतया गुणभूतम् स्व-
र्गेण यागं च होमं च कुर्यादिति उत काम्यमानत्वेनोपात्तः स्वर्गादिरेव भाव्य-
स्तत्र च साधनं धात्वर्थ इति यागेन होमेन च स्वर्गं कुर्यादिति । ततोऽप्ये-
तद्विचार्यते · योऽत्र क्रियायाः स्वर्गकामादेश्च पुरुषस्य क्रियाकर्तृत्वरूपः सम्बन्धः तत्र
किं क्रिया प्रधानभूता पुरुषो गुणभूतः अथवा पुरुषः प्रधानभूतः क्रिया गुणभूतेति
। यदि गुणभूतः पुरुषः तस्य गुणभावं क्रियाक्षेपादेव सिद्धमनूद्य स्वर्गादि द्रव्यं
साधनत्वेन विधीयते कामश्रुतिश्च साधनकामनानुवादः · अयमर्थः स्वर्गं साधन-
त्वेन कामयमानो यजेत स्वर्गेण यागं कुर्यादित्यर्थः · अथवा समुद्रं मनसा
ध्यायन्रथन्तरं गायेदिति वत् स्वर्गकामनैव गुणभूतकर्तृविशेषणं सती यागाङ्गत्वेन
विधीयतऽइति द्वेधा पूर्वपक्षः । अथवा प्रधानभूतः पुरुषः ततस्तस्यात्मार्था स्व-
र्गादिगोचरा प्रवृत्तिः प्रत्ययेन विधीयते · साधनतया च याग उपदिश्यते स्व-
र्गकामो यागेन कुर्यादात्मार्थप्रवृत्तिमिति · स्वर्गकामस्य चात्मार्था प्रवृत्तिः स्वर्ग-
विषयैवेति स्वर्गभावनैवानेन प्रकारेणोपदिष्टा भवति · तदयमर्थः यः स्वर्गं
प्राप्तुमिच्छति स यागेन कुर्यादभिलषितम् स्वर्गश्च तस्याभिलषित इति स्वर्गं भाव-
येद्यागेनेत्युक्तं भवति । तथा स्वर्गशब्दः स्रक्चन्दनवनितादिद्रव्यवाची सुखवाची

वेति · यदि द्रव्यवाची ततः कर्म प्रधानम् द्रव्यं गुणभूतम् अथ सुखवाची तदा यागो गुणभूतः स्वर्गः प्रधानमिति । तत्र पूर्वपक्षः · अत्र यजेत जुहुयादित्यनेनाख्यातेन भावनाभिधीयते तस्यां च धात्वर्थ एव भाव्यः एकपदोपात्तत्वात् · स्वर्गस्तु पदान्तरोपात्तत्वाद्वाक्येन भाव्यतयान्वेतव्यः · वाक्यं च श्रुतेर्दुर्बलम् · स्वर्गस्य च भाव्यत्वाभावे सति गुणत्वमङ्गीकार्यम् · स्वर्गशब्दश्चात्र सुखसाधनचन्दनादिद्रव्यवाची चन्दनं स्वर्गो द्विरष्टवर्षाः स्त्रियः स्वर्गः कौशिकानि सूक्ष्माणि वासांसि स्वर्ग इति लोके व्यवहारदर्शनात् सर्वत्र शब्दार्थे तस्यैव प्रामाण्यात् · तच्च[1] कामयितुं योग्यम् तेन विना यागानिष्पत्तेः · द्रव्यं च भूतसिद्धम् कर्म तु भव्यं साध्यम् · भूतस्य च भव्यार्थता युक्ता दृष्टार्थत्वात् न तु[2] भव्यस्य भूतार्थता दृष्टोपकाराभावात् । तस्मादपि यागहोमादिर्धात्वर्थ एव भाव्यः । अथवा स्वर्गादिकामनैव यागाङ्गमित्यस्मिन्नपि पक्षे तथैव । न च यागेन किमपि फलं साध्यत ऽइत्युक्तम् तस्मादफलवन्त्येव कर्माणि · निष्फलेषु च तेषु लोभाभावाद्बहुवित्तव्ययायाससाध्यत्वाच्च न कश्चित्प्रवर्तेतेति न कस्यापि कर्मजन्यफलभोक्तृत्वापरपर्यायोऽधिकारः सिध्यतीति प्राप्तऽआह ·

फलयुक्तानि कर्माणि ॥ २ ॥ फलं पुरुषाभीष्टं स्वर्गधनपुत्रादिकम् कर्माण्यग्निहोत्रादीनि फलयुक्तानि फलैः सम्बद्धानि फलवन्ति फलस्य साधकानि भवन्तीत्यर्थः । कथम् · इत्थम् · यजेत जुहुयादित्यत्र प्रत्ययस्य केवलमाख्यातरूपत्वमेवेति न मन्तव्यम् किं तु लिङ्प्रत्ययत्वेन विधिरूपत्वमप्यस्ति · तत्राख्यातत्वाकारेण भावनामाचष्टे विधित्वाकारेण पुरुषं प्रवर्तयति · पुरुषश्च स्वामित्वं फलमन्तरेण न प्रवर्तत ऽइति तदपेक्षितं स्वर्गमेव भाव्यतया विधिरुपादत्ते । स्वर्गशब्दश्च सर्वोत्कृष्टे सुखे रूढः तथा हि यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् इच्छामात्रोपनीतं तत्सुखं स्वर्गपदास्पदमिति · द्रव्ये तु लाक्षणिकः । तस्मात्स्वर्गस्य भाव्यत्वं विधिश्रुत्या सिद्धम् । धात्वर्थस्य भाव्यत्वमेकेन पदेन प्रतीयमानमपि न प्रत्ययेनावगम्यते किं तु प्रकृत्या · तथा सति स्वर्गभाव्यत्वं भावनायाः प्रत्यासन्नम् एकेनैव विधिरूपेणाख्यातप्रत्ययेनावगमात् । कामयोगादपि[3] स्वर्गस्यैव भाव्यत्वम्

---

१) कर्म (sic!) च marg. २) सप्तमपञ्चिकायां षोडशे marg. ३) किमयो° २.

यागहोमादि तु तत्साधनम् · तथा हि किं स्वर्गकामो यागायोपदिश्यते यथा लोहितोष्णीषाः प्रचरन्तीति यदि वा यागः स्वर्गकामाय यथा मलिनः स्नायाद्बुभुक्षितोऽश्नीयादिति । तत्र यदि स्वर्गकामः कर्मणऽउपदिश्यते उपदिष्टोऽपि न प्रवर्तते · को हि परार्थं प्रयासमातिष्ठेत · तथा च कर्मचोदनानर्थिकैव भवति । अथ यागः स्वर्गकामार्थः ततोऽसौ पुरुषस्योपकरोति तं पुरुषः स्वार्थेन करोतीति · तथा च कर्मचोदनार्थवती भवति · तस्माद्यागः स्वर्गकामस्योपकारकः । स्वर्गकामस्यानेक उपकारः पुत्रपशुग्रामान्नाद्यादिलाभरूपः · स यदि तत्रान्नाद्यादीनामन्यतमं करोति ततः स्वर्गशब्दोऽविवक्षितार्थः पुरुषमात्रवचनो भवति · तथा चानर्थकमेव · अन्तरेणापि हि तद्वचनं पुरुषमात्रमाख्यातादवगम्यते · तस्मात् यागात्स्वर्गो भवतीति निश्चीयते । अतश्च स्वर्गकामो यागेन कुर्यादिति वाक्यार्थः · अत्र स्वर्गं प्रार्थयमानस्यानुष्ठानमनूद्य यागस्तस्योपायत्वेन विधीयते · अतः स्वर्गादिकं यागादेः फलमिति सिद्धम् · फलवन्ति कर्माणीति च । अतः कर्मणां फलवत्त्वात्कर्मजन्यफलभोक्तृत्वापरपर्यायोऽधिकारोऽपि पुरुषस्याग्निहोत्रादिकर्मसु सिध्यति ॥ ॥ अधिकारो वक्ष्यतऽइति प्रतिज्ञातम् · स केषामित्यपेक्षायामाह ·

सर्वेषामविशेषात् ॥३॥ सर्वेषां कर्मानुष्ठानसमर्थानामसमर्थानां चान्धमूकपङ्गुबधिरदेवऽऋषितिरश्चां कर्मस्वधिकारो भवति · अविशेषात् फलार्थित्वस्य सर्वेषामविशिष्टत्वात् फलं हि सर्वैरिष्यतऽएव ॥ तत्राचेतनानां वृक्षादीनां कामनाभावादस्त्वनधिकारः · तिरश्चां तु भवति · तिर्यञ्चो हि तापोपतप्ताश्छायां व्रजन्ति शीतपीडिताश्चातपम् । ननु तिर्यञ्चः प्रत्यासन्नमेव जानन्ति न तु कालान्तरभावि फलम् वैदिकानि च कर्माणि कालान्तरफलान्येव अतः कथं तिरश्चां तत्र प्रवृत्तिः · उच्यते · कालान्तरेऽपि फलं कामयमाना दृश्यन्ते श्वानश्चतुर्दश्यामुपवसन्ति श्येनाश्चाष्टमीमिति · लिङ्गान्यपि वेदे सन्ति देवा ह वै सत्त्रमासत (४. ६. १. १.) सर्पाः सत्त्रमासत वनस्पतयः सत्त्रमासत गावो वाऽएतत्सत्त्रमासतेत्यादीनि (पञ्चविंशब्राह्मण° ४. १.) तानि च देवानां सर्पाणां वनस्पतीनां गवां चाधिकारं दर्शयन्ति । नन्वेतेऽन्धादयो यथोक्तं कर्म कर्तुं न शक्नुवन्तीति कथम-

धिकार एषाम् · उच्यते · यजेतेत्यादिप्रधानवाक्येन स्वर्गाधिकारं कर्मावगतम् तदनुसारीणि चाङ्गवाक्यानि न तत्संकोचे समर्थानि · अतश्चक्षुष्मत्त्वं प्रत्याज्यावेक्षणविधिः अचक्षुषस्तु तद्विध्यभावात्तद्रहितमेव फलसाधनम् एवं बधिरस्य वाचनरहितम् मूकस्य मन्त्रोच्चारणरहितम् पङ्गोश्च विष्णुक्रमणरहितम् इति सर्वेषामर्थिनामशक्याङ्गरहितकर्मानुष्ठानात्सिद्धोऽधिकार इति पूर्वः पक्षः । सिद्धान्तमाह ·

मनुष्याणां वारम्भसामर्थ्यात् ॥४॥ वाशब्दः पक्षव्यावृत्तौ · न सर्वेषामधिकारः किं तु मनुष्याणामेव · कुतः · आरम्भसामर्थ्यात् · मनुष्या एव हि यथाश्रुतं कर्मारब्धुं कर्तुं समर्थाः न देवऋषितिर्यगादयः । तत्र देवानां देवतान्तराभावादनधिकारः · न ह्यात्मानमुद्दिश्य त्यागः सम्भवति · किं च · देवाश्च प्राप्तस्वर्गादिकामाः · न च तेषां किंचिद्वाप्तव्यमस्ति यदर्थं कर्माणि कुर्वन्ति ॥ ऋषीणां चार्षेयाभावादनधिकारः · न हि भृग्वादयो भृग्वादिसगोत्रा भवन्ति । तन्त्रान्ते तु विशेषः अनादिर्हि कालोऽस्माकं मीमांसकानाम् तेन भृगोरपि पूर्वपूर्वभृग्वन्तरसम्भवात्ततः पूर्वमप्येवमेवेति सम्भवत्येव भृगोर्भार्गवत्वमित्यस्त्येव ऋषीणामप्यधिकारः तथा येषां शब्द एव देवता तेषामिदमयुक्तं यद्देवानां देवतान्तराभावादनधिकार इति ॥ न च तिरश्चां गवादीनामधिकारः प्रधानमात्रेऽपि सामर्थ्याभावात् आसन्नचेतनत्वाच्च · ते ह्यासन्नमेव चेतयन्ते न पारलौकिकं फलमिति । ननूक्तम् शुनश्चतुर्दश्यामुपवासदर्शनाच्छ्येनस्य चाष्टम्यामुपवासदर्शनाच्च तेऽपि पारलौकिकं जानन्तीति । तत्कथमवगम्यते एते धर्मार्थमुपवसन्तीति · ये हि वेदस्मृतिपुराणादिकं पठन्ति तऽएव जानन्ति यदनेन कर्मणा इदं फलममुत्र प्राप्यतऽइति · न चैते वेदादिकं पठन्ति नाप्यन्येभ्य आगमयन्ति तेन शास्त्रार्थमविद्वांसः फलमामुष्मिकमकामयन्तः कथं तत्साधनं कर्म कुर्युः · तस्मान्न धर्मार्थमुपवसन्तीति । किमर्थं तर्ह्येतेषामुपवासः उच्यते रोगादरुचिरेषाम् · तर्हि नियतकाले कथं रोगः उच्यते नियतकाला अपि रोगा भवन्ति यथा तृतीयकचातुर्थिकादिज्वराः । अधनाश्चैते । तस्मान्न गवादीनां तिरश्चामधिकारः ॥ यानि पुनर्लिङ्गानि देवा ह वै सत्रमासतेत्यादीनि अर्थवादास्ते विधिप्ररोचनार्थाः · इत्थं सत्राणि प्रशस्तानि यानि कृतकृत्या अपि देवा आसत आसन्नचेतनास्तिर्यञ्चोऽपि

अचेतना वनस्पतयोऽपि · किं पुनर्मनुष्या यथाश्रुतमनुष्ठातुं समर्था इति । तस्माद्यथाश्रुतकरणसामर्थ्यान्मनुष्याणामेवाधिकारो न गवादीनामिति सिद्धम् ॥ ॥ एवमपि सर्वमनुष्याणामधिकारे प्राप्तऽआह ·

अङ्गहीनाश्रोत्रियषण्ढशूद्रवर्जम्[1] ॥५॥ पामुलयम् अङ्गहीनाश्रोत्रियषण्ढशूद्रान्वर्जयित्वा मनुष्याणामधिकारः कर्मसु भवति · मनुष्या अपि ये अङ्गहीना अङ्गेन चक्षुरादिना हीना अन्धपङ्गुमूकबधिरादयः अश्रोत्रिया अनधीतवेदाः षण्ढा नपुंसकाः शूद्राश्च नैतेषामधिकार इत्यर्थः । आरम्भसामर्थ्यादित्यत्राप्यनुवर्तते · न चैतेऽङ्गहीनादयो यथाश्रुतं कर्मारब्धुं कर्तुं शक्नुवन्ति · तद्यथा न ह्यन्ध आज्यावेक्षणं कर्तुं शक्नोति मूकश्च मन्त्रोच्चारणम् पङ्गुश्च विष्णुक्रमणम् बधिरश्च प्रैषश्रवणम् · अनधीतवेदोऽश्रोत्रिय इत्युच्यते स च किमपि मन्त्रसाध्यं कर्तुं न शक्नोति · षण्ढो नपुंसकः तस्याप्यनधीतवेदत्वादद्रव्यत्वादशुचित्वाच्च नाधिकारः · शूद्रस्य चानधीतवेदत्वादनधिकारः · आज्यावेक्षणादिभिश्च विना कर्मणो वैगुण्यं भवत्येव । ननूक्तम् अशक्याङ्गरहितकर्मानुष्ठानादधिकारो भविष्यतीति · अत्रोच्यते · भवेदेवं यदि आज्यमवेक्षतऽइत्यादीन्यङ्गवाक्यानि स्वातन्त्र्येण पुरुषैः सम्बध्येरन् प्रधानवाक्यशेषवर्त्तिषाम् । तदङ्गयुक्तेन प्रधानवाक्येन तदङ्गयुक्तः क्रतुः पुरुषैः सम्बध्यमानोऽसमर्थान्परित्यज्य समर्थान्प्रति ज्ञायते · तेनान्धस्य क्रतुरेवाविहितो न त्वाज्यावेक्षणमेवाविहितमितरच्च विहितमिति मन्तव्यम् । न च प्रधानवाक्यविरोधः सर्वाधिकारानिश्चयात् विशेषाभावाद्धि सर्वाधिकारः स्यात् अस्ति च विशेषः आरम्भसामर्थ्यम् · अतः समर्थानामेवाधिकारः । यत्र तु प्रधानवाक्यविरोधो यावज्जीवं यजेतेत्यादौ तत्र यथाशक्तिप्रयोगादपि फलं भवति · तदविरोधे तु सर्वाङ्गयुक्तकर्मानुष्ठानादेव फलम् ॥ ननु आरम्भसामर्थ्यादित्यनेनैव गवादीनामिवान्धादीनामप्यधिकाराभावसिद्धेः किमर्थं पुनरङ्गहीनादिवर्जमित्युक्तम् · उच्यते · नियमार्थम् · एतेषामेवानधिकारो न निर्धनस्य · तस्य चाधिकारो भवत्येव न त्वारम्भसामर्थ्याभावादनधिकारः · अतो निर्धनोऽपि क्रत्वर्थं धनमर्जनादिना सम्पाद्यावश्यं यजेतेति । एवमन्धादिरपि यथोषधिशास्त्रा-

---

1) खण्ड १.

दिनान्धवादिकं स्फोटयितुं शक्नोति तस्याप्यधिकारो भवत्येव । पूर्वमनङ्गहीनत्वावस्थायामाहिताग्निश्चेत् पश्चाद्रोगादिनाङ्गवैकल्ये जाते काम्येष्वधिकारो न भवति नित्येषु तु यथाशक्ति कुर्वन्नधिक्रियतऽएव · अङ्गवैकल्ये सति अग्न्याधेयं न भवत्येव ॥ मण्डनः दर्शेष्टिं पूर्णमासेष्टिं सोमिज्यामग्निसंग्रहम् । अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितम् ॥ न कुर्याज्जनके ज्येष्ठे सोदरे वाथ कुर्वति । ज्येष्ठे श्रद्धाविहीने सत्यधेयं तदनुज्ञया ॥ पितुः स ह्यप्यनुज्ञाते नादधीत कदा चन ॥ ॥ हारीतः सोदराणां तु सर्वेषां परिवेत्त्वं[1] कथं भवेत् । दारैस्तु परिविद्यन्ते नाधानेन [न] चेज्ययेति ॥ कात्यायनः (कर्मप्रदीप १.६.४-६.) देशान्तरस्थक्लीबैकवृषणानसहोदरान् । वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः ॥ जडमूकान्धबधिरकुब्जवामनकुण्डकान्[2] । अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च ॥ धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा । कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यतीति ॥ तथा नाधिकारविघातोऽस्ति भिन्नोदर्येऽपि सोदरे । पङ्ग्वन्धमूकबधिरपतितोन्माददूषणे ॥ संन्यस्ते छिन्नहस्तादौ यद्वा षण्ढादिदूषणे । जनके सोदरे ज्येष्ठे कुर्यादेवाविचारयन् ॥ ॥ ननु द्रव्यवतोऽनङ्गहीनस्य समर्थस्य सतः शूद्रस्याधिकारः कथं न भवति । वेदे चैवंविधानि लिङ्गान्यपि सन्ति यैः शूद्रस्याधिकारो भवतीति गम्यते · आधावेति शूद्रस्येति (१.१.४.१२.) हविष्कृदाह्वाने · मस्तु[3] शूद्रस्येति सोमे पयोव्रतस्थाने · अष्ठीवद्घ्नं[4] शूद्रस्येति (१३.८.३.११.) पितृमेधे । नन्वनधीतत्वात्कथमधिकार इति · उच्यते · अनुपनीतस्यापि अनधीतवेदस्यापि पत्नीवद्भविष्यति । एवं प्राप्तऽआह ·

ब्राह्मणराजन्यवैश्यानां श्रुतेः ॥ ६ ॥ शूद्रस्य कुतो नाधिकार इत्यत्र हेतुः · ब्राह्मणराजन्यवैश्यानामेवाधानश्रुतेः · यतो ब्राह्मणादीनां त्रयाणामेवाधानं श्रूयते न शूद्रस्य । तथा हि वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति । अतः शूद्रस्याग्न्याधानश्रवणाभावादनग्निः शूद्रः · अतस्तस्याग्निसाध्ये कर्मण्यधिकाराभावः । नन्वन्याहितानिवाग्नीन्क्रीतलब्धानाधाय करिष्य-

---

1) ? परिवेत्त्वं २. 2) पोडकान् २. 3) दध्युदकम् marg. 4) जानुप्रमाणगर्तम् marg.

ति · मैवम् · आदधीतेत्यात्मनेपदादाधातुरेव[1] फलेन भवितव्यम् कर्मयोग्यता चाग्नीनां तत्फलम् अतोऽन्येनाहिता अन्यस्य कर्म न साधयन्ति तेनान्याहितानामग्नीनामुपादानमयुक्तम् · अतः शूद्रस्याधानाश्रवणात्तदेकोपायसाध्यानामग्नीनामभावादग्निसाध्यकर्मण्यनधिकारः ॥ अथवा ब्राह्मणराजन्यवैश्यानामेवोपनयनश्रुतेः शूद्रस्यानधिकारः । तथा हि वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमिति । उपनयनं चाध्ययनार्थम् अतोऽनुपनीतस्याध्ययनाभावादनधीतवेदत्वादनधिकारः शूद्रस्य । ननु मा भूदुपनयनम् अनुपनीतोऽपि पठिष्यति · मैवम् · शूद्रस्य वेदाक्षरश्रवणे उच्चारणे धारणे च प्रायश्चित्तस्य दर्शनात् · श्रवणे त्रपुजतुभ्यां श्रोत्रपूरणम् उच्चारणे जिह्वाछेदः धारणे च शरीरभेद इति · तथा यद्यु वा ऽएतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येयमिति शूद्रसमीपेऽप्यध्ययनं प्रतिषेधति । ननु तर्हि आधावेति शूद्रस्येत्यादीनां लिङ्गानां का गतिः · उच्यते · रथकारविषयाणि तानि · रथकारस्य हि कर्मस्वधिकारं वक्ष्यति रथकारस्याधानऽइति (१.१.९.) · स च शूद्रासम्बन्धाच्छूद्रः कथ्यते तस्य मातामही शूद्रेति ॥ ॥ अथ ब्राह्मणो यजेत स्वर्गकामो यजेतेत्येवमादिविधिदं संदिह्यते · किं ब्राह्मणं स्वर्गकामं च पुरुषमेवाधिकृत्य यजेतेत्येष शब्द उच्चरितः उतानियमः स्त्रियं पुमांसं वेति । किं तावत्प्राप्तम् · पुंलिङ्गनिर्देशात्पुरुषस्यैवाधिकारः · कुतः · अत्र लिङ्गस्य प्रकृत्यर्थतया विवक्षितत्वात् यथा ग्रहं संमार्ष्टीत्यत्र · अतः पुरुषस्यैवाधिकारो न स्त्रियाः । अद्रव्यत्वाच्च · यतः स्त्री निर्धना अतः सा द्रव्यत्यागात्मकं कर्म कर्तुं कथं शक्नोति द्रव्याभावात् · द्रव्याभावश्च भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनमिति स्मृतेः (मनु॰ ८. ४१६.) । तस्मात्पुरुषस्यैवाधिकार इति प्राप्तऽआह ·

स्त्री चाविशेषात् ॥७॥ स्त्री च अग्निहोत्रादिकर्मस्वधिकारिणी भवति · कुतः · अविशेषात् · यतः स्वर्गकामो ब्राह्मण इत्येतत्पुंलिङ्गं श्रूयमाणमपि निर्विशेषकरम् यत इदमुद्दिश्यमानस्य विशेषणम् यः स्वर्गकामः स यजेतेत्येवम् तेन विधिसंस्पर्शाभावादविवक्षितम् · अतो न पुरुषस्यैवाधिकारः किं तु स्त्रिया अपि

---

1) आधानकर्तुः marg.

। अथवा अविशेषात् इति स्वर्गकामत्वाविशेषादित्यर्थः · तदुक्तं जैमिनिना (६. १. १६.) फलोत्साहाविशेषादिति ॥ ननूक्तम् निर्धनत्वान्नाधिकार इति · नैवम् · धनवती हि सा　तस्या अपि कर्तनादिना द्रव्यार्जनसम्भवात् पितृभ्रातृभर्त्रादिदत्तसंभवाच्च पत्यार्जितस्योभयसाधारणत्वाच्च · धर्मे चार्थे च कामे च नातिचरितव्या · पाणिग्रहणाद्धि सहत्वं कर्मसु · तथा कर्मफलेषु द्रव्यपरिग्रहेषु चेत्यादिस्मरणात् । ननूक्तं यत्ते समधिगच्छतीत्यादिकम् · तत्रोच्यते · स्मृतिप्रामाण्यान्निर्धनया भवितव्यम् श्रुतिविशेषात्फलार्थिन्या यष्टव्यम् · यदि स्मृतिमनुरुध्यमाना परवशा निर्धना च स्यात् यजेतेत्युक्ता सती न यजेत · तत्र स्मृत्या श्रुतिर्बाध्यते · न चैतद्युक्तम् · तस्मात्फलार्थिनी सती स्मृतिमप्रमाणीकृत्य द्रव्यं परिगृह्णीयात् यजेत चेति · अतः स्मर्यमाणमपि निर्धनत्वमन्याय्यमेव श्रुतिविरोधात् · अतो निर्धनत्वप्रतिपादकं वचनमस्वातन्त्र्यपरं व्याख्येयम् · तस्मात्स्त्रिया अपि फलार्थित्वाविशेषाद्धनवत्त्वाच्चाधिकारो भवति ॥

दर्शनाच्च ॥ ८ ॥　　दृश्यते चायमर्थो वेदे　यत्पत्न्यपि कर्मस्वधिक्रियतऽइति । मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीमिति　पत्नी लीढऽइति (७. ४. ३४.) पत्नी च गार्हपत्ये तूष्णीमिति (५. ५. ३६.) च । अत्र योक्त्रादिविधिपरेषु वाक्येषु पत्न्या अपि कर्मस्वधिकारदर्शनात्पत्न्यप्यधिक्रियतऽइत्युक्तम् । अथवा वेदे पत्न्या अपि धनवत्त्वादर्शनाच्च पत्न्यधिक्रियते · तथा हि　भसदा पत्नीः संयाजयन्ति भसद्वीर्या हि पत्न्यो भसदा वाऽएताः परगृहाणामैश्वर्यमवरुन्धतऽइति ॥　एवं पत्न्या अधिकारे सिद्धऽइदं चिन्त्यते · किं पत्नी पृथग्यजते यजमानश्च पृथक् उतोभौ सम्भूय यजेयातामिति । किं प्राप्तम् · पृथक्पृथगिति · कुतः · यजेतेत्याख्यातप्रत्ययगताया एकत्वसंख्याया उद्देश्यगतत्वाभावेन विवक्षाया वारयितुमशक्यत्वात् अत एककर्तृत्वसिद्धये यजमानेन पत्न्या च पृथक्पृथग्यागः कर्तव्य इति पूर्वः पक्षः । सिद्धान्तस्तु · न पृथग्यागः कार्यः · कुतः · वैगुण्यप्रसङ्गात् · दर्शपूर्णमासादावाज्यस्य पत्न्यवेक्षणं यजमानावेक्षणं चेत्युभयमाम्नातमस्ति · तत्र पृथक्प्रयोगे क्रियमाणे यजमानकर्तृके यागे पत्न्यवेक्षणं लुप्येत पत्नीकर्तृके च यजमानावेक्षणम् तस्माद्वैगुण्याय सहैव दम्पती यजेयाताम् । ननु पृथगपि यजमानः पुमानध्वर्या-

दिव्यत्वपरिक्रयेणाद्याविक्षणार्थं पत्नीं सम्पादयिष्यति स्त्री च यजमानम् · मैवम् · स्वामिनः परिक्रयणासम्पत्तेः · न हि या काचित्स्त्री पत्नीशब्दवाच्या · यज्ञस्वामिनी हि सा · पत्युर्नो यज्ञसंयोगऽइति पाणिनिस्मरणात् (४. १. ३३.) · एवं यजमानशब्दमपि यज्ञस्वामिन्येव स्मरन्ति · तस्मात्सहैव कर्तृत्वमुभयोः । न च यजेतेत्येकत्वं विरुद्धम् · अग्नीषोमौ देवतेत्यत्र यथा व्यासक्तयोर्देवतात्वाद्देवतैक्यम् तथा दम्पत्योरेकमेव कर्तृत्वमित्यङ्गीकारात् · अनयोर्हि उद्वाहकालऽएव द्रव्यसाधारण्यमुक्तम् धर्मे चार्थे च कामे च नातिचरितव्येत्यनेन · अतो यस्त्यागः स इतरेतरसंसृष्टयोरेव दम्पत्योः न हि साधारणमेकेन त्यक्तुं शक्यते । ननु साधारणमपि धनं विभज्य पृथग्यागः सम्भवति · मैवम् · यतस्तयोर्विभागः प्रतिषिद्धो　न भर्त्रा सह विभजेदिति · तस्मान्न विभज्य यागः । अतो द्रव्यसाधारण्यात् विभागप्रतिषेधात् धर्मे चार्थे च कामे च नातिचरितव्येति वचनात् पृथक्प्रयोगे प्रागुक्तवैगुण्यापत्तेश्च स्वामिभ्यां समुच्चिताभ्यामवेक्षितस्याज्यस्य कर्माङ्गत्वाच्च न पृथक्कर्तृत्वम् किं तु सहैव । एवं च यजमानविद्वत्तयैव पत्न्या अपि कार्यसिद्धेर्नाविद्वत्तया तस्या अधिकारभङ्गः । अत एव सूत्रकारोऽनुचरीर्वा फलाधिकारादितरासामिति (२०. ८. २८.) पत्न्या अपि फलं दर्शयति · श्रुतिरपि　दिवि ज्योतिरजरमारभेतामिति · तथा च स्मृतिः (मनु ५. १५५.) नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् शुश्रूषयति भर्तारं तेन स्वर्गे महीयतऽइति [1] ॥　एवं दम्पत्योः सहाधिकारे तुल्यफलत्वे च सिद्धऽइदं चिन्त्यते · किं सर्वं याजमानं पत्न्यापि कर्तव्यम् उत यावदुक्तमाशीर्ब्रह्मचर्यादिकमिति । किं प्राप्तम् · तस्या अपि यजमानेन तुल्यत्वात्सर्वं याजमानं तयापि कर्तव्यमित्येवं प्राप्ते ब्रूमः । अत्र जैमिनिसूत्रम् (६. १. २५.) तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वादिति · तस्या यावदुक्तं स्यात् · कुतः · अतुल्यत्वात् यजमानस्तु पुमान्विद्वांश्च · पत्नी च स्त्री चाविद्या च । अतः क्रत्वर्थेषु यानि यजमानग्रहणानि　तद्यथा　यजमानो वेदं बध्नाति　पात्राण्यासादयति　शुक्रमन्वारभतऽइत्यादीनि　तत्र यजमानस्योपादेयत्वादेकवचनं विवक्षितम् · अतस्तत्र न पत्न्याः कर्तृत्वम् । एवमेव　पत्न्याज्यमवेक्षते　अद-

[1]) उपोषितं । पतिं शुश्रूषते येन तेन, Manu.

स्मै नर इत्येनमवेक्षते पत्नी इत्यादौ (१०. ५. ४.) पत्न्या एव कर्तृत्वम् न यजमा-
नस्य · उक्तादेव हेतोः । यानि च कर्तव्यानि समन्त्रकाणि तेष्वविद्वत्त्वात्पत्नी न
स्यात् · स्त्रीणामध्ययनप्रतिषेधात्सा मन्त्रोच्चारणं कर्तुं न शक्नोति · न चान्यथानु-
पपत्त्या तस्या अप्यध्ययनं कल्पयितुं शक्यते · सम्पन्नविद्येन पुंसा तेषामनुष्ठान-
सिद्धेः · यदि कर्तव्यं तदेव न येन केनचित्कर्तव्यम् · अतोऽनुपपत्तेः क्षीणत्वात्प्र-
तिषिद्धस्य पत्न्या अध्ययनस्य पुनःप्रसवे न किंचित्प्रमाणमस्ति · तस्मात्तदपि पत्न्या
न कर्तव्यम् । याश्चाशिषो यच्च ब्रह्मचर्यं तत्पुरुषं प्रति गुणभूतम् न तत्रान्यतरेण
कृते सिध्यति अन्यतरस्य संस्कारो हीयते · न च तत्र यजमानस्योपादेयत्वेन
श्रवणम् तस्माल्लिङ्गमप्यविवक्षितम् अत आशीर्ब्रह्मचर्यमुभयोः । आशीःशब्देनात्र
संस्कारा लक्ष्यन्ते व्रत्याशनाधःशयनपावनाक्ष्यञ्जनाभ्यञ्जनादयः · ते ह्युभयोर्भवन्ति
। संस्कारेष्वपि पत्न्या वपनं न भवति · कुतः · वपनविधौ केशश्मश्रु वपतऽइति
(२. १. ३.) समाहारद्वन्द्वोऽयम् · तत्र केशश्मश्रुणोरितरयोगे सति शास्त्रोक्तं वपनं
न सम्पद्यते · न च पत्न्यास्तयोः साहित्यमस्ति श्मश्रुभावात् · अतस्तस्या न
वपनमसामर्थ्यादिति तन्त्रान्ते । ब्रह्मचर्यग्रहणं कामानां लक्षणार्थम् ब्रह्मचर्यस्या-
शीर्ग्रहणेनैव लक्षितत्वात् · कामा अपि पत्न्या भवन्ति तदभावेऽधिकारानुपपत्तेः
। येऽप्यमन्त्रकाः कर्तव्यास्तेष्वपि यजमान एव कर्ता विद्वत्वात् स्वतन्त्रत्वाच्च · अतः
सर्वं समन्त्रकममन्त्रकं च याजमानं यजमानेनैव कर्तव्यम् आहृत्यविहितं त्वाज्या-
वेक्षणादि पत्न्या कर्तव्यम् नान्यत् ॥ ॥ तदेवमङ्गहीनादिवर्जितानां ब्राह्मण-
क्षत्रियवैश्यानां पत्नीसहितानामग्निहोत्रादिकर्मस्वधिकार उक्तः । अथ रथकार-
स्याधिकारमाह ·

रथकारस्याधाने ॥१॥ रथकारस्याधानेऽग्न्याधेयकर्मणि अधिकारो भवति ·
वर्षासु रथकार आदधीतेति श्रुतेः । अत्रेदं संदिह्यते · किं त्रैवर्णिकाणामन्यतमो
रथकरणयोगाद्रथकारः आहोस्विन्नियतं किंचिज्जात्यन्तरमिति । किं तावत्प्राप्तम् ·
त्रैवर्णिकानामन्यतम एवेति · कुतः · सोऽपि हि रथं करोतीति योगाद्रथकार
इत्युच्यते · तस्य च त्रैवर्णिकत्वादाधानं प्राप्तमेव ऋतुमात्रं विधेयम् · तथा सत्ये-
कार्यविधानाद्वाक्यभेदो न भवति लाघवं च । जात्यन्तरपक्षे तु तस्याधानं विधा-

तव्यम् ऋतुसम्बन्धश्च · तथा सति　वर्षास्वादधीत　रथकार आदधीतेत्येवं वाक्यभेदः स्यात् । अपि च शूद्रस्त्वसामर्थ्यात्प्रतिषिद्धः । तस्मात्त्रैवर्णिकानामन्यतम एवेति पूर्वः पक्षः । सिद्धान्तमाह ·

नियतं च ॥ १० ॥　　चो वार्थे · वाशब्दश्च पूर्वपक्षनिरासार्थः । न त्रैवर्णिको रथकारः तस्य शिल्पोपजीवनस्य प्रसिद्धत्वात् · किं तु नियतं जात्यन्तरमेव ॥ तत्र केचिदेवमाहुः · वैश्यायां क्षत्रियादुत्पन्नो माहिष्यः　शूद्रायां वैश्यादुत्पन्ना करणी　तस्यां करण्यां माहिष्यादुत्पन्नो रथकार इति । तदुक्तं स्मृतौ　माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात् शूद्रायां करणो वैश्यादिति । याज्ञवल्क्योऽपि (१. ९२.) वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः · विन्नासु विधिना परिणीतासु । तथा (१. ९. ५.) माहिष्येण करण्यां तु रथकारः प्रजायतऽइति । अतो रथकारशब्द एवंविधसंकरजातौ रूढः · रूढिश्च योगाद्बलीयसीति न्यायाद्रथं करोतीति योगं बाधित्वा जात्यन्तरमेव रथकारशब्देनोच्यते । तस्येदमाधानं कालविशिष्टं विधीयते · विशिष्टविधानाच्च वाक्यभेदोऽपि न भवति ॥　अपरे त्वाहुः · रथकारशब्देनात्र सौधन्वनानां ग्रहणम् ऋभूणां त्वेत्याधानमन्त्रवर्णात् (४. ३. ५.) · सौधन्वनाश्च ऋभवः　सौधन्वना ऋभव इति (ऋक्संहिता ३. ६०. ४.) सामानाधिकरण्यनिर्देशात् · तथा चाह मनुः (१०. २३.) व्रात्यात्तु जायते वैश्यात्सुधन्वा चार्य एव च　कारुषश्च[1] विजन्मा च मैत्रः सात्वत एव चेति । अतो मनूक्तो यः सुधन्वा व्रात्यवैश्यपुत्रः तत्पुत्राणां सौधन्वनानामृभूणामेवात्राधिकारः · यस्तु याज्ञवल्क्येनोक्तो न तस्याधिकारः · सत्यपि रथकारशब्दवाच्यत्वे मन्त्रवर्णाच्छागन्यायेन सौधन्वनानामेवाधिकार इति । तथा च जैमिनिः (६. १. ४६.) सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात्प्रतीयेरन्निति · सौधन्वना नाम जातिः · हीनास्ते किंचित्त्रैवर्णिकेभ्यो जात्यन्तरम् न च ते शूद्रा न वैश्या न क्षत्रिया न ब्राह्मणा इति · तेषामिदमाधानम् · कथम् · प्रसिद्धेर्मन्त्रवर्णाच्च · मन्त्रवर्णो हि भवति　सौधन्वना ऋभव इति · ऋभूणां त्वेति (४. ३. ५.) च रथकारस्याधानमन्त्रः · तस्मात्सौधन्वना

---

1) वा भारुषश्च २.

ऋभवश्च रथकाराः · अपि च तं नेमिमृभवो यथेति च ये नेमिं नमन्ति ते ऋभव इत्युच्यन्ते रथकाराश्च नेमिं नमन्ति · तस्मादत्रैवर्णिकानामशूद्राणामेतदाधानमिति शवरस्वामिनः ॥ ॥ ननु विद्याभावेन सौधन्वनानामसमर्थतयानधिकारात् त्रैवर्णिक एवावयवव्युत्पत्त्या रथकारशब्देन किमिति न गृह्यते · सोऽपि हि रथकारो भवति · तस्य चाधानं प्राप्तमेवानूद्य ऋतुमात्रविधानाल्लाघवं भवति जात्यन्तरे तु विशिष्टविधानाद्गौरवं स्यादित्याशङ्कायामुत्तरमाह ·

नाभावादिति वात्स्यः ॥ ११ ॥ वात्स्य ऋषिरित्याह · न त्रैवर्णिको रथकारः · कुतः · अभावात् त्रैवर्णिकस्य रथकारस्याभावात् · कथमभावः यौगिकोऽयं शब्दो रथं करोतीति रथकार इति · तेन यावत्कालं रथकरणसम्बन्धस्तावत्कालं रथकार इत्युच्यते न सर्वदा · अतस्त्रैवर्णिकस्य रथकारस्याभावाद्विद्यारहितस्यापि ऋभुसौधन्वनसावतापरपर्यायस्य जात्यन्तरस्य रूढ्यावगतस्य वचनादाधानेऽधिकारो भवति ॥ अत्र पार्थसारथिमिश्रा आहुः [1] रथकारस्यैव ऋभुसौधन्वनसावताख्यपरनामधेयस्याधानान्तरं वर्षासु विधीयते वचनात् न हि वचनस्य किंचिदशक्यमस्ति · तेन तावद्रूढिबलेन योगं बाधित्वा सौधन्वनानामाधाने विहिते तद्बलेनैव यथाकथंचित्तन्मात्रौपयिकं विद्यार्जनमपि विनोपनयनमाक्षिप्यते · स्वाध्यायविहिताध्ययनाङ्गत्वादुपनयनस्य रथकारस्य तदभावादाधानविधिनैव विद्यार्जनमाक्षिप्यते · न चास्याधानसम्भवेऽपि क्रत्वधिकारः सम्भवति

1) This quotation is not taken from the Çástradipiká of that author, where we read only the following words: वसन्ते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति विधाय श्रूयते वर्षासु(!) रथकार आदधीतेति · तत्किं ब्राह्मणादीनामेव रथकरणे निमित्ते वर्षाविध्यर्थम् उत रथकारसंज्ञिकस्यावान्तरवर्णस्याधानान्तरविधानमिति संशये द्विजातीनां विद्वत्वात्कालमात्रविधाने च लाघवात्तेषामेव कालविधिर्नाविदुषोऽवान्तरवर्णस्य विशिष्टाधानविधिरिति प्राप्ते रूढिबलेन योगबाधाद्वचनबलाच्चाविदुषोऽप्यधिकारप्रतीतेरविघाता(?) ऋभूणां त्वेति च मन्त्रवर्णादृभुसौधन्वनपर्यायस्यावान्तरवर्णस्य रथकारस्येदमाधानं विधीयते. This being all Párthasárathimiçra says there, the total difference of the two texts infers, that the quotation as given by Deva is taken from an other hitherto unknown work of Párthasárathimiçra, I mean the Tantraratna, which is quoted so often by Deva, though once only (at ७. १. २.) under his name as the author's.

विद्याभावात् · आधानविधिस्तु तावन्मात्रोपक्षीणत्वान्न क्रतुष्वधिकारं कल्पयितुमर्हति · तेन प्रधानकर्मैव तस्याधानं विश्वजिदादिवत्कल्प्यफलम् · न चास्याहवनीयाद्युत्पादकत्वम् अर्थकर्मत्वेनाग्निसंस्कारार्थत्वाभावात् · किमिति पुनः संस्कारार्थत्वं न भवति क्रत्वधिकाराभावेनाग्नीनामनुपयोगित्वेन संस्कारानर्हत्वात् · तस्मादाधानं प्रधानकर्म रथकारस्य विधीयतऽइति ॥

रथकारस्याधानऽइत्येवमादीनां सूत्राणामपरा व्याख्या · रथकारस्याधाने ॥९॥ ऽधिकारो भवति तत्र श्रुतत्वादित्युक्तम् · रथकारशब्दस्तु जात्यन्तरऽएव रूढः अतो यौगिकाशङ्कैव नास्ति । अतः प्रकारान्तरेण व्याख्यानं क्रियते · रथकारस्य किमाधानमात्रेऽधिकार उत त्रैवर्णिकवत्सर्वकर्मस्वपीति · तत्र वर्षासु रथकार आदधीतेति श्रवणादाधानमात्रेऽधिकार इति प्राप्तऽआह · नियतं च ॥१०॥ तस्य रथकारस्य नियतं नित्यं कर्माग्निहोत्रदर्शपौर्णमासादिकं भवति · चकारात्काम्यं नैमित्तिकं च । कुतः आधानश्रवणात् आधानं हि तस्य श्रुतम् तच्च गार्हपत्याद्यग्नीनामुत्पादकम् अग्नयश्च कर्मार्थमेवोत्पद्यन्ते स्वतोऽपुरुषार्थत्वात् · अतः कर्मार्थाग्न्युत्पादकाधानविधानादेवैवमवसीयते यदस्य सर्वकर्मस्वधिकारो भवतीति । एवं प्राप्तऽआह · नाभावादिति वात्स्यः ॥११॥ रथकारस्य सर्वकर्मस्वधिकारो भवतीति यदुक्तम् · तन्न · कुतः · अभावात् रथकारस्योपरितनकर्मसु लिङ्गाभावात् · इति वात्स्य आचार्य आह । यतो रथकारस्य कर्मसु लिङ्गानि न सन्ति · त्रैवर्णिकानां त्वाधानं श्रुतम् कर्मसु लिङ्गानि च सन्ति एहीति ब्राह्मणस्यागह्याद्रवेति वैश्यस्य च राजन्यबन्धोश्चेति (१.१.४.१२.) तथा पयो व्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येति (७.४.२७.) · एवम् इदं रथकारस्येत्येवं कुत्रापि कर्मणि लिङ्गं नास्ति तेनास्योत्तरकर्मस्वनधिकारो वचनाच्चाधानमात्रं भवतीति गम्यते । एवं प्राप्तऽइदमेव सूत्रं पुनः पठित्वा परिहारत्वेन व्याख्यायते · लिङ्गाभावादनधिकारो रथकारस्य कर्मस्विति यदुक्तम् · तन्न · कुतः · अभावात् लिङ्गाभावस्यैवाभावात् लिङ्गसद्भावादित्यर्थः · कानि पुनस्तानि लिङ्गानि ये रथकारस्यापि कर्मस्वधिकारोऽवसीयते · उच्यते · आधावेति शूद्रस्य (१.१.४.१२.) अष्ठीवद्घ्नं शूद्रस्य (१३. ८.३.११.) मस्तु शूद्रस्येति ·

शूद्रासम्बन्धाद्रथकारोऽत्र शूद्रशब्देनाभिधीयते   तस्य हि मातामही शूद्रेति · चतुर्थवर्णस्य मुख्यस्य शूद्रस्य तु प्रतिषेध उक्तः शूद्रवर्जमिति (१.१.५.) · तेनैतानि गौणशूद्रविषयाणीति · रथकारस्याधानमात्रेऽधिकारपक्षे एतानि लिङ्गानि निर्विषयाण्येव स्युः · तस्माद्रथकारस्योत्तरकर्मस्वप्यधिकार इति सिद्धम् । तथा चोक्तं याज्ञवल्क्यस्मृतिविवृतौ मिताक्षरायां विज्ञानेश्वरेण (१.९२.) क्षत्रियेण वैश्यायामुत्पादितो[1] माहिष्यः · वैश्याच्छूद्रायामुत्पादिता[2] करणी · तस्यां माहिष्येणोत्पादितो रथकारो नाम जात्या भवति · तस्य चोपनयनादि सर्वं कार्यं वचनात् · यथाह शङ्खः   क्षत्रियवैश्यानुलोमान्तरोत्पन्नो रथकारस्तस्याध्ययनेज्यादानोपनयनसंस्कारक्रियाश्चाप्रतिषिद्धा[3] रथसूत्रं वास्तुविद्याध्ययनवृत्तिता चेति ·   रथसूत्रं रथविद्येति मञ्जर्यां व्याख्यातम्[4] । अतो याज्ञवल्क्योक्त एव रथकारोऽत्र ग्रहीतुं न्याय्यः · तस्य च शङ्खोक्तेर्यज्ञादिकर्मस्वधिकारः · तथा सति आधावेति शूद्रस्येत्यादीनि वेदवाक्यानि सार्थकानि भवन्ति · सौधन्वनपर्याये रथकारे गृह्यमाणे तेषां वैयर्थ्यमेव स्यात् न च तदिष्यते · तस्माद्याज्ञवल्क्योक्तमेव युक्तम् श्रुतिसंमतत्वादिति ॥

निषादस्थपतिर्गावेधुकेऽधिकृतः ॥१२॥   निषादस्थपतिर्गावेधुके चरावधिकृतः अधिकारी भवति । एवं हि श्रूयते · यस्य रुद्रः प्रजाः शमयेत्स वास्तुमध्ये रौद्रं गावेधुकं चरुं निर्वपेदित्येतामिष्टिं प्रक्रम्य श्रुतम् एतया निषादस्थपतिं याजयेदिति निषादस्थपतिर्यजेतेत्यर्थः ॥ तत्रायं संदेहः · किमत्र षष्ठीसमासः निषादस्य स्थपतिर्निषादस्थपतिरिति   निषादश्चासौ स्थपतिश्च निषादस्थपतिरिति कर्मधारयो वा । तत्र यदि षष्ठीसमासः तदा यो द्विजातिरेव विद्वान्निषादानामाधिपत्यं करोति तस्यात्राधिकारः · यदि च कर्मधारयः तदा निषाद एव यः स्थपतिस्तस्यात्राधिकार इति । तत्र त्रैवर्णिकस्यैव समर्थत्वाद्विद्वत्त्वादग्निमत्त्वाच्चात्राधिकारो

---

1) Thus also the Chambers- mss. of Vijnáneçvara's work: the edition reads क्षत्रियेण वैश्येन शूद्रायामु°. 2) वैश्येन शूद्राया°, edit. and mss. 3) °कारस्तस्येज्यादानोपनयनसंस्कारक्रिया अश्वप्रतिष्ठा(!) रथसूत्रवास्तुवि°, edit. and Chambers 562; the same but °कारस्तस्योपनयनसं° Chamb. 371 a. and °कारस्तस्येज्या चोपनयनसं° Chamb. 371 b. 4) तत्र तु संस्कारक्रियाश्चाप्रतिषिद्धा रथसूत्रे इत्येवं पाठः, at the margin.

युज्यते अन्यजातीयस्य निषादस्याविद्यत्वेनानग्निमत्त्वेन चासमर्थत्वात् · तस्मात्षष्ठीसमास एवायमिति पूर्वः पक्षः । सिद्धान्तस्तु कर्मधारयोऽयम् निषादश्चायं स्थपतिश्चेति · कुतः · षष्ठीसमासपक्षे निषादपदे लक्षणाप्रसक्तेः · न ह्यत्र षष्ठी श्रूयते यतः सम्बन्धः[1] प्रतीयेत अतो निषादपदेनैव षष्ठ्यर्थो लक्षणीयः · इतरस्मिंस्तु पक्षे द्वयोरपि पदयोर्मुख्यार्थतैव न लक्षणा · तस्मान्निषाद एव स्थपतिरत्राधिकारी श्रुतिबलात् अविद्वाननग्निमानपीति सिद्धम् । अपि चात्र निषादद्रव्यं दक्षिणा श्रूयते कूटं[2] दक्षिणा काणो वा गर्दभ इति · कूटं हि निषादानामिवोपकारकम् नार्याणामिति ॥

वावकीर्णिनो गर्दभेज्या ॥ १३ ॥ यो ब्रह्मचारी सन्स्त्रियं गच्छति सोऽवकीर्णी · तस्यावकीर्णिनः स्खलितब्रह्मचर्यस्य गर्दभेज्या गर्दभेनेज्या यागो गर्दभेज्या प्रायश्चित्तार्था भवति । वाशब्दो विकल्पार्थः · तेन गृह्योक्तमपि प्रायश्चित्तान्तरमाज्याहुतिद्वयरूपं विकल्पेन भवति अथापरमाज्याहुती जुहोति कामावकीर्णोऽस्मीत्यादिकम् (पारस्कर° ३. १२.) · शाखान्तरेऽभयस्य विकल्पेन श्रुतत्वात् ॥ ॥ अत्रैतद्विचार्यते · किं स्थपतीष्टिरवकीर्णिपशुश्चैतदुभयमाधानसंस्कृतेष्वाहवनीयादिषु भवति उत लौकिकेऽग्नाविति । तत्र प्रकृतित आहवनीयादिप्राप्तेराहवनीयादीनां चाधाननिष्पाद्यत्वात्स्थपतेरवकीर्णिनश्चाधानविध्यभावेऽपि इष्टिपशू आधानं प्रयोजयतः · अत एतदर्थमेवाधानेनाहवनीयादीनुत्पाद्य तेष्वेतदुभयं कर्तव्यमिति प्राप्तेऽआह ·

लौकिके ॥ १४ ॥ एतौ स्थपतीष्ट्यवकीर्णिपशू लौकिकेऽग्नौ भवतः · न ह्येमाविष्टिपशू आधानं प्रयोजयतः · आभ्यां हि तदेव गृह्यते यद्दर्शपूर्णमासाङ्गं भवति · न चाधानं दर्शपूर्णमासाङ्गम् · स्वकाले हि पुरुषसंस्कारकत्वेन तद्विहितमिति । अतो लौकिकाग्नावेवैतावनुष्ठेयौ · लौकिकमेव गार्हपत्यस्थाने स्थापयित्वा तत आहवनीयादिस्थानेषु विहृत्य स्थपतीष्ट्यवकीर्णिपशू दर्शपूर्णमासपशुवत्कर्तव्यौ ॥ अत्र विशेषविधानार्थमाह ·

भूमौ पशुपुरोडाशश्रपणम् ॥ १५ ॥ अत्रावकीर्णिनो गर्दभपशुयागे पशु-

[1] सम्बन्धश्च, marg. [2] कृत्रिमं पित्तलादि, marg. — क्रूतं २.

पुरोडाशस्य श्रपणं भूमाविव कर्तव्यम् न तु कपालेषु ॥

अप्स्ववदानहोमः ॥१६॥ अवदानानां हृदयजिह्वाक्रोडादीनां होमो ऽप्सु उदकेषु भवति नाग्नौ वचनात् । अवदानग्रहणादन्यदाघाराज्यभागहोमादिकमग्नाविव कार्यम् ॥

शिश्नात्प्राशित्रावदानम् ॥१७॥ गर्दभस्य शिश्नात्प्राशित्रावदानं कार्यम् वचनात् । न जौहवेभ्यो हृदयादिभ्यः ॥ ॥ उक्तो ऽधिकारः । अथाग्निप्रस्तावादाहवनीयाद्यग्निषु किं-किं कर्म कर्तव्यमित्यपेक्षायामाह

वैतानिकेषु सर्व७ सर्वार्थत्वात् ॥१८॥ वैतानिका वितानार्हा विहारयोग्या गार्हपत्यादयः तेषु वैतानिकेष्वग्निषु सर्वं कर्म श्रौतं स्मार्तं च कर्तव्यम् श्रौतं च हविःश्रपणहोमादिकम् स्मार्तं च पक्षादिनित्यपाकप्रकाशादिकम् । कुतः सर्वार्थत्वात् यतो गार्हपत्यादयो वैतानिकाः सर्वार्थाः कुतः यद्धि द्रव्यमुत्पत्तिकाले केनचिदर्थेनासंयुक्तमुत्पद्यते तस्य सर्वार्थतावसीयते कुतः सामर्थ्यात् समर्था हि गार्हपत्यादयः सर्वं कर्म साधयितुम् । आधानेनोत्पादितानामग्नीनां प्रयोजनापेक्षायां सामर्थ्येन सर्वाग्निकार्यार्थता विज्ञायते तस्माच्छ्रौतं च स्मार्तं च यद्गृह्यसूत्रोक्तं स्मृत्युक्तं च पाकादिकं तत्सर्वं गार्हपत्यादिषु वैतानिकेषु भवतीति ॥

दर्शनाच्च ॥१९॥ दृश्यते चायमर्थो यत्स्मार्तमपि होमपाकादिकं वैतानिकेषु क्रियतऽइति । दक्षिणाग्निं प्रकृत्य श्रूयते मांसं तत्र न पचेयुरिति अत एव प्रतिषेधात्प्राप्तिरनुमीयते प्रतिषेधस्य प्राप्तिपूर्वकत्वात् न च श्रौतो[1] मांसपाको दक्षिणाग्नौ विहितोऽस्ति यस्यैष प्रतिषेधः स्यात् यतः शामित्रेऽग्नौ विहितः अस्ति त्वविहिताप्रतिषिद्धः स्मार्तो मांसपाकः तस्यायं प्रतिषेधो विज्ञायते ॥ स्मृतावपि दर्शश्राद्धं प्रकृत्याग्नौ करणार्थमग्निमाह मार्कण्डेयः आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः अनाहिताग्निस्त्वौपासनेऽग्न्यभावे तथाप्सु चेति । शङ्खलिखितौ धूपगन्धमाल्यैरलंकृत्य ब्राह्मणान्सघृतमन्नमनुज्ञाप्य दर्भैर्दक्षिणाग्निं परिस्तीर्य जुहुयादग्नये कव्यवाहनायेत्यादि । वायुपुराणेऽपि आहृत्य

1) श्रौते २.

दक्षिणाग्निं तु होमार्थं वै प्रयच्छत इति । अतोऽस्माद्दर्शनात्स्मार्तमपि वैतानिकेषु कर्तव्यमिति पूर्वः पक्षः । सिद्धान्तमाह ·

नौपासनश्रुतेः ॥२०॥ यदुक्तम् वैतानिकेष्वेवाग्निषु श्रौतं स्मार्तं च कर्तव्यमिति · तन्न · कुतः · औपासनश्रुतेः · यत आहिताग्नेरप्यौपासनः श्रूयते पितृमेधे अद्धरेणौपासनं निरस्यतीति (२१. ४. २७) · यदि स्मार्तमपि वैतानिकेष्वेव क्रियेत तदा आहिताग्नेः पितृमेधे औपासनदर्शनं न स्यात् · अस्ति च · तस्मात्स्मार्तान्यौपासने कर्तव्यानीति । तथा च स्मृतिः (याज्ञवल्क्य° १. ९७.) कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही दायकालाहृते वापि श्रौतं वैतानिकाग्निषिति । तस्मिन्गृह्याणीत्यापस्तम्बस्मरणाच्च · गृहाय हितं गृह्यम् गृहशब्दश्च दम्पत्योर्वर्तते · तस्मिन्नित्यावसथ्ये · अतश्च यत्किंचिद्दम्पत्योर्हितं कर्म शान्तिकपौष्टिकव्रताङ्गहोमादिकं स्मार्तं तत्सर्वमावसथ्येऽग्नौ भवतीति । तथा च खादिरगृह्यसूत्रकारिकायाम् होमानात्मार्थपत्न्यर्थान्कृत्स्न औपासनेन च परार्थानिकदेशेऽग्नौ स चान्ते लौकिको भवेत् । अत एव कात्यायनः (कर्मप्रदीप° २. १. १७-१८.) न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम् स्वगर्भसत्क्रियार्थांश्च यावन्नासौ प्रजायते अग्निस्तु नामधेयादौ होमे सर्वत्र लौकिकः न हि पित्रा समानीतः पुत्रस्य भवति क्वचित् · अतश्च सीमन्तोन्नयनमपि स्मार्ताग्नावेव कार्यम् ॥ अपि च आधानेनोत्पादितानां गार्हपत्यादीनामग्नीनाम् प्रयोजनापेक्षायां सत्यां गार्हपत्ये हवींषि श्रपयत्याहवनीये जुहोति दक्षिणाग्नावन्वाहार्यं पचतीति प्रत्यक्षवचननिर्दिष्टैरेव प्रयोजनैर्निराकाङ्क्षाणाम् न सामर्थ्यमात्रेणोक्तादन्यत्र विनियोगः कल्पयितुं शक्यते । ननु मा भूत्सामर्थ्यमात्रेण विनियोगः वाक्येनैव स्मार्तेष्वपि पार्वणस्थालीपाकादिहोमेषु भवत्विति चेत् · न · न च स्मार्ता होमास्तेषु विधातुं शक्याः ते हि सदैवाधारेणावसथ्येनोत्पद्यन्ते यथा पक्षहोमादयः[1] ॥ अत्राह जैमिनिः (१२. २. ४.) सति चौपासनस्य दर्शनादिति · सति च विहारे औपासनाग्निर्दृश्यते · यः कामयेत राष्ट्रमस्यै प्रजायै स्यादिति तस्यौपासने प्रतिहितमभ्याजुहुयादिति · राजसूये प्रवृत्ते कर्मण्येतद्वचनम् · तस्मिंश्च काले वि-

1) ? पदहोमादयः २.

हारोऽप्यस्ति · यदि च विहारऽएव स्मार्तान्यपि कर्माणि स्युस्तदा कार्याभावा-दौपासनदर्शनं न स्यात् · अस्ति च · तस्मात्स्मार्तान्यौपासनऽएव कार्याणि । यद्येवम् तर्हि मांसपाकप्रतिषेधस्य का गतिरित्यत आह ·

अधिश्रयणीये मांसप्रतिषेधः ॥२१॥ य एष उक्तो मांसपाकप्रतिषेधो मांसं तत्र न पचेयुरिति सोऽधिश्रयणीयेऽहनि ज्ञेयः । नवगृहे यदा वासः क्रियते तदा तस्मिन्नेवाहनि तत्र दक्षिणाग्नेराहरणं कार्यम् नाहवनीयवत्प्रतिहोममिति विकल्पं वक्ष्यति नवावसिते वेति (४. १३. ८.) · श्रूयते च नवावसिते वै-नमाहरेयुरिति (२. ३. २. ८.) · तदा च तस्मिन्नवगृहाहृते दक्षिणाग्नावविशेषेण भोजनार्हस्यानियतद्रव्यस्य पाको विहितोऽस्ति तस्मिन्पचेयुस्तद्ब्राह्मणा अश्नी-युरिति (२. ३. २. ८.) · तत्र कदाचिन्मांससम्पत्तौ तस्यापि पाकस्तत्र प्राप्नोति · त-स्यैष प्रतिषेधो मांसं तत्र न पचेयुरिति · तथा चाह सूत्रकारः (४. १३. १.) तस्मिन्पचेयुरमांसमिति । पक्षान्तरमपि दुग्धाधिश्रयणात्मपमेतस्य विद्यते यद्यु तन्न विन्देद्यत्पचेदपि गोरेव दुग्धमधिश्रयितवै ब्रूयादिति (२. ३. २. ८.) · तेन अ-धिश्रयणसम्बन्धि अहः अधिश्रयणीयम् तस्मिन्नधिश्रयणीयऽइति अनेन नवगृ-हसम्बन्धिदक्षिणाग्न्याहरणादिनं लक्ष्यते ॥ ॥ अतः श्रौतान्येव वैतानिकेषु गार्हपत्यादिषु कर्तव्यानि स्मार्तानि त्वावसथ्येऽग्नावेवेति सिद्धम् · यस्तु स्मृतौ दक्षिणाग्नावग्नौ करणहोम उक्तः स[1] सर्वाधानपक्षे अर्धाधानपक्षे त्वावसथ्या-ग्नावेवेति तत्रैव निर्णीतमस्ति ॥ ॥ प्रथमा कण्डिका ॥१॥

अथ पद्धतिः ॥

प्रणम्य विघ्नहर्तारं गुरूंश्च श्रीपतिं[2] तथा ।
कात्यायनस्य सूत्रस्य पद्धतिः क्रियते मया ॥

तत्राग्न्याधेयादिसर्वकर्मसु ब्राह्मणक्षत्रियवैश्यानामधीतवेदानां वेदार्थज्ञानवता-मङ्गहीनाश्रोत्रियषण्ढशूद्रवर्जितानां पत्नीसहितानामधिकारो भवति । रथकारस्य च । निषादस्थपतेर्गावेधुके चरावधिकारः । ब्रह्मचारी सन्यः स्त्रियं गच्छति सो ऽवकीर्णीत्युच्यते · तस्य प्रायश्चित्तार्थायां गर्दभेज्यायामधिकारः । गावेधुकचरुरव-

१) सः २. २) श्रीपतीन् २.

कीर्णिपशुश्च लौकिकेऽग्नौ भवतः[1] · तत्रावकीर्णिपशौ पुरोडाशश्रपणं भूमौ भवति न कपालेषु · अवदानहोम उदके भवति नाग्नौ　अन्यदाघाराग्न्याविव · प्राशित्रं गर्दभस्य शिश्नादवदेयम् । श्रौतं सर्वं कर्म वैतानिकेषु विहारार्हेषु[2] गार्हपत्याहवनीयदक्षिणाग्निषु कर्तव्यम् · स्मार्तं चावसथ्येऽग्नौ ॥　॥१॥ ॥

इति प्रथमस्य प्रथमा कण्डिका ॥ ॥

कर्मणां फलवत्त्वोक्तिपूर्वकं तेष्वधिकारो निरूपितः । अधुना तस्यैव साङ्गस्य फलवतः कर्मणो निरूपणायाह ·

यज्ञं व्याख्यास्यामः ॥१॥　यज्ञो यागो यजनमिष्टिरिति पर्यायाः । यज्ञं यागं व्याख्यास्यामः · यागस्वरूपं कथयिष्यामः । तमेवाह ·

द्रव्यं देवता त्यागः ॥२॥　द्रव्यं देवता त्यागः यज्ञः । द्रव्यं पुरोडाशचरुसांनाय्यपशुसोमादिकम् · देवता अग्निसोमेन्द्रविश्वादिशब्दमयी तद्धितचतुर्थीमन्त्रवर्णान्यतमा बोध्या · तत्राग्न्यादिकां देवतामुद्दिश्य यो द्रव्यस्य पुरोडाशादेस्त्याग उत्सर्गः स यज्ञः स याग इत्यर्थः । तथा चोक्तम्　तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन चेष्यते　देवतासंगतिस्तत्र दुर्बलं तु परं-परमिति · तत्र तद्धितेन देवतासंगतिर्यथाग्नेयोऽष्टाकपालः अग्नीषोमीय उपांशुयाजोऽग्नीषोमीयः पुरोडाश ऐन्द्राग्नः पुरोडाशः ऐन्द्रं दधि ऐन्द्रं पयोऽग्नीषोमीयं पशुमालभेतेत्यादौ · चतुर्थ्या देवतासंगतिः यथा अग्नयेऽनीकवतेऽष्टाकपालम् अथ मरुद्भ्यः सांतपनेभ्यः अथ मरुद्भ्यो गृहमेधिभ्य इत्यादौ · मन्त्रवर्णेन देवतासंगतिर्यथा उत्तराघारे यथा च प्रयाजेषु । क्वचित्प्राकरणिकदेवतासम्बन्धोऽपि भवति तद्धितादीनामभावे यथोलूखले मुसल ऽइत्यत्र (३. ७. १२.) कर्काचार्याः · अत एवोच्यते यास्केन (निरुक्ति° ७. ४.) तद्येऽनादिष्टदेवता मन्त्रास्तेषु देवतोपपरीक्षा　यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्तीत्यादि । तेनैतत्सिद्धम् · देवतोद्देशेन द्रव्यत्यागो यागः　स एव प्रक्षेपाधिको होम[3] इति ॥ अथाङ्गत्वाविदकं प्रमाणद्वयमाह ·

तदङ्गमितरत्समभिव्याहारप्रकरणाभ्याम् ॥३॥　[यदितरत् प्रोक्षणाद्य]ह-

---

1) भवति २. 2) विस्तारार्हेषु २. ३. 3) देवतायै संकल्पितस्य वह्नौ प्रक्षेपो होमः, marg.

णादिकं[1] तत्सर्वं तदङ्गम् तस्य पूर्वसूत्रोक्तस्य देवतोद्देशेन द्रव्यत्यागात्मकस्यार्थात्प्रधानभूतस्य यागस्याङ्गम् उपकारकं भवति · धर्मः शेषोऽङ्गं गुण इत्येकार्थाः। कुतः कारणादङ्गं भवतीत्यपेक्षायामाह समभिव्याहारप्रकरणाभ्याम् · संशब्दो योग्यतासंनिधिवाचकः अभीत्याकाङ्क्षार्थः तेनायमर्थः समिति योग्यतासंनिधिमतामभीत्याह्नाकाङ्क्षावतां[2] पदानां व्याहार उच्चारणं समभिव्याहारो वाक्यम् तस्माद्वाक्यात् प्रकरणाच्चेत्यर्थः। तत्र वाक्यस्य तावदुदाहरणम् पौर्णमासि नेष्ट्वेन्द्राय विमृधेऽनुनिर्वपतीति प्रकरणपाठाद्विमृधस्योभयाङ्गत्वे प्राप्ते वाक्यात्पौर्णमासाङ्गता भवति · अत्र च शेषशेषिणोः साध्यसाधनभावो न श्रूयते · पदद्वयसमभिव्याहारादेव योग्यत्वमालोच्य शेषशेषित्वं कल्प्यते यथा स्वर्गकामो यजेतेति तत्र वाक्येन विनियोग इति · न ह्यत्र स्वर्गस्य साध्यत्वं यागस्य वा साधनत्वं केनचिदुपात्तम् अतः पदद्वयसमभिव्याहारादेव कल्प्यते। प्रकरणं चोभयाकाङ्क्षा · तथा हि दर्शपूर्णमासाभ्यां स्वर्गं साधयेत्कथमित्येतस्यामाकाङ्क्षायामविच्छिन्नायां वा श्रुतप्रयोजनान्यग्न्यन्वाधानादीनि ब्राह्मणतर्पणान्तानि कर्माणि पठ्यन्ते · दर्शपूर्णमासयोश्चोपकारकापेक्षा · न च दर्शपूर्णमासयोरुपकारकं किंचिद्दृश्यते न च अग्न्यन्वाधानादीनामुपकार्यं[3] किंचिद्दृश्यते · अवश्यं चोभयेनापि कुतश्चिद्भवितव्यम् · यदि तु केनचित्प्रमाणेन न ज्ञायते तदा नास्तीति बुद्धिर्भवति[4] · अस्ति च प्रमाणम · न ह्यत्यन्तसंनिकर्ष एव सम्बन्धकारणम् यदि संनिकृष्टं न लभ्यते तदा विप्रकृष्टे वेदस्य शक्तिः संचरति · तदिहोपकारकल्पनाप्रमाणं संनिकृष्टं श्रुतिलिङ्गवाक्यलक्षणमलब्ध्वा विप्रकृष्टमभ्यनुज्ञातमित्युभयाकाङ्क्षावशेनैवं विज्ञायते यद्दर्शपूर्णमासावुपकारमाकाङ्क्षतस्तन्नूनमेभिरग्न्यन्वाधानादिभिः क्रियते यच्चाग्न्यन्वाधानादयः कर्तव्यमपेक्षन्ते तद्दर्शपूर्णमासोपकार इति · न ह्युभयोरप्यन्यत्संनिकृष्टतरं भवति। यच्चान्यत्फलादि कल्प्येत तस्यान्येन सह सम्बन्धेन निराकाङ्क्षीभूतस्य नेह सम्बन्धाकाङ्क्षा विद्यते · तेनाग्न्यन्वाधानादीनां न विश्वजिदादिवत्फलकल्पनम्

---

1) There is a lacuna in २ at the beginning of this sentence: the cancelled axaras given above are supplied by mere conjecture. 2) °मता अभी° २.
3) ? °मपिकार्यं २. 4) उपकार्योपकारकत्वाभावबुद्धिः marg.

नापि दर्शपूर्णमासफलानुषङ्गः · उभयाकाङ्क्षालक्षणसम्बन्धाभावे ह्यन्यतराकाङ्क्षालक्षणः सम्बन्धो गृह्यते न सम्भवे तस्मान्नष्टाश्वदग्धरथवदेव परस्परनियमः सिद्धः । किं च अग्न्यन्वाधानादेः फलान्तरकल्पने तु क्रतोः कथमित्युपकारकाकाङ्क्षा अनिवृत्तैव स्यात् · अस्ति चासावाकाङ्क्षा यागेन स्वर्गं कुर्यादित्येवं करणत्वेन विधानात् · तदुक्तम् न हि तत्करणं लोके वेदे वा किंचिदीदृशम् इतिकर्तव्यता साध्ये यस्य नानुग्रहेऽर्थिनेति · एवमुभयोराकाङ्क्षावत्त्वे सति तत्सम्बन्धप्रतिपादकं वाक्यं कल्प्यते अग्न्यन्वाधानादिभिरुपकृतेन यागेन स्वर्गं कुर्यादित्येवम् · ततो वाक्याल्लिङ्गमग्न्यन्वाधानादिगतं सामर्थ्यं कल्प्यते · लिङ्गाच्च विनियोक्त्री श्रुतिः कल्प्यते एभिः प्रधानस्योपकारः कार्य इति ॥ ॥ ननु सूत्रकारेणाङ्गत्वे प्रमाणद्वयमेव कथमुक्तम् जैमिनिना (३. ३. १३.) तु श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यासंज्ञकानि षट्प्रमाणान्युक्तानि सन्ति · नैष दोषः · प्रमाणचतुष्टयस्य सोदाहरणस्याग्रे वक्ष्यमाणत्वात् । तत्र स्वार्थाभिधाने निरपेक्षं वचनं श्रुतिः सा त्रिविधा विधात्री अभिधात्री विनियोक्त्री च · तत्र विधात्री लिङ्ग्याद्यात्मिका अभिधात्री व्रीह्यादिश्रुतिः विनियोक्त्री त्रिधा एकाभिधानम् एकं पदम् विभक्तिरिति · यस्य हि शब्दश्रवणादेव सम्बन्धः प्रतीयते सा विनियोगश्रुतिः तद्यत्रानेकार्थाभिधानमेकेन शब्देन युगपद्भवति विभक्त्येव लिङ्गसंख्याकारकाणाम् तत्र तेषामन्वितानामिवाभिधानम् तदेकाभिधानम्[1] यथा पशुनेति पशुः करणं प्रतीयते तथैकं करणं पुमांश्चेत्यपि · अतः संख्यादेरेकशब्दोपादानलक्षणया श्रुत्या कारकसम्बन्धः प्रातिपदिकार्थस्य तु पदश्रुत्या · यजेतेत्यत्र यागस्य प्रकृत्यर्थस्यैकपदेनोपात्ततया स्वर्गादिकं प्रति करणत्वम् · विभक्तिस्तु सम्बन्धमेव साध्यत्वं साधनत्वं वा प्रतिपादयन्ती विनियोगकारणम् तत्र द्वितीया साध्यत्वं प्रतिपादयति तृतीयादयस्तु साधनत्वम् तत्र व्रीहीनवहन्तीति द्वितीया साध्यत्वेन व्रीहीनभिदधानावघातस्य[2] तेषु विनियोगकारणं भवति । सर्ववस्तुगतं सामर्थ्यं लिङ्गम् तद्यथा स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यति काष्ठेनावद्यतीति अवदानसाधनत्वेन सामान्येन

1) ? °धाने २. 2) ? °धानस्य २.

श्रुतानां लिङ्गेन वस्तुसामर्थ्यात्मकेन विशेषविनियोगो भवति · तदुक्तम् सामर्थ्यात्स्वधितिर्मांसे द्रवेषु स्यात्स्रुवस्तथा हस्तकाष्ठे पुरोडाशमवदातुं प्रकल्पत इति · मन्त्राणां च लिङ्गेन पदार्थानुसारकत्वे[1] विनियोगः । वाक्यं तु पदसंघातात्मकं प्रागुक्तम् । प्रकरणं चोभयाकाङ्क्षारूपं प्रागुक्तमेव । स्थानं क्रमः स च द्विविधः पाठसादेश्यमनुष्ठानसादेश्यं च · पाठसादेश्यमपि द्विविधम् यथासंख्याम्नानं संनिधावप्याम्नानं च । तत्राग्नीषोमीयानुष्ठानदेशे पशुधर्माणामाम्नानादग्नीषोमीयार्थत्वमनुष्ठानसादेश्यरूपेण स्थानप्रमाणेन भवति । यत्र च ब्राह्मणे क्रमेणाश्वगर्दभाजानामभिमन्त्रणानि विहितानि संहितायां च तस्मिन्नेव क्रमेऽभिमन्त्रणमन्त्राः पठिताः प्रतूर्तमित्यादयः तत्र यथासंख्याम्नानेन सम्बन्धो भवति · एवमेव शाखान्तरे ब्राह्मणे आध्वर्यवकाण्डे दर्शपूर्णमासयोस्त्रय आग्नेयादयो यागाः क्रमेण पठिताः याजमानकाण्डे च त्रीण्यनुमन्त्रणानि पठितानि तद्यथा अग्नेरहं देवयज्ययान्नादो भूयासम् अदब्धिर्नामास्यदब्धोऽहं भ्रातृव्यं दभेयम्[2] अग्नीषोमौ वृत्रहणावग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासमिति दब्धिर्घातकमायुधम् · यावति प्रदेशे ब्राह्मणे प्रधानं पठ्यते तावत्येव मन्त्रेषु मन्त्रः तयोश्चाङ्गाङ्ग्यपेक्षावेलायां यथासंख्यन्यायेन समानदेशत्वाद्बुद्धौ संनिधानं भवति · प्रथमस्य हि प्रधानस्य मन्त्रमन्विच्छन्नवश्यं मन्त्रसमाम्नायमादित आरभ्यालोचयति ततश्च प्रथमो मन्त्रः प्रथमं हृदयमागच्छति न चास्यातिक्रमहेतुरस्तीति स एव गृह्यते · तथा मन्त्रस्य शेषिणमपेक्षमाणस्य तथैव प्रक्रिययाद्येन[3] शेषिणा सह सम्बन्धो भवति ततश्च तन्निराकाङ्क्षता द्वितीयादीनामप्येवमेव द्वितीयादिभिरेव योगः · तत्राग्नेयाद्यनुमन्त्रणानामाग्नेयादिलिङ्गत्वात् तेनापि व्यवस्था सिध्यतीत्यव्यक्तलिङ्ग उपांशुयाजक्रमाधीतः अदब्धिर्नामास्यदब्धोऽहं भ्रातृव्यं दभेयमिति[4] मन्त्र उदाहरणम् । ननु चास्य प्रकरणात्सर्वार्थत्वं विज्ञायते तत्तु क्रमाद्बलीयः तत्कथमस्योपांशुयाजत्वमिति · उच्यते · येऽन्ये शेषिण आग्नेयादयस्ते विस्पष्टलिङ्गैः क्रमप्रकरणवद्भिर्मन्त्रान्तरैरवरुद्धत्वान्नैवमपेक्षन्ते · न च विकल्पोऽस्पष्टलिङ्गत्वेन

1) ?°दार्थास्मारकत्वे २· 2) ?दभेयम् २· 3) °क्ष्यमाणस्य तथैव प्रक्रियया आद्येन २·
4) ?दभेयमिति २·

वैषम्याददृष्टार्थानां समुच्चय इति चेत् न प्रकृतयागप्रत्यवेक्षणेन दृष्टार्थत्वात् · सत्यपि चादृष्टार्थत्वे निरपेक्षाणां गत्यन्तरे सति समुच्चयानाश्रयणात् आग्नेयादिभिः कृतार्थैरुपेक्षितः सन्नगत्या पुनस्तेष्वेव भवेत् अस्ति चास्य गतिरुपांशुयाज इति · किं च न चाविज्ञातलिङ्गानां प्रक्रियादिनियोजिका असीत्यस्य च सामर्थ्यं संनिधावुपसंहृतम् · अदब्धिर्नामासीत्यस्पष्टलिङ्गोऽयम् न चेदृशं सत्तं प्रकरणं विनियोक्तुं क्षमम् · अयमस्तिशब्दो युष्मदर्थविषयत्वात्संनिहितमभिमुखं चाभिधत्ते नान्यम् उपांशुयाजश्च संनिहितोऽभिमुखश्चेत्यभिधानसामर्थ्यं क्रमादुपांशुयाजवि-षयं विज्ञायते · ततश्च लिङ्गेन प्रकरणं बाध्यत एवेत्यदोषः · अतः कर्कोक्तं यत्किंचित् पितृभूत्युक्तमेव साधीयः । संनिधावाम्नानेनापि विनियोगो भवति · विकृतौ यदपूर्वमङ्गं पठ्यते तदपि मया किं कर्तव्यमित्येवं सा-काङ्क्षं भवति · प्रधानस्य तु प्राकृतैरङ्गैर्निराकाङ्क्षस्य तदपेक्षा यद्यपि नास्ति तथापि तस्यापूर्वाङ्गस्यानर्थक्यं परिहृत्य तत्प्रति प्रधानस्यापेक्षां परिकल्प्य तस्य सम्बन्धः क्रियेत यथा देवसूक्तविराडादीनामुपहोमादीनां च । समा-ख्या यौगिकी संज्ञा · हौत्रमाध्वर्यवमौद्गात्रमित्यादिका वैदिकी · प्रोक्षणी-रित्यादिका लौकिकी च · तत्राध्वर्युर्वृतमात्र एवमपेक्षते मया किं कर्तव्य-मिति तदपेक्षमाणस्य[1] यदि न कुतश्चिद्विशेषोऽवगम्यते ततो यत्किंचिदिति भविष्यतीति · तथाध्वर्यवसंज्ञितं कर्म को मे कर्ता भविष्यतीत्येवमेव विशेषमपेक्षते · तत्र शब्दार्थज्ञस्यादित एवैषोत्प्रेक्षा प्रत्येकं भवति यदस्याध्वर्योः कर्म तदाध्वर्य-वशब्दवाच्यं भवति तथाध्वर्यवस्य यः कर्ता तस्याध्वर्युर्नामेति · एवं सर्वसमा-ख्यासु वाच्यम् ॥ सूत्रकारेण चैतानि प्रमाणानि स्वस्वविषयऽउक्तानि · तथा हि काष्ठं हिरण्यं वाभिजुहुयात् श्रुतेरित्यत्र (२५. ३. २.) श्रुतिः काष्ठहिरण्ययो-र्विनियोजकत्वेनोक्ता · तेषामारम्भेऽर्थतो व्यवस्था तद्वचनत्वादिति (१. ३. ४.) मन्त्र-लिङ्गाच्चेति (१. ४. २६.) च लिङ्गमुक्तम् · वत्सज्ञानुं त्रिवृतं मूतकार्यं वा पशुब्रह्म-वर्चसान्नाद्यकामा यथासंख्यमिति (१. ३. २३.) यथासंख्यरूपं स्थानम् · प्रयाजेषु सं-निधेः (३. २. १५.) दशमे वा [संनिधेरिति] (१२. ४. ६.) संनिधिपाठलक्षणं स्थानम् ·

---

1) °विच्यमाणस्य २.

शेषमितरे यथाख्यम् (१.७.२३.) उन्नेतोन्नयति समाख्यानादिति (१.५.३१.) समाख्या
॥ एतेषां श्रुत्यादीनां परस्परविरोधऽउत्तरोत्तरस्य दुर्बलत्वम् · तदुक्तं जैमिनिना
(३.३.१३.) श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्र-
कर्षादिति । तत्र श्रुतिलिङ्गयोर्विरोधे अनपेक्षमेत्य शालाद्वार्यीपस्थानं निवेशन
इति (१७.२.६.) अत्र श्रुतिः प्रत्येत्याग्निमुपतिष्ठते (७.२.१.१८.) यदेवोपतिष्ठते
ऽयं वै लोको गार्हपत्य इति (१९.) निवेशन इति (२०.) · शाखान्तरे च ऐन्द्या
गार्हपत्यमुपतिष्ठतऽइति अत्रेन्द्रो न तस्याविति मन्त्रगतेन लिङ्गेनेन्द्रस्योपस्थानं
प्राप्नोति अग्निमिति द्वितीयाविभक्तिश्रुत्या तु गार्हपत्यस्य · तत्र श्रुतिः साक्षाद्वि-
नियोक्त्री लिङ्गं तु श्रुतिमनुमाय तद्द्वारा विनियोजकमिति विप्रकर्षाद्दुर्बलम् ·
तेन श्रुत्यैव गार्हपत्यस्योपस्थाने विनियोगः · गार्हपत्य इति गार्हपत्यचितिरू-
पोऽग्निः कुतः प्रत्येत्याग्निमुपतिष्ठतऽइति प्रकृत्य (७.२.१.१८.) एतद्वाऽएत-
दयथायथं करोति यदग्नौ सामिचितऽएतां दिशमेति तस्माऽएवैतन्निह्नुतेऽहिंसायै
(१८.) अयं वै लोको गार्हपत्य इति (१९.) च वाक्यशेषात् । एवं लिङ्गवाक्ययो-
र्विरोधे लिङ्गं बलवत् वाक्यप्रकरणविरोधे वाक्यम् प्रकरणस्थानयोर्विरोधे च
प्रकरणम् स्थानसमाख्ययोर्विरोधे च स्थानमिति ॥ ॥ तदङ्गमितरदित्यत्रेतरदित्य-
नेन पूर्वसूत्रप्रतिपादितदेवतोद्देशपूर्वकद्रव्यत्यागात्मकयज्ञादन्यल्लभ्यते · तेन देव-
तोद्देशपूर्वकद्रव्यत्यागात्मकानां प्रयाजादियागानां पूर्वाघारादिहोमानां चानेनाङ्गत्वं
न सिध्यतीत्यत आह ·

यजतयश्चाफलयुक्तास्तदङ्गम् ॥४॥ फलेन युक्ताः फलयुक्ताः फलवन्तः
न फलयुक्ता अफलयुक्ताः अफलयुक्ता यजतयः प्रयाजादियागाः चकारात्पूर्वा-
घारादिजुहोतयश्च तदङ्गम् तस्य फलवतो यागस्य प्रधानस्याङ्गमुपकारका भवन्ति
। कुतः पूर्वसूत्रोक्तात्प्रकरणादेव । ननु दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन
यागमात्रस्य फलसम्बन्ध उक्तः कुतोऽफलयुक्ता यजतय इति · अत्रोच्यते · नात्र
यागमात्रस्य फलसम्बन्ध उच्यते किं तर्हि ये यागा दर्शपूर्णमाससंज्ञास्तेषा-
मेव । के च दर्शपूर्णमाससंज्ञाः ये दर्शपूर्णमाससंयोगेनोत्पन्नाः · तद्यथा आ-
ग्नेयोऽष्टाकपालः पौर्णमास्याममावास्यायां वाच्युतो भवतीत्याग्नेयस्य दर्शपूर्णमा-

ससंयोगेनोत्पत्तिः · तथा तावब्रूतामग्नीषोमावाज्यस्यैव ताऽउपांशु पौर्णमास्यां यजतीति उपांशुयाजस्य पौर्णमाससंयोगेनोत्पत्तिः · ताभ्यामेतमग्नीषोमीयं पौर्णमासे प्रायच्छदित्यग्नीषोमीयस्य च · तथा ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामित्यनयोर्दर्शसंयोगेनोत्पत्तिः · अमावास्यां प्रकृत्य (२. ६. ४. ३.) तस्मादैन्द्राग्नो द्वादशकपालः पुरोडाशो भवतीत्यैन्द्राग्नस्य च । एते चाग्नेयादयो यागा दर्शपूर्णमाससम्बन्धाद्दर्शपूर्णमासपदेन लक्ष्यन्ते · तेषामेव च फलसम्बन्धोऽनेन दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्येन क्रियते · अत एतऽएव फलवन्तः प्रधानभूताश्च · इतरे प्रयाजादयो निष्फलाः अतः फलवतां प्रधानभूतयागानामङ्गं भवन्ति उपकारका भवन्ति प्रकरणात् · तदुक्तम्[1] फलवत्संनिधावफलं तदङ्गमिति ॥ तदङ्गमित्यनुवर्तमाने पुनस्तदङ्गग्रहणं प्रयाजादीनां केवलादृष्टार्थत्वज्ञापनार्थम् · इतराणि चाङ्गानि कानिचिद्दृष्टार्थानि कानिचिदुभयार्थानि प्रयाजादीनि त्वदृष्टार्थान्येवेति । तदुक्तम् दृष्टादृष्टोभयार्थत्वात्त्रिधाङ्गानि प्रचक्षते दृष्टार्थानि चतुर्धा स्युर्जातिद्रव्यगुणक्रियाः अदृष्टार्थं द्विधा कर्म द्व्यर्थमपि तन्मतम् दृष्टार्थेष्वपि सर्वेषु नियमादृष्टमिष्यते । इति त्रिविधमङ्गजातम् दृष्टार्थमदृष्टार्थमुभयार्थमिति । दृष्टार्थमपि जातिद्रव्यगुणक्रियात्मकम् · तत्र जातिगुणौ पशुना यजेतारुणया क्रीणातीति क्रियासाधनत्वेन विनियुक्तौ तत्साधनद्रव्यावच्छेदेन दृष्टेनैवोपकारेण तस्याः शेषभावमनुभवतः · द्रव्यस्य तु साक्षादेव क्रियानिर्वृत्तिर्दृष्टमेव प्रयोजनम् · क्रियापि चावघातादिर्दृष्टार्थैव यां संनिपत्योपकारकमाचक्षते । अदृष्टार्थत्वं तु क्रियाया एव । सा च द्वेधा · संनिपत्योपकारकरूपा प्रोक्षणादिः आरादुपकारकरूपा प्रयाजादिः । संनिपत्योपकारकाणि च दृष्टार्थानि कर्माणि स्वकारकाणां कर्मादीनामुत्पत्तिं प्राप्तिं विकारं वा कुर्वन्ति[2] तत्साध्यस्य प्रधानस्योपकुर्वन्ति · तथा संयवनं पिण्डस्योत्पत्तिम् दोहनं पयसः प्राप्तिम् अवघातो व्रीहीणां विकारम् · अदृष्टार्थं तु संनिपाति संस्कारं स्वकारकस्य कुर्वत् प्रधानोपकारि भवति · तदेवमुत्पत्त्यादिसाध्यभेदात्संनिपाति चतुर्विधं

१) see Jaimini ४. ४. ३५. यत्फलवत्त्वं तत्संनिधावसंयुक्तं तदङ्गं स्यात्· २) Nom. plur. neutr. Partic. Praes.

भवति · तच्च कर्मादीनामन्यतमे कारके यथायथमुत्पत्त्यादि करोति कर्मण्यव-घातः कर्तरि व्रतम् करणे प्रयाजशेषाभिघारणम् सम्प्रदाने पशुपुरोडाशयागः अपादाने अग्नेस्तृणान्यपचिनोतीति अधिकरणे दध्यानयनम् · आराडुपकारकं तु न कारकद्वारम् अपूर्वद्वारं तु प्रधानस्योपकरोतीति । दृष्टादृष्टार्थं च किंचि-त्कर्म · यथा पशुपुरोडाशयागः स हि त्यागांशेनादृष्टमुद्देशांशेन दृष्टं देवता-स्मरणं करोतीत्युभयार्थः · एवमेव स्विष्टकृद्यागादयोऽप्युभयार्थाः तत्रापि त्या-गांशेनादृष्टमुत्पद्यते प्रधानयागोपयुक्तहविरुत्तरार्धादि च प्रतिपाद्यते ॥ ॥ यज-तयश्चाफलयुक्ता इत्यत्र यजतिजुहोतयः प्रस्तुताः · अतस्तयोर्विवेकं पृच्छति ·

यजतिजुहोतीनां को विशेषः ॥५॥ यजतीनां यागानां जुहोतीनां होमानां च परस्परं को विशेषः को भेद इति प्रश्नः । तत्र यजतीनां विशेषमाह ·

तिष्ठद्धोमा वषट्कारप्रदाना याज्यापुरोऽनुवाक्यवन्तो यजतयः ॥६॥ उच्य-न्तऽइति शेषः । तिष्ठता होमो येषु ते तिष्ठद्धोमाः · वषट्कारेण प्रदानं येषु ते वषट्कारप्रदानाः · तथा याज्यावन्तः पुरोऽनुवाक्यावन्तश्च ये ते यजतय उच्यन्ते । अथ जुहोतीनां विशेषमाह ·

उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः ॥७॥ उपविष्टेन कर्त्रा होमो येषु तऽउपविष्टहोमाः · स्वाहाकारेण प्रदानं येषु ते स्वाहाकारप्रदानाः · यऽउपविष्टहोमाः स्वाहाकारप्रदानाश्च ते जुहोतय इत्युच्यन्ते ॥ पूर्वमग्न्यन्वा-धानादीनां प्रयाजादीनां चाङ्गत्वं सप्रमाणकमुक्तम् तानि चाङ्गान्यृत्विजः कुर्वन्तीति वक्ष्यति शेषमितरे यथाख्यमिति (१. ७. २३.) कर्माणि पुरुषाणामिति (१. ७. १४.) च । तत्रेदं चिन्त्यते · दर्शपूर्णमासज्योतिष्टोमादिषु किं त्रयोऽपि वर्णा ब्राह्मण-क्षत्रियवैश्या ऋत्विजो भवन्ति उत ब्राह्मणा एवेति । किं तावत्प्राप्तम् · त्रयोऽपि वर्णा ऋत्विजो भवेयुः कुतः प्रभुत्वात् · सर्वेऽप्यध्ययनवन्तो विद्वांसश्च अतः सर्वेऽपि कर्तुं शक्नुवन्ति · याजनाध्यापनप्रतिग्रहा ब्राह्मणस्यैव वृत्त्युपाया इति तु नियमः पुरुषार्थतया स्मर्यते न क्रत्वर्थतया तेन क्षत्रियवैश्यावार्त्विज्यं कुर्वन्तौ नियमातिक्रमात्कामं स्वधर्मात्प्रच्यवेयाताम् न क्रतोः काचिद्गुणहानिः · तस्मात्त्र-योऽपि वर्णा ऋत्विजो भवन्तीति पूर्वपक्षः । सिद्धान्तमाह ·

ब्राह्मणा ऋत्विजो भक्षप्रतिषेधादितरयोः ॥ ८ ॥ ब्राह्मणा एवऽर्त्विजो भवेयुः न क्षत्रियवैश्याः कुतः इतरयोः क्षत्रियवैश्ययोर्भक्षप्रतिषेधात् । अग्निहोत्रशेषं प्रकृत्य श्रूयते (२. ३. १. ३१.) ते होचुः को न इदं होष्यतीति प्रकृत्य तस्मात्तस्य एव कश्च पिबेत्तद्धि नाब्राह्मणः पिबदग्नौ ह्यधिश्रयन्ति तस्मान्नाब्राह्मणः पिबेदिति · किं पुनरग्निहोत्रोच्छिष्टम् यत्स्रुचि परिशिनष्टि तदग्निहोत्रोच्छिष्टमिति (३१.) · ननु स्थाल्यामपि यदवशिष्टं तदप्यग्निहोत्रोच्छिष्टमेव स्यात् नेत्याह अथ यत्स्थाल्यामिति (३१.) · यत्स्थाल्यां परिशिष्टं तद्यथा परीणहः अनसो निर्वपेत् तद्यथा कुटुम्बार्थं सर्वसाधारणं तादृशं तत्र यत्स्थाल्याम् परितो नद्धं परिश्रितं धान्यपूर्णं शकटस्योपरि स्थानं परीणट् यथा ततो हविषो निर्वापेऽपि तद्गतं धान्यं न शेषः किं तर्हि पुनरपि यागान्तरयोग्यमेव एवमेव तद्यत्स्थाल्यां पय इत्यर्थः · तस्मात्तस्यः कश्चिदकर्मसम्बन्धोऽपि पिबेत् तथापि वह्नावधिश्रितत्वादब्राह्मणो न पिबेत् ब्राह्मणस्त्वसम्बन्धोऽपि पिबेदिति । तथा शाखान्तरे तयोः सांनाय्यभक्षप्रतिषेधः श्रूयते न राजन्यो न वैश्यो वा सांनाय्यं पिबेदसोमपीथो ह्येष इति । तथा दर्शपूर्णमासयोः शाखान्तरे चतुर्धाकरणे ब्राह्मणा एव निर्दिश्यन्ते ब्राह्मणानामिदं हविः सौम्यानां सोमपानां नेहाब्राह्मणस्यास्तीति · शेषभक्षार्थं हि चतुर्धाकरणम् · शेषभक्षश्चऽर्त्विजाम् · यदि च राजन्यवैश्ययोरप्यार्त्विज्यं स्यात् न ब्राह्मणानामिदं हविः स्यात् राजन्यवैश्ययोरपि पक्षे स्यात् तत्रेदमवधारणमसंगतं भवेत् ।

दर्शनाच्च ॥ ९ ॥ श्रुतावप्ययमर्थो दृश्यते यद्ब्राह्मणा एवऽर्त्विजो भवन्ति न क्षत्रियवैश्या इति । तथा हि द्वया वै देवा देवा इत्युपक्रम्य (२. २. २. ६.) तेषां द्वेधाविभक्त एव यज्ञ आहुतय एव देवानां दक्षिणा मनुष्यदेवानां ब्राह्मणानां शुश्रुवुषामनूचानानामाहुतिभिरेव देवान्प्रीणाति दक्षिणाभिर्मनुष्यदेवान्ब्राह्मणाञ्छुश्रुवुषोऽनूचानानिति · तस्माद्दविग्भ्य एत दक्षिणा दद्यान्नानृत्विग्भ्य इति (४. ३. ४. ५.) · ऋत्विग्भ्यो यद्दीयते परिक्रयार्थं तद्दक्षिणाशब्दाभिधेयम् दक्षिणाभिर्ब्राह्मणान्प्रीणातीत्यनेन दक्षिणानां ब्राह्मणसम्बन्ध एव दृश्यते अतोऽपि ब्राह्मणा एवऽर्त्विजः । किं च दर्शपूर्णमासिक्यां चान्वाहार्यदक्षिणायां

ब्राह्मणा एव दृश्यन्ते तऽएते वै देवा अहुतादो यद्ब्राह्मणा यदन्वाहार्यमाहरति तानेव तत्प्रीणातीति · दक्षिणा चऽर्त्विग्भ्यो दीयते · तस्माद्ब्राह्मणा एव ऋत्विजो न क्षत्रियवैश्या इति सिद्धान्तः । ब्राह्मणा एवऽर्त्विज इति नियमः कर्तव्यः यतोऽब्राह्मणस्यार्त्विज्ये क्रतुवैगुण्यमेव दृश्यते । रामायणे (१. ५९. १३.) क्षत्रियो याजको यस्य चण्डालस्य विशेषतः कथं सदसि भोक्तारो हविस्तस्य सुरऽर्षय इति · तथा राजयाजकयाज्यस्य विनश्यति यथा हविरित्यब्राह्मणार्त्विज्ये हविर्विनाशः स्मृतः · तथा प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथेति स्मृतेश्च (याज्ञवल्क्य° १.११८.) । अत एवाग्न्यधिश्रितस्य भक्षणप्रतिषेधात् क्षत्रियवैश्ययोरिष्टौ यजमानभागस्यापि होम एव विहितो न भक्षणमिति ॥ ॥ इदानीमिदं विचार्यते · चित्रया यजेत पशुकामः द्वादशाहमृद्धिकामा उपेयुः स्वर्गकामस्यऽर्तपेय (२२. ८. १०.) इत्येवमादीनां फलयुक्तानां कर्मणामारम्भे किं कर्तुर्याथाकाम्यम् उतावश्यं तेषां करणमिति । तत्र विधिबलादवश्यंकरणे प्राप्तऽआह ·

फलयुक्तानामारम्भे याथाकामी फलार्थित्वात् ॥ १० ॥ फलयुक्तानां फलसम्बद्धानां काम्यानां कर्मणां द्वादशाहादीनामारम्भे कर्मणां कर्तुर्याथाकामी स्यात् कर्तुर्याथाकाम्यं भवेत् इच्छया प्रवृत्तिः स्यादित्यर्थः । कुतः फलार्थित्वात् फलमर्थयते याचतऽइति फलार्थी · यतः तस्य फलार्थिनः फलप्राप्त्यर्थं कर्म विधीयते नान्यस्य तेन यः फलं प्राप्तुं वाञ्छति स फलयुक्तानि कर्माणि तत्प्राप्त्यर्थं करोति नान्यः । काममनतिक्रम्य यथाकामम् यथाकाममित्यस्य भावो याथाकामी याथाकाम्यमित्यर्थः · ब्राह्मणादित्वाद्यथाकामशब्दस्य गुणवचनब्राह्मणादिभ्यः कर्मणि चेति (पा° ५. १. १२४.) ष्यञ्प्रत्ययः · यथा स्वभावात्तलन्तं स्त्रियां वर्तते एवं ष्यञन्तमपि क्वचित्स्त्रियां वर्तते यथौचिती वैदग्धी याथाकामीति पदवृत्तौ · तेन क्वचित्तदन्तं स्त्रियां नपुंसके च वर्तते · यदा स्त्रियां तदा ष्यञः षित्वात्षिद्गौरादिभ्यश्चेति (पा° ४. १. ४१.) ङीष् यस्येति चेत्यकारलोपः (पा° ६. ४. १४८.) हलस्तद्धितस्येति (पा° ६. ४. १५०.) यकारलोपः · यथा औचित्यमौचितीति तथैव याथाकाम्यं याथाकामीति समानार्थं रूपद्वयम् । तस्मात्फलयुक्तानां काम्यकर्मणामारम्भे कर्तुर्याथाकाम्यमिति सिद्धान्तः ॥ एवं सर्वकर्मस्विच्छयानुष्ठानप्राप्तावाह ·

न नियमनिमित्ताग्निहोत्रदर्शपूर्णमासदाक्षायणाग्रयणपशुषु प्रवृत्तेः ॥११॥

नियमः सत्यं वदेदित्यादिकः · निमित्तं कर्मविनाशादि · अग्निहोत्रं सायंप्रातर्होमः · दर्शपूर्णमासौ प्रकृतीष्टी · दाक्षायणोऽपि दर्शपूर्णमासविशेष एव · आग्रयणं नवयज्ञः · पशुर्निरूढः · एषु नियमादिषु पञ्चसु सूत्रोक्तेषु कर्तुर्न याथाकामी न याथाकाम्यम् कुतः प्रवृत्तेः शास्त्रं ह्येतेषु नियमेन पुरुषं प्रवर्तयति · अत एतेषां नियोगतोऽनुष्ठानं कर्तव्यम् नेच्छया । नियमेषु तावत् सत्यवादी स्यादधःशायी स्यादित्येवमादि शास्त्रं नियमेन प्रवर्तयति · कथम् · यदि नियमेषु याथाकाम्यं स्यात्तर्हि नियमशास्त्रमनर्थकं स्यात् शास्त्रं विनापि याथाकाम्यस्य सिद्धत्वात् · सर्वोऽपि यदेच्छति तदा सत्यं वदति अधः शेते वा · न च वेदे मात्रामात्रस्याप्यानर्थक्यमिष्यते · अतः शास्त्रस्यार्थवत्त्वाय नियमेषु न याथाकाम्यम् । निमित्ते सति यन्नैमित्तिकं विधीयते तत्रापि न याथाकाम्यम् · तद्यथा सायंप्रातर्दोहार्तविन्द्रं पञ्चशरावमोदनं निर्वपेत् (२५.५.२.) गेहदाहेऽग्नये क्षामवते पुरोडाश इत्यादि (२५.४.३६.) · यद्यत्र याथाकाम्यं स्यात्तर्हि सायंप्रातर्दोहार्तौ-गेहदाहेत्यादिनिमित्तश्रवणमनर्थकमेव स्यात् · निमित्तश्रवणं विनापि विश्वजिदादिवदैच्छिकानुष्ठानस्य सिद्धत्वात् · अतोऽत्रापि न याथाकाम्यम् । अग्निहोत्रे ऽपि न याथाकाम्यम् कुतः यावज्जीवमग्निहोत्रं जुहुयादिति श्रुतेः · नन्वग्निहोत्रस्य फलसाधनत्वं श्रूयते अग्निहोत्रं जुहुयात्स्वर्गकाम इति ततश्च फलयुक्तत्वाद्याथाकाम्यं स्यात् · अत्र कस्मिंश्चन ब्राह्मणे काम्यं प्रयोगं विधाय यावज्जीवमग्निहोत्रं जुहुयादिति पठ्यते · तत्रायं संदेहः किं यावज्जीवप्रयोगात्काम्यः प्रयोगो भिन्नः उत एक एवायं काम्यप्रयोगः स एव यावज्जीवकालपरिमित इति · तत्र यदि यावज्जीवकालः कर्मधर्मत्वेन विधीयते ततः सायं जुहोति प्रातर्जुहोतीति [1] वाक्यवशेन तत्कालसमापनमग्निहोत्रं न शक्नोति तावन्तं कालं पूरयितुमित्यर्थाज्ज्योतिष्टोमवदभ्यस्ततद्रूपमेकमेव प्रयोगं प्रतिपत्स्यते · यदि पुनर्जीवनं निमित्तत्वेनोद्दिश्य कर्म विधीयते ततो यावत्कर्तृ भाविनि नियते निमित्ते विना कामसम्बन्धेन चोद्यमानमकरणे दोषप्रसक्तेरवश्यं पुरुषेण जीवता स्वार्थ-

---

१) °होमीति २.

सिद्ध्यर्थमनर्थपरिहाराय च कर्तव्यमिति कर्तृधर्मो नियमोऽनेन वचनेन चोदितो भवति तदा च सायंप्रातःकालयोर्जीवनस्य च संहृतानां निमित्तत्वात्प्रतिदिवसं निमित्ते पर्यवसितं कर्म निमित्तावृत्तिवशात्पुनः-पुनः क्रियतऽइति प्रयोगान्यत्वमिति · तत्र किं तावत्प्राप्तम् एकः प्रयोगोऽभ्यस्तत्तद्रूपः कर्मधर्मो यावज्जीविकता · यावज्जीवशब्दो मरणावधिककालपरः तत्कालसम्बन्धश्च प्रकृते काम्याग्निहोत्रे पूर्वमप्राप्तत्वाद्विधीयते · तथा सति अस्य वाक्यस्य नित्यप्रयोगविधायकत्वाभावेन वाक्यान्तरविहितः काम्यप्रयोग एक एवाग्निहोत्रस्य पर्यवस्यति · स च काम्यप्रयोगोऽभ्यसितव्यः सकृदनुष्ठानस्याग्निहोत्रं जुहुयात्स्वर्गकाम इत्यनेनैव सिद्धेर्यावज्जीवमिति कालविधिवैयर्थ्यप्रसङ्गात् · तस्मादयं काम्यस्य कर्मणोऽभ्याससिद्धये कालरूपधर्मविधिः यावज्जीवकालमभ्यस्येदिति · तथा सति कर्माङ्गविधौ कथंभावसम्बन्धात्प्रकरणानुग्रहो[1] भवति पुरुषार्थविधौ तु तदसम्बन्धात्प्रकरणबाधः स्यात् कथम् तद्धि कथंभावात्मकं कर्मधर्ममपेक्षमाणं पुरुषधर्मे विधीयमानेऽत्यन्तं बाधितमेव भवति · एवं चैकप्रयोगे सति दीर्घसत्त्रसंस्तव उपपन्नो भविष्यति इतरथा पुनः प्रतिदिवससमाप्तेर्न किंचित्सत्त्रसारूप्यं भवेत् तस्मात्कर्मधर्मोऽभ्यास इति पूर्वपक्षः · सिद्धान्तस्तु यावज्जीवशब्दो न कालस्य वाचकः किंतु कृत्स्नस्य जीवनस्य · न च जीवनं कर्मधर्मत्वेन विधातुं शक्यते तस्य कर्तृधर्मत्वात् तं च कर्तृधर्मं निमित्तीकृत्याग्निहोत्रप्रयोगो विधीयते · इह हि यावत्कर्तृ भावि जीवनं श्रुत्यैव प्रतिपादितम् जुहोतीत्येतदपि स्वार्थविधायकमेव भवत्पक्षे तु जीवनेन कालो लक्ष्यते जुहोतिनाप्यभ्यासः · न च प्रकरणवशेन श्रुतेर्लाक्षणिकोऽर्थो वर्णयितुं युक्तः · तस्मात्कृत्स्ने जीवने प्राणधारणक्रियारूपे निमित्ते पुरुषस्य प्रत्यवायपरिहारायाग्निहोत्रप्रयोगो विधीयते · न चात्र कर्मभेदः तद्धेतूनां शब्दान्तरादीनामभावात् न चाभ्यासः अविशेषपुनःश्रुतेरभावात्[2] · अतः प्रयोगभेद एवायं पर्यवस्यति · जीवनस्य चात्र निमित्तत्वात् सति च निमित्ते नैमित्तिकस्य त्यागायोगान्नित्यत्वमप्यर्थसिद्धम् · न च जीवननैरन्तर्येण प्रयोगनैरन्तर्यापत्तिः सायम्प्रातःकालविशिष्टस्यैव जीवनस्य निमित्तत्वात् न

1) कर्माङ्गविधौ कर्मकथंभाव° the Çástradipiká at Jaimini २.४.१. 2) ?°शेषपुभश्रुते°२.

कालान्तरीयस्य · तस्मात्काम्यस्वर्गार्थप्रयोगादयं नित्यः प्रयोगो भिन्न इति सिद्धान्तः · ततश्चाग्निहोत्रेऽपि न याथाकाम्यमिति सिद्धम् · अयं तु विशेषः काम्ये प्रयोगे कृते नित्यः कृत एव भवति यतः सोऽप्यग्निहोत्रप्रयोग एव · तथा चोक्तं तन्त्ररत्ने अग्निहोत्रं जुहोतीत्येवमुत्पन्नस्य कर्मणो विपरिवर्तमानस्य निमित्ते फले च विधानान्न तावत्कर्मान्तरमिदम् नापि प्रयोगभेदः अन्तर्गतत्वात्काम्ये नित्यप्रयोगस्य काम्यनित्ययोस्तन्त्रेणानुष्ठानम् श्रुतिकृत एव त्वस्ति भेदः पृथक्पृथङ्निमित्ते फले च कर्म श्रूयते अतस्तदुपाधिक एव भेदो न वास्तवः तस्मान्नित्यकाम्ययोस्तन्त्रेणानुष्ठानं सिध्यतीति। दर्शपूर्णमासयोरपि न याथाकाम्यम् कुतः यावज्जीवं दर्शपूर्णमासाभ्यां यजतऽइति श्रवणात् · अत्राप्यग्निहोत्रवन्नित्यकाम्यप्रयोगभेदो ज्ञातव्यः तद्वदेवात्रापि वाक्यद्वयस्य श्रवणात् दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति · अत्रापि यावज्जीवकालं स्वर्गार्थं दर्शपूर्णमासाभ्यासः कार्य इति कर्मधर्मविधिः पूर्वपक्षे सिद्धान्ते तु पौर्णमास्यमावास्याविशिष्टे जीवने कर्तृधर्मे प्राणधारणक्रियारूपे निमित्ते दर्शपूर्णमासयागविधिरिति · तस्माद्दर्शपूर्णमासयोर्न याथाकाम्यम्। दाक्षायणयज्ञेऽपि न याथाकाम्यम् तस्य गुणमात्रविकृतदर्शपूर्णमासरूपत्वात् · ननु तर्हि पृथगस्य ग्रहणं न कार्यं दर्शपूर्णमासग्रहणेनैवसिद्धत्वात् अत्रोच्यते प्रजापश्वन्नयशस्कामस्येत्येवमादिफलसम्बन्धदर्शनात् (४.४.१.) काम्यत्वाशङ्काव्युदासार्थं पृथग्दाक्षायणग्रहणमित्यदोषः · प्रजादिकं फलं च गुणात् न तु दाक्षायणादिति वक्ष्यामः · अतो दाक्षायणेऽपि न याथाकाम्यम्। आग्रयणेऽपि न याथाकाम्यम् अनयोर्वाऽअयं द्यावापृथिव्यो रसोऽस्य रसस्य हुत्वा देवेभ्योऽथेममश्नामेति तस्माद्वाऽआग्रयणेष्ट्या यजतऽइति श्रवणात् (२.४.३.१.) · अत्र द्यावापृथिव्यो रसस्यान्नस्य देवेभ्यो होमानन्तरमशनं विधीयते अशनं च नित्यमवश्यं कार्यम् अन्यथा जीवनासम्भवात् न चाहुत्वैतत्कर्तुं शक्यम् हुत्वाथेममश्नामेत्युक्तत्वात् · तस्मादशनवदाग्रयणस्यापि नित्यता · तेन न याथाकाम्यम् · किं च अकृताग्रयणस्य नवान्नभोजने प्रायश्चित्तं विहितमस्ति अनिष्ट्वाग्रयणेन नवस्याश्नीयाद्वैश्वानरं निर्वपेदिति (२५.८.१६.) · तथा चाहापस्तम्बः एतामेव निर्वपेद्योऽकृत्वाग्रयणं

नवस्याग्नीयादानीतो वाऽएष देवानां य आहिताग्निरदत्यस्य देवा अन्नं यदकृत्वाग्रयणं नवस्याश्नीयाद्देवेभ्यो भागं प्रतिकृत्यमश्यादार्तिमार्छेदिति · तस्मादाग्रयणेऽपि न याथाकाम्यम् । निरूढपशावपि न याथाकाम्यम् यतस्तं प्रक्रम्यैवं श्रूयते तं वै संवत्सरो नानीज्ञानमतीयादिति (११. ७. १. ३.) षट्सु षट्सु पशुबन्धयाजीति च (१०. १. ५. ४.) · तस्मात्पशावपि न याथाकाम्यम् । अत एवाह वसिष्ठः अवश्यं ब्राह्मणोऽग्नीनादधीत दर्शपूर्णमासाग्रयणेष्टिचातुर्मास्यपशुसोमैश्च यजेतेति । हारीतोऽपि पाकयज्ञान्यजेन्नित्यं हविर्यज्ञांश्च नित्यशः सोमांश्च विधिपूर्वेण य इच्छेद्धर्ममव्ययम् । ते च गौतमेन दर्शिताः अष्टका पार्वणश्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजी चेति सप्त पाकसंस्थाः अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्था इति · पार्वणं पर्वणि क्रियमाणं स्थालीपाकलक्षणं श्राद्धं मासि मासि श्राद्धम् । मनुः (४. २५-२६.) अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोः सदा दर्शेन चार्धमासान्ते पूर्णमासेन चैव हि सस्यान्ते नवसस्येष्ट्या तथऽर्त्वन्ते द्विजोऽध्वरैः पशुना त्वयनस्यान्ते[1] समान्ते सौमिकैर्मखैः · आद्यन्ते द्युनिशोः सायं प्रातरित्यर्थः अध्वरैश्चातुर्मास्यैरिति ॥

सोमे चैके ॥१२॥ सोमे सोमयागे अग्नीषोमाख्ये न याथाकाम्यम् कुतः वसन्ते-वसन्ते ज्योतिषा यजेतेति श्रुतेः । नन्वग्निहोत्रे दर्शपूर्णमासयोश्च यावज्जीवग्रहणात्कर्तृधर्मनिमित्तत्वं भवतु सोमादिषु कथम् · उच्यते · अत्रापि वीप्सासंयुक्तं कालशास्त्रमेव निमित्तं वसन्ते-वसन्ते ज्योतिषा यजेतेत्यादिकम् · न तावदेतत्काम्यस्योपदिश्यते तस्य हि यथेष्टमनुष्ठानस्योक्तत्वात् नैवं वक्तुं युक्तम् · अथापि नित्यस्य सकृत्प्रयोगः स्यात् तदा वीप्सा व्यर्था स्यात् · न च वसन्तपक्षावधारणे[2] प्रमाणमस्ति · तस्माद्यावज्जीवं ये वसन्तास्तेष्विति विज्ञायते · सप्तम्यपि च भिन्ने जुहोतीतिवन्निमित्तार्थैव · अत एवंजातीयके सर्वत्र कर्तृधर्मनिमित्तत्वावधारणात्कालशास्त्रमेवं प्रत्येतव्यम् · एवं सर्वत्र चातुर्मास्यादौ

1) °नस्यादौ Manu. 2) ?वसन्ते प° २.

ज्ञेयम् । ननु ज्योतिष्टोमेन स्वर्गकामो यजेतेति काम्यत्वमस्य श्रूयते · सत्यम् · वसन्ते-वसन्ते ज्योतिषेत्यनेन नित्यत्वमपि श्रूयतऽएव · अतः प्रयोगभेद एवाय-मत्रापि अग्निहोत्रादिवत् एकः स्वर्गकामप्रयोगः अपरस्तु नित्य इति · अत एव गवामयने कारणान्तरेण सोमान्तरायः श्रुतावुच्यते (१२. ३. ५. १०.) कथमेषां सोमोऽनन्तरितो भवतीति सवनैरिति ब्रूयादिति · यदि सोमस्यावश्यकर्तव्यता न स्यात्तर्हि कारणान्तरेणानन्तरायवचनं न स्यात् अस्ति च तस्मात्सोमेऽपि न याथाकाम्यम् । एकेग्रहणं तु पूजार्थम् मतान्तरस्यात्राभावात् । अत्राह वसिष्ठः अलमत्याधेयाय नानाहिताग्निः स्यात् अलं च सोमाय नासोमयाजीति · अलं समर्थः । सामर्थ्यं च याज्ञवल्क्येनोक्तम् (१. १२४.) त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्द्विजः · मनुः (११. ७.) यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये अ-धिकं वापि विद्येत स सोमं पातुमर्हति · एतत्काम्यसोमयागविषयम् ऋतुश्रुते-र्नित्यस्यावश्यकर्तव्यत्वादकरणे प्रत्यवायश्रवणात्प्रायश्चित्तविधानाच्च । शङ्खोऽपि त्रैवार्षिकाधिकान्नस्तु पिबेत्सोममतन्द्रितः इष्टिं वैश्वानरीं कुर्यात्तथैवाल्पधनो द्विजः । याज्ञवल्क्यः (१. १२४.) प्राक्सौमिकीः क्रियाः कुर्याद्यस्यान्नं वार्षिकं भवेत् । मनुः (११. ३९-४०.) पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेन्द्रियः न त्वल्पद-क्षिणैर्यज्ञैर्यजेतेह कथं चन इन्द्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजाः पशून् हन्त्यल्पदक्षिणो यज्ञस्तस्मान्नाल्पधनो यजेत् । मत्स्यः अन्नहीनो दहेद्राष्ट्रं मन्त्र-हीनस्तथऽर्त्विजः याज्यं तु दक्षिणाहीनो नास्ति यज्ञसमो रिपुरिति । अन्नपरि-माणमपि शङ्खेनोक्तम् सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ चातुर्मा-स्येषु सर्वेषु शतं पर्वणि पर्वणि । यत्तु श्रुतौ दातव्यैव यज्ञे दक्षिणा भवत्य-ल्पिकापीति तन्नित्याभिप्रायम् · अत एव बौधायनः यस्य नित्यानि लुप्तानि तथैवाजस्रिकाणि च विपयस्थो हीनः[1] स्वर्गं न गच्छत्पतितो हि सः तस्मा-त्कन्दफलैर्मूलैर्मधुना पयसापि वा नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेदिति · तेनाल्पधनस्यापि आधाने सोमे चाधिकारः । तथा च प्रजापतिः सर्वसंस्थाधिकारः स्यादाहिताग्निर्धने सति आदध्यान्निर्धनोऽप्यग्निं न तु पापभ-

1) ? हिन २.

याद्धितः · न पापभयादाहिताग्निः संस्थाधिकारी किम् धने सत्येव तासां काम्यत्वात् । कूर्मपुराणे नास्तिक्यादथ वालस्याद्योऽग्निं नाधातुमिच्छति यजेत वा न यज्ञेन स याति नरकान्बहून् तस्मात्सर्वप्रयत्नेन ब्राह्मणो हि विशेषतः आधायाग्निं विशुद्धात्मा यजेत परमेश्वरम् । तथा च स्मृतौ पशुसोमादीनामशक्याकरणासम्भवे प्रत्याम्नाय उपदिश्यते (मनु° ११. २७.) कृतानां पशुसोमानां निष्कृत्यर्थमसम्भवे इष्टिं वैश्वानरीं नित्यं निर्वपेदब्दपर्यये · कृतानामारब्धानां पशुसोमानामनुष्ठानासम्भवे तन्निष्कृत्यर्थं तत्प्रत्याम्नायत्वेनाब्दपर्यये वर्षस्यान्ते वैश्वानरीमिष्टिं नित्यमवश्यं निर्वपेदित्यन्वयः । तथा याज्ञवल्क्योऽपि (१. १२५-१२६.) प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा कर्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि एषामसम्भवे कुर्यादिष्टिं वैश्वानरीं द्विज इति · स्वस्वकाले तत्प्रत्याम्नायरूपां वैश्वानरीमिष्टिं कुर्यादित्यर्थः ॥

चातुर्मास्येषु चर्तुमुखश्रुतेः ॥ १३ ॥ चातुर्मास्येषु च न याथाकाम्यम् · कुतः · ऋतुमुखश्रुतेः ऋतुमुखऽऋतुमुखे चातुर्मास्यैर्यजेतेति[1] वीप्साश्रवणात् · ऋतोर्मुखं प्रथमदिनं प्रतिपत् तत्रेत्यर्थः । अत एव वैश्वदेववरुणप्रघासादीनि चातुर्मास्यपर्वाणि प्रतिपद्येव क्रियन्ते न पौर्णमास्यामित्यवसीयते यतः प्रतिपदेवर्तुमुखं न पौर्णमासीति · तथा च श्रूयते (६. २. २. १८.) एषा ह संवत्सरस्य प्रथमा रात्रिर्यत्फाल्गुनी पौर्णमासी योत्तरेति । नित्यत्वे कारणान्तरमाह ·

नियतसहपाठात् ॥ १४ ॥ नियतैर्नित्यैरग्निहोत्रादिभिः सहपाठादपि चातुर्मास्यान्यपि तद्वदवश्यं कर्तव्यानीत्यवसीयते · तेषु न याथाकाम्यमिति प्रतीयते · तथा हि (१०. ४. ३. ४.) तऽएतान्यज्ञक्रतूंस्तेनिरेऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुबन्धं सौम्यमध्वरमिति नित्यैः सहपाठेन तत्सदृशत्वमवगम्यतऽइत्यभिप्रायः ।

दर्शनाच्च ॥ १५ ॥ गवामयने उपायान्तरेण श्रुतौ चातुर्मास्यानामनन्तरावदर्शनाच्चातुर्मास्येषु न याथाकाम्यमित्यवगम्यते · तथा हि (१२. ३. ५. ८.) कथमेषां चातुर्मास्यान्यनन्तरितानि भवन्तीति पयस्ययेति ब्रूयादिति · यद्यवश्यमनुष्ठेयं तस्यैव

---

१) °श्रुतेः ऋतुमुखे चातु° २.

लोपाशङ्कया कारणान्तरेणानुग्रह उपपद्यते नेष्ट्यानुष्ठेयस्य । अपरे तु दर्शनाचेत्यमुं हेतुमग्निहोत्रादिषु सर्वेषु योजयन्ति यतः सर्वत्र श्रूयते (१२. ३. ५. ३-४.) कथमेषामग्निहोत्रमनन्तरितं भवतीति व्रतेनेति ब्रूयादिति कथमेषां पौर्णमासं हविरित्यादि कथमेषां सोमोऽनन्तरितो भवतीत्यन्तम् (१०.) यतः सर्वत्र कारणान्तरेणानुग्रहो दृश्यते ॥ एवं सिद्धान्तमुक्तोत्तरा पूर्वपक्षमाह ·

नोत्सर्गयोगात् ॥ १६ ॥ चातुर्मास्येषु न याथाकामीति यदुक्तम् तन्न किं तु तत्रापि याथाकाम्यमेव न नित्यत्वम् · कुतः उत्सर्गयोगात् यतश्चातुर्मास्यानामुत्सर्गयोगोऽस्ति · उत्सर्गेण योगः सम्बन्धः उत्सर्गयोगः इति नूत्सृजमानस्येति (२. ६. ३. १२.) । यदि हि चातुर्मास्यानि नित्यानि भवेयुस्तदा उत्सर्गयोगो न स्यात् अस्ति च अतोऽत्रापि याथाकाम्यमेव न नित्यत्वमित्येवं पूर्वपक्षितऽउक्तमेव सिद्धान्तं द्रढयति ·

स्यात्त्रिंशद्वत् ॥ १७ ॥ चातुर्मास्यानां नित्यत्वेऽप्युत्सर्गयोगः स्याद्भवेत् किंवत् त्रिंशद्वत् यथा दर्शपूर्णमासयोस्त्रिंशद्वर्षानन्तरमुत्सर्गः श्रुतोऽस्ति नित्यत्वं च तयोरसंदिग्धं विद्यतऽएव । तथा हि यद्दर्शपूर्णमासाभ्यां यजतऽइति प्रकृत्येतदुच्यते तस्मादु त्रिंशतमेव वर्षाणि यजेतेति (११. १. २. १३.) । एवमत्रापि वचनादुत्सर्गयोगोऽपि वैकल्पिको भविष्यति नित्यत्वं च तस्माच्चातुर्मास्यानामपि नित्यत्वमत एवापि न याथाकाम्यमिति सिद्धम् । अथवा एवं योजना · उत्सर्गयोगे सत्यपि चातुर्मास्यानां नित्यत्वं स्यात् त्रिंशद्वत् यथा दर्शपूर्णमासयोस्त्रिंशद्वर्षानन्तरमुत्सर्गयोगे सत्यपि नित्यत्वमविप्रतिपन्नं विद्यते एवमिहापीति · अपि च यद्यावश्यं कर्तव्यं तन्नित्यमित्युच्यते ॥ ॥ अथेदं विचार्यते · द्विप्रकारं कर्म नित्यं काम्यं च · तत्र नित्यं प्रकृत्येदं विचार्यते · किं सर्वाङ्गोपेतं कर्तव्यम् उत यावन्त्यङ्गानि कर्तुं शक्नोति तावद्भिरङ्गैरुपेतमिति । किं तावत्प्राप्तम् सर्वाङ्गोपेतमेव कर्तव्यमिति कुतः भावनांशस्य कथंभावस्य सर्वैरङ्गैः परिपूरणेन सर्वाङ्गोपेतस्यैव प्रधानस्य फलवत्त्वात् अन्यथा अङ्गाम्नानस्य वैयर्थ्यापत्तेः · तस्मात्सर्वाङ्गोपेतमेव कर्तव्यमित्येवं प्राप्तऽआह ·

विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदात् ॥ १८ ॥ नित्ये कर्मणि अग्निहोत्र-

दर्शपूर्णमासादिके विगुणेऽपि अङ्गहीनेऽपि कृते फलनिर्वृत्तिः प्रत्यवायपरिहारूपस्य फलस्य निष्पत्तिर्भवत्येव । अङ्गप्रधानभेदात् यतोऽङ्गानि च प्रधानानि च भिन्नानि नित्येषु चेतिकर्तव्यता नास्ति · कुत इतिकर्तव्यता नास्ति अपूर्वाभावात् अपूर्वप्रयुक्ता हीतिकर्तव्यता सा च तस्मिन्नसति न भवितुमर्हति · कथमपूर्वाभावः फलाभावात् कालान्तरभाविफलसिद्ध्यर्थं ह्यपूर्वं कल्प्यम् तच्चासति फले कल्पयितुं न शक्यते · तस्मान्नित्येषु यागस्यैव भाव्यत्वम् न फलस्य · तस्मात्पौर्णमास्याममावास्यायां वाग्निमुद्दिश्य पुरोडाशस्त्यक्तव्य इत्येतावदुपदिश्यते · तेन दृष्टार्थानि यान्यङ्गानि संनिपत्योपकारकाणि यैर्विना प्रधानभूतयागनिष्पत्तिर्न भवति अन्यथानुपपत्त्या तावद्भिरूपेतं प्रधानं कर्तव्यम् नाङ्गानि अङ्गाम्नानं तु काम्यप्रयोगार्थम् · अतोऽग्निकालपुरोडाशमात्रमादरणीयम् अन्यदङ्गजातमदृष्टार्थं नादरणीयमिति । कथं तर्हीदृशे निष्फले पुरुषस्य प्रवृत्तिरिति चेत् · उच्यते · प्रत्यवायानुत्पत्त्यर्था प्रवृत्तिर्न तु फलार्था विहिताकरणाद्धि प्रत्यवायः स्मर्यते (मनु°११.४४.) अकुर्वन्विहितं कर्म प्रायश्चित्तीयते नर इति ॥ अतो नित्यकर्मणो निष्फलत्वादपूर्वाभावादितिकर्तव्यता नास्तीति हीनाङ्गस्यैव प्रयोग इति केचित्सिद्धान्तमाहुः · तदेतन्नोपपद्यते · कथम् · भावनातो हि तिस्र आकाङ्क्षा जायन्ते किं केन कथमिति · तत्र कथमितीतिकर्तव्यताकाङ्क्षा नित्येऽप्यस्ति · तस्मादत्राप्यस्तीतिकर्तव्यता । सत्यम् अस्त्येवेहाप्याकाङ्क्षात्रयम् तथापि किमाकाङ्क्षायाः समानपदोपात्तेन यागेनैव पूरणात्तन्निर्वृत्त्युपयोगिन्येवेतिकर्तव्यता कथम्-आकाङ्क्षया गृह्यते न त्वदृष्टोपयोगि प्रयाजाद्यङ्गम् अदृष्टस्य साध्यस्याभावादिति चेत् · न · यागस्य स्वतोऽपुरुषार्थत्वेन प्रवृत्त्यन्यथानुपपत्त्या समानपदोपात्तं यागमुत्सृज्य सर्वेषामभिमतस्य प्रत्यवायपरिहारस्येह भाव्यतया कल्पनात् । ननु चेत्सर्वेषामभिमतः स्वर्गः किमिति न कल्प्यते तस्य शरीरारम्भहेतुतया मोक्षविरोधित्वेन मुमुक्षूणामनभिप्रेतत्वात् प्रत्यवायपरिहारस्तु तैरपीष्यत एव · कथम् तस्मिन्पापे एतज्जन्मोपार्जिते भवान्तरोपार्जिते वा स्थिते सति तदुपभोगहेतुभूतशरीरारम्भावश्यंभावेन मोक्षाभावात् · अमोक्षार्थिनाप्यवश्यं पापक्षय एषितव्य एव समीहितफलाय इतरथाप्रक्षीणे पापे फलाप्राप्तिः · तस्मान्नि-

त्यानि कर्माणि पापक्षयस्योपायत्वेन चोद्यमानानीतिकर्तव्यतामपेक्षन्त एव । धर्मशास्त्रेषु च यथैवाकरणे प्रत्यवायः स्मृतः तथैव करणादपि पापक्षयः स्मर्यते (मनु २. १०२.) पूर्वां संध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहतीत्यादिभिः नित्यनैमित्तिकैरेव कुर्वाणोदुरितक्षयमिति च । तस्मान्नित्येऽप्यस्त्येव प्रत्यवायपरिहाररूपं फलम् तस्मान्नित्यान्यपि कर्माणि सर्वाभिमतस्य तस्य पापक्षयस्योपायत्वेन चोद्यमानानीतिकर्तव्यतामपेक्षन्त एव । ततश्च सर्वाङ्गोपेतानामनुष्ठानं कश्चिदपि सर्वदा कर्तुं न शक्नोति · जीवनादिनिमित्ते च तानि विधीयन्ते · निमित्तस्य चैतदेव रूपं यत्तस्मिन्सति नैमित्तिकमवश्यं कर्तव्यम् · तेन यावज्जीवं कर्तव्यम् सर्वाङ्गोपेतं च कर्तव्यमिति दुःशकमेव · तेन यथा शक्नुयादित्युपबध्यते · तत्रावश्यमन्यतरस्मिन्हातव्ये [1] निमित्ते सति नैमित्तिकस्य कर्तव्यत्वं प्रधानवाक्ये श्रूयते · तद्यदि कस्य चिदङ्गस्यानुरोधेन सति निमित्ते नैमित्तिकं न क्रियते ततः प्रधानवाक्यविरोधः स्यात् · प्रधानमात्रं श्रुत्या निमित्ते विधीयते अङ्गानि तु तदर्थतया प्रकरणेन गृह्यन्ते अतस्तानि प्रधानवाक्यगतावश्यकत्वानुरोधेन यथाशक्त्युपसंहर्तव्यानि इतरथा प्रधानस्यावश्यकर्तव्यत्वं श्रुतं हीयेत · तस्मात्प्रधानाविरोधेनाङ्गानि यथाशक्त्युपसंहर्तव्यानि । नन्वेवं हीनाङ्गादपि प्रधानात्फलसिद्धेरभ्युपगमात्समर्थोऽप्यङ्गानि परित्यक्ष्यतीति · नैवम् · शक्तस्य कामतोऽङ्गे त्यज्यमाने वैगुण्यं स्यादेव · अङ्गोपदेशं निमित्तं चालोच्योभयानुरोधेन यावन्त्यङ्गानि कर्तुं शक्नोति तावद्भिरुपेतं प्रधानमेनः क्षपयतीति शास्त्रार्थोऽवधार्यते · तावतैव शास्त्रवशात्फलनिष्पत्तिः इति साधूक्तम् विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदादिति । एतच्च प्रयोगविध्यनुष्ठाप्येष्वङ्गेषूच्यते · यदि कुर्यादित्युच्यते तत् यथाशक्तीत्युपबध्यते । यानि तु स्वभावसिद्धानि विध्यन्तरसिद्धानि वोपजीव्यन्ते यथा लोके धनार्जनादि वेदेऽपि कालो विद्यायश्च तेषां स्वरूपेणैवाधिकारिविशेषणत्वम् [2] द्रव्यवान्विद्यावानग्निमानिति · एतदुक्तं भवति अङ्गं हि विधिबलादुपादीयते निमित्तानुरोधाद्वा त्यज्यते उभयानुग्रहार्थं वा शक्तं प्रत्युपादीयते अशक्तं प्रतित्यज्यत इति · नान्या गतिरस्ति · तत्रोभयानुग्रहो युक्तो यदि सम्भवति · सम्भवश्चो-

1) °स्मिनहातव्ये २. 2) ?? °णावसमास्यासंबंधे २. (°बंधि २.).

पादेयेधङ्गेषु यथाशक्ति व्रीहीन्सम्पादयेत् यथाशक्त्यवहन्यादिति · आहवनीया-दिस्वरूपं तु नानेन विधिनोपादीयते · तस्मादग्निमान्विद्यावान्द्रव्यवान्जीवंश्च यजेतेत्येवमाश्रीयते · अतो विद्याग्निकालाद्यपरित्यागेनान्येषामङ्गानां[1] यथाशक्त्यनुष्ठानं सिद्धम् । तथा चोक्तं तन्त्ररत्ने यानि प्रयोगविधिना कर्तुरुपादेयत्वेनाङ्गानि चोद्यन्ते तेषामेव शक्तिपरिमितत्वम् यावन्ति शक्नुयात्तावन्ति कुर्यादिति · यानि तु विध्यन्तरप्रयुक्तानि स्वयंसिद्धानि वाङ्गत्वेन गृह्यन्ते तानि स्वरूपत एवाधिकारिविशेषणम् यथाग्न्यादीनि · तेषामुपादानस्य प्रयोगविधिनानुपादानान्न यावच्छक्त्युपबन्धः सम्भवति किंतु तदपेक्षो विधिस्तद्वन्तमेवाधिकरोति[2] · तेन सपत्नीकस्यार्षेयस्य व्याख्यातोपात्तसंख्याविशिष्टस्याग्निमतो विद्यावतः प्रदोषादिकालसंयोगिनोऽधिकारो नान्यस्येति । एवं चाप्रतिसमाधेयाङ्गवैकल्येऽप्यग्न्यादिमानधिक्रियेतैव · आधानं तु न कुर्यात्तस्यानैमित्तिकत्वादिति ॥

प्रायश्चित्तविधानाच्च ॥१९॥ प्रायश्चित्तविधानादप्येवं ज्ञायते यद्विगुणेऽपि[3] फलनिर्वृत्तिर्भवतीति । यदि च विगुणात्फलं न स्यात्तर्हि प्रायश्चित्तं न विदधीत · न हि निष्फलस्याङ्गैः कृत्यमस्ति · अस्ति च विधानम् · तस्माद्विगुणादपि फलं भवतीति । येषां मते नित्येषु फलाभावेनापूर्वाभावात्तदर्थेतिकर्तव्यता नास्ति तेषां प्रायश्चित्तविधानमत्यन्तानुपपन्नम् · सेतिकर्तव्यताके तु निमित्ते भेदने जाते वैगुण्यात्तत्परिहारायापरं होमाख्यमङ्गं भिन्ने जुहोतीत्यादिकमुत्पन्नं सत्क्रियतऽएव · पक्षान्तरे त्वसत्यामितिकर्तव्यतायां भेदने जातेऽपि नास्ति वैगुण्यम् गुणहानिर्हि वैगुण्यम् असति गुणे कस्य हानिः स्यात् · ततश्चास्मत्पक्षऽएव प्रायश्चित्तविधानमुपपन्नमिति ॥

तथा च दृष्टम् ॥२०॥ नित्यं कर्म यथा कथंचित् श्रुताङ्गपरित्यागेनापि यथाशक्त्यङ्गोपेतमनुष्ठातव्यत्वेन श्रुतौ दृष्टम् । तथा हि यत्पयो न स्यात्केन जुहुया इति व्रीहियवाभ्यामित्यादि (११. ३.१.३.) न वाऽइह तर्हि किं चनासीदथैतदहूयत सत्यं श्रद्धायामित्यन्तेन (४.) ग्रन्थेन · तथा तदेव यादृक्कीदृक्क[4]

[1] °लादि अप २· °लादिप २· [2] °स्तद्वंत एवा २· [3] ज्ञायते नहि २· [4] यादृक्कीदृक्क २·

होतव्यमिति शाखान्तराच्च । तस्माद्विगुणेऽपि नित्ये प्रत्यवायपरिहाररूपं फलं भवति · अत एवोक्तं कर्काचार्यैः उत्पन्नदुरितक्षयो वा उत्पत्स्यमानदुरितप्रतिबन्धो वा भवत्येवेति ॥ ॥ अथ काम्ये कर्मणि चिन्त्यते · काम्येऽपि विगुणे फलाभिनिष्पत्तिर्भवत्येव । यतस्तत्राप्यङ्गानि प्रधानानि च भिन्नानि । अश्वमेधे च काम्ये प्रायश्चित्तविधानमप्यस्ति अश्वं प्रकृत्य अथातः प्रायश्चित्तीनां यद्यश्वो वडवाᳫ स्कन्देद्वायव्यं पयोऽनुनिर्वपेदथ यदि स्रामो विन्देदित्यादि (१३. ३. ८. १-२.) · तथा पञ्चशारदीयेऽपि उत्सृष्टान्पशून्प्रकृत्य ताण्ड्ये प्रायश्चित्तविधानं दृश्यते अपोनप्त्रियोऽप्सु मृतऽइत्यादिकम् (२३. ४. १४.) · यदि च विगुणादपि काम्यात्फलं न स्यात् प्रायश्चित्तविधानं व्यर्थमेव स्यात् । तथा च दृष्टम् · विगुणमपि काम्यं फलोत्पादकं वेदे दृष्टम् · कारीरीमिष्टिं प्रकृत्य श्रूयते यदि वर्षेत्तावत्येव जुहुयादिति अत्रासमाप्तायामेव कार्यां तत्फलं वृष्टिरूपं वेदे दृष्टम् । अतो विगुणेऽपि काम्ये फलं सिध्यतीति पूर्वपक्षिते सिद्धान्तमाह ·

न श्रुतिलक्षणत्वात् ॥ २१ ॥ यदुक्तम् विगुणेऽपि काम्ये फलं सिध्यतीति तन्न · कुतः श्रुतिलक्षणत्वात् काम्यस्य · यतः काम्यं सगुणमेव सर्वाङ्गोपेतमेव श्रुत्या लक्षितम् फलसाधनत्वेन विहितम् तत्राङ्गलोपे काम्यमानफलस्यानुत्पत्तेः · तत्र प्रधानस्य त्यागे यथा फलं नास्ति एवमङ्गत्यागेऽपि · फलसाधनत्वं हि शास्त्रैकसमधिगम्यम् ततो यदङ्गं प्रधानं वा यावच्छब्दोपात्तम् तस्य लोपे साधनत्वं नास्ति · अतो यदा सर्वाङ्गोपेतं कर्तुं शक्नोति तदैव तत्र प्रवर्तेत न तु यथाशक्ति । न हि तत्राङ्गत्यागे प्रमाणमस्ति प्रधानवाक्यसंत्यागेऽप्यविरोधात् · न हि तस्यावश्यकत्वं केनचिदुक्तं यतः औदासीन्यं न लभ्येत · कामश्रुतिस्तु समर्थेऽपि वर्तमाना श्रुत्यर्थतां न जहातीति नाङ्गत्यागे प्रभवति · निमित्तश्रुतिस्तु निमित्ते सत्यक्रियमाणे नैमित्तिके पीड्येतेति वैषम्यम् । अतो निमित्ते सति नित्यस्यावश्यकर्तव्यत्वबलात्सर्वदा सर्वाङ्गोपेतस्य केनापि कर्तुमशक्यत्वाद्यथा शक्नुयात्तथा कुर्यादित्येवं कल्प्यते · काम्ये त्ववश्यकर्तव्यत्वाभावादेवं कल्पयितुं न शक्यते · अतः काम्यं विगुणं फलं न साधयत्येवेति सिद्धम् । ननु यद्येवम् तर्हि काम्यऽएवाश्वमेधपञ्चशारदीयादौ किमर्थं प्रायश्चित्तविधानमित्याशङ्कायामाह·

प्रायश्चित्तं तत्कालम् ॥२२॥ आरब्धं हि काम्यमयथाकरणादिना विगुणमपि असमापने शिष्टविगर्हणाद्रूपाद्दिष्टाचारात्स्मृतिं स्मृतेश्च[1] श्रुतिं कल्पयित्वा अवश्यं समापनीयमेव । विगुणाच्च यद्यपि श्रुतं फलं न भवति तथापि तादृशात्प्रत्यवायपरिहारो भवत्येव । अत एव तत्कालम् तस्य काम्यस्य कर्मणो विनाशकाले यत्प्रायश्चित्तम् तत्तस्य विनष्टस्य कर्मणः प्रत्यवायपरिहारजनने उपकारकत्वात्स्वार्थकमेव भवति । ननु भवतु प्रायश्चित्तविधानमर्थवत् विगुणायामपि असमाप्तायां कारीर्यां वृष्टिरूपफलदर्शनस्य का गतिरित्याकाङ्क्षायामाह ·

दृष्टे तत्परिमाणम् ॥२३॥ कृतार्धायामिष्टौ वर्षणे दृष्टे सति तत्परिमाणमेव कर्म कर्तव्यं यत्परिमाणमदृष्टे वर्षणे क्रियते · न तु वृष्टौ दृष्टायां किमप्यूनं कृतार्धं वा परित्याज्यमिति · न च वर्षणं तस्या इष्टेः फलम् किंतु कालस्वभावात्प्रतिबन्धकापगमाच्च । काम्यस्य कर्मणो वीतायां फलेच्छायामवाप्ते वा फले अवश्यसमापनीयत्वं च जैमिनिनोक्तं षष्ठस्य द्वितीये चरणे (६. २. १०.) प्रक्रमात्तु नियम्येतारम्भस्य क्रियानिमित्तत्वादिति[2] ॥ अथवा एवं व्याख्या · वर्षणे दृष्टे सति तत्परिमाणमेव कर्म कर्तव्यम् · यावत्परिमाणे कृते वृष्टिर्दृष्टा तावत्परिमाणमेव कार्यं न समापनीयमित्यर्थः यदि वर्षेत्तावत्येव जुहुयादिति वचनात् · तथा चोक्तं कर्काचार्यैः तत्र तावत्प्रमाणता कर्मण उच्यतऽइति ॥ द्वितीया कण्डिका ॥२॥

अथ पद्धतिः ॥

देवतोद्देशेन द्रव्यत्यागो यागः । ये च यागा यदाग्नेयोऽष्टाकपाल इत्यादिवाक्यैर्दर्शपूर्णमाससंयोगेनोत्पन्नास्ते दर्शपूर्णमासशब्दवाच्याः · तेषां च दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति फलसाधनत्वेन विधानात्प्रधानत्वम् इतरत्सर्वं तत्प्रकरणपठितमग्न्यन्वाधानादि ब्राह्मणतर्पणान्तं तदङ्गम् · अफलयुक्ताः प्रयाजादियागाः पूर्वाघारादिहोमाश्च तत्प्रकरणपठितास्तदङ्गम् । यत्र यजतिशब्दः श्रूयते तत्र तिष्ठता होमो वषट्कारेण प्रदानम् याज्यापुरोऽनुवाक्ये च एतावद्-

---

1) ? चारात्तिंस्मृतेश्च २. 2) Thus also the text in the Çástradípiká, but तन्निमित्तत्वात् the ms. of the Jaim. sútra itself.

वति · यत्र च जुहोतिशब्दस्तत्रोपविष्टेन होतव्यं स्वाहाकारेण च । सर्वकर्मसु ऋत्विजो ब्राह्मणा एव भवन्ति · न क्षत्रियवैश्याः · तेषां हविःशेषभक्षणप्रतिषेधात् । काम्यानि कर्माणि फलेच्छायां सत्यां कर्तव्यानि नावश्यम् · नित्यानि तु अग्निहोत्रदर्शपूर्णमासदाक्षायणाग्रयणपशुचातुर्मास्याग्निष्टोमादीनि[1] अवश्यं कर्तव्यानि अकरणे दोषश्रवणात् । सत्यवदनाधःशयनब्रह्मचर्यादिनियमा अवश्यमनुष्ठेयाः । गेहदाहभार्यागोषुयमजननादौ[2] कर्माङ्गविनाशादौ च यानि नैमित्तिकानि विधीयन्ते तान्यप्यवश्यमनुष्ठेयान्येव · न तेषामिच्छयानुष्ठानम् । नित्यानि कर्माणि अवश्यकर्तव्यत्वाद्यथाशक्त्यङ्गयुक्तान्यप्यनुष्ठेयानि · काम्यानि तु सर्वाङ्गोपेतानि यथाश्रुतान्येव यदा कर्तुं शक्यन्ते फलेच्छायां सत्यामपि तदैवानुष्ठेयानि नान्यथा ॥ ॥२॥

इति प्रथमस्य द्वितीया कण्डिका ॥ ॥

वाक्यप्रकरणाभ्यामङ्गविनियोग उक्तः । अधुना लिङ्गेन मन्त्राणां विनियोगं वक्तुकामोऽध्येतृप्रसिद्धांस्तान्मन्त्रानाह ·

ऋचो यजूंषि सामानि निगदा मन्त्राः ॥१॥ ऋगादयो निगदान्ताश्चत्वारो मन्त्राः । तत्रार्थवशेन वृत्तवशेन वा यत्र पादव्यवस्था सा ऋक् · तत्र समिधाग्निं दुवस्यतेत्यादौ यत्र प्रत्यक्षेण समाप्तोऽर्थो दृश्यते तत्रार्थवशेन पादव्यवस्था यत्र च क्रियापदानुपादानात्सुसमिद्धाय शोचिषे तं त्वा समिद्भिरङ्गिर इत्यादौ अपर्यवसितोऽर्थस्तत्र वृत्तवशेन पादव्यवस्था भवति · अतश्च यत्र नियताक्षराणि नियताश्च पादाः नियतानि चावसानानि सा ऋगित्युच्यते । अनियताक्षरपादावसानं यजुः । यद्यपि प्रगीतं मन्त्रवाक्यं सामेत्यभियुक्तप्रयोगः तथापि तत्र विशेषणं गीतिः विशेष्याण्यृगक्षराणि नागृहीतविशेषणा विशेष्ये बुद्धिरिति प्रथमप्रतीयमानत्वात् गीतिरेव सामेत्युच्यते · तथा च कवतीषु[3] रथन्तरं गायति यच्चोन्यां तदुत्तरयोर्गायति ऋच्यध्यूढं साम गायति प्रजापतेर्हृदयमनृचं गायतीत्याद्युपपन्नं भवति · अत ऋगक्षरातिरिक्तं यद्गीतिशब्दवाच्यं तत्सामशब्देनोच्यते ·

---

१) °ग्निष्टोमादीनि २. ३. °ग्निष्टोमसोमादीनि २. २) यमलजननादौ १. यमजननहानौ ३.
३) कद्वतीषु ?

ननु यदि रथन्तरादिशब्दा गीतेरेव वाचकास्तदा रथन्तरेण स्तुवीतेति कथं स्तुतिसाधनत्वम् गुणगुणिसम्बन्धकीर्तनं हि स्तुतिः सा च गीतिरूपेण साम्ना न सम्भवति उच्यते गीतिः स्वयं स्तुतिवाचकत्वाभावादक्षरप्रकटनद्वारा स्तुतिसाधनत्वं भवतीति नोक्तदोषः । निगदाः प्रैषाः परसम्बोधनार्थाः प्रोक्षणीरासादय[ग्नीद्]ग्नीन्विहरेत्येवमादयः (२.६.३४. ६.७.५.) · ननु निगदा अपि यजूंष्येव ततः किमर्थं पृथगुक्ताः उच्यते उपांशु यजुषा उच्चैर्निगदेनेति धर्मभेदेन यजुःष्वनन्तर्भावशङ्कया पृथग्वचनम् · वस्तुतस्तु निगदानां यजुष्ट्वमेव · परसम्बोधनार्थत्वादुच्चैर्निगदेनेति धर्मभेदः · न च धर्मभेदाद्भेदः ऋक्सामयोरपि क्वचिदुपांशुप्रयोगविधानात् । अतस्त्रैविध्यमेव मन्त्राणाम् । तथा चोक्तम् अह्ने बुध्य [1] मन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः ऋचः सामानि यजूंषीति · त्रीन्वेदान्विदन्तीति त्रिविदः त्रिविदां सम्बन्धिनोऽध्येतारस्त्रैविदाः ते च यं मन्त्रभागमृगादिरूपेण त्रिविधमाहुस्तं गोपायेति योजना ॥ ऋग्यजुःसामात्मको मन्त्रभेदोऽभिहितः · तदवान्तरभेदाकाङ्क्षायामृचां च साम्नां चाध्येतृप्रसिद्धैव भेदे सिद्धे लक्षणं न क्रियते · यजुषां तु प्रश्लिष्टपठितत्वाल्लक्षणं विना भेदो न ज्ञायतऽइत्यत आह ·

तेषां वाक्यं निराकाङ्क्षम् ॥ २ ॥ तेषामिति तच्छब्देन यजुषां निर्देशः ऋचां साम्नां च भेदे लक्षणापेक्षाभावात् । ननु यजुषामपि भिन्नप्रतीकनियोगाद्भेदः सेत्स्यति · सत्यम् · न तावत्सर्वेषां ब्राह्मणेन विनियोगोऽस्ति · न च परादिना पूर्वान्त (१.३.१.) इत्येतल्लक्षणं वेदवचनम् न्यायेन तु सूत्रकृतेदमुक्तमिति · अतो लक्षणमुच्यते । तेषां यजुषां प्रश्लिष्टपठितानां मध्ये यावत्पदवृन्दं निराकाङ्क्षं पूर्वापरपठितपदान्तराकाङ्क्षारहितम् तावत्पदसमूहात्मकमेकं वाक्यम् ईदृशमेकं यजुः अर्थादतोऽन्यद्वाक्यान्तरं यजुरन्तरं चेत्युक्तं भवति । सर्वमन्त्राणामनेन यजेतानेन यजेतेति प्रथमं प्रकरणाम्नानानुमितवाक्यविनियोगो भवति · ततः साक्षाद्यागसम्बन्धासम्भवात्तदुपकारिप्रकाशनं [2] तैरिष्टं भवतीत्येवं कल्प्यते · तेन यावता पदसमूहेन यागसाधनं स्मर्यते तावद्यजुर्वाक्यम् · वचनार्हं हि वाक्यम् कार्यसमर्थं च तदर्हं भवति न न्यूनमधिकं वा तच्चैकार्थं साकाङ्क्षावयवं च ·

१) अह्निर्बुध्य २, but see Roer's Edit. of the Taitt. Saṃhitá p. 28. २) ? °शने २·

तद्यथा देवस्य त्वा सवितुः प्रसवऽइति । अत्र हि सर्वाणि पदानि ग्रहणप्रकाशनार्थानि अत एकार्थानि साकाङ्क्षाणि च तस्मादिषामेव यजुष्ट्वम् । एवं सर्वत्र पुरस्तात्परस्ताच्चैकार्थपदपरिग्रहेणासमर्थपदविमोकेन भिन्नानि यजूंषि कल्प्यन्ते । एकप्रयोजनं साकाङ्क्षं पदजातमेकं यजुरित्युक्तम् । अनेन लक्षणेन यत्र समवेतार्थप्रकाशकं गृह्णामीत्यादिकं पदमस्ति तत्रैतत्सुगमं परिमाणम् । अथ यत्र समवेतार्थपदाभावाल्लैङ्गिकविनियोगाभावे[1] वाचनिक एव विनियोगः परस्परनैराकाङ्क्ष्यं च स्वरूपतोऽवगम्यते यथेषे त्वोर्जे त्वेति यथा चायुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामिति तत्र कियदेकं यजुरिति चिन्त्यते । किं प्राग्दृष्टार्थमन्त्रावधेरेकमन्त्रत्वम् उत यावदेव मिथःसम्बन्धम् इषे त्वेति तावत् एकं यजुः अन्यत्तु यजुरन्तरमिति । तदर्थं च किं सर्वमेकार्थमुत भिन्नार्थमिति विचारः । तत्र तावदनुष्ठेयार्थाप्रकाशनादिषामदृष्टार्थत्वम् । अदृष्टं चात्र कल्प्यमानमेकमेव कल्प्यम् तावताप्युपपत्तेः बह्वदृष्टकल्पनाया निष्प्रामाणिकत्वाच्च । अतः सर्वेषामेकार्थत्वात् प्रत्येकं साधनशक्त्यभावात्संहत्यकारित्वात्[2] विभज्यमानानां साकाङ्क्षत्वमस्तीत्येकवाक्यता । कथं पुनरेकत्वपक्षे प्रतीकभेदेन विनियोगः इषे त्वेति शाखां छिनत्ति ऊर्जे त्वेत्यनुमार्ष्टीति । कथं च क्लृप्तीर्वाचयतीति (५. २. १. ३.) बहुत्वनिर्देशः । उच्यते । आदिमध्यावसानग्रहणैनैकोऽपि मन्त्रस्तत्र-तत्र विनियुज्यमानो न पीड्येत यावद्विनियोगं सकल आवर्तिष्येत खण्डस्याप्रयोजनत्वात् । कल्पतां कल्पतामिति च पुनःपुनः प्रयोगादेकवाक्यत्वेऽपि बहुवचनाविरोधः । तस्मादेतेषामेकार्थत्वमेकमन्त्रत्वं चेति प्राप्तऽआह ।

मिथःसम्बद्धम् ॥ ३ ॥ यावदेव मिथःसम्बद्धं परस्परं सम्बद्धमन्वययुक्तम् इषे त्वेत्येतावत् तावदेकं यजुः एकं वाक्यम् ततोऽन्यद्वाक्यान्तरं यजुरन्तरमिति । यद्यपि एषां समवेतार्थप्रकाशकपदार्थत्वाददृष्टार्थत्वम् तथापि न तस्यादृष्टस्यैकत्वम् । यतो विनियोगप्रयोजने रूपादुत्तरकाले । न हि विनियोगप्रयोजनोत्तरकालं रूपनिरूपणं युक्तम् अज्ञातरूपस्य विनियोगाशक्तेः अविनियुक्तस्य च प्रयोजनकल्पनानुपपत्तेः । रूपं तु निरपेक्षं पाठादवधार्यते । तत्कालावधृतभेदानु-

---

1) °तार्थपदभावा° २. 2) ? °त्संहत्यका° २.

वर्तित्वं च प्रयोजनविनियोगयोः · प्रमाणवशाच्च बहून्यप्यदृष्टानि कल्प्यन्ते · तदु-
क्तम् प्रमाणवत्त्वदृष्टानि कल्प्यानि सुबहून्यपीति । न च रूपोपलब्धिवेला-
यां परस्परसाकाङ्क्षत्वमेकप्रयोजनत्वं चोपलभ्यते · ततश्च निर्विरोधे भेदे निर्धारिते
पश्चादेकत्वोपादानकारणं[1] किमपि न सम्भवति · न च प्रागनुपलब्धं साकाङ्क्षत्वं
पश्चात्कल्पयितुं शक्यते। न चैतेषामदृष्टार्थत्वं च ब्राह्मणोपदिष्टदृष्टार्थसाधनत्वात् ·
तथा हि इषे त्वेति मन्त्रः शाखाछेदने करणत्वेन ब्राह्मणऽउपदिष्टः · क्रियानि-
ष्पादकं च करणम् न च मन्त्राणां क्रियानिष्पादकत्वं तत्प्रकाशनादन्यत्किमपि
सम्भवति तेन विधिबलादेषां प्रकाशनार्थत्वम् · ततश्च तद्बलेनैव चैतेषां या-
वता विना विहितप्रकाशनसामर्थ्यं नास्ति तावदनाम्नातमपि अध्याहर्तव्यम् छि-
नद्मीत्यादि । यद्वा यथैव[2] रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोतीति वचनादवा-
चकस्यापि विनियोगानुसंधानेन स्तोत्राभिमुख्यचिह्नत्वं भवति एवमिषे त्वेत्या-
दीनां छेदनादिस्मरणहेतुत्वम् । उभयमपि चैतत्प्रमाणवदिति सूत्रकारैः कैश्चित्कथं-
चिदाश्रितम् । सर्वथात्रैवमध्यवसातव्यम्[3] · विकलवाक्यप्रयोगासम्भवादवाचक-
प्रयोगानुपपत्तेश्चाध्याहारः · यथाम्नातविनियोगानुसारात्तादृशेनैव स्मर्तुः संस्कारा-
धीनेन भवितव्यम्[4] तत्रानुष्ठात्रभिप्रायाधीनोऽन्यतरपरिग्रह इति तल्लटीका-
याम् । तत्रैकेन छेदनं प्रकाश्यते अन्येनानुमार्जनमिति दृष्टप्रयोजनभेदादपि सिद्धो
वाक्यभेदः · तथा आयुर्यज्ञेन कल्पतामित्यादीनामपि स्वरूपतो निराकाङ्क्षत्वात्
क्लृप्तीर्वाचयतीति क्लृप्तीर्बहुवचनस्य चोदितत्वात्तत्सम्पत्त्यर्थमायुरादिविशिष्टक्लृप्तिभि-
दप्रकाशनपरत्वादर्थभेदेन मन्त्रभेदः ॥ तदेवं साकाङ्क्षस्य यजुषो विहितार्थप्रकाशक-
त्वनिर्वाहयोग्यपदाध्याहारऽउक्तोऽपि यत्र संनिहिते वाक्ये मन्त्रशेषो दृश्यते सा-
काङ्क्षे च मन्त्रे तादृश एवापेक्ष्यते · तद्यथा अस्मादन्नादस्यै प्रतिष्ठायाऽइत्यादौ
(२. २५.) तत्र किं लौकिकः शेषोऽध्याहार्यः उत यः पूर्वमन्त्रानन्तरपठितः निर्भक्तो
योऽस्मान्द्वेष्टीत्यादिः स एवानुषञ्जनीय इति · किं प्राप्नोति · लौकिकोऽनुषञ्ज-
नीय इति · लौकिको हि शब्दः सर्वार्थो यथेष्टं सर्वत्र विनियुज्यमानो न विरु-

1) ? °कत्वापादान° २. 2) ? यदेव २. 3) ? °त्रैकमध्य° २. 4) ? स्मर्तुं संस्काराधाने पतितव्यं २.

ध्यते · वैदिकस्तु यदर्थमाम्नातस्तेनैव निबद्धो नान्यत्र नेतुं शक्यते · तस्माल्लौकिक इति प्राप्तऽउच्यते वेदेनैवापेक्षितरूपे वाक्यशेषे समर्पिते निष्प्रमाणलौकिकशेषकल्पनं न युज्यते · तस्माद्वैदिक एव निर्भक्त इत्यादिः शेषोऽस्माद्यन्नादित्यत्रानुषञ्जनीयः अस्यै प्रतिष्ठायाऽइत्यत्र च । नन्वध्याहारानुषङ्गयोः को विशेषः · उच्यते · अध्याहारो लौकिकः अनुषङ्गस्तु वैदिक इति · प्रयोजनमेतच्चिन्तायाः अध्याहारविनाशे स्मार्तं प्रायश्चित्तम् अनुषङ्गविनाशे तु श्रौतमिति । एवमूहप्रवरनाम्नां लौकिकत्वं न मन्तव्यम् · सं ते प्राणो वातेन गच्छतामित्यत्र (६. १०.) गच्छतामित्येतत्पदमेकवचनान्तत्वात्समङ्गानि यजत्रैरित्यत्रान्वेतुमयोग्यत्वान्नानुषज्यते · तद्व्यवायेन बुद्धिसंनिध्यभावाच्च सं यज्ञपतिराशिषेत्यत्रापि नानुषज्यते · तेनानयोर्गच्छन्तां गच्छतामित्यध्याहारौ यथाक्रमं कार्यौ ॥ तत्राध्याहारपक्षाश्रयणे सौकर्याय ते प्रदर्श्यन्ते । तत्र दर्शपूर्णमासयोरिषे त्वेत्यत्र छिनद्मीत्यध्याहारः ऊर्जे त्वेत्यत्र संनमयामीति इमावध्याहारौ सूत्रकृतैवोक्तौ (४. २. २-३.) । कर्मणे वामित्याददे इति १.६. । उरु वाताय भवेति १.१. · प्रेक्षे इति केचित् । भूताय त्वा नारातये परिशिषयामीति १.११. । प्राणाय त्वेत्यादिषु त्रिषु पिनष्मीति १.२० । चक्षुषे त्वेत्यत्र ईक्षे इति १.२०. । इषे त्वेत्यत्राधिश्रयामीति १.२२. । त्रिताय त्वेत्यादिषु निनयामीति १.२३. । ऊर्जे त्वेत्यत्रोद्वासयामीति १.३०. । सं ज्योतिषा ज्योतिर्गच्छतामिति च [1] २.१. । वसुभ्यस्त्वेत्यादिषु अनज्मीति २.१६. । सं गच्छतां यज्ञपतिराशिषेति च ६.१०. । वरुणप्रघासेषु अनु त्वा देववीतये हरामि ५.१. · भूतेभ्यस्त्वा उद्वहामीति च ५.१२. । पशौ विष्णवे त्वा उपस्पृशामि ५.१८. · दिवे त्वेत्यादिषु प्रोक्षामीति ५.२६. · सुपिप्पलाभ्यस्त्वौषधीभ्यः प्रतिमुञ्चामीति ६.२. · यूपायोच्छ्रीयमाणाय ६.३.६. · यूपाय परिवीयमाणायेति च ६.३.१४. । अग्निमन्थने अग्नये जातायेति ५.२.३. · अग्नये प्रह्रियमाणायेति ५.२.४. । पशुसमञ्जने सं गच्छन्तामङ्गानि यजत्रैः सं गच्छतां यज्ञपतिराशिषेति ६.१०. । शेषनिषेके शमहोभ्यो निषिञ्चामीति ६.२५. । सोमे स्वाहा यज्ञं मनस इत्यत्र आरभऽइत्यनुषङ्गः ४.६. · स्वाहोरोरिति स्वाहा द्यावापृथिवीभ्यामित्यनयोर्यज्ञमारभऽइति ४.६. ·

1) वा २.

स्वाहा वातादित्यस्यां यज्ञमिति ४.६. ॰ वे रायः सन्तु मे रायः सन्त्विति ४.२२. ॰ प्रजाभ्यस्त्वा बध्नामीति ४.२५. । हविर्धाने स्थूणानिखनने विष्णवे त्वा उपनिहन्मीति ५.१८. । तन्नौ सहास्तु ८.५.१८. ॰ तन्मेऽस्त्विति च ८.५.२१. सुत्यायाम् । सोममाने इन्द्राय त्वेति पञ्चसु मिमे इति ६.३२. । देवेभ्यस्त्वा मरीचिपेभ्य उपमार्ज्मि इति ७.३. । ग्रहसादनमन्त्रेषु प्राणाय त्वेत्यादिषु ७.३. साकाङ्क्षेषु सर्वत्र सादयामीति ॰ ग्रहग्रहणमन्त्रेषु च सर्वेषु साकाङ्क्षेषु गृह्णामीति उपांश्वन्तर्यामाग्रयणोक्थ्यध्रुववर्ज्जम् ७.१. ७.४. ७.२०. ७.२२. ७.२५. ॰ शुक्रामन्थिसादने सादयामीत्यस्याभावः ७.१२. ७.१६. । महावीरसम्भरणे पिण्डादेः आदाने मखाय त्वा मखस्य त्वा शीर्ष्णे आददे इति परिगृह्णामीति वा ३७.३. ॰ सम्भाराभिमर्शने मखाय त्वा मखस्य त्वा शीर्ष्णे अभिमृशामि ३७.४. ॰ निधाने निदधामीति ३७.४-७. ॰ संसर्गे संसृजामीति ३७.७. ॰ करणे करोमीति ३७.७. ॰ अवटमभिमर्शने अभिमृशामीति ३७.८. ॰ श्लक्ष्णने श्लक्ष्णयामीति ३७.८. ॰ प्रदहने प्रदहामीति ३७.९. ॰ ऋजवे त्वेत्यादिषु उद्वपामीति ३७.१०. ॰ अजापयोऽवसेके अवसिञ्चामीति ३७.१०. ॰ यमाय त्वेत्यादिषु प्रोक्षामीति ३७.११. ॰ मधु मधु मधु आधूनोमि उपवाजयामि इति वा ३७.१३. । चयने प्राणभृच्छन्दस्याविराजामुपधानमन्त्रेषु १३.५४. १४.१८. १५.४. मया उपधीयतऽइत्यध्याहारः ॰ प्राणभृत्सु पञ्चस्वपि कण्डिकासु १३.५४-५८. दशमे-दशमे मन्त्रेऽध्याहाराभावः गृह्णामीत्यनेन निराकाङ्क्षत्वात् ॰ आशुस्त्रिवृदिति कण्डिकापठितेषु धर्त्र चतुष्टोम इत्यन्तेषु च १४.२३. मया उपधीयतऽइति ॰ वालखिल्यासु च आयुषे त्वेत्यादिषु १४.२१. वान्तेषु अष्टासु मन्त्रेषु उपदधामीति ॰ यन्त्री राडित्यत्रासीति १४.२२. मूर्धासि राडित्यत्रासीति दर्शनात् १४.२१. अस्याप्यनेन समानार्थत्वात् ॰ पशुशिरसि नासिकयोश्चक्षुषोश्च हिरण्यशकलप्रासने प्रास्यामीत्यध्याहारश्चतुर्षु मन्त्रेषु ऋचे त्वा प्रास्यामीत्यादि १३.३९. ॰ अग्निर्ज्योतिषेत्यस्यां ते अस्त्विति १३.४०. ॰ पुरुषशिरस उद्ग्रहणे सहस्राय त्वा उद्गृह्णामीति १३.४०. ॰ हिरण्यशकलप्रोक्षणे पञ्चमे मन्त्रे सहस्राय त्वा प्रोक्षामीति १५.६५. ॰ अश्मंस्ते क्षुदस्तु मयि तऽऊर्गस्तु इति १७.१. । वाजपेये ऐन्द्रेषु ग्रहेषु ९.२. ९.४. ग्रहणे नाध्याहारः ॰ अन्येषु सर्वेष्वपि ग्रहणे सादने च गृह्णामि सादयामीति

च · ऐन्द्रेष्वपि सादनमन्त्रेषु भवत्येव · सप्तदशसु ग्रहेषु १. ३२-३४. सादनऽएव एष ते योनिः सादयामीत्यध्याहारः न ग्रहणे । एवं सौत्रामण्यां च ग्रहणे सादने च । अङ्गालम्भनमन्त्रेषु वक्ष्यते । पितृमेधे अग्नेर्भ्राजसा सूर्यस्य वर्चसेत्यनयोः ३५. ३. पुनातुपदस्यानुषङ्गः ॥ तदेव मन्त्रस्वरूपे तद्भेदे चोक्ते तेषां प्रकरणप्रमाणेन सामान्येन विनियोगे सिद्धेऽधुना लिङ्गप्रमाणेन विशेषविनियोगमाह ·

तेषामारम्भेऽर्थतो व्यवस्था तद्वचनत्वात् ॥४॥ तेषां मन्त्राणामारम्भे प्रयोगे अर्थतो विहितार्थाभिधानरूपेण सामर्थ्येन लिङ्गेन अनेन मन्त्रेणायं पदार्थः कर्तव्यः अनेनायमित्येवंरूपा व्यवस्था भवति · यो मन्त्रो यत्पदार्थाभिधानसमर्थः स तत्र विनियुज्यतऽइत्यर्थः । कुतः तद्वचनत्वात् तमेवार्थं वक्तीति तद्वचनः तस्य भावस्तत्त्वं तस्मात् यतस्तमेवार्थं वक्तुं शक्नोति नार्थान्तरम् · यथा उरुप्रथा उरु प्रथस्वेति (१. २२.) अयं प्रथनमेवाभिधातुं समर्थः अतस्तत्रैव विनियुज्यते । ननु सूत्रकारः प्रतिपदार्थं मन्त्रविनियोगं वक्ष्यत्येव · किमर्थमिदमुक्तम् · अनुक्तसंग्रहार्थम् यथा प्रवत्स्यन्त्सर्वानर्येति प्रतिमन्त्रमित्यादौ (४. १२. १३.) ।

मन्त्रान्तैः कर्मादिः सांनिपात्योऽभिधानात् ॥५॥ कर्मसु ये मन्त्राः पठ्यन्ते तेषां मन्त्राणामन्तैः सह कर्मादिः क्रियमाणस्य कर्मणः आदिः सांनिपात्यः संयोजनीयः । कुतः अभिधानात् · यतो मन्त्रः पठित एव सत्कर्माभिदधाति वक्ति नान्यथा ततो मन्त्रेण स्मारितं सत्कर्मानुष्ठीयते । सकलस्य मन्त्रस्य विनियुक्तत्वात्सकलेन सम्पादितं स्मरणं कर्माङ्गम् · अतः सकलस्य मन्त्रस्य समाप्तौ तज्जनितं स्मरणं यावदेव नापभ्रष्टम् तावदेव प्रयोगः कर्तव्यः · तेन मन्त्रान्तस्य कर्मादेश्च संनिपातः ।

अनियमं वात्स्यः ॥६॥ वात्स्य आचार्यो मन्त्रप्रयोगस्य कालानियमं ब्रवीति पूर्वं क्रियमाणे वा कृते वा कर्मणि मन्त्रः पठितव्य इति · मन्त्रस्य कर्माभिधायकत्वमेवमपि भवत्येव । अथ सिद्धान्तमाह ·

आदिं त्वाचार्याः ॥७॥ तुशब्दो वात्स्यमतनिरासार्थः · आचार्याः सर्वेऽपि मुनयः कर्मण आदिमेव मन्त्रान्तैः सह योजयन्ति नानियमः · यतो मन्त्रेण स्मृतं कर्म कर्तव्यम् । तदुक्तम् अनुष्ठाने पदार्थानामवश्यंभाविनी स्मृतिः

अनन्यसाधनानन्यकार्यैर्मन्त्रैः प्रसाध्यते · न तावदनुष्ठानवेलायामस्मृतः कश्चिदपि पदार्थः शक्यः कर्तुमित्यवश्यंभाविन्या स्मृत्या योग्यसाधनमात्रापेक्षणाद्यत्किंचिद्ब्राह्मणपदार्थानुसंधानं वा पूर्वपदार्थप्रत्यर्थप्रत्यवेक्षणं वा सूत्रग्रन्थो वा आत्मीयग्रहणीकवाक्यानि वोपद्रष्टा वा साधनं ग्रहीतुमारभ्यते · तत्रानन्यप्रयोजनान्प्रकरणे पठ्यमानान्नान्यत्किमप्येभिः[1] कर्तव्यमित्येवं प्रयोगवचनेन गृह्यमाणान्मन्त्रानुपलभ्य यादृशेन वाक्येन स्मृतिः कर्तुमाकाङ्क्ष्यते तादृग्रूपा एतऽइति विदित्वा लिङ्गप्रकरणानुमितया श्रुत्या विनियोगे सत्यभिधानार्थता विज्ञायते · ततश्चोपायान्तराण्यप्रमाणकत्वान्निवर्तन्ते · नियमादृष्टसिद्धिश्च · मन्त्रैरेव स्मृतं कर्म कृत्वाभ्युदयकारि भवतीत्यवधार्यते · यत्र च मन्त्रास्तत्र विधिवाक्येनैव तदसम्भवे उपायान्तरेणापि पदार्थस्मृतिः कार्या ।

तऽआम्नाताः ॥ ८ ॥ ते मन्त्राः सूत्रमध्ये आम्नाताः आदिमात्रेणोक्ताः सन्तः प्रयोगकाले सकलाः प्रयोज्याः · न तु सूत्रमध्ये यावानवयव उच्यते तावन्मात्रा इति ।

परादिना पूर्वान्तः ॥ ९ ॥ परस्य मन्त्रस्य सूत्रोपात्तेनादिना चिह्नभूतेन पूर्वस्य मन्त्रस्यान्तो ज्ञेयः । नन्वेतन्न वक्तव्यम् वाक्यलक्षणेनैव मन्त्रान्तस्य सुगमत्वात् सत्यम् क्वचिद्वाक्यसमूहस्यैकमन्त्रत्वसिद्ध्यर्थं पुनरुच्यतऽइत्यदोषः · तद्यथा विश्वेषां देवानां भागधेयी स्थेति समाप्तेऽपि वाक्ये अमूर्या उप सूर्ये इत्यादि (६. २४.) प्रयुज्यते · यथा चाष्टगृहीतं जुहोति संततमुद्गृह्णन्युञ्जान इति (१६. २. ७.) अत्राष्टानामेकमन्त्रत्वम् · तथा देवस्य त्वेत्यभ्रिमादायेत्यत्र (६. २. ८.) त्रयाणां मन्त्रत्वम् · चित्यं गच्छन्ति पञ्च दिश इत्यादौ (१८. ३. १८.) च ।

उपांशुप्रयोगः श्रुतेः ॥ १० ॥ तेषां यजुषां यजुर्वेदमन्त्राणां कर्मसु उपांशुप्रयोगो भवति । कुतः श्रुतेः उच्चैरृचा क्रियतऽउच्चैः साम्नोपांशु यजुषेति शाखान्तरे श्रवणात् · स्वशाखायामपि स उपांशु यजुर्भिश्चरतीत्यादिश्रुतेश्च (४. ६. ७. १८.) · अत्र[2] तेभ्यस्त्रयो वेदा अजायन्तेति वेदान्प्रक्रम्य मध्ये उच्चैरृचा क्रियतऽइत्यादीनि वाक्यानि पठित्वा पुनरपि वेदेनैवोपसंहारोऽस्ति · तेनात्र ऋगादयः

---

1) ?? °न्सामन्यः २· °न्सामान्यः ३· 2) viz. शाखान्तरे·

शब्दा वेदोपलक्षकाः[1] तेन ऋचा ऋग्वेदेन विहितं साम्ना सामवेदेन विहितं चोच्चैः यजुषेति यजुर्वेदविहितं चोपांशु इति । अस्य सूत्रस्येष्टिपशुसोमव्यतिरिक्तं कर्माग्निहोत्रादिकं विषयः · एतेषु विशेषस्य वक्ष्यमाणत्वात् ।

न सम्प्रैषाः ॥ ११ ॥ सम्प्रैषाः निगदाः प्रोक्षणीरासादयाग्नीदग्नीन्विहर यजमान वाचं यच्छेत्येवमादयः (२.६.३४. १.७.५. २.३.२.) · याजुर्वैदिका अपि सम्प्रैषा उपांशु न प्रयोज्याः · अन्यबोधनार्था हि ते · न चोपांशूच्चारितैरेभिरन्यस्य बोधनं सम्भवति · तस्मात्तऽउच्चैरेव प्रयोज्याः ॥ ॥ शाखान्तरे दर्शपूर्णमासयोः श्रूयते बर्हिर्लुनानीति । तत्रेदं चिन्त्यते किं बर्हिःशब्दः संस्कारनिमित्त उत जातिनिमित्त इति । तत्र बर्हिःशब्दस्य शास्त्रे सर्वत्र संस्कृतेष्वेव तृणेषु प्रयोगात् यूपाहवनीयादिवत्संस्कारवाची बर्हिःशब्द इति प्राप्तऽआह ·

कौशं बर्हिः ॥ १२ ॥ बर्हिः कौशम् कुशा दर्भाः तस्येदं कौशम् कुशमात्रमेव बर्हिःशब्देनोच्यते न संस्कारः · कुतः अन्वयव्यतिरेकाभ्यां जातिवाचित्वाद्बर्हिःशब्दस्य · यत्र-यत्र बर्हिःशब्दप्रयोगस्तत्र तत्र जातिरित्यस्या व्याप्तेर्लोके वेदे च नास्ति व्यभिचारः · संस्कारव्याप्तेस्तु लौकिकप्रयोगे व्यभिचारो दृश्यते क्वचिद्देशविशेषे लौकिकव्यवहारे जातिमात्रमुपजीव्य विना संस्कारं बर्हिःशब्दः प्रयुज्यते बर्हिरादाय गावो गता इति · तस्माज्जातिवाची बर्हिःशब्दः असंस्कृतं कुशमात्रं बर्हिःशब्देनोच्यतऽइत्यर्थः । प्रयोजनम् बर्हींषि प्राच्युदञ्चि च प्रास्यतीत्यादौ (६.२.१८.) संस्कारा न कर्तव्याः । स्मृतौ कुशाभावे तु काशाः स्युः काशाः कुशसमाः स्मृताः काशाभावे ग्रहीतव्या अन्ये दर्भा यथोचिताः दर्भाभावे स्वर्णरूप्यताम्रैः कर्मक्रियाः सदा कुशकाशशरा दूर्वा यवगोधूमबल्वजाः[2] सुवर्णं राजतं ताम्रं दश दर्भाः प्रकीर्तिताः स्नाने होमे तथा दाने स्वाध्याये पितृतर्पणे सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथा सर्वेषां वा भवेद्वाभ्यां पवित्रं ग्रथितं न वा सपवित्रः सदर्भो वा कर्माङ्गाचमनं चरेत् नोच्छिष्टं तत्सदर्भं च दर्भोच्छिष्टं[3] तु वर्जयेदिति ।

अर्थात्परिमाणम् ॥ १३ ॥ अग्न्यगारादौ वसोर्धाराहोमे च स्रुचः स्रु-

१) °पलचाः २. २) ? बान्वजाः २. बाभ्रूजाः २. ३) भुक्तोच्छिष्टं marg. G.

16245

वस्य च अर्थात्परिमाणं भवति · यावता परिमाणेनार्थः प्रयोजनं सिध्यति तावत्परिमाणं भवतीत्यर्थः परिमाणान्तरस्यानुक्तत्वात् । प्रयोगाद्बहिरेव शुक्रेष्टिवद्वाजश्च मऽइत्यत आरभ्य वेहृस्वाहेत्येतत्पर्यन्तं (१८. १-२९.) पठित्वा[1] कस्मिंश्चित्पात्रे संततं घृतं स्रुक्प्रणालिकया निनीय तस्याज्यस्य तोलनाद्युपायेन परिमाणं निश्चित्य तावदाज्यं यावत्परिमाणायां स्रुचि याति[2] तावत्प्रमाणां तां स्रुचं कुर्यात् तस्याज्यस्य पञ्चमभागसंग्राहकश्च स्रुवः कार्यः । एवं यदा षडब्दप्रत्याम्नाये पावकेष्टिवैश्वानरेष्ट्यादिकं क्रियते तदापि वेदेः पश्चाद्भागोऽर्धात्तावत्परिमाणो विपुलः कार्यो यावति अवरोक्तमुत्तरऽ हविषीति न्यायेन (१. १०. ५.) सर्वेषामुदकसंस्थमासादनं सम्भवति · तदनुसारेण प्राचीप्रमाणं पुरस्तात्तिर्यक्प्रमाणं च पादोनकल्पम् · तदुक्तं शतपथे (१. २. ५. १४.) यावतीमिव स्वयं मनसा मन्येत तावतीं कुर्यादिति · सूत्रे चोक्तम् (५. ३. १५.) अपरिमिता वेति अपरिमितशब्दोऽत्र प्रमाणानियमपर इति वक्ष्यामः । एवं बर्हिर्हविर्द्रव्यपरिमाणानुक्तौ सर्वत्रोह्यम् ।

अयुग्धातूनि यूनानि ॥ १४ ॥ इध्मबन्धनबर्हिर्बन्धनार्थानि यूनानि संनहनानि रज्जवोऽयुग्धातूनि भवन्ति · धातवस्तृणमुष्टिप्रक्षेपाः अयुजो विषमा एकत्रिपञ्चसप्तनवादिविषमसंख्या धातवो येषां तान्ययुग्धातूनि । तथा चापस्तम्बः त्रिधातु पञ्चधातु वा शुल्वं करोतीति · शुल्वं रज्जुमित्यर्थः । पञ्चविंशतिकुशमयानि यूनानि इति यज्ञपार्श्वे[3] । तथा समूलानाममूलानां वा दर्भाणां पूर्ववत् शुल्वं कृत्वोदगग्रं निधायेतीध्मप्रस्तावे । मानवे च शुल्वं प्रतिदधात्ययुग्धातु प्रदक्षिणमिति । तित्तिरिसूत्रे[4] अथ त्रिरन्वाहितं शुल्वं कृत्वेति ॥ अथ बर्हिषो बन्धनप्रकारमाह ·

प्रागग्रे यूनऽउदगग्रं बर्हिराचिनोति ॥ १५ ॥ प्रागग्रे यूने प्रागग्रे संनहने बन्धनार्थायां रज्जौ उदगग्रं बर्हिराचिनोति बन्धनार्थं स्थापयति । अथेध्मबन्धनस्य प्रकारमाह ·

---

1) ? पर्यन्ते पठता २. 2) श्रुति माति २. 3) But wanting in Chambers 358.
4) तैत्तिरि° २.

उदगग्रे प्रागग्रमिध्मम् ॥ १६ ॥ आचिनोतीत्यनुवर्तते · उदगग्रे सूत्रे संनद्धे प्रागग्रमिध्ममाचिनोति बन्धनार्थं निदधाति ।

प्रत्यग्ग्रन्थीनवगूहति ॥ १७ ॥ इध्मबर्हिर्बन्धनार्थानां सूत्राणां ग्रन्थीन्प्रत्यगवगूहति सूत्रेण गाढं बद्धा सूत्रस्याग्रमूले संकल्प्य प्रदक्षिणमावेष्ट्य इध्मबर्हिषोरग्रभागे प्रोतयित्वा पश्चादिति तयोर्मूलभागे अवगूहति प्रेरयति · प्रत्यक्शब्देन इध्मबर्हिषोः पश्चाद्भागो मूलभाग इत्युच्यते दिग्वाचिनो बर्हिष्युदगग्रे निहिते असम्भवात् । काठके ग्रन्थिं कृत्वा पुरस्तात्प्रत्यञ्चमपकर्षतीति । मानवे शुल्वस्यान्तौ समायम्य पूषा ते ग्रन्थिमिति प्रदक्षिणमावेष्टयति पश्चात्प्राञ्चमपकर्षतीति [1]। तैत्तिरीयेऽपि पश्चात्प्राञ्चमुपगूहतीति । आपस्तम्बः पुरस्तात्प्रत्यञ्चं ग्रन्थिमुपगूहति पश्चाद्वा प्राञ्चमिति ।

अष्टादशेध्मं परिधिवृक्षाणाम् ॥ १८ ॥ परिधीनां [2] वृक्षाः पालाशवैकङ्कतादयः परिधिवृक्षाः · तेषां परिधिवृक्षाणां सम्बन्धिनमष्टादशसंख्यकाष्ठकमिध्मं कुर्यात् । मानवे समूलैर्दर्भैः पालाशं खादिरं रौहीतकं वाष्टादशदार्विध्मं संनह्यति त्रींश्च परिधीन्यो यज्ञियवृक्षस्तस्येति । काठके अष्टादशदारु शुष्कं समानवृक्षस्य संनह्यति विंशतिमिष्टौ पशुबन्धे चेति । अत एव सामिधेनीविवृद्धौ काष्ठवृद्धिर्भवति ह्रासे च ह्रासो न भवति पित्र्यादौ · तथाह्यापस्तम्बः सामिधेनिविवृद्धौ काष्ठानि विवर्धन्ते प्रकृतितो [3] ह्रसमानासु प्रकृतिवदिति । उपसत्सु तु मात्रावदिध्माबर्हिरिति वचनात् (८. २. २४.) ह्रासः । इध्मप्रमाणं चारत्निरिति यज्ञपार्श्वे [4] निगमे च · प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्तितमिति कात्यायनः (कर्मप्रदीप १. ८. १२.) · तथा समित्पवित्रं वेदं च त्रयं प्रादेशसंमितम् इध्मस्तु द्विगुणः कार्यः परिधिस्त्रिगुणः स्मृतः स्मार्ते प्रादेश इध्मो वा द्विगुणः परिधिस्तत इति ॥

एकविंशतिं वा ॥ १९ ॥ अथवा एकविंशतिमेकविंशतिसंख्यकाष्ठकमिध्मं कुर्यात् · तथा चापस्तम्बः खादिरं पालाशं वैकविंशतिदारुमिध्मं करोति ।

---

१) ?? °वेष्टयति सतेमा[त्स्यादितः २.] पश्चात्प्रा° २. २) परिधिनो २. ३) ?? सामिधेनिवृद्धौ काष्ठानि विवृद्धंते प्रकृति २. ४) But wanting in Chambers 358.

ततः परिधीनेके ॥२०॥ एके आचार्यास्तत एकविंशतिसंख्यकाष्ठकादिध्मात्त्रीणि काष्ठान्यरत्निमात्राण्येवोपादाय परिधीन्परिदधति · तद्धैकऽइध्मस्यैवैतान्परिधीन्परिदधतीति श्रुतेः (१.३.३.१८.) ॥ अथ वैकमेवेदं सूत्रम् एकविंꣳशतिं वा ततः परिधीनेक इति एके आचार्या विकल्पेन एकविंशतिसंख्यकाष्ठमिध्मं कुर्वन्ति तत इति तस्मादेवैकविंशतिकाष्ठकेध्मात्परिधीन्परिदधति च · एतदेव युक्ततरम् आपस्तम्बसूत्रे एकविंशतिकाष्ठानां विभागदर्शनात् । तथाचाहापस्तम्बः खादिरं पालाशं वैकविंशतिदारुमिध्मं करोति त्रयः परिधयः पालाशकार्ष्मर्यखादिरौदुम्बरबिल्वरोहीतकविकङ्कतानां ये वा यज्ञिया वृक्षा आर्द्राः शुष्का वा सत्वक्काः स्थविष्ठो[1] मध्यमोऽणीयान्द्राघीयान्दक्षिणार्ध्यो ह्रसिष्ठ उत्तरार्ध्यो द्वेऽआघारसमिधावनुयाजसमिदेकविंशीति समूलानाममूलानां वा दर्भाणां पूर्ववच्छुल्वं कृत्वोदगग्रं निधायेति । अत एवंविधमेकीयमतम् यदेकविंशतिकाष्ठक इध्मः तस्मिन्पक्षे चेध्मादेव त्रीणि काष्ठान्यादाय परिधिपरिधानमिति ॥ बन्धनानन्तरमिध्मबर्हिषोर्भूमौ निधानं न कार्यम् आपस्तम्बसूत्रे अनधो निदधातीत्युक्तत्वात् ॥ तद्धैकऽइध्मस्यैवैतान्परिधीन्परिदधतीत्यत्र (१.३.३.१८.) हरिस्वामिनः तदु तथा न कुर्यादनवक्लृप्ता हि तस्यैते भवन्तीति (१८.) बाहुमात्रैः परिधिभिरार्द्रैश्च भवितव्यम् इध्मस्तु शुष्क इन्धनत्वादेव द्विप्रादेशश्च तेन ते इध्मैकदेशभूताः परिधित्वायासमर्थाः[2] स्युः तदिदमाह अभ्याधानाय हीति (१८.) शुष्को ह्यसावाधेयः यावत्खरमात्रऽआहवनीयखरे सम्भवतीत्यभिप्रायः यस्तु परिधिबुद्ध्या आहरति सोऽवश्यं वेष्टनीयादग्निखरादतिरिक्तमेवाहरति अग्निवेष्टनं च दाहभयान्न शुष्कमिति तऽएवावक्लृप्ता इति ॥

अपरिमितं प्रणयनीयं त्रिषूनम् ॥२१॥ प्रणयनस्यायं प्रणयनीयः · तं प्रणयनीयमग्निप्रणयनार्थमिध्ममपरिमितमपरिमितकाष्ठकं त्रिषूनं तिसृभिः संनहनरज्जुभिर्बद्धं कुर्यात् । त्रीणि षूनानि बन्धनानि यस्य स त्रिषूनः तं त्रिषूनमिति । अपरिमितत्वं च प्रागुक्तेध्मकाष्ठसंख्यापेक्षयातिशयेनाधिकसंख्यकाष्ठकत्वम् · तेन चतुर्विंशतिसामिधेनीको य इष्टकापशुस्तत्र सप्तविंशतिः काष्ठानि भवन्ति · ततश्च

[1] ? प्रविष्ठो २· [2] ? °वायास° २·

प्रणयनीये ततोऽप्यधिकानि अष्टाविंशतिप्रभृतीनि इष्टासंख्यानि काष्ठानि भवन्ति।

निरुप्याज्यं वेदोऽसीति यजमानो वेदं करोति ॥२२॥ यजमान आज्यं निरुप्य प्रथमं वक्ष्यमाणप्रकारेणाज्यनिर्वापमाज्यस्थाल्यां कृत्वा वेदोऽसीत्यनेन मन्त्रेण (२.२१.) वेदं करोति। अस्य मन्त्रस्यानेकयजमानके ऊहो भवति · तेनावाभ्यां वेदो भूया इति द्वियजमानके · तेनास्मभ्यं वेदो भूया इति बहुयजमानके · देवपितृभ्यो वेदो भवेति पित्र्यायाम्। कीदृशं तमित्यपेक्षायामाह ·

कुशमुष्टिं सव्यावृत्तं वत्सज्ञानुं त्रिवृतं मूतकार्यं वा पशुब्रह्मवर्चसान्नाद्यकामा यथासंख्यम् ॥२३॥ पशुब्रह्मवर्चसान्नाद्यकामा यजमाना यथासंख्यं यथोपदेशक्रमेण एवमाकारं वेदं कुर्युः। तत्र पशुकामः कुशमुष्टिं सव्यावृत्तं प्रदक्षिणावृत्तं वत्सज्ञानुं वेदं करोति · अस्य निर्माणप्रकारः कठमैत्रसूत्रादिषु विलोकनीयः · ब्रह्मवर्चसकामः कुशमुष्टिं त्रिवृतं करोति अन्नाद्यकामो मूतकार्यम् · इति यथासंख्यशब्दार्थः। वत्सज्ञानुरिति वत्सज्ञानुसदृशः। त्रिवृत्त्रिगुणः · मौञ्जं त्रिवृद्रज्जव्यम् मुञ्जरज्जवस्त्रिवृतो मृदिग्धाः त्रिवृतं परिव्ययतीत्यादौ (६.३.१६.) तथैव दर्शनात् · मेखलायाम् वेणीं त्रिवृतमिति (७.३.२६.) पृथङ्निर्देशात्त्रिवृच्छब्देन वेण्याकारता यत्कैश्चिदुक्ता तत्केनाभिप्रायेणेति तएव विदुः। मूतो धान्यावापपात्रं तृणवर्त्यादिनिर्मितम् तद्वत्क्रियतऽइति मूतकार्यो मूताकार इत्यर्थः। तथा च मनुः वेदं करोति वत्सज्ञुं प्रसव्यमाविध्य तूलैर्दक्षिणोत्तरतूलेषु शुल्वं प्रतिनिधाय त्रिराविध्य संनह्यत्युत्तरमुत्तरं प्रादेशमात्रे शुल्वात्परिवास्योत्करे मूलानि गमयति तूलानि निदधाति वेदं कृत्वा वेदिं करोतीति। तैत्तिरीये वेदं करोति वत्सज्ञानुं पशुकामस्य मूतकार्यमन्नाद्यकामस्य त्रिवृतं तेजस्कामस्योर्धाग्रं स्वर्गकामस्येति। लौगाक्षिः वेदं करोति दर्भमुष्टिं प्रसव्यमावेष्ट्योपभुज्याग्राणां शुल्वं कृत्वा त्रिः परिहृत्य गुणेषु शुल्वान्तमवकृष्यायम्य शुल्वात्प्रादेशे छित्त्वाग्राणीध्मे निधायोत्करे मूलानि ततो वेदिकरणमिति। आपस्तम्बश्च दर्भाणां वेदं करोति वत्सज्ञुं पशुकामस्य मूतकार्यमन्नाद्यकामस्य त्रिवृच्छिरसं ब्रह्मवर्चसकामस्य शुल्वात्प्रादेशे परिवास्य वेदपरिवासनानि निदधातीति · त्रिवृदेकशिराः त्रिवृच्छिराः त्रीणि शिरांसीति केचित् · कामाभावेऽप्येता आकृतयः अकामस्यान्यस्याविधा-

नात् · परिवासनानि सर्वाण्येव वेदाग्राणि · इति धूर्तस्वामिना व्याख्यातम् । अत एव सूत्रकृता वेदबन्धनं परिभाषायां सूत्रितम् वेदाकाराणां सर्वसाधारणत्वज्ञापनाय अन्यथा तु ते गोदोहनादिवद्गुणफलसम्बन्धात्प्रकृताविव निविशेयुर्न विकृताविति · तस्माद्दर्शपूर्णमासप्रकरणान्निष्कृष्यात्र सर्वसाधारणं परिभाषोपबन्धनमध्ये सूत्रितम् । वेदस्य प्रमाणं परिशिष्टेऽउक्तम् वेदं समित्पवित्रं च त्र्यं प्रादेशसंमितमिति ॥

आमुष्मादिति कर्मसु तच्च ॥२४॥ कर्मसु पश्वादिषु यत्र-यत्र आ अमुष्मादित्येवमाङ्प्रयोगः क्रियते सूत्रमध्ये तद्यथा आ प्रयाजेभ्य आ इडाया आ वैश्वदेवादिति (६.४.१. ३.१.४. ९.१२.८.) तत्र तत् चाप्यर्थे तदपि कर्म कर्तव्यत्वेन ज्ञेयं यदाङा सम्बद्धं प्रयाजादिकम् । सर्वत्राऽभिविध्यर्थो ज्ञेयो न मर्यादार्थः · यदाङा संयुक्तं तदपि कर्तव्यमध्ये ज्ञेयम् न त्ववधित्वेनेत्यर्थः ।

अन्तवचने च ॥२५॥ शम्य्वन्तं भवतीडान्तं भवतीत्येवमादावन्तवचने (३.७.२३. ५.६.२५.) चकारात्तच्चेति पूर्वसूत्रादनुकृष्यते तदप्यन्तसंयुक्तं शम्य्विडादिकं कर्तव्यमध्ये ज्ञेयम् · न त्वन्तशब्दः समीपार्थः परिकल्प्यः[1] तत्समीपे ततोऽर्वाक्स्थातव्यमिति ॥

प्रतिकर्मोद्धरणमप्रसङ्गे ॥२६॥ प्रतिकर्म कर्म-कर्म प्रति सर्वेषु कर्मसु पृथक्पृथगाहवनीयदक्षिणाग्न्योर्गार्हपत्यादुद्धरणं कर्तव्यम् न त्वाधानकालऽएवोद्धृतौ गार्हपत्यवत्सर्वं कर्म प्रति साधारणौ भवतः । परम् अप्रसङ्गे सति अन्यार्थमनुष्ठितस्यान्येनोपजीवनं प्रसङ्गः न प्रसङ्गः अप्रसङ्गस्तस्मिन्निति · तेन यदि दर्शपूर्णमासपश्वाद्यर्थमुद्धृतौ अनपवृक्तौ लभ्येते नित्यकर्मकाले तदा तत्कर्मार्थं पुनः पृथगुद्धरणं न क्रियते तयोरेव तदपि नियतकालीनं कर्म क्रियते · यथा अग्निहोत्रमागतोपस्थानादिकं च पुनराधानानन्तरं धारणे कृते विकृतेष्टिपशुचातुर्मास्यादिकं च ।

अपवृक्तकर्मा लौकिकोऽर्थसंयोगात् ॥२७॥ अपवृक्तं समाप्तं कर्म यस्मिन्सोऽपवृक्तकर्मा आहवनीयो लौकिको भवति वैदिकमाहवनीयत्वं संस्कारद्रूपं

1) परिकल्प्य २.

ततोऽवगह्नतीत्यर्थः । कुतः अर्थसंयोगात् यदर्थमुद्धृतस्तस्य तेनार्थेन प्रयोजनेन संयोगात् · तेन यत्कर्मार्थमुद्धृतस्तत्समाप्त्यनन्तरं लौकिको ज्ञेयः · अत ऊर्ध्वमाह्वनीयशब्देन विहितं कार्यं तत्र न कर्तव्यमित्यर्थः । अतश्च पौर्णमास्यादौ यदि बह्व्य इष्टयः पृथक्तन्त्राः क्रियन्ते तदा प्रतीष्टि पृथक्पृथगेवोद्धरणं कार्यम् न सकृदुद्धृतऽएव सर्वासामनुष्ठानमिति ।

अप्रकरणोत्पत्तिरनारभ्यवाद आश्रयित्वात्सर्वगुणः ॥२८॥ न विद्यते कस्यचित्कर्मणः प्रकरणे उत्पत्तिर्यस्य असौ अप्रकरणोत्पत्तिः · किंचित्कर्मारभ्योपक्रम्योच्यते उच्यतऽइत्यारभ्यवादः न आरभ्यवादोऽनारभ्यवादः । यथा[1] पर्णमयी जुहूर्भवति खादिरः स्रुवो भवतीत्यादिर्यो विधिः कस्यचित्कर्मणः प्रकरणे पठितो न भवति वाक्यान्तरेण च कर्मविशेषे विनियुक्तो न भवति अमुष्मिन्कर्मणि खादिरः स्रुवो भवतीत्येवंविधः यस्य प्रकरणेन वाक्येन चाङ्गत्वं न सम्भवति स एवंविधः पर्णमयीत्वखादिरत्वादिविधिः सर्वगुणो भवति प्रकृतेर्विकृतेश्च साधारण एवोपदिष्टो भवति । कुतः आश्रयित्वात् आश्रयोऽस्यास्तीत्याश्रयी तस्य भावस्तत्त्वं तस्मात् जुह्वां स्रुवे चाश्रितत्वात्पर्णमयीत्वखादिरत्वादेः । यतोऽव्यभिचरितक्रतुसम्बन्धवर्तीं जुहूमाश्रित्य तद्धेतुः पर्णवृक्षो वाक्येन विधीयते या जुहूः सा पर्णमयीति एवमव्यभिचरितक्रतुसम्बन्धवन्तं स्रुवमाश्रित्य तत्प्रकृतिभूतः खादिरवृक्षो वाक्येन विधीयते यः स्रुवः स खादिर इति · वाक्यं च प्रकृतिविकृत्योस्तुल्यमेव वर्तते उभयत्राश्रयभूतयोः स्रुवजुह्वोः सत्त्वात् · अतः खादिरत्वस्य पर्णमयीत्वस्य चाश्रयित्वात्स्रुवजुह्वाश्रितत्वात् स्रुवजुह्वोश्च प्रकृतिविद्यमानत्वात् एवंविधोऽनारभ्यवादः सर्वगुणः प्रकृतिविकृत्योरुभयोरप्यङ्गमिति प्राप्ते सिद्धान्तमाह ·

प्रकरणे चाविशेषात् ॥२९॥ चकारोऽवधारणे निपातानामनेकार्थत्वात् · प्रक्रियन्तेऽस्मिन्धर्मा इति प्रकरणं प्रकृतिः · अप्रकरणोत्पत्तिरनारभ्यवादरूपो विधिः प्रकरणऽएव प्रकृतावेव निविशते नोभयत्र प्रकृतौ विकृतौ चेति । कुतः अविशेषात् यतश्चोदकः प्रकृतितः सर्वमङ्गजातं प्रकरणपठितमनारभ्य-

[1] ? यस्य २.

वादप्रापितं चाविशेषेण विकृतौ प्रापयति । तथा हि किमयं विधिर्विकृतौ चोदकात्पूर्वं निविशते पश्चाद्वा · नाद्यः आश्रयभूतयोः स्रुवजुह्वोश्चोदकमन्तरेणासम्भवात् अतोऽनेन विधिनाश्रयभूतस्रुवजुह्वलाभार्थं विकृतौ चोदकप्रवृत्तिः प्रतीक्षणीया · पश्चादयं विधिर्निविशतऽइति द्वितीयपक्षे पर्णत्वं खादिरत्वं च जुह्वा स्रुवेण च सहैव चोदकेनातिदिश्यते · तत्र चोदकेन प्रापिते सति यद्यनारभ्यविधिः पुनः प्रापयेत द्विरुक्तितादोषः स्यात् अतश्चोदकेन प्रापितत्वात्पुनर्विधेर्वैयर्थ्यादनारभ्यविधिः प्रकृतावेव निवेश इति सिद्धान्तः । ननु विकृतावनारभ्यविधिनैव पर्णमयीत्वे खादिरत्वे च प्रापिते पश्चाच्चोदकस्तद्धर्ममङ्गानि प्रापयिष्यति एवं द्विरुक्तितादोषो न भविष्यति · मैवम् · यतो वैकृतस्य प्रधानस्य अनारभ्यविधिं प्रत्यपेक्षा नास्ति चोदनासारूप्याभावात् निराश्रयस्य पर्णत्वादेर्विधातुमशक्यत्वाच्च । अतो वैकृतं प्रधानं धर्मापेक्षं सचोदनासारूप्यात्प्राकृतानेव [1] धर्मान्प्रथमं गृह्णाति तदङ्गभूतं पर्णत्वादिकं चेति सिद्धम् ।

दर्शनाच्च ॥ ३० ॥ विकृतौ प्रयाजादीनां प्राकृतानां धर्माणां दर्शनादप्येवं ज्ञायते यदनारभ्यवादा विकृतौ चोदकात्पूर्वं न निविशन्तऽइति · यदि पूर्वं निविशेयुस्तदा वैकृतं प्रधानमनारभ्यविधिनैव पूरितं सन्निराकाङ्क्षत्वात्प्राकृतान्यङ्गानि न गृह्णीयात् तदा च विकृतौ प्रयाजादीनां प्राकृतानां दर्शनं न स्यात् · अस्ति च · तथा ह्यश्वमेधे ऽथ सावित्रीमिष्टिं निर्वपतीति (१३. ४. २. ६.) प्रकृ[त्य] तस्यै प्रयाजेषु तायमानेष्विति (८.) अत्र गाथागानविधिपरे वाक्ये प्राकृतान्प्रयाजान्दर्शयति · पित्र्यायां च स तत एव प्राक्स्तम्बयजुर्हरतीत्यत्र (२. ६. १. १२.) स यज्ञोपवीती भूत्वाज्यानि गृह्णातीति (१८.) यज्ञोपवीतित्वविधिपरे वाक्ये बहून्प्राकृतान्पदार्थान्दर्शयति · ते च प्राकृतधर्मसापेक्षत्वे एव प्रयुज्यन्ते नान्यथा तस्मादनारभ्यवादाः प्रकृतावेव निविशन्तऽइति सिद्धम् । उदाहरणान्तरं च · ताण्डे अनारभ्याधीताः प्रतिपत्पक्षाः सन्ति · ते यदि सर्वार्थाः तर्हि विकृतावपि ते भवन्ति यदि प्रकृतावेवानारभ्यविधेर्निवेशः तदा तेषां प्रतिपत्पक्षाणां विकृतावप्रयोगः पुरुषार्थत्वेन विकृतौ प्राप्त्यभावादिति ॥ ॥

---

1) ? सचोद° २.

वैकङ्कतानि पात्राणि ॥३१॥ यज्ञपात्राणि सर्वाणि वैकङ्कतानि विकङ्कतवृक्षकाष्ठघटितानि भवन्ति ततो विकङ्कतः समभवत्तस्मादेष यज्ञियो यज्ञपात्रीयो वृक्ष इति श्रवणात् (२. २. ४. १०.)। सामान्यसूत्रमेतत् अस्यापवादमाह ·

खादिरः स्रुवः ॥३२॥ स्रुवः खादिरः स्यात्।

स्फ्यश्च ॥३३॥ चकारात्स्फ्यो वज्रोऽपि खादिरः स्यात् खादिर स्फ्य इति श्रुतेः (३. ६. २. १२.)।

पालाशी जुहूः ॥३४॥ हूयते अनयेति जुहूः स्रुक् सा च पालाशी पलाशवृक्षकाष्ठनिर्मिता भवति यस्य पर्णमयी जुहूर्भवति न स पापꣳ श्लोकꣳ शृणोतीति श्रुतेः।

आश्वत्थ्युपभृत् ॥३५॥ उपभृत्संज्ञका स्रुक् आश्वत्थी अश्वत्थकाष्ठघटिता भवति। ध्रुवा तु वैकङ्कती भवति वैकङ्कतानि पात्राणीत्यनेनैव (३१.) · अपवादाभावात् · होमसाधनत्वाच्च तया हि समिष्टयजूर्हूयते तिष्ठन्ध्रुवया समिष्टयजुर्जुहोतीति शाखान्तरश्रुतेः · अत एव मैत्रकठापस्तम्बसूत्रेषु वैकङ्कती ध्रुवेति पठ्यते तेषां हि वैकङ्कतानि पात्राणीति सामान्यवचनं नास्ति।

वारणान्यहोमसंयुक्तानि ॥३६॥ होमेन संयुक्तानि यैर्होमः क्रियते तानि होमसंयुक्तानि न होमसंयुक्तान्यहोमसंयुक्तानि यैर्होमो न क्रियते तानि वारणानि भवन्तीत्यर्थः · परिशेषाद्यानि होमसंयुक्तानि होमसाधनानि यैर्होमः क्रियते तानि वैकङ्कतानि ॥ तत्र वारणान्युदाह्रियन्ते उलूखलमुसलकूर्चेडापात्रीपिष्टपात्रीपुरोडाशपात्रीशम्याशृतावदानाश्र्युपवेषान्तर्धानकटप्राशित्रहरणषडवत्तब्रह्मयजमानासनहोतृषदनादीनि। तत्रोलूखलमुसलयोर्विशेषः मुसलोलूखले वार्क्षे स्वायते सुदृढे तथा इच्छाप्रमाणे भवतः शूर्पं वैणवमेव चेति · तथा खादिरं मुसलं कार्यं पालाशः स्यादुलूखलः यद्वोभौ वारणौ कार्यौ तदभावेऽन्यवृक्षजाविति। कूर्चो बाहुमात्रः पीठाकारः। इडापात्री अरत्निमात्री मध्यसंगृहीता। तथैव द्वितीया हविर्धारणी पात्री अतिविपुला · पिष्टपात्रीति सैवोच्यते। पुरोडाशपात्री प्रादेशमात्री समचतुरस्रा · अर्थात्षडङ्गुलपरिमितपरिमण्डलखातवती लोकाह्विस्य प्रतिपत्तिरिति कठसूत्रात्। शम्या प्रादेशमात्री। प्रादेशमात्रं ती-

क्ष्णाङ्गुष्ठपर्वमात्रपृथुमुखं शृतावदानम् । अग्निररत्निमात्रस्तीक्ष्णमुखः । उपवेषोऽर-
त्निमात्रः प्रादेशमात्रो वा हस्ताकृतिः । अन्तर्धानकटस्त्वर्धचन्द्राकारो द्वादशाङ्गुलः
समाचारात् । प्राशित्रहरणस्य त्वाकारं वक्ष्यति (१.३.४०.) । षडवत्तं च उभयत्र
खातवत् । आसनानि चारत्निमात्राणि वा प्रादेशमात्राणि वा प्रादेशमात्रपृथूनि ।
सर्वेषु पात्रेषु मूलाभिज्ञापकानि वृत्तानि कार्याणि । एतान्यहोमसंयुक्तत्वाद्वारणा-
नि ॥ अथ वैकङ्कतान्युच्यन्ते । यथा प्रकृतौ वैकङ्कती ध्रुवा । अग्निहोत्रहो-
मार्था स्रुगग्निहोत्रहवणीसंज्ञा । अग्निहोत्रहोमार्थः स्रुवश्च । सोमयागे ग्रहचमस-
द्रोणकलशादीनि च · तत्रापि हविर्धानाधिषवणफलकपरिप्लवासम्भरण्यादीन्य-
होमसंयुक्तानि वारणान्येव · षोडशिपात्रं खादिरम् · अंशुदाभ्यग्रहणपात्रमौदुम्बरं
वचनात् (१२.५.६.) · वाजपेये सप्तदश सोमग्रहाः सप्तदश सुराग्रहाश्च तेषां
पात्राणि वारणान्यहोमसंयुक्तत्वात् · सप्तदशसुराग्रहाणां पात्राणि मृन्मयान्यपि
शाखान्तरसूत्रेषूक्तानि सन्ति । एवमादि सर्वमूहनीयम् ॥ परिभाषायाः साधार-
णत्वादावसथ्यपात्राण्यप्यहोमसंयुक्तानि वारणान्येव प्रणीताप्रोक्षणीपात्रदर्वीकिङ्क-
तादीनि ॥ यज्ञपार्श्वे (९८-१०२.) चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः
त्र्यङ्गुलस्तु भवेत्स्कन्धो[1] विस्तारश्चतुरङ्गुलः विकङ्कतमयाः श्लक्ष्णास्त्वग्बिला-
श्चमसाः[2] स्मृताः अन्येभ्यो वापि वा कार्यास्तेषां दण्डेषु[3] लक्षणम् होतु-
र्मण्डल एव स्याद्ब्रह्मणश्चतुरस्रकः उद्गातॄणां च त्र्यश्रि[4] स्याद्यजमानः पृथुः
स्मृतः प्रशास्तुरवतष्टः स्यादुत्तष्टो ब्रह्मशंसिनः पोतुरग्रेविशाखी स्यान्नेष्टुः
स्याद्विगृहीतकः अछावाकस्य रास्नाव आग्नीध्रस्य मयूखकः[5] इत्येते चमसाः
प्रोक्ता ऋत्विजां[6] यज्ञकर्मणि पलाशाद्वा वटाद्वान्यवृक्षाद्वा चमसाः स्मृता[7]
इति । स्मृत्यर्थसारे[8] समित्पवित्रं वेदं च मुसलोलूखलं ग्रहान् नाभ्युखा-
सन्द्युपरवाञ्छम्यास्रुक्पुष्कराणि च शाखास्वरुविषाणानि चत्रूणां मेक्षणानि

---

१) त्र्यङ्गुलं तु भवेत्खातं Y. (Chambers 358). २) °मयान्पात्रास्त्व° Y. ३) अन्यो-न्यावापि कार्या स्युस्तेषां दंडेषु Y. (दंडे तु sec. h.). ४) °तॄणां त्रिरत्नि Y. ५) रास्ना-वमाग्नीध्रस्य मयूषकः Y. ६) ऋत्विग्भ्यो Y. ७) This last hemistich is wanting in Y. ८) The following quotation stands in the Yajnapárçva, as १०३-१०४, immediately after the just quoted verses.

च कुर्यात्प्रदेशमात्राणि महावीरास्त्रयस्तथा द्रोणकलशाधिषवणफलके [1] स्रुग्दण्डपरिधिशूलानि [2] स्फ्यशूर्पोपवेषेध्मानपि [3] प्रणयनीयावपाश्रपण्यौ [4] कुर्यादरत्निमात्राणीति । निगमे (२४.) नैयग्रोधाश्चमसाश्चतुरस्राः प्रस्थोदकग्राहिणस्त्वग्बिला दण्डलक्षणाः · परिमण्डलश्चतुरस्रस्त्र्यश्रिः पृथुरवतष्टोत्तष्टविशाखविगृहीतराह्वावमयूखक्रिया [5] होतृब्रह्मसामगस्वामिप्रशास्तृब्राह्मणाछंसिपोतृनेष्टृहोत्रावाकाग्नीध्राणाम् [6] · द्रोणकलशः पलशतग्राही परिप्लवाकृतिः [7] स्थाल्यर्धशतिकैकधनास्त्रिंशतिका ग्रहाः पञ्चपलिकाः · पुष्करा ग्रावाणो हस्तपर्णमात्राः जानुमात्रमुलूखलं पालाशम् पञ्चविंशतिपलमिडापात्रम् मुसलं खादिरं त्र्यरत्नि · दृषदरत्निप्रमाणा शूर्पं शम्यादर्वीशूलशङ्कवोऽधिषवणमसिशाखेध्मा धृष्टिः [परीशा]सावभ्रिरधरारणिः [8] परशुश्चेति · पवित्रं सत [9] उत्तरारणिर्वेदो मेक्षणं पैतुदारवाः शरावं प्राशित्रहरणं शृतावदानं स्वरूपवेषसमिधश्चेति प्रादेशमात्राणि · सतप्रणयनचमसौ प्रास्थिकौ वितस्तिप्रमाणं पदप्रमाननिति । मण्डनः रौहीतकान्यग्रोधोत्थान्पालाशान्वा [10] कठश्रुतेः कुर्वीत चमसांस्तेषामभावेऽन्यद्रुमोद्भवान् आश्वत्थं वारणं नो चेदिडापात्रमिहान्यजम् अग्निहोत्रहवण्यत्र ग्राह्या वैकङ्कती शुभा पालाशी तु कठश्रुत्या द्वयाभावेऽन्यवृक्षजेति । आपस्तम्बः खादिरः स्रुवः पर्णमयी जुहूराश्वत्थ्युपभृद्वैकङ्कती ध्रुवैतेषां वृक्षाणामेकस्य स्रुचः कारयेद्बाहुमात्र्योऽरत्निमात्र्यो वाग्राग्रास्त्वक्तोबिला हंसमुख्यः स्फ्यशम्याप्राशित्रहरणमिति खादिराणि वारणान्यहोमार्थानि भवन्तीति । मानवे खादिरं स्फ्यस्रुवं पालाशी जुहूराश्वत्थ्युपभृद्वैकङ्कती ध्रुवा मूलतोऽरत्निमात्रदण्डाः पाणितलमात्रपुष्कराः स्रुचो बिला ध्यङ्गुलखाताश्चतुरङ्गुलोछ्र्याः प्रादेशमात्राणि प्रस्रवणानीति [11]। काठके अरत्निमात्री स्रुगग्निहोत्रहवणी पालाशी सामान्यतया [12] निर्वपणमि-

---

1) °षवणे फलके Y. 2) शूलाश्च Y. 3) °ध्मावपि २. °ध्मानपि Y. 4) प्रणयिनीयावधिवपा° Y. 5) पृथोवतष्टो° २. and Nigama. पृथोरवत° २. °विगृहीतारा° ५. and Nig. 6) होतृब्रह्मस्वामिसामगहोतृप्रशास्तृ° २. होतृब्रह्मसामगस्वामिहोतृप्रशाछ्य° Nig. 7) परिपूषाकृतिः २. परिप्लवाकृत्ति Nig. 8) ?धृष्टिः सावभ्रि° २. धृष्टिसावभ्रि° Nig. 9) सत् २. समित् २. सत Nig. 10) °कान्यग्रोधोश्वत्थान्पा° २. 11) प्रस्रावणीति २. 12) Thus *M. Müller*, Zeitschrift der Deutschen Morg. Gesellsch. vol. IX, pag. XLI. सा मान्या तथा २.

तरासाम् बाहुमात्राः स्रुग्दण्डाः प्रहस्तमात्राणि प्रस्रवणान्यर्थपरिमाणानि पात्राणि पालाशी जुहूराश्वत्थ्युपभृद्वैकङ्कती ध्रुवा शमीभूर्तमय्यो वा वक्त्रोबिला हंसमुख्यो भवन्तीति श्रुतिर्नैयग्रोधाश्मसा रौहीतका वा सर्वाणि वा पर्णमयानि स्फ्यस्रुव- शम्यं खादिरं प्राशित्रहरणं च यद्वायज्ञियानां[१] पात्रीडाचमसम् लोकाहिषस्य प्रतिपत्तिरिति ।

बाहुमात्र्यः स्रुचः पाणिमात्रपुष्करास्त्वग्बिला हंसमुखप्रसेका मूलदण्डा भवन्ति ॥३७॥ बाहु(:) प्रमाणमासाम् ताः बाहुमात्र्यः बाहुप्रमाणाः स्रुचः भवन्ति । तथा पाणिः प्रमाणमस्य तत्पाणिमात्रम् पाणिमात्रं पुष्करं मुखं यासां ताः पाणिमात्रपुष्कराः स्रुचः भवन्ति । तथा त्वग्बिलाः त्वक्प्रदेशे बिलं मुखं यासां तास्त्वग्बिलाः । तथा हंसमुखप्रसेकाः प्रसिच्यते क्षार्यतेऽनेनेति प्रसेकः प्रणालिका हंसमुखसदृशः प्रसेकः प्रणालिका यासां ताः हंसमुखप्रसेकाः · सा च प्रणालिका एकैव भवति एकयापि शास्त्रार्थस्य कृतत्वात् कार्यसिद्धेश्च न तु द्वे तिस्रो वा कुत्राप्यनुक्तत्वात् । तथा मूलदण्डाः मूले दण्डो यासां ता मूलदण्डाः · अर्थादग्रे पुष्करं सिध्यति । एवंविधाः स्रुचो भवन्ति । शाखान्तरीयो विशेषः पूर्वसूत्रऽउक्तः ।

अरत्निमात्रः स्रुवोऽङ्गुष्ठपर्ववृत्तपुष्करः ॥३८॥ अरत्नि(:) प्रमाणमस्यासावरत्निमात्रः स्रुवोऽरत्निप्रमाणो भवति । पुनः कीदृशः अङ्गुष्ठपर्ववृत्तपुष्करः · अङ्गुष्ठपर्वणो वृत्तमङ्गुष्ठपर्ववृत्तम् अङ्गुष्ठपर्ववृत्तप्रमाणं वृत्तं पुष्करं मुखं यस्यासावङ्गुष्ठपर्ववृत्तपुष्करः · पर्वशब्दः संधिवाची संधिर्ग्रन्थिः · तदुक्तम् अङ्गुष्ठाङ्गुलिमानं तु यत्र-यत्रोपदिश्यते तत्र-तत्र बृहत्पर्वग्रन्थिभिर्मिनुयात्सुध इति · अतोऽङ्गुष्ठस्य बृहत्पर्वग्रन्थिप्रमाणं चतुरस्रं कृत्वा तदेव मण्डलं चतुरस्रं चिकीर्षन्नित्युपायेन वृत्तं विधाय तत्प्रमाणं स्रुवस्य पुष्करम् । नासिकावत्खातं च स्यात् · तदुक्तं कात्यायनेन (कर्मप्रदीप १. ८. १३.) स्रुवाग्रे घ्राणवत्खातमिति · तथा पुष्करार्धं भवेत्खात इति च ।

---

१) ? यज्ञायज्ञि॰ २.

स्फ्योऽस्याकृतिः ॥३९॥　　असिः खड्गः असेरिव आकृतिर्यस्य असावस्याकृतिः　खड्गसदृशः स्फ्यो वज्रो भवतीत्यर्थः ।

आदर्शाकृति प्राशित्रहरणम् ॥४०॥　　प्राशित्रमिति ब्रह्मणो भागावदानम्　तत् ह्रियते येन तत्प्राशित्रहरणम् · आदर्शो दर्पणः · आदर्शस्येवाकृतिराकारो यस्य तदादर्शाकृति　आदर्शसदृशं वर्तुलम् · तत्रावदानविधानाच्च खातवत्प्राशित्रहरणं भवति ।

चमसाकृति वा ॥४१॥　　चमसस्येवाकृतिराकारो यस्य तच्चमसाकृति · वा विकल्पे · अथवा चमससदृशं चतुरस्रं प्राशित्रहरणं भवति ।

चात्वालोत्करावन्तरेण संचरः ॥४२॥　　संचरन्त्यनेनेति संचरः गमनागमनमार्गः · चात्वालश्च उत्करश्च चात्वालोत्करौ · तौ अन्तरेण तयोरन्तरालेन सर्वेषां विहितकार्यार्थं संचरः गमनागमनमार्गो भवति । अयं च सोत्तरवेदिकेषु वरुणप्रघासमहाहविःपशुसोमेषु ज्ञेयः　चात्वालस्यैषेव सत्वात् · अतः सोत्तरवेदिकेषु सर्वैरनेनैव मार्गेण गमनागमने कार्ये ।

प्रणीतोत्कराविष्टिषु ॥४३॥　　अन्तरेण संचर इत्यनुवर्तते · इष्टिषु दर्शपूर्णमासादिषु प्रणीतोत्करावन्तरेण प्रणीतोत्करयोरन्तरालेन सर्वेषां विहितकार्यार्थं संचरः गमनागमनमार्गो भवति । अन्तरेणेत्ययं निपातोऽन्तरालशब्दार्थे · तद्योगे चात्वालोत्करौ प्रणीतोत्करावित्ति च द्वितीया · अन्तरान्तरेण युक्तऽइति (पाणि° २. ३. ४.) सूत्रात् ॥　॥ तृतीया कण्डिका ॥३॥

अथ पद्धतिः ॥

ऋचो यजूंषि सामानि प्रैषाश्चेते मन्त्रसंज्ञाः । यजुषां च यावति पदसमूहऽउच्चरिते पदसमूहो निराकाङ्क्षो भवति तावत्परिमाणमेकं वाक्यं कर्मकाले प्रयोक्तव्यम् · यत्र तु मध्ये पठितैः पदैर्यजुर्निराकाङ्क्षं न जायते तत्र पदान्तरं योग्यमध्याहृत्य पूर्वपठितं वानुषज्य निराकाङ्क्षीकृत्य प्रयोज्यम् । प्रयोगकाले मन्त्राः कर्मारम्भे प्रयोज्याः · मन्त्राणामन्तऽएव कर्मारम्भणीयम् । ते मन्त्राः सूत्रमध्यऽआदिमात्रेणोपात्ताः सन्तः कर्मकाले सकलाः प्रयोज्याः · सूत्रोपात्तेन परस्य मन्त्रस्यादिना पूर्वस्य मन्त्रस्यान्तो ज्ञातव्यः । यजुर्वेदमन्त्रा उपांशु प्रयोज्याः · ऋग्वेदसामवेदयोस्तु

मन्त्रा उच्चैः प्रयोज्याः · प्रैषास्तु यजुर्वेदविहिता अप्युच्चैरेव प्रयोज्याः तेषामन्य-सम्बोधनार्थत्वादुपांशुप्रयुक्तेरन्यसम्बोधनासिद्धेः ॥ अथ बर्हींषि प्राचीनाग्राणि चेत्यादौ यत्र बर्हिःशब्देन विधानं दृश्यते तत्र-तत्रासंस्कृतमेव कुशजातिमात्रं ग्राह्यम् । अग्न्यगारादौ वसोर्धाराहोमे स्रुक्स्रुवादौ च परिमाणविशेषानुक्तौ अर्थात्परिमाणं ज्ञेयम् यावता परिमाणेन कार्यसिद्धिर्भवति । इध्मबर्हिर्बन्धनार्थानि संनहनान्ययुग्धातूनि भवन्ति विषमसंख्यैस्तृणमुष्टिभिर्युतानि भवन्तीत्यर्थः · प्रागग्रे संनहनऽउदगग्रं बर्हिर्निधाय संनहनेन बद्ध्वा बर्हिर्मूलभागे ग्रन्थिमवगूहेत् · उदगग्रे संनहने प्रागग्रमिध्मभागं निधायेध्ममूले ग्रन्थिमवगूहेत् · पुरस्तात्प्रत्यञ्चं ग्रन्थिमवगूहति पश्चाद्वा प्राञ्चमित्यापस्तम्बः । इध्मश्च पालाशोऽष्टादशसंख्यारत्निमात्रकाष्ठकः एकविंशतिसंख्यकाष्ठको वा कार्यः · पालाशाभावे वैकङ्कत इध्मः कार्यः · तदभावे कार्ष्मर्यमयः कार्ष्मर्यः श्रीपर्णीवृक्षः · तदभावे बैल्वो वा औदुम्बरो वा खादिरो वा । एके आचार्याः एकविंशतिकाष्ठकादिध्मादेव त्रीणि काष्ठान्यरत्निमात्राण्येवोपादाय तैः परिधिपरिधानमिच्छन्ति । सामिधेनीविवृद्धौ चेध्मकाष्ठान्यपि वर्धन्ते · तद्यथा · सप्तदशसामिधेनीपक्षे विंशति(ः) काष्ठानि · इष्टकापशावेकविंशतिसंख्यसामिधेनीपक्षे चतुर्विंशतिः · चतुर्विंशतिसामिधेनीपक्षे तु सप्तविंशतिः · पित्र्यादौ सामिधेनीह्रासे च काष्ठह्रासो न भवति । अग्निप्रणयनार्थं इध्मस्त्वपरिमितकाष्ठकस्त्रिभिः संनहनैर्मूलभागे बद्धः स्यात् · अपरिमितशब्देन पूर्वोक्तप्रमाणादतिशयेनाधिकमुच्यते · तेनेष्टकापशौ इध्मकाष्ठानां सप्तविंशतिसंख्यासद्भावात्ततोऽप्यधिकैरष्टाविंशतिप्रभृतिभिः काष्ठैः प्रणयनार्थं इध्मः कार्यः ॥ वेदकरणं दर्शपूर्णमासऽएव वक्ष्यते ॥ यत्र-यत्र कर्मविषये आङ् प्रयुज्यते आ प्रयाजेभ्य आ इडाया इत्यादौ तत्र सर्वत्राङभिविधौ ज्ञेयो न मर्यादायाम् · तदपि कर्म कर्तव्यमध्ये ज्ञेयम् न त्ववधित्वेनेत्यर्थः । शम्य्वन्तं भवतीडान्तं भवतीत्यादावप्यन्तशब्देन संयुक्तं शम्य्विडादिकं कर्तव्यमध्ये ज्ञेयम् न त्वन्तशब्दं समीपवाचिनं सम्भाव्य तत्समीपे ततोऽर्वाक्समाप्यते ॥ वक्ष्यमाणेषु सर्वकर्मस्वनुक्तमप्यादौ आहवनीयदक्षिणाग्न्योरुद्धरणं गार्हपत्यात्कर्तव्यम् · यत्र त्वन्यकर्मार्थं प्रसङ्गादुद्धृतौ भवतस्तत्कर्म च समाप्तं न भवति अस्मिन्नवसरे यत्कर्मा-

पतति तत्पूर्वकर्मार्थोद्धृतयोरेव क्रियते न तदर्थं पृथगुद्धरणाम् · यथा दर्शपूर्ण-
मासेष्वर्थमुद्धृतयोरेवाग्निहोत्रहोम आगतोपस्थानादिकं च पुनराधानानन्तरम-
ग्निधारणे कृते विकृतेष्टिनित्येष्ट्यादिकं च । यत्कर्मार्थमाहवनीयदक्षिणाग्नीऽउद्धृतौ
भवतस्तत्कर्मसमाप्त्यनन्तरं लौकिकौ ज्ञेयौ अत ऊर्ध्वं तयोराहवनीयादिशब्दवि-
हितं कार्यं न कर्तव्यम् · अत एव यदा पौर्णमासादौ बह्व्य इष्टयः पृथक्तन्त्राः
क्रियन्ते तदा प्रतीष्टि पृथगेवोद्धरणाम् न सकृदुद्धृतयोरेव सर्वत्रोपयोगः ॥ खा-
दिरः स्रुवः पर्णमयी जुहूरित्येवमादि यत्कस्यचित्कर्मणाः प्रकरणे पठितं न भव-
ति वाक्यान्तरेण च कर्मविशेषे विनियुक्तं न भवति अमुष्मिन्कर्मणि खादिरः
स्रुवो भवतीत्येवम् तत्प्रकृतावेव निविशते ततः प्रकृतिवन्न्यायेनेतराङ्गवद्वि-
कृतावपि गच्छति ॥ ॥ अथ पात्राणां लक्षणमुच्यते ॥ खादिरः स्रुवोऽङ्गुष्ठपर्ववृत्त-
पुष्करो नासिकावत्पर्वार्धखातो भवति । स्फ्यश्च खादिरः खड्गाकृतिररत्निमात्रः ।
स्रुचो बाहुमात्र्यो मूलदण्डास्त्वग्बिला हंसमुखसदृशैकप्रणालिकायुक्ताः पाणिमात्र-
पुष्करास्तावत्खातयुक्ताश्च कार्याः · पालाशी जुहूः · उपभृदाश्वत्थी · वैकङ्कती
ध्रुवा · एतेषां वृक्षाणामेकस्य वा सर्वाः स्रुचः कारयेत् · बाहुमात्र्योऽरत्निमात्र्यो
वाग्राग्रास्त्वक्तोबिला हंसमुख्य इत्यापस्तम्बः । अग्निहोत्रहवणी वैकङ्कती · अग्नि-
होत्रस्रुवो वैकङ्कतः । यैः पात्रैर्होमो न क्रियते तानि सर्वाणि वारणानि भवन्ति ·
तानि चोलूखलमुसलकूर्चेडापात्रीपिष्टपात्रीपुरोडाशपात्रीशम्याशृतावदानाध्युपवे-
षान्तर्धानकठप्राशित्रहरणषडवत्तब्रह्मासनादीनि । तत्रोलूखल°°°न्यवृक्णाविति[1]। कूर्चो बाहुमात्रः पीठाकारः । इडापात्रीपिष्टपात्र्यौ अरत्निमात्र्यौ मध्यसं-
गृहीते । पुरोडाशपात्री प्रादेशमात्री समचतुरस्रा षडङ्गुलवृत्तखातवती । शम्या
प्रादेश°°°द्वादशाङ्गुलः[2]। प्राशित्रहरणं वृत्तमादर्शाकारं चतुरस्रं चमसाकारं
वा · तथैव द्वितीयमपिधानपात्रम् । षडवत्तं चोभयत्र खातवत् । आसनानि चा-
रत्निमात्रदीर्घाणि प्रादेशमात्रविपुलानि । सर्वेषु पात्रेषु मूलाभिज्ञानार्थं वृत्तानि
कार्याणि । अनादेशे होमसाधनभूतानि पात्राणि वैकङ्कतानि भवन्ति · यथा सो-
मयागे ग्रहचमसद्रोणकलशादीनि · तत्रापि हविर्धानाधिषवणफलकसम्भरणीय-

1) see pag. ५९. lin. २०-२३. 2) see pag. ५९, २५ - ६०, २.

रिम्नवादीन्यहोमसंयुक्तानि वारणान्येव · षोडशिनः पात्रं खादिरं चतुरस्रम् अंश्वदाभ्यपात्रमौदुम्बरं वचनात् · वाजपेये सप्तदशानां सोमग्रहाणां पात्राणि वारणानि अहोमसंयुक्तत्वात् सुराग्रहपात्राण्यपि वारणानि शाखान्तरान्मृन्मयानि वा· इत्येमवादि सर्वमूहनीयम् ॥ ॥ इष्टिषु प्रणीतोत्करावन्तरेण सर्वेषां गमनागमनाय मार्गः सोत्तरवेदिकेषु कर्मसु चात्वालोत्करयोरन्तरालेन ॥ ॥३॥

इति प्रथमस्य तृतीया कण्डिका ॥ ॥

अथेदं चिन्त्यते व्रीहिभिर्यजेत यवैर्यजेतेत्यादिभिर्वाक्यैः श्रुतौ ये व्रीहियवादयः यदि दैवान्मानुषाद्वा कारणात्ते यागार्थं न लभ्यन्ते तदा किं द्रव्यान्तरेण प्रतिनिधिभूतेन तत्कर्मारम्भणीयम् उत नेति । तत्र यागस्य प्रधानत्वाद्द्रव्य(स्य च) गुणभूतत्वाद्द्रव्यान्तरेण कर्मारम्भे प्राप्तऽआह ·

चोदिताभावेऽनारम्भस्तत्सिद्धित्वात्तस्य ॥१॥ चोदितस्य विहितस्य श्रुतस्य व्रीहियवादेर्मुख्यद्रव्यस्याभावे अलाभे अप्राप्तौ सत्यां काम्यस्य कर्मणोऽनारम्भोऽप्रयोग एव भवति । कुतः तत्सिद्धित्वात् तेनैव सिद्धिर्यस्य तत्तत्सिद्धि तस्य भावस्तत्सिद्धित्वम् तस्मात् तस्य काम्यस्य कर्मणस्तत्सिद्धित्वात् · यतः काम्यं कर्म तत्सिद्धि तेन श्रुतेनैव चोदितेनैव द्रव्येण सिध्यति नान्येन · यतस्तदेव तस्य साधनत्वेन श्रुतम् न द्रव्यान्तरम् । अतो यदि द्रव्यान्तरेण तत्कर्मारभ्यते तदा कर्मणो यागरूपस्य तदेकसाधनकत्वाद्द्रव्यान्यत्वे सति यथाश्रुतद्रव्यहान्या कर्मणो विगुणत्वमेव स्यात् न च विगुणात्काम्यात्किंचित्फलं भवति विनष्टशक्तित्वात् दग्धबीजवत् । न हि काम्यस्यावश्यकर्तव्यत्वं[1] केनचित्प्रमाणेन सिद्धम् यद्बलेन यथाशक्तिप्रयोगं दृढीकृत्य द्रव्यान्तरेणारभ्येत । तस्माच्चोदितद्रव्यस्याभावे काम्यस्यानारम्भ एव भवति । अग्रिमेण सूत्रेण (२.) नित्ये कर्मणि विशेषस्य वक्ष्यमाणत्वादिदं काम्यविषयम् ॥ अथ यथा विहितद्रव्याभावे काम्यस्यानारम्भ उक्तः तथा नित्येऽपि विहितद्रव्याभावे द्रव्यान्तरेणानारम्भे प्राप्तऽआह ·

नियते सामान्यतः प्रतिनिधिः स्यात् ॥२॥ यथाशक्तिप्रयोगस्य स्थापि-

---

१) °कर्तव्यत्वे २·

तत्वात् नियते नित्ये कर्मणि दर्शपूर्णमासादौ श्रुतद्रव्याभावे सामान्यतो मुख्यद्रव्यसादृश्यात्प्रतिनिधिर्भवति श्रुतद्रव्यसदृशेन द्रव्यान्तरेणापि नित्यं कर्मारम्भणीयम् · यावज्जीवंचोदनया हि अनारब्धमपि नित्यमवश्यं कर्तव्यमिति नियमश्चोद्यत एव । तत्र यागप्रधानचोदना नियमेन यत्किंचिदर्थाद्रव्यमाकाङ्क्षति [1] · सा च व्रीहिभिर्यजेतेति श्रुतिर्व्रीहिभिर्विद्यमानैरेकवाक्यतां प्रतिपद्यमानार्थप्राप्तानि द्रव्यान्तराणि बाधते [2] · श्रुतद्रव्याभावे तया द्रव्यान्तराणामर्थप्राप्तिः केन वार्यते तस्माद्रव्यान्तरं प्रतिनिधेयम् · यदि ह्याग्नेये चोदना न स्वयं द्रव्यं प्रयुञ्जीत व्रीहिवाक्यमेव तु तस्य प्रयोजकं स्यात् ततस्तदभावे न द्रव्यान्तरमुपादीयेत · न चैतदस्ति · प्रधानचोदनयैव प्रयुज्यमानेषु द्रव्येषु नियममात्रं व्रीहिवाक्येन क्रियतेऽतस्तदभावेऽपि प्रधानमेवावश्यकत्वाद्रव्यान्तरमुपादापयतीति । ननु द्रव्यान्तरे कर्मभेदो भविष्यतीति · उच्यते · न [3] · न हि द्रव्यकर्मणोरभेदः · न च द्रव्यात्मकं कर्म येन तद्भेदाद्भेदः जातेरिव व्यक्तिभेदे । न च द्रव्यान्तरेऽपि तावेव दर्शपूर्णमासावित्यस्य प्रत्यक्षावगतस्य बाधोऽस्ति · कुतः · शब्दान्तरादीनां भेदकारणानामभावात् · न हि नीवारैः क्रियमाणस्य शब्दान्तरादिनिमित्तो भेदोऽवतरति येन तदेवेदमिति प्रत्ययो बाध्यते · तस्मान्नीवारैरपि क्रियमाणयोर्दर्शपूर्णमासाभिधेयतास्त्येव । यथा नैव चैत्रीप्रयोगाद्दिशाखीप्रयोगो भिद्यते तेनैव च भेदाभावेन तौ दर्शपूर्णमासाभिधेयतां न जहीतः तथा सति सामान्यात्तत्तुल्यत्वान्नीवारैरपि क्रियमाणयोरस्त्येव तदभिधेयता स्वरूपभेदात् । यथा आश्रयभेदेऽपि गोत्वादिसामान्यस्याभेदात्तन्निमित्तं गवादिनामधेयं सर्वत्र वर्तते तद्द्रव्यभेदेऽपि कर्मभेदाभावात्तन्नामता न निवर्तते तन्नामकाच्च फलमतो द्रव्यान्तरेऽप्यस्त्येव फलमिति · तथा यद्यपि देशादिभेदेऽपि भिन्ना एव कर्मव्यक्तयः सामान्यमेव तु दर्शपूर्णमासाभिधेयं फलवत् तथापि देशादिभेदवद्व्रीहियवभेदवच्च नीवारेष्वपि तत्सामान्यव्यतिरेका अतः सिद्धं द्रव्यभेदेऽपि कर्मैकत्वम् ॥ एवं द्रव्यभेदेऽपि कर्मैकत्वे सिद्धऽइदं संदिह्यते श्रुतद्रव्याभावे किं यत्किंचिद्विसदृशमपि प्रतिनिधित्वेन ग्राह्यम् उत श्रुतसदृशमेवेति । तत्राष्टाकपालचोदना येन

1) ? °दर्थाद्र° २· 2) ? बाध्यते २· 3) Wanting in २, supplied by conjecture.

केनचिन्निर्वर्त्स्यते तत्किं सदृशोपादानेन · न च व्रीहिसदृशत्वाद्व्रीहिफलं नीवाराः साधयन्तीति वाच्यम् यदि तथा स्यात्तदा व्रीहिभिर्विकल्पेरन्नेकार्थत्वात्[1] यववत् न चैतदिष्टम् · तेन सगुणासम्भवे विगुणोऽप्याग्नेयचोदनार्थः कर्तव्य इति कृत्वा द्रव्यान्तरोपादानम् तत्र च सदृशासदृशयोर्नास्ति विशेषः । तस्मान्न सदृशोपादानमित्येवं प्राप्ते ब्रूमः । फलार्थिना यथाश्रुतं व्रीह्यादिद्रव्यकं कर्म प्रक्रान्तम् तादृशस्यैव फलसाधनत्वेन श्रवणात् तस्य व्रीह्यभावेऽङ्गहान्या फलाभावात्तदन्तस्योत्सर्गे प्राप्ते शिष्टाचारानुमितात्प्रारब्धेन यजेतैवेत्येवम्भूताद्वचनात्समाप्तिर्विधीयते । सा च समाप्तिर्यादृशः क्रतुः प्रक्रान्तस्तादृशस्य विधीयते नान्यादृशस्य । तत्र च प्रक्रान्ते क्रतौ व्रीह्याद्याकृतिर्यागसाधनं स्वाश्रयभूतं द्रव्यं परिछिन्दत्यङ्गतां[2] प्रतिपद्यते । तथैव व्रीहिगता ये विशेषा दीर्घशूकत्वादयस्तान्परिछिनत्ति · तेऽपि च क्रियायाः साधनमेव · न ह्यव्याप्रियमाणेष्ववयवेष्ववयवी व्यापृतः सम्भवति · व्रीहिसोमादिषु च पेषणादिविधानादवयवानामेवाङ्गत्वम् नावयविकत्वात्[3] · जात्या च स्वाश्रयवत्तदवयवानामप्युपलक्षणसम्भवाद्व्यक्तिस्तदवयवाश्च सर्वऽएव क्रियाङ्गतया विधीयन्ते । तत्र यद्यपि नीवाराकृतिर्व्यक्तिश्च व्रीहिजातेर्व्यक्तेश्चान्या तथाप्यन्ये बहवो धर्मा व्रीहिसमानास्तेषु विद्यन्ते · [अतः] श्रुतैकदेशसम्पत्तये तेऽवश्यमुपादेयाः न हि सम्भविनस्त्यागो युज्यते · ये तु असमाना नीवारगतास्तेऽनङ्गान्तरीयकत्वादुपादीयन्ते न तूपादित्सया[4] तस्मात्तदुपादानमदोषः । अतो यदि सदृशं प्रतिनिधीयते ततस्तेषामवयवानां कियन्तो लभ्यन्ते जातिमात्रमवयवान्तरं च परित्यक्तं भवति · असदृशोपादाने पुनः समस्तपरित्यागः स्यात् · अतो व्रीहिशास्त्रमपि यथासम्भवमुपपादयितुं सदृशोपादानम् · एवं च सुसदृशलाभे मन्दसदृशं नोपादेयम् सुसदृशे बह्ववयवानुग्रहात् । तदाह त्रिकाण्डे मण्डनः कार्ये[5] रूपैस्तथा पर्णैः क्षीरैः पुष्पैः फलैरपि गन्धै रसैः सदृग्ग्राह्यं पूर्वालाभे परं-परमिति । तस्मात्साधूक्तं सामान्यतः प्रतिनिधिः स्यादिति । तदुक्तम् यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत् यवा-

---

1) °ल्पेरन्ने° २. 2) ? परिछिदत्यंगतां २. 3) ? नावयविनत्वात् २. 4) ? ते नांगतरीयत्वाउपादीयंते न तूपा° २. °तरीयकत्वा° २. 5) ? कार्यं २.

नामिव गोधूमा व्रीहीणामिव शालय इति । अत एवं सिद्धम् · नित्यकर्मण्यारब्धे अनारब्धे च प्रतिनिधिर्भवति अवश्यकर्तव्यतया यथाशक्तिप्रयोगस्य स्थापितत्वात् · काम्ये पुनरवश्यकर्तव्यत्वाभावादनारब्धे मुख्यद्रव्यालाभे आरम्भो न भवतीति प्रागुक्तम् अथ काम्ये प्रारब्धे सति पश्चात् श्रुतद्रव्यस्य नाशदोषापहारालाभादौ जाते तस्य विगुणस्य फलसाधकत्वाभावस्य प्रागुक्तत्वात्प्रयोजनाभावेन काम्यं न समापनीयमिति प्राप्तऽआह ·

आरम्भान्नियमः ॥३॥ काम्येऽप्यारम्भादूर्ध्वं समाप्तेर्नियमोऽवश्यम्भावः । आरम्भादिति हेतौ पञ्चमी · तेनारम्भ एव समाप्तेः कारणम् · यत आरब्धमतो ऽवश्यं समापनीयमेव । समाप्तिश्च मुख्याभावे प्रतिनिध्युपादानं विना न भवति । अतः काम्येऽपि आरब्धस्य समापनार्थं प्रतिनिधिर्भवत्येव · नित्येऽप्यवश्यकर्तव्यतैव प्रतिनिध्युपादाने कारणम् सा चारब्धे काम्येऽप्यविशिष्टा · आरम्भस्तु काम्यस्य विहितद्रव्याभावे द्रव्यान्तरेण न भवत्येव अनारब्धस्यावश्यकर्तव्यत्वाभावात् ।

दोषश्चासमाप्तौ स्यात्सामान्यात् ॥४॥ किं च प्रारब्धस्य काम्यस्यासमाप्तावसमापने दोषः स्यात् · कुतः · सामान्यात् आरब्धस्य काम्यस्यावश्यकर्तव्यतया नित्येन समानत्वात् । यथा नित्यकर्मणामकरणे यथा शिष्टविगर्हणम् एवमारब्धानां काम्यानामसमापनेऽपीति · अतः शिष्टविगर्हणात्तूपाहिष्टाचारात्स्मृतिं स्मृतेश्च श्रुतिं कल्पयित्वा प्रक्रान्तं शास्त्रीयं कर्मावश्यं समापनीयम् । अपि च प्रक्रान्तस्यासमाप्तौ निन्दाप्रायश्चित्ते तैत्तिरीये श्रूयेते देवताभ्यो वाऽएष आवृश्च्यते यो यक्ष्यऽइत्युक्त्वा न यजते त्रैधातवीयेन यजेत न तेन देवताभ्य आवृश्च्यतऽइति । तस्मादप्यारब्धमवश्यं समापनीयम् । तदुक्तं जैमिनिना (६. २.१०.) प्रक्रमात्तु नियम्येतारम्भस्य क्रियानिमित्तत्वादिति ।

दर्शनाच्च ॥५॥ श्रुतौ मुख्यद्रव्यस्याभावे द्रव्यान्तरेण परिसमाप्तिदर्शनाच्चैवमवसीयते यन्मुख्यद्रव्यस्याभावे द्रव्यान्तरं प्रतिनिधेयमिति । तद्यथा यदि सोमं न विन्देत्पूतीकानभिषुणुयादिति · अत्र सोमेऽपहृते सोमाभावे सति तत्स्थाने पूतीकानामभिषवं विदधाना पूतीकैर्यागः समापनीय इत्यमुमर्थं दर्शयति । एवं

दर्शनऽउक्ते दर्शनस्वरूपकथनपूर्वकमस्य दर्शनत्वमाक्षिपति ·

अन्यार्थं दर्शनं न पुनर्ग्रहणात् ॥ ६ ॥ अन्यार्थं सत् दर्शनं भवति · तद्धि दर्शनं कथ्यते यदन्यविधिपरं सत् प्रसङ्गादन्यमर्थं ज्ञापयति · यथा तस्यै प्रयाजेषु तायमानेषु ब्राह्मणो वीणागाथी दक्षिणत इत्यादि गाथा गायतीत्यन्तं (१३. ४. २. ८.) वाक्यं गाथागानविधिपरं सदस्यामिष्टौ प्रयाजान्सिद्धान्दर्शयति ॥ यदि सोमं न विन्देदितीदं तु तादृशं दर्शनं न भवति · कुतः · पुनर्ग्रहणात् सोमाभावे सति पुनर्द्रव्यान्तरस्य पूतीकलक्षणस्याप्राप्तस्य ग्रहणात् विधानात् । तथा हि यदि सोमं न विन्देत्पूतीकानभिषुणुयादिति किमयं सोमाभावे द्रव्यान्तरविधिः सोमाभावे पूतीकैर्यागं साधयेदिति सोमजातिवत्पूतीकजातेर्यागसाधनपरिच्छेदकत्वेन [1] विधीयते · उत प्रतिनिधिनियमः सोमाभावे सुसदृशेष्वीषत्सदृशेष्वपि [2] प्राप्तेषु पूतीका नियम्यन्ते · यदा चैवम् तदा द्रव्यान्तरेण परिसमाप्तेर्दर्शनं भवति । अधुना त्वेतदाक्षिपति · अत्र सोमेन यजेतेति सोम उत्पत्तिशिष्टः अतः सोमानुरक्तस्यैव करणत्वात्तदसम्भवे करणत्वमेव हीयेतेति न प्रतिनिध्यपेक्षा कुतस्तन्नियमार्थता विधेः · दर्शपूर्णमासयोस्तु व्रीहीणामनुत्पत्तिशिष्टत्वान्नीवारैः कर्मस्वरूपस्य भेदो न भवति तेन तत्र प्रतिनिधिर्युज्यते । किं च नियमार्थो विधिरित्येतदप्ययुक्तम् · न हि सोमस्य [सु]सदृशे द्रव्यान्तरे सतीषत्सदृशः पूतीकः पक्षेऽपि प्राप्तः · सुसदृशे हि बहवः श्रुतद्रव्यावयवाः संगृह्यन्ते अल्पास्त्वीषत्सदृशे · न च भूयोऽनुग्रहे सम्भवत्यल्पानुग्रहो युक्तः । तस्मादत्यन्तप्राप्त्यभावे विधीयमानाः पूतीका न नियमार्था भवन्तीति · तस्मात्सोमाभावे अप्राप्तानां पूतीकानां यागसाधनत्वेन विधिरिति साधूक्तम् न पुनर्ग्रहणादिति । अथ सिद्धान्तमाह ·

अन्यार्थं पुनर्ग्रहणम् ॥ ७ ॥ पूतीकानभिषुणुयादित्येतत्पुनर्ग्रहणमेवान्यार्थम् पूतीकरूपप्रतिनिधिनियमार्थमित्यर्थः न तु [3] अप्राप्तानां पूतीकानां विधानार्थम् । विचारस्यैतत्प्रयोजनम् प्रतिनिधिनियमपक्षे पूतीकविनाशे सोमसदृशस्योपादानम् द्रव्यान्तरविधाने तु पूतीकसदृशमुपादेयमिति । कथमन्यार्थमिति

---

1) ? °त्पूतीकजातिर्याग° २. The Çástradípiká at Jaim. ६. ३. २१. reads किमयमभावे विधिः°° °वत्पूतीकजातियाग°. 2) °वे तुसदृ २. 3) न नु २.

चेत् · उच्यते · प्रक्रान्तं कर्म तावदवश्यं समापनीयमेव अतो द्रव्यान्तरोपादानं प्राप्नोत्येव । ननूक्तम् सोमस्योत्पत्तिशिष्टत्वान्न प्रतिनिध्यपेक्षेति · तत्रोच्यते · यजेतेत्येतत्पदं यत्किंचिद्द्रव्यमपेक्षमाणं सोमेनेति निराकाङ्क्षीक्रियते · यथाग्नेयो ऽष्टाकपाल इति वाक्यं वाक्यान्तरेण व्रीहिभिर्यजेतेत्यनेन · पदान्तरवाक्यान्तरप्राप्तयोर्नैव कश्चिद्विशेषो ऽस्ति अपेक्षायास्तुल्यत्वात् · अतस्तद्वत्प्रतिनिध्यपेक्षा भवत्येव । यच्चोक्तम् सत्यपि प्रतिनिधौ पूतीकानामीषत्सदृशत्वात्प्राप्तिर्नास्तीति अभावविधिरेवायमिति · तत्रोच्यते · यत्कदाचिदपि न प्राप्नोति तद्विधीयते पूतीकास्तु कदाचित्प्राप्नुवन्ति · यदा मुख्यस्याभावात् प्रतिनिधातव्यं किंचिदिति निरूप्यते तस्यां वेलायां सर्वेषामेव सुसदृशानामीषत्सदृशानां चास्ति प्राप्तिरनियमेन · तत्र यावदेव न्यायेन सुसदृशं नियन्तुमुपक्रम्यते तावदेवेषत्सदृशः पूतीको बलीयसा वचनेन नियम्यते · तस्मादिदं पूतीकानभिषुणुयादित्येवं तत्पुनर्ग्रहणमन्यार्थं सत् पक्षे प्राप्तानां पूतीकानां नियमार्थं सत् प्रक्रान्तस्य कर्मणो मुख्यद्रव्यालाभे द्रव्यान्तरेण परिसमाप्तिदर्शनं भवत्येवेति सिद्धम् · अतः साधूक्तम् अन्यार्थं पुनर्ग्रहणमिति अन्यार्थत्वाद्दर्शनं भवतीत्यभिप्रायः ॥ ॥ अथेदं विचार्यते । सोमे पयो व्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्येत्यस्मिन्व्रते [1] किं प्रतिनिधिर्भवत्युत न भवतीति । तत्र पूर्वपक्षमाह ·

व्रते प्रसङ्गो न नियमशब्दात् ॥ ८ ॥ व्रते पयोव्रतादौ प्रतिनिधेः प्रसङ्गो न भवति प्रतिनिधिर्न भवतीत्यर्थः । कुतः नियमशब्दात् · नियमप्रतिपादकः शब्दो नियमशब्दः एवकारः · सोऽत्र श्रूयते व्रतं ह्येवास्यातोऽशनं भवतीति · एवकारेण प्रतिनिधिरेव निवार्यते अन्यस्य निवारणीयस्याभावात् ॥ एवं पूर्वपक्षिते इदमेव सूत्रं सिद्धान्तपरतयापि व्याख्यायते । व्रतेऽपि प्रतिनिधेः प्रसङ्गो भवति प्रतिनिधिर्भवत्येव · कुतः · न नियमशब्दात् यतो नायं नियमशब्दः · न ह्ययं नियमं प्रतिपादयितुं शक्तः यतोऽयमिष्टाशनस्तुत्यर्थः · पुरा केशश्मश्रोर्वपनात् यत्कामयेत तदश्नीयादितीष्टाशनं हि प्रकृत्येतच्छ्रूयते व्रतं ह्येवास्यातोऽशनं भवतीति · अतस्तत्संस्तव एवायम् अतो न स्वार्थे प्रमाणमिति

[1] See ७. ४. २७.

न प्रतिनिधिनिवारणाय प्रभवति · तस्माद्वतेऽपि प्रतिनिधिर्भवत्येव । अथ चैवं सूत्रयोजना नियमशब्दाद्वते प्रतिनिधेरप्रसङ्ग इति युक्तम् तन्नेति · एवमप्रसङ्ग इत्यकारप्रश्लेषः कार्यः ॥ ॥ अथेदं चिन्त्यते · विहितद्रव्यस्याभावे द्रव्यान्तरे प्रतिनिधित्वेनोपात्ते छागाभावे मेषरूपे अनुवाचनप्रैषादौ किमूहं कृत्वा प्रतिनिहितद्रव्यशब्दस्य प्रयोगः कार्यः अग्नीषोमाभ्यां मेषस्य वपाया इत्येवम् · उत विहितद्रव्यशब्दस्यैव अग्नीषोमाभ्यां छागस्येत्येवमेवेति (३. ८. २. २६.) । तत्र मन्त्रेण द्रव्यमभिधेयम् न चानूहितः प्रतिनिहितं दव्यं शक्नोत्यभिधातुम् तस्मादूहित्वा प्रतिनिहितद्रव्यवाचिशब्दस्य प्रयोगे प्राप्तेऽआह ·

शब्देऽविप्रतिपत्तिः ॥ ९ ॥ प्रतिनिधावुपात्तेऽपि विहितद्रव्यवाचिनि शब्दे अविप्रतिपत्तिरविपरिणामः अनूहो भवति · अग्नीषोमाभ्यां छागस्य वपाया इत्यनूहितमेव मेषेऽपि प्रयोज्यम् न तु मेषस्येत्येवं विपरिणातरूपमित्यर्थः । कुतः प्रतिनिधिः श्रुतद्रव्यबुद्ध्या गृह्यते न तु द्रव्यान्तरबुद्ध्या · अतश्छाग एवायमिति बुद्ध्या गृहीतत्वात्तच्छब्देनैवाभिधानम् । यद्यत्र मेषश्छागवत्साधनं भवेत्ततस्तत्प्रकाशकं मेषपदं प्रक्षिप्येत · न त्वेवम् किं तर्हि मेषगता ये छागांशास्तऽएवात्र साधनम् ते च छागगता-इव मेषगता अपि छागशब्देनैव प्रकाशयितुं शक्यन्त ऽइत्यनूहेनैव प्रयोगः । यत्र तु द्रव्यान्तरं वचनेन विधीयते यथा सारस्वतीं मेषीमिति (१३. २२. ४.) ऐन्द्रं मेषमिति ऐन्द्र ऋषभः सारस्वतीं मेषीमिति तत्र द्रव्यान्तरबुद्धिर्भवति · तत्र ऊहोऽपि भवति । न चात्रैवंविधं किमपि वचनमस्ति · तस्माच्छागानामवयवानां सामान्याच्छ्रुतद्रव्यमेवेदमिति बुद्ध्या मेषादिद्रव्यस्य छागादिप्रतिनिधित्वेनोपादानम् · तेन श्रुतद्रव्यशब्देनैवाभिधानं युक्तमिति साधूक्तम् शब्देऽविप्रतिपत्तिरिति ॥ यत्र तु वचनेन द्रव्यान्तरं विधीयते तत्र ऊहो भवतीत्युक्तम् तेन सोमाभावे पूतीकानभिषुणुयादिति पूतीकानां वाचनिकत्वादूहो भविष्यतीत्याशङ्क्याह ·

सोमेन ज्ञात्यभावात् ॥ १० ॥ सोमेनेति तृतीयैकवचनम् · सोमाभावे पूतीकेषूपात्तेषु सोमेनेति सोमशब्देनैव पूतीकानामभिधानं कर्तव्यम् अंशुरंशुष्टे देव सोम प्यायतामित्येवम् (३. ४. ३. १८.) · न तु पूतीकाशब्देन । अथवा सोमे

इति सप्तम्येकवचनम् नेति निषेधः · सोमप्रतिनिधिविनोपात्तेषु अर्जुनश्येनहृ-
तपूतीकादिषु सोमे सोमशब्दे ऊहो न भवति । कुतः जात्यभावात् जात्यन्त-
रबुद्ध्यभावात् · न ह्यत्र वचनेन द्रव्यान्तरं विधीयते किं तर्हि सोमाभावे या-
गस्यावश्यकर्तव्यत्वादनेकेषु सुसदृशेष्वीषत्सदृशेषु च प्राप्ते[षु] पूतीकादेर्नियमः क्रि-
यते · तेनैन्द्रो मेष इतिवद्वाचनिकजात्यन्तरविधानाभावादत्राप्यूहो न भवती-
ति ॥ ॥ अथेदं विचार्यते । वरुणप्रघासेषु पशौ च श्रूयते पृषदाज्यं गृह्णातीति
(३. ८. ४. ७.) तेनानुयाजेषु चरतीति (८.) च · प्रकृतौ चाज्यपदसंयुक्ता निगमाः
सन्ति देवानाज्यपानावह स्वाहा देवानाज्यपान् (१. ४. २. १७.) देवानामाज्यपानां
प्रिया धामानि (१. ७. ३. ११.) देवा आज्यपा आज्यमजुषन्तेति (१. ९. १. १०.) च · आ-
ज्यपशब्देनात्र प्रयाजानुयाजदेवता उच्यन्ते प्रयाजानुयाजा वै देवा आज्यपा इति
(१. ४. २. १७.) वाक्यशेषात् · अत्र च पृषदाज्येनानुयाजा इज्यन्ते[1] । तदिह संशयः
आज्यपशब्दस्याज्यदधिपानित्येवमूहः अथवा दधिपानिति उत पृषदाज्यपानि-
ति आहोस्विदविकारेणैवाज्यपानिति प्रयोगः · यद्युभयं हविस्ततः प्रथमः
पक्षः · यदि दध्येव ततो द्वितीयः · यदि पृषदाज्यनामकं द्रव्यान्तरं हविस्ततस्तृ-
तीयः · अथ त्वाज्यमेव हविः तस्य तु पृषत्त्वं चित्रता संस्कारमात्रम् तज्जननार्थं
च दधि ततः सिद्धान्तः । तत्र अथ पृषदाज्यं गृह्णाति द्वयं वाऽइदᳫ सर्पिश्चैव
दधि चेति (३. ८. ४. ७.) तुल्यवत्संकीर्तनादुभयं हविः उभयमप्यनुष्ठानाङ्गत्वेन
स्मर्तव्यम् तस्मादुभयोः प्रकाशनम् · अथवा शाखान्तरे द्विरुपस्तृणाति द्विरव-
द्यति सकृदभिघारयतीत्युपस्तरणाभिघारणवादाद्दधिसंस्कारार्थमाज्यम् दध्येव ह-
विः ततो दधिपानित्येवं वक्तव्यम् · नैतदुभयम् · ग्रहणे हि दध्याज्ययोस्तुल्यत्वं
दध्नो वा प्राधान्यं गम्यते यागे त्वाज्यमेव पृषत्तागुणकं करणत्वेन श्रुत्या विधी-
यते नोभयम् नापि दधि · यच्च यागद्रव्यम् तदर्थो ग्रहणसंस्कारः तस्माद्ग्र-
हणेऽप्याज्यमेव प्रधानम् · तस्य तु पृषत्तासम्पादनार्थं दधि गृह्यते न स्वार्थे-
नानुपयोगित्वात् · तथाविधे तु दध्नि तुल्यनिर्देश उपस्तरणादिवादेन च प्राधान्य-
निर्देशोऽर्थवादमात्रम् तस्मादविकारः । अन्यस्त्वाह · दध्ना आज्येन च द्रव्यान्तरं

[1]) इत्यंते २.

निष्पद्यते · तस्य वाचकः पृषदाज्यशब्दः · तच्च हविः   पृषदाज्येनानुयाजान्यजतीति · तस्मात्पृषदाज्यपानित्येवं वक्तव्यमिति प्राप्तऽआह ·

आज्ये चादर्शनात् ॥११॥   अविप्रतिपत्तिरित्यनुवर्तते । पृषदाज्येनानुयाजान्यजतीति वाचनिके पृषदाज्ये सत्यपि   आवाहनादिनिगमेषु आज्ये आज्यशब्दे अविप्रतिपत्तिरविकारः · देवानाज्यपानित्येव वक्तव्यमित्यर्थः । कुतः   अदर्शनात् आज्यव्यतिरिक्तस्य द्रव्यान्तरस्यादर्शनात् · तथा हि   स्याद्विकारो यदि पृषदाज्यशब्दः समुदायशक्त्या द्रव्यान्तरमभिधत्ते · न त्वेवमस्ति [1] · पृषच्छब्दो लोके चित्रवचनः पृषद्रज्जुः पृषन्मणिरिति · तेन   पृषदाज्येनेति चित्रेणाज्येनेत्यर्थः · तेन प्राकृतस्यैवाज्यस्य चित्रतागुणमात्रविधानम् · गुणं च सम्पादयितुं दधि गृह्यते   प्राधान्यनिर्देशोऽर्थवादमात्रम् · हविरेव च प्रकृतावुपलक्षितम्   न हविर्गुणः · तस्माद्विकारेणाज्यपानित्येव वक्तव्यमिति सिद्धान्तः । किं च ·

पशौ मन्त्रवर्णात् ॥१२॥   पशावेवोत्तमप्रयाजप्रैषे पठ्यते   स्वाहा देवा आज्यपा इति (२१.४०.) · वनस्पतिप्रैषेऽपि   देवानामाज्यपानां प्रिया धामानीति (२१.४६.) · स्विष्टकृत्प्रैषेऽपि   अयाड्देवानामाज्यपानामिति (२१.४७.) · तत्र नियमतः पृषदाज्येनैवानुयाजा इज्यन्ते · अत एव पशुसम्बन्धिनो मन्त्रवर्णाद्देवानाज्यपानित्यावाहनादि [2] भवतीति गम्यते । किं च ·

श्रुतेश्च ॥१३॥   एकवचनश्रुतिरप्यत्रैकस्यैव प्रधानं गम्यते   नोभयोः अथ पृषदाज्यं गृह्णातीति (३.८.४.७.) · यदि चात्र दध्नोऽपि प्राधान्यं स्यात्तदा द्विवचनं श्रूयेत · न च श्रूयते · अत एकवचनश्रुतेरप्ययमेवार्थोऽवसीयते   यदेकस्यैवात्र प्राधान्यमिति   तच्चाज्यस्यैवेति प्राक्साधितम् ॥   ॥ अथेदं विचार्यते । व्रीहिभिर्यजेत यवैर्यजेतेति विकल्पेन विहितेषूभयेषु मध्ये एकेन व्रीहिद्रव्येण प्रारब्धे कर्मणि तस्य नाशदोषापहारादिके जाते पश्चाद्यदि व्रीहयो न प्राप्यन्ते तदा किं वैकल्पिकं द्रव्यान्तरं यवरूपमुपादेयम् उत व्रीहिसदृशमिति । तत्र मुख्यद्रव्ये सति प्रतिनिध्युपादानस्यायुक्तत्वाद्यवानामुपादाने प्राप्ते सिद्धान्तमाह ·

विकल्पे प्रवृत्तं कर्मान्तरत्वात् ॥१४॥   विकल्पे सति यत्प्रवृत्तम् येन

---

१) न त्वेव° २.   २) ? °त्यादाज्यहीन २.

कर्मारब्धम् तदेव तस्मिन्प्रयोगे अङ्गम् इतरद्वैकल्पिकान्तरमनङ्गम् · तेन व्रीहिभिः प्रयोग उपक्रान्ते तेषामपहारादौ अलाभे च व्रीहिसदृशं नीवारादिकमुपादेयम् न तु वैकल्पिका यवाः । कुतः कर्मान्तरत्वात् · यथारम्भं हि समापनीयम् · तत्र यदि व्रीहिभिः प्रारब्धस्तदा तस्मिन्प्रयोगे व्रीहय एवाङ्गम् तेषु च विनष्टेषु साम्यात्तद्बुद्ध्यैव यदि नीवारा गृह्यन्ते तदेवेदं कर्मेति प्रतीतिर्भवति तेन व्रीहिसदृशमेवोपादेयम् · यवेषु पुनर्द्रव्यान्तरबुद्ध्योपादीयमानेषु व्रीहिभ्यो ऽन्यदेव द्रव्यमिति कर्मान्तरबुद्धिरुदेति सादृश्याभावात् तथा सति यथारम्भं समापनं च कृतं न भवति । एवं सर्ववैकल्पिकेषु यावदेकमनुपक्रान्तम् तावत्सर्वेषां प्राप्तिः · तेषां मध्ये तु एकेन प्रयोगे प्रारब्धे तस्मिन्प्रयोगे तदेव श्रुतं द्रव्यम् द्रव्यान्तरं त्वश्रुतसममेव[1] · तेन प्रारब्धप्रयोगस्य द्रव्यस्याभावे तत्सदृशमुपादेयम् न तु वैकल्पिकमिति ॥ ॥ अथ वैवं सूत्रयोजना । सोमे न ज्ञात्यभावादित्यतो (१०.) नेत्यनुवर्तते । विकल्पे प्रवृत्तम् यवादिकम् न प्रतिनिधेयम् । कुतः कर्मान्तरत्वात् यतस्तदुपादीयमानं द्रव्यान्तरबुद्ध्योपादीयमानत्वात्कर्मान्तरत्वमापादयति · तच्च नेष्यते यथारम्भसमापनस्योचितत्वात् द्रव्यान्तरे चोपात्ते तथा न स्यादिति । अतो व्रीह्याग्रयणानन्तरं प्राग्यवाग्रयणाद्भ्रान्त्या यवैर्यागे कृते तेषामश्रुतसमत्वात्पुनर्व्रीहिभिरेव यागो ऽनुष्ठेयः ॥ ॥ अथैतद्विचार्यते । व्रीह्यभावे प्रतिनिधित्वेन नीवारैः प्रयोगे प्रारब्धे नीवाराणामपहारादिनाभावे सति किं प्रतिनिधिभूतं नीवारसदृशमुपादेयम् उत मुख्यद्रव्यं व्रीहिरूपं तत्सदृशं चेति । तत्र यथैव वैकल्पिकेष्वेकस्मिन्प्रवृत्ते तस्यैव तत्प्रयोगाङ्गत्वात्तदपचारे चैतत्सदृशमेवोपादेयम् वैकल्पिकान्तरं मुख्यमपि तत्प्रयोगानङ्गत्वान्नोपादीयते तथैव प्रतिनिधौ प्रवृत्ते[2] तस्यैव तस्मिन्प्रयोगे ऽङ्गत्वात्तदपचारे तत्सदृशमेवोपादेयम् न तु मुख्यं तत्सदृशं वा तस्यैतत्प्रयोगानङ्गत्वादिति प्राप्ते सिद्धान्तमाह ·

प्रतिनिधौ तत्कालात् ॥१५॥ प्रतिनिधिद्रव्ये नीवारादौ विनष्टे न प्रतिनिधिभूतनीवारादिसाम्येन प्रतिनिध्युपादानम् किंतु मुख्यद्रव्यमेव व्रीहिरूपमुपादेयम् सम्भवे तदसम्भवे तु मुख्यसादृश्येन नीवारादिः प्रतिनिधिरुपादेयः ·

1) ? द्रव्यान्तरं च २.   2) ? प्रकृते २.

न तु प्रतिनिहितनीवारसादृश्येन । कुतः तत्कालात् स कालो यस्यासौ तत्कालः · भावप्रधानो निर्देशः प्रतिनिधिस्तत्कालत्वादित्यर्थः [१] · यतः प्रतिनिधिः स एव कालो यो मुख्यद्रव्यस्याभावः · तेन प्रतिनिधौ नीवारे विनष्टे मुख्यस्य लाभे मुख्यमेव ग्राह्यम् तदलाभे नीवारादिकं व्रीहिसदृशमेवेति · न तु कदाचिन्नीवारसदृशमित्यर्थः · न हि नीवाराणामङ्गत्वमस्ति श्रुतिलिङ्गादिप्रमाणाभावात् । श्रुतद्रव्यसाधारणास्तु येऽवयवा नीवारगता दीर्घशूकसतुषत्वादयस्तदुपादित्सया प्रवर्तमानो नान्तरीयकतया [२] नीवारानुपादत्ते · तस्मान्नीवारस्यानङ्गत्वाद्व्रीह्यवयवानामेवाङ्गत्वात्तत्सिद्ध्यर्थं सम्भवे व्रीहयो ऽसम्भवे च तत्सदृशमुपादेयम् न नीवारसदृशमिति सिद्धान्तः । वैकल्पिकान्तरं तु पूर्वाधिकरणे निराकृतमिति तदुपादानस्यात्र शङ्कैव नास्ति ॥ ननु यदि प्रमाणाभावान्नीवारादीनामनङ्गत्वम् श्रुतिलक्षणस्य तु पूतीकादेरङ्गत्वात्तस्य प्रक्रान्तस्यापचारे तत्सदृशमेवोपादेयम् न सोमसदृशमिति चेत् · न तु · श्रुतिरप्यत्र [३] प्रतिनिधिनियमार्थैव · सत्यम् तथाप्यस्त्यत्र काचिदाशङ्का सोमावयवानामन्यत्रापि सद्भावे सति पूतीकनियमादेवं विज्ञायते नूनं पूतीकांशोऽप्यस्यां वेलायां क्रियाङ्गमिति · इतरथा सोमावयवस्याङ्गत्वे तस्यान्यत्रापि सम्भवान्न पूतीका एवोपादीयेरन् तत्र नियमविधिरुपरुध्येत [४] · तस्मात्पूतीकस्याप्यङ्गत्वात्तदपचारे तत्सदृशमुपादेयम् न सोमसदृशमिति । सिद्धान्तस्तु · सत्यम् · न सोमावयवमात्रमङ्गम् किंतु पूतीकावयवसहिताः सोमावयवाः · न तु तावता पूतीकावयवाः क्रियाङ्गं भवन्ति प्रतिनिधिनियमव्याघातप्रसङ्गात् · किंतु सोमावयवा एव क्रियाङ्गम् पूतीकावयवसाहित्यं तु तेषामेवाङ्गम् मैत्रावरुणग्रहस्येव पयःसंसर्गः · ततः पूतीकापचारे [५] द्वयसम्पादनार्थमुभयसदृशमुपादेयम् न केवलं पूतीकसदृशम् नापि केवलं सोमसदृशम् · उभयसदृशालाभे तु सोमावयवानां प्राधान्यात्तद्धि-

---

१) प्रतिनिधिस्त° २. २) Thus also the Çâstradîpikâ at Jaim. ६. ३. ३०: व्रीह्यवयवांस्तु तद्गतानुपाददानो नान्तरीयकतया नीवारानुपादत्ते नांगतया. See p. ६८, lin. १०. ३) ? ननु श्रुतिर° २. The Çâstradîpikâ at Jaim. ६. ३. ३१. reads: नैवं · न हि श्रुतिः पूतीकानामंगत्वमाह · किं तर्हि तद्गतानां सोमावयवानां प्रतिनिधिनियमो ह्ययं नाभावे विधिरित्युक्तं. ४) ? °रुपध्येत २. ५) ? °कोपचारे २.

त्सया सोमसदृशमेवोपादेयम् न पूतीकसदृशमिति । अतश्च मुख्यद्रव्यस्यात्यन्ता-लाभऽएव प्रतिनिधिः साधनत्वम् · तेन मुख्यद्रव्ये सति श्रान्त्या प्रतिनिधिद्रव्येण यागे कृते पुनर्मुख्यद्रव्येण यागावृत्तिः ॥ ॥ अथ यत्रार्थद्रव्ययोर्विरोधस्तत्र कथम् । तद्यथा मुख्यं द्रव्यं खादिरादिकं नियोजनादिकार्यासमर्थं विद्यते प्रतिनिधि-द्रव्यं च कार्यसमर्थम् · तत्र यदि मुख्यं द्रव्यं गृह्यते तदा तेन कार्यं नियुक्तप-श्वनपक्रमणाद्रूपं न सिध्यति · यदि च कार्यसिद्धिसमर्थं प्रतिनिधिद्रव्यं गृह्यते तदा मुख्यद्रव्यं गृहीतं न स्यात् · तत्रैवं संदेहः किं कार्यसाधनासमर्थमपि मुख्यं ग्राह्यम् उत मुख्यमनादृत्य कार्यसमर्थं प्रतिनिधिद्रव्यमिति · तत्र मुख्या-मुख्ययोर्मुख्ये संप्रत्यय इति न्यायेन मुख्यस्यैव परिग्रहे प्राप्ते सिद्धान्तसूत्रम् ·

अर्थद्रव्यविरोधेऽर्थसामान्यं तत्परत्वात् ॥१६॥ अर्थः प्रयोजनं कार्यमिति यावत् · द्रव्यं मुख्यद्रव्यम् · अर्थद्रव्यविरोधे कार्यमुख्यद्रव्ययोर्विरोधे सति अर्थ-सामान्यम् अर्थेन प्रयोजनेन कार्येण सामान्यम् संयुक्तं कार्यसिद्धिसमर्थं यत् तदश्रु-तमपि प्रतिनिधिद्रव्यमुपादेयम् । कुतः तत्परत्वात् द्रव्यस्यार्थपरत्वात् कार्यार्थ-त्वात् · कार्यार्थं हि द्रव्यं न त्वदृष्टार्थम् येन च कार्यं न सिध्यति तच्छ्रुतमपि सदश्रुतसममेव · अतो द्रव्यस्य प्रयोजनार्थत्वात्तद्विरोधे तु श्रुतमप्यनादृत्य प्रयोज-नक्षममेवाश्रुतमपि [प्रति]निधिद्रव्यमेवोपादेयम् न तु मुख्यं कार्यासमर्थमिति सिद्धान्तः । तदुक्तं जैमिनिना (६. ३. ३२.) अर्थद्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तिर्द्र-व्याणामर्थशेषत्वादिति ॥ यदा पुनरश्वशफपरिमाणाय (१. २. २. १०.) शेषकार्येभ्य-श्चापर्याप्ताः पुरोडाशजातिमात्राभिव्यक्तिसमर्था व्रीहयोऽल्पेऽपि लभ्यन्ते तदा[1] तैरेव पुरोडाशः कर्तव्य उत नीवारैरिति संशयः · तत्र यद्यपि यागोद्देशेन व्रीहयो विधीयन्ते तथाप्युत्पत्तिशिष्टपुरोडाशविरोधान्न तेषां साक्षाद्यागसाध-नता किंतु पुरोडाशप्रकृतितया · ततश्च व्रीहीणामपि पुरोडाशाङ्गत्वात् स्विष्टकृदिडाप्राशित्रचतुर्धाकरणषडवत्तब्रह्मयजमानभागभक्षणाद्रूपाणां शेषकार्याणाम-श्वशफपरिमाणस्य च सर्वेषां पुरोडाशाङ्गत्वात् नाङ्गप्रधानकृतो विशेषः · तेनाश्व-शफपरिमाणस्य भूयसां शेषकार्याणां चानुग्रहाय व्रीहिशास्त्रमेकं बाधितव्यम् ।

[1]) तदा किं Çâstradip.

किं च प्रतिनिध्युपादाने व्रीहिशास्त्रस्य नात्यन्तबाधोऽपि व्रीह्युपादाने तु[1] शेषकार्याणामत्यन्तलोपः स्यात् · [अतः] प्रधानाङ्गभूतपुरोडाशजात्यभिव्यक्तिमात्रसमर्थेषु सत्स्वपि व्रीहिषु शेषकार्यविध्यबाधाय नीवारा एवोपादेया इति पूर्वः पक्षः। सिद्धान्तस्तु श्रुत्या तावद्यागाङ्गत्वमेव व्रीहीणामवगम्यते · वस्तुतोऽपि तथा · यद्यपि पुरोडाशप्रकृतित्वं व्रीहीणामवगम्यते तथापि तदवयवा एव पुरोडाशतामापन्ना यागद्रव्यं भवन्ति · ते[2] च नीवारेषूपादीयमानेषु विगुणा भवन्ति · ततश्च प्रधानमेव विगुणं स्यात् · तच्चान्याय्यम् · तस्मात्प्रधानाङ्गभूतपुरोडाशजात्यभिव्यक्तिसमर्थेषु व्रीहिषु सत्सु शेषकार्याण्यनादृत्य व्रीहिभिरेव पुरोडाशः कार्यो न शेषकार्यानुरोधेन नीवारोपादानमिति सिद्धम्। तदुक्तं मण्डनेन अवत्तमात्रपर्याप्तव्रीहिद्रव्यस्य[3] सम्भवे पुरोडाशमकृत्स्नार्थं न नीवारपरिग्रह इति ॥ एवं सांनाय्येऽपि प्रधानयागसाधनसमर्थं स्रुवद्वयत्रयपरिमाणमपि यावत् दुग्धं लभ्यते कथंचित् तावत् चरू सांनाय्यालाभऽइति (२५. ५. ६.) चरू न भवतः · अवदानमात्रसमर्थमुख्यद्रव्याभावे त्वर्थद्रव्यविरोधेऽर्थसामान्यमिति न्यायेन प्रतिनिध्युपादानमेव युक्तम् ॥ ॥ अथ यत्र गुणद्रव्ययोर्विरोधस्तत्र कथम्। तद्यथा नैर्ऋतः परिवृत्त्यै[4] कृष्णव्रीहीणां नखनिर्भिन्नानामिति (१५. ३. १४.) तत्र ये व्रीहयः सन्ति मुख्यास्ते अकृष्णाः ये च नीवारास्ते च कृष्णाः · तत्र किं मुख्यद्रव्यमनादृत्य गुणानुरोधेन नीवारोपादानम् उत कृष्णगुणमनादृत्य[5] मुख्यद्रव्यं व्रीहय इति · तत्र व्रीहीणामुपादाने कृष्णगुणहानिः स्यात् नीवाराणामुपादाने च तस्यानुग्रहः व्रीहिशास्त्रमपि किंचिन्न्यूनं सम्पादितं भवति · अतः कृष्णानां नीवाराणामुपादाने प्राप्तऽआह ·

गुणद्रव्ययोर्द्रव्यं प्रधानयोगात् ॥१७॥ गुणद्रव्ययोर्विरोधे कृष्णत्वादिगुणमुख्यद्रव्ययोर्विरोधे सति गुणमनादृत्य द्रव्यं मुख्यद्रव्यमेवोपादेयम् न गुणानुरोधेन प्रतिनिधिद्रव्यम्। कुतः प्रधानयोगात् द्रव्यस्य यतो द्रव्यं प्रधानेन संयुज्यते · यतस्तत्त्यज्यमानं यागं साधयति · अतो यागस्य द्रव्यं संनिकृष्टम् गुणो विप्रकृष्टः · अतो गुणमनादृत्य मुख्यद्रव्यमेवोपादेयमित्येवं प्राप्तऽआह ·

१) ? हि २. २) ? तेन २. ३) ? °मात्राप° २. ४) परिवृत्यै २. ५) कृष्णां गुणम° २.

न समत्वात् ॥ १८ ॥ द्रव्यमेव प्रधानयोगीति यदुक्तम् तन्न · कुतः · समत्वात् उभयोर्गुणद्रव्ययोः सदृशत्वात् । द्रव्यमपि प्रधानयोगि श्रुतत्वाच्च गुणोऽपीत्येवं प्राप्तऽउक्तमेव सिद्धान्तं द्रढयति[1] ·

गुणानुग्रहात् ॥ १९ ॥ गुणेनानुगृहीतं विशेषितं द्रव्यमेव प्रधानयोगि · गुणस्तु तत्र विशेषणमात्रम् विशेष्यं तु द्रव्यमेव · अतो विशेषणविशेष्ययोर्विशेष्ये सम्प्रत्यय इति न्यायाद्द्रव्यमेव गुणानुगृहीतं प्रधानयोगीति नैतदुभयं समम् । अत एवाग्निहोत्रे पुंवत्साया अग्निहोत्र्याः (४. १४. १.) पयसोऽभावे पुंवत्सत्वलक्षणं गुणं हित्वा स्त्रीवत्साया अप्यग्निहोत्र्याः पयसा होतव्यम् । एवं पालाशानां परिधीनामार्द्राणामभावे (२. ८. १.) आर्द्रत्वरूपं गुणं त्यक्त्वा शुष्का अपि पालाशा ग्राह्याः । बाहुमात्राणामसम्भवे (२. ८. १.) अबाहुमात्रा अपि । एवं सर्वत्रोह्यम् ॥ यदा पुनः खदिरस्तनुवात्तक्षणादिसंस्काराणामयोग्यः नियोजनमात्रयोग्यः कदरश्च महान्संस्कारयोग्यस्तदा कस्योपादानमिति संदेहः · तत्र संस्कारक्षमकदरोपादाने खदिरविधेर्वैकल्यिकमात्रत्वेनात्यन्तपीडाभावात्[2] अक्षमखदिरोपादाने तु संस्कारविधीनामत्यन्तपीडाप्रसङ्गात् प्रतिनिधिरेवोपादेयः · मैवम् · न हि गुणानुरोधेन प्रधानमुपरोद्धव्यं भवति · तेन भवतु संस्काराणामत्यन्तपीडा न तु प्रधानं तदनुरोधेन कथंचिदपि पीडयितव्यम् · तस्मात्तक्षणाद्यसंस्कृतऽएव खदिरे पशुं नियुञ्जीत · तदुक्तं जैमिनिना (६. ३. ३५.) द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वादिति । यदा पुनर्मुख्यमलभ्यं मत्वा प्रतिनिधिमुपादातुं प्रस्थितेनान्तरा मुख्यं लब्धम् तदा प्रतिनिधेः संकल्पितत्वात् मिथ्यासंकल्पदोषपरिहाराय मुख्यमनादृत्य प्रतिनिधिरेवोपादेय इति प्राप्तेऽभिधीयते · यथाशक्ति शास्त्रार्थं सम्पादयामीत्येवं शास्त्रार्थविषय एव संकल्पः कर्तव्यः न प्रतिनिधिस्वरूपं संकल्पयितव्यम् · न च मुख्ये विद्यमाने प्रतिनिधिः शास्त्रार्थो भवति समग्रानुष्ठानशक्त्यामसत्यां हि विकलाङ्गानुष्ठानमपि शास्त्रीयं भवति न सत्यामिति · तस्मान्मुख्यप्राप्तौ मुख्यमेवोपादेयम् · तदुक्तं जैमिनिना (६. ३. ३२.) मुख्याधिगमे मुख्यमागमो हि तदभावादिति ॥ यदा पुनर्मुख्यं खदिरमलब्ध्वा प्रतिनिधिं कदरमु-

1) द्रढयति २. 2) ? °धेर्वैकल्पमात्र° २.

पादाय तक्षणादिषु कतिचित्संस्कारेषु[1] कृतेषु प्राक्पशुनियोजनात्खदिरं लभते तदा किमुपात्तेन प्रतिनिधिना कार्यं कुर्यात् उत तत्त्यागेन मुख्यमेवोपादाय संस्कारांश्च पुनः कृत्वा तत्रैव पशुं नियुञ्जीतेति संशयः । तत्रोपात्ते प्रतिनिधौ निवृत्तव्यापारं शास्त्रं नान्यदुपादापयति तस्मान्न मुख्योपादानमिति प्राप्ते ब्रूमः नोपादानपरं शास्त्रम् येन तस्मिन्कृते निवृत्तव्यापारं स्यात् · प्रधानानुष्ठानार्थं शास्त्रम् तच्च प्रधानं[2] सति मुख्ये प्रतिनिधिना क्रियमाणं विगुणं स्यात् · अतः संस्कृतमपि कदरं छित्वा खदिरं संस्कृत्य तस्मिन्पशुर्नियोक्तव्यः · ये च कदरे कृताः संस्कारास्तेषां खदिरऽआवृत्तिः स्यात् प्रधानवशेन गुणावृत्तेर्न्याय्यत्वात् । एवं पशुव्रीह्यादिष्वपि द्रष्टव्यम् · तत्रापि प्राग्यागान्मुख्यद्रव्यलाभे संस्कृतमपि पुरोडाशादिकं प्रतिनिधिद्रव्यं निष्पादितं त्यक्त्वा मुख्यद्रव्येण पुरोडाशान्तरं संस्कृत्य तेन यागः साधनीय इति । तदुक्तम् (जैमिनि° ६. ३. ३३.) प्रवृत्तेऽपीति चेदिति । अथ यथा प्रतिनिधिना नियोजने कृते यदा मुख्यमुपलब्धम् तदा कृतमपि नियोजनं साद्गुण्याय[3] पुनः खदिरे कर्तव्यमिति मन्वानस्योत्तरम्[4] कृते नियोजने लब्धोऽपि खदिरोऽनर्थक एव · नियोजनार्थं हि तदुपादानम् · तच्च कृतं न गुणानुरोधादावर्तयितव्यम् · अतो नादर्तव्यः खदिरः · तदुक्तम् (जैमिनि° ६. ३. ३४.) नानर्थकत्वादिति । अथवा सूत्रद्वयमिदमेकाधिकरणम् · प्रवृत्तेऽपि कृतेऽपि प्रधाने मुख्योपादानं स्यादिति चेत् नानर्थकत्वादिति ॥ ॥ चतुर्थी कण्डिका ॥४॥

अथ पञ्चतिः ॥

विहितद्रव्याभावे काम्यस्य कर्मण आरम्भ एव न कार्यः नित्यं च कर्म मुख्यद्रव्याभावेऽपि प्रतिनिधिनाप्यारम्भणीयमेव · काम्ये मुख्यद्रव्यस्य सद्भावं ज्ञात्वा आरब्धे आरम्भानन्तरं मुख्यद्रव्यालाभे काम्यमपि नित्यवत्प्रतिनिधिमुपादायावश्यं समापनीयमेव असमाप्तस्यैव परित्यागो न कार्यः · नित्ये कर्मण्यवश्यकर्तव्यत्वादारब्धे अनारब्धे च प्रतिनिध्युपादानं भवति · काम्ये चावश्यकर्तव्यत्वाभावात्प्रतिनिधिना आरम्भो न भवति आरब्धे चावश्यसमापनीयत्वात्समाप्त्यर्थं

1) कतिषु चित्सं° the Çástradíp. 2) Thus the Çástradípiká, प्रधाने 2. 3) Thus the Çástradíp., स्याद्गु° 2. 4) Thus the Çástradíp. मत्वातस्योत्तरं 2.

प्रतिनिधिर्भवत्येव । दीक्षितस्य पयआदिके व्रतेऽपि प्रतिनिधिर्भवति · व्रतं कृत्वेत्येवकारस्येष्टाशनस्तुतिपरत्वेन व्रतप्रतिनिधिव्युदासपरत्वाभावात् । यदा मुख्यद्रव्यालाभे प्रतिनिधिभूतं द्रव्यान्तरं गृह्यते यथा अग्नीषोमीयछागाभावे मेषः यथा वा परिक्रयादौ वासोगवादीनामलाभे द्रव्यम् तदा अग्नीषोमाभ्यां छागस्येत्यादौ वासोऽसि गौरसीत्यादौ च मुख्यद्रव्यवाचिशब्दस्याविपरिणामोऽनूह एव कार्यः · न तु छागस्येत्यस्य स्थाने मेषस्येत्यादि विपरिणतरूपं प्रयोज्यम् · यत्र पुनर्जात्यन्तरं विहितं भवति तत्र विपरिणामो भवत्येव यथा ऐन्द्री वृष्णिः षोडशिनीत्यादौ (१. ८. ४.) । तथा सोमाभावे पूतीकेषूपात्तेष्वपि अंशुरंशुष्टे देव सोमेत्यादौ सोमशब्दश्च प्रयोज्यो न पूतीकशब्दः पूतीकानामपूर्वविध्यभावात् । तथा पश्वादौ पृषदाज्यसाधनकेष्वनुयाजेषु सत्स्वपि देवा आज्यपा इत्यत्राज्यशब्दस्यानूह एव आज्यस्यैव कर्बुरस्य पृषदाज्यशब्दवाच्यत्वेन द्रव्यान्तरत्वाभावात् । तथा व्रीहिभिर्यजेत यवैर्यजेत । तथा आग्रयणे द्यावापृथिवीययागे परोडाशेनाज्येन वा यजेत । तथा सरस्वत्यै चतुर्थेऽतिरात्रो मेषी वेत्यादौ (१. ८. ५-६.) वैकल्पिकद्रव्यविधाने समविकल्पत्वादन्यतरेण कर्मणि प्रारब्धे सति येन द्रव्येण कर्मारब्धं तस्य नाशदोषादौ जाते पश्चात्तज्जातीयद्रव्यालाभे वैकल्पिकं द्रव्यान्तरं नोपादेयमेव किंतु येनारब्धं तत्सदृशमेव प्रतिनिधित्वेनोपादेयम् · अतो व्रीहिभिः कर्मण्यारब्धे व्रीहिषु विनष्टेषु व्रीह्यन्तरालाभे सति व्रीहिसदृशान्नीवारादीनुपादाय कर्म समापनीयम् · विकल्पेन विहिता अपि यवा नोपादेयाः · एवं वै सर्वं वैकल्पिके व्यूह्यम् । एवं व्रीह्यभावे नीवारैः प्रयोगे प्रारब्धे नीवारेषु विनष्टेषु कथंचिद्व्रीहिप्राप्तौ सत्यां व्रीहिभिरेव अप्राप्तौ च व्रीहिसदृशैरेव कर्म समापनीयम् न नीवारसदृशैः नापि वैकल्पिकैर्यवैः । यत्र मुख्यद्रव्येण प्रयोजनसिद्धिर्न भवति प्रतिनिधिद्रव्येण च भवति तदा मुख्यद्रव्यमनादृत्य प्रतिनिधिनैव कर्म कर्तव्यम् · यथा पुरोडाशनिष्पत्त्यर्थं व्रीहय उपादीयन्ते ते च न पुरोडाशनिष्पत्तिसमर्थाः नीवाराश्च पुरोडाशनिष्पत्तिसमर्था विद्यन्ते तदा व्रीहीननादृत्य नीवारैरेव पुरोडाशो निष्पादनीयः । अथ यदा नैर्ऋतः परिवृत्त्यै[1]

[1] °वृत्यै १. २. ३.

कृष्णव्रीहीणामित्यत्र (१५. ३. १४.) कृष्णानां व्रीहीणामभावे अकृष्णा व्रीहयः सन्ति कृष्णाश्च नीवारा इति यदा कृष्णगुणमनादृत्य व्रीहयो गृह्यन्ते तदा गुणानामनुग्रहः कृतो न भवति · यदा च कृष्णनीवारा गृह्यन्ते न तदा व्रीहयः · तत्रैवं गुणद्रव्ययोर्विरोधे गुणं हित्वा व्रीहय एवाकृष्णा अप्युपादेयाः · एवमेवाग्निहोत्रेऽपि पुंवत्साया अग्निहोत्र्याः पयसोऽभावे पुंवत्सवलक्षणं गुणं हित्वा स्त्रीवत्साया अपि पय उपादेयम् · एवं पालाशानां परिधीनामार्द्राणामभावे आर्द्रत्वरूपं गुणं हित्वा शुष्का अपि पालाशा ग्राह्याः · एवं सर्वत्र प्रतिनिधिपूह्यम्[1]।

एवं व्रीहीणामपि प्राशित्रेडादिप्रतिपत्तिकर्मपर्याप्तपुरोडाशनिष्पत्तिसमर्थानामभावे अवदानद्वयपर्याप्तपुरोडाशनिष्पत्तिमात्रा अपि व्रीहयो ग्राह्याः ॥ ॥४॥

इति प्रथमस्य चतुर्थी कण्डिका ॥ ॥

अथेदं विचार्यते । यान्येकप्रधानसम्बन्धीन्यङ्गकर्माणि किं तेषामनुष्ठाने कश्चित्क्रमनियमो नास्ति उतास्तीति · तत्र सूत्रेणैव पूर्वपक्षमाह ·

कर्मणामानुपूर्व्यं न युगपद्भावात् ॥१॥ आनुपूर्व्यं पौर्वापर्यं क्रम इत्यनर्थान्तरम् · कर्मणामिति अग्न्यन्वाधानादीनामङ्गकर्मणामनुष्ठाने आनुपूर्व्यं न भवति क्रमनियमो न भवति । कुतः युगपद्भावात् अतस्तान्यङ्गानि यदा प्रधानेनापेक्ष्यन्ते तदा युगपद्भावेनैव यौगपद्येनैव सहैव सम्बन्धं प्राप्नुवन्ति न क्रमेण[2] · ततश्चैषां नियमेन क्रमेणानुष्ठाने कारणाभावात् कर्तुरेकत्वादवश्यम्भाविनि क्रमे येन केनचिदनियतेन क्रमेणानुष्ठानम् ।

अर्थनिर्वृत्तेश्च ॥२॥ येन केनचित्क्रमेणाङ्गानुष्ठाने क्रियमाणे अर्थनिर्वृत्तिरङ्गकलापनिष्पत्तिः सुखेनैव भवति नियतक्रमेण क्रियमाणे तु नियतक्रमस्यानागतस्य वस्तुतः प्रतीक्षणेन विलम्बाद्बहुना कालेन स्यात् · तथा सति प्रयोगे प्राशुभावो[3] न स्यात् · प्रधानप्रत्यासत्त्या[4] कालो ह्यङ्गानां विहितः अङ्गानां नियतक्रमेणानुष्ठाने च सोऽपि अतिक्रान्तः स्यादिति · तस्मादङ्गानुष्ठाने क्रमनियमो नेति पूर्वः पक्षः । सिद्धान्तमाह ·

---

१) एवं सर्वप्रतिनिनिव्यूह्यं १. २) ? तत्क्रमेण २. ३) ? प्रयोगी २. ४) ? °सत्या २.

स्याद्वानुपूर्व्यनियमः श्रुत्यर्थक्रमेभ्यः ॥ ३ ॥ वाशब्दः पूर्वपक्षनिरासार्थः । अग्न्यन्वाधानादीनामङ्गकर्मणामानुपूर्व्यनियमः स्यात् अनुष्ठाने क्रमनियमो भवेत् नानियमः । केभ्यः प्रमाणेभ्यः · श्रुत्यर्थक्रमेभ्यः श्रुतेः अर्थात्क्रमाच्च । श्रुतिस्तावत् · यथा द्वादशाहे तेषां गृहपतिः प्रथमो दीक्षते (१२. १. १. १.) अथ ब्रह्माणं दीक्षयति (२.) अथोद्गातारम् (३.) अथ होतारमित्यादि (४.) · नात्र ब्रह्मादीनां दीक्षा विधीयते यजमानवादेव तस्याः प्राप्तेः · क्रमस्य त्वन्यतःप्राप्त्यभावात्स एवात्र विधीयते · तथा तस्मादेष दशमो ग्रहो गृह्यते तृतीय एव वषट्क्रियत ऽइति (४. १. ५. १६.) अयमपि श्रुतिक्रम एव । अर्थादपि क्रमोऽवगम्यते · तद्यथा · पेषणसंयवनयोरवघातपेषणयोश्च अग्निहोत्रं जुहोति यवागूं पचतीति क्रमेण श्रुतेऽपि अर्थात्पूर्वं पाकस्ततो होम इति · होमद्रव्यं हि यवागूः तदुत्पत्त्यर्थः श्रुत्या लिङ्गेन च पाकः स च पश्चात्क्रियमाणोऽनर्थकः स्यात् होमोऽप्यसति द्रव्ये न निर्वर्तेतातः पक्त्वा होमः कार्यः । क्रमः पाठक्रमः · स च द्विविधः श्रुतिपाठक्रमो मन्त्रपाठक्रमश्च · उभयविधोऽपि क्रमनियमे कारणं भवति · नियतेन हि क्रमेण पदार्थविधिपाठो मन्त्रपाठश्च वर्तेते [1] · तत्रैवमवगम्यते येन क्रमेण पदार्थविधिपाठो मन्त्रपाठश्च तेनैव क्रमेणानुष्ठानमिति · क्रमान्तरेणानुष्ठाने त्ववगतस्य क्रमस्य त्यागः अनवगतस्य क्रमस्योपादानमित्यसंगतं स्यात् · तस्मात्पाठक्रमादपि क्रमनियमोऽङ्गकर्मणां भवतीति ।

प्राकृतं च विकृतौ ॥ ४ ॥ अतोऽपि कारणात्पाठक्रमेणाङ्गकर्मणामनुष्ठानं भवति यतो विकृतौ प्राकृतमेव क्रमं श्रुतिरनुवदति · यथा महापितृयज्ञे स तत एव प्राक्तम्बयजुर्हरतीत्यादिना [2] स यज्ञोपवीती भूत्वाज्यानि गृह्णातीत्येवमन्तेन (२. ६. १. १२.) · अत्राज्यग्रहणे यज्ञोपवीतित्वविधिपरे वाक्ये प्राकृतं क्रमं दर्शयति [3] यदि पाठक्रमेणानुष्ठानं न स्यात् तदानेनैव क्रमेणानुवादो न स्यात् ॥ अपरे त्वन्यथा व्याचक्षते प्राकृतं च विकृतौ विकृतौ प्राकृतविकृतयोः कर्मणोः संनिपाते प्राकृतं पूर्वं कर्तव्यम् पश्चाद्विकृतमिति । तद्यथा प्रकृतौ प्रास्य तृणं चक्षुष्पा इत्यात्मानमालभतऽइति (३. ६. १५.) प्रस्तरतृणानुप्रहरणानन्तरमा-

[1] ? वर्तति २.　[2] प्राकृतंतवयजु° २.　[3] Locat. Part. praes.

त्मालम्भ उक्तः विकृतौ च प्रहृत्य तृणं तेन चरतीति (४. ४. ११.) तृणानुप्रहरणानन्तरं वाजिनयाग उक्तः · तत्र पूर्वं प्राकृतमात्मालम्भोदकस्पर्शनरूपं कृत्वा पश्चाद्वाजिनयागः कर्तव्यः । तथा प्रकृतौ हविरासादनोत्तरकालं हविरालम्भात्मालम्भोदकालम्भा विहिताः · विकृतौ चासाद्य हवीꣳष्यग्निं मन्यतीत्यग्निमन्थनं (३. ४. १. १२.) हविरासादनोत्तरकालं विहितम् · तत्र पूर्वं प्राकृता हविरालम्भात्मालम्भोदकालम्भाः पश्चाद्विकृतमग्निमन्थनम् । एवमथासाद्य स्रुचोऽप उपस्पृश्य राजानं प्रपादयतीत्येतदप्युदाहार्यम् (२. ६. ३. १७.) · अत्रापि पूर्वं प्राकृता हविरालम्भात्मालम्भोदकालम्भाः पश्चाद्विकृतं सोमप्रपादनादि । तथा पितृयज्ञे परिषिकात्प्रागिडाभक्षणमार्जनपवित्रप्रतिपत्तिदक्षिणादानान्यत [1] एव सिद्धानि । सुत्यायां च सवनीयपुरोडाशानां निर्वपनादूर्ध्वभाविनः प्रागलंकरणाद्ये पदार्थाः तेषां प्राक्प्रचरणीहोमादत एवानुष्ठानं सिद्धम् । अत एव पशौ प्राकृतं पूर्वमित्यस्य बाधनाय यत्नं करोति उत्तराघारमाघार्य पशुं पूर्वं समनक्तीति (६. ४. २.) · अत्र पूर्वमित्यनेन प्राकृतध्रुवासमञ्जनात्पूर्वं पशुसमञ्जनं विदधाति । तस्मात्समीचीनमेतद्व्याख्यानम् ॥ ॥ अथ क्रमप्रमाणानां विरोधे बलाबलं निर्णीयते । यत्र पाठक्रमार्थक्रमयोर्विरोधो भवति · तद्यथा स वै पर्णशाखया वत्सानपाकरोति तामाच्छिनत्तीति (१. ७. १. १-२.) पाठक्रमः अर्थस्त्वनेन क्रमेण न सिध्यति न ह्यच्छिन्नया वृक्षस्थया शाखया वत्सापाकरणं कर्तुं शक्यते वत्सापाकरणविधे च छेदनमिति · तत्र किं पाठक्रमाध्यवसानमुतार्थक्रमादिति संशयऽआह ·

विरोधेऽर्थस्तत्परत्वात् ॥५॥ पाठक्रमार्थक्रमयोर्विरोधे अर्थक्रम एव बलीयान् न पाठक्रमः । कुतः तत्परत्वात् पाठस्यार्थपरत्वात् अर्थार्थत्वात् कार्यसिद्ध्यर्थत्वादित्यर्थः । तेन पूर्वं छेदनम् पश्चात्तया छिन्नया शाखया वत्सापाकरणमिति ॥ अथ यत्र श्रुतेः श्रुतिपाठक्रमस्य च विरोधो भवति तद्यथा सꣳस्थिते यज्ञे ब्राह्मणं तर्पयितवै ब्रूयादिति (१. ७. ३. २८.) श्रुतेः कर्मणि समाप्ते प्रैषं विदधाति पाठक्रमात्तु स्विष्टकृतः पश्चात्प्राशित्रावदानाच्च पूर्वमिति तत्र केन क्रमेणानुष्ठानमिति संशये सत्याह ·

---

१) पवित्रे २·

श्रुतिः क्रमादानुमानिकत्वात् ॥ ६॥ क्रमादिति श्रुतिपाठक्रमाच्छ्रुतिर्बलीयसी · तेन श्रुतिप्रतीतक्रमेणैव संस्थिते कर्मणि प्रैषोच्चारणम् न पाठक्रमेण । । कुतः आनुमानिकत्वात् पाठक्रमस्य अर्थाच्छ्रुतेः प्रत्यक्षत्वादिति ज्ञेयम् · प्रत्यक्षा हि श्रुतिः सꣳस्थिते यज्ञऽइति पाठक्रमे त्वनुमानम् · अतोऽनेन क्रमेण पदार्था अनुष्ठेयाः यतोऽनेनैव क्रमेण पाठ इति · दुर्बलं च प्रत्यक्षादनुमानम् · अतः श्रुतिक्रमेणानुष्ठानमिति सिद्धम् । एवम् तस्मादेष दशमो ग्रहो गृह्यते तृतीय एव वषट्क्रियतऽइत्येतदप्यत्रोदाहरणम् (४. १. ५. १६.) · किं श्रुतिमन्त्रपाठात्तृतीयस्थाने गृह्यते उत श्रुतिबलाद्दशमऽइति · तत्र श्रुतिबलात्तु दशम ऽइति सिध्यति ॥ अथ यत्र चोदनापाठक्रमस्य मन्त्रपाठक्रमस्य च परस्परं विरोधो भवति । यथाज्याधिश्रयणे सोऽसावाज्यमधिश्रयतीषे त्वेत्यधिश्रयणं विधाय तदनन्तरमेव तत्पुनरुद्वासयत्यूर्जे त्वेति (१. २. २. ६.) चोदनापाठक्रमः मन्त्रपाठे आज्याधिश्रयणमन्त्रानन्तरं घर्मोऽसि विश्वायुरित्यादिं (१. २२.) पत्नीसंनहनमन्त्रान्तं मन्त्रगणं पठित्वा आज्योद्वासनमन्त्र (१. ३०.) ऊर्जे त्वेति पठितः । पूर्वाधिकरणे हि क्रमाच्छ्रुतेः प्रत्यक्षत्वाद्बलीयस्त्वमुक्तम् · अत्रोभयोः प्रत्यक्षत्वात्किं चोदनापाठक्रमेणाज्योद्वासनं कर्तव्यमुत मन्त्रपाठक्रमेणेति संशये सत्याह ·

मन्त्रचोदनयोर्मन्त्रबलं प्रयोगित्वात् ॥ ७॥ मन्त्रचोदनयोरिति मन्त्र[पाठचोदना]पाठयोर्विरोधे मन्त्रबलम् मन्त्रपाठ एव बलवानित्यर्थः । कुतः प्रयोगित्वात् मन्त्राणाम् · मन्त्रा हि कर्मकाले प्रयुज्यन्ते पठ्यन्ते न चोदनावाक्यानि · अतो मन्त्रपाठः पदार्थानां संनिकृष्टः चोदनापाठस्तु विप्रकृष्टः । तथा हि समिधो यजतीत्यनेन (१. ५. ३. १.) पदार्थो विहितः · सोऽनुष्ठानवेलायां येन वाक्येन विहितस्तद्वाक्यं स्मारयति तेन वाक्येन स्मृतेनानुष्ठानवेलायां स्वपदार्थः स्मारितः सन्ननुष्ठीयते · इतीतरेतराश्रयं स्यात् अर्थेन वाक्यं स्मार्यते वाक्येन चार्थ इति · नैष दोषः सामान्यविशेषभेदात् · सामान्येन हि दार्शिकमङ्गं कर्तव्यमित्यवगम्यते विशेषस्मरणार्थं विधायकं वाक्यमालोचयति · तेन चालोचितेन पश्चात्तदर्थविशेषः स्मारितोऽनुष्ठीयते · अनुष्ठितश्चासौ कथित्येवं द्वितीयं पदार्थं न स्मारयति अर्थानां ग्रन्थानपेक्षेण त्रूपेण पौर्वापर्यस्यानवक्लृप्त-

त्वात् किं तर्ह्यनुष्ठानोत्तरकालं योऽसौ कृतस्तमालोचयति समिद्यागोऽयं कृत इति · स चालोच्यमानो येन समिधो यजतीत्यनेन (१.५.३.१.) ब्राह्मणवाक्येन विहितस्तत्स्मारयति · तच्च स्मृतं स्वादुत्तरम् तनूनपातं यजतीत्येतत् (१०.) स्मारयति कुतः पाठात् ततः परं हि तत्पठितमिति · तद्ब्राह्मणं पुनः पदार्थं विदधाति · विधिरेव तस्य कार्यम् न स्मृतिः · अनुष्ठानवेलायां तदेव ब्राह्मणं विधिव्यापारं कृत्वा चिरनिवृत्तव्यापारं प्रयोगकालाद्बहिर्भूतं स्मारकमपेक्षितम् · अयं मन्त्रपाठाद्ब्राह्मणपाठे विप्रकर्षः । मन्त्रः पुनरन्तःक्रतु प्रयुज्यमानः परिसमाप्यमान उत्तरं मन्त्रं पर्युपस्थापयति · स चोत्तरो मन्त्रः पर्युपस्थाप्य उत्तरं पदार्थं पर्युपस्थापयन्नेव पर्युपतिष्ठते · तस्मात्तत्रालोचनान्तरापेक्षाभावान्नास्ति विप्रकर्षः । एतदुक्तं भवति स्मारकक्रमेण तावदनुष्ठानक्रमः · न च मन्त्रे अनन्यार्थे सति ब्राह्मणस्य स्मारकत्वम् अप्रयुज्यमानतया सामर्थ्याभावात् · न हि निर्वपामीतिवन्निर्वपेदिति पदमुच्चारितमनुष्ठानौपयिकमनुष्ठेयप्रकाशनं करोति किं तु सम्बन्धिमात्रतया प्रयोगबहिर्भूतं सत् अनेन वाक्येनेदं विहितमत एतत्करोमीत्येवमालोचनेन स्मारकं भवति · मन्त्रस्तु प्रयुज्यमान एवाभिधानत एव स्मारक इति संनिकृष्टः । विप्रकृष्टाच्च संनिकृष्टं बलवदित्येवं प्राप्तेऽआह ·

न समत्वात् ॥ ८ ॥ मन्त्रपाठ एव बलवान्यदुक्तं तन्न । कुतः समत्वात् मन्त्रपाठचोदनापाठयोः । कथमुभयोः समता · उच्यते · मन्त्रः कर्माणि करिष्यमाणस्य कर्मणः स्मरणार्थं प्रयुज्यते चोदना तु कर्मणो विधायिका · अत एव चोदनायाः प्रवृत्तिः पूर्वम् यतः पदार्थे विहिते सति पश्चात्तत्स्मारणार्थे मन्त्रः प्रयुज्यते · अतः सममेवैतदिति प्राप्ते सिद्धान्तमाह ·

गुणानां तु भूयस्त्वात् ॥ ९ ॥ तुशब्दः पूर्वपक्षनिरासार्थः । नैतदुभयं समम् किंतु मन्त्रपाठ एव बलवान् । कुतः मन्त्रेषु गुणानां भूयस्त्वात् गुणानां बाहुल्यात् यतः[1] चोदनापाठापेक्षया मन्त्रेषु बहवो गुणा विद्यन्ते । तद्यथा · कर्मकाले उच्चारणे पदार्थस्मारके[2] यतो मन्त्रा अर्थवादादिकृतव्यवधानरहिताः क्रमेण

---

1) यतो २. 2) ? उच्चारणं पदार्थस्मारकं २.

पद्यन्ते तेनोत्तरमुत्तरं पदार्थं कटिति स्मारयितुं शक्नुवन्ति · नैवं चोदनापाठः विधेयार्थस्तावकवाक्यसंदर्भव्यवहितत्वेन मन्त्रवत्स्मारयितुमशक्यत्वात् · न च कर्मकाले तस्योच्चारणं विहितं मन्त्रवत् । श्रुतिरपि मन्त्राणां गुणभूयस्त्वमाह तस्मादेतदृषिणाभ्यनूक्तमित्यादिना (१. ७. ४. ४.) · यो हि स्वप्रतिपादितस्यार्थस्य प्रामाण्यार्थमन्यस्योक्तिं प्रदर्शयति स आत्मापेक्षया उत्कृष्टस्यैव दर्शयति न निकृष्टस्य · तेन गुणभूयस्त्वं मन्त्रेषु अतो मन्त्रपाठ एव बलवानिति सिद्धम् ॥ ॥ पदार्थानां क्रमनियमे श्रुत्यादीनि त्रीणि प्रमाणान्युक्तानि · तेषां विरोधे बलाबलं चोक्तम् । अथेदं चिन्त्यते · यत्र बहूनि प्रधानानि सह क्रियन्ते यथा दर्शपूर्णमासयोराग्नेयोपांशुयाजाग्नीषोमीयैन्द्राग्नादीनि यथा चातुर्मास्यपर्वसु वाजपेयेऽतिरात्रपशुवशापृश्निसप्तदशप्राजापत्येषु[1] च तत्रारादुपकारकाण्यङ्गानि सर्वेषां तन्त्रेण क्रियन्तऽइति वक्ष्यति कर्मणां युगपद्भावस्तन्त्रमित्यत्र (१. ७. १.) · तेन न तेषु क्रमचिन्ता · संनिपत्योपकारकाणि तु द्रव्यसंस्काररूपाणि प्रतिप्रधानं भेदेन कर्तव्यानि · तत्र चिन्त्यते तानि किमेकैकस्य सर्वाणि कृत्वापरस्य कर्तव्यानि किं वा समान एकैकः पदार्थः सर्वेषां कर्तव्य इति । तत्रैकैकं प्रधानमव्यवहितानि स्वाङ्गान्यपेक्षते · तत्राङ्गानां प्रधानकालत्वस्य न्याय्यत्वादेकैकस्मिन्गुणकाण्डमपवृज्यात् · इतरथा हि पदार्थानुसमये सति स्वप्रधानाद्विप्रकृष्येरन् · यद्येकस्यासादनं कृत्वापरस्य तदेव क्रियते तदा पूर्वस्यासादनयोर्व्यवायः स्यात् · सहवचनं त्वारादुपकारकसाहित्यमात्रेणाप्युपपद्यते · तस्मात्काण्डानुसमय एवेति प्राप्तऽआह·

तुल्यसमवाये सामान्यपूर्वमानुपूर्व्ययोगात् ॥ १० ॥　　तुल्यसमवाये तुल्यानां प्रधानानां सह प्रयोगे द्रव्यसंस्काररूपाणि संनिपत्योपकारकाण्यङ्गानि सामान्यपूर्वं कर्तव्यानि पूर्वः पूर्वः पदार्थः[2] सर्वेषां समानः सदृशः कर्तव्यः । तद्यथा बहुषु हविःषु प्रथमं सर्वेषां विभस्मीकरणम् ततः सर्वेषां पात्रीस्थापनम् ततः सर्वेषां तत्र व्यभिघारः[3] ततः सर्वेषां पात्रीषूपस्तारः ततः सर्वेषामुद्वासनम्[4] ततः सर्वेषां वेद्यामासादनम् ततः सर्वेषामालम्भः इत्येवं पदार्थानुसमयः कर्तव्यः । यद्येकैकस्मिन्गुणकाण्डमपवृज्येत तथा सति क्रमेण प्रयोगात्प्रयोग-

---

1) °सप्तदशसु प्रा° २.　2) परार्थः २.　3) ? तत्र चाभिघारः २.　4) °सनी २.

वाक्यावगतस्य साहित्यस्य साहित्यबाधः स्यात् · न हि वचनेनाविशेषतः साहित्यमवगम्यमानं काल्पनिकेन प्रधानासत्तिमात्रेणाराडुपकारकविषयमात्रं कल्पयितुं शक्यते · तस्मात्पदार्थानुसमयः । कुतः आनुपूर्व्ययोगात् पदार्थानां तन्मन्त्राणां च · एवं क्रियमाणे पदार्था आनुपूर्व्येण अनुक्रमेण युज्यन्ते तन्मन्त्राश्च · अन्यथोत्तरपदार्थकरणानन्तरं पूर्वेषु क्रियमाणेषु आनुपूर्व्ययोगो न स्यात् । पौर्णमास्यां पौर्णमास्या यजेतेत्यनेन वाक्येन पौर्णमासीशब्दबोध्यानां तत्सम्बद्धानां त्रयाणां यागानां साङ्गानामेककालप्रयोगोऽवगम्यते · अतो यस्मिन्नेव क्षणे एकस्याधिश्रयणं कर्तव्यमापतति तस्मिन्नेवापरस्याधिश्रयणं कर्तव्यं सदशक्यतया केवलं न क्रियते द्वितीये तु क्षणे न कश्चिद्धेतुर्येन पुरोडाशान्तरं नाधिश्रियेत · अतः प्रथमं पदार्थं सर्वेषां कृत्वा ततो द्वितीयादिः पदार्थः सर्वेषां कर्तव्यः । एवं बहुषु प्रधानेषु सर्वत्र पदार्थानुसमय एव न्याय्यो न काण्डानुसमय इति स्थितम् · यत्र तु प्रधानविरोधो भवति पदार्थनुसमये क्रियमाणे तत्र काण्डानुसमय एवेति । वाचनिकेन साहित्येन पदार्थानुसमयः प्राप्तोऽपि प्रधानविरोधात्त्यक्तव्यः · पुरोडाशाङ्गं ह्यधिश्रयणादयः · तदङ्गं च क्रमः पदार्थानुसमयरूपः · तदाश्रयणे च सुतप्तकपालसंयोगात्पुरोडाशशोषप्रसङ्गः · न चाङ्गानुरोधेन प्रधानबाधो युक्तः · तेनातिबहुषु हविःष्वेकैकस्य पुरोडाशस्याधिश्रयणं प्रथनमद्भिरभिमर्शनं चेत्यन्तं काण्डानुसमयः कार्यः । यत्र तु नास्ति प्रधानबाधः द्वित्रिचतुरादिहविःषु तत्र भवतु पदार्थानुसमयः · दाहसम्भवशङ्कायां तु उद्वासनमपि व्युत्क्रमेण कार्यम् । यदुक्तम् पूर्वस्य पदार्थे कृते तस्मिन्नेव द्वितीयस्य क्रियमाणे पूर्वस्य व्यवधानमिति तत्सहत्वविधिबलात्परिह्रियते । एवं च सति वाजपेये आग्नेयैन्द्राग्नसारस्वतीवशापृश्निसप्तदशप्राजापत्येषु द्वाविंशतिसंख्येषु पशुष्वेकविंशत्या पदार्थैः समानासमानजातीयैर्व्यवधानमिष्यते · न न्यूनाधिकैः · अन्ये त्वसमानजातीयैरेव ॥

अनेनैव मुख्यक्रमप्रावृत्तिकक्रमावुक्तौ भवतः · तथा हि यत्र बहूनि प्रधानानि भवन्ति तत्र यो मुख्यानां प्रधानानां क्रमस्तेनैव क्रमेण तदङ्गानां क्रमो भवति · यथा पौर्णमास्यां प्रथममाग्नेययागः ततोऽग्नीषोमीययागः अत आग्नेयस्य प्रथमं ग्रहणम् ततोऽग्नीषोमीयस्य एवं प्रोक्षणादावपि · अयं मुख्यक्रमः · अनेन

क्रमेण यद्यङ्गान्यनुष्ठीयन्ते तदाङ्गानां नियता प्रधानप्रत्यासत्तिरनुगृहीता भवति · एवं द्व्यङ्गप्रधानयोर्यावदनुज्ञातमेव व्यवधानं भवति इतरथा तु पश्चाद्भाविनः प्रधानस्य प्रथमाङ्गं क्रियमाणं प्रधानेनात्यन्तं व्यवहितं स्यात् ॥ अथ प्रवृत्तिक्रम उच्यते । यत्र बहूनि हवींषि भवन्ति समानदेवतानि यथा वाजपेये पशवः तत्र चोपाकरणादयः संनिपातिनः प्रतिपश्वावर्तनीयाः · तेषां चावृत्तिर्नैकस्य पशोः कार्त्स्न्येन कृत्वापरस्यापि तथैव क्रियन्त इत्येवम् किं तर्हि सर्वेषामुपाकरणं यतःकुतश्चित्पशोरारभ्य कृत्वा ततः सर्वेषां नियोजनमित्युक्तम् । तत्र प्रथमे पदार्थे उपाकरणे अनियम एव यतःकुतश्चित्पशोरारभ्य कर्तव्यः · द्वितीयश्च पदार्थो नियोजनरूपः किं प्रथमो यत आरब्धः तत्रैवारम्भणीयः उत तत्राप्यनियम एवेति । तत्र क्रमनियमकारणानां श्रुत्यर्थपाठानामभावादनियमे प्राप्ते उच्यते प्रवृत्त्यैव नियमः · प्रथमः पदार्थो येन क्रमेण कृतः स एव क्रम उत्तरेष्वपि नियोजनादिषु नियम्यते कुतः पदार्थैः सह प्रधानं कर्तव्यमिति वचनात् सर्वे पदार्थाः प्रधानकालान्न विप्रकृष्टव्याः । कथं पदार्थैः सह प्रधानस्य वचनम् यावता दर्शपूर्णमासाभ्यां यजेत प्राजापत्यैश्चरन्तीत्यादिषु प्रधानमात्रं श्रूयते उच्यते समीहितं भावयेद्यागेनेत्यमिति हि यजेतेत्यस्यार्थः । तत्र यस्यामेव वेलायां स्वर्गो भावने[1] कर्तृत्वं प्रतिपद्यते तस्मिन्क्षणे करणेतिकर्तव्यतेऽपि व्याप्रियेते अयमर्थः नात्र प्रधानं कर्तव्यं श्रूयते किंतु प्रधानेन स्वर्गः कार्य इति करणविभक्तिनिर्देशाद्यागेनेष्टं कार्यमस्मिन्काले कुर्यादिति · तेन स्वकार्यं सेतिकर्तव्यताकेन कर्तुं शक्यते नान्यथा · तस्मात्त्रितयस्य फलकरणेतिकर्तव्यत्वस्य युगपद्यजेतेत्यनेन कर्तव्यतोच्यते · ततोऽन्यथा करणेतिकर्तव्यतात्वमेव न स्यात् न हि पश्चाद्भावि करणं भवति · तथा भविष्यति भाव्ये भूते च करणे असावेव दोषः न हि विनष्टं करणं भवतीति · तथा करणेतिकर्तव्यतयोरपि मिथो विप्रकर्षे अयमेव दोषः न हि विनष्टमनागतं वानुग्राहकं भवति । तेन शब्दवस्तुभ्यामेककालतैषां त्रयाणाम् ततः प्रधाने सेतिकर्तव्यताके एकस्मिन्क्षणे सह कर्तव्ये प्राप्ते सति एकः कर्ता बहूनि प्रधानानि इतिकर्तव्यतां वा असमर्थः कर्तुं यौगपद्येने-

1) भवने २. भवनेः २.

त्यवश्यम्भावी कियानपि विप्रकर्षः । ईदृशेनापि विप्रकर्षेण सहैव पदार्थाः कृता भवन्ति । प्रयोगवचनो हि यावतः पदार्थाननुष्ठापयति तावद्भिरवर्जनीयतया यावान्कालो व्याप्यते तावानेकः कालः । तावति च काले सर्वेषां कालो विधीयते न त्वेकस्मिन्क्षणे अशक्यार्थविधिप्रसङ्गात् । तेन प्रत्यासत्तिरेतेषां साहित्यम् नैकक्षणवर्तित्वम् । यद्येवम् प्रयोगवचनेनैव क्रमस्य सिद्धिवात् श्रुत्यादिभिः किं क्रियते अनियतक्रमेणानुष्ठानं प्राप्नोतीति क्रमनियमे तेषां व्यापारः । यस्मात्प्रयोगविधिर्नैकक्षणवर्तित्वं विधत्ते प्रत्यासत्तिमात्रम् तस्मात्प्रधानं चिकीर्षितमनागतं कृतं वा तेषां प्रधानार्थानामनुष्ठापकम् । करिष्यमाणेन कृतेन वा प्रधानेन[1] प्रत्यासत्तिमात्रमङ्गानां तत्साहित्यम् नैकक्षणवर्तित्वम् । तत्राग्न्यन्वाधानादीनां करिष्यमाणं प्रधानं निमित्तम् स्विष्टकृदादीनां तु कृतम् । तेनैवमवश्यम्भाविनि विप्रकर्षे केचित्पदार्थाः क्षणाव्यवहिताः प्रधानेनापेक्ष्यन्ते केचिद्द्वाभ्यां क्षणाभ्यां व्यवहिताः केचिद्बहुभिरिति । एवं वाजपेयपशुष्वपि अग्न्यन्वाधानादि प्रागुपाकरणात्साधारण्यं सर्वपशूनां सह अनुभूतम्[2] । उपाकरणादयोऽपि संनिपत्योपकारकास्तन्त्रेणाविभवादावर्तयितव्या अपि साहित्येनैव पशुभिरनुभवितव्याः । यदेकस्योपाकरणम् तदैवेतरेषामपि । कुतः सहचोदितत्वात्पशूनां साङ्गानाम् । तत्रैवं सहानुभवितव्ये सति यस्य पशोः प्रथममुपाकरणं क्रियते तस्य प्राकृतेन पाठेन यद्यपि द्वितीयः पदार्थो नियोजनरूपः स्याप्यते तथापि सहवचनादेव एकविंशतिक्षणाव्यवहितं द्वितीयं पदार्थमाकाङ्क्षति । द्वितीयस्तु पशुर्विंशत्योपाकरणक्षणैर्व्यवहितमेकेन प्रथमस्य पशोर्नियोजनक्षणेन च व्यवहितं स्वीयं द्वितीयं पदार्थमाकाङ्क्षति । एवं तृतीयादयोऽपि पशवः सजातीयविजातीयव्यवहितानात्मीयान्पदार्थानपेक्षन्ते । अन्त्यस्तु विजातीयैः पूर्वोपाकृतानामेकविंशतेः पशूनां नियोजनक्षणैर्व्यवहितमेव द्वितीयं पदार्थमपेक्षते । तदेवं संनिपत्योपकारकानालोच्य ईदृशी एकविंशतिक्षणाव्यवधानापेक्षा प्रधानानां भवति । ततश्च यावद्भिर्नाव्यवहितः शक्यः पदार्थः कर्तुम् तावद्भिर्व्यवधानमागत्यावश्यं[3] कर्तव्यम् अतोऽभ्यधिकैस्तु न व्यवधातव्यम् । यद्येकं पदार्थमेकस्य कृत्वा द्वितीयोऽपि पदार्थस्तस्यैव

1) ?चाप्रधानेन २. 2) ??सहकृतव्रूतं २. 3) ? °धानमगत्या° २.

क्रियेत ततः सहवचनं नोपपद्येत · एवं सर्वत्र तृतीयादिष्वपि पदार्थेषु योज्यम् · प्रथमपदार्थक्रम एव द्वितीयादिष्वपि समाश्रयितव्यः इतरथा केषां वचनम् बहू-न्यप्यधिकैरपि क्षणैर्व्यवहितानि स्युः न च तद्युक्तम् · न त्वेवं [1] केषांचिदल्पै-र्व्यवधानं गुणो भविष्यतीति वाच्यम् यथाधिकैर्व्यवधानेऽश्रुतकरणम् एवं न्यू-नैरपि व्यवधाने अश्रुतकरणमेव · तस्माद्द्वात्रिंशतेः पशूनां साहित्यसम्पत्तये प्रयो-गविधिनायं क्रमः पदार्थानां मिथ एकविंशतिक्षणव्यवधानात्मकोऽपेक्षितः स न्यूनैरधिकैश्च व्यवधाने बाध्येत अतः सर्वेषां तुल्यप्रत्यासत्तिसिद्ध्यै प्रथमपदार्थ-क्रम एव द्वितीयादिष्वाश्रयणीय इति सिद्धम् । अत्राङ्गानां मिथः प्रत्यासत्तिर्नियम-कारणम् मुख्यक्रमे [2] तु अङ्गानां प्रधानप्रत्यासत्तिरिति विशेषः ॥ मुख्यक्रमप्र-वृत्तिक्रमयोर्विरोधे च मुख्यक्रमो बलीयान् । तद्यथा दर्शपूर्णमासयोः सांनाय्य-धर्माः शाखाहरणादयः पूर्वं प्रवर्तन्ते पश्चादाग्नेयधर्माः · प्रदानं त्वाग्नेयस्य प्रथमम् पश्चात्सांनाय्यस्य · ततः स्विष्टकृदवदानं प्रयाजशेषाभिघारणं प्राशदानं [3] वेद्या-मासादनादिकं च किं प्रवृत्तिक्रमात्सांनाय्यस्य पूर्वं भवति उत मुख्यक्रमादाग्ने-यस्येति संदेहादनियमे प्राप्ते मुख्यक्रमो बलीयानित्युच्यते · अस्मिन्हि आश्री-यमाणे अल्पीयांसः प्रथमपदार्थाः प्रधानाद्विप्रकृष्यन्ते अन्ये सर्वे संनिकृष्टा भ-वन्ति प्रवृत्तिक्रमे तु बहूनां विप्रकर्षः · पूर्वं तु मुख्यप्रवृत्तिभ्यां बलीयसा पाठक्रमेण मुख्यक्रमो बाध्यते प्राशदानादिषु पाठक्रमाभावात्प्रवृत्तिक्रमो मुख्य-क्रमेण बाध्यते ॥ अथ स्थानप्रमाणमुच्यते · साद्यस्के सह पशूनालभतऽइति (२२. ३. २८.) श्रूयते साहित्यं च सवनीयस्य स्थाने · तत्र किमुपाकरणादौ अनि-यमः अथवाग्नीषोमीयस्य प्रथममुपाकरणम् अथवा सवनीयस्येति · तत्र नियम-कारणाभावादनियमे प्राप्ते प्रकृतिवदाग्नीषोमीयस्य प्राथम्ये प्राप्तऽउच्यते सवनी-यस्यैव प्रथममुपाकरणम् · अग्नीषोमप्रणयनानन्तरं ह्यग्नीषोमीयस्यास्थानम् · स तेनोपस्थितोऽपि सहालम्भवचनेन तस्मात्स्थानाच्चलितत्वादननुष्ठितो ऽत्र तु न तस्य किंचिदुपस्थापकमस्ति · सवनीयस्तु स्वस्थानादप्रचलितः [4] सन्नाश्विनग्रहणादु-पस्थितत्वात्तदनन्तरमुपाक्रियते · ततः साहित्यवचनादितरोपाकरणम् · अतः सव-

1) ? नन्वेवं २. 2) मुख्यं क्रमे २. 3) प्राणादानं २. 4) °दप्युच° २.

नीयस्यैव प्राथम्यम् · इतरयोस्तु कथं क्रमः अनियम एव तयोरुपस्थाने विशेषाभावात् · अथवा प्रकृतिदृष्टं पौर्वापर्यमसति बाधेऽनुग्रहीतव्यमित्यग्नीषोमीयमुपाकृत्यानूबन्ध्योपाकरणमिति ॥ ॥ तदेवं श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिसंज्ञानि षट्प्रमाणानि क्रमनियमकारीण्युक्तानि तेषां परस्परविरोधे च पूर्वं-पूर्वं बलवत् उत्तरमुत्तरं च दुर्बलमिति । तदुक्तम् श्रुत्यर्थपठनस्थानमुख्यासत्तिप्रवृत्तिभिः एकाख्यातगृहीतानां नियतः कर्मणां क्रमः विरोधे परदौर्बल्यमेतेषामपि पूर्ववदिति ॥ ॥ अथेदं विचार्यते · दर्शपूर्णमासयोराग्नेयाग्नीषोमीयनिर्वापयोः पदार्थानुसमये स्थिते किमेकैकमुष्टिनानुसमयः उत चतुर्भिर्मुष्टिभिरिति · तत्र यद्येकैको मुष्टिः पृथक्पृथक्पदार्थस्ततत एकैकेनानुसमयः अथ चतुर्मुष्टिनिर्वाप एकः पदार्थस्ततश्चतुर्भिर्मुष्टिभिरिति · एवं कपालोपधाने किमेकैकेन कपालेनानुसमयः उताष्टाभिरेकादशभिश्चेति · तथा द्विरक्यति (१. १. २.) द्विर्दक्षिणमनक्ति त्रिरुत्तरमिति (७. २. ३४.) वपने च दक्षिणोत्तरगोदाने (७. २. १.) पावने च त्रिः पावयतीति । किं प्राप्तम् · एकैकमुष्टिनेति । कुतः · एकमुष्टिनिर्वापो ह्येकः पदार्थः न चतुर्मुष्टिनिर्वापः · कथम् · एकस्मिन्मुष्टौ निरुप्ते प्रयत्नः पर्यवसितो भवतीति न शक्यं वदितुम् किंचिन्न निरुप्तमिति · न च निरुप्ते[1] निर्वापो न कृतः स्यात् · न च मुष्टिमात्रेण निरुप्तेन न प्रयोजनम् न ह्येकस्मिन्ननिरुप्ते चत्वारः सम्भवन्ति मुष्टिसमानाधिकरणो हि चतुःशब्दः । तस्मान्मुष्टिना अनुसमयः कार्यः । एवं कपालान्युपदधातीति तत्राप्येकैककपालेनानुसमयः कार्यः एकैकेनावदानेन सांनाय्यसवनीयादौ अभ्यञ्जने एकैकवाराञ्जनेन[2] वपने अनेकयजमानके एकैकगोदानसंस्कारेणेन पावने वानेकयजमानकऽएव एकैकवारपावनेनेति । तदुक्तं जैमिनिना (५. २. ३.) मुष्टिकपालावदानाभ्यञ्जनवपनपावनेषु चैकेनेति[3] । एवं प्राप्तऽआह ·

नैककर्मणि सम्बन्धात् ॥११॥ एककर्मणि एकस्मिन्निर्वापकपालोपधानादिरूपे कर्मणि पदार्थे तदवयवेन एकैकमुष्टिना एकैककपालोपधानरूपेणानुसमयो न भवति किंतु चतुर्मुष्टिभिः अष्टभिरेकादशभिश्च कपालैः · न ह्येकैको

---

१) निरुप्ये २. २) °ञ्जनेच २. ३) चैकैकेनेति २.

मुष्टिः पृथक्पदार्थः किं तर्हि चतुर्मुष्टिनिर्वाप एकः पदार्थः । कुतः सम्बन्धात् चतुःशब्दस्य मुष्टीनां च निर्वापसम्बन्धात् · एवं च सह कर्मणानेकगुणविधानं न्याय्यम् · इतरथा चतुःसंख्याया मुष्टिसम्बन्धे मुष्टीनां च निर्वापसम्बन्धे सति वैरूप्यलक्षणो वाक्यभेदः प्रसज्येत अनिर्वापाङ्गं च संख्या स्यात् । वैरूप्यं चैवम् चतुरो मुष्टीन्निर्वपतीत्यत्र निर्वापं प्रति मुष्टीनामुपादेयत्वं विधेयत्वमङ्गत्वं चेति त्रिकम् संख्यां प्रति च तेषामुद्देश्यत्वमनुवाद्यत्वं प्रधानत्वं चेति एतत्परस्परविरुद्धं त्रिकद्वयं मुष्टीनामापद्यते · तस्मात्संख्याया मुष्टीनां चोभयोर्निर्वपतिनैव सम्बन्धः · ये चत्वारस्ते मुष्टयः ये मुष्टयस्ते चत्वार इति परस्परव्यवच्छेद्यव्यवच्छेदकभावोऽरुणैकहायनीन्यायेन द्रव्यस्य गुणावच्छेदकत्वेन गुणस्य च द्रव्यावच्छेदकत्वेनार्थाद्भवति न तु वाक्यात् तेन वाक्यभेदो न भवति । तस्माच्चतुर्मुष्टिनिर्वाप एकः पदार्थः · अङ्गपर्यायो हि पदार्थशब्दः · तेन ययोः प्रधानयोः सहानुष्ठानम् तयोर्यदङ्गं तदेकस्य कृत्वापरस्य कर्तव्यम् · चतुरो मुष्टीन्निर्वपतीति शास्त्राच्चतुर्मुष्टिनिर्वापोऽङ्गम् · स च पदार्थः · तदवयवश्चैको मुष्टिः न पदार्थः · न चावयवेनानुसमयः किंतु पदार्थेन । एवं कपालोपधानादिष्वपि अष्टाकपालमेकादशकपालं निर्वपतीति निर्देशात्तावतामुपधानमेकैकः पदार्थः · द्विरवद्यति त्रिरभ्यङ्क्ते दक्षिणोत्तरगोदानवपने त्रिः पावयतीति च । एवं च संख्यादीनां क्रियाङ्गत्वं च भवति · तस्मात्समुदायेनानुसमय इति सिद्धम् । एवं सर्वत्र पदार्थानुसमये प्राप्ते क्वचित्तदपवादं काण्डानुसमयमाह ·

ग्रहणसादनावदानप्रदानेषु तु वचनात् ॥१२॥ सोमे ग्रहाणां ग्रहणे एकैकस्य ग्रहस्य ग्रहणं सादनान्तं कर्तव्यम् अनेकहविष्के चावदानं प्रदानान्तं कर्तव्यम् वचनात् । वचनं च ऐन्द्रवायवादीनां सादनान्तं पठित्वा अथातो गृह्णात्येवायं वां मित्रावरुणेति (४. १. ४. ७.) अथ मन्थिनं गृह्णातीत्यादिकम् (४. २. १. १०.) । व्यूढछन्दसि द्वादशाहे[1] ग्रहव्यूहे तं गृहीत्वा न सादयतीत्ययं (४. ५. ३. ५.) सादनप्रतिषेधश्चान्यत्र ग्रहणानन्तरं तत्कालमेव सादनं बोधयति । वरुणप्रघासादिषु चानेकहविष्केषु अवदानस्य प्रदानान्तता सर्वेषु प्रधानयागेषु

1) द्वादशाहे २.

पृथक्पृथक्श्रूयते । तुशब्दो विशेषार्थः । एवं सर्वत्रावदाने प्रदानान्ते प्राप्तऽआह ·

न द्रव्यभेदे गुणयोगादिति वात्स्यः ॥१३॥ वात्स्य ऋषिरित्याह · द्रव्याणां पुरोडाशचरुसांनाय्यपश्वादीनां भेदे पृथग्भावे नानात्वे बहुत्वे सत्यपि देवता चेत्समाना भवति यामुद्दिश्य तानि त्यज्यन्ते तर्हि अवदानं प्रदानान्तं न भवति · किंतु सर्वाणि क्रमेणावदाय सकृदेव तेषां प्रदानं कार्यमित्यर्थः । कुतः गुणयोगात् द्रव्याणां यागं प्रति गुणत्वेन संयोगात् अङ्गत्वेन सम्बन्धात् · प्रधानं हि यागः द्रव्याणि चाङ्गभूतानि · तत्र यागश्चेन्न्यायेन सकृदेव सिध्यति तदा यद्यवदानं प्रदानान्तं क्रियते तर्हि गुणानुरोधेन प्रधानावृत्तिः कृता भवति न चासाविष्यते · तस्मात्तत्रावदानं प्रदानान्तं न कर्तव्यम् किंतु सर्वाण्यवदाय सकृत् प्रदेयानि । तद्यथा दर्शेष्टौ दधिपयसोर्यागे सर्वत्र स्विष्टकृद्यागे चानेकद्रविष्के सप्तदशु प्राजापत्येषु च ॥ ॥ अथेदं विचार्यते किं दर्शपूर्णमासचातुर्मास्यपश्वादिके प्रारब्धे अपरिसमाप्ते च सति नियतस्य नियतकालस्याग्निहोत्रपितृयज्ञादेः काले आगते सति किं तन्मध्यऽएव तत्कर्म कर्तव्यमिति । यद्यपि चात्र भिन्नप्रयोगयोः प्रारब्धकर्माग्निहोत्रयोर्न मिथः क्रमोऽङ्गम् तथापि सायंकाले द्वयोः संनिपतितयोरवश्यम्भाविनि क्रमे प्रारब्धं समाप्य अग्निहोत्रे हूयमाने तस्य स्वकालातिपत्तिप्रसङ्गे सति किं युक्तमिति चिन्त्यते । तत्रेष्टिपश्वादिकं[1] च स्वकालादतिपन्नमेव तस्योभयथापि न कश्चिद्विशेषः । अग्निहोत्रस्य तु तस्मिन्काले क्रियमाणस्य उद्धरणस्य लोपः स्यात् उत्कर्षे तु काललोपः तत्र कस्यानुग्रहः कस्य लोप इति चिन्त्यते । तत्रोद्धरणानुग्रहे साङ्गप्रयोगावधारणोत्तरं[2] कालप्राप्तेः कालस्य जघन्यत्वेन बाधः प्राप्नोति · किं च पूर्वस्य व्यवधानं च स्यान्मध्ये क्रियमाणे · तस्मात्कालबाध इति प्राप्तऽआह ·

प्रवृत्ते नियतं दोषविशेषात् ॥१४॥ प्रवृत्ते प्रारब्धे इष्टिपश्वादिके कर्मणि नियतस्य कालऽआगते नियतं नियतकालीनमग्निहोत्रपितृयज्ञादिकं तन्मध्यऽएव कर्तव्यम् · कालस्यानुपादेयत्वेन निमित्तत्वात्तस्मिन्प्राप्तमग्निहोत्रमुद्धरणमनादृत्यापि कर्तव्यम् । कुतः दोषविशेषात् यतो नित्यस्याकरणे दोषो भवति । ननु पूर्वस्य

१) तत्रेष्टिं पश्वा° २. २) ? संग्र° २.

कर्मणो व्यवधानेऽपि दोषोऽस्त्येव · सत्यम् · अक्रियमाणे तु विशेषेण यतो नित्यकर्मणः प्रधानरूपस्याक्रियेति · क्रियमाणे पुनरङ्गभूतानां पदार्थानां व्यवधानमात्रम् न तु कस्य चन लोपः · अत एवोक्तम् दोषविशेषादिति · अपि चासम्बन्धेन [1] व्यवधानेऽपि दोषः · तस्मान्नियतकालीनं कर्ममध्येऽपि कर्तव्यम् ॥

अथेदं विचार्यते । ज्योतिष्टोमे षोडशिनं प्रकृत्याम्नायते तं पराञ्चमुक्थ्येभ्यो विगृह्णातीति [2] · तथेदमपरं श्रूयते तं वै पुरास्तमयादुपाकरोत्यस्तमितेऽनुशंस(ती)ति (४. ५. ३. ११.) · शाखान्तरे च समयाध्युषिते षोडशिनः स्तोत्रमुपाकरोतीति · एवं सति यदि देवादुक्थ्यानामुत्कर्षः स्यात् तदा किं षोडशी नोत्कृष्यते उक्थ्येभ्यः पूर्वमपि प्रागस्तमयात्षोडशिन उपाकरणं कर्तव्यम् · अथवोक्थ्योत्कर्षे सति षोडश्यप्युत्कृष्यते उक्थ्यविग्रहेभ्यः पर एव भवतीति । तत्र पूर्वाधिकरणोक्तन्यायेन नियतकालत्वादनुत्कर्षो युज्यते · तथा सति स्तोत्रस्य कालोऽनुगृहीतो भवति · यदि हि षोडशिग्रहयागाभ्यास [3] उत्कृष्येत ततः प्रधानकालत्वादङ्गानाम् ग्रहं गृहीत्वा चमसं चोन्नीय स्तोत्रमुपाकुर्यादिति वचनात्तदङ्गभूतं स्तोत्रमप्युत्कृष्येत · तत्र पुरास्तमयादिति (४. ५. ३. ११.) विहितः कालो बाध्येत । नन्वनुत्कर्षपक्षेऽप्युपरिभावो बाध्यते बाध्यताम् क्रममात्रं हि तत् कालस्तु बलीयानित्युक्तम् । तस्मादनुत्कर्ष इति प्राप्तऽआह ·

षोडशिनि त्वानुपूर्व्यभूयस्त्वात् ॥१५॥ तुशब्दः पूर्वाधिकरणसिद्धान्तद्वेदे · षोडशिनि तु अनुत्कर्षो न भवति किंतूत्कर्ष एव । कुतः आनुपूर्व्यभूयस्त्वात् आनुपूर्व्यस्य क्रमस्य भूयस्त्वात् महत्त्वात् बलवत्त्वादित्यर्थः · कथम् · तं पराञ्चमुक्थ्येभ्य इति वचनात्षोडशियागाभ्यासस्योक्थ्येभ्य उपरिभावोऽङ्गम् सोऽनुत्कृष्यमाणे प्रधानाङ्गं सद्बाध्येत · न चैतद्युक्तम् · अतोऽङ्गभूतस्तोत्राङ्गस्यैव कालस्य बाध इत्युत्कर्ष एव षोडशिन इति सिद्धम् · निःसंदिग्धं च स्तोत्रस्य संनिहितग्रहयागाङ्गत्वम् । तथा चोक्तं पञ्चमस्य प्रथमपादान्त्याधिकरणे (जैमिनि ५. १. ३२.) तत्सूत्रे न ग्रहणाक्रमानुग्रहार्थमुत्कर्षो विधीयते किं तर्हि यागक्रमानुग्रहार्थम् · तस्य च स्तोत्रं प्रति प्राधान्यमविवादम् अतस्तस्य यागाभ्यासस्य काले-

१) ? वा संब° २. २) See ४. २. ३. ६. ३) °यागा° २.

नाङ्गस्य स्तोत्रकालो बाध्यतऽइति युक्त एवोत्कर्ष इति । किं च अनुत्कर्षे षोडशिनो वैगुण्यम् उक्थ्यविग्रहाणां च उत्कर्षे त्वेकस्य षोडशिन इति अतोऽपि उत्कर्ष एव ॥ इदानीमिदं चिन्त्यते । अथैवं स्वाध्यायविहिते पाठक्रमार्थवत्त्वाच्चाङ्गेषु समिदादिषु क्रमनियमः तथा क्रत्वन्तरेष्वपि तद्वाक्यानामपि हि विवक्षितक्रममेवाध्ययनं स्वाध्यायविधिना विधीयते तस्य च प्रयोजनान्तरं नास्त्यतः क्रमानुष्ठानात् तस्मात्क्रत्वन्तराणामपीष्टिपशुसोमयागादीनां[1] पाठक्रमेणानुष्ठानमिति पूर्वः पक्षः । सिद्धान्तमाह

अनियमः फलसंयुक्तेषु ॥१६॥ फलसंयुक्तेषु प्रधानकर्मसु इष्टिपशुसोमयागाद्यात्मकेषु अनुष्ठाने अनियमः क्रमनियमो न भवतीत्यर्थः । तत्र काम्येषु तावत् न क्रमनियमः अनियमेन हि कामा उत्पद्यन्ते तेषां च नास्ति क्रमः न हि ते वाक्यक्रमेण नियन्तुं शक्यन्ते वस्तुस्वभावस्य निरङ्कुशत्वात् अतोऽनियतक्रमाः कामाः कर्मणामप्यनियमं प्रतिपादयन्तीति तद्बलेन पाठक्रमस्य बाधः । अपि च क्रतूनामनङ्गत्वादेकप्रयोगवचनाभावाच्च नास्ति क्रमः यदि च क्रतवः परस्परस्याङ्गं भवेयुः यदि वा सर्वऽएतेऽन्यस्य कस्यचित्समिदादिवदङ्गं स्युः यदि वा सत्यप्यङ्गत्वे आग्नेयादिवदेकप्रयोगवचनपरिगृहीता स्युः ततः सर्वेषां सहानुष्ठानं बोधयन्प्रयोगविधिः क्रमनियममन्यतोऽपेक्षमाणः पाठनियामकत्वेन गृह्णीयात् न ह्येतदस्ति न च पाठः स्वयमेव क्रमस्य विधायकः अविधायकत्वात् । स्वाध्यायविधिरपि यत्नेन शक्यते कर्तुं तत्र-तत्रैव नियुङ्क्ते । पाठक्रमश्च प्रयोगवचनाकाङ्क्षितक्रमनियममात्रं शक्नोति कर्तुम् न क्रमं विधातुम् तस्माद्भिन्नप्रयोगवचनपरिगृहीतानां न पाठतः क्रमनियम इति सिद्धम् । तर्हि पाठक्रमः किमर्थ इत्यत आह

क्रमो विध्यर्थः कर्मण्यसम्भवात् ॥१७॥ क्रमो विध्यर्थः विधानार्थो जपपारायणाध्यापनादिष्वनेनैव क्रमेण पठनार्थः नानुष्ठानार्थः । कुतः सर्वस्वारेत्यरे कर्मण्यसम्भवात् पाठक्रमेणानुष्ठानासम्भवात् यतः सर्वस्वारो मरणकामस्य विहितः यदि पाठक्रमेणानुष्ठीयते तर्हि सर्वस्वारेण मरणे सिद्धे सति

1) ? °पशुसर्वसोम° २.

कथं तत ऊर्ध्वं कर्माणि कर्तुं शक्यन्ते · तस्मात्क्रत्वनुष्ठाने क्रमनियमो न भवतीति सिद्धम् ॥ ॥ पञ्चमी कण्डिका ॥५॥

अथ पद्धतिः ॥

पदार्थानुष्ठानं सर्वत्र श्रुतिपाठक्रमेण मन्त्रपाठक्रमेण च कर्तव्यम् अर्थसिद्धिक्रमेण च । यत्र च पाठक्रमार्थसिद्धिक्रमयोर्विरोधो[1] भवति यथा स वै पर्णशाखया वत्सानपाकरोति तामाछिनत्तीति (१. ७. १. १-२.) तत्र पाठक्रममनादृत्यार्थसिद्धिक्रम एवाश्रयणीयः · पूर्वं छेदनम् ततो वत्सापाकरणमिति । यत्र श्रुतिपाठक्रमयोर्विरोधः यथा संस्थिते यज्ञे ब्राह्मणं तर्पयितवै ब्रूयादिति (१. ७. ३. २८.) श्रुतिः संस्थिते यज्ञे ब्राह्मणतर्पनं विदधाति पाठक्रमस्तु प्राशित्रावदानात्पूर्वम् तत्र श्रुतिक्रमेण संस्थितऽएव कर्तव्यम् न पाठक्रमेण । यत्र च श्रुतिपाठमन्त्रपाठयोर्विरोधो भवति यथा सोऽसावाज्यमधिश्रयतीत्यधिश्रयणं विधाय तत्समनन्तरमेवोद्वासनं विदधाति तत्पुनरुद्वासयतीति (१. २. २. ६.) मन्त्रक्रमस्तु पत्नीसंनहनान्ते विष्णोर्वेष्योऽस्यूर्जे त्वादब्धेनेति (१. ३०.) तत्र श्रुतिपाठक्रममनादृत्य मन्त्रपाठक्रमेणैवाज्योद्वासनं कर्तव्यम् ॥ ॥ अथ यत्र बहूनां प्रधानानां सकृत्प्रयोगो भवति तदा संनिपत्योपकारकाः पदार्थाः सर्वेषां प्रधानानां पृथक्पृथक् सदृशपदार्थानुसमयेन कर्तव्याः · तद्यथा सप्तदशसु प्राजापत्येषु पशुषु सर्वेषां प्रथममुपाकरणम् ततः सर्वेषां नियोजनम् ततः सर्वेषां प्रोक्षणमिति · यथा बहुषु हविःषु सर्वेषां प्रथममभिघारणम् ततः सर्वेषामुद्वासनम् ततः सर्वेषां प्राणादानम् ततः सर्वेषामासादनम् ततः सर्वेषामालम्भ इति · आरादुपकारकास्तु तन्त्रेण भवन्तीति न तेषु क्रमचिन्ता । चतुर्मुष्टिकनिर्वापस्यैकपदार्थत्वम् एकादशकपालोपधानस्य च · तेनैकैकमुष्टिना एकैककपालोपधानेन च नानुसमयः किंतु प्रतिप्रधानं चतुर्मुष्टिको निर्वापः उक्तसंख्यकपालोपधानं चैकैकस्य कर्तव्यम् · सोमे चैकैकस्य ग्रहस्य ग्रहणं सादनान्तं कर्तव्यम् · सर्वत्र हविषोऽवदानं प्रदानान्तं कर्तव्यम् · अत्र वचनात्काण्डानुसमय एव न पदार्थानुसमयः । तथा हविर्मात्रभेदे देवतायामभिन्नायां देवतागुणे चोपांश्वादिके अभिन्ने अवदानं

[1]) °मार्थक्रम° १. २.

प्रदानान्तं न भवति किंतु क्रमेण सर्वाणि हवींष्यवदाय ततः प्रदानं कार्यम्· यथा वाजपेये सप्तदशसु प्राजापत्येषु दर्शेष्टौ दधिपयसोश्च स्विष्टकृद्यागे चानेकहविष्के ॥ तथा बहुषु प्रधानेषु सप्तदशप्राजापत्यपश्वादिषु प्रथमस्य पदार्थस्य सर्वेषुनियमः· प्रथमे पदार्थे उपाकरणलक्षणे कृते द्वितीयपदार्थादौ उपाकरणक्रम एवाश्रयणीयो न क्रमान्तरम्· अयं प्रावृत्तिकः क्रमः। तथा मुख्यानां प्रधानानामग्नियादीनां पाठक्रमेण तदङ्गानां निर्वापादीनां क्रमो भवति यथा प्रथमं पठितस्याग्नेयस्य प्रथमं निर्वापादि पश्चात्पठितस्याग्नीषोमीयस्य पश्चादिति· अयं मुख्यः क्रमः ॥ दर्शपूर्णमासादावनेकाहःसाध्ये कर्मणि क्रियमाणे मध्ये नित्यस्याग्निहोत्रादेः काले आयाते मध्येऽपि तत्कर्म कर्तव्यमेव तस्य कालातिक्रमो न कार्यः। एवं पशुचातुर्मास्यसौत्रामण्यादौ ज्ञेयम्। अमावास्यायां सौत्रामण्यादिविकृतिमध्यऽएव पिण्डपितृयज्ञानुष्ठानं कर्तव्यम् तद्दक्षिणाग्नौ। तथा षोडशयतिरात्रादौ षोडशिनो नियतकालत्वेऽपि दैवाडुक्थ्योत्कर्षे उक्थ्यानन्तरमेव षोडशियागो भवति न कालानुरोधात्ततः पूर्वम् ॥ अग्निष्टोमादीनां प्रधानकर्मणां सत्त्रपर्यन्तानां हविर्यज्ञानां वानुष्ठाने क्रमनियमो नास्ति· यदा यस्येच्छा तदा तदनुष्ठीयते· अध्ययनार्थ एवैषां पाठक्रमो नानुष्ठानार्थः सर्वस्वाराद्दूर्ध्वं पठितेषु पाठक्रमेणानुष्ठानासम्भवात् ॥ ॥५॥

इति प्रथमस्य पञ्चमी कण्डिका ॥ ॥

इदानीमिदं विचार्यते किमवत्तस्योद्धृतस्य ह्यवदानमात्रस्य[1] नाशे हविरन्तरमुत्पाद्यते उत तस्मादेव हविःशेषात्पुनरवदेयमिति। तत्र सूत्रेणैव प्रथमं सिद्धान्तमाह·

अवत्तनाशेऽन्यद्गुणानुग्रहात् ॥१॥ अवत्तस्य पुरोडाशचर्वादेः सकाशात्पृथक्कृतस्यावदानद्वयमात्रस्य नाशे अन्यद्धविरुत्पादनीयम् यागार्थम्। कुतः गुणानुग्रहात् एवं कृते मध्यपूर्वार्धावदानरूपेण गुणेनाङ्गेन साधनभूतेन यागोऽनुगृहीतो भवति। यदि पूर्वहविःशेषादेव पुनरवदाय यागः क्रियते तदा तस्य

---

1) ?दानस्य मात्रस्य २.

पूर्वार्धविकलत्वाद्विगुण एव यागो भवेत् · कथम् · अवदानस्यैव यागार्थत्वपक्षे तस्य विनष्टत्वादवशिष्टस्यायागार्थत्वात् समस्तपुरोडाशस्य यागार्थत्वेऽपि अवदाननाशेन तस्य विकलत्वात् · न चासौ यागो विगुण इष्यते · तस्माद्धविरुत्पाद्यमेवेत्याद्यमुद्धृतावदाननाशे · इति प्राप्तऽआह ·

न पूर्वशेषात् ॥ २ ॥ यदुक्तम् अवत्तनाशेऽन्यदुत्पादनीयमिति तन्न किं तु पूर्वशेषात् पूर्वस्यैवावशिष्टस्य हविषः शेषात्पुनरवदेयम् । कुतः विनष्टेऽपि अवदाने पुनर्मध्यपूर्वार्धसम्भवात् तावन्मात्रस्य च शास्त्रार्थत्वात् · पुरोडाशस्य यौ मध्यपूर्वार्धावयवौ तदपादानकं तदवयवभूतमवदानद्वयं यागसाधनम्[1] · नष्टे च मध्ये पूर्वार्धावयविनि पूर्वसकलरूपे पुरोडाशे यो मध्यावयवः पूर्वार्धावयवश्चावदानापादानभूतः स एवावदानापेक्षयावयवी · तस्मिन्नवदानोद्धरणेन विनष्टेऽपि मध्यान्तरस्य पूर्वार्धान्तरस्य चावदानद्वयोपलक्षणत्वेन विद्यमानत्वात्तत एव पुनरवदेयम् । ननु कृत्स्नस्य मध्यपूर्वार्धेऽवदेयम्[2] न विकलस्येति चेत् · तन्न · कुतो ऽशास्त्रार्थत्वात् · मध्यादवद्यतीत्येतावदेव श्रूयते न तु सकलस्य सकलपुरोडाशस्य[3] मध्यादिति । तस्मात्पूर्वशेषादेवावदेयम् ।

अचोदितत्वाच्च ॥ ३ ॥ किं च अवत्तावदाननाशे अन्यद्धविरुत्पादनीयमित्येवमचोदितत्वात् कुत्राप्यविहितत्वात् पूर्वशेषादेवावदेयम् ।

स्विष्टकृद्वदानुपूर्व्ययोगात् ॥ ४ ॥ अपि च शेषादवदीयमाने तद्धविः स्विष्टकृद्वद्भवति · स्विष्टकृदस्यास्तीति स्विष्टकृद्वत् । अन्यस्मिन्हविष्युत्पादिते तु इदं पूर्वहविः स्विष्टकृद्वन्न भवति · न हि तदा ततः स्विष्टकृदर्थमप्यवदानं गृह्यते किंतु नूतनोत्पादितादेव । कुतः आनुपूर्व्ययोगात् यतः स्विष्टकृदवदानस्यानुपूर्व्ययोगः क्रमयोगोऽस्ति · प्रधानावदानानन्तरं हि ततः स्विष्टकृदर्थमवदानं भवति · यदि च प्रधानावदानमेव[4] पूर्वस्मान्न गृह्यते स्विष्टकृदर्थमपि ततो न गृह्यते · ततः पूर्वस्य हविष उत्पत्तिर्व्यर्थैव स्यात् · शेषात्तु प्रधानार्थेऽवदीयमाने स्विष्टकृदर्थमपि ततोऽवदीयतऽएवेति पूर्वहविः स्विष्टकृद्वदिति पूर्वपक्षे गुणः । अथोक्तमेव सिद्धान्तं द्रढयति ·

१) °धन २· धनः २· २) ? °र्धेऽवदेये २· ३) ? सकलस्यासकलपुरोडा° २· ४) प्रदाना° २·

गुणहानौ तु शेषभावात् ॥५॥ तुशब्दः पक्षव्यावृत्तौ · गुणहानौ इति गुणस्य यागं प्रति गुणभूतस्य यागसाधनभूतस्य ह्यवदानस्य हानिर्गुणहानिः · ह-विषो मध्यपूर्वभागस्य यागं प्रति गुणभूतस्य यागसाधनभूतस्य हानौ सत्यां नाशे सति न पूर्वशेषादवदेयम् । कुतः शेषभावात् शेषत्वादेव तस्यावशिष्टस्य शेष-कार्यार्थत्वादित्यर्थः । कृत्स्नस्य हि पुरोडाशस्य यो मध्यदेशस्तदपादानको यस्तस्यो-परितनोऽङ्गुष्ठपर्वमात्रोऽवयवः सोऽवदातव्यः अन्यस्त्ववदेयस्यापादानभूतः न त्वसाववदातव्यः · स स्विष्टकृदादिशेषकार्यार्थो न प्रधानकार्यार्थः · अतो नासौ हविः · यत्तु हविस्तद्विनष्टम् · तद्विनाशे च हविरन्तरमेवोत्पाद्यम् । यदा च ह्यवदानस्यैव यागार्थता ततस्तद्विनाशे शेषस्य कार्यार्थत्वाभावात् द्रव्यान्तरं या-गार्थमुत्पाद्यम् । यदापि समस्तपुरोडाशसाध्यो यागस्तदापि ह्यवदाननाशे तस्य विकलत्वादविकलं हविरन्तरमुत्पाद्यम् । तस्मात्साधूक्तम् अवत्तनाशेऽन्यदिति । तदुक्तम् संस्काराणां पुरोडाशे ह्यवदानं प्रयोजकम् तद्विनाशाच्च नष्टास्ते नावदेयमतस्ततः गृहीतौ मध्यपूर्वार्धौ तौ च नष्टावुभावपि अतः शेषस्य शेषत्वात्प्रधानत्वं न युज्यतऽइति ॥ ॥ अथेदं चिन्त्यते । इन्द्राग्निसोमादिदेवता-नामाहवनीयादीनामग्नीनां मन्त्राणामिषे-त्वेत्यादीनां क्रियाणामदृष्टार्थानां प्रयाज-प्रोक्षणादीनामस्मरणादिना अपचारे किं देवतान्तरमग्न्यन्तरं शब्दान्तरं क्रियान्तरं च प्रतिनिधेयम् उत नेति । पूर्वेण न्यायेन प्रतिनिधौ प्राप्तऽआह ·

न देवताग्निशब्दक्रियाः परार्थत्वात् ॥६॥ देवता अग्न्यादिकाः अग्नय आहवनीयादयः शब्दो मन्त्रः क्रियाः प्रोक्षणप्रयाजादिका अदृष्टार्थाः । दृष्टार्थेषु त्ववघातादिष्वस्त्येव प्रतिनिधिः नखनिर्लुण्ठनादिभिरपि[1] तत्कार्यसिद्धेः । तदे-तेषां देवतादीनामस्मरणादिना अपचारे प्रतिनिधिर्न भवति । कुतः परार्थत्वात् अदृष्टार्थत्वादित्यर्थः · प्रतिनियतानि ह्येषामदृष्टानि · तथा हि · यत्र हि प्रतिनि-धीयमानं मुख्यस्य कार्यं साधयति तत्र प्रतिनिधिः न विह तथा सम्भवति । देवता तावद्विधिलक्षणा न त्वन्या आनीयमाना[2] देवता भवति न चाद-वतायै संकल्पमाने यागो भवति · अतो न देवताकार्यमन्यतः सम्भवति · अतो

---

1) °निर्लुचना° Çâstradîpikâ at Jaim. ६. ३. २६. 2) आहवनीयमाना २.

ऽग्न्यादिके विधिशब्दे विस्मृते तदर्थवाचकं शब्दान्तरमर्थान्तरवाचकं वा न प्रतिनिधातव्यम् · एवं च गत्यभावाद्यागस्यापि लोपः · न हि त्यागमात्रं यागः किंतु देवतोद्देशेन त्यागः तेनासत्यां देवतायां प्रधानस्यैव यज्ञार्थस्य[1] स्याल्लोपः · किं च सदृशं प्रतिनिधातव्यम् देवताया अभावश्च शब्दनाशे शब्दद्वारेण च देवतात्वम् अतो मुख्यदेवताशब्दं स्मृत्वोत्तरकालं तत्सदृशशब्दस्य स्यादुपादानम् न ह्यस्मृते मुख्ये तत्सदृशो बुद्धावारोपयितुं शक्यः न च स्मृतस्य मुख्यस्य परित्यागो युक्तः · तस्माद्देवताया न प्रतिनिधिरिति । तथाग्निरप्याहवनीयादिरदृष्टार्थो विनाप्याधारेण प्रक्षेपसम्भवात् · न चाहवनीये प्रक्षेपे कृते यददृष्टं तदन्येन सिध्यतीति प्रमाणमस्ति · तस्मादग्नीनां न प्रतिनिधिः · नीवारादिना तु पुरोडाशनिष्पत्तिः प्रत्यक्षत एव दृश्यते । मन्त्रस्तु यद्यपि पदार्थप्रकाशनार्थत्वाद्दृष्टार्थः तथापि तस्य ध्यानादपि सिद्धेर्न[2] मन्त्रान्तरं प्रतिनिधेयम् · अत्र अर्थेन स्मृतेन प्रयोजनमस्ति न मुख्येन मन्त्रेण नापि तत्सदृशेन शब्दान्तरेण · अवश्यं हि मन्त्रार्थप्रतिपादकं शब्दान्तरं प्रतिनिदधता येन केनचिदुपायेनार्थः प्रथमं स्मर्तव्यः तदभावे तत्प्रतिपादकशब्दान्तरोपादानासम्भवात् · ततश्च सिद्धे स्मरणे न प्रतिनिधिना कार्यम् स्मरणार्थमेव हि प्रतिनिधीयते · न च शब्देन स्मरणं कर्तव्यमिति वचनमस्ति किं तर्हि मन्त्रविशेषाम्नानसामर्थ्यादुपद्रष्ट्राद्युपायनिवृत्तिः[3] असति च मन्त्रे उपद्रष्ट्रादि[4] केन वार्यते · अतो नास्ति शब्दान्तरं प्रतिनिधिः · ये तु मन्त्रनियमकृतम् यददृष्टं न तदन्येन सिध्यतीत्यप्रतिनिधिमाहुः तेषां व्रीह्याद्यपचारेऽपि तत्कृतनियमादृष्टस्यान्यथासिद्धेर्द्रव्यान्तरप्रतिनिधिर्न सिध्येत् । क्रियाया अपि प्रतिनिधिर्न भवति · यत्प्रयाजादिभिरदृष्टं क्रियते तदन्या क्रिया करिष्यतीति[5] नास्ति प्रमाणम् · हत्यादीनां तु दृष्टार्थत्वात् द्रव्यवदस्त्येव प्रतिनिधिः क्रियाग्रहणं त्वदृष्टार्थक्रियाभिप्रायमिति ॥

कामं देवताम् ॥७॥ योऽग्निशब्दक्रियाः प्रतिनिधत्ते स कामं स्वेच्छया देवतामपि प्रतिनिदध्यात् · अकामानुमतौ काममित्यमरः (३. ४. १३.) । अग्निशब्द-

१) ? यज्ञ्यर्थस्य २. २) ? सिद्धेन २. ३) ? °म्नातसामर्थ्याउपद्रष्टाद्यु° २. ४) ? उपद्रष्टादि २. ५) तदन्या क्रिया करिष्यत्तीति २.

क्रियाणामप्रतिनिधेयत्वस्य दृढीकरणार्थमिदं सूत्रम् यतो देवतायाः प्रतिनिधिः सर्वथा न सम्भवति · न हि ऐन्द्रे हविष्यग्निर्देवता भवति न हि जात्या काचिद्देवतास्ति वैदिके कर्मणि · या यत्र विधीयते सा तत्र देवता · तेनान्यत्रान्या देवतैव भवति अविहितत्वात् ।

प्रतिषिद्धं प्रत्यवायात् ॥ ८ ॥ नेत्यनुवर्तते । यद्द्रव्यं कोद्रवमाषवरटादि प्रतिषिद्धं न तत्प्रतिनिधेयम् । कुतः प्रत्यवायात् यतः प्रतिषेधातिक्रमे प्रत्यवायो भवति · तथा हि अयज्ञिया वै कोद्रवा अयज्ञिया वै वरटका अयज्ञिया वै माषा इति प्रतिषिद्धयज्ञसाधनभावा माषादयः । मौद्गे चरौ मुद्गानामभावे सादृश्यान्माषाः प्राप्नुवन्ति श्यामाकचरौ च कोद्रववरटकाद्या इति · अत्र माषाद्याः प्रतिनिधित्वेन ग्राह्या न वेति संदेहः · तत्र यज्ञाङ्गत्वं माषादीनां प्रतिषिध्यते प्रतिनिधित्वे तु न माषस्य यज्ञाङ्गत्वम् किंतु तद्गतस्य मुद्गाद्यंशस्य [1] अतः प्रतिनिधेया माषादय इति चेत् · मैवम् · अयज्ञिया इत्यनेन यज्ञार्हतामात्रं प्रतिषिध्यते प्रतिनिधित्वे चावर्जनीयं साधनत्वम् · अतो न माषादीनां प्रतिनिधित्वम् । तदुक्तम् व्रीहिर्यवो वा श्यामाको नीवारो वा हविर्भवेत् वेणुयवा मसूरं वा शाकं मूलं फलं जलम् सत्यं वा हविरेतेषु यथासम्भवमाचरेत् प्रतिनिध्यन्तरवत्सत्यं विज्ञेयं हविरत्यये प्रधानदेवतोद्देशात्संत्यजेत्सत्यमात्मनः अतोऽन्यदपि वा ग्राह्यं सदृशं धान्यमात्रकम् न ग्राह्यं सर्वथा माषवरकोदारकोद्रवम् यद्वा व्रीहियवाभावे तुषतण्डुलयोगिनीः ओषधीः परिगृह्णीयादणुकोद्रववर्जिताः ग्राम्याणां वा भवेद्ग्राम्यमारण्यानामरण्यजम् यवाभावे तु गोधूमास्ततो वेणुयवादय इति ॥ ॥ अथेदं विचार्यते · प्रोषिते कार्यान्तरव्यापृते मृते वा यजमाने तत्स्थाने किं याजमानपदार्थकरणाय पुरुषान्तरं प्रतिनिधेयमुत नेति · तत्र व्रीह्याद्यपचारऽइव प्रतिनिधौ प्राप्तऽआह ·

स्वामी फलयोगात् ॥ ९ ॥ नेत्यनुवर्तते । स्वामी यजमानो न प्रतिनिधेयः । मृते तावत्कः पुरुषान्तरं प्रतिनिदध्यात् को वाध्वर्य्वादीन्प्रवर्तयेत् [2] स्वयं प्रवर्तमानेषु च तेषु न मृतस्याकर्तुः फलं सिध्यति · यदि तु प्रतिनिहितो

---

1) व्रीह्याद्यंशस्य Çâstradip. at Jaim. ६. ३. १८. 2) Thus also the Çâstradip.

दक्षिणादानं द्रव्यत्यागं च करोति तदा तस्य सम्यक्फलसम्बन्धान्मुख्य एव स्वामी स्यान्न प्रतिनिधिः · पत्नी त्वस्वतन्त्रा अनग्निश्च मृते पत्यौ पुरुषान्तरं प्रतिनिधाय प्रयोक्ष्यतीत्यनाशङ्कनीयमेव · प्रोषिते अन्यत्रव्यापृते[1] वा यजमाने ये तावत्क्रत्वर्था आज्यावेक्षणादयः तेषु यथासमाख्यमध्वर्य्वादय एव कर्तारो विद्यन्तऽइति न प्रतिनिधिना कार्यम् · पुरुषसंस्काराणां च ऋत्विग्वरणादीनां क्रत्वर्थत्वात् विनापि यजमानेन नास्ति वैगुण्यम् पत्न्या अपि तदनुष्ठानसम्भवात् · यानि च ब्रह्मचर्यादीनि फलं प्रति योग्यतायाः कारणानि तानि बहिरवस्थितेनापि यजमानेन क्रियमाणानि क्रतोरुपकारकाण्येव · तस्माद्विदबन्धनाज्यावेक्षणादावध्वर्य्वादेर्विद्यमानत्वादितरत्र[2] ब्रह्मचर्यादावसम्भवात्प्रतिनिधेरनुपपन्नो यजमानप्रतिनिधिः । कुतः फलयोगात् न हि पुरुषान्तरेण क्रियमाणानि ब्रह्मचर्यादीनि यजमानस्य फलयोग्यतां सम्पादयन्तीत्यसम्भवः प्रतिनिधेः · तस्मान्न प्रवासादिनापचरिते स्वामिनि तत्स्थाने स्वाम्यन्तरं प्रतिनिधेयमिति । ननु[3] पत्न्यां मृतायां किमस्ति प्रतिनिधिरुत नेति नायमस्याधिकरणस्य विषयः · तदापि हि यदा तावत् भार्यायै पूर्वमारिण्यै दत्वाग्नीनन्त्यकर्मणीत्ययं (मनु॰ ५. १६८.) पक्षः समाश्रीयते तदाग्न्यभावादेवानधिकारः[4] सिद्धः · यदा तु नाग्नयः पत्न्यै दत्ताः तदाप्याचारप्रामाण्यान्नापत्नीकस्य[5] दर्शपूर्णमासाद्यनुष्ठानम् · अग्निहोत्रमात्रं तु वचनादनुष्ठीयते तदाप्यपत्नीकोऽप्यग्निमाहरेदिति[6] वचनात् · वचनान्नास्ति पत्न्याः प्रतिनिधिरिति तन्त्ररत्ने ।

गुणेषु प्रतिनिधिः परार्थत्वात् ॥१०॥ गुणेषु क्रत्वर्थेषु गुणपदार्थेषु पात्रासादनाग्न्यन्वाधानवेदबन्धनादिषु स्वामिनोऽपि प्रतिनिधिर्भवति · यथासमाख्यमध्वर्य्वादिरेव तत्तत्करोतीत्यर्थः । कुतः परार्थत्वात् पात्रासादनादीनां क्रत्वर्थत्वात् क्रत्वर्थानि ह्येवमादीनि वपनादिवद्यजमानसंस्कारार्थानि · अतः परार्थत्वादेवमादिषु[7] क्रत्वर्थेषु स्वामिनोऽपि प्रतिनिधिर्भवति ॥ ॥ अथेदं विचार्यते । सप्तदशावराश्चतुर्विंशतिपरमाः सत्त्रमासीरन्निति · तत्र सप्तदशप्रभृतिषु सत्त्रगणयागाद्यर्थ

1) Thus २. अन्यव्यापृते २. and Çâstradip. at ६. ३. २०. 2) ? °द्विदबंध्याज्या° २. See p. १०१. not. १. 3) ? अनु २. 4) °ग्न्यभावेदेवानाधि° २. 5) °न्नापत्नीकस्य २. 6) ? तदाजरपत्नीको Ait. Br. ७. ९. 7) ? पदार्थादेव° २.

प्रवृत्तेषु यदा कश्चिन्म्रियते तदा तत्स्थाने अन्यः प्रतिनिधेय उत नेति · तत्र पूर्वाधिकरणन्यायेन स्वामिनः प्रतिनिधिर्न भवतीति प्राप्तऽआह ·

सत्त्रेषु तु श्रुतेः ॥ ११ ॥ तुशब्दः पूर्वाधिकरणसिद्धान्ताद्विदमाह · सत्त्रेषु स्वाम्यपि प्रतिनिधीयते यजमानस्यापि प्रतिनिधिर्भवति । कुतः श्रुतेः अथ यदि संदीक्षितानां प्रमीयेत तस्य यो नेदिष्ठी स्यात्तमुपदीक्ष्य तेन सह यजेरन्निति श्रवणात्[1]। काम्यमपि यत्प्रारब्धं तदवश्यं समापनीयमित्युक्तम् आवश्यकत्वाच्च यथाशक्ति प्रयोक्तव्यम् · अतो यद्यपि ये यजमानास्तऽऋत्विज इति यजमानशब्दस्य स्वामिभूतकर्तृवचनत्वात् एकशब्दोपात्तयोश्च स्वामिकर्तृत्वयोरार्त्विज्योद्देशेन विधिसम्भवात् स्वामिभिरेवार्त्विज्यं कर्तव्यम् तथापि स्वामिगता[2] सप्तदशादिसंख्या तत्राङ्गम् तया विना च वैगुण्यम् अतस्तत्सम्पादनाय पुरुषान्तरं प्रतिनिधेयम् । ननु स्वामिगता सप्तदशादिसंख्या न चानीतः स्वामी · कथम् · यो ह्यारभ्य समापयति तस्य सकलकर्तुः फलं भवति स च स्वामीत्युच्यते अयं पुनर्मध्ये प्रविष्ट एकदेशकर्ता[3] न फलं प्राप्तुमर्हति · न चासौ विधिवशात्प्रवृत्तो येन विधिवशात्प्रामाण्यात्फलं लभेत · न हि यः प्रतिनिधीयते तस्य कर्तव्यतया कर्म विहितम् यदस्मिन्फलेन प्रयुज्येत · इतरैरिह स्वामिभिः प्रारब्धमवश्यं समापनीयमित्याचारानुमितविधिवशेनासौ सोमादिभिः संख्यासम्पत्त्यर्थमृत्विक्स्थानीय आनीतस्तस्मान्नास्य स्वामित्वम् · तेनाशक्यैव स्वामिगता सप्तदशसंख्योपपादयितुमिति · उच्यते · स्वामिता[4] तत्स्थानीयस्य न भविष्यति न हि सा शक्या कर्तुम् · इदं तु वक्तुं शक्यम् ये ऋत्विजां पदार्थास्तऽइह सप्तदशावरैः कर्तव्या इति · एतावच्चोपपादितं भवति · अतो यद्यप्यानीयमानः स्वामिगतां संख्यां न पूरयति तथापि तु यो म्रियते तस्य यः पदार्थः कर्तव्यस्तस्मिन्कर्तृत्वं शक्नोति प्रतिपत्तुम् · न हि स्वामिसाप्तदश्यं न भवतीत्येतावता सम्भवदपि कर्तृसाप्तदश्यं[5] हातव्यं भवति · अतः स्वामित्वमात्रं त्यक्त्वा कर्त्रंशे साप्तदश्यं सम्पादयितुं सत्त्रे मृतस्य दीक्षितस्य स्थाने पुरुषान्तरं प्रतिनिधेयम् ॥ मृतस्य च फलं श्रूयते यो दीक्षितानां प्रमीयेतापि तस्य फलमिति । तदुक्तं जैमिनिना (६. ३. २४.) तस्मिंश्च फल-

1) See २५. १३. २८. 2) ?? °व्यं स्वामिगता हि २. 3) ? °देककर्ता २. 4) स्वामिना २. 5) ? कर्तृत्वं सा° २.

दर्शनादिति तस्मिन्मृते · अपि तस्य फलमिति मृतस्य फलं दर्शयन्प्रतिनिहिते नास्ति फलमिति दर्शयति · न चेदं फलपरम् किं तर्हि फलसद्रूपोऽयमर्थवादः पर्णमय्यधिकरणन्यायात् [1]। अथ मा भूदिदं मृतस्य फलपरम् · सत्त्रमासीरन्निति तु विधितः प्रवृत्तस्यापि किमिति फलं न भवतीति चेत् · न · सत्यपि फले मृतस्य समाप्त्यभावात् · अपिशब्दस्यायमर्थः । ऋद्धिकामाः सत्त्रमासीरन्निति तु विधिप्रमितं फलम् तत्तावदेकस्मिन्मृते सर्वेषां विपन्नमेव स्वामिसंख्याहान्या विगुणात्काम्यात्फलानुत्पत्तेः । प्रारब्धं समापयेदिति तु विध्यन्तरप्रमितफलेच्छयावशिष्टाः सत्त्रिणः प्रवर्तन्ते न च मृतस्य तत्र प्रसङ्गोऽस्तीति · अथ सत्त्रविधितः प्रतीतमेव फलं विगुणादपि निष्पद्यते तथापि न मृतस्य फलप्राप्तिः सकलाननुष्ठानात् · न हि प्रारम्भमात्रात्फलं भवति · इतरस्य च प्रतिनिहितस्य न केवलं सकलाननुष्ठानात् · कर्मकरत्वादपि विधिवशेन परप्रेरितस्य च ऋत्विग्वद्वर्तमानत्वादपि नास्ति फलसम्बन्धः इति तन्त्ररत्ने । अन्ये तु वचनात् मृतस्य फलमेतदित्याहुः · न हि न्यायो वचनं बाधितुमिष्टो [2] नास्ति वचनस्य किंचिद्दुःकरमिति ॥ ॥ अथेदं चिन्त्यते सत्त्रे योऽयं प्रतिनिहितस्तस्य तत्फलयोग्यताहेतवो वपनाभ्यञ्जनाद्यञ्जनादयो यजमानधर्मा न भवन्ति उत भवन्तीति · तत्र स्वामिधर्माणां फलप्रतिग्रहणयोग्यत्वापादकत्वात् प्रतिनिधेश्च फलप्रतिग्रहाभावात् स्वामिधर्मा न भवन्तीति प्राप्तेऽभ्याह ·

स तद्धर्मा कर्मयोगात् ॥१२॥ स सत्त्रे प्रतिनिहितो नेदिष्ठी तद्धर्मा स्वामिधर्मा भवति स्वामिनो धर्माः संस्कारा वपनादयस्तस्य भवन्तीत्यर्थः । कुतः कर्मयोगात् स्वामिकर्मणा हि त्यागादिना स युज्यते अतस्तत्संस्कारसंस्कृतेनैव तत्कर्मानुष्ठानं युक्तम् · यद्यप्यस्य फलाभावात्फलिनः संस्कारा न प्राप्नुवन्ति [3] तथाप्यस्मिन्संस्कृते सत्यन्येषां यत्सप्तदशत्वम् तत्संस्कृतेषु सप्तदशसु स्थितं भवति · ततः सप्तदशावराः सत्त्रमासीरन्नित्येतच्छास्त्रमनुगृहीतं भवति अन्यथा संस्कृताः षोडशैवेति शास्त्रं बाध्येत । यदि बहूनां यजमानानामलाभादवरा अल्पसंख्या यजमाना स्युस्तदापि सप्तदशापेक्षिताः न तु ततोऽप्यल्पसंख्या

1) ?!? पर्यामप्यधिक° २· 2) °भीष्टो २· 3) ? °स्कारान्प्राप्नु° २·

इत्यर्थः · अत इतरेषां फलप्राप्तेर्यथोपक्रान्तकर्मानुष्ठानसाध्यत्वात् सप्तदशकर्तृकस्य
ब्रह्मचर्यादेः स्वकार्यसाधनत्वात् तत्सिद्ध्यर्थं प्रतिनिहितोऽपि ब्रह्मचर्यवपनादिस्वा-
मिधर्मान्कुर्यात् इतरथा कर्तृसंख्यालोपादितरेषां ब्रह्मचर्यादेः स्वकार्यं न सि-
ध्येत् · तस्मात्स्वामिधर्मा नेदिष्ठी ॥ ॥ अथेदं विचार्यते सत्त्रेषु किं त्रयाणां
वर्णानामधिकारः उत ब्राह्मणानामेवेति । तदर्थं च किम् ये यजमानास्तेऽऋ-
त्विज इत्येनेन आर्त्विज्यं यजमानसंस्कारत्वेन[1] विधीयते उत यजमाना आर्त्वि-
ज्याङ्गत्वेन । तत्र ऋद्धिकामादिवाक्येषु विशेषाश्रवणात्त्रिषु वर्णेषु प्राप्तेषु यच्छब्देन
तानुद्दिश्य तेषां संस्कारार्थमार्त्विज्यमुच्यते ये यजमानास्तेऽऋत्विज इति · अत्र
यजमानर्त्विक्शब्दयोः पृथगर्थत्वेन सिद्धयोः सामानाधिकरण्यमुपपत्त्यैकेन लक्षणा-
र्थेन भवितव्यम् · तत्र मुख्यत्वाद्यजमानशब्दः श्रुतिवृत्तः जघन्यत्वादृत्विक्शब्दो
लक्षणार्थः · ये हि परार्थमृतौ यजन्त्यध्वर्य्वादयस्तद्वाचकमृत्विक्पदमस्मिन्वाक्ये
तस्य च स्वामिवचनेन यजमानपदेन मुख्यसामानाधिकरण्यासम्भवात्कार्यलक्षणा
भवति · ये परिक्रीतकर्तृत्वेन प्रकृतितः प्राप्ताः पदार्थास्तेषु यजमानाः कर्तारः स्यु-
रिति । न चैवमृत्विक्कर्तृकत्वं शङ्कनीयम् यजमानानामेव कर्तृणां मुख्यर्त्विक्त्वोप-
पत्तेः · न हि वरणभरणजन्यमदृष्टमृत्विक्त्वम् आनमनार्थत्वाद्वरणभरणयोः अदृ-
ष्टार्थत्वे तु सत्यृतुयाज्या वरणवत् · सत्त्रेऽपि वरणभरणे कर्तव्ये स्याताम् ·
तस्मान्न वरणभरणनिमित्तमृत्विक्त्वम् किंतु क्रतुयजननिमित्तम् · अतः सत्त्रेऽपि
सत्यृत्विजस्तद्विशेषाश्चाध्वर्य्वादयः सन्त्येव · ते तु यजमाना एव नान्ये · वचनेन
हि परकर्तृकत्वेन प्राप्तानां पदार्थानां यजमानकर्तृकत्वमनेन विधीयते · यच्छब्दत-
च्छब्दौ यथाश्रुतमुद्देश्यप्रतिनिर्देशकौ[2] · इति स्थिते को वाक्यार्थ इति चिन्त्यते ·
तत्र सर्ववर्णानां यजमानानामुद्दिष्टप्रतिनिर्दिष्टानामार्त्विज्यं संस्कारत्वेन विधीयते
प्रधानं ह्युद्देश्यं भवति यच्छब्दयुक्ताश्च यजमाना उद्देश्या इति तेषामेव प्राधान्यम् ·
तेन यथा ब्राह्मणानां यजमानानामेव सतां वचनप्रामाण्यादार्त्विज्यम् एवमि-
तरयोरपि वर्णयोः प्रधानभूतैरेव यजमानैः क्रियमाणमार्त्विज्यं न गुणभूतान्कर्तॄन-
पेक्षते · गुणकर्तृपरिच्छेदेन ब्राह्मण्यमार्त्विज्याङ्गम् तदभावे तदपि द्वाराभावान्न

---

1) Thus the Çástradíp. at Jaim. ६. ६. १५. °स्कारत्वेन २. 2) ? °देशप्र° २.

सत्त्रे प्राप्नोति · तस्मात्त्रयाणामधिकार इति पूर्वपक्षः । सिद्धान्तमाह ·

सत्त्राणि ब्राह्मणानामृत्विक्श्रुतेः ॥ १३ ॥ सत्त्राणि द्वादशाहादीनि ब्राह्मणानामेव भवन्ति न क्षत्रियवैश्ययोः । कुतः ऋत्विक्श्रुतेः ये यजमानास्तऽऋत्विज इति श्रवणात् · यद्यप्यत्र सर्वे वर्णा उद्दिष्टप्रतिनिर्दिष्टाः विशेषाश्रवणात् तथाप्यत्रार्त्विज्यं यजमानानां संस्कारत्वेन न विधीयते तथा सत्यार्त्विज्यस्याप्राकृतकार्यप्रसङ्गात् · तेन यछब्दयोगेऽप्यत्र न यजमाना उद्दिश्यन्ते किंतु ऋत्विक्पदेन तत्कर्तृकान्पदार्थानुद्दिश्य यजमानाः कर्तृत्वेन विधीयन्ते प्रत्याम्नानाच्च ऋत्विजो निवर्तन्ते । आर्त्विज्यं ह्यत्र प्रधानम् · तस्य चात्र द्वौ धर्मौ अङ्गत्वेन प्रकृतितः प्राप्तौ अन्यकर्तृकता ब्राह्मणकर्तृकता च · तत्रान्यकर्तृकता ये यजमानास्तऽऋत्विज इत्यनेन बाधिता ब्राह्मणकर्तृकतायां तु न किंचिद्बाधकमिति ऋद्धिकामादिशब्दानां ब्राह्मणाविरोधात् · तस्मात्प्रकृतितः प्राप्तं ब्राह्मणकर्तृकत्वं वाचनिकं च यजमानकर्तृकत्वमुभयं सम्पादयितुं ब्राह्मणानामेव सत्त्राणि भवन्तीति सिद्धम् ॥ ॥ अथेदमपरं चिन्त्यते · प्रयाजे पुरुषभेदेनानुष्ठाने विशेषोऽस्ति · राजन्यवसिष्ठादीनां नाराशंसो[1] द्वितीयः प्रयाजस्तनूनपादन्येषाम् · तत्र वसिष्ठात्रिवध्यश्वशुनककण्वकश्यपसंकृतिगोत्रोत्पन्नास्तत्प्रवरवन्तो वा नाराशंसप्रयाजवन्तः[2] इतरे च तनूनपात्प्रयाजवन्तः · तऽएते भिन्नकल्पा अपि मिलित्वा सप्तदशावराः संहत्य सत्त्राधिकारिणो भवन्ति उत समानकल्पा एवेति । तदर्थमिदं विचार्यते · किं वसिष्ठादयो नाराशंसाद्यङ्गत्वेन कर्तारो विधीयन्ते उत वसिष्ठादीनुद्दिश्य नाराशंसादि तादर्थ्येन विधीयते · इति वसिष्ठाद्यर्थत्वेन विधानेन फलकल्पनात्प्रकरणाबाधाच्च[3] वसिष्ठादय एव नाराशंसाद्यङ्गत्वेन विधीयन्ते षष्ठी च सम्बन्धवाचिनी · सत्त्रेषु च सत्त्रिणां प्रत्येकमिव कर्तृत्वमिति स्थितम् · अतस्तत्र वसिष्ठावसिष्ठैः क्रियमाणो नाराशंसो[4] वासिष्ठिनापि[5] तावत्क्रियतऽएवेत्यविगुणः तथा तनूनपादप्यन्यैः · अतो यं कंचित्कल्पमाश्रित्य भिन्नकल्पा अप्यधिक्रियेरन्नित्येवं प्राप्तऽआह ·

---

१) नरा° २. The Çâstradîp. at Jaim. ६.६.१. reads throughout नाराशंस and वासिष्ठ. २) नरा° २. ३) ? °कल्पनाप्र° २. ४) नरा° २. ५) वसि° २.

एककल्पानामवैगुण्यात् ॥१४॥ एकः समानस्तुल्यः कल्पः पक्षो येषां त एककल्पाः तेषामेव सत्त्राणि भवन्ति न भिन्नकल्पानाम् । कुतः अवैगुण्यात् · यदि सर्वेऽपि नाराशंसवन्तः [1] अथवा सर्वेऽपि तनूनपात्प्रयाजवन्तः तदैवाविगुण्यं भवति · अवैगुण्याच्च फलसिद्धिर्भवति · इतरथा भिन्नकल्पेषु सह निविष्टेषु अन्यतरप्रयाजाश्रयणे सत्यन्येषां वैगुण्यात्फलं न सिध्येत् · न च वचनबलेन बाधः वचनस्य समानकल्पेषु सहचरितार्थत्वेन बाधकत्वासम्भवात् । अत्र वसिष्ठादीन्स्वामित्वेनोद्दिश्य तादर्थ्येन नाराशंसादि [2] विधीयते · तादर्थ्यं च क्रतूपकारकद्वारेणाप्युपपन्नमिति न भिन्नफलकल्पनापत्तिः · वसिष्ठानामिति षष्ठी स्वामिलक्षणा · अतो येषां स्वं नाराशंसः तेषामेव कर्मसिद्धिं करोति नेतरेषाम् । अयमर्थः · वसिष्ठानां नाराशंस एव यज्ञाङ्गम् तद्युक्त एव क्रतुः फलसिद्धौ पर्याप्तो भवतीति एवं तनूनपाद्युक्त एवेतरेषाम् · अत एककल्पानामेव सहाधिकारो न भिन्नकल्पानामिति सिद्धम् ॥ अत्र सत्त्रव्यतिरिक्तान्यप्यनेककर्तृकाणि द्वियज्ञगणयज्ञादीन्युदाहरणं भवन्त्येव [3] तुल्यन्यायत्वात् · प्रदर्शनार्थं तु सत्त्रग्रहणानुवृत्तिः प्रदर्शिता । अत्र विशेषः · वासिष्ठो ब्रह्मेति वचनात् ब्रह्मत्वं वासिष्ठेन कर्तव्यम् वैश्वामित्रो होतेति वचनात् हौत्रं तु वैश्वामित्रेण · तयोश्च भिन्नकल्पत्वान्न सहाधिकारसम्भवः · तस्माद्वरं गत्यभावाद्वासिष्ठं ब्रह्माणमाश्रित्य हौत्रस्य विश्वामित्रकर्तृकतां बाधित्वा वासिष्ठेन तत्समानकल्पेन वा केनचित्कर्तव्यम् वैश्वामित्रं वा हौत्रमङ्गीकृत्य ब्रह्मत्वमङ्गीकृत्यापि वासिष्ठकर्तृत्वबाधेन वैश्वामित्रेण तत्समानकल्पेन वा केनचित्कर्तव्यम् अथवा ब्राह्मणमात्रस्याधिकार इति । तत्राविशेषात्सर्वेषामधिकारः स्यात् · अथवा वासिष्ठो ब्रह्मेति प्रकृतौ वचनात् ब्रह्मत्वस्यावैगुण्यायावश्यं वासिष्ठेन भवितव्यम् अतस्तत्समानकल्पानामधिकारः सिद्धान्तस्तु य एव कश्चित्स्तोमभागानधीते स वासिष्ठ इति [4] वचनात्स्तोमभागाध्ययनवतोऽवासिष्ठस्यापि ब्रह्मत्वस्यानुज्ञानादवासिष्ठेनापि क्रियमाणं ब्रह्मत्वं विगुणं न भवति · वैश्वामित्रो होतेति वचनात्तु हौत्रं वैश्वामित्रेण विना विगुणं स्यात् तस्माद्विश्वामित्रतत्समानकल्पानामेव सत्त्रेऽधिकारो

१) नरा° २. २) नरा° २. ३) °वत्येव २. ४) See १२. ६. १. ४१.

नान्येषामिति सिद्धम् ॥ अनेनैव न्यायेन तुल्यप्रमाणानामेव सत्त्राणि प्राप्नुवन्ति न भिन्नप्रमाणानां दीर्घह्रस्वानाम् । कुतः एवं हि श्रूयते यजमानेन संमितौदुम्बरी[1] कार्येति यजमानेनोर्ध्वबाहुप्रपदोच्छ्रितेन[2] समस्थितेन वा द्विपुरुषाट् रज्जुं मिमीतेति (१६. ७. ३२.-८. १.) · तत्र येन यजमानेन[3] संमितौदुम्बरी न क्रियते अग्निक्षेत्रसाधनार्था रज्जुर्वा येन संमिता न क्रियते तस्य वैगुण्यं भवतीत्येवमाशङ्क्याह ·

न परार्थत्वात् ॥ १५ ॥ तुल्यप्रमाणानामेव सत्त्रेऽधिकारो भविष्यतीति यदाशङ्कितम् तन्न । कुतः परार्थत्वात् परार्थो ह्यत्र यजमानः औदुम्बर्यादिमानार्थो गुणभूतः · अतो येन केनचिद्यजमानेन संमिता सती यजमानप्रमाणा भवत्येवेति भिन्नप्रमाणानामप्यधिकार इति सिद्धम् · अतः शालाग्निखरेष्टकायूपादिप्रमाणानि यस्य कस्यचिद्यजमानस्यारत्न्यादिना कार्याणि ॥ नन्वेवमग्नीनामपि परार्थत्वाद्यस्य कस्यचिदग्निषु साधितं कर्म सर्वेषां फलसाधकं भविष्यतीत्यनाहिताग्नीनामप्यधिकारः सत्त्रेषु भवतीति प्राप्तेऽउच्यते । दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यस्य प्रकृतितः प्राप्तेर्य एतेनानिष्ट्वेति वचनादकृतदर्शपूर्णमासज्योतिष्टोमानामनाहिताग्नीनां नास्ति सत्त्रेष्वधिकारः · तथाग्न्योऽप्याधानगतात्मनेपदादनाधातॄणां[4] न कार्यसिद्धौ पर्याप्नुवन्तीत्यनाहिताग्नीनामनधिकारः · आदधीतेत्यात्मनेपदाद्धि आधातुरेवाधानफलेन भवितव्यम् · कर्मयोग्यता चाग्नीनां तत्फलम् अतोऽन्येनाहिता अन्यस्य कर्म न साधयन्ति · यजमानेन संमितौदुम्बरी कार्येति तु शास्त्रार्थो येन केनचिदपि प्रयोगगतेन यजमानेन[5] सम्पाद्यतऽइति वैषम्यम् ॥ ननु तर्हि जुह्वादिपात्रेषु कथम् तानि किं यस्य कस्यचिद्यजमानस्य सम्बन्धीनि सत्त्रऽउपादेयानि अथवा साधारणान्यन्यान्येवेति । तत्राग्निवदात्मनेपदकृतविशेषविरोधाभावात्प्रमाणवद्यस्य कस्यापि पात्राण्युपादेयानीति प्राप्तेऽउच्यते । सत्यम् अयं विरोधो नास्ति · तथापि आहिताग्निमग्निभिर्दहन्ति[6] यज्ञपात्रैश्चेति तथा

---

1) °नेनडुसं° २. 2) °बाग्रप° २. °बाहोग्रप° २. 3) येनायमानेन २. 4) °पदावदना° २. 5) Thus (but प्रकृतप्रयोग°) the Çâstradip. at Jaim. ६. ६. २५. °चिदपि प्रयानगगतेन यजमाने २. 6) Thus Çâstradip. at ६. ६. ३१. अनाहि° २.

दक्षिणहस्ते जुहूं सादयतीत्यादिवचनैः (२५. ७. २१.) पात्राणां दाहे करणभावः सादनप्रतिपत्तिश्च विधीयते · तत्र यदि कस्यचिद्यजमानस्य पात्रैः सत्त्रमारभ्यते तदा मरणस्यानियतकालत्वात्कदाचित्प्रयोगमध्यऽएव तस्य यजमानस्य मरणं स्यात् ततस्तस्य संस्कारः पात्राणां च प्रतिपत्तिर्दीयते · यदि तु तैर्दह्यते प्रक्रान्तः प्रयोगो विगुणः स्यात् · तस्मात्साधारणानि पात्राण्युत्पाद्य सत्त्रं कार्यम् ॥ इदानीमिदं चिन्त्यते · आर्त्विज्यविरोधेन क्षत्रियवैश्ययोः सत्त्रेऽनधिकार उक्तः सत्त्राणि ब्राह्मणानामृत्विक्श्रुतेरिति (१३.) · तर्हि आर्त्विज्ये तयोरधिकारो मास्तु गार्हपत्येऽधिकारो भविष्यति तत्रार्त्विज्यविरोधाभावात् इत्याशङ्क्याह ·

वैश्यराजन्ययोर्गार्हपते ॥१६॥ नेत्यनुवर्तते । वैश्यराजन्ययोर्गार्हपतेऽपि गृहपतित्वेऽपि अधिकारो न भवति । कुतः तयोर्ब्रह्मसामपक्षभेदेन भिन्नकल्पत्वात् तनूनपान्नराशंसयाजिवत् · तथा हि बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्पार्थुरश्मं राजन्यस्य रायोवाजीयं वैश्यस्येति · तेन पार्थुरश्मे रायोवाजीये वा क्रियमाणे ब्राह्मणानां वैगुण्यं भवति बार्हद्गिरे तु क्रियमाणे क्षत्रियवैश्ययोः · तस्माद्वैश्यक्षत्रिययोर्गृहपतित्वेऽपि नाधिकारः ॥ पञ्चविंशतिब्राह्मणऽइदं श्रूयते पञ्च पञ्चाशतस्त्रिवृतः संवत्सराः पञ्च पञ्चाशतः पञ्चदशाः पञ्च पञ्चाशतः सप्तदशाः पञ्च पञ्चाशत एकविंशा [1] विश्वसृजां सहस्रसंवत्सरमिति । अत्रायं संदेहः किमयं सहस्रसंवत्सरशब्दो मुख्य उत गौणः । यद्यपि मुख्यस्तदापि किं मनुष्यव्यतिरिक्तानां स्वतः सहस्रायुषां गन्धर्वादीनामधिकारः उत मनुष्याणामेव रसायनमित्रविन्दादिसम्पादितसहस्रायुषाम् · अथवा कुलकल्पः [2] अथवा साम्युत्थानम् अथवा विश्वसृजामयनं [3] कुर्वतां सहस्रायुष्ट्वम् अथवार्धतृतीयशतानां [4] यजमानानामधिकारः । यद्यपि गौणत्वम् तदापि किं मासेषु संवत्सरशब्द उत द्वादशरात्रिषु उत दिवसेषु इति पक्षाः । तत्र प्रथमं पक्षं तावदाह ·

सहस्रसंवत्सरममनुष्याणामसम्भवात् ॥१७॥ सहस्रसंवत्सरं सत्त्रमम-

---

१) ? °विंशति २. २) Thus Çâstradip. at ६. ७. ३१. तुल्यकल्पः २. ३) ? °आनोमयनं २. ४) शतात्यं २.

नुष्याणां मनुष्यव्यतिरिक्तानां स्वभावात्सहस्रायुषां गन्धर्वादीनां भवति । कुतः असम्भवात् मनुष्याणां सहस्रायुष्ट्वस्यासम्भवात् न हि सहस्रायुषो मनुष्याः सन्ति · अतः श्रुतिबलादमनुष्याणां गन्धर्वादीनामधिकारः ।

स्याद्देहानित्यत्वात् ॥ १८ ॥ अमनुष्याणामनधिकारस्य प्रागुक्तत्वात् वसन्ति ब्राह्मणोऽग्नीनादधीतेत्यादिविधानान्मनुष्याणामेवाहवनीयाद्यग्नयः सन्ति नान्येषामिति न कथमपि गन्धर्वादीनामधिकारः सम्भवति । अतो मनुष्याणामेव सहस्रसंवत्सरं सत्रं स्यात् कार्त्स्न्येन यथोदितं विधिमुपसंहर्तुं तेषामेव शक्तत्वात् । ननु मनुष्याणां सहस्रसंवत्सरपरिमाणमायुः कथं सम्भवति · उच्यते · आयुरपि तावत्परिमाणं मनुष्याणां स्यात् · कुतः देहानित्यत्वात् देहस्यायुषोऽनित्यत्वात् अनियतकालत्वात् न हि नियतकालं मनुष्यदेहावस्थानम् कश्चिच्छतं वर्षाणि जीवति कश्चिदधिकं कश्चिदधिकतरमिति · अतोऽपरिमितायुषो मनुष्या इति · तस्मान्मनुष्याणामेवाधिकारः । ननु मनुष्यदेहस्यानित्यत्वेऽपि सहस्रायुष्ट्वं तेषां कथं सम्भवतीत्याशङ्क्याह ·

तस्य च कार्यत्वात् ॥ १९ ॥ तस्य चायुषः कार्यत्वात् रसायनमित्रविन्दादिना कर्तुं शक्यत्वात् । श्रूयते हि मित्रविन्दयायुष्कामो[1] यजेतेति · अतो रसायनैर्मित्रविन्दादिभिरायुःप्रापकैः कर्मभिश्च मनुष्या अपि दीर्घमायुः प्राप्स्यन्तीत्याशङ्क्याह ·

नासम्भवात् ॥ २० ॥ रसायनैरपि एतावत्परिमाणमायुर्न सम्भवति · न च मित्रविन्दादिकर्मभिरपि · न ह्येतावदायुषो रसायनादीनां च सम्बन्धो दृष्टपूर्वः · न हि रसायनानामेतावत्सामर्थ्यं दृष्टम् यतस्तैः सहस्रं वर्षाणि मनुष्या जीवेयुः · एतानि ह्यग्निवर्धनानि बलीपलितनाशनानि स्वरवर्णप्रसाधकानि मेधाजननानि च नैतावत्परिमाणस्यायुषो दातॄणि दृश्यन्ते । न च मनुष्याणामेतावदायुः कल्पयितुं शक्यते शतायुर्वै पुरुष इत्यर्थवादात् (१२. ७. २. १३.) · ननु शतान्यायूंष्यस्येति विग्रहः करिष्यते नैवम् न हि द्विवचनबहुवचनान्ताभ्यां[2] शब्दाभ्यां समास इष्यते प्रमाणाभावात् अभिधानासामर्थ्याच्च · नन्वेव-

[1] °न्दया आयुःका° २. [2] °चनं ताभ्यां २.

मेकत्वेऽपि प्रमाणाभावात्तेन कथं विग्रहः उच्यते एकत्वं जात्यपेक्षम् प्रातिपदिकानि हि जातिरेकेति[१] यद्वा जातिराश्रयमन्तरेणानुपपद्यमाना एकं तावदाश्रयमाक्षिपतीत्येकत्वसिद्धिः । तस्मान्मनुष्याणां रसायनैर्मित्रविन्दादिभिश्च सहस्रसंवत्सरायुष्ट्वस्य करणासम्भवात्कथं मनुष्याणामधिकार इत्याशङ्क्याह ·

शास्त्रसम्भवादिति भारद्वाजः ॥२१॥ भारद्वाजो मुनिरित्याह एवं ब्रवीति · मनुष्याणामपि सहस्रायुष्ट्वं सम्भवति । कुतः शास्त्रसम्भवात् शास्त्रात्सम्भवः[२] शास्त्रसम्भवः तस्मात् · मित्रविन्दायाः आयुष्कामो यजेतेति हि शास्त्रम् मित्रविन्दया आयुर्भावयेदिति बोधयति · न च तत्रायुषः परिमाणं श्रूयते · तेन केनचित्कर्माभ्यासेन सहस्रायुषोऽपि भविष्यन्तीति । रसायनान्यप्यल्पस्य स्थिरभावस्याकारकारकाणि[३] दृश्यन्ते · एवमभ्यस्यमानानि वीर्यवत्तमानि च स्थिरशरीरतामुत्पादयिष्यन्ति · शतायुर्वै पुरुष इत्यस्मिन्सत्यप्यधिकजीवनं[४] मनुष्येषु प्रत्यक्षेणानुभूयतऽएवेति नायमेकान्तः । तस्मान्मनुष्याणामपि रसायनैर्मित्रविन्दादिशास्त्रात्सहस्रसंवत्सरविधायकशास्त्राच्च सहस्रायुष्ट्वस्य सम्भवो भविष्यतीति प्राप्तऽआह ·

नादर्शनात् ॥२२॥ शास्त्रसम्भवादिति यदुक्तम् तन्न । न हि मित्रविन्दया सहस्रसंवत्सरपरिमाणमायुर्भवतीति श्रूयते नाप्यभ्यासेन तावत्कर्तुं शक्यते नापि रसायनैः । कुतः अदर्शनात् तावदायुष्काणां[५] मनुष्याणामदर्शनात् · यद्येभिरुपायैरेतावदायुर्भवेत् तर्हि आयुषः सर्वैरपीष्यमाणत्वादेतदुपायसम्पादितैतावदायुषो मनुष्या दृश्येरन् · न च दृश्यन्ते · अत एवमवगम्यते एभिरप्युपायैरेतावदायुर्न भवतीति · न ह्येतावदायुः कस्यचिदपि सम्भवति । तत्र रसस्य तावदारोग्यपुष्ट्यादिजनकत्वमेव[६] न त्वायुर्हेतुत्वम् · आयुःप्रापकैश्च मित्रविन्दादिभिरप्यपमृत्युनिरास[७] एव क्रियते न विधातृसृष्टादधिकमायुः · तथा च मित्रविन्दां प्रकृत्य वाक्यशेषः (११. ४. ३. २०.) विन्दते मित्रं राष्ट्रमस्य भवत्यप पुनर्मृत्युं जयति सर्वमायुरेतीति · न चापमृत्युर्नास्तीति वाच्यम् आथर्वणे हि

१) ? °कानिहितातिरेकेति २. °कानिहिताजातिरेकेति २. २) शास्त्रासम्भवः २. ३) ? स्थिराभाव° २. ४) °स्मिन्सत्यप्य° २. ५) ? °कारणां २. ६) °रोग्यंपु° २. ७) °मन्युनि° २.

पठ्यते एकशतमपमृत्यूनामिति · तेनैको महामृत्युस्तदुल्लङ्घनं केनाप्युपायेन कर्तुं न शक्यते · तथा मर्त्या पितरः पुरा ह्वायुषो म्रियते यस्तर्ह्याधत्तऽइति (२. १. ३. ४.) परमायुषः पूर्वमप्यपमृत्युना मरणं दर्शयति · तथा मनुरप्यमुमर्थं ब्रवीति (५. ४.) अनभ्यासेन वेदानामाचारस्य च लङ्घनात्[1] आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसतीति । अतो मनुष्याणां कथमपि सहस्रायुष्ट्वस्यासम्भवादेकस्मिन्कुले समुत्पन्नानां पितृपुत्रपौत्रप्रपौत्रतत्पुत्रादीनां बहूनां साधारणस्य सहस्रायुष्ट्वस्य[2] सम्भवात् कुलाधिकार इति तृतीयः पक्षोऽस्त्वित्याह ·

कुलसत्त्रमिति कार्ष्णाजिनिः ॥२३॥ कार्ष्णाजिनिर्मुनिरित्याह एवं कथयति यत्[3] कुलसत्त्रमेतत्सहस्रसंवत्सरं भवति कुलस्य पितृपुत्रपौत्रप्रपौत्रतत्पुत्रादिरूपस्य वंशस्यैतद्भवति न त्वेकस्य कस्यचित् असम्भवात् । मनुष्याधिकारं चैतत् प्रारब्धं चावश्यं समापनीयम् न चैकः शक्नोति समापयितुमिति यथा शक्यते तथा समापनीयमिति गम्यमाने [चि] बहवस्ते शक्नुवन्ति तेन तत्कुलीनाः क्रमेण कैश्चिदारब्धं कैश्चिन्मध्येऽनुष्ठितं केचित्समापयिष्यन्तीत्येवं कुलसत्त्रं कार्ष्णाजिनिर्मन्यते स्म । नैतद्युक्तम् · यतः शास्त्रफलं प्रयोक्तरीति न्यायात्समग्रानुष्ठातृणामेव फलं भवति नैकदेशानुष्ठातृणाम् · न च पित्रादिष्वेकोऽपि[4] कृत्स्नं करोति · तस्मान्नास्त्येवैकस्यापि फलमिति · अतो न कुलसत्त्रमेतत् । तर्हि साम्युत्थानमस्त्विति चतुर्थः पक्षोऽस्त्वित्याह ·

साम्युत्थानमिति लौगाक्षिः ॥२४॥ सामिशब्दोऽर्धांशस्यार्थे · अर्धसमाप्ति सत्त्रे उत्थानं परित्यागः साम्युत्थानम् · सामि त्वर्धे जुगुप्सितऽइत्यमरः (३. ४. २५४.) · असमाप्तमेवेदं सत्त्रं त्याज्यमित्यर्थः । लौगाक्षिरेवं मन्यते स्म कार्ष्णाजिन्यभिमतात्कुलसत्त्रपक्षात्साम्युत्थानं वरमिति · तन्मते हि बहूनां वृथा प्रयासः अस्मिन्मते त्वारम्भकर्तृणामेवेति अस्य पक्षस्य[5] तदपेक्षयोत्कृष्टता · वस्तुतस्त्वयमप्यनुपपन्न एव असमाप्तात्कर्मणः फलानुत्पत्तेः ॥ तर्हि सूत्रविधायकवचनबलादेव सत्त्रिणां दीर्घायुर्भविष्यतीति पञ्चमः पक्षोऽस्तु · मैवम् · न ह्यस्य वचनस्य सोऽर्थः सम्भवति तद्वाचकपदाभावात् · न च कल्पयितुं शक्यते

[1]) वर्जनात् Manu. [2]) युस्तस्य २· [3]) यत २· [4]) °दिष्वेकोपि २· [5]) पक्षस्य या २·

सम्भावितायुष्काणामपि सत्त्रान्तरेषु प्रवृत्तानां दैवान्म्रियमाणानां तत्सत्त्रविधिबलादायुर्वृद्ध्यदर्शनात् ॥ तर्हि पञ्च पञ्चाशत इत्यस्य पुरुषपरत्वमङ्गीकृत्य सार्धद्विशतानां पुरुषाणामधिकारेऽभिहिते संवत्सरचतुष्टयेन [1] सहस्रसंवत्सरत्वं सम्पद्यते · यत एकोऽपि त्रिवृत्स्तोमकयागयुक्तः संवत्सरः पञ्चपञ्चाशत्संख्यैर्यजमानैः प्रत्येकं कर्तृभूतैः सम्बध्यमानस्तत्संख्यो भवति तथा पञ्चदशादयोऽपीति · तेन चतुःसंवत्सरमिदं सत्त्रमर्धतृतीयैर्यजमानशतैः क्रियमाणं सहस्रसंवत्सरं भवतीति पक्षः षष्ठोऽस्तु [2]। सोऽप्यनुपपन्नः · चतुर्विंशतिपरमाः सत्त्रमासीरन्निति वचनादधिकानां तत्राधिकाराभावात् ॥ तस्मात्संख्याशब्दसंवत्सरशब्दयोर्मध्ये अन्यतरस्य गौणत्वमाश्रित्य मनुष्याधिकार आश्रयणीयः · तत्रापि संख्याशब्दस्य मुख्यत्वादेकार्थनिश्चयसामर्थ्याच्च न [3] स्वार्थत्यागः · संवत्सरपदं तु जघन्यत्वात् सावनसौरचान्द्रनाक्षत्राद्यनेकार्थसाधारणत्वेनार्थनिश्चयासामर्थ्यात् गौणं भवति । तर्हि यो मासः स संवत्सर इति वचनात्संवत्सरशब्दस्य मासपरत्वे सति सहस्रमासमेतत्सत्त्रमित्येष सप्तमः पक्षोऽस्तु · सोऽपि नोपपद्यते · यतः अष्टमे वर्षेऽउपनीतो द्वादश वर्षाणि वेदमधीत्य विंशतिवयस्को विवाहं कृत्वा जातपुत्रोऽग्नीनादधीत तस्मादाधानादूर्ध्वं ज्योतिष्टोमानुष्ठानोत्तरकालमस्यायुषि न सम्भवन्ति सहस्रमासाः ॥ ननु [4] तर्हि संवत्सरप्रतिमा वै द्वादश रात्रय इति प्रयोगाद्द्वादशरात्रिषु संवत्सरशब्दः · प्रतिमाविशेषणं यत्र संवत्सरशब्दः न तस्य द्वादशरात्रिषु प्रयोगः · तस्मादष्टमः पक्षोऽप्ययुक्तः ॥ अथ नवमं पक्षं सिद्धान्तमाह ·

अह्नां वाशक्यत्वात् ॥२५॥ वाशब्दोऽवधारणे । अह्नामेवैतत्सहस्रं प्रत्येतव्यम् न वर्षाणाम् न मासानाम् नापि द्वादशरात्रीणामपि । कुतः अशक्यत्वात् न ह्यन्यथैतत्सूत्रं मनुष्यैः कर्तुं शक्यते । अथवा शक्यत्वात् अह्नां संवत्सरशब्देन प्रतिपादने मनुष्यैरपि कर्तुं शक्यत्वात् । मुख्यार्थासम्भवे च गौणी वृत्तिराश्रीयतऽएव अन्यथानर्थक्यापत्तेः · न चात्र मुख्योऽर्थः सम्भवतीति प्रागुक्तम् · अतोऽवश्यम्भाविनि गौणपरत्वे दिवसपरत्वं युक्तम् त्रिवृदादिशब्दानु-

1) °रचतुष्टयेनेन २· 2) षष्ठास्तु २· 3) Thus the Çâstradip. at Jaim. ६. ७. ३१. °र्थ्यान २· 4) न २·

ग्रहणात्[1] · तत्त्रिवृत्पञ्चदशः सप्तदश इत्येते शब्दाः स्तोमवाचकाः सन्तः स्तोमयुक्तेऽएकैकस्मिन्नहनि यागरूपे लक्षणया वर्तन्ते   सत्त्रे तु तथाविधप्रयोगबाहुल्यात् · न त्वहःसंघे[2] क्वचिदपि त्रिवृदादिशब्दाः प्रयुक्ताः · तैश्चेह शब्दैः सामानाधिकरण्यात् संवत्सरशब्दः स्वावयवभूतेऽहनि लक्षणया वर्तते · त्रिवृतः संवत्सरा इत्युक्ते त्रिवृत्स्तोमकयागयुक्तान्यहानीत्युक्तं भवति । ननु संवत्सरशब्दस्याह्नि वृत्तौ किं प्रमाणमित्यत आह ·

श्रुतिसामर्थ्यात् ॥२६॥   अहन्यपि संवत्सरशब्दस्यार्थवादोदितं प्रवृत्तिनिमित्तमस्त्येव · श्रूयते हि (२. २. ३. ९.) आदित्यस्त्वेव[3] सर्वेऽऋतवो यदैवोदेत्यथ वसन्तो यदा संगवोऽथ ग्रीष्मो यदा मध्यन्दिनोऽथ वर्षा यदापराह्णोऽथ शरद्यदैवास्तमेत्यथ हेमन्त इति   सर्वर्तुसमयाह्वयते दिवसः संवत्सरशब्देनाभिधातुम् · अहर्वै संवत्सर इत्यपि क्वचिच्छ्रूयते · अतः श्रुतिसामर्थ्यादितच्छ्रुतिबलात्संवत्सरशब्दो[4] ऽत्राप्यहरभिधायक इत्यर्थः · तस्मादह्नां सहस्रमेतदवसेयम् । किं च ·

प्रकृत्यनुग्रहाच्च ॥२७॥   प्रकृतेर्गवामयनद्वादशाहादेरेवमनुग्रहः कृतो भवति · प्रकृतौ हि अहान्येव संख्येयानि · इहापि यद्यहान्येव तथा भवन्ति तर्हि प्रकृतिरनुगृहीता भवति नान्यथा · तस्मात्सहस्रदिनात्मकमेतद्विश्वसृजामयनसंज्ञकं सत्त्रं मनुष्याणामेव भवतीति सिद्धान्तः ॥ ॥ षष्ठी कण्डिका ॥ ६॥

अथ पद्धतिः ॥

अवत्तस्य हविषो नाशे हविरन्तरमेवोत्पाद्यते · न स्विष्टकृदादिप्रतिपत्तिसहितो यागः कार्यः · न पुनः शेषादवदेयम् । अग्न्यादीनां देवतानामाहवनीयादीनामग्नीनामिषेत्वादिमन्त्राणामदृष्टार्थानां प्रयाजानुयाजादिक्रियाणां च प्रतिनिधिर्न भवति · कुतः   अदृष्टार्थत्वात् · दृष्टार्थानां तु क्रियाणामवघातादीनां प्रतिनिधिर्भवत्येव । प्रतिषिद्धं वस्तु श्रुतद्रव्यसदृशमपि प्रतिनिधित्वेन न ग्राह्यम् · यथा श्यामाकचरौ कोद्रववरट्टादि यथा वा मौद्गे चरौ माषादि । यजमानस्यापि त्यागादौ वपनादौ संस्कारकर्मणि च प्रतिनिधिर्न भवति · गुणकर्मसु पात्रासादना-

1) ? °ह्नानुगुणात् २·   2) नन्वहःसंघे २·   See the Çástradip.: त्रिवृदादिपदैः स्तोमविशिष्टमहरुच्यते नाहःसंघः·   3) °दित्य एवेव २·   4) ? °र्थ्यादित° २·

ड्यावेक्षणाग्न्यन्वाधानव्यूहनवेदबन्धनादिषु यजमानस्यापि प्रतिनिधिर्भवत्येव कृत्वर्थत्वात् · एवं पत्न्यभावेऽप्याज्यावेक्षणान्वारम्भाज्ञोपाञ्जनादौ गुणकर्मणि प्रतिनिधिर्भवत्येव · सत्त्रेषु च श्रुतिवचनबलाद्यजमानस्यापि प्रतिनिधिर्भवति यजमानकर्मणा सम्बन्धाद्यजमानधर्मा दीक्षणादयोऽपि तस्य प्रतिनिहितस्य भवन्ति । सत्त्रेषु यऽऋत्विजस्ते यजमाना इति यजमानानामृत्विक्पदार्थकर्तृत्वविधानाद्ब्राह्मणानामेव सत्त्राणि भवन्ति न क्षत्रियवैश्यानाम् · ब्राह्मणानामप्येककल्पानाम् न भिन्नकल्पानाम् · वैश्यराजन्ययोर्गृहपतित्वेऽपि नाधिकारः ब्रह्मसामादिकल्पभेदेन ब्राह्मणैः सह विरोधात् । सहस्रसंवत्सरं सत्त्रं मनुष्याणामपि भवति संवत्सरशब्देन लक्षणया वृत्त्याह्नां प्रतीयमानत्वात् · अतः सहस्रसंवत्सरे सहस्रं सौत्यान्यहानि भवन्ति ॥ ॥ ६ ॥

इति प्रथमस्य षष्ठी कण्डिका ॥ ॥

अथेदं विचार्यते · एकप्रयोगवचनचोदितानामेकफलानां संहत्यकारिणां बहूनां कर्मणां सदृशाङ्गभाजामङ्गानुष्ठानं किं तन्त्रेण भवति उत पृथगिति । तत्र तदर्थं[1] प्रथमं संहत्यकारित्वं प्रतिपाद्यते · यदि आग्नेयादयः षडपि परस्परानपेक्षाः स्वर्गं साधयेयुः ततस्तेषां कामिनः कर्तव्यत्वेन युगपदुपस्थानाभावात् पृथक्पृथगेव स्वाङ्गयुक्ताः कर्तव्या इति तन्त्रत्वं न सिध्येत् · तस्मात्संहत्यकारित्वं प्रतिपाद्यते । तत्र दर्शपूर्णमासादिष्वनेकप्रधानसंनिपाते संदेहो भवति किमाग्नेयादयः पृथक्पृथक्स्वर्गं साधयन्ति उत संहत्येति · तत्राग्नेयादीनि प्रधानानि परस्परानपेक्षाभिश्चोदनाभिः पृथग्भूतान्युत्पन्नानि पृथगेव फलमाकाङ्क्षन्ति · ततस्तत्संनिधौ स्वर्गादि फलं श्रूयमाणं भेदेनाकाङ्क्षितत्वाद्भेदेनैव सम्बध्यते · तस्मात्प्रतिप्रधानं फलभेदे प्राप्तऽउच्यते पृथग्भूतानामप्येतेषामेकमेव फलम् · कुतः यतः दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन वाक्येन सर्वाण्येकेन दर्शपूर्णमासशब्देनोपादाय तेषां फलसम्बन्धः कृतः · अतः समुदितेभ्यः फलं गम्यते न भेदेन · यथा ग्रामेण कूपः खेयो ग्रामेण तडागः खेय इति ग्रामशब्देन समुदायवचनेन संयुज्य

1) ? तदर्थं·

विधायमानः कूपः समुदितैः पुरुषैरेकः खन्यते न प्रतिपुरुषं कूपभेदः एवमिहापि · नात्र यागमुद्दिश्य फलं विधीयते स्वर्गेण यागं कुर्यादित्येव किं तर्हि फलमुद्दिश्य यागो विधीयते स्वर्गं यागेन कुर्यादिति · तस्मात्फलोद्देशेन विधीयमानानां विवक्षितं साहित्यमिति सिद्धं संहत्यकारित्वम्। एवं सिद्धे संहत्यकारित्वे प्रस्तुतो विचारः किमेषां पृथक्पृथगङ्गानुष्ठानम् उत तन्त्रेणेति · तत्र प्रतिप्रधानं पृथक्पृथगनुष्ठानं प्राप्नोति यतः प्रधानानि बहूनि अङ्गवत्ता च प्रत्येकं सम्पाद्या न च पृथक्पृथगनुष्ठानं विना प्रत्येकमङ्गवत्ता सम्पद्यते · यतः षडाग्नेयादिभावनाः साध्यसाधनांशयुक्ता[1] उत्पत्तिप्रयोगवाक्याभ्यामवगताः परस्परानपेक्षा एव कथमितीत्यम्भावं[2] भेदेनैवापेक्षन्ते · तद्वशाच्च संनिधिसमाम्नातान्यङ्गानि प्रत्येकमेव तासु विनियुज्यन्ते[3] विनियोगानुसारेण चानुष्ठानम् · तस्मादेकैकं स्वाङ्गयुक्तं कर्तव्यमित्येकं साङ्गं कृत्वापरमपि तथैव कर्तव्यम् · तस्मात्प्रतिप्रधानं पृथगेवानुष्ठानं कार्यमिति प्राप्तऽआह ·

कर्मणां युगपद्भावस्तन्त्रम् ॥१॥ यत्र प्रधानकर्मणां युगपद्भावः सहप्रयोगः तत्राराडुपकारकाणामङ्गानां तन्त्रं सकृदनुष्ठानं भवति न प्रतिप्रधानं पृथक्पृथक् · यद्धि सकृत्कृतं बहूनामुपकरोति तत्तन्त्रमित्युच्यते यथा बहूनां मध्ये कृतः प्रदीपः। कुतस्तन्त्रमिति हेत्वाकाङ्क्षायां त्रीन्हेतूनाह ·

शक्यपुरुषार्थकृतत्वैकार्थसमवायश्रुतिभ्यः ॥२॥ प्रधानकर्मणां सह प्रयोगे सति यदङ्गानां सकृदनुष्ठानमुक्तम् तत्कुतः · शक्यत्वात् · सकृदप्यनुष्ठितैराराडुपकारकैरङ्गैर्बहूनामपि प्रधानानामुपकारस्य कर्तुं शक्यत्वात् · शक्नुवन्ति ह्याराडुपकारकाणि बहूनामुपकर्तुम् अगृह्यमाणविशेषत्वात् प्रदीपवत् यथा एक एव प्रदीपो बहूनां मध्ये कृतः सन्सर्वेषामुपकरोति एवमेतान्यपीति · यद्यप्यङ्गानां प्रत्येकमेव विनियोगस्तथापि विधानवदनुष्ठानं सकृदेवोपकारकं भवति · यथैव हि षट्सु भावनासु लिङ्पदेनैव[4] कथम्भावमपेक्षमाणास्वपि सकृदाम्नाता एवाङ्गविधयः[5] षण्णामपि प्रत्येकमङ्गानि समर्पयन्ति सत्यपि च कस्यचित्प्रधानो-

---

1) ? °धनसंयुक्ता Çástradip. at Jaim. ११. १. १. 2) °भाव २. 3) वियुज्यन्ते २.
4) ? षड्गु भावतासु लि° २. षड्गू भावतासूभेलि° २. 5) °विषयः २.

त्पत्तिविधिसंनिधौ प्रकरणवशेन संनिधिर्बाध्यते तथैव संहतानां प्रधानानां फलसाधनत्वात्कर्तृदेशकालैक्याच्च युगपत्सर्वेष्वनुष्ठातुं प्रारब्धेषु सकृत्कृतमेवाङ्गं सर्वचिकीर्षया कृतत्वात्सत्त्वमपि केनचित्संनिधिं बाधित्वा प्रकरणवशेन[१] सर्वार्थं भवति · किं च पौर्णमास्यां-पौर्णमास्यां यजेतेति त्रयाणां युगपदनुष्ठानमवगतं पृथक्पृथक्स्वाङ्गेष्वनुष्ठीयमानेषु बाध्येत · तस्मात्सकृदेवाङ्गानामनुष्ठानम् । तथा पुरुषार्थकृतत्वाच्च · यतः सकृदनुष्ठितैरप्यङ्गैः पुरुषार्थः कृत एव भवति पुरुषार्थः पुरुषस्याभीष्टं फलम् तद्धि आग्नेयादिभिरङ्गोपकृतैः क्रियते · आरादुपकारकाणि चाङ्गान्यनेकघटादिप्रकाशप्रदीपवत्सर्वेषां[२] सद्वैवोपकुर्वन्ति सकृत्कृतैरपि पुरुषार्थः कृत एव भवति । तथा एकार्थसमवायश्रुतेश्चाङ्गानां तन्त्रं भवति · एको ऽर्थो यस्य एकार्थः[३] एकफलो यः प्रधानानां समवायः समूहः स एकार्थसमवायः तत्र एकार्थे समवाये एकफले प्रधानसमूहे अङ्गानां तन्त्रश्रुतेः अङ्गानां सकृदनुष्ठानं श्रूयते यतः · तथा हि ता एकविंशतिराहुतयो द्वावाघारौ पञ्च प्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशस्तद्दशाग्नीषोमीय उपांशुयाजो ऽग्नीषोमीयः पुरोडाशो ऽग्निः स्विष्टकृदिडा त्रयो ऽनुयाजाः सूक्तवाकश्च शम्योर्वाकश्चाथ यदेवाद: पत्नीसंयाजेषु सम्प्रगृह्णाति समिष्टयजुश्चेति (११. २. ६. १०.) · तत्राग्नेयोपांशुयाजाग्नीषोमीयलक्षण ऽएकफले प्रधानसमवाय ऽआहुतीनामेकविंशतिसंख्या श्रूयते सा चाङ्गानां सकृत्करणपक्ष ऽएवोपपद्यते न प्रतिप्रधानं पृथगनुष्ठानपक्षे । तस्मात्प्रधानानां सह प्रयोगे सकृदेवारादुपकारकाणां क्रिया · संनिपत्योपकारकाणां प्रतिप्रधानमावृत्तिरिति तु प्रागुक्तमेव (१. ५. १०.) · अथ प्रधानानां सहप्रयोगे कारणान्याह ·

फलकर्मदेशकालद्रव्यदेवतागुणसामान्ये ॥ ३ ॥ यत्रैकेन वाक्येन बहूनि प्रधानकर्माणि एकफलसाधनत्वेन विधीयन्ते तत्र तेषामितरेतरापेक्षाणां साधनत्वेन विधानात्सहप्रयोगः · तद्यथा मित्रविन्दा श्रीराष्ट्रमित्रायुष्कामस्येति (५. १२. १.) वैश्वदेवेन प्रजाकामं याजयेदिति · अत्र मित्रविन्दाशब्देन समुदाय-

१) ? बाधित्वात् प्र° २. बाधित्वानुष्ठानक्रियाप्रारम्भाख्यप्रकरण° Çâstr. २) ?? अनेकपटाविप्रकाश° २. अनेकघटादिप्र° २. ३) ?? यस्यांचैकार्थी २.

वचनेन दशानां हविषां सहप्रयोगः वैश्वदेवशब्देन च समुदायवचनेनाष्टानां हविषाम् । सूत्रार्थस्तु · सामान्यशब्दः प्रत्येकं सम्बध्यते फलसामान्ये कर्मसामान्ये देशसामान्ये कालसामान्ये द्रव्यसामान्ये देवतागुणयोः सामान्य ऽइति · एकवाक्येनैकफलसाधनत्वेन विधानेऽपि फलादिसामान्ये सत्येव प्रधानानां सहप्रयोगो भवति · फलं स्वर्गादि कर्म पञ्चप्रयाजतात्र्यनुयाजतेत्यादि देशः समप्राचीनप्रवणादिः कालः पूर्वाह्णमध्याह्नापराह्णादिः द्रव्यं दक्षिणाद्रव्यम् न तु हविर्द्रव्यम् अनेकेषु प्रधानकर्मसु तद्भेदस्यावश्यम्भावात् देवता प्रजापतीन्द्रादिः तद्गुण[1] उपांशुत्वाश्राव्यत्वादिः · तस्मिन्सति प्रधानमपि सहैव भवति न पृथक् ।

तद्भेदे भेदः ॥४॥ तेषां फलादीनां भेदस्तद्भेदः · तद्भेदे तेषां फलादीनां सहप्रयोगकारणानां भेदे सति प्रधानानां प्रयोगभेदो भवति · तत्र प्रयोगवचनभेदान्मित्रविन्दाप्रतिकामाग्नेययोर्न सहप्रयोगः · फलभेदाच्च श्रीकामराष्ट्रकाममित्रकामायुःकाममित्रविन्दानां पृथक्प्रयोगः । कर्मभेदेऽपि प्रयोगभेदो भवति · तद्यथा कस्यचित्पञ्चप्रयाजता कस्यचिन्नवप्रयाजता · यथा [च] क्रैडिनीयामहाहविषोः तत्सहत्वे इतरेतरस्य[2] विगुणत्वं भवति । देशभेदेऽपि तद्भेदो भवति · यथा वरुणप्रघासेषु मारुत्याः · क्रैडिनीमहाहविषोश्च क्रैडिन्याः समो देशः महाहविषस्तु प्राचीनप्रवणः । कालभेदेऽपि सहप्रयोगो न भवति · यथा दर्शस्य पौर्णमासस्य च पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति वचनेन कालभेदेन तयोर्विधानात् · यथा वा आनीकवतीसांतपनीययोः[3] पूर्वाह्णमध्याह्नरूपकालभेदात्तद्भेदः । दक्षिणाद्रव्यैक्ये सति सहप्रयोगो यथा राजसूये[4] त्रयाणां त्रिषंयुक्तानाम् · येषां मते च त्रिषंयुक्तानां त्रयाणामप्येकस्मिन्नेवाहन्यनुष्ठानम् तेषां दक्षिणाद्रव्यभेदेन त्रयाणां-त्रयाणां पृथगनुष्ठानम् न सर्वेषां सहप्रयोगः · दक्षिणाभेदश्च त्रयाणां वामनः त्रयाणां श्यामः त्रयाणां बभ्रुरिति[5] · तत्र[6] दक्षिणाभेदादानतिभेदः तद्भेदात्तत्कृतस्य स्वरूपस्य भेदः

---

1) तत् गुण २. 2) तत्रसहत्वे इतरेतरस्यं २. 3) अलोकवतोर्सं° २. 4) ? सहप्रयोगा राज° २. 5) बभ्रूरिति २. See १५. २. १३. 6) ? तंत्र २.

वामनानतेर्हि पूर्वं कर्म कर्तव्यम् श्यामानतेरुत्तरम् तन्त्रत्वे तूभाभ्यामानता उभयं कुर्युः · तत्र दक्षिणाव्यवस्था गम्यमाना बाध्येत · तस्मात्प्रतिदक्षिणं तन्त्रभेदः · अत्र एकवाक्येनैकफलार्थमेव विधाने देशकालकर्मैक्ये सत्यपि दक्षिणाभेदात्तन्त्रभेदः । देवतायाः देवतागुणस्य च सामान्ये सति उच्चारणमपि तस्या देवताया आवाहनत्यागादौ तन्त्रेण भवति · यथा सप्तदशप्राजापत्येषु वाजपेये प्रजापतेर्देवतायाः समानत्वात्तद्गुणस्योपांशुत्वस्य च समानत्वादनुवाचनादौ तन्त्रेणोच्चारणं भवति यागोऽपि तन्त्रेणैव भवति · तथा च प्राजापत्यान्प्रकृत्य श्रूयते (५. २. ३. १४.) एकानुवाक्या भवत्येका याज्यैकदेवत्या हि प्रजापतयऽइत्युपांशूक्ता छागानां हविषोऽनुब्रूहीति अत्रानुवाक्यायेकत्वऽएकदेवत्यत्वं हेतुं ब्रुवन्ती एकदेवताकानां सिद्धं तन्त्रोच्चारणं दर्शयति · दर्शपूर्णमासयोरेव द्रव्यभेदेऽपि दध्नः पयसश्च देवताया इन्द्रस्य तद्गुणस्य चाश्राव्यत्वस्य[1] समानत्वात्तन्त्रेणैव यागऽउच्चारणं भवति · देवतायां समानायामपि देवतागुणस्योपांशुत्वादेर्भेदे सति सहोच्चारणं न भवति यथा प्रकृतावेवोपांशुयाजाग्नीषोमयोः पुरोडाशाग्नीषोमयोश्च · इह देवतातद्गुणयोः सामान्ये यागस्य तन्त्रेणानुष्ठानमुच्यते · अत्र सिद्धमेव देवतागुणसामान्ये तन्त्रेण यागानुष्ठानमुपजीव्य भेदो यागस्य भेदेनानुष्ठानपूर्वं निषिद्धः[2] न द्रव्यभेदे गुणयोगादिति वात्स्य इति (१. ५. १२.) न पुनरुक्तिदोषः ॥ देशैकत्वे कालैकत्वे च प्रधानानां सहप्रयोग उक्तः · अथ तदेव देशकालैकत्वं चिन्त्यते । दर्शपूर्णमासयोराग्नेयादीनि प्रधानानि[3] · तत्र देशकालौ श्रूयेते[4] समे दर्शपूर्णमासाभ्यां यजेत पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति । तथा चातुर्मास्येषु प्राचीनप्रवणे वैश्वदेवेन यजेत वसन्ते वैश्वदेवेन यजेतेति । किमेतौ देशकालौ तन्त्रमुत[5] भेदेनेति · यस्मिन्नेव समे यस्यामेव च पौर्णमास्यामाग्नेयस्तस्मिन्नेव समे तस्यामेव पौर्णमास्यामग्नीषोमीय इति उत समान्तरे पौर्णमास्यन्तरऽइति । तत्र पूर्वपक्षमाह ·

देशकालौ विरोधे ॥५॥ एतौ देशकालौ अङ्गत्वाद्द्रव्यदेवतवदुत्पत्ति-

---

१) ?चश्राव्यत्वस्य २. २) °षिद्धं २. ३) प्रधानानि प्रधानानिः २. ४) श्रूयते २.
५) Thus the Çâstradîpikâ at ११. २. १. तत्रमुत २.

विधिशेषौ[1] सन्तौ प्रतिप्रधानं भिद्येते अतस्तल्लस्य अङ्गानां सकृदनुष्ठानस्य विरोधि वर्तेते[2] विरोधकावित्यर्थः · त्रयाणामङ्गानां भावनयैव सम्बन्धो न परस्परम् · अतो देशादिविधीनां फलवाक्यस्य च न मिथः सम्बन्धः किंतु फलवाक्यं देशादिवाक्यानि च सर्वाणि भावनोत्पत्तिवाक्येन सम्बध्यन्ते · उत्पत्तिवाक्येषु चाग्नेयादयोऽन्योऽन्यनिरपेक्षा एवावगता[3] इति तथाभूतैः सम्बध्यमानौ देशकालावपि निरपेक्षाणामेव भवतः । तस्माद्यथा य इष्ट्या पशुनेत्यस्मिन्वाक्ये[4] तत्ताभिहिताभिरपीष्टिभिः प्रत्येकमेव कालः सम्बध्यतऽइति नैकस्यामेव पौर्णमास्यां सर्वाः क्रियन्ते तथा आग्नेयादिभिः प्रत्येकमेव कालादीनां सम्बन्धादेकस्यामेव पौर्णमास्यामाग्नेयं कृत्वापरस्यामग्नीषोमीयमित्येवं षट्सु पर्वसु षड्यागाः कर्तव्याः । न चैवं फलवाक्यावगतसाहित्यबाधः · तत्र ह्येतावदवगतम् एकमेव फलं सर्वैः साध्यते न प्रत्येकं फलस्य पृथङ्निष्पत्तिरिति न कालभेदाद्बाधः । यथा पौर्णमासीत्रिके अमावास्यात्रिके च द्वयोः पर्वणोः निष्कृष्यमाणेऽपि[5] न फलं प्रति साहित्यं बाध्यते तथा षण्णामपि निष्कर्षे द्रष्टव्यम्[6] । यदा चैवमुत्पत्तिवाक्यशेषत्वं कालादीनाम् तदोत्पत्तिवाक्ये प्रधानमात्राणां निरङ्गानां विधानात्तन्मात्राणामेवामू देशकालौ नाङ्गानां प्रधानदेशकालत्वम् · तानि तु कामं कालान्तरादिष्वपि कर्तव्यानीति प्राप्ते सिद्धान्तमाह ·

न कृत्स्नोपदेशात् ॥ ६ ॥ यदुक्तम् देशकालावुत्पत्तिविधिशेषत्वाद्द्रव्यदेवतवत्प्रतिप्रधानं भिद्येतेऽइति यच्चोक्तम् प्रधानमात्राणां निरङ्गानां देशादिविधानम् नाङ्गानामिति तन्न । कुतः कृत्स्नोपदेशात् कृत्स्नानां प्रधानानां साङ्गानां तस्मिन्देशे तस्मिन्काले वोपदेशात् प्रयोगविधानात्[7] · तथा हि दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येकेन शब्देनाग्नेयादीनां पृथगुत्पन्नानामपि परस्परसहितानामेव फलसाधनत्वेन विधानादेकः प्रयोगो गम्यते · तमेवैकप्रयोगापादकं दर्शपूर्णमासशब्दमुपजीव्य देशकालविधानात्तावपि प्रयोगशेषावेव नोत्पत्तिशेषौ ·

---

1) विशेषौ २. 2) वर्तते २. 3) Thus the Çâstradip. एवगता २. 4) य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वेत्यस्मिन्वाक्ये Çâstradip. 5) Thus the Çâstradip. निकृ° २. 6) इष्टव्यं २. and Çâstr. 7) ? विधानाद्विधानात् २.

यद्यपि भावनयैवाङ्गानां सम्बन्धो न परस्परम् तथापि नोत्पत्तिवेलायामङ्गसम्बन्धः · स हि प्रथमं भाव्यमपेक्षते तल्लाभश्च फलवाक्ये[1] तेन फलवाक्यावरुद्धानामुत्पत्तिवाक्यानामङ्गसम्बन्धः · फलवाक्ये च फलं प्रति विवक्षितसाहित्यानां विनियोगात्फलार्थिनां युगपत्सर्वेषु कर्तव्यतावगतिः[2] · यस्यां हि बुद्धावाग्नेयः कर्तव्यतयोपतिष्ठते तस्यामेवाग्नीषोमीयादयोऽपि प्रयोगविध्येकवाक्यत्वात् · तेन सर्वेषु कर्तव्यतयोपस्थितेषु[3] चिकीर्षितेषु च पौर्णमासीकालो विहित इति यैकैव पौर्णमास्युपात्ता सैवागृह्यमाणविशेषत्वात्सर्वेषा[4] भवति । तथा देशोऽपि । तस्मात्तुल्यौ देशकालौ । सौर्यादीनां पुनः पृथक्पृथक्स्वफले विनियुक्तानां पृथगेव कर्तव्यतावगमो नानाविधिविधेयत्वात् · तेन तैरन्योऽन्यानपेक्षैरेव य इष्ट्येत्येवमादिना कालः सम्बध्यतऽइति नास्ति तुल्यत्वम् · यदा चैवं प्रयोगवाक्यशेषत्वं कालादीनाम् तदाङ्गानामपि[5] तत्कालत्वं सिध्यति · तथा हि साध्यसाधनांशयुक्तावगता[6] भावना कथमितीत्थम्भावमपेक्षते भावनागतश्च रूपविशेष इत्थम्भावः प्रज्ञातरूपा च भावना कालादीनपेक्षते · तेन प्रकारापेक्षायां भावनायाम् तत्प्रकारत्वेन प्रयाजादिष्ववगतेषु सामस्त्यरूपेण भावनाख्ये व्यापारे प्रयोगापरपर्यायेऽवगते तच्छेषत्वेन कालादयो विधीयन्तऽइत्यङ्गानामपि तऽएव देशादयो भवन्ति । द्रव्यदेवतं पुनर्न समस्तप्रयोगसम्बन्धित्वेन विधीयते अनपेक्षितत्वादयोग्यत्वाच्च · न ह्यग्न्वाधानबर्हिःस्तरणाद्यनुरक्तस्य प्रयोगस्य द्रव्यदेवतापेक्षा नापि तन्निष्पत्तौ द्रव्यदेवतं समर्थम् किंतु फलभावनावयवयागरूपनिष्पादनेन[7] द्रव्यदेवतमपेक्षितत्वाद्योग्यत्वाच्च सम्बध्यते । तस्मान्न प्रधानसम्बन्धि द्रव्यदेवतमङ्गानां भवति · कालादयश्चाग्नेयादिकरणिकया[8] फलसाधनया[9] समग्ररूपया सम्बध्यमानास्तदन्तर्गतानामङ्गानामपि भवन्तीति विशेषः । अतः साधूक्तम् न कृत्स्नोपदेशादिति । एवं वैश्वदेवादिष्वपि प्रधानानामङ्गानां च देशे काले च कृत्स्नोपदेशो ज्ञेयः ॥ ॥ केचिदेवं व्याचक्षते । देशकालौ

---

1) Thus २. and Çâstradip. °वाक्यैः २. 2) °ताचगतिः २. 3) ? °योरूप° २. कर्तव्यतयावगतेषु Çâstr. 4) सैवागृ° २. 5) ? तदङ्गा° २. 6) °शेयुता २. 7) °फलभावयवयाग° २. 8) °यस्त्वाग्ने° Çâstr. 9) फलं साध° २. फलभावनया Çâstr.

विरोधे ॥५॥ कर्मादीनां सहत्वकरणानां परस्परं विरोधे सति देशकालौ बलवन्तौ नान्यानि । कुतः सहप्रयोगस्य शब्दादवगतत्वात् कर्मसामान्यादिरशाब्दत्वादिति · तथा हि दैकाहिकचातुर्मास्येषु पर्वणां कर्मभेदे दक्षिणाद्रव्यभेदेऽपि देशकालैक्यात्सहप्रयोगः · यथा च फलभेदेन कर्मभेदेऽपि समानतन्त्रेऽग्राग्रयणे शुनासीरीयेऽपि सौर्यस्य दक्षिणाभेदेऽपि देशकालैक्यादेव सहप्रयोगः । तस्माद्विरोधे देशकालौ बलवन्तौ · तौ चेत्समानौ तर्हि कर्मादिष्वसमानेष्वपि तन्त्रैक्यं भवत्येवेति । अस्मिन्व्याख्याने न कृत्स्नोपदेशादित्येतत्सूत्रं[1] पूर्वपक्षमुत्थाप्य पूर्ववदेव व्याख्येयम् ॥ ॥ अथेदं चिन्त्यते । प्रकृतौ ज्योतिष्टोमे सोमक्रयोत्तरकाले आतिथ्यान्ते[2] उपसदन्ते च सुब्रह्मण्याह्वानं श्रूयते । तत्र चैवं निगदोऽस्ति इत्यहे सुत्यामागच्छ मघवन्निति ब्रूयादिति[3] · इतिकरणेन च संख्योच्यते त्र्यहे सुत्यामागच्छ द्व्यहे सुत्यामागच्छेत्येवं ब्रूयादित्यर्थः । तदिदमप्रधानकालत्वाद्द्वादशाहे तन्त्रं भवति अप्रधानकाले सकृदसंनिपातादिति (१.७.१५) वक्ष्यमाणन्यायात् · न हीदं प्रधानकालम्[4] · उपसत्काले तु सकृदनुष्ठितमेव सर्वेषामुपकरोतीति तन्त्रमेव भवति · सुत्याकालीनं तु प्रधानकालत्वात्प्रतिसुत्यमावर्तते · तत्रोपसदातिथ्यक्रयकालीने तन्त्रेण क्रियमाणे सुब्रह्मण्याह्वाने संदेहः किं सर्वेषामह्नां पृथक्पृथगुपलक्षणम्[5] द्वादशाहे त्रयोदशाहऽइत्येवम् उत तन्त्रेण द्वादशाहऽइत्येवम् · तत्र पूर्वपक्षमाह ·

अहर्गणे सुब्रह्मण्यायाः सर्वोपलक्षणं प्रकृतिवत् ॥७॥ अहर्गणे द्वादशाहादौ उपसत्कालीनायाः सुब्रह्मण्यायाः निगदे सर्वेषां[6] सौत्यानामह्नामुपलक्षणं कर्तव्यम् । प्रकृतिवत् यथा प्रकृतौ त्र्यहे सुत्यामित्युक्तम् इह तूपसदह्नां द्वादशसंख्यया विवृद्धत्वाद्द्वादशाहऽइति वक्तव्यम् · तत्र प्रकृताविकं सौत्यमहः तदुपलक्षितम् हे इन्द्र त्वं त्र्यहेऽतीति[7] सुत्यां प्रत्यागहेति · इह तु द्वादश सौत्यान्यहानि · तेनेहापि प्रकृतिवदेव तानि सर्वाण्युपलक्षणीयानि न चाहः-

---

1) ? °दित्येतत्सूत्रं पूर्ववदुःऽत्सूत्रं २. 2) °थ्यंते २. 3) See ३.३.४.१२. 4) °न्नं कालं २. 5) Thus the Çâstradîp. at ११.४.२२. °मह्नां पृथक उप° २. 6) सर्वासां २. 7) ? त्र्यह्नीते २.

शब्देनागृह्यमाणविशेषत्वात्सर्वोपलक्षणं सिध्यतीति वाच्यम् · संख्याशब्देन विशेषग्रहणात् द्वादशाह्नऽआगहीत्युक्ते प्रथमस्यैव सौत्यस्याह्न उपलक्षणम् न द्वितीयादेः तस्माद्द्वितीयसौत्यस्यार्थे त्रयोदशाह्नऽइत्येवं प्रयोज्यम् तृतीयस्यार्थे चतुर्दशाह्नऽइति एवं द्वादशार्थे त्रयोविंशाह्ने सुत्यामिति · एवं सर्वेषां सौत्यानामुपलक्षणे प्राप्ते सिद्धान्तमाह ·

तन्त्रकालकर्म प्रत्यक्षमविधानात् ॥ ८॥ तन्त्रेत्यविभक्तिको निर्देशः तन्त्रेणेत्यर्थे · कालसंयुक्तं कर्म कालकर्म तत् द्वादशाह्ने सुत्यामागहीत्येवं तन्त्रेण सकृत्सुत्याशब्दोच्चारणेनैव कर्तव्यम् न तु प्रतिसुत्यं त्रयोदशाह्नऽइत्यादिना पृथक्सुत्याशब्दोच्चारणेन । कुतः प्रत्यक्षमविधानात् न ह्येवं विधानमस्ति यत्प्रत्यक्षं प्रतिसुत्यमुच्चारणं कार्यमिति । ननु प्रकृतिवद्विकृतिः कर्तव्येति चोदकेन विधानं भविष्यति प्रकृतावेकं सौत्यमहस्तस्योपलक्षणं कृतम् त्र्यह्ने सुत्यामागहीति अतः प्रकृतिवदेव विकृतावपि सर्वाणि सौत्यान्यहान्युपलक्षणीयानीति · अत्रोच्यते · न हि प्रकृतौ सुत्योपलक्षणं चिकीर्षितम् न हि तयोपलक्षितया किंचिद्दृष्टं प्रयोजनमस्ति अतो दृष्टमेव कल्प्यम् · अत्र तु सुत्यामागह मघवन्नित्येवं सुत्यासम्बन्धिदेवतेन्द्रस्य स्मरणाद्रूपसंस्कारमात्रं विवक्षितम् · संख्याशब्दोऽहःशब्दश्चार्थसिद्धत्वादविवक्षितनिर्देशमात्रम् · तच्च स्मरणमुपसत्कालीनानामह्नामुच्चारणद्वारेण [1] · तेनाहर्गणे येन केनचिदह्ना कृतं स्मरणमिति नाहरन्तरप्रकाशनेनार्थः । तच्च प्रधानकाले क्रियमाणमगृह्यमाणविशेषत्वात्सर्वार्थं भवति · तत्र च मुख्यत्वात्प्रथमेनाह्नोपलक्षणमुचितम् । तच्चात्मपक्षाविशेषितमह्नां [2] गणानमकर्मकालत्वाच्चागृह्यमाणविशेषं सर्वेषामुपकरोति · तस्मादाद्ये क्रयणीयेऽह्नि द्वादशाह्ने सुत्यामागहेति वक्तव्यम् द्वितीये तु एकादशाह्नऽइति तृतीये तु दशाह्नऽइति एवं सर्वेषु । हे मघवन् हे इन्द्र द्वादशाह्नेऽतीते सति सुत्यां प्रति भवतागन्तव्यमिति एवमेतदिन्द्रस्य सुत्यां प्रत्यामन्त्रणम् । ननु चास्मिन्नपि पक्षेऽदृष्टमेव प्रयोजनम् दृष्टस्याभावात् यत इन्द्र आमन्त्रणं न शृणोति न च श्रुत्वा सुत्यामागच्छति [3] देवतानां विग्रहवत्त्वस्य मीमांसकैर-

1) ? °लीनामह्ना° २. 2) ? तच्चात्मेप° २. 3) ? श्रुत्यासत्याग° २.

नङ्गीकारात् इन्द्रशब्दस्यैवात्र देवतात्वम् न च शब्दस्यामन्त्रणश्रवणमागमनं वा घटते · सत्यम् · अनेन प्रकारेण याग एव स्तूयते[1] · येन तत्साधनान्यचेतनान्यपि[2] चेतनवत्संस्तूयन्ते · यथा श्रोतारो ग्रावाण इति न हि ग्रावाणः शृण्वन्ति · तथा स्तुत्यर्थमेवमुच्यते · यथा तथा शृणोतु देवः सविता हवं म इति च एवमनागच्छन्नपीन्द्र आगच्छतीव अशृण्वन्नपि सविता शृणोतीवेति । ननु यागस्तुत्या किं प्रयोजनम् · उच्यते · दृष्टमेव[3] यजमानस्योत्साहोत्सादनम् । स्तुत्योपलक्षणे पुनर्दृष्टस्य लेशोऽपि नास्तीति देवतास्मरणपक्ष एव श्रेयान् ॥ ॥ अथेदं विचार्यते । ब्रह्म दृंहेति मैत्रावरुणदण्डेन समन्तं त्रिः पर्यृषति (६. ३.११.) स्फ्येन पदं त्रिः परिलिखति अस्मे रमस्वेति (७. ६.१२.) त्रिरग्निं संमार्ष्टीति तत्र क्रियावृत्तौ सत्याम् किं प्रतिक्रियं मन्त्रावृत्तिः उत सकृदेव सर्वादाविति । तत्र क्रियायाः प्रधानत्वान्मन्त्रस्य तदङ्गत्वात्प्रधानभूतायाः क्रियाया आवृत्तौ सत्यां मन्त्रस्याप्यावृत्तिप्राप्तौ सिद्धान्तमाह ·

एकद्रव्ये कर्मावृत्तौ सकृन्मन्त्रवचनं कृतत्वात् ॥ ९॥ एकस्मिन्द्रव्ये यूपावटपदाग्न्यादिके कर्मावृत्तौ क्रियाया आवृत्तौ अभ्यासे[4] सकृदेकवारमेवादौ मन्त्रवचनं मन्त्रपठनं कार्यम् न प्रतिक्रियम् । कुतः कृतत्वात् मन्त्रेण यत्कर्तव्यं पदार्थस्मारणं तस्य च कृतत्वात् · अपि च वस्तुतश्च क्रियाभेद[5] एव नास्ति किं तर्हि साभ्यासा इयमेकैव क्रिया तस्या आदौ च मन्त्रवचनमुक्तम् तेन सर्वावृत्तीनामादावेव कर्तव्यम् ॥ ॥ अथेदं चिन्त्यते । दर्शपूर्णमासयोः श्रूयते चतुरो मुष्टीन्निर्वपतीति अयुजो मुष्टीन् लुनाति त्रिधातु पञ्चधातु वा वेदिं[6] स्तृणाति चतुर्गृहीतमाज्यं गृह्णातीति च · तत्र च मन्त्राः देवस्य त्वेति (१. १०.) बर्हिर्देवसदनं दामीति[7] ऊर्णम्रदसं त्वा स्तृणामीति (२. २.) धाम नामासीति (१. ३१.) च · ते किं सकृत्प्रयोक्तव्याः उत निर्वापे लवने च प्रतिमुष्टि स्तरणे प्रतिधातु आज्यग्रहणे प्रतिस्रुवं[8] भेदेनेति संशये सति[9] संख्यानामेकक-

---

1) ? श्रूयते २. 2) ? तस्माधनान्यचे° २. 3) ? इष्टमेव २. 4) °सेन २. 5) ? वस्तुतस्त्वक्रि° २. 6) वेदं २. 7) Thus २. °नं दा° Çâstradîp. at Jaim. ११. ४. ३६. 8) °स्तुवं २. 9) स २. संदेहे ससंख्यातां Çâstradîp.

र्मत्वात्पूर्वाधिकरणान्यायेन तदारम्भे मन्त्राणां सकृत्प्रयोगे प्राप्ते सिद्धान्तमाह ·

न ग्रहणलवनस्तरणाज्यग्रहणेषु [1] तु ॥ १० ॥ तुशब्दोऽवधारणे । हविर्ग्रहणे बर्हिषो लवने बर्हिःस्तरणे आज्यग्रहणे च नैव सकृन्मन्त्रवचनम् · किंतु हविर्ग्रहणे बर्हिषो लवने च प्रतिमुष्टि मन्त्रप्रयोगः पृथक्कार्यः बर्हिष स्तरणे च प्रतिधातु आज्यग्रहणे च प्रतिस्रुवमिति । ननु किंकारणं मन्त्रस्य कृतत्वं [2] नास्ति ग्रहणादिषु · ग्रहणे तावदन्यऽएव व्रीहयः प्रतिमुष्टि निरुप्यन्ते लवने चान्यऽएव दर्भाः प्रतिमुष्टि लूयन्ते बर्हिःस्तरणे च प्रतिधातु अन्यदेव स्तीर्यते आज्यग्रहणे च प्रतिस्रुवमन्यदेवाज्यं गृह्यतऽइति · तेन यत्रैव मन्त्रः प्रयुक्तस्तत्रैव [3] कृतसंस्कारलाभो जातः अतः सर्वेषां तत्संस्कारलाभाय मुष्ट्यादिषु भेदेनैव मन्त्रप्रयोगो न सकृदिति । यद्यप्येकः पदार्थो निर्वापादिः तथापि प्रत्यभ्यासं संस्कारभेदो विद्यते मन्त्रवता निर्वापेण द्रव्यं संस्कर्तव्यम् अतो यस्मिन्नेव मुष्टौ मन्त्रो नोच्यते तस्यैव मन्त्रकृतेन संस्कारेण हीनं स्यात् · कार्यप्रयुक्तो हि संस्कारो न क्रियास्वरूपयुक्तः कार्यं चात्र भिन्नम् · तस्मात्प्रतिमुष्टि मन्त्रावृत्तिरिति · एवं लवनस्तरणाज्यग्रहणेष्वपि ज्ञेयम् ।

वचनादाज्ये ॥ ११ ॥ आज्ये इत्याज्यग्रहणे द्वितीयादिग्रहणेषु चतुर्थादिग्रहणेषु वा वचनान्मन्त्रनिवृत्तिर्भवति । स एतेन यजुषा सकृज्जुह्वां गृह्णाति त्रिस्तूष्णीमितेनैव यजुषा सकृदुपभृति गृह्णाति सप्त कृत्वस्तूष्णीमितेनैव यजुषा सकृद्ध्रुवायां गृह्णाति त्रिस्तूष्णीमित्येकं पक्षमभिधाय पक्षान्तरमप्याह तदाहुस्त्रिस्त्रिरेव यजुषा गृह्णीयात्त्रिवृद्धि यज्ञ इति पुनरपि प्रथमं पक्षमुपसंहरति तद्व नु सकृत्सकृदेवात्रो ह्येव त्रिर्गृहीतं सम्पद्यतऽइति (१. ३. २. १८.) ।

मुष्टौ चोत्तमे ॥ १२ ॥ हविर्ग्रहणे उत्तमे चतुर्थे मुष्टौ चकाराद्वचनादेव मन्त्रनिवृत्तिः · श्रूयते हि शाखान्तरे चतुर्थं तूष्णीमिति ॥ ॥ ज्योतिष्टोमे स्वप्नार्थ मन्त्रः अग्ने त्वं सु जागृहीति (४. १४.) · तथा नदीतरणे उदकं चेत्तरेत्तदभिमन्त्रयेतोन्दतीर्बलं धत्तेति (२५. ११. २२.) · तथाववर्षणेऽप्ययमेवोन्दतीरिति मन्त्रो ऽववृष्टश्चेत्युक्तत्वात् (२५. ११. २३.) · अमेध्यदर्शने सूर्योपस्थानमन्त्रः

1) °लवनस्तर° १. and Jaim., लवनास्तर° २. 2) ?? °वमिति यत्कारणमंत्रक° २.
3) Thus the Çâstradip. तथैव २.

अवहं मन इति (२५. ११. २४.) · तथा दीक्षितस्य वनीवाहने प्रयाणमन्त्रः प्रेदग्ने ज्योतिष्मानिति (१२. ३२.) । तत्र संशयः · यदा दीक्षितः प्रबुद्धः पुनः स्वपिति अनेकस्रोतसं वा नदीं तरति संतरन्नभिवृष्यते[1] युगपच्चानेकमेध्यानि पश्यति पुनः विश्रम्य प्रयाति च तदा किमेषां मन्त्राणामावृत्तिः उत सकृत्प्रयोग इति · तत्र निद्रा मध्ये प्रबोधैरल्पैर्व्यवधीयते नदी च बहुस्रोतोयुक्ता द्वीपैः वृष्टिश्च विच्छेदैः अमेध्यानि च देशैः प्रयाणं विश्रान्तैः · तदा एतैरन्तरायैर्निमित्तेषु भिद्यमानेषु विशेषग्रहणान्नैमित्तिका मन्त्रा आवर्तनीया इति प्राप्ते सिद्धान्तमाह ·

स्वप्ननदीतरणाववर्षणामेध्यदर्शनप्रयाणेषु तु सकृत्कालद्रव्यैकार्थत्वात् ॥१३॥ अत्र त्रयो हेतवः कालैकत्वात् द्रव्यैकत्वात् अर्थैकत्वात् इति । तत्र यथासम्भवं विभागः । तत्र पुनः स्वप्ने एकार्थत्वात् सर्वरात्रिगतां कृत्स्नां निद्रामुद्दिश्य मन्त्राभिधानादेकमेव निमित्तम् अतः सकृदेव मन्त्रप्रयोगः · केचित् दीक्षितोऽमनोज्ञं स्वप्नं दृष्ट्वा ज्ञपेदित्येतदुदाहरन्ति (२५. ११. २०.) तत्र युगपदनेकस्वप्नदर्शने कालैकत्वात्सकृन्मन्त्रवचनमिति व्याचक्षते च । तथा नदीं वृष्टिं च कृत्स्नामेवाभिसंधाय[2] मन्त्रं प्रयुङ्क्ते[3] न चावान्तरनिद्राम् नाप्येकं स्रोतः[4] नाप्येकां वर्षधाराम् · तस्मात्सकृत्प्रयोगः · तत्र नदीसंतरणे स्रोतसां भेदेऽपि नदीद्रव्यस्यैकत्वात्सकृन्मन्त्रः अववर्षणे कालैकत्वात् । अमेध्यदर्शनेऽपि कालैकत्वादेव । प्रयाणेऽप्या समीहितप्राप्तेरेकं प्रयाणमिति तदर्थस्य मन्त्रस्य सकृदेव प्रयोगः एकार्थत्वात् ॥ अथ यत्र कालभेदेन पुनस्तदेव निमित्तमापतति तत्रापि सकृन्मन्त्रवचनम् उत भेदेनेति · अभिहितमेव तदिति कृत्वा सकृन्मन्त्रवचने प्राप्तेऽआह ·

न निमित्तभेदात् ॥१४॥ कालान्तरे पुनरेषु निमित्तेषु जातेषु पुनर्मन्त्रवचनं कर्तव्यम् न पूर्वाभिहितेन मन्त्रेण कार्यसिद्धिः · भिन्नं[5] ह्यत्र निमित्तं तत् भेदाच्च नैमित्तिकस्यावृत्तिर्भवत्येव ।

---

1) ? नदीं तरभिसतरंनभिदृश्यंते २. The Çâstradip. at Jaim. ११. ४. ४३. reads तरति संतानेन चाभिवृष्यते. 2) ° त्तिसंधाय Çâstradip. 3) Thus the Çâstradip. प्रयुक्तं २. 4) नाप्ये स्रोतः २. 5) भिनत्ते २.

अप्रधानकालं सकृदसंनिपातात् ॥ १५ ॥ वसन्ते ब्राह्मणोऽग्नीनादधीतेत्यनारभ्याधीतमग्याधानमग्निहोत्रादीनामङ्गमिति[1] कृत्वा चिन्त्यते किमङ्गं सदाधानं प्रतिकर्म प्रतिप्रयोगं च भेदेन कर्तव्यम् उत सर्वप्रयोगानां साधारणं सकृदिति । तत्र कर्माङ्गत्वे प्रयाजाद्यन्याङ्गवत्प्रतिकर्म भेदेन कर्तव्यम् · न च बर्हिःकालत्वेनागृह्यमाणविशेषता यद्यस्यानन्तरं क्रियते तत्तदर्थमित्यानन्तर्येण विशेषग्रहणात् । तस्मात्प्रतिकर्म भेदेनाधानप्राप्ताविदमुच्यते अप्रधानकालं यदङ्गमाधानसदृशम्[2] तत्सकृदेव कर्तव्यम् न भेदेन कर्मणः-कर्मण आदौ । कुतः असंनिपातात् न चैतत्कस्यचित्कर्मणः प्रक्रमे कर्ममध्ये वा संनिपतितम् येन विशेषग्रहणं स्यात् · किंतु यदेव किंचिदग्निकार्यं निमित्तवशात्कामवशाद्वा यथाकामं प्राप्तम् तदर्थमाधास्येऽग्नीनिति[3] · न तु[3] कंचिदेव कर्मविशेषमभिसंधायाधानम् · एवमनभिसंहितकर्मविशेषेण सर्वोद्देशेनाधाने कृते यद्यपि कारणवशात्किंचित्कर्म प्रथममापतति तथापि न तादर्थ्यमेव भवति प्रथमावस्थायामेव सर्वार्थत्वावधारणात् · तस्मादप्रधानकालीनत्वात्सकृदेव कार्यम् ।

यूपः ॥ १६ ॥ अप्रधानकालं सकृदित्यनुवर्तते । ज्योतिष्टोमेऽग्नीषोमीये यूप उपदिष्टः[4] सवनीयानुबन्ध्ययोस्त्वतिदिष्टः स किं त्रयाणामपि पशूनां तन्त्रम् उत प्रतिपशु भेदेन यूप उत्पादनीय इति । तत्र मुख्यत्वादग्नीषोमीयार्थस्यैव यूपस्यापकर्षो दीक्षासु यूपं छिनत्तीति · नेतरयोः · अतस्तयोः स्वकाले भेदेनोत्पादनीयो यूप इति प्राप्ते सिद्धान्त उच्यते । यूपोऽप्यग्याधेयवदप्रधानकालत्वात्त्रयाणां पशूनां साधारणः सकृदेवोत्पाद्यो न प्रतिपशु भेदेन · न हि मुख्यत्वमात्रेण श्रुतेः संकोचो ऽतोऽविशेषात्सर्वयूपापकर्षे[6] सत्यप्रधानकालत्वादगृह्यमाणविशेषो[7] यूपस्त्रयाणामेक एव साधारणो भवति । अग्नीषोमीयकाले क्रियमाणा अपि (ये) प्रोक्षणादयः संस्काराः यूपद्वारत्वात्तस्य च साधारणत्वात्तेऽपि तन्त्रेणैव भवन्ति न प्रतिपश्वावर्तन्ते ।

---

1) °तमग्याधा° २. 2) °कालं यदृदंग° २. 3) तदा वेत्यमतिसंधायासावाधत्ते (°मभिसं°!) यदेव किंचिन्निमित्तवशात्कामनावशाद्वा कर्तव्यं कर्मोपस्थास्यते तदर्थमाधास्येऽग्नीनिति Çâstrad. at Jaim. ११. ३. २. 3) Thus Çâstrad. ननु २. 5) ? ज्योतिष्टोमेऽग्नीषोमीये (प)शावुपदिष्टो यूपः Çâstradip. at Jaim. ११. ३. ३. ज्योतिष्टोमेऽग्निष्टोमे यूप उ° २. 6) तस्मादविशेषात्स° Çâstr. 7) °धानकालादगृ° २.

स्वरुश्च सङ्ख्यावचनात् ॥१७॥ यूपस्य स्वरुं करोतीति स्वरुः किमेकयूपानां[1] पशूनां तन्त्रम् उत प्रतिपशु भिद्यतऽइति संदेहः[2] · अञ्जनकालेऽस्योपादानात्तदपवर्गेऽपवर्गादञ्जनान्तरेऽन्यशकलोपादानम्[3] · यः प्रथमः शकलः स स्वरुरिति एकस्मिन्प्रकरणे यः प्रथम इति शास्त्रार्थः तेनैकस्मिन्नपि यूपे प्रकरणानां बहुत्वात्सम्भवन्ति बहवः प्रथमशकलाः · तेन भेदप्राप्तौ सिद्धान्त उच्यते । स्वरुरपि त्रयाणां पशूनामग्नीषोमीयसवनीयानूबन्ध्यानां साधारण एव न प्रतिपशु भिद्येत । कुतः संस्थावचनात् संस्थावचनं हि भवति स्वरुहोमेन यूपः संतिष्ठतऽइति · यदि च प्रथममेव हूयेत यूप एव साधारणो न भवेत् ।

तन्निर्वृत्तेश्च ॥१८॥ तस्मादेव यूपात्स्वरोर्निर्वृत्तेश्च निष्पत्तेश्च तस्य यः प्रथमः शकलः परापतेत्स स्वरुः कार्य इति · अतोऽपि साधारण एव · तत्र प्रकरणस्यानुपात्तत्वात् शकलशब्दोपात्तानां सर्वेषां शकलानां यः प्रथमः स उपादेयः · तेनैकस्मिन्यूपे एक एव प्रथमशकल इति · सोऽपि एकयूपानां सर्वेषां पशूनां यूपवत्साधारण एव स्यात् । अपि च छेदनकालऽएव व्यामोहनिवृत्त्यर्थं तन्नाशापहारपरिहाराय चावश्यमुपादाय रक्षितव्यः शकल इत्यगृह्यमाणविशेषत्वादपि साधारण एव ॥ ॥ अथ दर्शपूर्णमासादिषु फलदक्षिणावत्सु कर्मसु चिन्त्यते । किं यजमानेनैव सर्वं कर्तव्यम् उत द्रव्योत्सर्गदक्षिणादानादिके यजमाननियमोऽन्यत्रानियमो यजमानो वान्यो वा अथवोत्सर्गऽएव यजमानोऽन्यत्रान्य एवेति । किं प्राप्तम् · सर्वं यजमानेनैव कर्तव्यमिति · कुतः प्रयोगवचनस्थं ह्यात्मनेपदं साङ्गायां भावनायां फलार्थित्वं कर्तृत्वेन विनियुङ्क्ते · स यत्रैव कर्ता न स्यात् तत्कृतमेवोपकारं न प्राप्नुयात् · तस्मात्साङ्गं स्वयं कुर्यादिति · फलस्य[4] चोत्पद्यमानस्योत्पादयितृत्वेन प्रयोक्ता यजमान एवोच्यते होत्रादिसमाख्याश्च तथैव तत्तत्कुर्वाणस्यैकस्य वा कर्मभेदादित्यनेन न्यायेन भविष्यन्तीति । तस्मात्सर्वं यजमानेनैव कर्तव्यमिति प्राप्तऽआह ·

---

1) Thus Çâstrad. at Jaim. ११. ३. ७. चूपाणां २. 2) संदेह २. संदेहे Çâstrad.
3) Thus Çâstr. °न्तांतके २. 4) फल्यस्य २.

कर्माणि [१] पुरुषाणाम् ॥ १९ ॥ दर्शपूर्णमासादिकर्माणि [२] पुरुषाणां होत्रध्वर्य्वादीनां कर्तव्यं भवति न स्वयं यजमानस्य । कुतः परिक्रयाम्नानात् · श्रूयते हि परिक्रयः दर्शपूर्णमासयोर्ह्यैवैषा दक्षिणा यदन्वाहार्य इति [३] (११. १. ३. ७.) · ज्योतिष्टोमे च तꣳ शतेनैव दक्षयतीति (४. ३. ४. ३.) · स्वभावतश्च परिक्रयः परत्र क्रियते नात्मनि विरोधात् न ह्यात्मैवात्मानं परिक्रीणीते · तत्र यदि स्वयमेव यजमानः कुर्यात्ततः परिक्रयासम्भवेन परिक्रयो न क्रियेत तत्रास्य नित्यवदाम्नानं विरुध्येत । यच्चार्थिनः साङ्गं [४] कर्तव्यम् तत्तु प्रयोजकत्वेनापि सम्भवति · तत्रासति परम्पराप्रमाणे साक्षादेव कर्तृत्वं स्यात् · अस्ति तु प्रमाणं परिक्रयवचनम् तच्च कर्त्रन्तरसद्भावऽएव दृष्टार्थं भवति नान्यथा · तस्मात्प्रयोजकत्वेनापि कर्तृत्वसम्भवे सति परिक्रयस्य नित्यवदाम्नातस्य पाक्षिकत्वायोगात्तं नित्यमुपसंहर्तुमन्येषां पुरुषाणामेव कर्माणि [५] कर्तृत्वं सिद्धम् । एवं सर्वत्रापि पुरुषाणामेव कर्तृत्वे प्राप्तऽआह ·

प्रधानꣳ स्वामी फलयोगात् ॥ २० ॥ यत्प्रधानं द्रव्योत्सर्गरूपहविस्त्यागदक्षिणादानात्मकम् तत्स्वामी यजमानः करोति अन्यानि चाङ्गानि पुरुषाः कुर्वन्ति । कुत एतत् फलयोगात् प्रधानानुष्ठायिनो हि फलयोगो भवति प्रधानफलं च यजमानो भुङ्क्ते नाङ्गफलम् तस्य कर्त्रर्थत्वात् · तेन प्रधानमात्रवाचिनो धातोः परेण प्रत्ययेन तस्मात्तस्यैव फलार्थिकत्वं नियम्यते शेषस्य निर्वृत्तिमात्रं प्रतीयते न कर्तृविशेषः । ननु च प्रधानसमकर्तृकत्वादङ्गानामपि स एव कर्ता सेत्स्यति न तत्र प्रयोजकत्वेनापि कर्तृत्वानुग्रहात् · द्रव्योत्सर्गे ह्यक्रियमाणे न किंचिद्यजमानेन कृतं स्यादिति तं करोति · न ह्यात्मनेपदे फलार्थिकर्तृकत्वं गम्यते किं तर्हि भावनाक्षिप्तकर्तृत्वस्य सतः फलसम्बन्धित्वम् · अतश्च फलेन कर्तुरन्यत्र न गन्तव्यम् न तु [६] फलार्थिनोऽन्येन व्यापारकरणं [७] विरुध्यते तावता च सिद्धोऽङ्गेष्वनियम इति · अतोऽङ्गेष्वन्यकर्तृत्वं प्रधानमात्रे च स्वामिकर्तृत्वमिति । अन्येष्वपि कर्म कुर्वत्सु यजमानेन यत्नेन कृताकृतप्रत्यवेक्षणं

---

१) ? कर्माणि १. २. कर्मणि २. and thus also the quotation at १. २. ७. २) ? कर्माणि २. ३) °र्थमिति २. ४) ? साङ्गे २. ५) Thus २. ६) ननु २. ७) न्येतव्यापारकणं २.

कर्तव्यमेव · अन्यथा ह्यृत्विजः कर्मकर्तृत्वात्प्रमादेन सर्वं कर्म साधनतया यथाश्रुतं न कुर्वन्ति वैगुण्येऽपि तेषां स्वार्थविनाशाभावात् · तदुक्तं भट्टाचार्यैः यथै-वाध्वर्युणा पदार्थाः कर्तव्यास्तथैव यजमानेनाप्रमादार्थं प्रत्यवेक्षितव्या इति । कि-मेतावदेव स्वामी करोति · नेत्याह ·

पुरुषयोगिमन्त्रसंस्कारयोस्त्यागे सामर्थ्यात् ॥२१॥ पुरुषयोगी यो मन्त्रः तनूपा अग्नेऽसि तन्वं मे पाहीत्यादिकः (३. १७.) प्रत्यगाशीर्युक्तः संस्कारश्च पावनमुण्डनाधःशयनपयोव्रतादिरूपः [1] तयोः पुरुषयोगिमन्त्रसंस्कारयोः त्यागे लक्षणया त्यागकर्तरि यजमानेऽधिकारः । इष्टाकरणभूताः प्रत्यगाशिषो मन्त्रा उदाहरणम् ते च समाख्यया अध्वर्योः प्राप्नुवन्ति · तत्रोच्यते · कर्मफलमत्राशा-स्यम् [2] नऽर्त्विक्फलम् अक्रत्वर्थत्वप्रसङ्गात् · यजमानाच्च फलं दक्षिणालाभात्मकं प्रार्थनीयम् नाग्नेः · कर्मफलं च यजमानगामि तच्चात्र प्रत्यक् आत्मविषयत्वेन प्रा-र्थ्यतऽइति लिङ्गात्समाख्यां बाधित्वा यजमान एव प्रयुञ्जीत यतः स एवाशीःप्रार्थनं कर्तुं समर्थो नान्यः । संस्काराश्च केवलं प्रधानार्था भोक्तृत्वांशपातिनश्च न त्वङ्ग-प्रधानार्थाः कर्तृत्वांशपातिनो वा · ते तु तादृशं संस्कारं [3] यजमाने कुर्वन्ति येन याजमानेन [4] प्रधानं स्वं फलं जनयितुं समर्थं भवति · तेन क्षेत्रसंस्काराणां यथा बीजावपनार्थत्वम् [5] एवं प्रधानार्थत्वं संस्काराणाम् नाङ्गार्थत्वम् · प्रधानफलं हि यजमानो भुङ्क्ते नाङ्गफलम् तस्य क्रत्वर्थत्वात् · अतो भोक्तृत्वांशस्याः सन्तो यस्यैव फलं भुङ्क्ते तस्यैवोपकारका इति प्रधानार्थता · प्रयोजनम् अग्नीषोमीयवि-कारे [6] च नाभ्यञ्जनादियजमानसंस्काराणामप्रवृत्तिः । ब्रह्मचर्यव्रत्याशनरूपस्य [7] तपसोऽपि दुःखात्मकत्वात् दुःफलं कार्यविरोधिनमधर्मं क्षपयितुं [8] योग्यतास्तीति क्रतुप्रतिबन्धकपापक्षयणेनैवास्य क्रत्वर्थो लिङ्गप्रकरणाभ्यामवगम्यते [9] यजमा-नाय [10] च फलेनोत्पत्तव्यम् अतोऽपि फलसंस्कारत्वाद्याजमानत्वम् ।

वचनादन्यत् ॥२२॥ वचनाच्चान्यदुक्तव्यतिरिक्तमपि यजमानस्य भवति

---

१) ?? पावमानमुंडनाधः° २. २) ?°लमंत्रा° २. ३) तादृशंस्कारं २. ४) ?? यजमा-नेन २. ५) व्रीजावनार्थत्वं २. ६) ? प्रधानार्थता ॥ प्रयोजंगमग्निषोमीयतिकारे २. ७) व्रह्माशन° २. ८) चययितुं २. ९) ? क्रत्वर्थलिंगंप्रक° २. १०) ? यजमान्ये·

प्रधानयोगिमन्त्रसंस्कारेभ्योऽन्यदपीत्यर्थः । तद्यथा यजमानो वेदं करोति (१. ३. २२.) यजमान आज्यमवेक्षते (२. ७. १०.) यजमान उखां करोति (१६. ३. २३.) इत्यादि । वचनादृत्विजामपि संस्कारा भवन्ति हिरण्यमालिनो वाजपेयेन चरन्तीति [1] लोहितोष्णीषाः प्रचरन्तीति (२२. ३. २४.) ।

शेषमितरे यथाख्यम् ॥२३॥ यावद्यजमानस्य कर्तव्यमुक्तम् प्रधानं स्वामीत्यादिना (२०.) वचनादन्यदित्यन्तेन (२२.) ततः शेषमवशिष्टं कर्म इतरे स्वामिव्यतिरिक्ता होत्रध्वर्य्वादयो यथाख्यं कुर्वन्ति आख्याः अनतिक्रम्य यावत्य आख्यास्तावतीनामनतिक्रमो यथाख्यम् । तद्यथा होता होत्रम् उद्गातौद्गात्रम् अध्वर्युराध्वर्यवम् ब्रह्मा ब्रह्मत्वमिति समाख्ययैव तेषां विनियोगः । तच्च प्राक्प्रपञ्चितम् कर्मणि पुरुषाणामिति (१७.) · अनेन [2] अन्येषां पुरुषाणां कर्तृत्वे सिद्धेऽपि कति तेऽन्यऽइति संशये सति विशेषाभावादनियमः प्राप्नोति सर्वथा परिक्रयसिद्धेः अथवात्मनेपदाद्यजमानस्यैव कर्तृत्वे प्राप्ते परिक्रयवशादन्योपादानम् स चैकेनापि सिध्यतीत्येक एवान्यः स्यात् अध्वर्य्वादिसंज्ञास्तु कर्मनिमित्ता एकस्यापि पाचकलावकवद्भविष्यन्तीति अनेन सूत्रेण यथाख्यं यावत्संज्ञं कर्तृभेद उच्यते । कर्मनिमित्ता एताः संज्ञास्तदा स्युः यदि प्रवृत्तिसमये तदुत्तरकालं वा एताः श्रूयेरन् · वरणं त्वप्रवृत्ताभ्यर्थनम् · तत्रैताः श्रूयन्ते ब्रह्माणं वृणीते (२. १. १८.) उद्गातारं वृणीते होतारंवृणीते अध्वर्युं वृणीते एवमुन्नेतारं वृणीते एवम् [3] · न च तदा कर्मनिमित्तत्वं सम्भवतीति वरणनिमित्तत्वम् । भिन्नानि च वरणानि · न चैकस्मिन्बहूनि वरणानि युज्यन्ते ऽदृष्टार्थत्वात् न हि वृतस्य वरणं दृष्टार्थम् · तेन वरणानां तन्निमित्तसंज्ञानां चासंकीर्णविषयत्वाद्यावद्वरणं [4] यावत्संज्ञं च कर्तृभेदः कर्माङ्गम् । अतो यस्मिन्कर्मणि यावत्यः संज्ञाः तावत्संख्यैः कर्तृभिस्तत्कर्म कर्तव्यम् · अतश्चतुर्भिर्दर्शपूर्णमासौ षड्भिः पशुबन्धः [5] पञ्चभिश्चातुर्मास्यानि षोडशभिर्ज्योतिष्टोम इति यथाख्यमित्यनेन सिध्यति · तेन न पुनरुक्तता [6] । ननु किमिदं वरणम् उक्तम् अप्रवृत्तस्य प्रार्थनमिति · तच्च

1) See १४. १. २३. 2) इत्यनेन २. 3) एतत् २. 4) ? वासंकी° २. 5) ? पशुःसंबंधः २. 6) ? °क्तमा २.

मद्दुर्विजां होतृकाणां च मन्त्रेण अग्निर्मे होता त्वं मानुष इत्यादिना लौकिकया वा[चा] च अध्वर्युर्मे भवानस्त्वित्यादिकया · किमेतावतां होत्रादित्वे भवति को दोषः न ह्येताः संज्ञाः प्राग्दृश्यन्ते · वरणोत्तरकालं च य एवं वृतः स्वयं चैवमस्तानीति [1] मनसा संकल्पयति तत्र होत्रादिसंज्ञाः प्रसिद्धवद्वेदे याज्ञिकप्रयोगे च व्यवह्रियमाणा दृष्टाः · तस्माद्य एवं वृत एवं च संकल्पयति स एव होत्रादिसमाख्यां लभते · सत्रेषु च दृष्टार्थवाहरणस्यार्थलोपान्निवृत्तिः तदलाभे वाधर्युर्गृहपतिं दोहयित्वेत्यादिव्यवहारदर्शनात्संकल्पादेव होत्रादित्वसिद्धिः · प्रकृतावपि संकल्पो निमित्तमेव यो हि व्रियमाणो नेछति न स होतेत्युच्यते । तस्मात्प्रकृतौ वरणविधानात्तन्मिश्रः संकल्पो निमित्तम् सत्रेषु तु संकल्पमात्रम् प्रयोगदर्शनात् · न चैवं वैरूप्यादशोभनं मन्तव्यम् प्रमाणबलादीदृशस्यैव शोभनत्वात् · न हि सत्रे होत्रादिशब्दानां गौणत्वे किंचित्प्रमाणमस्ति · अथात्यन्तमेकरूप्येण कार्यम् ततः संकल्प एव निमित्तम् · य एव क्रतुमेतदौपयिकं होत्रादिभावमात्मनः संकल्पयति स एव होत्रादिशब्दैरुच्यते । तथा चोक्तम् सत्रे तु स्वयंकर्तृकत्वाहरणभरणयोरग्रहणाद्विनैव ताभ्यामवैगुण्यमिति योग्यतामात्रेणाध्वर्युत्वादिसिद्धिरिति ।

उपवीतिनः ॥२४॥ सर्वेऽऋत्विग्यजमाना उपवीतिनः सव्यस्कन्धस्थितयज्ञोपवीतधारिणः कर्म कुर्वन्तीति शेषः · उद्धृते दक्षिणे पाणाऽउपवीत्युच्यते [2] बुधैरिति स्मरणात् (मनु° २.६३.) · तथा सूत्रान्तरे यज्ञोपवीती देवकर्माणि करोतीति (शाङ्खायनश्रौत° १.१.६.) ।

प्राच्युदग्वा ॥२५॥ सर्वाणि कर्माणि प्राचि प्राक्संस्थान्युदगुदचि उदक्संस्थानि वा कर्तव्यानि [3] · तं प्राञ्चमनुसमस्यति प्राची हि देवानां दिगथो ऽउदञ्चमुदीची हि मनुष्याणां दिगिति (१. ८. ३. १८.) · तथो हास्यैतत्प्रागेव कर्म कृतं भवति [4] तद्धि प्राङ्निदध्यात् अथोदक् प्राङेव यज्ञोऽनुसंतिष्ठाताऽइति तथो हास्योदगेव कर्मानुसंतिष्ठतऽइति प्राच्युदचि च कर्माणि संतिष्ठेरन्निति श्रुतेः पात्राणामासादनं दक्षिणात आरभ्योदक्संस्थम् पश्चादारभ्य प्राक्संस्थं वा कार्यम् ·

1) ? चैवमनसानीति २. 2) पाणावुच्य° Manu. 3) कर्तव्यं २. 4) ? °तीति २.

परिस्तरणपर्युक्षणादिकमप्युत्तरतः समापनीयम् · त्रिरुल्लेखनाद्यपि प्राक्संस्थम् उदक्संस्थं वा · एवं सर्वत्रोह्नीयम् · दक्षिणतस्त्वेवोदङ्कोह्नीत्तथा ह्युदग्भवतीति [1] (५. २. १. ४.) दक्षिणतः परीत्य पूर्णपात्रं निनयति तथा ह्युदग्भवतीत्यादिः (१. ४. ३. १.) प्राङ्मुखैरुदङ्मुखैश्च कर्तृभिः कर्माणि कार्याणीति गम्यते ।

आवृत्तिः सामन्तेषु प्रदक्षिणम् ॥२६॥ अथावर्तते सूर्यस्यावृतमन्वावर्तऽइति (१. ४. ३. १७-२०.) अथ स्तीर्णा वेदिमुपावर्तते (१. ३. ४. १०.) ग्रहणप्रतिगरहोमेषु च तुल्लीम् (३. ८. २०.) इत्येवमादौ यत्रावृत्तिः आवर्तनं भ्रमणं श्रूयते तत्रावृत्तौ प्रदक्षिणमावर्तनं कर्तव्यम् । यानि च परिस्तरणपर्युक्षणनित्यपरिषेकपदपरिलिखपिण्डपरिलेखनादीनि समन्ततः सर्वतः सर्वेषु पूर्वदक्षिणपश्चिमोत्तरपार्श्वेषु विधीयन्ते तानि सामन्तशब्देनात्रोच्यन्ते · तेषु सामन्तेषु च प्रदक्षिणं तत्परिस्तरणादिकं भवति पूर्वत आरभ्योदक्संस्थम् [2] । तद्यथाऽएतदेव पुरश्चरणं य एष तपति स एतस्यैवावृता चरेद्धुं गृह्णीतितस्यैवावृतमन्वावर्तेतेति (४. ६. ७. २१.) तथा अथावर्तते सूर्यस्यावृतमन्वावर्तऽइति तदेतां गतिमेतां प्रतिष्ठां गचेतस्यैवावृतमन्वावर्ततऽइत्येवमादौ (१. ४. ३. १७-२०.) सर्वत्र सूर्यावर्तनवत्प्रदक्षिणावर्तनश्रवणात् · अथ दक्षिणान्बाह्नन्वावर्तन्तऽइति च (२. ६. २. १८.) ।

विपर्यस्य पित्र्येषु तु सकृद्दक्षिणा च ॥२७॥ तुशब्दो भेदे · पूर्वप्रतिपादितादिदमाह । पित्र्येषु पितृदेवत्येषु पितृयज्ञादिकर्मसु विपर्यस्य पूर्वोक्तविपर्यासेन सर्वं भवति · यज्ञोपवीतिनः कर्म कुर्युरित्युक्तम् पित्र्यं तु प्राचीनावीतिनः कृतापसव्याः सन्तः कुर्वन्ति दक्षिणस्कन्धधृतयज्ञोपवीतिन इत्यर्थः · तथा चोक्तम् प्राचीनावीती पित्र्याणीति । यच्च परिस्तरणावर्तनादि प्रदक्षिणमुक्तम् तत्पित्र्ये अप्रदक्षिणं भवति । यच्च देवेभ्यः स्वत्र्यं क्रियते परिसमूहनोपलेपनोल्लेखनोद्धरणाभ्युक्षणादिकम् तदत्र सकृदेकवारं भवति । यच्च दैवे दिग्द्वयमुक्तम् प्राच्युदग्वेति (२५.) तत्र विपर्यासेन दक्षिणा प्रतीची वेति द्वयं प्राप्नोति · तत्राह दक्षिणा चेति पित्र्ये कर्मणि दिगेकैव दक्षिणेति · तेन सर्वं पिण्डादानावनेजनोल्लेखनपात्र्यासादनादिकं [3] दक्षिणसंस्थं दक्षिणाभिमुखेन च कर्तव्यम् · एषा

---

1) °वतितं २· 2) ?आस्योद° २· 3) ?°ज्ञनाल्लेखाकारनया° २·

वै दिक्पितॄणामिति (२. ६. १. १.) या दक्षिणा दिक्सा पितॄणामिति श्रुतेः ।

प्रधानद्रव्यव्यापत्तौ साङ्गावृत्तिस्तदादेशात् ॥ २८ ॥ प्रधानं यागः तत्साधनभूतं द्रव्यं पुरोडाशचरुधानापयोदधिपश्वादि तस्य व्यापत्तौ विनाशे साङ्गावृत्तिः साङ्गस्य संनिपत्योपकारकाङ्गैः सहितस्यावृत्तिः पुनःकरणं भवति । कुतः तदादेशात् तस्य द्रव्यस्य संस्करणार्थमेव निष्पादनार्थमेव तेषामङ्गानामादेशात् उपदेशात् · पुरोडाशादिनिष्पत्त्यर्थमेव हि निर्वपनप्रोक्षणावघातपेषणसंयवनश्रपणादीन्यादिष्टानि विहितानि · तदुक्तमापस्तम्बेन यथाप्रत्तदेवतं हविर्व्यापद्येतान्यद्धविः संस्कृत्य प्रयच्छेद्देवतायाऽइति ॥ ॥ सप्तमी कण्डिका ॥ ७ ॥

अथ पद्धतिः ॥

यत्र एकेन वाक्येन बहूनि प्रधानान्येकफलार्थं विधीयन्ते यथा वैश्वदेवेन प्रजाकामं याजयेदिति मित्रविन्दया आयुष्कामो यजेतेत्यादौ तत्र तेषां सहप्रयोगो भवति । यदि च तेषां देशकालफलकर्मादि समानं भवति तदा तेषां प्रधानानां यान्याराडुपकारकाणि आघारप्रयाजाज्यभागादीन्यङ्गानि तानि सकृदेव भवन्ति न प्रतिप्रधानं पृथक्क्रियन्ते · देशभेदे च कालभेदे च तन्त्रभेद एव भवति न सहक्रिया यथा दर्शपूर्णमासयोः कालभेदे वरुणप्रघासेषु च मारुत्या देशभेदे । अहर्गणे सुब्रह्मण्यानिगदे द्वादशाहे सुत्यामागच्छेत्येतत्कालसंयुक्तं कर्म तन्त्रेणैव सकृत्सुत्याशब्दोच्चारणेनैव भवति न प्रतिसुत्यं त्रयोदशाहे चतुर्दशाहऽइत्येवम् ॥ एकद्रव्ये कर्मावृत्तौ सत्यां मन्त्रवचनं सकृदेव कर्तव्यम् न प्रतिक्रियम् · यथा स्फ्येन पदं त्रिः परिलिखत्यस्मे रमस्वेत्यत्रैकवारं (७. ६. १३.) मन्त्रेण वारद्वयं तूष्णीम् · यथा वा दिवि धा इति त्रिरुत्कम्पयतीत्यत्रैकवारं (२६. ६. ५.) मन्त्रेणोत्कम्पनम् वारद्वयं तूष्णीम् · एवं सर्वत्र ज्ञेयम् । हविर्ग्रहणे बर्हिषो लवने तस्यैव स्तरणे आज्यग्रहणे च प्रतिक्रियं मन्त्रावृत्तिर्भवति न सकृत् · आज्यग्रहणे तु वचनात्सकृत्त्रिर्वा मन्त्रेण ग्रहणम् शेषं तूष्णीम् · हविर्ग्रहणे च चतुर्थं तूष्णीमिति वचनादुत्तमे मुष्टौ मन्त्रनिवृत्तिः ॥ दीक्षितस्य युगपदनेकामनोज्ञस्वप्नदर्शने पर्यावर्ते दुष्वप्न्यादिति (२५. ११. २०.) मन्त्रं सकृदेव पठेत् कालिकत्वात् · तथा एकस्या नद्या अनेकप्रवाहतरणे उन्दतीरिति (२५. ११. २२.) अनु-

मन्त्रणं सकृदेव स्रोतसां भेदेऽपि नदीद्रव्यस्यैकत्वात् · अववर्षणे युगपदनेकवृष्टिधारासंयोगेऽपि उन्दतीरित्यनुमन्त्रणं सकृदेव भवति कालैकत्वात् · युगपदनेकामेध्यदर्शने अबद्धं[1] मन इति (२५. ११. २४.) सूर्योपस्थानं सकृदेव कालैकत्वात् · वनीवाहने तु विश्रम्य-विश्रम्य पुनःप्रयाणे च प्रेद्धग्नऽइति (१६. ६. १८.) मन्त्रवचनं सकृत् आदिमे प्रयाणऽएव भवति न प्रतिप्रयाणम् कुतः अर्थैकत्वात् प्रयोजनैकत्वादित्यर्थः · तथा अग्ने त्वं सु जागृहीत्ययमपि मन्त्रः (४. १४.) सकृदेव प्रयोज्यः नैकरात्रिमध्ये पुनः-पुनः स्वापादौ · अमेध्यदर्शनादिषु कालभेदे भेदेनैव भवति न सकृत् ॥ अप्रधानकालीनमङ्गं सकृदेव भवति न प्रतिप्रधानमावर्तते · यथाग्न्याधेयम् · परमार्थतस्त्वग्न्याधेयमुत्तरकर्माङ्गं न भवतीति कृत्वा चिन्त्यम् । तथा यूपोऽप्यप्रधानकालीनत्वादग्नीषोमीयसवनीयानूबन्ध्यपशूनां साधारण एव स्वरुरपि यूपवत्सर्वपशुसाधारण एव ॥ आधानादिसर्वकर्मसु पुरुषा एव कर्तारो भवन्ति न स्वयं यजमानः · केवलं यत्प्रधानकर्म देवतोद्देशेन द्रव्यत्यागात्मकम् तत्स्वामी करोति फलयोगात् · पुरुषयोगिमन्त्रान् तनूपा अग्नेऽसि तन्वं मे पाहि (३. १७.) रायस्पोषस्य ददितारः स्यामेत्येवमादीन् (७. १४.) यजमानो जपेत् · संस्काराश्च वपनाभ्यञ्जनादयो यजमानस्यैव भवन्ति वचनाभावे · वचनेनऽर्त्विजामपि संस्कारा भवन्ति यथा हिरण्यमालिनो वाजपेयेन चरन्ति · उक्तव्यतिरिक्तमपि वचनाद्यजमानस्य भवति यथा यजमानो वसोर्धारां जुहोति (१८. ५. १.) यजमानः पात्राण्यासादयतीत्यादि । शेषं कर्माध्वर्य्वादयो यथासमाख्यम् अध्वर्युराध्वर्यवम् होता होत्रम् उद्गातौद्गात्रम् ब्रह्मा ब्रह्मत्वमित्येवं यथाख्यं कुर्वन्ति । यज्ञोपवीतिनः सर्वाणि कर्माणि प्राक्संस्थान्युदक्संस्थानि वा कुर्वन्ति · यत्र-यत्रावृत्तिर्विधीयते सूर्यस्येत्यावर्ततऽइत्यादौ (३. ८. २३.) यच्च कर्म सर्वतो विधीयते यथा परिस्तरणम् पर्युक्षणम् समन्तं त्रिः पर्यूषतीत्यादौ (६. ३. १२.) तत्र सर्वत्र प्रदक्षिणं कर्तव्यम् । पितृदेवत्येषु कर्मसु विपर्यासेनापसव्येनाप्रदक्षिणं च · यद्दैवे आवृत्त्या क्रियते तच्च पित्र्ये सकृत् यथा परिसमुह्येत्यादि फलीकरणादि च · दक्षिणा च दिक्पित्र्ये यद्दैवे प्राक्संस्थमुदक्संस्थं वा पित्र्ये तद्द-

1) ? आबद्धं १. २. ३. अबद्धं १.

क्षिणासंस्थं भवति ॥ प्रधानद्रव्यविनाशे संनिपत्योपकाराङ्गसहितस्यैव तस्यावृत्तिर्भवति नाराडुपकारकसहितस्य ॥ ॥ ७ ॥

इति प्रथमस्य सप्तमी कण्डिका ॥ ॥

इदं श्रूयते व्रीहिभिर्यजेत यवैर्यजेतेति · तत्र सर्वाङ्गोपसंहारिप्रयोगवचनानुग्रहायाष्टदोषदुष्टविकल्पपरिहाराय[1] चोभाभ्यां व्रीहियवाभ्यां समुच्चयेन यागः कर्तव्यः · सम्भवति च सोमयागस्येव प्रधानमस्यापि यागस्याभ्यासमाश्रित्य समुच्चयः मिश्रैर्वा क्रियेतेति उत विकल्पो व्रीहिभिर्वा यवैर्वेति । तत्र पूर्वपक्षमाह ·

गुणानामेकार्थानां सर्वारम्भश्चोदितत्वात् ॥ १ ॥ एकोऽर्थः प्रयोजनं कार्यं येषां त एकार्थाः एकपुरोडाशनिष्पत्त्यर्था व्रीहियवादय एतेषां एकार्थानाम् गुणानां पुरोडाशाद्यर्थानां व्रीहियवानां सर्वारम्भः कर्तव्यः सर्वैर्व्रीहियवादिभिस्तत्कार्यं[2] पुरोडाशादिकं निष्पाद्य यागः साधनीय इति । कुत एतत् चोदितत्वात् यजेतेत्येवमुभयोर्यागसाधनत्वेन विहितत्वात् · यागे साधनत्वं च यागसाधनभूतपुरोडाशप्रकृतिद्रव्यत्वेन · अत उभयोर्यागसाधनत्वेन चोदितत्वात् यैर्यागो न क्रियते तेषां विधानं व्यर्थमेव स्यात् · तस्माद्व्रीहिभिर्यवैश्च पुरोडाशो निष्पादनीय इत्येवं प्राप्तऽआह ·

न कृतत्वात् ॥ २ ॥ यदुक्तम् सर्वारम्भः सर्वैस्तत्कर्मानुष्ठेयमिति तन्न । कुतः कृतत्वात् एकेनैव पुरोडाशरूपस्य कार्यस्य कृतत्वात् द्वितीयोपादानं व्यर्थमेव स्यात् · सर्वारम्भो हि मिश्राभ्याममिश्राभ्यां वा यागावृत्त्या · न तावन्मिश्राभ्याम् मिश्रेण हि द्रव्यान्तरोत्पत्त्यैकस्यापि साधनत्वाभावात् · न च यागावृत्तिः यागस्य कृतत्वात् ।

अनारभ्यत्वात् ॥ ३ ॥ अस्यार्थस्यानारभ्यत्वात् नैवारम्भणीयोऽयमर्थः यद्गुणभूतस्य द्रव्यस्यानुरोधेन प्रधानभूतस्य यागस्यावृत्तिः · तस्माद्विकल्प एव न समुच्चयः ।

---

1) ? °हायाष्टदोषंदुष्ट° २. °ष्टदोषनिदानविकल्प° Çâstradipikâ at Jaim. १२. ३. १०.
2) ? सर्वैर्व्री° २.

दर्शनाच्च ॥४॥ व्रीहियवयोर्विकल्पो भवतीत्ययमर्थः श्रुतौ दृश्यते च · हविरुद्वपनं प्रकृत्य श्रूयते (१. १.४.२०.) वर्षवृद्धा उ स्थैवेते यदि व्रीहयो यदि यवा [1] इति । ज्योतिष्टोमे हि द्रव्यदेवतासंयोगानामदृष्टानामपर्यायविधानात्प्रकरणेन युगपद्ग्रहणात्सर्वसम्पादनाय युक्तं [2] यदभ्यस्यते · व्रीहियवौ तु द्वाभ्यां वाक्या[भ्या]मन्योऽन्यनिरपेक्षौ यागद्रव्यपुरोडाशप्रकृतितया विधीयमानौ तद्द्वारेण प्रयोगवचनो गृह्णन्पर्यायेणैव गृह्णाति न युगपत् येन बलात्प्रधानाभ्यासः स्यात् ज्योतिष्टोमवत् । मिश्रत्वमपि निरपेक्षविधानादयुक्तमेव · समुच्चित्ययजनया हि [3] वाक्यद्वयमपि बाधितं स्यात् द्वाभ्यामपि वाक्याभ्यां द्वयोरपि निरपेक्षयोः प्रकृतित्वेन विधानात्तद्बलेन द्रव्यान्तरनिवृत्तिप्रतीतेः । तस्माद्विकल्पः · ततो व्रीहिप्रयोगे तैरेव कार्यसिद्धेर्न यवानामुपादानम् यथा पाशुकैरङ्गैः कार्यसिद्धेः पौरोडाशिकानाम् ।

श्रुत्यानर्थक्यमिति चेत् ॥५॥ ननु व्रीहियवयोर्विकल्पे सत्यन्यतरश्रुतेरानर्थक्यं भविष्यतीति चेत्कथयति तत्रोत्तरमाह ·

कालान्तरेऽर्थवत्त्वं स्यात् ॥६॥ कालान्तरे द्वितीयाया अपि श्रुतेरर्थवत्त्वं सार्थकत्वं [4] भवति · अतो व्यवस्थितविकल्पोऽयम् । तथा च शाखान्तरे श्रूयते व्रीहिभिरिष्ट्वा व्रीहिभिर्यजेता यवेभ्यो यवैरिष्ट्वा यवैर्यजेता व्रीहिभ्यो दर्शपूर्णमासाविति · अतो व्रीह्याग्रयणानन्तरं प्राग्यवाग्रयणाद्व्रीहिभिरेव दर्शपूर्णमासयागः यवाग्रयणानन्तरं प्राग्व्रीह्याग्रयणाद्यवैरिति · अत्र दर्शपूर्णमासावित्यनेन दर्शपूर्णमासयोरेवायं द्रव्यनियम उक्तः तेनान्यासु विकृतिषु नायं द्रव्यनियम इति धूर्तस्वामिनः ॥ ॥ आघारौ प्रकृत्य श्रूयते ऋजुमाघारयति संततमाघारयति प्राञ्चमाघारयति दीर्घमाघारयतीति · एतेषामपि ऋजुत्वादिधर्माणामेकार्थत्वाद्व्रीहियवद्विकल्पे प्राप्तऽआह ·

धर्ममात्रेषु समुच्चयोऽविरोधे ॥७॥ ये गुणा धर्ममात्रा अदृष्टार्थास्तेषु समुच्चयो भवति न विकल्पः । यतस्तेऽविरोधे वर्तन्ते · कथम् · न हि ऋजुः प्राञ्चं संततं दीर्घं वा विरुणद्धि न च संततः ऋज्वादीन् · अदृष्टान्यपि तेषां

1) यदि यदि यवा २. 2) ? सर्वसंपादनायपु° २. 3) ? यजनतापि २. 4) ? सार्थवत्त्वं २.

भिन्नान्येव · तस्मात्परस्पराविरोधिवादृत्वादीनां समुच्चयः । यदुक्तम् एककार्यत्वान्न [1] समुच्चय इति · अत्रोच्यते · सत्यम् परमेककार्यम् अवान्तरकार्याणि [2] तु भिन्नानि · यदृजुना क्रियते न तत्संततेन यत्संततेन न तदृजुना यद्दीर्घेण न तत्प्राचा यत्प्राचा न तद्दीर्घेणेति ॥ ॥ अथेदं विचार्यते । अग्निप्रणयनाग्निमन्थनादिषु क्रियमाणानुवादिनो होतुर्मन्त्राः सन्ति प्र देवं देव्या धिया अभि त्वा देव सवितः इत्यादयः · तथा अग्न्याधानमन्त्रा भूर्भुवः स्वरिति आदित्यानां त्वेत्यादयः · किं तेषां विकल्पः उत समुच्चय इति । मन्त्राणां स्मारकत्वेन दृष्टार्थत्वात्करणावदेकार्थत्वाद्व्रीहियववद्विकल्पे प्राप्तऽआह ·

हौत्राधानयोः ॥ ८ ॥ समुच्चयोऽविरोधऽइत्यनुवर्तते । होतुरिमे हौत्राः · होतृमन्त्राणामाधानमन्त्राणां च समुच्चयो भवति न विकल्पः अविरोधादेव । हौत्राधानशब्देनात्र तत्सम्बद्धा मन्त्रा लक्ष्यन्ते · करणमन्त्रा हि कर्मानुष्ठानकारणभूतां स्मृतिं पूर्वक्षणवर्तिनीं कुर्वन्ति · न चैकेन [3] सिद्धावितरेण कार्यमस्तीति युक्तस्तत्र विकल्पः · क्रियमाणानुवादिनस्त्वध्वर्युणा क्रियमाणस्य कर्मणः स्मृत्यविच्छेदार्थाः · अविच्छेदश्चान्तादपेक्षित इति सर्वेषां समुच्चयः । समुच्चयश्च दृश्यते श्रुतौ त्रिः प्रथमामन्वाह त्रिरुत्तमामिति (१. ३, ५. ६.) आग्नेयीरन्वाह (४.) एकादशान्वाह (५.) नवान्वाह दशान्वाहेत्यादि अनेकसंनिपाते वै तद्भवति · प्रथमा उत्तमेति च संख्योपबन्धश्च · तस्मात्समुच्चयः । आधानमन्त्राणां च वचनात्समुच्चयः त्रिभिरन्तैर्गार्हपत्यमुपदधाति [4] पञ्चभिराहवनीयमिति । एवं सर्वत्र होममन्त्राणां समुच्चये प्राप्तऽआह ·

न याज्यानुवाक्यासु विरोधे ॥ ९ ॥ एकस्मिन्नेव प्रकरणे क्वचिद्बह्व्यो याज्यानुवाक्या एकदेवत्याः पठिताः सन्ति तासु च न समुच्चयः किंतु विकल्प एव । कुतः विरोधात् यतः पुरोऽनुवाक्या देवतास्मरणार्था याज्या च हविःप्रदानार्था · ह्वयति वाऽअनुवाक्यया प्रयच्छति याज्ययेति (१. ७. २. १७.) · ततश्च दृष्टार्थत्वाद्विकल्पः ।

---

1) ? यदुक्तमेवका° २. 2) ? आवांत° २. 3) Thus Çâstradip. at Jaim. १२. ३. ३६. वैकेन २. 4) ?? त्रिभिरचतिर्गाहप° २.

दर्शनाच्च ॥१०॥ श्रुतावप्येवं दृश्यते यदेकदेवत्यऽएकैव[1] याज्या पुरोऽनुवाक्या च भवति न समुच्चयः । यतो वाजपेये प्राजापत्यान्पशून्प्रकृत्य श्रूयते (५. १. ३. १४.) एकानुवाक्या भवत्येका याज्यैकदेवत्या हीति देवतैकत्वं हेतुं ब्रुवन्नेकदेवत्ये याज्यापुरोऽनुवाक्ययोरेकत्वं दर्शयति । तथा महापितृयज्ञे पुरोऽनुवाक्याप्रस्तावे श्रूयते (२. ६. १. २६.) स द्वे पुरोऽनुवाक्ये अन्वाहैकया वै देवान्प्रच्यावयन्ति द्वाभ्यां पितॄनिति · अत्र पुरोऽनुवाक्याद्वित्वविधिपरे वाक्ये अन्यत्र तस्या एकत्वं सिद्धं दर्शयति · तस्मान्न याज्यानुवाक्यासमुच्चयः किंतु विकल्प एव ।

प्रायश्चित्तेषु दोषनाशात् ॥११॥ यज्ञाङ्गायथाक्रियायां विहितानि[2] प्रायश्चित्तानि · यथा यद्युक्तो यज्ञ आर्तिमियाद्भूः स्वाहेति गार्हपत्ये जुहुयात् आर्तिमियाद्विनाशमियादित्यर्थः विहितस्याक्रिया[याः] प्रतिषिद्धकरणाद्वात्र[3] विनाशः · योऽमावास्यां पौर्णमासीं वातिपातयेदग्नये पथिकृतेऽष्टाकपालं पुरोडाशं निर्वपेत् · तथा योऽमावास्यां पौर्णमासीं वातिपातयेद्वैश्वानरं[4] द्वादशकपालं निर्वपेदित्यादीनि तत्समाधित्सायां विहितानि तत्समाधानार्थानि भवन्ति · समाधानं चादृष्टमेकेन कृतमिति शक्यं वक्तुम् · तेन प्रयाजादिवदेषां समुच्चये प्राप्ते उच्यते प्रायश्चित्तेषु न समुच्चयः । कुतः दोषनाशात् यतस्तानि दोषनाशार्थं विधीयन्ते · कथं पुनरेतत् · उच्यते · दोषनाशार्थान्येतानीति[5] वाक्यादेव[6] यद्यार्तिमियादिदं कुर्यादिति कर्मस्वयथाकरणादिना दोषे विनाशे सति तानि विधीयन्ते · यदि तेषु कृतेष्वपि तद्विनष्टमेव कोऽर्थस्तेन कृतेन अतो दोषनिर्घातायैव तेषां प्रयोजनम् · तत्रैकेन निर्हृतदोषेण प्रयोजनमस्ति[7] । प्रयाजादिषु तु युक्तः समुच्चयः भिन्नकार्यत्वात् न हि समिधा[8] यत्क्रियते तत्तनूनपातेति प्रमाणमस्ति · ननु सर्वे करणानुग्रहार्थाः सत्यम् सर्वेषां युगपदेकेन प्रमाणेन साधनमुपगम्यते न पर्यायेण · प्रधानविधिना हि तेषां विधानम् तत्र

1) ? °देकवत्ये एकैव २. 2) ?? यज्ञागायथाक्रियामिहितानि २. 3) ? °करणंद्वात्र २. 4) Thus the Çâstradip. at १२. ३. १४. व्रातिपादये° २. 5) ?? पुनरित यते दोषनाशार्थान्यतान्येतानीति २. 6) ? °देवं २. 7) ? निर्हतिदोषेण प्राजोजन° २. 8) समिद्धा २.

द्वारैक्यावगमात् युगपदेव सर्वे सम्बध्यन्ते तद्वशेन च सर्वतन्त्र्यावान्तरकार्यैः करणानुग्रहः सिध्यतीति कल्प्यते । प्रायश्चित्तानि तु वैगुण्यमेकं निमित्तीकृत्य वाक्येन मन्त्रेण विधीयमानानि प्रत्येकमेव तत्समाधानार्थानि विज्ञायन्ते · तत्र यान्येकस्मिन्वैगुण्ये विधीयन्ते पथिकृद्वैश्वानरादीनि तेषां विकल्पसमुच्चयचिन्तायामदृष्टार्थत्वात्समुच्चयप्राप्तावेकैकेन [1] वाक्येन वैगुण्यसमाधानाय निरपेक्षविधानाद्द्वारैक्याद्व्रीहियववद्विकल्प एव न समुच्चयः । तदुक्तं जैमिनिना (१२. ३. १४.) प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मात्सर्वस्य निर्घात इति · अस्यार्थः · प्रायश्चित्तेषु विकल्पः स्यात् कुतः ऐकार्थ्यात् · कथमैकार्थ्यम् · यत एकेषां निष्पन्नेन दोषेण केवलस्य तस्याभिसंयोगो यथाक्तो यज्ञ आर्तिमियाद्भूः स्वाहेति गार्हपत्ये जुहुयादिति · तस्मात्सर्वस्य दोषस्यैकेन निर्घातः एकेन चेन्निर्हतो [2] दोषस्तर्हि द्वितीयादीनि प्रयोगान्तरार्थानि भवन्ति · एवं स्मार्तेष्वपि द्रष्टव्यम् । तत्र द्वितीयं सूत्रम् (१२. ३. २५.) समुच्चयस्त्वदोषार्थेषु · यानि तु न दोषनिर्घातार्थानि [3] तेषु समुच्चयः · कानि पुनस्तानि यानि न शिष्टस्याक्रियायां प्रतिषिद्धस्य करणे वा [4] विधीयन्ते · यथा यस्याहुतमग्निहोत्रꣳ सूर्योऽभ्युदियान्मैत्रं चरुꣳ [5] निर्वपेत्सौर्यमेककपालम् तथा यस्याहुतमग्निहोत्रꣳ [6] सूर्योऽभ्युदियादग्निꣳ समाधाय वाचं यत्वा दम्पती सर्वाहमुपासीयातामिति [7] · तत्र दोषो न दृश्यते दोषस्याभावान्निर्घातार्थता [च] नास्ति केवलमभ्युदये निमित्ते कर्म विधीयते तन्नैमित्तिकं [च] कर्मणः प्रकरणे उत्पन्नत्वात्कर्माङ्गं विज्ञायते · तत्र यावन्ति चोद्यन्ते तानि सर्वाणि प्रयोगवचनेन संगृह्यन्ते अतस्तेषां समुच्चयः । तदेवं जैमिनेः सिद्धान्तः प्रमादापतितस्य वैगुण्यस्य समाधानार्थानां विकल्पः निमित्ते सति कर्माङ्गानां समुच्चय इति । कात्यायनस्तु · प्रायश्चित्तेषु दोषनाशात् · प्रायश्चित्तेषु विकल्पो भवति कुतः दोषनाशात् दोषनिर्घातार्थत्वात् प्रायश्चित्तस्य · तत्र [8] [च] एकेन दोषनिर्घाते कृते नास्ति द्वितीयस्य कार्यमित्येवं प्रातःआह ·

---

1) ? Thus २. °प्तावेकेन Çâstradip. 2) ? चेन्निक्रतो २. 3) ? तु दोषनिर्घाता° २. 4) ? यानिनशिष्ठस्याक्रियांया प्रतिषिद्धस्येवनेव २. 5) ? मेत्रं वह्नं २. 6) ? यथास्याज्ञ° २. 7) ? दयंती संवाहमुपासीयाज्ञामिति २. 8) ? हात्र २.

नाश्रुतेः ॥ १२ ॥ प्रायश्चित्तैर्दोषनाशः क्रियतऽइत्येवंविधा श्रुतिर्नास्ति · किं च ·

प्रत्यक्षाच ॥ १३ ॥ न केवलमेवंविधश्रुत्यभावः प्रत्यक्षादप्येवं न ज्ञायते [1] यत्प्रायश्चित्तैर्दोषनाशो भवतीति · कथम् · भिन्ने जुहोति स्कन्ने जुहोतीति भेदने स्कन्दने च संज्ञाते होमरूपं प्रायश्चित्तं विधीयते न च होमे कृते भिन्नमभिन्नं स्कन्नमस्कन्नं संज्ञायते [2] किंतु तथैवावतिष्ठते · तस्मात्प्रायश्चित्तमदृष्टार्थमेव न दोषनिर्घातार्थम् · तस्मात्समुच्चयः ।

स्याद्वा दर्शनात् ॥ १४ ॥ अथवा कैश्चित्प्रायश्चित्तैर्दोषनाशः स्यात् । कुतः श्रुतौ दर्शनात् · महाव्याहृतिहोमेषु दोषनिर्घातो दृश्यते (११. ५. २. ६.) तदाहुर्यद्वृक्तो [3] भूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहवथेत्यादि प्रकृत्य स यथा पर्वणा पर्व संदध्यादेवꣳ हैव स संदधाति य एताभिर्भिषज्यतीति विनष्टस्य कर्मणः संधानं भैषज्यं च दर्शयति · तथा · पथिकृतौ वाक्यशेषे श्रूयते अग्निर्वै देवानां पथिकृत्स्वेन भागधेयेनोपासीदन्नेतं पन्थानमपिनयति य एवं व्रतमालम्भयतीति [4] । तस्मात्प्रायश्चित्तैर्दोषनिर्घातः स्यादिति प्राप्तऽआह ·

नान्यार्थत्वात् ॥ १५ ॥ नैतस्माद्दर्शनादेवं कल्प्यम् यत्प्रायश्चित्तैर्दोषनाशोऽस्तीति । कुतः दर्शनस्यान्यार्थत्वात् · कोऽन्योऽर्थ इति चेत् उच्यते महाव्याहृतिस्तुत्यर्थं चैतद्दर्शनम् इत्थं प्रशस्तो [5] होमो येन विच्छिन्नस्य [6] संधानं क्रियतऽइति । तस्माददृष्टार्थत्वमेव प्रायश्चित्तानाम् ततः समुच्चय एवेति ॥ ॥

अपरा व्याख्या । स्याद्वा दर्शनात् । प्रायश्चित्तानि द्विविधानि कानिचिद्वैगुण्यस्य प्रमादापतितस्य समाधानार्थानि कानिचिन्निमित्ते कर्माङ्गानि । तत्र यानि वैगुण्यसमाधानार्थानि तेषु दोषनिर्घातः स्यात् प्रमादापतितस्य [7] वैगुण्यस्य समाधानं भवेत् · कुतः दर्शनात् स यथा पर्वणेत्यादि तदुदाहृतं पूर्वव्याख्याने · एकेन च निर्हृते [8] दोषे न द्वितीयस्य प्रयोजनमित्येकमेव किंचिद्वि-

---

1) ? गज्ञायते २. 2) ? कृते भिन्नमभिस्कन्न संज्ञा° २. 3) sic! स होवाच! 4) ?? °ये-नोपासीदन्नेवं पथानमपिनमि स एव व्रतमालंभवत्तीति २. 5) ? प्राशस्ते २. 6) विछ-न्नस्य २. 7) ? प्रमादादपितस्य २. 8) ? निह्वदे २.

कल्प्येन कर्तव्यमिति सिद्धान्तः । एवमेव सर्वेषु प्राप्तऽआह · नान्यार्थत्वात् । प्रायश्चित्तानि न दोषनिर्घातार्थानि किंतु भेदनादिनिमित्ते सति कर्माङ्गानि · तेषु दोषेऽसति न तन्निर्घातार्थता [1] । कुतः अन्यार्थत्वात् तत्र हि न प्रायश्चित्तस्य विनष्टसमाधानं कार्यम् · किं च स एवार्थो दृष्टः [2] न च होमादिना भिन्नं स्कन्नं वा अभिन्नमस्कन्नं च कर्तुं शक्यते · अत एवंविधे निमित्ते यानि विधीयन्ते तान्यदृष्टार्थान्येव · तस्मात्तेषु समुच्चय इति · एवं च जैमिनिसिद्धान्तेनाविरोधि व्याख्यानं भवति अतो युक्तमेवेति ॥ ॥ ॥ अथेदं चिन्त्यते । ये मन्त्रा मन्त्रसमाम्नाये स्वरान्तरेण समाम्नाताः ब्राह्मणे तु स्वरान्तरेणोपात्तास्ते किं स्वयमेव प्रसिद्धेन स्वरेण उत ब्राह्मणस्वरेण उत एकश्रुत्या तानेनेति । तत्र प्रथमं पक्षं तावदाह ·

मन्त्रे स्वरक्रिया यथाम्नातमविशेषात् ॥१६॥ कर्मसु प्रयुज्यते यो मन्त्रः तस्मिन्स्वरक्रिया यथाम्नातं भवति · येन स्वरेण संहितायामाम्नायते तेनैव स्वरेणेत्यर्थः । कुतः अविशेषात् यतो विशेष उपदिष्टो नास्ति अनेन स्वरेण कर्मणि मन्त्रः प्रयुज्यतऽइति · तेन यथाम्नातस्वर एव भवति इति प्राप्ते द्वितीयं पक्षमाह ·

भाषिकस्वरो वोपपन्नमन्त्रोपदेशात् ॥१७॥ वाशब्दः पूर्वपक्षनिरासार्थः । भाषिकस्वरः ब्राह्मणस्वरः । अथवा कर्मणि प्रयुज्यमानानां मन्त्राणां भाषिकस्वरो भवति न संहितास्वरः ब्राह्मणस्वरेण मन्त्राः प्रयुज्यन्तऽइत्यर्थः । कुतः उपपन्नमन्त्रोपदेशात् संहितास्वरेणोपपन्नस्य प्रयुक्तस्यैव मन्त्रस्य ब्राह्मणे स्वरान्तरेणोपदेशात् · तस्मात्कर्मणि [3] प्रयोगे मन्त्राणां भाषिकस्वरो भवतीति प्राप्ते सिद्धान्तमाह ·

तानो वा नित्यत्वात् ॥१८॥ वाशब्दः पक्षव्यावृत्तौ । तान एव मन्त्राणां स्वरो भवति न भाषिकस्वरः · तान एकश्रुतिरित्यर्थः · तेनोदात्तादिस्वररहित एवैकश्रुत्या मन्त्राणां प्रयोगः कार्यः । कुतः नित्यत्वात् नित्यो हि तानः

---

1) ?? तेषु दोष इति निर्घार्थता २. 2) ? दृष्टं २. 3) Thus also the Çástradîp. at Jaim. १२. ३. २०.

वर्णस्वरूपमन्त्रोच्चारणादिना[1] भूतत्वात् । स्वरान्तरं चानियतम् उभयथा मन्त्रस्य[2] स्वरसम्बन्धदर्शनात् न ज्ञायते संहितास्वरेण वा ब्राह्मणस्वरेण वेति[3] । तस्मात्तान एव स्वरो मन्त्राणामिति · उक्तेऽर्थे व्याकरणस्मृतिं दर्शयति ·

एकश्रुति दूरात्सम्बुद्धौ यज्ञकर्मणि सुब्रह्मण्यासामजपन्यूङ्खयाजमानवर्जम्[4] ॥१९॥ एकश्रुति दूरात्सम्बुद्धावित्यनुवर्तमाने[5] यज्ञकर्मणि मन्त्राणामेकश्रुतिर्भवति न केनचित्स्वरेण प्रयोगः । किं सर्वत्र · सुब्रह्मण्यासामजपन्यूङ्खयाजमानवर्जम् · एतानि वर्जयित्वा अन्येषु मन्त्रेष्वेकश्रुतिर्भवति । सुब्रह्मण्योऽमिन्द्रागच्छेत्यादिर्निगदः सुब्रह्मण्या · सामानि उद्गातृभिर्यज्ञे गीयमानानि · जपाश्च धूरसि (१. ८.) इन्द्रस्य बाहुरसि (१. २४.) मयीदित्याद्या (२. ८.) जपतीति शब्देन (२. ३. २१. २. ६. १३. ३. ४. २१.) चोदिता मन्त्राः · न्यूङ्खास्तु पृष्ठे षडहे होतृवेदे प्रसिद्धा ओकारा द्वादश पिबा[6] सोममिन्द्र मन्दतु त्वा यं तो ओ ओ ओ३ ओ ओ ओ ओ३ ओ ओ ओ ओ३ सुषाव हर्यश्वाद्रिरित्यादयः[7] · याजमानं च सर्वं विष्णुक्रमादिकम्[8] तत्सम्बन्धिनो ये मन्त्रा दिवि विष्णुरित्याद्याः (२. २५.) अथवा यजमानस्येमे याजमानाः · एषु सुब्रह्मण्यादिषु याजमानान्तेषु यथाप्रात एव संहितास्वरो भवति नैकश्रुतिः ॥ ॥ आधाने श्रूयते (२. २. २. ३.) ता वै षड्दद्यात् [द्वादश दद्यात् (४.)] चतुर्विंशतिं दद्यादिति (५.) · तत्रायं संदेहः · किं षड् द्वादश[9] चतुर्विंशतिश्च समुच्चिता देयाः उत विकल्पः षड्वा द्वादश वा चतुर्विंशतिर्वेति · तत्र सर्वासामाम्नातत्वाद्विकल्पस्याश्रवणाच्च अङ्गभूयस्त्वाय सर्वाङ्गग्राहिणा[10] प्रयोगवचनेन सर्वाः समुच्चिता देया इति प्राप्तेऽआह ·

---

1) ? °मन्त्रोच्चारणाविना २. 2) मन्त्रस्य २. 3) ? °स्वरेणेति २. 4) °न्यूङ्खयाजमानवर्जं ५ १. न्यूषयाजमानवर्जमिति २. The ५ in १. refers to the beginning सू of the next sûtra. The इति is an addition of the Commentator, who considers this sûtra as a quotation taken from Pâṇini १. २. ३३-३४. 5) viz. in Pâṇ. १. २. ३४. from ibid. ३३. 6) ओंकारा द्वादशामिवा २. 7) मंदनु त्वामत्तो । ऊे ऊे ऊे३ ऊे ऊे ऊे ऊे३ ऊे ऊे ऊे ऊे३ त्युषाव हयश्वाद्रि° २. The origin of these ऊे lyes in that obsolete form of ओ, where it is given by an उ marked above with a semicircular stroke. — The न्यूङ्ख explained here is the वैराजन्यूङ्ख, see Çánkháy. çrauta sûtra १०. ५. २३. The quoted ṛic is taken from Ṛiksamh. ७. २२. १. Sámasamh. १. ५. १. १. ८. 8) ? °दिक च २. 9) ? किं च षड्द्वा° २. 10) अगभूयस्त्वाय सर्वगग्रा° २.

संख्याविकल्पो दानसंयोगे कृतत्वात् ॥२०॥ तनूकृविःषु दक्षिणादान-
संयोगे संख्याविकल्पो भवति संख्यानां षडादीनां विकल्पः ता वै षड्द्वादि-
त्यादि श्रूयमाणानां षडादिसंख्यानां विकल्पो भवतीत्यर्थः न समुच्चयः। कुतः
कृतत्वात्[1] अविज्ञामानत्यर्थं हि दक्षिणादानम् नादृष्टार्थम् सा चानतिरेकेनैव
कृतेति न पक्षान्तरेण प्रयोजनम् · अपि [च] समुच्चये सति संख्याश्रुतिर्विरुध्यते[2]
संख्यान्तरोपजननाच्छ्रुतसंख्याहानिप्रसङ्गात्[3] यदि च षड्[4] द्वादश चतुर्विंशतिश्च
समुच्चिता दीयन्ते तदा अश्रुता द्वाचत्वारिंशत्संख्या प्रसज्येत · तस्माद्विकल्पः
॥ ॥ अथेदं विचार्यते · अग्नीषोमीये पशौ श्रूयते अथऽऊवध्यमवदधाति
वसां जुहोति अध्यूध्नीं होत्रे प्रयच्छति वनिष्ठुमग्नीधे प्रददातीति[5] · तच्चो-
दकेन स्तोमायनवाजपेयादौ[6] पशुगणे प्राप्नोति[7] · तत्र संदेहः किमूवध्यादीनां
सर्वपशुसम्बन्धिनां समुच्चयः उत विकल्पो यस्य कस्यचिदेकस्य पशोरिति · तत्र
एकपशुसम्बन्धिभिरेव तस्यास्तस्याः क्रियाया निष्पत्तेः प्राप्ते विकल्पऽआह[8] ·

ऊवध्यवसाध्यूध्नीवनिष्ठुषु समुच्चयो द्रव्यसंस्कारतद्भेदाभ्याम् ॥२१॥ अने-
कपशुकेषूवध्यवसाध्यूध्नीवनिष्ठुषु समुच्चयो भवति सर्वेषां पशूनां सम्बन्धीनि
ऊवध्यादीनि गृह्णीयादित्यर्थः। कुतः द्रव्यसंस्कारतद्भेदाभ्याम् द्रव्यसंस्कारात् तद्भे-
दाच्च · द्रव्याणि ह्यूवध्यादीनि तया-तया क्रियया संस्क्रियन्ते प्रतिपाद्यन्ते · नात्र
द्रव्यं क्रियार्थम् अथ तु क्रियैव द्रव्यार्था[9] · यागादनन्तरं कृतार्थस्य प्रतिपत्ति-
संस्कारः · तत्र संस्कार्याणि भिन्नानि · यस्यैव पशोरूवध्यादीनि न प्रतिपाद्यन्ते
तस्यैव प्रतिपत्तिरूपसंस्कारलोपाद्वैगुण्यं स्यात् · तस्मात्समुच्चय ऊवध्यादीनाम्।
एवमेव गुदजाघनीष्वपि समुच्चयः एवं समानन्यायात् · यत्र च भूतभव्यसमुच्चा-
रणान्यायेन द्रव्यं क्रियार्थं भवति तत्र बहुष्वेकत्र प्रतिषेकेनैव क्रियासिद्धेर्न द्वि-
तीयेन प्रयोजनमिति तत्र विकल्पो भवति · यत्र तु क्रिया द्रव्यार्था तत्र
समुच्चय एवेति ॥ ॥ ज्योतिष्टोमे सोमक्रये श्रूयते हिरण्येन क्रीणाति

---

1) ? सकृत्वात् २. 2) ? विंध्यते २. 3) Thus the Çástradip. at Jaim. १२. ४. १. ? °रोयोजमानात्श्रुत° २. 4) षड्व २. 5) ? तदादातीति २. See ६. १. ४. 6) ? स्तो-याय° २. 7) प्राप्ता २. 8) ? निष्पन्ने प्राप्तेर्वि° २. 9) ? क्रिया अथ तु क्रियैव द्रव्यार्थे २.

वाससा क्रीणाति गवा क्रीणाति अजया क्रीणातीत्यादीनि दश क्रयद्रव्याणि · तत्र संदेहः · किमेषां हिरण्यादीनां विकल्पः एकेन केनचित्सोमः क्रेतव्य इति · उत समुच्चयः सर्वैः क्रेतव्य इति । तत्र व्रीहियवन्यायेनैकार्थत्वाद्विकल्पः । कथं पुनरेकार्थत्वम् · भिन्ना एव हि प्रतिवाक्यं क्रयाः न ह्येकेन वाक्येन विहितं क्रयमनूद्य वाक्यान्तरैर्द्रव्यान्तरविधानं सम्भवति उत्पत्तिशिष्टद्रव्यविरोधात् · तस्मात्सर्वाणि क्रयविधानानि विधिभेदाच्च क्रयभेदः · तस्मान्नानाक्रयसाधनत्वाद्द्रव्याणां नास्त्यैकार्थ्यम् · सत्यम् · साक्षान्नास्ति · क्रयद्वारेण त्वस्त्येव[1] · सर्वे [हि] क्रयाः सोमप्राप्त्यर्थत्वादेकार्थाः[2] · तद्द्वारेण द्रव्याण्यप्येकार्थानि · तदनेन प्रकारेण क्रयाणामेवात्र विकल्पसमुच्चयौ चिन्त्येते · व्रीहियववद्विकल्पप्राप्तावाह ·

चोदनागुणेषु च प्रक्लृप्त्युपबन्धाभ्याम्[3] ॥२२॥ चकारेण समुच्चयपदमाकृष्यते । क्रयचोदनागुणेषु समुच्चयो भवति न विकल्पः हिरण्यादिसाधनकाः सर्वेऽपि क्रयाः कर्तव्या इत्यर्थः । कुतः प्रक्लृप्त्युपबन्धाभ्याम्[4] सोमस्य प्रक्लृप्तेः[5] उपबन्धाच्च । यतः प्रक्लृप्ते उपक्लृप्ते विद्यमाने[6] एव सोमे कर्ममध्ये क्रयो विहितः तेनादृष्टार्थः न त्वप्राप्तसोमप्राप्त्यर्थः · अतो यथा विहितस्तथैव कार्यो विधानं च सर्वेषां द्रव्याणाम् · तस्मात्समुच्चयः । दृष्टार्थत्वेऽपि विक्रेतुरानतिरत्र साध्या · सा च बहुभिः सुकरा · अतः कार्यप्रधानत्वात्पदार्थानां कार्यसौकर्यमालोक्य समुच्चयाश्रयणं[7] न्याय्यम् · व्रीहियवादीनां तु नैव किंचित्कारणमस्ति येन पृथक् श्रुतानामपि[8] सापेक्षत्वं कल्पते अत्र तु कार्यविशेषात्सापेक्षत्वकल्पनमिति वैषम्यम् । अपि च संख्योपबन्धः श्रूयते (३. ३. ३. १८.) तं वै दशभिरेव क्रीणीयान्नादशभिरिति · तस्मादपि समुच्चयः ।

गार्हपत्याहवनीयौ न व्यवेयात् ॥२३॥ विना वचनं गार्हपत्याहव-

---

1) Thus the Çâstradip. at Jaim. १२. ४. ६. त्वहपत्र २. 2) ? सोमक्रमप्राध्यर्थ° २. सोमपास्पर्थ° Çâstradipikâ. 3) ? प्रकृत्युप° १. क्रस्युप° २. प्रक्लृप्त्युप° २. and Ananta (E. I. H. 759). 4) ? प्रकृत्युप° २. 5) ? प्रकृप्तेः २. 6) प्रकृत्य विद्यमाने B (a separate leaf, bound together with २.). विधमाने २. विधयमाने २. 7) Thus Çâstr. °याग्रयणं २. 8) Thus Çâstr. कृतानामपि २.

नीयौ न व्यवेयात् तयोर्व्यवायं न कुर्यात् तयोरन्तरालेन न गच्छेत् · नापि स्फ्यो-
दपात्रादिकमन्तरालेन नयेत् ।

विवृत्यावृत्य वेतरथावृत्तिः ॥२४॥ विवृत्य अप्रदक्षिणमावृत्य आ-
वृत्य [1] आवर्तनं कृत्वा प्रदक्षिणमावृत्य वा इतरथावृत्तिः प्रत्यावृत्तिः कर्तव्या ·
यत्र शास्त्रतः प्रदक्षिणावृत्तिः कृता तत्रेदानीमेवाप्रदक्षिणावृत्तिरविहितापि सर्वत्र
कार्या यत्र चाप्रदक्षिणावृत्तिः शास्त्रतः कृता तत्र तदानीमेव प्रदक्षिणावृत्ति-
रिति · यथा अथ प्रणीता दक्षिणतः परीत्य निनयतीति (१. १. २. ३२.) तत्र
निनयनानन्तरमप्रदक्षिणावृत्तिः एवं पूर्णपात्रनिनयनेऽपि · तथा महापितृयज्ञे
अप्रदक्षिणं वेदिं परिषिच्य प्रदक्षिणमितरथावृत्तिः प्रदक्षिणपरिषेके त्वप्रदक्षि-
णमिति ।

अतीत्य निष्क्रमणम् ॥२५॥ यत्र कर्मणि अग्निहोत्रेष्ट्यादौ अन्तरेणाप-
राग्नी गत्वेत्यादिशास्त्रोपदिष्टमार्गेण (४. १३. १२.) प्रवेशनं कृतम् तत्रातीत्य तत्क-
र्मातिक्रम्य समाप्य तेनैव मार्गेण निष्क्रमणं कर्तव्यम् · होमे पुनराचमनोत्तर-
कालम् इष्टौ च व्रतविसर्गोत्तरकालमिति ।

उत्तरतउपचारो यज्ञः ॥२६॥ यज्ञ उत्तरतउपचारो भवति उत्तरतः
विहाराडुत्तरदेशे उपचरणं कर्म करणं यस्यासावुत्तरतउपचारः · सर्वं कर्म वि-
हाराडुत्तरदेशे कर्तव्यमित्यर्थः उत्तरतउपचारो वै यज्ञ इति श्रुतेः (३. ४. ३. १९.) ·
यत्र शास्त्रेण देशान्तरमुपदिष्टं भवति यथा स जघनेन गार्हपत्यमाहवनीयस्य
पुरस्तान्मत्या चतुरश्रे श्वभ्रेऽइति [2] तत्र तथैव भवति । अस्यापवादमाह ·

दक्षिणतो ब्रह्मयजमानयोरासने ॥२७॥ ब्रह्मयजमानयोरासने वेदेर्द-
क्षिणतो भवतः · ब्रह्मा वै यज्ञस्य दक्षिणत आस्तेऽभिगोप्तेति (१. ७. ४. १८.) ब्रह्म-
णः · अथ हैषैव तुला यद्दक्षिणो वेद्यन्त इति प्रकृत्य (११. २. ७. ३३.) तस्माद्दक्षिणं
वेद्यन्तमधिस्पृश्यैवासीतेति श्रुतेर्यजमानस्य ।

पश्चाद्यजमानो वेदिस्पृक् ॥२८॥ तयोर्ब्रह्मयजमानयोर्मध्ये यजमानो
ब्रह्मणः पश्चादुपविशति · उभावप्युदङ्मुखौ · यजमानस्तु वेदिस्पृक् दक्षिणस्य

1) Thus B., the second आवृत्य being wanting in २. 2) See १६. २. २.

वेद्यन्तस्योपरि वेदिमध्ये पादौ निधायोपविशतीत्यर्थः । अत एवोक्तम् (११. २. ७. ३३.) अथ हैषैव तुला यद्दक्षिणो वेद्यन्तः स यत्साधु करोति तदन्तर्वेद्यथ यदसाधु तद्बहिर्वेदि तस्माद्दक्षिणं वेद्यन्तमधिस्पृश्येवासीतेति · वेदिप्रान्तस्योपरि पादौ बहिरासनम् · एवमुपविष्टः सन्यत्किंचित्साधु शोभनं कर्म द्रव्यत्यागादिकं करोति तदन्तर्वेदि करोति · अथ यदसाधु अशोभनमधोवायुसमुत्सर्गादि तद्बहिर्वेदि करोति ।

अध्वर्युः कर्मसु वेदयोगात् ॥२९॥ यजुर्वेदविहितेषु कर्मसु कर्त्रन्तरस्यावचने अध्वर्युः कर्ता स्यात् । कुतः वेदयोगात् वेदेन योगो वेदयोगः तस्मात् अध्वर्योर्वेदेन सम्बन्धात् अध्वर्युणा हि वेदो युज्यते समाख्यायते अध्वर्युवेद इति · यद्येतद्विहितेषु कर्मस्वध्वर्युः कर्ता भवति तर्हि वेदमुपपद्यते नान्यथा ।

वचनविरोधाभ्यामन्यः ॥३०॥ वचनाद्विरोधाच्चाध्वर्योरन्योऽपि यजुर्वेदविहितस्य कर्मणः कर्ता भवति । वचनात्तावत् मन्थिनं प्रतिप्रस्थातेति (४. २. १. १३.) तदेको दृषदुपले समाहन्तीति (१. १. ४. १३.) अधिश्रयत्यसावाज्यमिति (१. २. २. ४.) अग्नीदिन्द्रमेकादशकपालं निर्वपति (१. १. १५.) नेष्टा तोत इत्येनां वाचयति (७. ६. २५.) तस्योन्नेताश्रावयति (४. ४. ३. ८.) यजमानो वसोर्धारां जुहोति (१८. ५. १.) ब्रह्मा प्रायश्चित्तानि जुहुयादनादिष्टानीति (२५. १४. ३५.) । विरोधाच्च · पेषणोपधानयोर्युगपद्विरोधात् यथा कपालोपधाने अग्नीत् तथा घर्मे रौहिणयोर्निर्वपनाद्यासादनान्तं प्रतिप्रस्थातुः वसाहोमः [1] ध्रुवग्रहस्य होतृचमसेऽवनयनम् चयने सीरयोजनं च ।

हविष्पात्रस्वाम्यृत्विजां पूर्व-पूर्वमन्तरम् ॥३१॥ हविर्व्रीहियवादि [2] पात्राणि स्फ्यादीनि स्वामी कर्मफलभोक्ता यजमानः पत्नी वा ऋत्विजो ब्रह्माद्याः एतेषामेकत्र समावेशे [3] सति पूर्व-पूर्वम् अस्मिन्सूत्रे प्रथमं-प्रथममुपदिष्टम् अन्तरमग्निसंनिकृष्टं भवति अर्थात् पश्चात्पश्चादुपदिष्टं तदपेक्षया बहिर्भवति । पात्रहविरादीनामितस्ततो नयने ऋत्विग्यजमानानां चेतस्ततो गमनागमने कर्मार्थमुपवेशने सर्वत्रायमन्तर्बहिर्भावो ज्ञेयः ।

1) °होमं २. 2) ? °वाल्यादि २. वाद्याल्यादि २. 3) ? ससामवेशे २.

ऋत्विजां च यथापूर्वम् ॥३२॥ ऋत्विजामपि ब्रह्मादीनामुन्नेत्रन्तानां मध्ये एकत्र समावेशे सति यथापूर्वमिति यो-यः पूर्वः स-सोऽन्तरः अग्निसमीपः यो-य उत्तरतः स-स बहिर्भवतीति [1] पूर्वपूर्वापेक्षा · सर्वेषामितस्ततो गमनागमने अवस्थाने च अयमन्तर्बहिर्भावनियमः । चकाराद्धविषामपि यथापूर्वम् · तदर्थपात्राणामपि · सत्त्रगणयज्ञादौ [2] स्वामिनामप्येवमेव यथापूर्वमन्तर्बहिर्भावो द्रष्टव्यः ।

न वाचोदितत्वात् ॥३३॥ अचोदितत्वादयमन्तर्बहिर्भावो न स्यात् यदि न चोद्यते · चोद्यते च [3] तस्मादयमन्तर्बहिर्भावः स्यादेव । तद्यथा तामन्तरेण यूपं चाग्निं च हरन्तीति (३. ८. २. २०.) प्रत्याहृत्य वा सोमाहवनीययोरव्यवायादित्यादि (८. ८. ५.) · अन्तर्बहिर्भावश्चात्राप्यवधिकः · तेन वपा [4] अग्नेरव्यवहिता यूपस्तु पात्रत्वाद्वपापेक्षया बहिः · प्रतिप्रस्थाता तु ऋत्विक्त्वाद्यूपादपि बहिर्भवति ।

गार्हपत्ये संस्काराः ॥३४॥ अधिश्रयणपर्यग्निकरणपात्रप्रतपनादयः संस्काराः वचनाभावे गार्हपत्येऽग्नौ भवन्ति · तद्यथा शूर्पाग्निहोत्रहवण्योः प्रतपनम् स्रुक्स्रुवादीनाम् वरुणप्रघासे करम्भपात्रयवानां दक्षिणाग्नौ श्रपणेऽपि पर्यग्निकरणं गार्हपत्यादेव पितृयज्ञे च धानानाम् पर्णकषायोदकस्य तु दक्षिणाग्नावेव पाकः इष्टकापाकार्थत्वात् तत्पाकस्य दक्षिणाग्निना विधानात् ।

श्रपणं वाहवनीये ॥३५॥ हविषां श्रपणमाहवनीये वा स्यात् गार्हपत्ये वा उभयथा श्रुतत्वात् · तदाहुराहवनीये हवींषि श्रपयेयुरिति (१. ७. ३. २६.) उतो गार्हपत्य एव श्रपयन्तीति (२७.) च । आदिविकल्पोऽयम् नेक्षाविकल्पः तद्रूपिणा इति (२. ५. १८.) तद्रूपित्वस्य नियतत्वेनानुवादात् । तदुक्तम् रूपं कालो ऽनुनिर्वाप्य(ः) श्रपणं देवतास्तथा आदौ ये विधृताः पश्चात्त इमे सर्वदा स्मृता इति · रूपं कर्मस्वरूपम् दाक्षायणदर्शपूर्णमासादिकम् · काल उदितानुदितादिः · अनुनिर्वाप्यो वैमृधादित्यौ · श्रपणं हविःश्रपणम् गार्हपत्ये वाहवनीये वेति · देवता ऐन्द्रं भवति माहेन्द्रं वेति (४. २. १०.) · एतेषां विकल्पानां मध्ये यः प्रथमं स्वीकृतः स एव यावज्जीवं कर्तव्यः न पश्चान्तरम् · एवमेव [5] ते पञ्चैवादिविकल्पाः अन्ये सर्वेऽपीक्षाविकल्पाः ।

1) ? र्भवति २. 2) सवा° २. 3) त्वा २. च २. 4) ? चया २. 5) ? एकमेव २.

घृतमाज्ये ॥३६॥ आज्येन यूपमनक्ति आज्यमासिच्योद्गात्रे सौम्यं प्रयच्छतीत्यादौ किमाज्यशब्दो निर्वापादिसंस्कारनिमित्त उत जातिनिमित्त इति । तत्र संस्कृतऽआज्ये प्रायेणाज्यशब्दप्रयोगदर्शनात् संस्कारनिमित्त इत्येवं प्राप्तऽइदमुच्यते आज्ये विहिते घृतं प्रतीयात् असंस्कृतमेव घृतं गृह्णीयात् · जातिनिमित्तोऽयमाज्यशब्दो न संस्कारनिमित्त इत्यर्थः । यतोऽसंस्कृतेऽपि [1] जातिमात्रे प्रयोगो लोके वेदे च दृश्यते क्रय्यमाज्यम् स्त्रीणामाज्यम् तैलमुपसेचने [2] वर्तते · जातिं विना लोके वेदे च प्रयोगो नास्ति विना संस्कारं लोके प्रयोगोऽस्ति · अतो जातिनिमित्त एवेति । प्रयोजनम् आज्येन यूपमनक्ति आज्यमासिच्योद्गात्रे सौम्यं प्रयच्छतीत्येवमादौ संस्कारा न कर्तव्याः ।

लिङ्गात् ॥३७॥ मन्त्रलिङ्गादाज्यं गव्यं [3] भवति गवां सम्बन्धि भवति । किं लिङ्गम् · मह्यीनां पयोऽसीति (४. ३.) मह्य इति [ह] वाऽएतासामेकं नाम यद्गवामिति (३. १. ३. १.) । अतश्चोक्तं [4] मण्डनमिश्रैः घृतार्थे गोघृतं ग्राह्यं तदभावे तु माहिषम् आज्यं वा तदभावे तु साक्षात्तैलं ग्रहीष्यते तैलाभावे ग्रहीतव्यं तैलं जर्तिलसम्भवम् तदभावेऽतसीस्नेहः कौसुम्भं सर्षपोद्भवम् वृक्षस्नेहोऽथवा ग्राह्यः पूर्वालाभे परः परः तदभावे यवव्रीहिश्यामाकान्यतरोद्भवम् पिष्टमालोड्य [5] तोयेन घृतार्थे योजयेत्सुधीः वृक्षतैलेषु पुंनागनिम्बैरण्डोद्भवं त्यजेत् । यद्वा गव्यघृताभावे छागमाहिष्यादेर्घृतं क्रमात् तदलाभे गवादीनां क्रमात्क्षीरं विधीयते तदलाभे दधि ग्राह्यमभावे तैलमिष्यते यत्राज्यम[ज]नाद्यर्थं न लभ्येत कथं चन तत्र क्षीराद्यनादृत्य साक्षात्तैलं ग्रहीष्यते यत्र मुख्यं दधि क्षीरं तत्रापि तदलाभतः अजादेः क्षीरदध्यादि तदलाभे तु गोघृतम् मुख्यासन्नोऽथवा ग्राह्यः कार्यकारणसंततौ अत एव घृताभावे पूर्वं दधि ततः पय इति । तथा येषां केषांचिदन्येषां हविषामप्यसम्भवे सर्वत्राज्यमुपादेयं भरद्वाजमुनेर्मतादिति ।

तस्य होमोऽनादेशे ॥३८॥ अनादेशऽइति जुहोतीत्युक्ते द्रव्यान्तरस्या-

---

1) °स्कृतोपि २. 2) ?? स्त्रीणामातैलमुपसेवने २. °णामाज्यं तै° २. 3) ? °दाज्यं लिंगव्यं २. °दाज्यं लिंगं गव्यं २. 4) ? अतचोक्तं २. 5) °ड्यं २.

नादेशेऽनुक्तौ तस्याज्यस्य होमः कर्तव्यः । तद्यथा सव्येनावृत्य दक्षिणाग्नौ जुहोत्यग्नयऽइति सरस्वत्या इति चेति (३. ७. १८.) नमः कृतायेति जुहोतीति च (२. २. २३.) स्वाहा देवेभ्य इति जुहोति (६. ५. २२.) देवेभ्यः स्वाहेति जुहोति (६. ५. २४.) अयं न इति जुहोत्यस्मिन्नित्यादौ (८. ७. २.) सर्वत्राज्यस्य होमः कार्यः · अत्र तस्येत्यवयवलक्षणा [१] षष्ठी ।

चात्वालात्पुरीषम् ॥३९॥ धिष्ण्यनिवपनादौ [२] यत्र पुरीषेण प्रयोजनम् तत्र तत्पुरीषं चात्वालाद्ग्राह्यम् ।

आहवनीययज्ञतयो ध्रुवायाः ॥४०॥ आहवनीये ये यज्ञतयो यागा भवन्ति आज्यहविष्का उपांशुयाजाग्रयणद्यावापृथिवीयपथ्यास्वस्त्याद्यास्ते ध्रुवायाः सकाशादाज्यमवदाय कार्याः उपस्तृणन्नभिघारयन्नाज्यस्य यज्ञन्ध्रुवाया [३] गृह्णातीति आज्ययागार्थत्वेन ध्रौवस्य श्रवणात् · अत एव श्रुतेरुपस्ताराभिघारार्थमप्याज्यं सर्वत्र ध्रुवाया एव ग्राह्यम् । तेन कर्कोक्तं स्थाल्या एवोपस्ताराभिघारकरणं मन्दम् तत्र वचनाभावात् । सूत्रकारोऽपि इडाप्राशित्राघारांश्चैकऽइत्यनेन (४१.) इडाप्राशित्रयोर्गौणयज्ञशब्ददर्शनात्तदुपस्तरणाघारयोर्ध्रौवं विकल्पेनोपदिशन्मुख्ययज्ञेषूपस्तरणाभिघारणे ध्रौवादेव सिद्धे ज्ञापयति [४] तस्माद्ध्रुवाया एव सर्वो यज्ञः प्रभवतीति श्रुतेश्च (१. ३. २. २.) । आहवनीययज्ञतय इत्यत्राहवनीयग्रहणं गार्हपत्ययज्ञतिव्युदासार्थम् तेन पत्नीसंयाजेषु स्थाल्या एवाज्यं ग्राह्यम् न ध्रुवाया इति ।

इडाप्राशित्राघारांश्चैके ॥४१॥ एके शाखिनः इडायां प्राशित्रे च यदाज्यमुपस्ताराभिघारार्थम् आघारौ च पूर्वोत्तरौ तदर्थं चाज्यम् ध्रुवाया एव गृह्णन्ति तत्रापि यज्ञशब्दश्रवणात् · इडायां तावत् पाकयज्ञियेयेव वाऽएतदिडयाचारिषुरिति (१. ८. १. ४३.) · प्राशित्रे च तद्यथैव यज्ञस्यावदानमेवमेतदिति (१. ७. ४. ११.) · आघारयोश्च शिरो ह वै यज्ञस्येतयोरन्यतर आघारयोर्मूलमन्यतर इति [५] । अपरे त्वत्र यज्ञशब्दप्रयोगस्य स्तुतिपरत्वात्स्थाल्या एवेहन्ति ।

प्राञ्चावाघारौ ॥४२॥ पूर्वाघार उत्तराघारश्चैतौ द्वावप्याघारौ प्राञ्चौ

---

१) ? °यवाल° २. २) ? धिष्ण्यविपन्नादौ २. ३) ? °यां २. ४) ? सिद्धेऽपि° २.
५) see १. ४. ४. १. and १०.

प्राक्संस्थौ होतव्यौ ऋजू संततौ दीर्घौ च · ऋजुमाघारयति [संततमाघारयति] दीर्घमाघारयति प्राञ्चमाघारयतीति श्रुतेः · प्राञ्चौ इति सर्वेषां धर्माणामुपलक्षणार्थम् ।

विदिशावेके ॥४३॥ एके शाखिनः आघारौ विदिशौ जुह्वति आहवनीयस्योत्तरश्रोणेरारभ्य दक्षिणांसपर्यन्तं पूर्वाघारम् दक्षिणश्रोणेरारभ्योत्तरांसपर्यन्तमुत्तराघारमिति । तथा च सूत्रान्तरम् उत्तरपश्चार्धादग्नेरारभ्याविच्छिन्नं दक्षिणतो जुहोति · तथा दक्षिणपश्चार्धादारभ्याविच्छिन्नमुत्तरतो जुहोतीति ।

आहवनीये होमाः श्रुतिसमाख्यानाभ्याम् ॥४४॥ वचनाभावे सर्वे होमाः आहवनीये कर्तव्याः । कुतः श्रुतेः यदाहवनीये जुहोतीति होममात्राधिकरणत्वेनाहवनीयस्य श्रवणात् · समाख्यानाच्च आ समन्तात् आरभ्य वास्मिन्हूयतऽइत्याहवनीय इत्यन्वर्थसंज्ञाविज्ञानादित्यर्थः । तद्यथा यूपाहुतिं जुहोति (६. १. ४.) षड्ढोतारं जुहोतीत्यादौ (६. १. ३६.) । वचनेनान्यत्रापि भवन्ति · तथा दक्षिणाग्नौ जुहोति (३. ७. १८.) आग्नी[ध्री]ये जुहोतीति (१०. २. ७.) ।

जुह्वावचने ॥४५॥ होमसाधनान्तरस्यावचने जुह्वा होमः कार्यः · तद्यथा सव्येनावृत्य दक्षिणाग्नौ जुहोति (३. ७. १८.) नमः कृतायेति कर्मापवर्गे जुहोतीत्यादौ (२. २. २३.) । कुतः समाख्यानादेव हूयतेऽनयेति जुहूरिति । एतच्च यत्र दर्शपूर्णमासतद्विकारादौ जुहूरस्ति तत्रैव जुह्वा होतव्यम् नान्यत्रेति कर्कः · परिभाषायामुपदेशात्सर्वत्रेति याज्ञिका हरिस्वामिनश्च ।

सकृद्गृहीतार्थावाप्तेः ॥४६॥ सकृद्गृहीतेत्यविभक्तिकोऽयं निर्देशः · अवचनऽइत्यनुवर्तते । अवचने सर्वत्र सकृद्गृहीतमाज्यं जुहुयात् । कुतः अर्थावाप्तेः अर्थस्य होमलक्षणस्य कार्यस्यावाप्तेः सिद्धेः सकृद्गृहीतेनाप्याज्येन होमः सिध्यत्येव · तद्यथा दक्षिणाग्नौ जुहोत्यग्नयऽइति सरस्वत्याऽइति चेति (३. ७. १८.) नमः कृतायेति जुहोतीत्यादौ (२. २. २३.) । वचनेन त्वन्यथापि भवति · यथा यूपाहुतौ चतुर्गृहीतꣳ स्रुवेण वेति (६. १. ४.) षड्ढोतारं पञ्चगृहीतमित्यादि (६. १. ३६.) ।

अवपद्धारातिरेकाच्च ॥४७॥ अवपद्धाराहुतौ द्वितीयस्यावदानस्यैवातिरेकात् अतिरेकप्रत्ययात् सकृद्गृहीतमेव होतव्यमिति · कथम् · तद्धि चतुरवत्तं

भवतीदं वाऽग्रनुवाक्याय याज्याय वषट्कारोऽथ सा देवता चतुर्थो यस्यै देवतायै हविर्भवतीति (१. ७. २. ७.) प्रकृत्याह्वातिरिक्तां ह तदवदानं[1] यत्पञ्चममिति ज्ञापयन्नवषट्कारास्वाहुतिषु[2] पुरोऽनुवाक्याद्यभावादुक्तमध्ये एकस्या देवताया एव सद्भावात् द्वितीयमेवावदानमतिरिक्तं ज्ञापयति । तथा अग्निहोत्रे यच्चतुरुन्नैषी-र्दिरहौषीरथ[3] के ते द्वेऽग्राहुतीऽइति द्वयोरतिरेकं दर्शयति ॥ ॥ अष्टमी कण्डिका ॥ ८ ॥ ॥

अथ पद्धतिः ॥

एकप्रयोजनार्थं यत्र द्रव्यद्वयं श्रूयते यथा व्रीहिभिर्यजेत यवैर्यजेतेति तत्रो-भयोरेककार्यत्वादेकेन तस्मिन्कार्ये कृते द्वितीयेन तस्यैव करणासम्भवाद्विकल्पो व्रीहिभिर्वा यवैर्वेति । अदृष्टार्थेषु बहुषु विहितेषु सर्वेषां समुच्चयो भवति · कुतः अविरोधात् · यथाघारे ऋजुप्राग्दीर्घसंततेषु । होतृमन्त्राणामग्निमन्थनीयादी-नामदृष्टार्थत्वात्समुच्चयो भवति · अग्निस्थापनमन्त्राणां च भूर्भुवः स्वरित्येवमादीनां वचनेन समुच्चयः · होतृमन्त्रत्वेऽपि याज्यानुवाक्यासु समुच्चयो न भवति पुरो-ऽनुवाक्या[4] याज्या च एकस्मिन्यागे एकैका एव भवति · एकस्मिन्निमित्ते पठि-तानां सर्वेषां प्रायश्चित्तानां समुच्चयो भवति ॥ यज्ञकर्मणि प्रयुज्यमानानां मन्त्राणां तानेन एकश्रुत्यैव प्रयोगो न संहितास्वरेण नापि ब्राह्मणस्वरेण · सुब्रह्म-ण्यासामजपन्यूङ्खयाजमानानां कर्मणि प्रयुज्यमानानामपि संहितावदेव स्वरो नैकश्रुतिः ॥ आधाने ता वै षड्दद्यात् द्वादश दद्यात् चतुर्विंशतिं दद्यादि-त्येवमाद्या दक्षिणा विकल्पेन भवति न समुच्चयेन एकयैव दक्षिणाकार्यस्य कृतत्वात् । अनेकपशुसाधनके कर्मण्यूवध्यवसाग्रपूर्वीवनिष्ठुपुरीतत्प्लीहक्लोमादीनां समुच्चयो भवति सर्वपशूनामेतानि सर्वाण्यपि प्रतिपाद्यानीत्यर्थः । सोमक्रये यानि गवादीनि दश द्रव्याणि श्रूयन्ते तेषामपि समुच्चयो भवति क्रयस्यादृष्टार्थ-त्वात् · दशभिरिति संख्योपबन्धाच्च ॥ गार्हपत्याहवनीयौ न व्यवेयात् । सर्वत्र प्रदक्षिणीकृत्याप्रदक्षिणामावृत्तिः कार्या अप्रदक्षिणीकृत्य च प्रदक्षिणामावृत्तिः

---

1) ह वदानं २. ह ववदानं २. 2) ? ह्वा — वन्नव° २. 3) ? °न्नैषी द्विरैषी° २.
4) ? सानुवाक्या १. २. ३.

कार्येति । सर्वकर्म विहारस्योत्तरतः कार्यम् · ब्रह्मयजमानयोरासने विहारस्य दक्षिणतो भवतः · तयोर्मध्ये यजमानो वेदिं स्पृष्ट्वा पश्चादुपविशति वेदिमध्ये पादाग्रे निधायेत्यर्थः · पुरस्ताद्ब्रह्मोपविशति ॥ अनादेशे यजुर्वेदविहितस्य कर्मणोऽध्वर्युरेव कर्ता · वचनादन्योऽपि भवति यथा प्रतिप्रस्थाता मन्थिनं जुहोति · विरोधाच्चाध्वर्योरन्यः कर्ता भवति यथा पेषणेऽध्वर्योर्व्यापृतत्वाद्विरोधात्कपालोपधानेऽग्नीत् ॥ हविष्पात्रस्वाम्यृत्विजामेकत्र समावेशे यत्पूर्वं-पूर्वम् तत्तदन्तरं भवति यद्यदुत्तरम् तद्बहिर्भवति · ऋत्विजामपि मध्ये एकत्र समावेशे पूर्वः-पूर्वोऽन्तरो भवति उत्तर-उत्तरो बहिर्भवति · हविषामपि मध्ये पूर्वं-पूर्वं हविरन्तरं कार्यम् उत्तरमुत्तरं बहिः ॥ प्रतपनादयोऽग्निसाध्याः संस्कारा गार्हपत्ये भवन्ति · हविःश्रपणं सर्वकर्मस्वाहवनीये गार्हपत्ये वा भवति ॥ आज्यशब्दे श्रुते सर्वत्र संस्काररहितं घृतमात्रं ग्राह्यम् · तच्चाज्यं गव्यं ग्राह्यम् कुतः मह्रीनां पयोऽसीति (४. ३.) मन्त्रलिङ्गात् । यत्र सूत्रमध्ये जुहोतीत्येतावदेवोच्यते द्रव्यं किंचिन्नोच्यते तत्र सर्वत्राज्यस्य होमः कार्यः । यत्र मध्ये पुरीषं निवपतीत्येवमादौ (८. ६. ४. १०.) पुरीषेण कार्यम् तत्र पुरीषं चात्वालाद्ग्राह्यम् । आहवनीये (ये) यजतयः आज्यभागोपांशुयाजपथ्यास्वस्त्यादियागादयः आज्यहविष्कास्ते ध्रुवायाः सकाशादाज्यं चतुरवदायावदाय कार्याः · इडाप्राशित्राघारानप्येके ध्रुवायाः कुर्वन्ति । आघारौ प्राञ्चौ विदिशौ वा होतव्यौ · उभयपक्षेऽपि ऋजू दीर्घौ संततौ च ॥ अनादेशे सर्वे होमा आहवनीयऽएव कर्तव्याः · वचनादन्यत्रापि । वचनाभावे सर्वत्र होमो जुह्वा कर्तव्यः । वचनाभावे सर्वत्र सकृद्गृहीतमिव होतव्यम् ॥ ॥ ९ ॥

इति प्रथमस्याष्टमी कण्डिका ॥ ॥

व्रीहीन्यवान्वा हविषि ॥ १ ॥ हविषि विहिते सति व्रीहीन्यवान्वा प्रतीयात् ।

तस्य द्विरवद्यति ॥ २ ॥ तस्य हविषः पुरोडाशचरुधानासांनाय्यादिरूपस्य द्विरवद्यति यागार्थं द्विरवखण्डयति । तस्येत्यवयवषष्ठीयम् ।

त्रिर्जमदग्नीनाम् ॥३॥ जमदग्निः प्रवरो येषां ते जमदग्नय इत्युच्यन्ते। तेषां जमदग्नीनां पञ्चार्षेयाणां त्रिरवद्यति · तथा चोपस्तराभिघाराभ्यां पञ्चावत्तं सम्पद्यते · किं बहुना यत्र-यत्रान्येषां चतुरवत्तमाज्यभागपत्नीसंयाजप्रधानयागादौ तत्र सर्वत्र जमदग्नीनां पञ्चावत्तमेव कर्तव्यम् · पञ्चावत्तं जमदग्नीनामिति शाखान्तरात् · अग्निहोत्रहोमेऽपि तेषां पञ्चावत्तमेव पठ्यते मानवे चतुः पञ्चकृत्वो वेति · आपस्तम्बोऽपि पञ्च जमदग्नीनामिति। पित्र्यायां च प्रधानयागेषु स्वीयस्वीयहविषोर्द्विर्द्विरवदेयम् अन्येभ्यस्तु सकृत्सकृत् · कव्यवाहनयागे तु द्विरुपस्तरणं कार्यम् हविर्भ्यो वा द्विर्द्विरवदेयम् · पश्ववदानेभ्योऽपि त्रिरवदेयमिति विशेषस्तूपरिष्टात्तत्र-तत्र[1] वक्ष्यते। अत्र त्रिर्जमदग्नीनामिति जमदग्निग्रहणमुपलक्षणार्थम् अन्येषामपि पञ्चावत्तं स्मर्यते · तथा हि जमदग्निवत्सविदा वार्ष्टिषेणास्तथैव[2] च पञ्चावत्तिन एतेऽन्ये सर्वे चतुरवत्तिन इति।

पश्चात्तृतीयम् ॥४॥ तत्तृतीयमवदानं हविषः पश्चाद्भागादवदेयम् प्रथमद्वितीये तु मध्यात्पूर्वार्धादिति वक्ष्यते (६.)।

सर्वेषां वोभयमविधानात् ॥५॥ वा विकल्पे। सर्वेषामिति जमदग्नीनां तद्व्यतिरिक्तानां चोभयं चतुरवत्तं पञ्चावत्तं वा भवति। कुतः अविधानात् जमदग्नीनामेव पञ्चावत्तं भवतीति नियमस्याविधानात्। अविशेषेण हि श्रूयते (१. ७. २. ७.) तद्धि चतुरवत्तं भवतीति उतो पञ्चावत्तमेव भवतीति (८.)। शाखान्तरे तु पञ्चावत्तं जमदग्नीनामिति · तेन जमदग्नीनां पञ्चावत्तमेव नियतम् इतरेषां चतुरवत्तं वा पञ्चावत्तं वेति।

मध्यात्पूर्वार्धाच्चासम्भिन्दन्नङ्गुष्ठपर्वमात्रमवदानम् ॥६॥ हविषो मध्याद्धविषः पूर्वार्धाच्चाङ्गुष्ठमात्रमङ्गुष्ठपर्वप्रमाणं तिरश्चीनमवदानमवद्यति · किं कुर्वन् असम्भिन्दन् अवदानयोः परस्परं सम्भेदं संगतिं मर्यादाभङ्गमकुर्वन्नित्यर्थः · अवदानयोः सम्भेदे कृते मर्यादाभङ्गः तद्भङ्गे च मध्यपूर्वार्धसंमोहो मा भूदिति यत्नः कार्यः।

मात्रावद्दधिपयसोः ॥७॥ दधिपयसोरपि अवदानं मात्रावदवदेयम् अङ्गु-

---

1) ? एतत्रतत्र २. 2) sic! आर्ष्टि°?

ष्ठमात्रमेवेत्यर्थः · तयोर्हि द्रवत्वात्स्रुवेणावदानम् सामर्थ्यात् स्रुवपुष्करस्यैतावन्मात्रपरिमाणत्वात् ।

आद्यन्तयोराज्यम् ॥ ८॥ हविराद्यवदानस्याद्यन्तयोरित्यादौ अन्ते चाज्यमवदेयम् स आज्यस्योपस्तीर्य द्विर्हविषोऽवदायाथोपरिष्टादाज्यस्याभिघारयति सैषाज्येन मिश्राहुतिर्हूयतऽइति (१. ६. १. २१.) श्रुतेः · तच्च ध्रुवाया अवदेयम् उपस्तृणन्नभिघारयन्नाज्यस्य यज्ञन्ध्रुवायां गृह्णातीति वचनात् ।

एकप्रत्यवायꣳ स्विष्टकृतः ॥ ९॥ एकप्रत्यवायं प्रधानावदानापेक्षयैकेनावदानेनोनं हीनं स्विष्टकृद्यागस्यावदानं भवति · यस्य प्रधानयागे द्विरवदानम् तस्यैकं स्विष्टकृद्यागे यस्य त्रिस्तस्य द्वेऽइति ।

द्विश्चाभिघारणम् ॥ १०॥ स्विष्टकृति अवदानानन्तरमुपरिष्टाद्द्विरभिघारणं भवति · वरुणप्रघासादौ तथानुवादात् स सर्वेषामेव हविषामध्वर्युः सकृत्सकृदवद्यत्यथैतस्याऽएव पयस्यायै प्रतिप्रस्थाता सकृदवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारयतीति (२. ५. २. ३१.) · गृहमेधीयेऽपि स्थालीपाके अथास्य चरोः सकृदवद्यत्यथोपरिष्टाद्द्विराज्यस्याभिघारयतीति (२. ५. ३. १५.) च ।

अवदाय प्रत्यभिघारणं प्राक्स्विष्टकृतः ॥ ११॥ अवदाय प्रधानार्थं हविषोऽवदानं गृहीत्वा हविषो यावद्भ्यः प्रदेशेभ्योऽवदानग्रहणं कृतं भवति तत्र प्रत्यभिघारणमाज्येन कर्तव्यम् · स्विष्टकृतः प्राक् स्विष्टकृदर्थावदानानन्तरं तु हविषः प्रत्यभिघारणं न भवति · तस्माद्यस्य कस्य च हविषोऽवद्यति पुनरेव तदभिघारयति स्विष्टकृतऽएव तत्पुनराप्याययत्ययातयाम करोत्यथ यदा स्विष्टकृतेऽवद्यति न ततः पुनरभिघारयति नो हि ततः कां चन हविषोऽग्नावाहुतिꣳ होष्यन्भवतीति (१. ५. ३. २५.) श्रुतत्वात् · तथा वरुणप्रघासेषु वारुण्याद्यवदानानन्तरं श्रूयते (२. ५. २. ३७.) प्रत्यनक्त्यवदानेऽअतिक्रामतीति · न प्रत्यनक्त्यवदानानि नातिक्रामतीति (२. ६. १. ३१.) श्रवणात्प्रत्यवदानमभिघारणं[1] कार्यम् ।

सर्वहुत एककपालः ॥ १२॥ एकस्मिन्कपाले संस्कृतः एककपालः द्यावापृथिवीयकार्यवैश्वकर्मणसौर्यादिकः स सर्वहुतः कर्तव्यः । अथैतꣳ सर्वमेव

१) ? °त्प्रसंत्यंतदानं २. °त्प्रत्यंतदानं २. Are we perhaps to read: °त्प्रसङ्गेन प्रत्यवदान°?

जुहोति न स्विष्टकृतेऽवद्यतीति (२. ४. ३. १.) द्यावापृथिवीयस्य सर्वहुतत्वश्रवणात् तत्प्रकृतित्वाच्चैककपालानाम् · तत्र चतुरवत्तत्वसम्पत्तये उपरिष्टाद्द्विरभिघारणं कर्तव्यम् पञ्चावत्तिनां तु द्विरुपस्तरणं द्विरभिघारणं च ।

अनुवाचनप्रैषो यथादेवतममुष्मा ऽ अनुब्रूहीति ॥१३॥ अनुवाचनार्थं प्रैषोऽनुवाचनप्रैषः पुरोऽनुवाक्यार्थः प्रैषः · स यथादेवतम् या-या देवता यस्मिंस्त्यागे भवति तद्वाचिपदममुष्मा ऽ इति-वच्चतुर्थ्यन्तं [1] प्रयुज्यानुब्रूहीति एवं प्रैषः कर्तव्यः · अग्नयेऽनुब्रूहि सोमायानुब्रूहीत्येवम् ।

आश्राव्यप्रैषे च ॥१४॥ आश्राव्येत्याश्रावणानन्तरं यत्र मैत्रावरुणस्य प्रैषः क्रियते तत्रापि देवतापदं चकारादमुष्मै इत्येवं चतुर्थ्यन्तमेव प्रयोज्यम् · अग्नये प्रेष्य सोमाय प्रेष्येत्येवम् ।

अमुं यजेति ॥१५॥ यत्राश्रावणानन्तरं मैत्रावरुणस्य प्रैषो न भवति तत्रामुं यजेत्येवं द्वितीयान्तं देवतापदं प्रयोज्यम् · तद्यथा अग्निं यज सोमं यजेति ।

प्रैषानुवाचने षष्ठी वपायै धानासोमेभ्य इति परिहाप्य ॥१६॥ प्रैषसम्बन्ध्यनुवाचनं प्रैषानुवाचनम् · यत्र पुरोऽनुवाक्यानन्तरं मैत्रावरुणस्य प्रैषो भवति तत्र पुरोऽनुवाक्याप्रैषे द्रव्यवाचिनि शब्दे षष्ठी विभक्तिर्भवति देवतावा[चिनि] चतुर्थी उक्तैव · तद्यथा अग्नीषोमाभ्यां छागस्य हविषोऽनुब्रूहीति । किं सर्वत्राप्येवम् · नेत्याह वपायै धानासोमेभ्य इति परिहाप्य · इमौ प्रैषौ (३. ८. २. २६. ४. ४. ३. १.) वर्जयित्वा · अत्रानुवाचने द्रव्यवाचिनि शब्दे चतुर्थी विभक्तिः इतोऽन्यत्र षष्ठीति ।

असावित्यपनोदे ॥१७॥ यत्र प्रैषे असाविति यष्टुर्नामपदं भवति यथा पुनरभ्युन्नीतेषु नामग्राहं यज-यजेति प्रशास्त्रादीनिति (६. ११. ७.) प्रशास्तर्यज ब्रह्मन्यजेत्यादि तत्र देवताविभक्तिरपनोदे अपनये वर्तते देवताविभक्तिस्तस्मात्प्रैषादपनीयते न प्रयुज्यतऽइत्यर्थः । अथवा यत्र मन्त्रमध्ये असावित्येवं सर्वनामपदं पठितं भवति यथा सम्राडयमसाविति (१४. ५. २५.) बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसाविति (६. ३०.) इममुष्य पुत्रममुष्यै पुत्रमित्यादि (६. ४०.)

[1] ? इति कचतु° २. इति चतु° २.

च तत्र सर्वनामपदमपनोदे अपनये वर्तते · तस्यापनोदमपनयं निष्काशनं कृत्वा तत्स्थाने [1] यद्विवक्षितं तस्य नाम्नः प्रक्षेपः कार्यः · तद्यथा सम्राडयं यज्ञदत्तशर्मा साम्राज्येनाभिषिञ्चामि यज्ञदत्तशर्मन्निति इमममुष्य पुत्रमित्यत्र रामं दशरथस्य पुत्रं कौशल्यायाः पुत्रमित्येवं प्रयोज्यम् ।

सवषट्कारासु तिष्ठन्दक्षिणत उदङ्प्राङ्वषट्कृते ॥१८॥ वषट्कारेण सह वर्तन्तऽइति सवषट्काराः · तास्वाहुतिषु अध्वर्युर्दक्षिणतो वेदेर्दक्षिणभागे उदङ्प्राङ् इत्यैशानदिगभिमुखोऽवस्थितो वषट्कृते होत्रा वौषडित्युक्ते सति जुहोति आहवनीयमध्ये हविः प्रक्षिपति न तु वषट्कारात्पुरा ।

सह वा ॥१९॥ अथवा वषट्कारेण सहैव जुहोति युगपदित्यर्थः · तस्मादु सह वैव वषट्कारेण जुहुयाद्वषट्कृते [2] वेति (१. ७. २. १२.) उभयथा श्रवणात् । वषट्कारात्पूर्वं होमे निन्दा च श्रूयते (१. ७. २. १३.) देवपात्रं वाऽएष यद्वषट्कारस्तद्यथा पात्रऽउद्धृत्य प्रयच्छेदेवं तदथ यत्पुरा वषट्काराज्जुहुयाद्यथाधो भूमौ निदिध्यं [3] तदमुया स्यादेवं तदिति · तथा [4] तद्यथा योनौ रेतः सिञ्चेदेवं तदथ यत्पुरा वषट्काराज्जुहुयाद्यथायोनौ रेतः सिक्तं तदमुया स्यादेवं तदिति (१४.) · अमुयेति वृथेत्यर्थः । तस्माद्वषट्कारेण सह वा होमो वषट्कारानन्तरं वेति सिद्धम् । यत्र वरुणप्रघासगृहमेधीयशुक्रामन्थिप्रचारादौ पुनर्वचनम् वषट्कृते जुहुतो (२. ५. २. ३१.) वषट्कृते जुहोतीति (२. ५. ३. ७.) तत्र तस्यैव नियमो न सहेति ।

उभयत आज्यꣳ हविषः ॥२०॥ होमकाले हविष उभयतः आज्यं होतव्यम् पूर्वमल्पमाज्यं हुत्वा ततो हविर्हूयते पुनश्चोपर्याज्यमित्यर्थः ।

सह वा ॥२१॥ अथवा आज्यं हविश्चोभयं सहैव युगपदेव हूयते नोभयत आज्यमिति · प्रदग्धाहुतिर्ह वाऽअन्योऽध्वर्युरिति (११. ४. २. १६.) प्रकृत्य अथ हैना एष संतर्पयति योऽयमाज्यꣳ हुत्वावदानानि जुहोत्यथ पुनरन्तत आज्येनाभिजुहोत्येष हैनाः संतर्पयतीति · तथा तदु होवाच याज्ञवल्क्यो यद्वा

---

1) ? °ष्कारानं कृत्वात्‌यस्थाने २. 2) जुहुते वेत २. 3) ! यथायोनौ रेतः सिक्तं २. 4) तद्यथा २.

ऽउपस्तीर्यावदायाभिघारयति [1] तदेवैनाः संतर्पयतीति (२०.) च श्रवणात् ॥ ॥

नवमी कण्डिका ॥ ९ ॥

अथ पद्धतिः ॥

व्रीहीणां यवानां वा हविः सर्वत्र भवति · व्रीह्याग्रयणानन्तरं यवाग्रयणादर्वाग्व्रीहिभिरेव दर्शपूर्णमासौ कार्यौ यवाग्रयणानन्तरं च प्राग्व्रीह्याग्रयणाद्यवैरेव · अथवा सदा व्रीहिभिरेवेत्यापस्तम्बः · दर्शपूर्णमासयोरेवायं द्रव्यनियमः विकृतिष्वनियमः । तस्य हविषो द्विरवद्यति · पुरोडाशचर्वादेर्मध्यप्रदेशादेकमङ्गुष्ठपर्वमात्रं तिरश्चीनमवदानमवद्यति तथैव द्वितीयं हविःपूर्वभागात् · कथम् असम्भिन्दन् अवदानयोर्मर्यादाभङ्गमकुर्वन्नित्यर्थः । पञ्चार्षेयाणां जमदग्नीनां जमदग्निप्रवराणां च हविषस्त्रिरवद्यति एवं मध्यात् द्वितीयं पूर्वभागात् तृतीयं पश्चाद्भागात् · यत्र-यत्र चतुरवत्तं दृश्यते आज्यभागपत्नीसंयाजोपांशुयाजाग्निहोत्रहोमादावपि तत्र सर्वत्र जमदग्नीनां पञ्चावत्तमेव भवति · अथवा जमदग्नीनां पञ्चावत्तमेव इतरेषां चतुरवत्तं पञ्चावत्तं वा । दधिपयसोरपि स्रुवेणावदानग्रहणम् अतस्तदवदानमप्यङ्गुष्ठपर्वमात्रमेव भवति । हविषोऽवदानात्प्रथममाज्यं सकृदवदाय ततो हविरवदेयम् पुनरप्यन्ते आज्यं सकृदेवावदेयम् । स्विष्टकृति तु प्रधानावदानादेकोनं हविषोऽवदानं भवति · येषां प्रधानयागे अवदानद्वयम् तेषां स्विष्टकृत्येकमवदानम् येषामवदानत्रयं प्रधानयागे तेषां हविष उत्तरार्धादेव स्विष्टकृत्यवदानद्वयम् · उपस्तारः सकृत् उपर्यभिघारणं द्विर्वारं भवति । हविषो ऽवदायावदानयोः प्रत्यभिघारणम् · स्विष्टकृदवदानानन्तरं हविषः प्रत्यभिघारणं न भवति । एककपालः पुरोडाशः सर्वहुतः कर्तव्यः ॥ चतुर्थ्यन्तेन देवतापदेनानुवाचनप्रैषः कर्तव्यः अग्नयेऽनुब्रूहीत्येवं सोमायानुब्रूहि । आश्रावणानन्तरं यत्र मैत्रावरुणः प्रेष्यते तत्रापि चतुर्थ्यन्तमेव देवतापदं प्रयोज्यम् अग्नये प्रेष्य सोमाय प्रेष्येत्येवम् · आश्रावणानन्तरं यत्र मैत्रावरुणस्य प्रैषाभावस्तत्र द्वितीयान्तं देवतापदमुच्चारणीयम् अग्निं यज सोमं यजेत्येवम् । प्रैषसम्बन्धिन्यनुवाचने द्रव्ये षष्ठी विभक्तिर्भवति यथेन्द्राग्निभ्यां छागस्य हविषोऽनुब्रूहीति (६. ८. १४.)

---

१) °दायाघा° २.

वपायै धानासोमेभ्य इति प्रैषद्वयं वर्जयित्वा ॥ यत्रासौ यजेति विहितं भवति यथा नामग्राहं यज-यजेति प्रशास्त्रादीनिति (९. ११. ७.) तत्र देवतापदं न प्रयोज्यम् प्रशास्तर्यज पोतर्यज नेष्टर्यजेत्येव वक्तव्यम् · अथवा यत्र-यत्र मन्त्रे असाविति सर्वनामपदं श्रूयते तत्र-तत्र तत्तत्पदमपनीय तस्य स्थाने तद्वाच्यस्य नामोच्चारणीयम् यथेमममुष्य पुत्रमित्यादौ (९. ४०.) ॥ सवषट्कारास्वाहुतिषु वेदेर्दक्षिणभागे उदङ्प्राङ् इतीशानाभिमुखस्तिष्ठन्वषट्कारानन्तरं वषट्कारेण सह वा जुहुयात् ॥ यत्राज्यमिश्रं हविस्तत्र पूर्वमाज्यं हुत्वा ततो मध्ये हविर्हुत्वा पुनरुपर्याज्यं जुहुयात् · अथवा सहैव सर्वमाज्यं हविश्च जुहुयात् ॥ ॥९॥

इति प्रथमस्य नवमी कण्डिका ॥

अथेदं विचार्यते । अग्नयेऽनुब्रूहि (३. १. १.) प्रोक्षणीरासादय (२. ६. ३४.) अग्नीदग्नीन्विहर बर्हि स्तृणीहीत्येवमादयः (९. ७. ५.) श्रूयन्ते · ते किं कर्मचोदका विधय उत मन्त्रा इति · प्रैषाणां प्रस्तुतत्वात्तद्विषयत्वमेव [1] चिन्त्यते । नन्वेषां मन्त्रत्वं प्रागुक्तमेव ऋचो यजूंष्यपि सामानि निगदा मन्त्रा इति (१. ३. १.) · सत्यम् · उक्तम् तथापि निगदानामितरमन्त्रेभ्यः किंचिद्वैलक्षण्यमस्ति · तेन तदेवाक्षिप्य स्थिरीक्रियते · किं वैलक्षण्यमिति चेत् तदभिधीयते ·

वर्तमानोपदेशाच्चोदनाशब्दाच्छ्रुत्यर्थाभावात्तवै [2] चेति [3] वचनान्निर्देशात्कर्मचोदकः ॥१॥ अग्नीदग्नीनित्यादिः कर्मचोदकः कर्मविधायकः विधिवाक्यमित्यर्थः न तु मन्त्रः । कुतः वर्तमानोपदेशात् एवमादयो वर्तमानमर्थमनुष्ठेयत्वेन यत उपदिशन्ति · अग्निविहरणं कर्तव्यं स्तरणं च कर्तव्यमित्येवमुपदिश्यते । किं च चोदनाशब्दात् · अपि च एषु प्रैषेषु चोदनाशब्दो विधिशब्दोऽस्ति · विधौ हि लोट् स्मर्यते लोडिति (पाणि° ३. ३. १६२.) · लोण्मध्यमपुरुषवचनानि चैतानि विहर स्तृणीहि आसादयेत्यादीनि · तस्मादपि कर्मचोदका एते । श्रुत्यर्थाभावात् · अपि च विधिविभक्तिश्रवणेऽपि यदि विधित्वं नाश्रीयते तर्हि श्रुत्यर्थाभावः श्रुतार्थहानिः स्यात् । तवै चेति वचनात् · अपि

1) °षयमेव २. 2) ?? वर्तमानाप° १. २. 3) Thus १. वेति २.

च इदमपरं मन्त्रतो[1] वैलक्षण्यम् यत्प्रैषास्तवैवचनाः पठ्यन्ते ब्राह्मणं तर्पयितवै (१. ७. ३. २८.) अश्वमानेतवै (२. १. ४. १६.) प्राञ्चं हर्तवै (१२. ४. ४. ६.) इत्यादयः · मन्त्राश्च इतिवचनाः कर्मणे वां वेषाय वामिति (२. ३. १०.) उरु वातयेति (२. ३. १६.) इषे त्वेति ऊर्जे त्वेत्यादयः (४. २. १.) · अतोऽप्यमन्त्रत्वम्[2]। निर्देशात् · अपि च मन्त्रास्तु वेदे निर्दिष्टा एव परिगणिता एव अहे बुध्य मन्त्रं मे गोपाय यमृषयस्त्रैविदा[3] विदुः ऋचः सामानि यजूंषीति · निगदास्तत्रानिर्दिष्टाः[4] तस्मादमन्त्रत्वम् · अथवा निर्देशात् विधिविभक्तियोगाद्धकुवल्येते कर्म निर्देष्टुं विधातुम् । तस्मादेवंजातीयकः कर्मचोदकः इति पूर्वः पक्षः । सिद्धान्तमाह ·

मन्त्रो वा समभिव्याहारात् ॥२॥ अग्नीदग्नीनित्येवमादिको मन्त्र एव प्रत्येतव्यो न कर्मचोदकः । वाशब्दः पूर्वपक्षनिरासे । कुतः समभिव्याहारात् य एभिरर्थोऽभिधीयते तस्य वाक्यान्तरेण समभिव्याहारात् विधानादित्यर्थः विहरत्यग्नीदग्नीन्स्तृणाति बर्हिरित्यादिना (४. २. ५. ११.) · यद्येते कर्मचोदका भवेयुस्तदा वाक्यान्तरे एषामर्थो न विधीयेत विधीयते च तस्मान्मन्त्रा एवैते न कर्मचोदका इति · न च विहितस्य पुनर्विधानं युज्यते अभिधानं तु सम्भवति तस्मान्मन्त्रा एव । अथवा अयमर्थः · समभिव्याहारात् · प्रयोगकाल एषां समभिव्याहार उच्चारणं विधीयते अथाह प्रोक्षणीरासादयेति (१. २. ५. २१.) अथ स्तुत एतां वाचं वदत्यग्नीदग्नीन्विहरेत्यादि (४. २. ५. ११.) · यद्येते विधयः स्युस्तर्ह्युच्चारणमेषां न विदधीत विधत्ते च तस्मान्मन्त्रा इति । वर्तमानोपदेशकत्वं[5] च मन्त्रत्वेऽपि न विरुध्यते । यदुक्तम् चोदनाशब्दाद्धुत्यर्थाभावादिति तन्मन्त्रत्वेऽपि न विरुध्यते · न चायं विधौ लोट् किंतु प्राप्तकाले अग्नीधं प्रत्यध्वर्युर्ब्रूते[6] हे अग्नीत् त्वमग्नीन्विहर तव अग्निविहरणस्य प्रातः काल इति । तवै चेतिवचनत्वं चानैकान्तिकम् · मन्त्रा अपि तवैवचनाः सन्ति कन्या-इव वहतुमेतवा उ इति (१७. ३०.) · मन्त्राश्चानितिवचनाः स जुहोत्येष स्य वाजीत्यादयः (५. १. ५. १३.) · अतस्तद्वैलक्षण्यं नास्तीति । यजुषां निर्देशान्निगदा

1) मंत्रा २. मंत्राता २. 2) ? अथोतीयम° २. अतोथम° २. 3) °विदो २. 4) ? स्तत्र निर्दि° २. 5) ? °नापदे° २. 6) ? °ब्रूते २.

अपि निर्दिष्टा एव · तेन निगदानां पृथगनिर्देशादमन्त्रत्वमित्येतदपि निरस्तम् । तस्मादेवंजातीयका मन्त्रा एवेति सिद्धम् ।

अर्थप्रसंख्यया द्रव्योपकल्पनम् ॥३॥ अर्थः प्रयोजनं कार्यमित्यर्थः प्रकर्षेण संख्यानं गणनं प्रसंख्या अर्थस्य प्रसंख्या अर्थप्रसंख्या · तया अर्थप्रसंख्यया प्रयोजनपरिगणनया द्रव्योपकल्पनम् द्रव्याणां शूर्पाग्निहोत्रहवण्यादीनामुप समीपे कल्प[नं] स्थापनं कर्तव्यम् · करिष्यमाणे कर्मणि उपयोक्ष्यमाणानि सर्वाणि द्रव्याणि हृदि विमृश्य गणयित्वा कर्मारम्भात्प्रागेवानीय समीपे स्थापनीयानि अन्यथा कालविलम्बेन प्रधानकालबाधः स्यादिति ।

चर्माण्युत्तरलोमानि प्राग्ग्रीवाणि ॥४॥ चर्माणि कृष्णाजिनाधिषवणशार्दूलचर्मादीनि उत्तरलोमानि प्राग्ग्रीवाणि च स्तरणीयानि · पितृयज्ञे पित्र्यायां चोदग्ग्रीवाणि [1] दिग्विपर्ययात् । उत्तराणि उपरिष्टाद्भागवर्तीनि लोमानि येषां तान्युत्तरलोमानि · प्राची ग्रीवा येषां तानि प्राग्ग्रीवाणि · तदुत्तरतः पुरस्तोत्तरलोम प्राचीनग्रीवमुपस्तृणातीत्येवं तत्र-तत्र श्रुतत्वात् (१. ३. ४. १४.) ।

अवरोक्तमुत्तरं हविषि ॥५॥ यदवरोक्तं पश्चादुक्तम् तद्देशतः कालतश्चोत्तरं प्रत्येतव्यम् · यत्पूर्वं पठितं तस्य पूर्वं ग्रहणम् दक्षिणतः श्रपणम् आसादनं च यच्च पश्चात्पठितं तस्य पश्चाद्ग्रहणम् उत्तरतः श्रपणम् आसादनं चेति विकृतौ तथैवानुवादात् · तथा च महापितृयज्ञे (२. ६. १. १७.) स तत्र जुहूमासादयत्यथ पूर्वामुपभृतमथ ध्रुवामथ पुरोडाशमथ धाना अथ मन्थमिति अत्र दिग्विपर्ययेण प्राच्येवोत्तरा तेनैवमनूद्यते ।

एकद्रव्ये साज्ये वेदेनोपग्रहणम् ॥६॥ साज्ये आज्यसंयुक्ते एकद्रव्ये एकस्मिन्स्रुक्स्रुवाज्यस्थाल्यादिके द्रव्ये दक्षिणहस्तेन गृहीते सति तस्य सव्येन वेदेनोपग्रहणं कर्तव्यम् । दक्षिणहस्तस्थस्य साज्यस्यैकद्रव्यस्य हस्तकम्पनादिनाज्यस्कन्दनवारणार्थं सव्यहस्तगृहीतवेदेनाधारकरणमुपग्रहणमुच्यते · यथा दशापवित्रेणोपगृह्येति [2] (४. २. २. ११.) यथा च घर्मे (१४. २. १. १७.) उपयमन्योपगृह्णातीति । एकद्रव्यऽइत्युपदेशाज्जुहूपभृतोर्द्वयोर्ग्रहणे द्वयोरपि हस्तयोस्तत्र व्या-

१) ?? पित्र्यायांचोदग्ग्रीवा २· २) °णाग्रयणमुप° २·

घृतत्वेन स्थिरत्वात्कम्पनस्कन्दनशङ्काभावान्न सव्येन वेदोपग्रहः · अत एकद्रव्य ऽइत्यनेनानेकद्रव्ये वेदोपग्रहणं वार्यते ।

स्फ्येनान्यत्र ॥७॥ आज्यादन्यत्रान्येनोदकपुरोडाशादिद्रव्येण द्रव्यवत्ये-कद्रव्ये प्रोक्षणीप्रणीताचमसपुरोडाशपात्र्यादौ दक्षिणहस्तस्थे स्फ्येन सव्येन उप-ग्रहणं कर्तव्यम् स्कन्दनवारणार्थमाधारः कर्तव्यः । अत्र केचिदेवं व्याचक्षते · एकद्रव्ये साज्यऽइत्येवंविधविषयादन्यत्र सर्वत्र स्फ्येनोपग्रहणं कर्तव्यम् · परिस्त-रणपर्युक्षणोपस्थानजपव्रतग्रहणादौ कर्ममात्रे यत्राज्यसम्बन्धो नास्ति ।

कुशैरसत्सु ॥८॥ असत्सु स्फ्यवेदद्वितीयद्रव्यलक्षणेषूपग्रहेषु कुशैरुपग्र-हणं सर्वत्र कर्तव्यम् · तदुक्तम् सव्यः सोमग्रहः कार्यो दक्षिणः सपवित्रक इति · तद्यथा ग्रहहोमादौ स्फ्यस्य वचनेनाग्नीद्धस्तस्थत्वादध्वर्योः कुशैरुपग्रह-णम् । वेदस्यासद्भावस्तु करणात्प्राग्वा विमोकादूर्ध्वं वा अन्यत्रव्यापाराद्वा · स्फ्यस्यान्यत्रव्यापारादेव · द्वितीयद्रव्यं तु वाचनिकं क्वचिद्भवति । केचित्तु स्फ्य-स्यापि जुह्वा-इव दर्शपूर्णमासतद्विकारेष्वेव विनियोगमिच्छन्ति तत्रैव स्फ्यस्य दृष्टत्वात् नान्यकर्मस्वग्निहोत्रादिष्विति · अपरे त्वेवं व्याचक्षते असत्सु द्रव्येषु कुशैरुपग्रहणमिति ।

पाणिभ्यां जुहूं परिगृह्योपभृत्याधानमादानकालेऽसंह्रादयन्[1] ॥९॥ स्रुचोरादानकाले पाणिभ्यां द्वाभ्यां हस्ताभ्यां जुहूं परिगृह्याग्रमार्गेणानीयोपभृति उपभृत उपरि आधानं निधानं स्थापनं करोति · किं कुर्वन् असंह्रादयन् असं-शिञ्जयन् परस्परं संघट्टनेन शब्दमकारयन्नित्यर्थः · अथातः स्रुचोरादानस्येति (११. ४. २. १.) प्रकृत्य इत्यमेव कुर्यादुभाभ्यामेव पाणिभ्यां जुहूं परिगृह्योपभृत्य-धिनिदध्यादिति (२.) · तथा तेऽअसंशिञ्जयन्नाददीतेति (२.) च श्रवणात् ।

वाच्यफलेषु स्वर्गः सामर्थ्यात् ॥१०॥ वाच्यं वक्तव्यं फलं येषु तानि वाच्यफलानि अनुक्तफलानि विश्वजिता यजेताभिजिता यजेतेत्यादीनि । तेषु चिन्त्यते · किमेषु फलमस्ति उत नास्ति यदा चास्ति तदा यत्किंचिदुत स्वर्ग इति संदेहे फलाश्रवणान्नास्ति फलमिति प्राप्ते इदमुच्यते । वाच्यफलेषु

1) Thus १. °ह्लदे° २. °ह्लाद° २.

अश्रुतफलेषु विश्वजिदादिषु स्वर्गः फलत्वेन कल्पनीयः । कुतः सामर्थ्यात् एवमेतानि वाक्यानि समर्थानि संगतार्थानि भवन्ति · इतरथा साकाङ्क्षत्वादनर्थान्येव स्युः · न च वेदे मात्रस्य वैयर्थ्यमिष्यते · यच्च साकाङ्क्षं वाक्यं भवति तत्पदान्तरमध्याहृत्यानुषज्य वा निराकाङ्क्षीकरणीयम् ततश्च तत्सार्थकं भवति · तेनैषु वाक्येषु स्वर्गकामपदानुषङ्गः कार्यः विश्वजिता यजेत स्वर्गकाम इति । ननु पुत्रकामादिपदानुषङ्गः किमिति न क्रियते · उच्यते · यद्धि सर्वैरभिलष्यते तस्यैवानुषङ्गो युज्यते स्वर्गश्च सर्वैरप्यभिलष्यते · अतस्तदेवानुषज्यते नान्यानि पुत्रकामादिपदानि ।

एककर्मणि गुणविशेषे फलविशेषः ॥११॥ एकस्मिन्कर्मणि गुणविशेषे वैकल्पिके अङ्गाधिक्ये कृते सति फलविशेषो भवति । तद्यथा · अग्न्याधेयं पूर्णाहुत्यन्तमिष्ट्यन्तं च · तत्र पूर्णाहुत्यन्तपक्षादिष्ट्यन्तपक्षे फलभूयस्त्वम् · इष्ट्यन्तपक्षेऽपि षड्दक्षिणापक्षाद्द्वादशदक्षिणापक्षे फलभूयस्त्वम् · तस्मादपि चतुर्विंशतिदक्षिणापक्षे फलाधिक्यमिति · अत्र च फलाधिक्यमग्नीनां महावीर्यत्वम् तेषु च क्रियमाणानामुत्तरकर्मणामपि वीर्यवत्तरत्वमिति · एवं सर्वत्राङ्गाधिक्ये फलाधिक्यं द्रष्टव्यम् अन्यथाधिकगुणाम्नानस्य वैकल्यप्रसङ्गात् · असति च विशेषे को नामाधिके क्लेशावहेऽङ्गसंघे प्रवर्तेत · तस्मादङ्गभूयस्त्वात्फलभूयस्त्वं भवत्येव ।

दानवाचनान्वारम्भणवरवरणव्रतप्रमाणेषु यजमानं प्रतीयात् ॥१२॥ एतेषु दानादिषु प्रमाणान्तेषु यजमानं कर्तारं प्रतीयात् । दाने तावत् अन्वाहार्यं ददाति तस्मादग्नीधे प्रथमाय दक्षिणां ददातीत्यादौ (४. ३. ४. २०.) । आ वो देवास इति वाचयति (७. ३. ६.) रेवति यजमानऽइति वाचयतीत्यादौ (६. ५. ११.) सर्वत्र यजमानं वाचयतीति ज्ञेयम् । आश्विनं गृह्णात्यन्वारब्धे वा (१. ७. ८.) पुरीषं निवपति स्फ्येनान्वारब्धे (८. ६. १५.) इत्यादावन्वारब्धे [यजमानऽ] इति ज्ञेयम् । वर[वर]णं वरप्रार्थनम् · वरं वृत्वा ददाति चेत्यादौ (१. ४. ३६.) तत्र वरवरणम् इदं स्यादित्यभीष्टस्य प्रार्थनं यजमानः करोति · अथवा वरशब्देन वरवरणम् वरणशब्देनऽर्त्विग्वरणम् तदपि यजमानः करोति । व्रतशब्देन शाश्वतो नियम उच्यते सत्यवदनाधःशयनपयोव्रतादिकः · तस्यापि यजमान एव कर्ता । प्रमाणं चाग्नि-

खरवेदिशालासदोहविर्धानाग्निनेत्रप्रभृतीनाम् · तदपि यजमानसम्बन्धिनारत्न्यादिना कर्तव्यम् ।

खातलूनछिन्नावहृतपिष्टदुग्धदग्धेषु यजुष्क्रियासम्भवात्[1] ॥ १३ ॥ खाते यूपावटोपरवादौ लूने बर्हिषि छिन्ने यूपे अवहृतेषु व्रीहिषु[2] पिष्टेषु तण्डुलधानादिषु दुग्धे पयसि दग्धेषु महावीरेष्टकोखादिषु · एतेषु खातादिषु लोकसिद्धेषूपादीयमानेषु यजुःक्रिया न भवति · कुतः द्वाराभावात् क्रियाद्वारको हि मन्त्र इति एतच्चासम्भवविषयं द्रष्टव्यमिति कर्काचार्याः ॥ नारायणभाष्ये एतेषु यजुःक्रिया कर्तव्या · कुतः असम्भवात् · यदा दैवान्मानुषाद्वा प्रतिबन्धादेतेषां यथाश्रुतं करणं न भवति तदा सगुणासम्भवे नित्यानां यथाशक्तिगुणोपेतानामप्यवश्यकर्तव्यत्वादेतानि लोकसिद्धान्यप्युपदेयानि · तदेतेषु यजुःक्रिया कर्तव्या यजुर्युक्ता क्रिया यजुःक्रिया तावन्मात्रस्य लोकसिद्धत्वाभावात् ॥ याज्ञिकास्त्वेवमाहुः · एतेषु लोकसिद्धेषु गृहीतेष्वपि यजुःक्रिया यजुर्युक्ता क्रिया पुनर्यथा कथंचित्कर्तव्या · कुतः [सम्भवात्] सम्भवति हि यथा कथंचिद्यजुःक्रिया · अथवा असम्भवात् अन्यस्याः क्रियायाः कर्ममध्ये असम्भवात् · यदा च पशौ यूपाहरणार्थं संनिकृष्टेऽलाभात् देशान्तरे विप्रकृष्टे गम्यते तदा प्रधानकालविरोधी भवति · यदा चैकदीक्षापन्नः तदा महावीरोखादिकमेकेनाह्ना निष्पादयितुं न शक्यते · एवमाद्यसम्भव उदाहरणीयः ॥ तदुक्तं मण्डनमिश्रैः छिन्नं लूनं च पिष्टं च सांनाय्यं मृन्मयं तथा लोकसिद्धं गृहीतं चेन्मन्त्रा जाप्याः[3] कठाशयात् छिन्नादि लोकसिद्धं चेदाह्रियेत क्रतुं प्रति तत्तन्मन्त्रजपं प्राह भरद्वाजः कृताकृतम् · तथा छिन्ने चावहृते पिष्टे दग्धे लूने च मृन्मये खाते च लौकिके प्राप्ते जपो नास्त्येव वाजिनामिति ।

रौद्रं राक्षसमासुरमाभिचरणिकं मन्त्रमुक्त्वा पित्र्यमात्मानं चालभ्योपस्पृशेदपः उपस्पृशेदपः ॥ १४ ॥ रौद्रो रुद्रदेवताकः · अत्र रुद्रं रौद्यावित्यादिकः[4] (३. ५८-५९.) । राक्षसो रक्षोदेवताकः · प्रत्युष्टं निष्टप्तं[5] द्वे राक्षसे (१. ७.) रक्षसां

---

1) °जुःक्रि° १. २. 2) छिन्नेषू व्रीहिषु २. 3) ज्याप्याः २. 4) These quotations (रौद्र्यौ etc.) are taken from Kátyáyana's Anukramaṇí to the Vájasaneyi-Saṃhitá. 5) ? प्रत्युष्टं द्वेष्टं २.

राक्षसमित्यादिकः (२.२३.)। आसुरोऽसुरदेवताकः · अपहतम्[1] आसुरम् (१.७.) अपाररुम् अररो आसुरे (१.१६.) इत्यादिकः । अभिचारः प्रयोजनमस्य मन्त्रस्यासावाभिचरणिकः · प्रयोजनमित्यर्थे (पाणि ५. १. १०९.) ठञ्[2] · अतश्च तमतो मा मौक् (१.२५.) द्विषतो बधोऽसीत्यादिः (१.२८.) शत्रुनामादेशसंयुक्तः अभिचारार्थमेव प्रयुज्यमान आभिचरणिक इत्युच्यते · तेनाभिचरणबुद्ध्यभावे मन्त्रस्याभिचरणप्रयोजनाभावान्नाभिचरणिकत्वम् अतस्तदुच्चारणे उदकोपस्पर्शनाभावः । रौद्रादिकं मन्त्रमुक्त्वा पठित्वा पित्र्यं पितृदेवत्यं च मन्त्रम् शुन्धन्ताम् पित्र्ये[3] (५.२६.) इत्यादिकमुक्त्वा चकाराद्रुद्रादिदेवत्यममन्त्रकं कर्म च कृत्वा आत्मानं चालभ्याप उदकानि उपस्पृशेत् आलभेत् क्वचित्पात्रे स्थिता अपो हस्तेन स्पृशतीत्यर्थः · क्वचिच्च श्रुतिरपि अपामुपस्पर्शनं दर्शयति स यत्प्राशित्रमवद्यति यदेवात्राविद्धं यज्ञस्य यद्रुद्रियं तदेवैतन्निर्मिमीतेऽथाप उपस्पृशति शान्तिरापस्तदद्भिः शमयतीति (१.७.४.९.) · तथा त्र्यम्बकानन्तरम् पुनरेत्याप उपस्पृशन्ति रुद्रियेणेव वा ऽएतदचारिषुः शान्तिरापस्तदद्भिः शान्त्या शमयन्तऽइति (२.६.२.१८.) ॥ द्विरभ्यासोऽध्यायपरिसमाप्तिसूचनार्थः ॥ ॥ दशमी कण्डिका ॥१०॥

इति कात्यायनसूत्रव्याख्याने सम्राड्नृपतिमहायाज्ञिकश्रीश्रीप्रजापतिसुतमहायाज्ञिकश्रीश्रीदेवकृते प्रथमोऽध्यायः समाप्तः ॥ ॥

अथ पद्धतिः ॥

यदाग्नेयोऽष्टाकपालो भवतीत्येवमादिः पञ्चमलकारपरिकल्पनया कर्मविधायको भवति[4] ॥ दर्शपूर्णमासपश्वादौ कर्मणि करिष्यमाणे एतावद्भिर्द्रव्यैरत्र प्रयोजनमस्तीत्येवं पात्रहविःप्रभृतिद्रव्याणां प्रयोजनं विचिन्त्य कर्मारम्भात्प्रागेव तेषामुपकल्पनम् आनीय समीपे कर्मकरणप्रदेशे स्थापनं कर्तव्यम् ॥ चर्मा-

---

1) अपहता २. 2) ठक २. 3) पित्र्य २. 4) This sentence is rather puzzling, as it does not agree in the least with the corresponding rules (१. and २.) at the beginning of the 10th *kaṇḍikâ*. Its meaning too itself is not clear to me. The fifth lakâra is le*ṭ*, not lo*ṭ*. भवत्येवमादिः २. ३.

ण्युत्तरलोमानि प्राग्ग्रीवाणि सर्वत्रास्तरणीयानि यथा नीडे कृष्णाजिनमास्तृ-
णातीत्यादौ (३. ३. ४. १.) ॥ हविषां मध्ये यत्पश्चात्पठितम् तद्देशतः कालत-
श्चोत्तरं कर्तव्यम् । ग्रहणादिकं पूर्वपठितस्य पूर्वम् उत्तरपठितस्योत्तरम् । अधि-
श्रयणासादनाद्यपि पूर्वपठितस्य दक्षिणतः पश्चात्पठितस्योत्तरत इति ॥ एकद्रव्ये
स्थालीस्रुवादौ साज्ये दक्षिणहस्तेन गृहीते सति सव्येन वेदस्योपग्रहणं[1] कर्त-
व्यम् · एकद्रव्यऽइत्युक्तत्वादुपभृदादौ द्वितीयद्रव्ये सति वेदोपग्रहणाभावः । अन्यत्र
सर्वत्र स्फ्येन अन्यद्रव्येण द्रव्यवति जपोपस्थानादौ च । असत्सु वेदवद्द्विती-
यद्रव्येषु कुशैरुपग्रहणम् · यथा समिष्टयजुर्होमे वेदाभावे कुशैः वेदबन्धनात्प्राक्
प्रायश्चित्ताहुतौ च · यथा वा स्फ्ये अन्यत्र व्यापृते सोमे ग्रहहोमादौ द्वितीयद्र-
व्याभावे च कुशोपग्रहणम् ॥ स्रुचोरादानकाले आसादितां स्रुचं जुहूं पाणिभ्यां
परिगृह्योपभृत[2] उपरि निदध्यात् परस्परसंस्पर्शनशब्दमनुत्पादयन् ॥ उद्भिदा
यजेत बलभिदा यजेतेत्येवमादौ यत्र फलं न श्रूयते तत्रापि न्यायेन स्वर्गः फल-
त्वेन कल्प्यते तस्य सर्वेषामपीष्टत्वात् । एकस्मिन्कर्मणि वैकल्पिकेष्वङ्गेष्वाम्ना-
तेष्वधिकाङ्गानुष्ठानपक्षे फलाधिक्यं भवति · यथा पौर्णमासादौ वैकल्पिकवैमृधा-
द्यधिकाङ्गानुष्ठाने फलाधिक्यं भवति · यथा वा तनूहविःष्वधिकाधिकदक्षिणादा-
नपक्षाग्रयणे · बृहस्पतिसवे च · एवं सर्वत्र ॥ अन्वाहार्यादिदक्षिणादाने
आ वो देवास इत्यादिवाचने (७. ३. ६.) स्थाल्यन्वारब्धऽइत्यादावन्वारम्भणे
(४. २. २३.) वरप्रार्थने ऋत्विग्वरणे सत्यवादी स्यात् पयोव्रतो दीक्षितः
स्यादित्यादौ (६. ५. १. १.) व्रते त्र्यरत्निश्चतुररत्निरस्त्वित्यादिप्रमाणे[3] च सर्वत्रानु-
क्तमपि यजमानं कर्तारं जानीयात् ॥ खाते यूपावटोपरवादौ लूने बर्हिषि
छिन्ने शाखायूपादौ अवहतेषु व्रीहिषु पिष्टेषु तण्डुलेषु दुग्धे पयसि
दग्धे महावीरोखादौ असम्भवाल्लोकनिष्पत्तेर्गृहीते[4] यजुःक्रिया भवति यजु-
र्युक्तं क्रियामात्रं भवति · तावन्मात्रस्यासिद्धत्वात् · लौकिकक्रियामात्रस्य[5] सिद्ध-

---

१) Thus १. ३. वेदस्यो° २. २) प्रतिगृह्यो° २. ३. ३) °श्चतुररत्स्वित्या° १. °तुर-
व्यस्त्वित्या° २. तुरअत्स्वित्या° ३. See ११. ७. ४. १. ४) ? यज्ञे गृहीते १. २. ३ (°हिते).
५) Thus १. लौकिकस्य क्रिया° २. ३.

त्वात् ॥ रुद्रदेवतं रक्षोदेवतमसुरदेवतमाभिचरणिकं पितृदेवत्यं च मन्त्रमुक्त्वा एतद्देवत्यममन्त्रकं कर्म च कृत्वात्मानमालभ्यापां स्पर्शनं हस्तेन कुर्यात् ॥
॥ १० ॥

इति प्रथमस्य दशमी कण्डिका ॥ ॥

इति श्रीयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ आदिमोऽध्यायः समाप्तः ॥ ॥

इति कातीये श्रौतसूत्रे प्रथमोऽध्यायः ॥ १ ॥ ॥

उक्ताः परिभाषाः। इदानीं श्रुतिक्रमं मन्त्रक्रमं चानुसरन्नाचार्यः प्रथमं पौर्णमासेष्टिमुपदिदिक्षुस्तस्या उपक्रमकालमाह ·

पूर्वां पौर्णमासीमुत्तरां चोपवसेत् ॥ १ ॥ द्वे पौर्णमास्यौ पूर्वा उत्तरा च · तत्र पञ्चदशी पूर्वा प्रतिपदुत्तरा · कुतः एषा ह संवत्सरस्य प्रथमा रात्रिर्यत्फाल्गुनी पौर्णमासी योत्तरैषोत्तमा या पूर्वेति (६. २. २. १८.) श्रवणात्। तत्र पञ्चदशी मुख्या प्रतिपद्गौणी · कुतः अनेकशक्तिविकल्पनादिदोषप्रसङ्गादुभयोर्मुख्यार्थत्वानुपपत्तेः। उपवसेदित्यनेनात्रानशनं न विधीयते · कुतः अपराह्णे व्रतोपायनीयमश्नीत इत्यनेन (२. १. १०.) विरोधात् · किं तर्हि चान्द्रायणमुपवसतीत्यादौ नियतद्रव्यकालपरिमाणवदशनसत्यवादनक्रोधलाभादिवर्जनादियमनियमकारिण्यप्युपवसतीत्यस्य प्रयोगस्य दृष्टत्वादत्रापि पूर्वापरविरोधपरिहाराय स एवार्थोऽवसीयते। ततश्चायमर्थः पूर्वां पौर्णमासीं पञ्चदशीं तिथिमुपवसेत् उत्तरां वा प्रतिपदम् शास्त्रिताशनमांसमैथुनवर्जनादियमनियमकारी भवेत् यागोपक्रमं कुर्यादिति तात्पर्यार्थः। पूर्वां पौर्णमासीमित्यत्रोपान्वध्याङ्वस इत्यनेन (पा° १. ४. ४८.) उपपूर्वस्य वसतेराधारस्य कर्मसंज्ञत्वात् कर्मणि द्वितीयेति (पा° २. ३. २.) द्वितीया · अत एवायमभोजनार्थस्योपवसतेः प्रयोगो न भवति तदाधारस्य कर्मसंज्ञानिषेधात् तथा च वार्त्तिकम्[1] अभुक्त्यर्थस्य प्रतिषेध इति। तत्रोत्तरोपवासपक्षे च सद्य एव यागं वक्ष्यति सद्यो वा प्रातरिति (२. १. १६.)। माः चन्द्रमाः पूर्णो माः पूर्णमासः इयं पौर्णमासी पूर्णचन्द्रा · तिथिद्वैधे सति पूर्वा उत्तरा वा या पौर्णमासी पूर्णचन्द्रा तामुपवसेत् तस्यां यागोपक्रमं कुर्यात् न त्वपूर्णचन्द्रायाम्। काठके पूर्णो पौर्णमासीमुपवसेदद-

[1] See Pâṇ. १. ४. ४८.

र्शनेऽमावास्यामिति । मानवे च तन्निर्णयश्चैवम् यज्ञकालस्तिथिर्द्वैधे षड्‌ढलो यदि विद्यते पर्व तत्रोत्तरं कार्यं हीने पूर्वमुपक्रमेदिति षड्‌ढलः षड्‌घटिकापरिमाणः ॥ काल उक्तो विधिमुपदिशति ·

अग्न्यन्वाधानमध्वर्युर्यजमानो वा ॥२॥ अध्वर्युः प्राप्त एव किमर्थमध्वर्युग्रहणम् अतो यजमानो वेत्येतावदेव वक्तव्यम् · सत्यम् · एतावत्युच्यमाने होतृवेदविहितमग्न्यन्वाधानं समाख्यया होतुः प्राप्नोति तस्याप्यध्वर्युकर्तृकतासिद्ध्यर्थमध्वर्युग्रहणमित्यदोषः[1] ।

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेमेत्याहवनीये[2] समिधमादधाति ॥३॥ गार्हपत्यात्तमाहवनीयमुद्धृत्य दक्षिणाग्निं चाहृत्य तस्मिन्नुद्धृते आहवनीये समिधमग्नेरुपरि प्रागग्रां स्थापयति । उद्धरणं च पूर्वं खरे पञ्च भूसंस्कारान्कृत्वा अध्वर्युणा कर्तव्यम् समाख्यानात् समिदाधानमात्रे वचनाद्यजमानस्योपदेशात् । अनेकयजमानके[3] द्वियज्ञसत्त्राहीनगणयज्ञादौ मन्त्रस्योहः आवयोरग्ने वर्चः आवाभ्यां नमन्ताम् अस्माकमग्ने वर्चः अस्मभ्यं नमन्तामिति · तच्चाग्न्यन्वाधानं मुख्य एवेतरान्वारब्धः करोति · अध्वर्युकर्तृपक्षे त्वनूहः[4] । मन्त्रादौ च सर्वत्रोङ्कारः प्रयोज्यः · तदुक्तम् ब्रह्मारम्भे विरामे च यागहोमार्चनादिष्विति ।

तूष्णीं द्वितीयाम् ॥४॥[5]

एवमितरयोरग्न्योः ॥५॥ प्रथमं गार्हपत्ये ततो दक्षिणाग्नौ । पक्षान्तरमाह ·

महाव्याहृतिभिर्वा प्राक्संस्थम् ॥६॥ भूर्भुवः स्वरित्येतासां महाव्याहृतय इति संज्ञा । तत्र प्रथमं गार्हपत्ये ततो दक्षिणाग्नौ तत आहवनीये इत्ययं क्रमः प्राक्संस्थमित्यर्थः[6] । तृतीयं पक्षमाह ·

तूष्णीं वा यथापूर्वम् ॥७॥ यथापूर्वमिति यो-यः पूर्वमुत्पन्नोऽग्निस्तस्मिन्न-

---

1) अग्न्यन्वाधानमिति कर्मणो नामधेयं षट्समिदाधानरूपस्य Mahád. 2) Thus १. यजेमे° ३. 3) सत्त्रेषु यजमानकर्तृकेऽग्न्यन्वाधाने यजमानाभिधायीनि पदानि विपरिणम्यन्ते Mahád. 4) कर्मणः परार्थत्वात् यां वै कां च यज्ञऽऋत्विज आशिषमाशासते यजमानस्यैव सेति (१. ३. १. २६.) लिङ्गाच्च Mahád. 5) अधिकारान्मन्त्रोऽपि प्राप्नोति · स प्रतिषिध्यते Ss. 6) प्रतिमहाव्याहृति अग्न्यन्वाधानं गार्हपत्यदक्षिणाग्न्याहवनीयेषु न समस्ताभिः Mahád.

ग्नौ पूर्वम् तेन प्रथमं गार्हपत्ये तत आहवनीये ततो दक्षिणाग्नौ ।

अहनि माꣳसमैथुने वर्जयेत् ॥ ८ ॥ अस्मिन्प्रकृते व्रत्येऽहनि । ननु चाहनि सदा मैथुनं प्रतिषिद्धमेव पर्वणि तु रात्रावपि तत्किमर्थं पुनः प्रतिषिध्यते · सत्यम् · स तु स्मार्तः प्रतिषेधः पुरुषार्थः इह तु दर्शपूर्णमासप्रकरणे विधानात्कर्मधर्मार्थमिति · अनयोश्च प्रायश्चित्तविशेषः ।

केशश्मश्रु वपते वाशिखम् ॥ ९ ॥ वपते वापयते अन्तर्भूतण्यर्थः ॥ केचिद्वाशब्दमशिखमित्यनेन सह योजयन्ति अशिखं वा सशिखं वेति · तन्मते केशश्मश्रुवपनं नित्यमेव सूत्रकारप्रस्थानादयमर्थोऽवसीयते · येनाधाने पौर्णमासवद्वपनमित्युक्त्वा (४. ७. ११.) ऋतुनक्षत्रसम्भारसामवपनेत्यादिना (४. १०. ३.) वपनस्य विकल्पमाह · यदि पौर्णमासे वपनं विकल्पेन स्यात्तदा पौर्णमासवदित्यनेनैवाधानेऽपि विकल्पस्य सिद्धत्वात्पुनर्विकल्पो न वक्तव्यः स्यात् उक्तश्च अत एवं ज्ञायते पौर्णमासे वपनस्य विकल्पो नास्तीति ।

अपराह्णे व्रतोपायनीयमश्नीतः सर्पिषासुहितौ ॥ १० ॥ अह्नोऽपरभागे पत्नीयजमानौ सर्पिषा युक्तं घृतोपसिक्तं व्रतोपायनीयमन्नमसुहितावतृप्तौ यथा भवतस्तथा भुञ्जाति । व्रतं भोजनं येनान्नेनोपेयते क्रियते अमाषामांसालवणादिना तद्व्रतोपायनीयमन्नम्[1] । सकृत्पर्वणि सर्पिष्मद्धविष्यं लघुभोजनम् न सायं नोपवासः स्यात्तिलामिषविवर्जितमिति पुलस्त्यः । बौधायनः सर्वमेवैतदहः कौशीधान्यं विवर्जयेदन्यत्र तिलेभ्य इति । सर्पिषेत्यनेन नियमः क्रियते सर्पिर्युक्तमेव · अतोऽर्थात्तैलादि निवारितं भवति ।

अन्तरेणापराग्नी गत्वापरेणाहवनीयं प्राङ्तिष्ठन्नग्निमीक्षमाणोऽप उपस्पृश्य व्रतमुपैत्यग्ने व्रतपतऽइदमहमिति वा (१. ५.) सत्यवाग्व्रतः ॥ ११ ॥ व्रतशब्देन कर्माङ्गभूता शास्त्रतो नियमा उच्यन्ते · कर्माङ्गभूताः यमनियमाः व्रतम् तदुपगमार्थोऽग्ने व्रतपतऽइत्ययं मन्त्र इति तन्त्ररत्नऽउक्तम्[2] ।

कर्माङ्गमुत्तरे सत्यवदनम् ॥ १२ ॥ व्रतोपायनादुत्तरे काले यत्सत्यवदनम्

---

1) व्रीहिमुद्गयवादि माषचणककोद्रवादिरहितं वक्ष्यमाणपुरोडाशद्रव्यरहितमौपासनाग्निपक्वं दम्पती अश्नीतः Mahâd. 2) व्रत इति व्रतग्रहणोत्तरं सत्यवादी स्यात् Mahâd.

तत्कर्माङ्गम्[1] यच्चोपनयोत्तरकालीनमग्न्याधेयोत्तरकालीनं [च वक्ष्यते][2] तत्पुरुषधर्मः · यदीदमपि पुरुषधर्मत्वेनोपदिश्येत तत उपदिष्टस्योपदेशो [वक्ष्यमाणो]ऽनर्थकः स्यात् ॥ क्रत्वर्थपुरुषार्थयोश्चायं विशेषः पुरुषधर्मे सत्यवदने सति तदपचारे क्रतोः किमपि वैगुण्यं न भवति वैपरीत्ये च न सगुणत्वम् · क्रतुधर्मे पुनः सत्यवदने सति तदपचारे प्रयाजाद्यपचारऽइव क्रतोर्वैगुण्यं भवति अनपचारे च सगुणत्वम् । प्रायश्चित्तगतश्च विशेषः कर्माङ्गत्वे कर्माङ्गापचारनिमित्तं श्रौतं प्रायश्चित्तं भवति पुरुषार्थे स्मार्तसत्यवदनापचारे स्मार्तमेवेति । नन्वग्न्याधानोत्तरकालीनं यत्सत्यवदनम् तदपचारे श्रौतमपि प्रायश्चित्तं भवत्येव न तदर्थं पुनरेतत्सूत्रं कर्तव्यम् · सत्यम् · कर्मगतो य आर्ग्वैदिकयाजुर्वैदिकत्वादिविशेषः तद्विनाशनिमित्तं विशिष्टं प्रायश्चित्तं यथा स्यादित्येवमर्थः पुनः कर्माङ्गत्वेनोपदेशः · तथा चार्ग्वैदिके सामिधेन्यनुवचनादौ कर्मणि क्रियमाणे यदि सत्यवदनापचारः स्यात् तदा हौतृकं भूः स्वाहेति प्रायश्चित्तं भवति · याजुर्वैदिके प्रणीताप्रणयनपरिस्तरणादौ क्रियमाणे सत्यवदनापचारे तु भुवः स्वाहेति · सामवेदविहिते ब्रह्मत्वादिकर्मणि क्रियमाणे सत्यवदनापचारे तु स्वः स्वाहेति · पुरुषधर्मे पुनः स्वकर्ममध्ये तदपचारनिमित्तं प्रायश्चित्तं नैव प्राप्नोति क्रतुवैगुण्याभावात् व्यवधानाच्च ।

वृक्षारण्यौषधीनामश्नीयाद्वा ॥१३॥ अहर्भोजने नियमविशेष उक्तः इदानीमवसरे प्राप्ते सायाशने विशेष उच्यते । सायं वृक्षाणामाम्रादीनाम् आरण्यौषधीनां श्यामाककङ्ग्वादिप्रभृतीनां सम्बन्धि किंचिदश्नीयाद्वा यजमानः न वाश्नीयादिति विकल्पः[3] । प्रातर्होष्यमाणस्य द्रव्यस्य प्रतिषेधः मध्याशनेऽपि दृश्यते शाङ्खायनसूत्रात् (शा° ४. १. ३.) ।

आहवनीयगृहशाय्यधः ॥१४॥[4] रात्रौ सपत्नीको यजमानो भूमौ [शयीत] ।

गार्हपत्यस्य वा ॥१५॥ एतच्चाधःशय्यान्तं व्रतं यजमानस्य स्यात् तपस्त्वात्[5] ।

---

1) अन्यद्वपनादि सर्वं पुरुषाङ्गम् · अत्र कर्माङ्गपुरुषाङ्गयोः प्रायश्चित्ते विशेषः क्रत्वङ्गापचारे श्रौतम् पुरुषाङ्गापचारे स्मार्तम् Mahád. 2) See ४. १५. ४. 3) अश्नीयादित्येकवचनाद्यजमानो न पत्नी · दिवा द्वितीयाशनस्य निषिद्धत्वादिदं सायाशनम् Mahád. 4) नित्यखट्वाद्यपेक्षया अधः Ss. 5) सद्यःपक्षे गार्हपत्यगृहे शयनम् Mahád.

सद्यो वा ॥१६॥ पौर्णमासे यद्व्यहकर्तव्यमुक्तम् तदेकस्मिन्नेवाहन्यग्न्यन्वाधानादि कर्मापवर्गान्तं भवति[1]।

प्रातः ॥१७॥ [अस्मिन्पक्षे प्रातः] प्रतिपद्दिनऽएव सर्वमग्न्यन्वाधानादि कर्मापवर्गान्तं कर्तव्यम् न पूर्वेद्युरग्न्यन्वाधानदिने प्रतिपदः प्रधानकालत्वात् अङ्गानां प्रधानकालस्य न्याय्यत्वात्। तत्र च व्रतोपायनीयाशनारण्याशनान्यतरागारशयनानि न भवन्ति उक्तकालाभावात् रागप्राप्तेष्वेवैतेषु द्रव्यादिनियममात्रविधानाच्च न हि रागतस्तदानीमशनादीनि प्राप्नुवन्ति अन्यद्वपनादि सर्वं भवत्येव। व्यवस्थितविकल्पोऽयमिति केचित् तथा च कात्यायनः संधिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिरिति[2]॥ अथवा एकमेवेदं सूत्रम् सद्यो वा प्रातः यदा प्रातः उत्तरोपवासपक्षस्तदा समानेऽहन्येव सर्वं कर्तव्यम्।

अग्निहोत्रं हुत्वा ब्रह्माणं वृणीते ब्रह्मिष्ठं भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमहऽइति ॥१८॥ यो वेदत्रयविहितं कर्म सम्यग्जानाति सोऽत्र ब्रह्मिष्ठशब्देनोच्यते तादृशस्यैव वेदत्रयविहितकर्मणां कृताकृतप्रत्यवेक्षणेऽधिकारात् ॥ वरणं चाचारादेवं कर्तव्यम् वितानस्योत्तरतः[3] प्राङ्मुखोपविष्टं ब्रह्माणमुदङ्मुखोपविष्टो यजमानः स्फ्यं सव्येन गृहीत्वा दक्षिणेन यवसहितेन ब्रह्मणो जान्वालभ्य वृणीते अमुकसगोत्र अमुकशर्मन् पौर्णमास्येष्ट्या वयं यक्ष्यामहे तत्र भूपतऽइत्यादिना मन्त्रेण एतच्च वरणमप्रवृत्तस्य ब्रह्मणः कर्मणि प्रवर्तनार्थम् तेनाग्न्याधेये ब्रह्मणः पूर्वमेव वृतत्वात्पवमानेष्ट्यादिषु ब्रह्मवरणाभावः सोमयागे च दीक्षणीयाप्रायणीयादिषु पुनराधेये चाग्नेये पञ्चकपाले।

---

1) सद्य एव समानेऽहनि सर्वम् Ss. 2) Thus Mahâd. °स्कालतिथौ विधिरिति २. — संधिः प्रतिपत्पर्वसंधिः · पञ्चधा विभक्तस्य दिनस्य द्वितीयो भागः संगवः · पर्यावर्तनं पूर्वाह्णापराह्णसंधिः ॥ खर्विकां तृतीयां वाजसनेयिनः समामनन्तीति बौधायनसूत्रव्याख्यावसरे कपर्दिस्वामिभिरुक्ताखर्विकां पूर्वां संधिमतीं चोपन्यस्य या त्वेषा खर्विका यस्याश्च पूर्वाह्णे संधिः पर्वकालस्तयोः सद्यस्कालेति संज्ञोक्ता संगवादूर्ध्वमा षोडशघटिकाभ्यः संधिमती सद्यस्काला · सोत्तरस्याः पौर्णमास्या एव भेदः · तस्यां सद्य एव याग इति · इतरासु पौर्णमासीषु अग्न्यन्वाधानादि शयनान्तम् Mahâd. 3) औपासनपरिचरणोत्तरमग्निहोत्रं हुत्वानुदिते Mah.

वृतो जपत्यहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्भूर्भुवः स्वर्देव[1] सवितरेतं त्वा वृणते बृहस्पतिं ब्रह्माणम् तदहं मनसे प्रब्रवीमि मनो गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभेऽनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यो बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणामिति ॥१९॥ वृतग्रहणं वरणाजपयोः संनियोगसिद्ध्यर्थम् · वरणाभावे पवमानेष्ट्यादौ दीक्षणीयादौ च जपस्याप्यभावः सिध्यति ।

वाचस्पते यज्ञं गोपायेत्याह ॥२०॥ ततो ब्रह्मा तत्रोपविष्ट एव वाचस्पते यज्ञं गोपायेति ब्रवीति । केचिद्याजमानमेतदिच्छन्ति · तन्न · काण्वानां होतत्पठ्यते देव सवितरित्युक्त्वा वाचस्पते यज्ञं गोपायेत्याहेति · अतो ब्रह्मैवाहेति जपशेषत्वात् जपे सत्यस्य प्रवृत्तिः जपशेषता चास्मादेव काण्वीयादिति याज्ञिकाः · सूत्रकारेणाप्ययमेवाभिप्रायो येन वक्ष्यति एतद्ब्रह्मत्वमिष्टिपश्वोरिति (२. २. २४.) · एवं च सति यद्यत्र यजमानः कर्ताभिमतोऽभविष्यत् तदा तद्ग्रहणमकरिष्यत् न च कृतम् तस्माद्ब्रह्मण एवात्र कर्तृत्वमिति ।

अपरेण वाहवनीयं दक्षिणातिक्रामति ॥२१॥ ब्रह्मासनं दक्षिणतो ब्रह्मवरणमुत्तरतः · अत उपवेशनायावश्यं दक्षिणतो ब्रह्मणा गन्तव्यम् · तत्र मार्गविकल्पमाह आहवनीयं पूर्वेणेति वा ।

अहे दैधिषव्योदतस्तिष्ठान्यस्य[2] सदने सीद योऽस्मत्पाकतर इति ब्रह्मसदनमीक्षते ॥२२॥ वारणादिवृक्षोद्भवं कुशास्तृतं प्रागग्रमासनम्[3] ।

ब्रह्मसदनात्तृणं निरस्यति निरस्तः पाप्मा सह तेन यं द्विष्म इति ॥२३॥ नैर्ऋत्यां दिशि प्रक्षिपति शाङ्खायने दर्शनात् समानं होत्रा तृणनिरसनमिति (शा° ४. ६. ५.) · होतुश्च पठितम् होतृषदनाकुब्कं तृणमुभयतः प्रतिछिद्य[4] दक्षिणापरमवान्तरदेशं[5] निरस्येति (शा° १. ६. ६.) ।

इदमहं बृहस्पतेः सदसि सीदामि प्रसूतो देवेन सवित्रा तदग्नये प्रब्रवीमि तद्वायवे तत्पृथिव्या इति ॥२४॥ ॥ प्रथमा कण्डिका ॥१॥

---

१) Káṇva, see Váj. S. pag. ५७-५८. २) °व्योदतिष्ठान्यस्य ३. ३) आसनं वरणकाष्ठमयपीठम् तच्च कुशास्तृतं तृणनिरसनत्वात् Mahád. ४) प्रछिद्य २. ५) °देशे २.

अथ पद्धतिः ॥

अथ दर्शपूर्णमासयोः पद्धतिर्लिख्यते ॥ कृताधानस्याधानानन्तरं प्रथमपौर्णमास्यां मातृपूजापूर्वकमाभ्युदयिकं श्राद्धम् · ततो मुख्यायामेव पौर्णमास्यां सद्योऽन्वारम्भणीयेष्टिः · तदनन्तरं पौर्णमासस्यारम्भः । समूहन्त्यग्न्यगारम् उपलिम्पन्त्यायतनान्यलंकुर्वतऽइत्यापस्तम्बसूत्रे विशेषः · तत्र पूर्वमाहवनीयखरे पञ्च भूसंस्काराः कर्तव्याः · तद्यथा दर्भैः खरं प्राक्संस्थमुदक्संस्थं वा त्रिः परिसमुह्य गोमयेन त्रिरुपलिप्य स्फ्येन प्रागायता उदक्संस्था उदगायताः प्राक्संस्था वा तिस्रो लेखाः खरप्रमाणाः कृत्वा अनामिकाङ्गुष्ठेन ताभ्यो लेखाभ्यः पांशूनुद्धृत्याद्भिरभ्युक्षेत् · एवमेव दक्षिणाग्नेः खरे पञ्च भूसंस्काराः कार्याः । ततो गार्हपत्यादाहवनीयस्योद्धरणम् · तत्र पौर्णमासेष्ट्यर्थं गार्हपत्यादाहवनीयमुद्धरामीति मनसि संकल्प्य गार्हपत्यात्कर्परेण ज्वलन्तमग्निं कर्परादिनादायाहवनीयखरे प्राञ्चं स्थापयेत् · ततः पौर्णमासेष्ट्यर्थं गार्हपत्याद्दक्षिणाग्निमाहरामीति संकल्प्य गार्हपत्यात्कर्परेणाग्निमादाय दक्षिणाग्नेः खरे स्थापयेत् ॥ अथाग्न्यन्वाधानमुच्यते । तत्र षट् समिधो हस्ते गृहीत्वा स्फ्यं सव्ये हस्ते धृत्वा ममाग्नेऽइति मन्त्रेणाहवनीयऽएकां समिधमादधाति ततस्तूष्णीं द्वितीयां समिधमादधाति · एवमेव गार्हपत्ये दक्षिणाग्नौ च द्वे-द्वे समिधावादधाति · एकोऽयं पक्षः । अथवा भूरित्येतावता मन्त्रेण प्रथमं गार्हपत्यऽएकां समिधमादधाति तूष्णीं द्वितीयाम् · ततो भुवरिति दक्षिणाग्नावेकाम् तूष्णीं द्वितीयाम् · ततः स्वरित्याहवनीयऽएकाम् तूष्णीं द्वितीयाम् · अयं द्वितीयः पक्षः । अथवा तूष्णीमेव युगपत्समिद्द्वयं गार्हपत्ये तत आहवनीये ततो दक्षिणाग्नाविति तृतीयः पक्षः । प्रयोगकाले सर्वत्र मन्त्रादौ ओंकारोच्चारणं कर्तव्यम् एतच्चाग्न्यन्वाधानपक्षेऽपि । यजमानस्य सपत्नीकस्य मांसमैथुनवर्जनसंकल्पः । केशश्मश्रुवपनं शिखां वर्जयित्वा · कर्कमते वपनस्य विकल्पः · भर्तृयज्ञमते वपनं नियमेन अशिखं वा सशिखं वेति विकल्पः · मानवे विशेषः केशश्मश्रू यजमानो वापयते दक्षिणोपक्रमान्केशान्सव्योपक्रमान्नखानध्यात्मकं कनिष्ठिकातः कारयते न कक्षौ पत्नी नखांश्च कारयीतेति । अपराह्णे पत्नीयजमानौ माषमांसलवणप्रातर्दोह्यमाणद्रव्यव्यतिरिक्तं घृतसंयुक्तमल्प-

मश्नीतो न तृप्तिपर्यन्तम् · परिशिष्टे शाकं मांसं मसूरं च चणकं कोरदूषकान् माषान्मधु परान्नं च वर्जयेदौपवस्तके · तथा (कर्मप्रदीप° ३. ८. ६.) लवणं मधु मांसं च क्षारान् श्वो येन हूयते उपवासे न भुञ्जीत नोहरात्री न किंचनेति · तथा तिलमुद्गादृते शैव्यं सस्यं ¹⁾ गोधूमकोद्रवौ चीणकं देवधान्यं च सर्वशाकं तथेक्षवम् सक्षीक्षारं यवक्षारं टङ्कणक्षारमेव च व्रतस्थो वर्जयेन्नित्यं सामुद्रं लवणं तथेति · अत एव सामुद्रविशेषणात्सैन्धवमानसादेर्लवणस्य न निषेध इति केचिदाहुः · हविष्टमपि तस्योक्तं स्मृतौ (मनु° ३. २५७.) मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम् अक्षारलवणं चैव प्रकृत्या हविरुच्यतऽइति अक्षारलवणं सैन्धवमिति सर्वे निबन्धकारा व्याख्यातवन्तः · तथा सैन्धवं लवणं यच्च यच्च मानससम्भवम् पवित्रे परमे ह्येते प्रत्यक्षमपि सर्वश इति। अत्याशनानन्तरं यजमानः स्रुचमादाय गार्हपत्यदक्षिणाग्न्योरन्तरालेन गत्वा आहवनीयस्य पश्चात्समीपे पूर्वाभिमुखस्तिष्ठन्नाहवनीयं विलोकयन्नुदकं दक्षिणहस्तेन स्पृष्ट्वा अग्ने व्रतपते व्रतमिति मन्त्रेण व्रतमुपैति सत्यवदनादिनियममङ्गीकरोतीत्यर्थः · अथवा इदमहमनृतादित्यनेन मन्त्रेण व्रतमुपैति न पूर्वोक्तेन · अतः प्रभृति क्रियमाणकर्माङ्गभूतो यजमानस्य सत्यवदननियमः। रात्रौ तस्मिन्नेव विहारे स्वयमेवाग्निहोत्रहोमः। सायाशनेच्छायां सत्यां होमानन्तरमारण्यौषधीनां नीवारश्यामाककङ्ग्वादीनामन्नं वा आरण्यवृक्षाणामाम्रराजादनादीनां फलानि वाश्नीयात् · नाश्नीयाद्वा। रात्रावाहवनीयागारे गार्हपत्यागारे वा पत्नीयजमानाभ्यां खट्वाद्यपेक्षया अधो नीचं शयनं कर्तव्यम् आस्तरणस्य न निषेधः। व्रतग्रहणे कृते अयमारण्याशनशय्यानियमो नापरथेति हरिस्वामिनः · आपस्तम्बोऽपि अमावास्यायां जागर्त्यपि वा सुप्यादुपरि त्वेव न शयीतापि वोपरि शयीत ब्रह्मचारी त्वेव स्यादुभयत्र जागरणमेके समामनन्तीति॥ प्रातरपि तस्मिन्नेव विहारे स्वयमेवाग्निहोत्रहोमः। तत उदिते सूर्ये ब्रह्मवरणाद्युपक्रमः · ततः पूर्वं षडासनान्युपकल्पयेत् · ब्रह्मवरणार्थं ब्रह्मयजमानयोर्द्वेऽआसने विहारस्योत्तरतो दर्भास्तृते स्थापनीये · आहवनीयस्य दक्षिणतो ब्रह्मोपवेशनार्थमेकं

¹⁾ शैव्यं सस्ये १.

दर्भास्तृतमासनम् तथैव पश्चाद्द्वितीयम् यजमानस्योपवेशनार्थम् · तथा गार्हपत्यस्योत्तरत एकमधर्वोरुपवेशनार्थम् आहवनीयस्योत्तरतो द्वितीयं च एतदासनद्वयं प्रणीताप्रणयनार्थम् । ततो ब्रह्मवरणम् · विहारस्योत्तरत उदङ्मुखोपविष्टो यजमानः प्राङ्मुखोपविष्टं ब्रह्माणं वृणीते · तत्रैवमाचारः · साञ्जतेन दक्षिणहस्तेन ब्रह्मणो दक्षिणं जान्वालभ्यामुकसगोत्रामुकशर्मन्पौर्णमासेष्ट्या वयं यक्ष्यामहे तत्र भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमह इति अनेन मन्त्रेण वृणीते । ततो वृतो ब्रह्मा अहं भूपतिरित्यादि मनुष्याणामित्यन्तं जपति · सूत्रे वृतग्रहणाच्च यत्राधानेष्टिदीक्षणीयादौ वरणाभावस्तत्राहं भूपतिरिति जपस्याप्यभावः । ततो ब्रह्मैव वाचस्पते यज्ञं गोपायेति मन्त्रं पठति । ततो ब्रह्मा वरणस्थानादुत्थायाहवनीयात्पूर्वमार्गेणापरमार्गेण वा वेदेर्दक्षिणातः स्थापितं ब्रह्मासनं प्रति गच्छति · तत्समीपे उत्तरतः प्राङ्मुखः स्थित्वा अहे दैधिषव्येति मन्त्रेण ब्रह्मसदनमीक्षते · ततो ब्रह्मसदनादेकं तृणं गृहीत्वा नैर्ऋत्यां दिशि निरस्यति निरस्तः पाप्मेति · समानं होत्रा तृणनिरसनमिति शाङ्खायनः (४. ६. ५.) · काठके तस्मात्तृणमादायोभयतः प्रतिछिद्य दक्षिणा प्रत्यक्तृणं निरस्यतीति · मानवेऽप्येवमेवास्ति ॥ ॥१॥

इति द्वितीयस्य प्रथमा कण्डिका ॥ ॥

ब्रह्मसदनऽआहवनीयमभिमुख उपविशति ॥१॥ छन्दोगसूत्रे तु परिध्योर्वा संधिं स्रुचां वाग्राणि उत्करं वाभिमुखः ।

वाग्यत आनुयाजप्रसवात् ॥२॥ ब्रह्मा वाग्यतः स्यात् ब्रह्मन्प्रस्थास्यामीत्येतत्प्रैषपर्यन्तम्[1] (१. ७. ४. १२.) ।

भागपरिहरणादि[2] वा ॥३॥ वावधारणे · भागपरिहरणादि एव ब्रह्मा वाग्यतः स्यात्[3] · मर्यादायामाङ् न त्वभिविधौ ।

आवृतावषट्कारासु ॥४॥ पूर्णाहुतियूपाहुतिषड्ढोत्राहुतिसावित्र्याहुत्या-

1) एतं तऽइति समिदामन्त्रितः प्रसीतेत्यनुयाजप्रसवः (२. २. २१.) Mahâd. 2) °णायादि ३. 3) भागमस्मै परिहरतीत्यारभ्य (३. ४. २८.) आनुयाजप्रसवात् Mahâd.

व्याहृतयः अत्रषट्काराः · तासु अक्षवरणाद्युपवेशनात्समावृता तूष्णीममन्त्रकं क्रियामात्रेण सर्वं कर्तव्यम् । आवृच्छब्दः समस्तममन्त्रकं विधिमाह · शाखान्तरे तूष्णींश्रवणादाचार्यप्रयत्नाच्च तूष्णीमिति गम्यते ।

अत्र वा व्रतोपायनम् ॥५॥ वा पूर्वदिनऽएव · विकल्पः ।

व्याहृत्य वैष्णवं मन्त्रं जपेत् ॥६॥ व्याहृत्य अात्वा मानुषीं वाचं वैदिकान्तरव्यतिरिक्तामुच्चार्य ब्रह्मा प्रायश्चित्तार्थं वैष्णवं मन्त्रं जपेत्[१] ।

अध्वर्युश्च ॥७॥ अध्वर्युरपि वाग्यमने सति व्याहृत्य वैष्णवं मन्त्रं जपेत् प्रायश्चित्तार्थम् · केचिच्चकारेण यजमानश्चेति व्याचक्षते ।

प्रणय यज्ञं देवता वर्धय त्वं नाकस्य पृष्ठे यजमानोऽअस्तु सप्तऽऋषीणाꣳ सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेह्योंᳲ प्रणयेति प्रणीताः प्रसौति ॥८॥ अक्षन्नयः प्रणेष्यामीत्यामन्त्रितो ब्रह्मा प्रणय यज्ञमित्यमुं मन्त्रं पठित्वा ओंᳲ प्रणयेत्यनेन प्रणीयमानाः अनुजानाति । अनेकयजमानकऽऊह्यो यजमानौ स्ताम् यजमानौ च धेहीति द्वियजमानके अह्नीनेन्द्राग्न्कुलायादौ यजमानाः सन्तु यजमानांश्च धेहीति बहुयजमानकेऽह्नीनसत्त्रगणयज्ञादौ ।

एवमामन्त्रित ओंकारेण ॥९॥ वक्ष्यमाणेषु हविःप्रोक्षणपरिग्रहेध्मबर्हिःप्रोक्षणसामिधेन्यनुवचनेषु आमन्त्रितः इदं करिष्यामीति एवं पृष्टो ब्रह्मा एवममुनैव प्रकारेण लोण्मध्यमपुरुषैकवचनेन ओंकारेण ओंकारप्रयुक्तेन प्रसौति· ततश्च ओंᳲप्रोक्ष ओंᳲ परिगृहाण ओᳲमनुब्रूहीत्येवंशब्दस्यार्थः ।

प्रोक्ष यज्ञमिति हविषि ॥१०॥ हविःप्रोक्षणे अध्वर्युणा बर्हिः प्रोक्षिष्यामीत्येवमामन्त्रितो ब्रह्मा प्रोक्ष यज्ञमिति मन्त्रेण प्रसौति ।

इध्माबर्हिषोश्च ॥११॥ प्रोक्षणे ।

बृहस्पते परिगृहाण वेदिꣳ स्वगा वो देवाः सदनानि सन्त्वस्यां बर्हिः प्रथताꣳ साध्वन्तरहिꣳता[२] पृथिवी देवी देव्यस्त्विति वेदिं परिगृह्णन्तम् ॥१२॥ अध्वर्युं प्रसौति ।

---

१) वाग्यत इत्यनुवर्तते · वाग्यमकाले वाचमुच्चार्य वैष्णवं मन्त्रम् उरु विष्णावित्यृचं वा विष्णो हव्यं रक्षेत्यादि यजुर्वा जपेत् सस्वरम् Mahád. २) Thus Mahád. °धंतर्हिꣳता १. ३.

प्रजापतेऽनुब्रूहि यज्ञमिति सामिधेनीरनुवक्ष्यन्तम् ॥१३॥ होतारं प्रसौति।

देवता वर्धय त्वमिति सर्वत्रानुषजति ॥१४॥ पूर्वोक्तेषु प्रोक्ष यज्ञमित्यादिकेषु सर्वेष्वपि मन्त्रेषु देवता वर्धय त्वं नाकस्येत्यादिकं यजमानं च धेहीत्यन्तं मन्त्रमनुषजति। वरुणप्रघासेष्वध्वर्युद्वित्वे अध्वर्युपरं वचनं द्विवचनान्तमूह्यम् ब्रह्मन्हविः प्रोक्षिष्याव इति· प्रोक्षतं यज्ञं देवता वर्धयतं युवाम् यजमानं च धत्तम् ओं३ प्रोक्षतमिति। अनेकयजमानके सत्राहीनादौ नानागार्हपत्यपक्षे प्रत्यग्नि सवनीयपुरोडाशेषु उदयनीयासु च बहवोऽध्वर्यवो भवन्ति विरोधात्· तत्र ब्रह्मन्हविः प्रोक्षिष्याम इति प्रोक्षत यज्ञं देवता वर्धयत यूयम् यजमानाः सन्तु यजमानांश्च धत्त ओं३ प्रोक्षतेति। वरुणप्रघासेषु अध्वर्युपरं वेदिपरं च वचनं द्विवचनान्तमूह्यम् ब्रह्मन् पूर्वौ (उत्तरौ) परिग्रहौ परिग्रहीष्याव इति बृहस्पती परिगृह्णीतं वेदी सुगा वो देवाः सदनानि सन्त्वनयोर्बर्हिषी प्रयेताꣳ साधन्तरद्विꣳषे पृथिव्यौ देव्यौ देव्यौ स्ताम् देवता वर्धयतं युवाम् यजमानं च धत्तम् ओं३ परिगृह्णीतमिति। कुण्डपायिनामयने यजमानपरं च · इध्माबर्हिषोः प्रोक्षणे हविःप्रोक्षणवदूहः। अनेकयजमानके बह्वीषूदयनीयासु बह्वध्वर्युषु परिग्रहे बृहस्पतयः परिगृह्णीत वेदीः सुगा वो देवाः सदनानि सन्त्वासु बर्हीꣳषि प्रयन्ताꣳ साधन्तरद्विꣳषाः पृथिव्यो देव्यो देव्यः सन्तु देवता वर्धयत यूयम् यजमानाः सन्तु यजमानांश्च धत्त ओं परिगृह्णीतेति · इध्माबर्हिषोः प्रोक्षणे हविःप्रोक्षणवत्। सुगा वो देवाः पितरः सदनानीति महापितृयज्ञे नूह इति अनन्तयाज्ञिका आहुः · हरिस्वामिमते वरुणप्रघासेषु कुत्राप्यूहो न भवति · याज्ञिकानां मते ब्रह्मत्वमन्त्रेषु वरुणप्रघासेषूहाभावः[१)]।

मित्रस्य त्वा चक्षुषा प्रतीक्षऽइति[२)] प्राशित्रं प्रतीक्षते ॥१५॥ प्राशित्रमवदीयमानमाह्रियमाणं च। प्राशित्रं ब्रह्मणो भागः यवमात्रं पिप्पलमात्रं वावत्तः।

---

१) ?? °सेतूहा° २. २) Kâṇva, see Vâj. S. pag. ५८.

देवस्य त्वेति (२. ११.) प्रतिगृह्णाति ॥ १६ ॥ तदध्वर्युणा समर्प्यमाणं विलोक्य अञ्जलिना सपात्रं प्रतिगृह्णति ।

पृथिव्यास्त्वेति सादयत्यपोह्य बर्हींषि ॥ १७ ॥ ब्रह्मा तत्प्रतिगृह्य वेदेर्दक्षिणांसदेशे स्तृतानि बर्हींषि अपसार्य प्राग्दण्डं सादयति [1] आश्वलायनादिसूत्रेषु तद्दर्शनात् ।

पुनरादाय देवस्य [2] त्वेत्यनामिकाङ्गुष्ठाभ्यामग्नेष्ट्वेति (२. ११.) प्राश्नाति दन्तैरनुपस्पृशन्नत्र चेत् ॥ १८ ॥ अत्रास्मिन्नवसरे चेत्प्राशित्रं ब्रह्मा प्राश्नाति तदा पुनरनामिकाङ्गुष्ठाभ्यां पात्राद्द्रव्यमादाय प्राशित्रं प्राश्नाति ।

निदधाति वांसदेशे ॥ १९ ॥ वा विकल्पे · यदि कालान्तरे प्राशनम् तदा प्रतिगृह्यांसदेशे निदधाति । एवं च सादनपक्षे उपरिष्टादेव प्राशनं नात्र · एवं सादनस्य दृष्टार्थता भवति इतरथा हि अदृष्टार्थता स्यात् · कालान्तरे प्राशनं वक्ष्यते (३. ४. २७.) । तेनात्र भक्षणपक्षे प्रतिगृह्य सादनमकृत्वैव पुनर्द्रव्यमनामिकाङ्गुष्ठाभ्यामादाय भक्षः कालान्तरे भक्षणपक्षे त्वंसदेशे आसादनमिति पितृभूतिः कर्कश्च · अन्ये त्वत्र भक्षणपक्षेऽप्यनियतदेशे सादनम् उपरिष्टाद्भक्षणपक्षे तु अंसदेशे निधानं प्रयत्नतः स्थापनं रक्षार्थं कर्तव्यमित्याहुः · तथा च वैतानसूत्रेऽत्र भक्षणपक्षेऽप्यासादनमुक्तम् श्रुतौ हि प्रतिग्रहणानन्तरमेव भक्षणम् तदनन्तरं भागपरिहरणात्प्राग्वा प्राशित्रहरणं रक्षणीयम् [3] · अत एव सूत्रकृता विकल्प उक्तः ।

प्रक्षाल्य पात्रं नाभिमालभते या अप्स्वन्तर्देवतास्ता इदं शमयन्तु स्वाहाकृतं जठरमिन्द्रस्य गह घसिना मे मा सम्पृक्था ऊर्ध्व मे नाभेः सीदेन्द्रस्य त्वा जठरे सादयामीति [4] ॥ २० ॥ पात्रं प्राशित्रहरणमुत्करे प्रक्षाल्य मन्त्रान्ते स्पृशति ब्रह्मा · पात्रमित्येकवचनं जात्यपेक्षम् कर्णयोः प्राशित्रहरणे इति (२५. ७. २७.) प्रतिपत्तौ द्वयोः श्रवणात् · अत एकेन पात्रेणापिधानं कार्यम् अपर-

१) पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थ इति काण्वीयेन मन्त्रेण वेद्यां बर्हींषि अपसार्य इतस्ततः कृत्वा भूमौ सादयति Mahád. २) देवस्य त्वेत्याददऽइत्यनेन काण्वीयेन मन्त्रेण Mahád. See Váj. S. pag. ५८. ३) ? भक्षणी° २. ४) Káṇva, see Váj. S. pag. ५८.

स्मिन्नवदानमिति द्वयोरप्यत्र प्रक्षालनम् । भक्षणानन्तरमाचमनमर्थात्प्राप्तमिति न सूत्रितम् ।

एतं तऽइति (२. १२-१३.) समिदामन्त्रितः प्रसौति ॥२१॥ समिदामन्त्रितः समिधमादायाध्वर्युणा ब्रह्मन्प्रस्थास्यामीत्येवमामन्त्रितो ब्रह्मा प्रसौति [1] ।

प्रतिष्ठेति (२. १३.) ब्रूयाद्वा ॥२२॥ विकल्पेन · वरुणप्रघासे त्वां३ प्रतिष्ठतमिति प्रयोगः सत्रेषु उदवसानीयासु प्रतिष्ठतेति ।

कर्मापवर्गे समिधमादधाति जुहोत्युपतिष्ठते वा नमः कृताय कर्मणेऽअकृताय कर्मणे नमः अयाड्यग्निं जातवेदा अन्तरः पूर्वो अस्मिन्निषद्य स त्वं सनिं सुविमुचा [2] विमुच्य धेह्यस्मभ्यं द्रविणं जातवेदः स्वाहेति यथेतमेत्य ॥२३॥ कर्मणोऽपवर्गः समाप्तिः · कर्मापवर्गे ब्राह्मणतर्पणानन्तरम् । वरणोत्तरकालं स्वासनऽउपवेशनार्थं येन मार्गेण गतो भवति आहवनीयमपरेण वा पूर्वेण वा तेनैव मार्गेण प्रत्यागत्य नमः कृतायेति मन्त्रेण आहवनीये समिधमादधाति अथवाऽऽज्यस्थाल्याः स्रुवेण जुह्वां सकृद्गृहीतमाज्यं गृहीत्वा जुहोति अथवा आहवनीयमुपतिष्ठते [3] । होमपक्षे इदं जातवेदसऽइति त्यागः ।

एतद्ब्रह्मत्वमिष्टिपश्वोः ॥२४॥ एतत्प्रागुक्तं व्रतजपादिकमिष्टिपश्वोः ब्रह्मणः कर्म · अतः परं प्रणीताप्रणयनाद्याध्वर्यवमुपदिशति ॥ ॥ द्वितीया कण्डिका ॥२॥

अथ पद्धतिः ।

तत इदमहं बृहस्पतेरिति मन्त्रेण ब्रह्मसदने आहवनीयाभिमुखो ब्रह्मा उपविशति · मानवे विशेषः ब्रह्मण्युपचरत्यन्यस्य वा कर्म कुर्वाणे यो नेदिष्ठस्त्विजां स्यात्स उपासीतापि वा दर्भमुष्टिमुदपात्रं वा ब्रह्मासने न्यस्येदशून्यासनमेवं स्यादिति । अत्र वा यथोक्तं व्रतग्रहणं यजमानः करोति । अथवा सद्य एव प्रतिपद्युद्धरणाद्यन्वाधानादि सर्वं कर्तव्यम् · अस्मिन्पक्षे यावद्व्रतोपायनीयाशनशयनयोरभावः रागप्राप्तऽएवाशने सर्पिरादिगुणविधानात् यागात्प्राक् भोजनशयनकालाभावाच्च · अन्यत्सर्वं वपनादि भवत्येव ॥ ॥२॥

इति द्वितीयस्य द्वितीया कण्डिका ॥

---

१) समिधं गृहीत्वा यदामन्त्रणं तत्समिदामन्त्रणम् । सत्रे यज्ञपतिशब्दस्य मन्त्रे विपरिणम्यते Mahâd. २) सुविमुंचा ३. ३) यावदुक्तात्तापक्षिन्नेषु कर्मस्वयं पदार्थो निवर्तते M.

गार्हपत्यमुत्तरेणोदपात्रं निधायालभते भूतस्त्वा भूत करिष्यामीति ॥ १ ॥ अध्वर्युर्गार्हपत्यस्योत्तरतः समीपे उदपात्रं स्थापयित्वा मन्त्रान्ते हस्तेन स्पृशति । उदकपात्रं वारणचमसरूपम् चमसेनापः प्रणयतीति शाङ्खायनात् · स्वशाखायामपि प्रतिपत्तौ श्रूयते · स च चमसश्चतुरस्रो द्वादशाङ्गुलदीर्घश्चतुरङ्गुलखातः सवृत्तश्च भवति परिशिष्टात् · सूत्रकारप्रस्थानाच्च चमसवत्स्रुवेणेति (१८. ५. ४.) स्रुवस्य चतुरस्रतां विधातुं चमसवदित्यनेन चमसस्य सिद्धां चतुरस्रतामाह । आलम्भेऽपि विप्रतिपत्तिः पात्रस्येति कर्कः उदकस्येति याज्ञिकाः ।

ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छेत्याह ॥ २ ॥ यदा च प्रणीतानां सर्वार्थत्वं संयवनार्थत्वं वा तदा यस्मिन्कर्मणि चरुश्रपणार्थं पयो घृतं वा विहितम् यथा वैश्वदेवश्चरुः पयसि वेति (४. ६. २-३.) घृते चरुरादित्येभ्य इति (१६. ४. २१.) च तत्र पयसो घृतस्य च प्रणयनं [मन्थाद्यर्थं च दध्नः] कर्तव्यम् · तत्र ब्रह्मन्पयांसि अभ्युद्धृतानि [अब्धानि] प्रणेष्यामीत्यूह्यः । पित्र्यायामपि प्रणयनात्पूर्वमेव निवान्यां दुग्ध्वा तद्दुग्धस्य प्रणयनं कर्तव्यम् । जैमिनेर्मते प्रणीताः संयवनार्था एव कर्काचार्याणां मते सर्वार्था एव इतरेषामदृष्टार्था एवेति । अनेकयजमानके यजमानौ वाचं यच्छतम् यजमाना वाचं यच्छतेत्यूह्यः [1] ।

अनुज्ञात उत्तरेणाहवनीयं सम्प्रति निदधाति कस्त्वेति (१. ६.) ॥ ३ ॥ प्रणीताः प्रणीय गार्हपत्यसमीपादाहवनीयसमीपं नीत्वा सम्प्रति आर्जव्येन बहिर्वेदि निदधाति · सम्प्रतीति नाहवनीयमतिक्रम्य न चाप्राप्य । प्रणयतिरत्र निधानार्थः तेन निधानऽएव मन्त्रः । सम्प्रतिशब्द ऋज्वर्थः सम्प्राप्य तिष्ठत्यस्मिन्नातिक्रामतीति सम्प्रति । प्रणीतानां दर्भेषु सादनं दर्भैरपिधानं च कर्तव्यम् । ब्रह्मानुज्ञात इति ब्रह्मन्नपः प्रणेष्यामि यजमान वाचं यच्छेत्यस्यानन्तरमेव प्रणय यज्ञमिति पठनीयम् न ब्रह्मन्नपः प्रणेष्यामीत्यस्यानन्तरम् ।

नान्तरेण गच्छेयुः ॥ ४ ॥ प्रणीताहवनीययोरन्तरालेन ।

कांस्यवानस्पत्यमार्त्तिकैरभिचारब्रह्मवर्चसप्रतिष्ठाकामा यथासंख्यम् ॥ ५ ॥ अभि°कामा यजमानाः कांस्य°कैः पात्रैः यथासंख्यं प्रणयन्ति · अत्र तु गुणादेवैतत्फलम् न तु क्रतोः कांस्यादीनामेव फलसम्बन्धश्रवणात् · अतश्च विकारे

[1] प्रैषोऽयमसत्यपि प्रणयने प्रवर्तते सत्त्रे च विपरिणम्यते Mahâd.

दृपामप्रवृत्तिः पुरुषार्थत्वात् प्रकृतौ यत्क्रत्वर्थमङ्गजातं तदेव विकारेष्वतिदेशेन गच्छति ।

तृणैरग्नीन्परिस्तीर्य पुरस्तात्प्रथमं द्विशः पात्राणि सच्छादयति ॥६॥ दर्भतृणैः प्रागुदगग्रैराहवनीयगार्हपत्यदक्षिणाग्नीन्क्रमेण परिस्तीर्य · तत्रापि प्रथमं पुरस्तात्प्राच्यां दिशि परिस्तरणम् ततः प्रदक्षिणक्रमेणोदक्संस्थम् । एकेन प्रयत्नेन द्वयोर्द्वयोः सहैव निधानं करोति । पान्ति रक्षन्ति हविरादीभिरिति पात्राणि · ननु पिबन्त्येभिरिति किं न विगृह्यते नैतदेवम् अस्यामेव व्युत्पत्तौ स्रुवस्यैव जुह्वाश्च पात्रत्वं स्यान्न शूर्पादीनाम् · नन्वेवमृत्विगादिष्वपि पात्रत्वप्रसङ्गः नैष दोषः तेषां करणत्वेनानिर्देशात् तथ्देवैषामत्राशुद्धस्तच्चा वान्यो वामेध्य इति (१.१.३.१२.) वाक्यशेषविरोधाच्च · शूर्पादीनि हि याज्ञिकानां प्रसिद्धानि ।

यजमानो वा ॥७॥ [1]

शूर्पाग्निहोत्रहवणि स्फ्यकपाले शम्याकृष्णाजिनमुलूखलमुसलं दृषदुपलमर्थवच्च ॥८॥ स्फ्यकपालमित्येकवद्भावादिदमेकं द्वन्द्वम् तेन बहुभिरपि कपालैरेकमेव पात्रमिति द्रष्टव्यम् · कपालानि च भिन्नस्य घटादेर्योग्यानि · अभिन्नान्यपि रौहिणकपालवत् निर्मितानि भवन्तीत्येकऽइति धूर्तस्वामिनः । शूर्पं च नडतृणमयमिषीकानिर्मितं वेणुदलनिर्मितं वा भवति । अर्थवच्च येन-येन पात्रेणात्र प्रयोजनं तेषां सर्वेषामुपयोगक्रमेणासादनम् · तथा च कात्यायनः प्राक्प्राक्चमुदगग्रैरुदगग्रं समीपतः तत्तथा सादयेद्द्रव्यं यद्यथा विनियुज्यतऽइति · तच्चैवम् अनो वा पात्री वा व्रीहयो यवा वा · ततश्चैवम् अनो व्रीहयश्चानो यवाश्च पात्री व्रीहयः पात्री यवाश्चेति वा · पवित्रच्छेदनानि पवित्रे च · उपवेषः संयवनार्थमुदकं च · आज्यस्थाली आज्यं च · अमावास्यायां दोहनचतुष्टयम् · वेदार्थः कुशमुष्टि(ः) दक्षिणार्था अन्वाहार्यतण्डुलाश्च · दर्भतृणमग्निश्च · इध्मो बर्हिश्च · स्रुवो जुहूश्च · उपभृद्ध्रुवा च · प्राशित्रहरणं शृतावदानं च · द्वे पुरोडाशपात्र्यौ इति कर्कादयः · तदयुक्तमिति केचित् स्वसूत्रशाखान्तरसूत्रेषु सादनप्रतपनोपस्तरणादिविषयस्या एव दर्शनात् · यच्चेडापात्रीपिष्टपात्र्योरभेदमाहुस्तदपि अयुक्तम्

---

1) अध्वर्युर्वा Mahād.

शाखान्तरसूत्रेषु तयोर्भेददर्शनात् तथा तैत्तिरीयसूत्रम् प्राशित्रहरणं चेडापात्रं च मेक्षणं च पिष्टपात्री चेति · विकृतौ चातुर्मास्यादौ यत्र चर्वादिभिर्व्यवहिताः पुरोडाशाः तत्र भवतु पुरोडाशपात्रीभेदः · योक्त्रं यूनकुशाश्च · परिधयः कुशास्तीर्णं होतृषदनं च · इडापात्री षडवत्तं च · अन्तर्धानकटः पूर्णपात्रं च · पक्षे कर्मापवर्गा समिदप्यासाद्यते[1] · परिधीनामपि पृथगासादनमष्टादशकाष्ठकेध्मपक्षे एकविंशतिकाष्ठकेध्मपक्षे तस्मादेवेध्मात्त्रीणि काष्ठान्यादाय विकल्पेन परिधिपरिधानविधानात् । एवमत्र पात्राणामुपादानक्रमेणासादनमुक्तम् । यस्य-यस्य पात्रस्य येन क्रमेण प्रथमं कार्यार्थं हस्तेनोपादानम् तेनैव क्रमेण तस्यासादनम् · एवं च सुतरां दृष्टार्थता भवति लाघवं च · विनियोगक्रमेणासादने च तथा न स्यात् हविर्ग्रहणे पात्र्याः हविर्द्रव्यस्य च देशविप्रकर्षात् आज्यनिर्वापे स्थाल्या (आ)ज्यस्य च · तस्मादुपादानक्रम एव पितृभूतियाज्ञिकसंमतः पात्रासादने युक्तः कर्काचार्यास्तु विनियोगक्रमेणासादनमाहुः ॥ अथ पात्राणामासादनस्थानमाह ·

श्रपणस्य पश्चादुत्तरतो वा ॥९॥ श्रप्यन्तेऽनेन हवींषि इति श्रपणो गार्हपत्यो वाहवनीयो वा · तस्य पश्चात् प्राक्संस्थान्युदगग्राणि (उत्तरतः उदक्संस्थानि) प्रागग्राणि वा पात्राण्यासादयति · तदुक्तं कारिकायाम् उत्तरे चेदुदक्संस्थं प्राक्संस्थं पश्चिमे भवेत् ।

कर्मणे वामिति (१. ६.) शूर्पाग्निहोत्रहवण्यादाय वाचं यच्छति ॥१०॥ अध्वर्युः शूर्पमग्निहोत्रहवणीं च हविर्ग्रहणार्थमादाय वा° य° । मन्त्रश्चोभयार्थः द्विवचनान्तत्वात् · ततश्चैकस्यादानविस्मरणे पुनरपि द्विवचनान्त एव प्रयुज्यते । हविर्ग्रहणाभावे पयस्यापश्चादौ तयोरादानं न भवति[2] ।

प्रतपनं प्रत्युष्टं निष्टप्तमिति (१. ७.) वा ॥११॥ तयोरात्तयोः । मन्त्रयो राक्षसत्वात्तदुच्चारणानन्तरमप उपस्पृशेत् । प्रतपनं हविर्ग्रहणार्थः संस्कारः अतस्तदभावे न भवति ।

---

1) ? °वर्गासमि° २. कर्मवर्गा समित् Chambers 196. 2) वाग्यमस्य पदार्थधर्मत्वात् हविर्ग्रहणाभावेऽपि वाग्यमनं भवत्येव Mahâd.

गच्छत्युर्वन्तरिक्षमिति (१. ७.) अयनस्य पश्चादनस्तिष्ठत्समङ्गि[१] ॥१२॥ अध्वर्युः शकटं प्रति गच्छति गार्हपत्यादपरस्मिन्देशे स्थितम्[२]।

धूरसीति (१. ८.) धूरभिमर्शनम् ॥१३॥ युगस्य प्रान्तौ धूःशब्देनोच्येते यौ अनडुत्स्कन्धयोरुपरि निधीयेते[३]। प्रथमं दक्षिणस्या धुरस्तत उत्तरस्या अभिमर्शनमध्वर्युः करोति। अथवा एकस्या एव धुरोऽभिमर्शनं युक्तं दक्षिणस्या उत्तरस्या वा स्वशाखायामप्येकवचनश्रुतेः (१. १. २. १०.)।

देवानामित्युपस्तम्भनस्य (१. ८-१.) पश्चादीषाम् ॥१४॥ अभिमृशति[४]। पितृयज्ञे पितृणामसि वह्नितमं पितृजुष्टतममित्यूहः[५] एकदेवत्ये आतिथ्यापवमानेष्ट्यादौ देवस्यासीति स्त्रीदेवत्ये प्रायणीयादौ देव्या असि द्विदेवत्ये देवयोरसीति यथायथमूहः कार्य इति कर्काचार्याः · केचिदत्र [मन्त्रे] लिङ्गवचनयोरनूहमिच्छन्ति प्रकृतावपि सांनाय्यवत्यां दर्शेष्टावसमवेतत्वात् अतो यथाश्रुत एव सर्वत्र प्रयोज्यः। अनेकयजमानके यज्ञपती ह्वार्ष्टम् यज्ञपतयो ह्वार्षुरिति।

विष्णुस्त्वेत्यारोहणम् (१. ९.) ॥१५॥ पश्चात्परीत्य दक्षिणाचक्रस्योपर्यारोहणं करोति।

प्रेक्षतऽउरु वातायेति (१. ९.) हविष्यान् ॥१६॥ व्रीहीन्यवान्वा। एतच्च प्रेक्षणं हविःसंस्कारः · अतश्च नानाबीजेषु देवसूहविःषु चातुर्मास्यादिषु च प्रतिबीजमीक्षणम्।

अपहृतमिति (१. ९.) निरस्यत्यन्यत् ॥१७॥ हविष्येभ्योऽन्यद्यत्तन्मध्ये पतितं भवति तृणलोष्टादिकं युगपन्नीचैः क्षिपति।

अविद्यमानेऽभिमृशेत् ॥१८॥ नानाबीजेषु प्रतिबीजं मन्त्रेण · हस्तेन स्पृशेत्[६]।

---

[१] °ष्ठंत्समंगि १. °ष्ठत्समगि ३. °ष्ठंत्समगि २. [२] सहविष्यमासादितमेव तिष्ठतीत्यर्थः · संगतांगमनडुद्भ्यहितं (!) सर्वावयवयुताम् · तत्प्रति हविर्ग्रहणार्थं गच्छति Mahâd. [३] धूरिति युगशम्यान्तरालदेशः Mahâd. [४] कस्तम्भीमिति कुत्सितोऽत्यल्पत्वात् २. कस्तम्भी शकटस्याधः पतनं वारयितुमीषाग्रोत्तम्भना मेथी उपस्तम्भनी · तस्योपस्तम्भनस्य पश्चा उत्तरामीषामभिमृश्य Ss. [५] अत्र विकृतौ यथार्थविपरिणामः Mahâd. [६] अविद्यमाने अपद्रव्ये तेनैव मन्त्रेण हविष्यानभिमृशेत् · भेदेन नानाबीजेषु Mahâd.

यहृत्तामित्यालभते (१. १.) ॥ १९ ॥ [1]

देवस्य त्वेति (१. १०.) गृह्णात्याग्नेयं चतुरो मुष्टीन् ॥ २० ॥ अग्निहोत्रहवण्यां प्रक्षिपति । मुष्टित्रयं मन्त्रेण चतुर्थं तूष्णीम् · एवमेव सर्वेषु सूत्रेषु । ग्रहणानन्तरं च अग्निहोत्रहवण्याः शूर्पे हविः पृथक्पृथक्प्रक्षेपणीयम् · एवं शूर्पादानस्यापि (१०.) दृष्टार्थता भवति अग्निहोत्रहवण्यां च रिक्तायां हविरन्तरं ग्रहीष्यते आपश्च तत्र करिष्यन्त इति ।

एवमग्नीषोमीयम् ॥ २१ ॥ यथादेवतमन्यत् ॥ २२ ॥ [2]

भूताय त्वेति (१. ११.) शेषाभिमर्शनम् ॥ २३ ॥ नानाबीजेषु च प्रत्येकं समन्त्रकमभिमर्शनम् [3] ।

स्वरिति (१. ११.) प्राङ्गीक्षते ॥ २४ ॥ प्राच्यां दिशि विलोकनं करोति दृष्टिनिरोधसंजात श्रमापनयनार्थम् · हविर्ग्रहणाभावे प्राङ्गीक्षणाभावः श्रमाभावात् · पित्र्यायां तु दक्षिणाया दिश एवेक्षणम् दिग्विपर्यये तस्यास्तत्र प्राचीत्वात् ।

दृंहन्तामित्यवरोहति (१. ११.) ॥ २५ ॥ [4]

गच्छत्युर्वन्तरिक्षमिति (१. ११.) ॥ २६ ॥ उत्तरदेशं प्रति ।

श्रपणस्य पश्चात्सादयति पृथिव्यास्त्वेति (१. ११.) ॥ २७ ॥ गार्हपत्यस्य वाहवनीयस्य वा यस्मिन् श्रपणं करिष्यन्भवति तस्य पश्चात् शूर्पस्थानि गृहीतानि हवींषि सादयति । वरुणप्रघासेषु च पूर्वेद्युर्मेषमिथुनकरम्भपात्रार्थं गृहीतानां यवानां दक्षिणाग्नेः पश्चादासादनम् तस्यैव तत्र श्रपणत्वात् · पित्र्यायां च दिग्विपर्ययाद्गार्हपत्यदक्षिणाग्न्योरुत्तरतो हविषामासादनम् · त्र्यम्बकेषु गार्हपत्यस्य दक्षिणतः ।

---

1) हविष्यान्स्पृशति · भेदेन नानाबीजेषु Mahád. 2) एवं यथादेवतं हविर्भवति तथान्यद्गृह्णीयात् Mahád. अन्यदप्यैन्द्राग्नादिकम् · या-या देवता यथादेवतम् Ss. 3) साकाङ्क्षत्वात्परिशेषयामीत्यध्याहार इति कर्कः · परं तु अभिमृशतीति विधेरभिमृशामीति युक्तम् । एकवाक्यत्वाच्च अत्र भूतशब्देन देवादीन्युच्यन्ते प्रजापतिं वै भूतान्युपासीदन्निति श्रुतेः (२. ४. २. १.) · तस्मै भूताय नारातये किंतु रातये दानार्थम् रातेर्दानकर्मणा इति यास्कोक्तेः (४. १७.) त्वामभिमृशामीति Mahád. 4) अनसः सकाशात् · प्राङित्यनुवर्तते हविःसादनार्थम् Mahád.

पात्र्यां वा स्फ्योपहितायाम् ॥२८॥　　विकल्पे · अथवा स्फ्योपहितायां[1] पात्र्यामेतदनःसम्बद्धं सर्वं कर्म प्रत्येतव्यम् । पात्र्यै गृह्णामीति (१. १. २. ८.) पञ्चम्यर्थे चतुर्थी पात्र्याः · स्फ्यं पात्र्या अधस्तात्प्रेरयित्वा । अत्र विशेषमाह ·

धूरीषारोहणानि पात्रीबिले जपति ॥२९॥　　अत्र धूरीषारोहणैस्तत्सम्बद्धा मन्त्रा लक्ष्यन्ते　(तान्) पात्रीतो ग्रहणपक्षे पात्र्या मुखे गर्ते खाते जपति । अनन्तरायम् (१. १. २. ८.) अविच्छेदम्　धूरीषारोहणानामभावेऽपि तदभिवादीनि यजूंष्यनन्तरित्य नान्तरा मुक्त्वा न परित्यज्य　नान्येषामपहतमित्यादीनां समवेतार्थानां केवलानां प्रयोगः · एषां च मन्त्राणां तऽएवार्था भवन्ति येऽनस्ति कथम्　धूस्तावद्धूर्वतेर्बधकर्मण इति सापि (पात्री) किंचिदागच्छद्धिंस्तन्ति　तत्राप्यग्निरस्ति सर्वगतत्वात्　हविर्ग्रहीष्यन्नधर्युस्तामतिक्रामति तस्याऽअपि निह्नुते धूरसीत्यादिना　अनोवच्च पात्र्यपि हविष्यान्धारयतीति वह्नितममित्यादिशब्दैरुच्यते　विष्णुश्चाधर्य्वात्मकस्तत्र पादेन क्रमते अत्र तु हस्तेनेति विशेषः · तस्मात्सिद्धप्रयोगाणां पात्र्यामपि तऽएवार्था इति हरिस्वामी · यदि तु[2] पात्र्यां गृह्णीयात्तदा धूरीषाद्यभावेन तदननुष्ठानकृतं[3] व्यवधानमन्तरायमन्तरेण तत्प्रकाशकयजूंषि[4] जपेदिति माधवाचार्याः । पात्रीतः पश्चाद्देशे उत्तरस्मिन्वोपविश्य प्राङ्मुखो ग्रहणं कुर्यात्　पित्र्यायां दक्षिणासीनः　त्र्यम्बकेषूदङ्ङासीनः · पित्र्यायां हि दक्षिणा प्राची　त्र्यम्बकेषु उत्तरा प्राची · आसनाय स्थानासम्भवे पात्रीमपरेणैव गत्वा दक्षिणतः प्राङुपविष्टेनैव ग्रहणं कार्यम्　पात्रीगार्हपत्ययोरन्तराले गमनस्यासिद्धत्वात् · अनस्यपि प्राङ्मुखोपविष्टेनैव ग्रहणं कर्तव्यम् ।

दृंहन्तामित्युत्थानम् (१. ११.) ॥३०॥　　पात्रीपक्षे अवरोहणमन्त्रेण आसनादुत्तिष्ठति ।

कुशौ समावप्रशीर्णाग्रावनन्तर्गर्भौ कुशेश्छिनत्ति पवित्रे स्थ (१. १२.) इति ॥३१॥　　मूलच्छेदनेन प्रादेशप्रमाणौ करोति · कुशशब्देनैकं तृणमुच्यते ।

---

1) स्फ्य उपहितो यस्याः । उपोहनं च ग्रहणकाले पात्र्या अधः स्फ्योदगग्रप्रेरणम् · पात्र्या दक्षिणतः प्रागग्रं स्फ्यं निधायेति गुरुचरणाः Mahâd.　2) उतो अपि तु यदि Sây. at १. १. २. ८.　3) ? तदनुष्ठा° २. तदु स्थानविरहादननुष्ठानकृतं Sây.　4) °आकयज्ञ (!) धूरसि देवानामसीत्यादीनि Sây.

समौ मूलादारभ्याग्रपर्यन्तं तुल्यप्रमाणौ अच्छिताग्रौ[1] अग्रवन्तौ अनन्तर्गर्भौ[2] गर्भे हि सति संख्यान्तरं स्यात् ।

त्रीन्वा ॥३२॥ पवित्रे स्थ इति मन्त्रश्चानूहित एव पवित्रत्रयपक्षेऽपि प्रवर्तत इति कर्कः · द्वयोश्चरितार्थत्वादनभिधानाच्च त्रिषु न प्रवर्तत इति पितृभूतिः । तुल्यविशेषणात् ।

हविर्ग्रहण्यामपः कृत्वा ताभ्यामुत्पुनाति सवितुर्व इति (१. १२.) ॥३३॥ हविर्गृह्यतेऽस्यामिति हविर्ग्रहणी अग्निहोत्रहवणी · पवित्राभ्यामिताः प्रोक्षणीः उत्क्षिप्योत्पूय ताभिः प्रोक्षति । अग्निहोत्रहवण्या हवीष्यपि निर्वपतीति शाखान्तरात् · तेन हविर्ग्रहण्यामित्यग्निहोत्रहवण्यामित्यर्थः तेन पश्चादौ हविर्ग्रहणाभावेऽपि पात्रप्रोक्षणार्थं अग्निहोत्रहवण्यामेवापः क्रियन्ते ।

ता स्थानं तयोः ॥३४॥ अत ऊर्ध्वं पवित्रे तास्वेवाग्निहोत्रहवण्यां स्थितासु प्रोक्षणीषु स्थाप्येते यावत्तासां सद्भावः[3] ।

सव्ये कृत्वा दक्षिणेनोदिङ्गयति देवीराप इति (१. १२.) ॥३५॥ सोदकामग्निहोत्रहवणीं सव्यहस्ते निधाय दक्षिणेन ऊर्ध्वामुद्गृह्णाति अप ऊर्ध्वं चालयति । अत्र दक्षिणेनेति न वक्तव्यम् स्मृतित एव प्राप्तत्वात् वाच्यं वा सव्यहस्तस्थितानामेव प्रोक्षणीनामुदिङ्गनं यथा स्यादिति । अनेकयजमानके यज्ञपती सुधातू यज्ञपती देवयुवौ यज्ञपतीन्सुधातून्यज्ञपतीन्देवयून् · पितृयज्ञे च यज्ञपतिं देवपितृयुवमिति ।

प्रोक्षिता स्थेति (१. १३.) तासां प्रोक्षणम् ॥३६॥ तासामेवाग्निहोत्रहवणीस्थानामपामेकदेशेन तासामेव प्रोक्षणं कुर्यात् ।

हविश्चाग्नये त्वाग्नीषोमाभ्यां त्वेति (१. १३.) ॥३७॥[4]

यथादेवतमन्यत् ॥३८॥

पात्राणि दैव्यायेति (१. १३.) ॥३९॥[5] शुन्धध्वमिति प्रोक्षणमन्त्रगतबहु-

---

१) अत्रुटिताग्रौ Mahád. २) न विद्यतेऽन्तर्मध्ये गर्भो ययोः Ss. ३) मूलावसेकान्तम् Mahád. ४) हविश्च प्रोक्षति · अग्नये त्वेत्याग्नेयम् अग्नीषोमाभ्यां त्वेत्यग्नीषोमीयम् Mahád. ५) दर्शगणसम्बन्धीनि पात्राणि दक्षिणेन प्रोक्षति Mahád.

वचनसामर्थ्यात्सर्वाणि पात्राण्येकत्र राशीकृत्य प्रोक्षणं कर्तव्यम् · कर्काचार्यास्तु प्रोक्षणस्य पात्रोद्देशेन विधानात्समुदायस्य चाचोदितत्वात्प्रतिसंस्कार्य[1] संस्कारावृत्तेर्न्याय्यत्वाच्च प्रतिपात्रं प्रोक्षणं कर्तव्यम् बहुवचनं पूजार्थमित्याहुः · [तदसत्[2] · यथा व्रीहिप्रोक्षणे जातेः प्रोक्षणं न व्यक्तिप्रोक्षणम् तद्वत्पात्रप्रोक्षणेऽपि जातिप्रोक्षणं न व्यक्तिप्रोक्षणम् · अनेन बहुवचनमप्युपपन्नम्] । पितृयज्ञे च दैव्याय पित्र्याय कर्मणे शुन्धध्वं देवपितृयज्यायाऽइत्यूहः । प्रतिपात्रप्रोक्षणपक्षे च केवलप्रधानार्थेषु पात्रेषु शूर्पकपालकृष्णाजिनोलूखलमुसलशृतावदानोपसर्जन्यादिषु पित्र्याय कर्मणऽइति प्रयोगः अङ्गप्रधानार्थेषु दैव्याय पित्र्यायेति केवलदेवकर्मार्थे दैव्यायेति ।

असंचरे प्रोक्षणीर्निधाय ॥४०॥[3] यस्मिन्स्थाने कोऽपि न गच्छति प्रणीताहवनीययोरन्तराले (१.१.१.२१.) तत्र । याभिरद्भिर्हविषः पात्राणां च प्रोक्षणं कृतम् ताः प्रोक्षण्यः अग्निहोत्रहवणीस्थाः । यद्यपि गार्हपत्याहवनीयौ न व्यवेयादित्ययमपि (१.८.२३.) असंचर एव स त्वप्रकृतत्वान्न गृह्यतऽइति कर्कः । प्रोक्षणीरिति यौगिक(ः) शब्दो न संस्कारनिमित्तो जातिनिमित्तो वा असंस्कृतास्वप्यप्सु प्रयोगात् ॥ ॥ तृतीया कण्डिका ॥ ३ ॥

अथ पद्धतिः ॥

ततोऽध्वर्युर्वारणं चमसं सव्यहस्ते कृत्वा दक्षिणहस्तस्थेनोदपात्रेण स्वयं तस्मिन्नुदकमासिच्य दक्षिणहस्तेन चमसं गार्हपत्यस्योत्तरतो निधाय तदनन्तरं भूतस्त्वेति मन्त्रेण हस्तेन चमसस्थमुदकमालभते · चमसस्यालम्भ इति कर्कः उदकस्यालम्भ इति याज्ञिकाः । ततो ब्रह्मन्नपः प्रणेष्यामीति ब्रह्माणं पृच्छति वाचं यच्छेति यजमानं प्रेष्यति · सर्वेषु प्रैषेषु कृतेषु ब्रह्मा प्रणय यज्ञमित्यादि (२.२.८.) यजमानं च धेहीत्यन्तमुपांशु पठित्वा ओं३ प्रणयेत्युच्चैरनुज्ञां करोति यथाध्वर्युः शृणोति · ततोऽध्वर्युश्चमसं गृहीत्वाहवनीयादुत्तरस्यां दिशि बर्हिर्वेदि दर्भेषु प्रणीताचमसं

---

1) वाचोदितत्वात्प्रतिसंस्कार्यं च २. 2) The words given in crochets are added by a second hand at the margin. 3) २. draws this sûtra over to the next kaṇḍiká, joining it with the there beginning sûtra, whereas Mahád. and Ananta proceed in the just opposite way, closing this kaṇḍiká by the first sûtra of the next.

निदधाति कस्त्वा युनक्तीति (१. ६.) मन्त्रेण · नाहवनीयमतिक्रम्य न चाप्राप्य किं त्वाहवनीयमुत्तरेणार्जवेन समन्तयैवासादयेत् · तत उपरिष्टादपि दर्भैराछादयेत्। तत आहवनीयस्य प्रागग्रैरुदगग्रैश्च दर्भैः परिस्तरणम् प्रथमं पुरस्तादुदगग्रैः ततो दक्षिणतः प्रागग्रैः पश्चादुदगग्रैः उत्तरतः प्रागग्रैः · एवं गार्हपत्यस्य परिस्तरणम् ततो दक्षिणाग्नेरप्येवमेव · आपस्तम्बः उदगग्रैः प्रागग्रैश्च दर्भैरग्नीन्परिस्तृणात्युदगग्राः पश्चात्पुरस्ताच्चेति ॥ ततोऽध्वर्युर्यजमानो वा द्विशः पात्राण्यासादयति विनियोगक्रमेण · आहवनीये गार्हपत्ये वा यत्र हविःश्रपणं करिष्यन्भवति तस्योत्तरतः पश्चाद्वा · उत्तरतश्चेत् उदक्संस्थम् असम्भवे प्राक्संस्थमपि पश्चाच्चेत् प्राक्संस्थम् असम्भवऽउदक्संस्थमपि · द्विश इत्येकेन प्रयत्नेन द्वे-द्वे पात्रे गृहीत्वा निदधातीत्यर्थः · आसादनं च समीपे निधानम्। तथा हि · शूर्पाग्निहोत्रहवणि स्फ्यकपालं शम्याकृष्णाजिनमुलूखलमुसलं दृषदुपलम् · अनो वा पात्री वा · धान्यमिति व्रीहयो वा यवा वा तत्र व्रीह्याग्रयणानन्तरं यवाग्रयणात्प्राग्व्रीहय एव तथा यवाग्रयणानन्तरं प्राग्व्रीह्याग्रयणाद्यवा एव अयं नियमो दर्शपूर्णमासयोरेव न तद्विकारेषु · तथा चाहापस्तम्बः व्रीहिभिरिष्ट्वा व्रीहिभिरेव यजेता यवेभ्यो दर्शपूर्णमासावेवं यवैरा व्रीहिभ्योऽपि वा व्रीहिभिरेवोभयत्रैते ह वै सूपचरतमा भवन्तीति बह्वृचब्राह्मणऽइति · पवित्रच्छेदनानि पवित्रे च · धृष्टिः संयवनोदकम् · स्थाली आज्यं च · वेदो दक्षिणार्थश्च · उदकतृणमग्निः[1] · इध्माबर्हिः · स्रुचश्चेत्यत्र स्रुवो जुहूः उपभृत् ध्रुवा · संमार्गार्हाणि यानि चेत्यत्र द्वे प्राशित्रहरणे शृतावदानम् द्वयोः पुरोडाशयोः साधारणी एका पुरोडाशपात्री · योक्त्रं यूनकुशाश्च · पक्षे परिधयस्त्रयः पीठं कुशास्तीर्णम् · इडापात्री षडवत्तम् · अन्तर्धानकटः पूर्णपात्रम् · पक्षे कर्मापवर्गा समित् ॥ एवं पात्राण्यासाद्य हविष्यसहितमनो गार्हपत्यस्य पश्चात्प्राडीषमवस्थापयेत् · अनः शकटम् तच्च युगयोक्त्रसंयुक्तं वस्त्रापरिवेष्टितं च स्थापनीयम्। ततः कर्मणे वामिति (१. ६.) मन्त्रेणाध्वर्युः शूर्पाग्निहोत्रहवण्योरादानं करोति। तत आरभ्य हविरावपनपर्यन्तं हविष्कृदाह्वानपर्यन्तं वाध्वर्योर्वाग्यमनम्। ततः प्रत्युष्टं रक्ष इति (१. ७.) मन्त्रेण

1) ? उदकतृण° २. and Chamb. 390. उदकातृण° Chamb. 196. दर्भतृण° Chamb. 635.

शूर्पाग्निहोत्रहवण्योर्गार्हपत्ये प्रतपनम् निष्टप्तमिति (१. ७.) मन्त्रेण वा · तत उदकोपस्पर्शनम् । तत उर्वन्तरिक्षमिति (१. ७.) शकटं प्रति गच्छति । शकटाग्रसमीपऽउपविश्य धूरसीति (१. ७.) मन्त्रेण तस्य दक्षिणामुत्तरां वा एकां धुरमभिमृशति । ततस्तत्र स्थित एवोपस्तम्भनस्य पश्चादुत्तरामीषामालभ्य देवानामसीति (१. ८-९.) मन्त्रं जपति । ततः शकटस्य पश्चान्मार्गेण दक्षिणतो गत्वा विष्णुस्त्वा क्रमतामिति (१. ९.) मन्त्रेण दक्षिणचक्रस्योपर्यारोहति · आरुह्योरु वातायेति (१. ९.) हविष्यान्व्रीहियवादीन्प्रेक्षते · ततो हविर्मध्ये यदि किंचित्तृणलोष्टाद्यन्यत्पतितं भवति तदा ततस्तदृक्षीव्रापहतमिति (१. ९.) निरस्यति अन्यस्याभावेऽनेनैव मन्त्रेण हविरालभते · ततोऽपः स्पृशति · ततो यच्छन्तामिति (१. ९.) हविरालभते · ततः सव्यहस्ते शूर्पं निधाय तस्योपर्यग्निहोत्रहवणीमुत्तानां निधाय प्राङासीनो देवस्य त्वेति (१. १०.) मुष्ट्या प्रक्षिपति एवमपरं मुष्टिद्वयमनेनैव मन्त्रेण प्रक्षिप्य चतुर्थं मुष्टिं तूष्णीं प्रक्षिपति · ततो गृहीतं हविः शूर्पमध्ये दक्षिणपार्श्वे प्रक्षेपणीयम् यथा हविरन्तरेण संकरो न भवति · ततोऽग्नीषोमीयपुरोडाशार्थं देवस्य त्वा अग्नीषोमाभ्यां जुष्टमिति (१. १०.) मन्त्रेण त्रिर्गृह्णाति चतुर्थं तूष्णीम् · ततः शूर्पमध्ये पृथगुत्तरतस्तद्धविः प्रक्षिप्य भूताय त्वेति (१. ११.) मन्त्रेण शकटे यत्परिशिष्टं हविस्तदभिमृशति तच्च गृहीतहविर्मध्ये न मिश्रणीयम् · ततोऽनस्युपविष्ट एव स्वरभिविख्येषमिति (१. ११.) प्राचीमीक्षते । ततो दृंहन्तामिति (१. ११.) मन्त्रेण शकटादवरोहति । तत उर्वन्तरिक्षमिति (१. ११.) मन्त्रेण गार्हपत्यसमीपऽउत्तरस्यां गच्छति । ततस्तच्छूर्पं सहविष्कं पृथिव्यास्त्वेति (१. ११.) मन्त्रेण श्रपणस्य पश्चात्सादयति निदधाति · श्रपणशब्देनात्र यस्मिन्हविःश्रपणं क्रियते गार्हपत्यो वा आहवनीयो वा सोऽभिधीयते ॥ अथवा अनसः कार्यं पात्र्या कर्तव्यम् । अस्मिन्पक्षे अनस आसादनाभावः तत्स्थाने पात्री आसादनीया । तदा पात्र्यासादनानन्तरं सहविष्कां पात्रीं गार्हपत्यस्य पश्चात्प्रागग्रामुदगग्रां वा स्थापयित्वा तस्या अधस्तात्स्फ्यं प्रागग्रमुदगग्रं वा प्रेरयित्वोपधेयम् · ततः शूर्पाग्निहोत्रहवण्योरादानादि । अस्मिन्पक्षे उर्वन्तरिक्षमिति पात्रीसमीपे गत्वा धूरसि देवानामसि विष्णुस्त्वा क्रमतामित्येतान् त्रीन्मन्त्रान्पात्रीबिले जपति पात्र्याः पूर्वा-

र्धमभिमृश्य जपति बिलं पात्रीमुखम् । तैत्तिरीयसूत्रे यद्यु वै नानो भवति जघनेन गार्हपत्यं स्फ्यं निदधाति स्फ्यऽउपरि पात्रीं पात्र्यां पुरोडाशीयानावपत्यथ पूर्वार्धं पात्र्या अभिमृशति धूरसीत्यादि । पात्र्या उत्तरतः पश्चाद्वा दक्षिणतो वा यथासम्भवं प्राङ्मुख उपविष्टो हविरीक्षणमपद्रव्यनिरसनमालम्भनं वा कृत्वाप उपस्पृश्य हविरालभ्य ग्रहणं शेषाभिमर्शनं प्राङीक्षणं च कृत्वा दृंहन्तामित्यनेन मन्त्रेणोत्तिष्ठति · तत उत्तरतो गत्वा अग्नेस्य पश्चादासादयति ॥ ततः समप्रमाणौ साग्रौ अनन्तर्गर्भौ अच्छिन्नाग्रौ कुशौ पवित्रे स्थ इति (१.१२.) मन्त्रेण कुशैः क्षुरिकास्थानीयैश्छिनत्ति · अथवा एवंविधांस्त्रीन्कुशाननेनैव मन्त्रेणानूदितेन कुशैश्छिनत्ति । ततोऽग्निहोत्रहवण्यां सशूकायामनिर्मृष्टायां स्वयमेवोदकमासिच्य सवितुर्व इति (१.१२.) मन्त्रेण ताभ्यां पवित्राभ्यामुत्पुनाति उत्क्षिपति । पवित्रयोः हविर्ग्रहण्यां स्थापनम् । ततः सव्यहस्तेऽग्निहोत्रहवणीं निधाय सव्यहस्तस्यामेव संलग्नामेव दक्षिणहस्तेनोदिङ्गयति ऊर्ध्वं चालयति । ततः प्रोक्षिता स्थेति (१.१३.) ताभिरेव स्रुक्स्थाभिस्तासामेव प्रोक्षणं हस्तेनैव कार्यम् · ततो ब्रह्मन्हविः प्रोक्षिष्यामीति ब्रह्माणं पृच्छति · ततो ब्रह्मा प्रोक्ष यज्ञं धेहीत्यन्तमुपांशूक्त्वा ओं प्रोक्षेत्युच्चैः प्रसौति (२.२.१०.) · ततोऽध्वर्युरग्निहोत्रहवण्याः सकाशादुदकं हस्तेनादाय शूर्पस्थे हविषी प्रोक्षति अग्नये त्वा जुष्टमिति (१.१३.) प्रथमम् अग्नीषोमाभ्यां त्वा जुष्टमिति द्वितीयम् । ततः सर्वाणि पात्राण्येकत्र राशीकृत्य दैव्याय कर्मणऽइति (१.१३.) मन्त्रेण सर्वाणि सहैव प्रोक्षति अत्र बहु उदकमादाय तथा प्रोक्षणं कार्यं यथा सर्वेषां प्रोक्षणीबिन्दवः स्पृशन्ति · प्रतिपात्रं तु प्रोक्षणावृत्तिपक्षस्तु युक्ततरः प्रोक्षणस्य पात्रसंस्कारत्वात् प्रतिसंस्कार्यं च संस्कारावृत्तेर्न्याय्यत्वादिति · मन्त्रे तु बहुवचनं पूजार्थम् · पात्राणि न्युब्जान्यासादनीयानि उत्तानानि कृत्वा त्रिः प्रोक्षतीति सर्वेषु सूत्रान्तरेषु तत्र सकृन्मन्त्रः द्विस्तूष्णीम् ॥ ततोऽसंचरे प्रणीताहवनीयान्तराले गार्हपत्याहवनीयान्तराले वा प्रोक्षणीनां निधानं कर्तव्यम् · आपस्तम्बः प्रोक्षणीशेषमग्रेण गार्हपत्यं निधायेति · अयमप्यसंचरो भवति गार्हपत्याहवनीयौ न व्यवेयादित्यनयोरन्तराले संचरणप्रतिषेधात् (१.८.२३.) · पवित्रयोः प्रोक्षणीष्वेव निधानम् ॥ ॥३॥ इति द्वितीयस्य तृतीया कण्डिका ॥

शर्मासीति (१. १४.) कृष्णाजिनादानम् ॥ १ ॥ कृष्णमृगस्य चर्मणो हस्तेन ग्रहणम् · कृष्णस्याजिनमिति तत्पुरुषो न कर्मधारयः कृष्णं च तदजिनं चेति · तदेतत्कृष्णाजिनादानमवघातार्थम् अतश्चावघाताभावे पश्चादौ न भवति ।

अवेत्य पात्रेभ्योऽवधूनोत्यवधूतमिति (१. १४.) ॥ २ ॥ तत्कृष्णाजिनं पात्रेभ्योऽपेत्य अतिनीय परं नीत्वा यत्संलग्नममेध्यमयज्ञियं तत्कम्पयित्वाधः पातयति । अत्र कृष्णाजिनस्यैवापनयनं न कर्तुरिति कर्कः अतिनत्येव पात्राण्यवधूनोतीति (१. १. ४. ४.) श्रुतेः · हरिस्वामिनस्त्वधर्योरेवातिक्रमणं व्याख्यातवन्तः अतिनत्य अतिक्रम्य पात्राण्यतीत्य न हि पात्राणि मेध्यानि सन्ति[1] पुनरमेध्यानि कर्तुं युक्तमित्यभिप्रायेणाध्वर्युः पात्राण्यतिक्रम्य कृष्णाजिनं सकृदवधूनोति · शाखान्तरेषु त्रिरवधूनोतीत्युक्तमस्ति ।

प्रत्यग्ग्रीवमास्तृणात्यदित्यास्त्वगिति (१. १४.) ॥ ३ ॥ चर्मणः प्राग्ग्रीवतायां परिभाषया (१. १०. ४.) प्राप्तायां सत्यां तस्या अयमपवादः · प्रतीच्यां ग्रीवा यस्य तत्प्रत्यग्ग्रीवम् । तैत्तिरीये कृष्णाजिनमवधूनोत्यूर्ध्वग्रीवमुदङ्मावृत्यावधूतमित्ययेतत्पुरस्तात्प्रतीचीनग्रीवमुत्तरलोमोपस्तृणातीति । विहाराडुत्तरदेशे पश्चाडुत्करस्य उत्तरेण गार्हपत्यं वा ।

सव्याशून्ये निदधात्युलूखलमद्रिरसि ग्रावासीति वा (१. १४.) ॥ ४ ॥ सव्यहस्तेनाशून्ये अमुक्ते कृष्णाजिने ।

प्रति त्वेत्युभयोः (१. १४.) ॥ ५ ॥ मन्त्रयोः शेषः कर्तव्य इति शेषः ।

हविरावपत्यग्नेस्तनूरिति (१. १५.) ॥ ६ ॥ कण्डनार्थमुलूखलमध्ये प्रक्षिपति । पितृयज्ञे पितृवीतयऽइत्यूहः[2] ।

वाचं विसृजते ॥ ७ ॥ [3] यजमानश्च ॥ ८ ॥

हविष्कृता वा ॥ ९ ॥ विकल्पे · हविष्कृच्छब्देन सह हविष्कृदाह्वानकाले ।

नानाबीजेष्वन्त्ये सामर्थ्यात् ॥ १० ॥ [4] अन्त्यऽएव हविष्युलूखलं प्राप्ते ।

---

१) Accus. Plur. Neutr. २) दार्षद्वतावभृथेऽप्यां तनूरिति Mahâd. ३) अध्वर्युः
४) नानाव्रीहिषु हविःषु अन्त्ये हविरावपने · वाग्यमनेन (हि) सर्वाणि हवींषि समर्थानि भवन्ति Mahâd.

अस्ति हि चोदकस्य सामर्थ्यमनियमं बाधितुम् · मुसलादानादयो वाग्यमेनाविसृष्टवाचा क्रियमाणा विगुणा[1] एव हविषस्तु विसृष्टवाचा प्रक्षिप्यमाणस्य वैगुण्यम् · तस्माद्यथोभयोरवैगुण्यं स पक्षः स्वीकार्यः ।

बृहद्ग्रावेति (१.१५.) मुसलमादत्ते ॥ ११ ॥

स इदमित्यवदधाति (१.१५.) ॥ १२ ॥ [2] कर्कमते स इदं देवेभ्य इत्यत्र देवाभ्यां देवाय देव्यै इत्येवं देवानामसीतिवत् निर्णयः पितृयज्ञे च स इदं पितृभ्य इत्यूहः ।

हविष्कृदेहीति (१.१५.) त्रिराह्वयति ॥ १३ ॥ अध्वर्युरवघ्नन्हविःकण्डनं कुर्वन्पत्नीमाग्नीध्रं वा आकारयति

अतः पत्न्यवहन्त्यन्यो वा ॥ १४ ॥ [3] अत इति ग्रहणात् पूर्वमध्वर्युरवघाते प्रवृत्तोऽस्तीति गम्यते शाखान्तरश्रुतेश्च । अन्य इति आग्नीध्रः ।

आह्वयत्याहन्त्यन्यो दृषदुपले कुक्कुटोऽसीति (१.१६.) त्रिः शम्यया द्विर्दृषदं सकृदुपलाम् ॥ १६ ॥ हविःकण्डनकर्त्रीं पत्नीं हविःकर्तारमग्नीधं वा अध्वर्यौ आकारयति सति अन्यः आग्नीध्रो विहारस्योत्तरत उपविष्टः दृषदुपले आहन्ति[4] · तीक्ष्णीकरणार्थत्वमाहननस्य । ननु सूत्रे दृषदुपलेऽइति न वाच्यम् द्विर्दृषदं सकृदुपलामित्यनेन सिद्धत्वात् · सत्यम् · उभयत्र सूत्रेणैतज्ज्ञापयति यत्सामान्यस्य शाखान्तरीयेणापि विशेषेणैकवाक्यता[5] भवति · तेन यद्यपि सापि माध्यन्दिनीयायां सामान्योपदेशाद्दृषदुपले समाहन्तीति (१.१.४.१३.) तथापि तदाहननमात्रेणाशास्त्रार्थानुष्ठानसिद्धिः किं तु द्विर्दृषदं सकृदुपलामिति विधिविशेषेण · अत एकवाक्यताप्रसाधनार्थमुभयस्य सूत्रणम् । पश्चादौ निर्व्यापारेऽप्यध्वर्यावग्नीध एवाहननम् ।

वर्षवृद्धमसीति (१.१६.) शूर्पमादत्ते ॥ १६ ॥ अध्वर्युस्तुषेषु विमुक्तेषु शूर्पं हस्तेन गृह्णाति[6] ।

---

१) ? अविगुणा २. २) तं मुसलमुलूखलहविष्ये स्थापयति Mahád. ३) पितृयज्ञे वयोदेव पितृयज्ञस्यापत्नीकत्वात् Mahád. ४) कुट्टयति Mahád. ५) ?°षणैक° २. ६) अग्नीद्वा पत्नी वा Mahád.

प्रति त्वेति (१.१६.) हविरुद्वपति ॥१७॥ उलूखलाद्धविर्निष्काश्य शूर्पे निर्वपति।

परापूतमिति (१.१६.) निष्पुनाति ॥१८॥ तुषान्पृथक्कृत्याधः पातयति।

अपहतमिति (१.१६.) तुषान्निरस्यति ॥१९॥ आग्नेयस्य मध्यमे कपाले तुषानोप्य कृष्णाजिनस्याधस्तान्निरस्यति उत्करदेशे।

वायुर्व इति (१.१६.) विविनक्ति ॥२०॥ सतुषान्निस्तुषांश्च पृथक्करोति अकण्डितान्पृथक्कृत्वाग्रतः कण्डितान्करोति॥ हविरावपनमुसलयोजनकण्डन-हविरुद्वपननिष्पवनविवेकीकरणपुनःकण्डनतुषनिरसनाभिमन्त्रणफलीकरणकणनिधानानि सर्वेषां हविषां ग्रहणाक्रमेण पृथक्पृथक् मन्त्रवन्ति कर्तव्यानि अन्यत्सर्वं तन्त्रेण[1]।

देवो व इति (१.१६.) पात्र्यामोप्याभिमन्त्रयते ॥२१॥ तान्पृथक्कृतांस्तण्डुलानध्वर्युस्तूष्णीं पात्र्यामोप्य तण्डुलान्स्पृष्ट्वा विलोकयित्वा मन्त्रं पठति। नानाबीजेषु पृथगेवाभिमन्त्रणम् कालस्य भिन्नत्वात्[2]।

त्रिः फलीकरोति ॥२२॥ तण्डुलानवहत्यावहत्य सूक्ष्मतुषेभ्यो वियोज्य निष्पूय-निष्पूय च नीरजस्कानुज्ज्वलान्करोति वारत्रयम् तूष्णीम्[3]।

देवेभ्यः शुन्धध्वं देवेभ्यः शुन्धध्वमित्येके ॥२३॥ वीप्सा प्रतिपर्यायं सकृन्मन्त्रप्राप्त्यर्था। कर्कमते देवाभ्यां देवाय देव्यै पितृभ्य इत्यूहः।

फलीकृत्य कणान्निदधाति ॥२४॥ तण्डुलान्फलीकृत्य कणान्सूक्ष्मत्रपान्सुगुप्तान्स्थापयति[4] सप्रयोजनत्वात् वक्ष्यते हि पुरोडाशकपालेन कणानपास्यतीति (३.८.७.) तेनैव च तेषां कणसंज्ञा संव्यवहारार्था।

पेषणोपधाने युगपत् ॥२५॥ तण्डुलानां पेषणं कपालानामुपधानम्[5]।

---

१) स्थूलानामणिष्ठानां विवेचनं पृथक्करणम्. ऊर्ध्वशूर्पेण निष्पवनम् तिर्यक्शूर्पेण विवेचनमिति प्रसिद्धिः। नानाबीजेष्ट्यां हविरावपनमुसलयोजनहविरुद्वपननिष्पवनविवेकीकरणानि भेदेन. तुषनिरसनं तु सहैव Mahád. २) आभिमुख्येन मन्त्रपाठोऽभिमन्त्रणम्. नानाबीजेष्ट्यां तन्त्रेण संनिपातात् Mahád. ३) उलूखले हविष्यकरणं कण्डनमुद्वापो निष्पवनं विवेचनं कणनिष्काशनमिति फलीकरणम् Mahád. ४) अपासनार्थं Mahád. ५) पेषणोपधानयोः कपालानामुपधानं बहिरङ्गत्वादग्रीधः तण्डुलानां पिष्टकरणमन्तरङ्गत्वादध्वर्योः। एवं युगपत्कृतः Mahád.

विरोधादेव कपालोपधानेऽग्नीधः कर्तृत्वम् न वचनात् · ततश्च यत्र विरोधो नास्ति वरुणप्रघासेऽध्वर्योर्मेषकरणे प्रतिप्रस्थातुः करम्भपात्रमेषीकरणे च तत्र अध्वर्योः प्रतिप्रस्थातुश्च यथास्वं स्वयमेव दक्षिणाग्नौ कर्परोपधानम् नाग्नीध इति ॥

तत्र वाचः क्रमवर्तित्वाच्छ्रुतिमन्त्रक्रमानुसारेण पूर्वमुपधानमुपदिशति ।

धृष्टिरसीत्युपवेषमादायापाग्नऽइत्यङ्गारान्प्राचः करोति (१.१७.) ॥२६॥ उपवेषोऽङ्गारापोहनसमर्थं हस्ताकृति काष्ठम् · तदादाय तेन खरस्थानपरभागाद्गार्हपत्याङ्गारान्खरस्य प्राग्भागे करोति पश्चाद्भागस्य कपालोपधानार्थं रिक्तीकरणाय · अतश्चर्विष्ट्यां तदभावः धानाभर्जनोपधाने च उभयोरप्यङ्गारेष्वेवाधिश्रयणप्रसिद्धेः [1]। पितृयज्ञे च दक्षिणार्धादुत्तरार्धे उद्वहनम् दक्षिणार्धे कपालोपधानविधानात् · त्र्यम्बकेषु चोत्तरार्धाद्दक्षिणार्धेऽङ्गारप्रेरणम् उत्तरार्धे कपालोपधानविधानात् ।

आ देवयजमित्यङ्गारमाहृत्य कपालेनावच्छादयति ध्रुवमसीति (१.१८.) ॥२७॥ उपवेषेण द्रुतेभ्योऽङ्गारेभ्यः सकाशादेकमङ्गारं पुरोडाशश्रयणस्थाने आहृत्य आनीय कपालेन अवच्छादयति । अयं पदार्थो भर्जने चरुस्थाल्यां च न भवति [2]।

अमुष्येति द्विषच्छब्देऽभिचरन् ॥२८॥

अन्यत्रापि ॥२९॥ [3] न केवलमत्र द्विषच्छब्दे अमुष्येत्यादेशः [4]। अभिचारबुद्ध्यभावे मन्त्रस्याभिचरणप्रयोजनाभावान्नाभिचारणिकत्वम् अतस्तदुच्चारणे उदकोपस्पर्शनाभावः ।

सव्याङ्गुल्याशून्येऽङ्गारं निदधात्यग्ने ब्रह्मेति (१.१८.) ॥३०॥ [5] मध्यमकपालोपधानानन्तरं सव्याङ्गुल्याशून्ये अविमुक्ते मध्यमकपाले अ° नि° । धानाभर्जनस्यापि प्रथमकपालधर्मा भवन्ति · तेन ध्रुवमसीत्युपधानम् अग्नेरुपरीति विशेषः ।

---

१) चर्विष्ट्यां धानेष्ट्यां चापोहनाभावः · अपोहनस्योपधानधर्मत्वं देशरेचनार्थत्वात् Mahâd. २) प्रथमकपालधर्मोऽयम् न द्वितीयादिकपालानाम् तं मध्यमेन कपालेनाभ्युपदधातीति (१. २. १. ६.) श्रुतेः Mahâd. ३) अमुष्येति द्विषच्छब्देऽभिचरन्ब्रूयात् यथा द्विषतो बधोऽसीत्यादि Mahâd. ४) शत्रुनामादेशः ५) सव्यहस्तस्य प्रदेशिन्याशून्ये क° अ° उपवेषेण नि° । इत्यपि प्रथमकपालधर्मोऽयम् न द्वितीयादिकपालानाम् कुतः अधस्तादङ्गाराभावात् प्रथमकपाले उपरिष्टादङ्गारनिधाने (°न Cod.) मन्त्रपाठात् Mahâd.

सव्याशुन्ये कपालेऽग्ने ब्रह्मेति मन्त्रेणाङ्गारनिधानं प्रतिकपालं भवतीति कर्कः ।

धरुणमिति (१. १८.) पश्चात् ॥३१॥ मध्यमकपालस्य[1] पश्चाद्धरुणमसीति मन्त्रेण द्वितीयं कपालमुपदधाति ।

पुरस्ताद्धर्त्रमिति (१. १८.) ॥३२॥[2]

विश्वाभ्य इति (१. १८.) दक्षिणतः ॥३३॥[3]

समं विभज्य द्वे दक्षिणत एवमुत्तरतश्चित स्थेति (१. १८.) ॥३४॥ अवशिष्टानि चत्वारि समं विभज्य । चित स्थ इति तेषां सर्वेषां प्रत्येकमुपधानमन्त्रः · तेषु च स्मार्तेन प्रादक्षिण्येन उपधानक्रमः[4] · उत्तरतो यत्कपालद्वयं तदध्यर्धप्रमाणम् ।

एवमेकादशाग्नीषोमीयस्य ॥३६॥

अधिकं दक्षिणतः ॥३७॥ चतुर्णामुपधानानन्तरमवशिष्टानां सप्तानां समविभागे यदधिकं विभक्तुं न शक्यते तद्दक्षिणत उपदधाति ॥ एतानि सर्वाणि कपालानि निरन्तराणि संश्लिष्टानि समानि चोपधेयानि यथान्तरा भूमिर्न दृश्यते · अत्र मध्यमपङ्क्तिकपालानि द्व्यङ्गुलानि समचतुरस्राणि एवं च षडङ्गुलदीर्घा मध्यमा पङ्क्तिः · दक्षिणोत्तरपङ्क्ती तु किंचित्ततो न्यूने पुरोडाशस्य कूर्माकारोक्त्या वृत्ताकारत्वप्रसिद्धेर्यावत्कपालं प्रथनविधेश्च तदर्थकपालचितेरपि अर्थाद्वृत्ताकारतया गम्यमानत्वात् । ऐन्द्राग्ने चतुर्थोपधानानन्तरं समविभागेन चत्वारि दक्षिणतश्चत्वार्येवोत्तरतः ॥ अत्र कपालचितिक्षेत्रं मध्यमाश्वशफप्रमाणं षडङ्गुलं वृत्तं कृत्वा[5] ततः प्रागपच्छेदेन समं त्रेधा विभज्य मध्यमभागस्य तिर्यगपच्छेदेन त्रेधा विभागः कार्यः दक्षिणोत्तरभागयोस्तु खण्डचन्द्राकारयोः पुरोडाशकपालसंख्यानुरोधेन तिर्यक् विभागः · तत्र षट्कपाले दक्षिणो भागो द्वेधा उत्तरे त्वेकमेव कपालं खण्डचन्द्राकारमुत्तरभागप्रमाणम् · सप्तकपाले दक्षिणो भागस्त्रेधा उत्तर एकधा ·

---

1) प्रथमस्य Mahád. 2) प्रथमस्य पुरस्तात्तृतीयम् Mahád. 3) प्रथमस्य दक्षिणतश्चतुर्थम् Mahád. 4) प्रादक्षिण्यक्रमस्त्ववचनेन न भवति किंतु वचनेनैव भवति · यथा ६. १. ५. १७. २. १३. · अपि चावृत्तिसामर्थ्यवचनेन प्रादक्षिण्यक्रमो भवति · न ज्ञानेऽत्र याज्ञिका अवचनेन कथं प्रादक्षिण्यक्रममाश्रियन्ते Mahád. 5) एककपालमारभ्य त्रयोदशकपालान्तं षडङ्गुलं चयनक्षेत्रम् तत्कपालकल्पनेन पूरणीयम् Mahád.

अष्टाकपाले दक्षिणो भागस्त्रेधा उत्तरो द्वेधा · नवकपाले दक्षिणश्चतुर्धा उत्तरो द्वेधा · दशकपाले दक्षिणश्चतुर्धा मध्यमोत्तरौ त्रेधा · एकादशकपाले दक्षिणः पञ्चधा इतरौ त्रेधा · द्वादशकपाले दक्षिणः पञ्चधा मध्ये त्रेधा उत्तरश्चतुर्धा · त्रयोदशकपाले दक्षिणः षड्धा उत्तरश्चतुर्धा · मध्यमः सर्वत्र त्रेधैव । एकं कपालं चेत् तत्पाणिसंमितम् · द्विकपाले वृत्तस्य तिर्यगपच्छेदेन द्वेधा विभागः · त्रिकपाले वृत्तस्य तिर्यक्समं त्रेधा विभागः · चतुष्कपाले वृत्तं समं [1] प्राञ्चमपछिद्योत्तरभागस्य त्रेधा विभागः दक्षिणत एकम् · पञ्चकपालेऽपि वृत्तं प्राञ्चं द्वेधापछिद्योत्तरभागस्य त्रेधा विभागः दक्षिणस्य द्वेधा । कपालानि तु घर्षणाद्युपायेन [2] तथा करणीयाणि यथा कपालचितिक्षेत्रं वृत्तं सम्पूर्यते ।

भृगूणामित्यङ्गारैरभ्यूहति (१. १८.) ॥३८॥ तानि कपालानि गार्हपत्याङ्गारैराछादयति । एककपाले तप्यस्व द्विकपाले तप्येथामित्यूहः । एतच्च कपालानां सुतप्तताकरणार्थम् सुतप्तेष्वधिश्रितः पुरोडाशोऽधस्तात्पच्यते [3] · एवं च कपालधर्मग्राहिणोऽपि धानाभर्जनस्याङ्गारैरभ्यूहनं न भवति भर्जनस्याधस्तात्तापनप्रसिद्धत्वात् ॥ ॥ चतुर्थी कण्डिका ॥४॥

अथ पद्धतिः ॥

ततोऽध्वर्युः शर्मासीति (१. १४.) मन्त्रेण कृष्णाजिनं हस्तेन गृह्णाति · तत आसादितपात्रेभ्यः परतो गत्वा कृष्णाजिनमवधूनोत्यवधूतमिति (१. १४.) मन्त्रेण · उदकोपस्पर्शनम् · तत उत्तरेण गार्हपत्यमुत्करदेशे वा प्रत्यग्ग्रीवं कृष्णाजिनमास्तृणाति अदित्यास्त्वगसीति (१. १४.) द्वाभ्यां हस्ताभ्यां विस्तारयति । सव्येन हस्तेनाविमुक्ते कृष्णाजिने दक्षिणेन हस्तेनोलूखलमाहृत्य कृष्णाजिनस्योपरि निदधाति अद्रिरसि वानस्पत्य इत्यनेन मन्त्रेण (१. १४.) ग्रावासि पृथुबुध्न इत्यनेन वा प्रति त्वादित्यास्त्वग्वेत्त्वित्युभयोर्मन्त्रयोः शेषः कार्यः । ततः शूर्पे पृथक्स्थापितं हविर्द्वयं मिश्रीकृत्य सव्येनाविमुक्तोलूखलमध्ये अग्नेस्तनूरिति (१. १५.) मन्त्रेण शूर्पेणैव हविरावपति । ततोऽध्वर्युयजमानयोर्वाग्विसर्गः । ततोऽध्वर्युर्बृहद्रावेति (१. १५.)

---

1) ? सं २. 2) ? धर्ष° २. 3) पुरोडाशाधिश्रयणकाले चितिस्थानङ्गारानपसार्याधिश्रयणम् Mahád.

मुसलं हस्तेन गृह्णाति · स इदं देवेभ्य इत्युलूखलमध्ये (१.१५.) मुसलं प्रवेश-
यति · ततः स्वयमेव कण्डने प्रवृत्तः कण्डनं कुर्वन्नेव हविष्कृदेहीति त्रिर्ह-
विःकण्डनकर्त्रीं पत्नीं हविषः कण्डनकर्तारमग्नीधं वा कण्डनार्थमाह्वयति । अत्र
वाध्वर्युयजमानयोर्वाग्विसर्गः । यस्मिन्कालेऽध्वर्युर्हविष्कृदेहीत्याह्वयति तस्मिन्नेव
काले सहैवाग्नीध्रः कुक्कुटोऽसीति (१.१६.) मन्त्रेण शम्यया द्विर्दृषदं कुट्टयति ·
मन्त्रावृत्तिः · उपलां शम्यया एकवारं कुट्टयति अनेनैव मन्त्रेण । तदनन्तरं पत्नी
वा आग्नीध्रो वा कण्डनं करोति · वितुषीभूतेषु व्रीहिषु अध्वर्युर्वर्षवृद्धमिति (१.१६.)
मन्त्रेण हस्तेन शूर्पं गृह्णाति · ततः प्रति त्वा वर्षवृद्धमिति मन्त्रेण कण्डितं हवि-
रुलूखलमध्याद्बहिर्निष्काश्य तूष्णीं शूर्पे निदधाति · ततः परापूतमिति (१.१६.)
मन्त्रेण शूर्पेण निष्पुनाति तुषान्पृथक्करोति · ततोऽप उपस्पृश्य वायुर्व इति (१.१६.)
मन्त्रेण तण्डुलानकण्डितांश्च विविनक्ति पृथक्पृथक्करोति · ततः कण्डितान्निधा-
याकण्डितान्पुनरुलूखलमध्ये प्रवेश्य कण्डनं कृत्वा पुनर्निष्काश्य शूर्पे कृत्वा तुषा-
न्पृथक्कुर्यात् · ततः सर्वांस्तुषानपहतमिति (१.१६.) मन्त्रेणोत्करदेशे निरस्येत् ·
अत्र शाखान्तरेषु पुरोडाशकपालेनाधः कृष्णाजिनमिति कणवन्निरसनमुक्तमस्ति ।
तुषनिरसनानन्तरमुदकस्पर्शनम् · ततः शूर्पस्थांस्तण्डुलान्पात्र्यां प्रक्षिप्य देवो वः स-
वितेत्यभिमन्त्रयते तण्डुलाननामिकाग्रेण स्पृशन्विलोकयन्वा मन्त्रं पठतीत्यर्थः ·
तथा चोक्तं कात्यायनेन (कर्म° ३.१.१२.) स्पृशन्ननामिकाग्रेण क्वचिदालोकयन्नपि
अनुमन्त्रणीयं सर्वत्र सदैवमनुमन्त्रयेदिति । ततस्त्रिः फलीकरोति त्रिःकण्डनेन
सूक्ष्मकणिकाभ्यो वियोज्योज्ज्वलान्करोतीत्यर्थः · तच्चैवम् पूर्वं हविरुलूखलमध्ये
न्युप्य कण्डनं कृत्वा निष्काश्य शूर्पेण निष्पूय कणान्निदधाति · एवमेव वारद्वयं
कर्तव्यम् प्रतिफलीकरणं च कणनिधानं कर्तव्यम् ॥ ॥ ततः पेषणोपधाने
सह भवतः · तत्र विरोधादध्वर्युः पेषणं करोति अग्नीच्च कपालोपधानम् · तत्र
सूत्रक्रमेण प्रथमं कपालोपधानमुच्यते ॥ तत्राग्नीत्प्रथमं कपालानि प्रक्षालयति ।
तैत्तिरीयसूत्रे अथैतानि कपालानि प्रक्षालितानि जघनेन गार्हपत्यमुपसादय-
त्यष्टौ दक्षिणत एकादशोत्तरतो जघनेन गार्हपत्यमुपविश्य धृष्टिमादत्ते धृष्टिर-
सीति · अतो गार्हपत्यस्य पश्चादुपविश्य कपालोपधानं कार्यम् वचनात् · तत्र

धृष्टिरसीत्यनेनोपवेषं (१.१७) हस्तेन गृह्णाति · ततोऽपाग्नेऽअग्निमिति (१.१७) मन्त्रेणोपवेषेण श्रपणस्याङ्गारात्स्वस्थानात्प्राच्यां प्रेरयति खरमध्यऽएव यथाङ्गारस्थानेऽतितप्तभूमौ कपालान्युपधीयन्ते · तत आ देवयजनमित्युपवेषेणैव (१.१७) प्राक्प्रेरिताङ्गारमध्यादेकमङ्गारं गार्हपत्यखरस्य पश्चाद्भागे दक्षिणपुरोडाशस्थानस्य मध्ये आनयति। ततो ध्रुवमसीत्यनेन (१.१७) मन्त्रेण तस्यानीतस्याङ्गारस्योपर्युत्तानं मध्यमं कपालमुपदधाति · तत्राभिचारं कुर्वन् भ्रातृव्यस्य वधायेत्यत्र भ्रातृव्यस्येति पदस्य स्थाने अमुकस्य वधायेति शत्रोर्नाम गृह्णीयात् तदा चोदकस्पर्शनम् अभिचारबुद्ध्यभावे उदकोपस्पर्शनाभावः मन्त्रस्यानाभिचरणिकत्वात्। ततः सव्यहस्तस्याङ्गुल्या अशून्ये स्पृष्टे मध्यमकपाले एकमङ्गारं निदधाति अग्ने ब्रह्मेति (१.१८) । ततो धरुणमसीति (१.१८) मन्त्रेण मध्यमकपालस्य पश्चाद्द्वितीयं कपालमुपदधाति · मध्यमकपालस्य पुरस्तात्तृतीयं कपालमुपदधाति धर्त्रमसीति (१.१८) मन्त्रेण · ततो विश्वाभ्यस्त्वाशाभ्य इति (१.१८) मन्त्रेण मध्यमकपालस्य दक्षिणतश्चतुर्थं कपालमुपदधाति · ततश्चित स्थेति (१.१८) चतुर्थात्पूर्वं पञ्चमं कपालमुपदधाति चतुर्थादपरं षष्ठम् उत्तरतो द्वे प्राक्संस्थे · पञ्चमप्रभृतीनां सर्वेषां चित स्थेत्युपधानमन्त्रः तूष्णीं वा पञ्चमादीनामुपधानम् न चित स्थेति। एवमेकादश कपालान्यग्नीषोमीयस्योपदधाति तैरेव मन्त्रैः · अत्रैवम् पूर्वं मध्यममुपदधाति ततः पश्चाद्द्वितीयम् ततः पुरस्तात्तृतीयम् मध्यमाद्दक्षिणं चतुर्थम् चतुर्थात्पूर्वमेकस्य कपालस्यान्तरालं परिशिष्य पञ्चमम् चतुर्थपञ्चमयोरन्तराले षष्ठम् चतुर्थस्य पश्चात्सप्तमम् तस्य पश्चादष्टमम् सर्वेभ्य उत्तरतो नवमदशमैकादशानि प्राक्संस्थानि। ततो भृगूणामित्यनेन (१.१८) ज्वलद्भिरङ्गारैः सर्वाणि कपालान्याच्छादयति । प्रतिचिति मन्त्रभेदः ॥ ॥४॥

इति द्वितीयस्य चतुर्थी कण्डिका ॥ ॥

उपसर्जनीरधिश्रयति ॥१॥ अग्नीद्गार्हपत्ये पिष्टसंयवनार्था अप अधिश्रयति · ताभिर्हि संयवनं यदा क्रियते तदा पिष्टानां मार्दवं भवति · एवं च पुरोडाशपाकार्था एवैताः। यदा आहवनीये हविःश्रपणं क्रियते तदोपसर्जन्य-

धिश्रयणं कपालोपधानं चाहवनीयऽएव कर्तव्यम्[1] · (यदा तु गार्हपत्ये तस्मिन्नेव) · पितृयज्ञे दक्षिणाग्नौ । उपधानवत्पेषणेन सहोपसर्जन्यधिश्रयणस्यापि यौगपद्यप्राप्त्यर्थमेतत्सूत्रम् ततश्चोपसर्जन्यधिश्रयणेऽपि विरोधादेवाग्नीत्कर्तृत्वम् · तेन विरोधाभावे चर्विष्ठ्यामुपसर्जन्यधिश्रयणमध्वर्युणैव कर्तव्यम्[2] ॥ अथ पेषणमाह ·

कृष्णाजिनमादत्ते पूर्ववत्प्रति कृष्णाजिनम् ॥२॥ कृष्णाजिनं प्रति च पूर्ववद्विधिर्भवति · पूर्ववदित्यादानमवधूननमास्तरणं सव्याशून्यकरणं चेति सव्याशून्यकरणं शाखान्तरात् ।

तस्मिन्दृषदं धिषणासीति (१.१९.) ॥३॥[3]

पश्चाच्छम्यामुपोहत्युदीचीं दिव इति (१.१९.) ॥४॥ दृषदः पश्चाद्भागे उदगग्रां श° उ° दृषदोऽधस्तात्प्रवेशयति · सा च तदा दृषदः प्राक्प्रवणतां करोति निश्चलतां च ।

दृषद्युपलां धिषणासीति (१.१९.) ॥५॥ न शम्याया इति नियमार्थं प्राप्तोपलाग्रहणस्यादोषः ।

धान्यमसीति (१.२०.) तण्डुलानोप्य पिनष्टि प्राणाय त्वेति (१.२०.) प्रतिमन्त्रम् ॥६॥ पितृयज्ञे पितॄन्धिनुहि[4] । मनुः · प्राणाय त्वेति प्राचीमुपलां प्रोहत्यपानाय त्वेति प्रतीचीं प्रकर्षति व्यानाय त्वेति मध्यदेशे व्यवगृह्णाति दीर्घामिति संततं प्राचीं दीर्घं पिनष्टीति ।

दीर्घामिति (१.२०.) कृष्णाजिने प्रोहति ॥७॥[5] सर्वेषु तण्डुलेषु पिष्टीभूतेषु तानि पिष्टानि उपलया प्रेरयित्वा प्राच्यां कृष्णाजिनस्योपरि पातयति प्रस्कन्दयतीति शाखान्तरात् । आपस्तम्बे दासी पिनष्टि पत्नी वा अपि वा पत्न्यवहन्ति शूद्रा पिनष्टीति ।

---

1) यत्र पुरोडाशश्रपणं तत्रैवाधिश्रयणम् पाकार्थत्वात् चर्विष्ठ्यामपि च · न च मन्थकरम्भार्थमुपसर्जन्यधिश्रयणम् यथा पिष्टानां पाक उपजन्यते न तथा सक्तूनाम् Mahád.
2) उपधानोपसर्जन्यधिश्रयणपेषणानां यौगपद्यात्स्वयं पिनष्टि · अन्ये द्वयं कुर्युरिति रामवाजपेयी बृहस्पतिसवे marg. in ५. 3) तस्मिन्कृष्णाजिने दृषदं निदधाति Mahád. 4) आख्यानामयने धान्यमसीत्यत्र तस्समसीत्यूहः Mahád. See २४. ५. २०. Roer Taitt. p. 126.
5) नानावीजेष्वेकैकस्य हविषः प्रोहणम् Mahád.

चक्षुषे त्वेतीक्षते[१] (१.२०.) ॥ ८ ॥ कृष्णाजिने पतितानि पिष्टानि चक्षुषा पश्यति · ईक्षऽइति[२] चाध्याहारः साकाङ्क्षत्वात् । यागसाधनभूतद्रव्यसंस्कारोऽयम् · ततश्च पेषणाभावे चर्वर्थानां तण्डुलानामीक्षणं भवति वाजप्रसवीयजुहोतौ चयने वाजपेये च सर्वौषधीनामिति[३] ।

पिष्यमाणेषु निर्वपत्यन्यो मह्हीनामित्याज्यम् (१.२०.) ॥ ९ ॥[४] आज्यमाज्यस्थाल्यां निर्वपति पात्रान्तरात्प्रक्षिपति · आज्यस्थालीलक्षणमुक्तं छन्दोगपरिशिष्टे (कर्मप्रदीप° २.५.१.) आज्यस्थाली च कर्तव्या तैजसद्रव्यसम्भवा मह्हीमयी वा कर्तव्या सर्वास्वाज्याहुतीषु च । आज्यनिर्वापं कृत्वा यजमानो वेदं करोति कुशमुष्टिं सव्यावृत्तं वत्सज्ञानुतुल्यं मूतवत्क्रियमाणं वा[५] · यत्र धान्यं निधीयते स मूत इति ।

पात्र्याᳬ सपवित्रायां पिष्टान्यावपति देवस्य त्वेति (१.२१.) ॥ १० ॥ कृष्णाजिनमुत्पाव्य[६] तेनैव पात्र्यां प्रक्षिपतीति हरिस्वामिनः · पात्र्यामित्याकारविशेषवति मह्हति पात्रे । आवपनं च संयवनार्थम् · अतश्चरुतण्डुलेषु न भवति · सपवित्रता तु चरावपि वर्तते अदृष्टार्थत्वात् ।

श्रपणस्य पश्चादुपविशत्यन्तर्वेदि वा ॥ ११ ॥[७] सपिष्टां पात्रीमादायेत उत्थाय गार्हपत्यस्य पश्चादुपविशति · अथवा अन्तर्वेदि वेद्याः करिष्यमाणायाः प्रदेशो लक्ष्यते तस्य देशस्याभ्यन्तरे उपविशति तामिव तत्रासादयतीत्यर्थः सौकर्यादेवोपवेशनम् ।

उपसर्जनीरानयत्यन्यः ॥ १२ ॥ आग्नीध्रः उपसर्जनीरुदकस्यानीय उपविश्य पात्रीस्थपिष्टानामुपरि निनयति · उपशमार्थं संसृज्यते संमिश्र्यते हविराभिरित्युपसर्जन्यः आपः मन्त्रलिङ्गात् समाप ओषधीभिरिति · शाखान्तरात्तु तताभिः सह ।

पवित्राभ्यां प्रतिगृह्णाति समाप इति (१.२१.) ॥ १३ ॥[८] अध्वर्युः ।

---

१) ?त्वेति १. त्वेतीक्षते Mahâd. Mahîdh. Ananta. २) ईक्षत इति २. ३) ईक्षणं चरावपि प्रवर्तते द्रव्यसंस्कारत्वात् · तन्त्रेणेक्षणं नानाबीजेषु Mahâd. ४) अन्यशब्देन यजमानोऽभिधातुं शक्यते · कुतः · निरुप्याज्यं वेदोऽसीति यजमानो वेदं करोतीत्येककर्तृत्वात् (१. ३. २२.) Mahâd. ५) See १. ३. २३. ६) ?°त्पाद्य २. ७) अन्तर्वेदि माध्यन्दिनानाम् अथान्तर्वेद्युपविशतीति (१. २. २. ३.) श्रुतेः · श्रपणस्य पश्चात्काण्वानाम् जघनेन गार्हपत्यमिति श्रुतेः Mahâd. ८) पयसि दधनि घृते च मन्त्रो विपरिणम्यते · यथा सं पयः (दधि) (घृतं)° सᳬ रेवत्° सं मधुमत्° पृच्यताम् Mahâd.

संयौति जनयत्यै वेति (१. २२.) ॥ १४ ॥ अध्वर्युः पिष्टान्यद्भिः सम्यक् मिश्रयति । चरावप्युपसर्जनीनिनयनं भवत्येव तत्राप्युदकार्थस्य विद्यमानत्वात् · संयवनं तु न भवति कार्यलोपात् ।

समं विभज्यासंहरिष्यन्नालभतऽइदमग्नेरिदमग्नीषोमयोरिति (१. २२.) ॥ १५ ॥ [1] संयवनानन्तरं समं विभज्य द्वौ पिण्डौ कृत्वा असं॰ पुनर्मिश्रणमकरिष्यन् क्रमेणैतौ पिण्डावालभते उदक्संस्थौ पात्र्यां निहितौ अवरोत्तमुत्तरं हविषीत्युक्तेः (१. १०. ५.) दक्षिणमाग्नेयम् उत्तरमग्नीषोमीयम् ।

यथादेवतमन्यत् ॥ १६ ॥ इदमग्नेरिदमिन्द्राग्न्योरित्येवमादिना अन्यत् ऐन्द्राग्नादिकं हविरभिमृशति ।

इषे त्वेत्याज्यमधिश्रयत्यन्यः (१. २२.) ॥ १७ ॥ [2] अधिश्रयामीत्यध्याहारः सांकाङ्क्षत्वात् ।

अपत्नीकस्याहवनीये तच्छ्रापिणः ॥ १८ ॥ अपत्नीकस्य रजोदोषप्रसवप्रवासादिना असंनिहितपत्नीकस्य तच्छ्रापिणः आहवनीयश्रापिणः आहवनीये हविःश्रपणं कुर्वतो यजमानस्य आहवनीये आज्यमधिश्रयति · आहवनीयश्रापिणोऽपि संनिहितायां पत्न्यां गार्हपत्यऽएव आज्यमधिश्रयति । शाखान्तरे चैवं श्रूयते यस्य व्रत्येऽहनि पत्न्यनालंभुक्ती [3] स्यात्तामपरुध्य यजेतेति । केचित् अपत्नीको मृतपत्नीक इत्याहुः तस्याप्येकाकिन एवाधानं श्रूयते आश्वलायनब्राह्मणे · पत्न्यां मृतायामग्निभिर्दग्धायां पुनर्विवाहासम्भवे आत्मार्थमग्न्याधानमाहापस्तम्बो दर्शपौर्णमासाग्रयणार्थम् शेषाणि कर्माणि न भवन्तीति · तथा त्रिकाण्डे मण्डनः तस्मान्नैर्यकदेशेन दग्धव्या पर्वमारिणी पत्नी ज्येष्ठतरा वापि यज्ञपार्श्वे निरूपितम् · कात्यायनः (कर्मप्रदीप॰ ३. १. १.) मृतायामपि भार्यायां वैदिकाग्नीन्न [4] हि त्यजेत् उपाधिनापि तत्कर्म यावज्जीवं समापयेदिति ।

घर्मोऽसीति (१. २२.) पुरोडाशं युगपत् ॥ १९ ॥ अध्वर्युः पुरोडाशं कपाले-

---

[1] चरूणां फलीकरणान्ते पेषणस्येक्षणान्तेऽआलम्भः Mahád. [2] गार्हपत्ये । आज्यनिर्वापादन्यत्र अन्यशब्देनाग्नेरभिधीयते Mahád. [3] ? रजस्वला marg. [4] ॰कार्ग्नीं न Káty.

ऽधिश्रयति आज्येन सहैव आग्नीध्राधिश्रीयमाणेन[1] · पुरोडाशाधिश्रयणं वेदेन कपालेभ्योऽङ्गारान्पराकृत्य कर्तव्यम् ।

उरुप्रथा इति (१.२२.) प्रथयति यावत्कपालमनतिपृथुम् ॥२०॥ अधिश्रितं पुरोडाशपिण्डं यावन्ति यत्परिमाणपृथूनि कपालानि तावन्ति पृथुं करोति नातिविपुलं लौकिकापूपसदृशमिति[2]। एकस्यैव पुरोडाशस्याज्यस्य च सहाधिश्रयणम् द्वितीयादीनां तु क्रमेणैव सर्वेषु सूत्रेषु पुरोडाशयोः क्रमेणाधिश्रयणविधानात् । षडङ्गुलवृत्ता कपालचितिर्यथा सम्पद्यते तथा कपालपरिमाणमाश्रयणीयम् । अनेकयजमानके यज्ञपती प्रथेताम् यज्ञपतयः प्रथन्तामित्यूहः । चरौ कार्याभावात्प्रथनाभावः । अत्राधिश्रयणं प्रथनमद्भिरभिमर्शनं चेति त्रयमेकैकस्य कृत्वापरस्य कर्तव्यम् ।

अग्निष्टऽइत्यद्भिरभिमृशति (१.२२.) सकृत्त्रिर्वा ॥२१॥ तं पृथुं कृतं पुरोडाशं सोदकेन हस्तेन सर्वतः स्पृशति · प्रथने क्रियमाणे यत्र-यत्र विदीर्णं भवति तदद्भिः संदधाति संयोजयति · सकृन्मन्त्रेण द्विस्तूष्णीम्[3]। पिष्टलेपेनाविक्षारयंस्त्रिः परिमार्ष्टीति मानवे · अद्भिः श्लक्ष्णीकरोत्यनतिक्षारयन्नित्यापस्तम्बः । एतच्चरौ न स्यात् ।

पर्यग्निकरोत्यन्तरितऽ रक्षोऽन्तरिता अरातय इति[4] सहाज्यम् ॥२२॥ पुरोडाशमुल्मुकेन पर्यग्निकरोति · सांनाय्ये तदभावः । पिष्टलेपापनयनं पात्र्यङ्गुलिप्रक्षालनं च पर्यग्निकरणात्प्रागेव कर्तव्यम् सामर्थ्यात् अन्यथाग्निसंयोगात्कालविलम्बाच्च शोषणे सति प्रतिपत्तिकाले क्षालनमतिदुःकरं स्यादिति · प्रतिपत्तिश्च चोदिता पात्र्यङ्गुलिप्रक्षालनमाप्त्येभ्यो निनयति (२.५.२६.) पिष्टलेपाञ्जुहोतीति (३.७.१२.) · उत्पत्तिश्च न चोदिता अतः सामर्थ्यादुत्पत्तिरवसीयते ।

देवस्त्वेति (१.२२.) श्रपणम् ॥२३॥ पुरोडाशस्य । मनुः देवस्त्वेत्युल्मु-

---

1) आज्यमाग्नेयं च पुरोडाशं युगपदधिश्रयतः ततोऽग्नीषोमीयमध्वर्युः Mahád. 2) कपालादतिविस्तारं न कुर्यात् · प्रथनेनापूपो भवति कुतः यथोदनोयन्ति यथापूपीयन्तीति श्रुतेः Mahád. 3) पक्षे सकृन्मन्त्रवचनम् · अत्रैव पिष्टलेपापनयनं पात्र्यङ्गुलिप्रक्षालनं च सामर्थ्यात् (°र्थ्यादिति कर्कः sec. h.) Mahád. 4) See Taitt. S. १. १. ८. १. (Roer p. 135.).

केनाभितापयति दर्भैस्त्वचं ग्राहयतीति । एतच्च श्रपणं सामर्थ्याच्चरोरधस्तादुल्मुकप्रेरणेन कर्तव्यम्[1] धानानां च पुरोडाशस्य तूपरीति ।

मा भेरित्यालभते (१. २३.) ॥ २४ ॥ तौ पुरोडाशौ प्रत्येकमालभते शृताशृतज्ञानार्थम् । चर्वादावपि धानासु[2] च मा भैष्टम् मा संविग्धमित्यूहः अधिश्रयणमन्त्रे च (१. २२.) घर्मा स्थ विश्वायुष इति ।

अतमेरुरिति (१. २३.) शृतावभिवासयति भस्मना वेदेनोपवेषेण वा ॥ २५ ॥[3] अशृतयोः पुनः श्रपणप्रदानार्थं शृतग्रहणम् शृताविति । साङ्गारेण भस्मनेति काठके ।

पात्र्यङ्गुलिप्रक्षालनमाप्त्येभ्यो निनयत्यभितप्य प्रत्यगसंस्यन्दमानं त्रिताय त्वेति (१. २३.) प्रतिमन्त्रम् ॥ २६ ॥ पिष्टलिप्तपात्रीप्रक्षालनं पिष्टलिप्ताङ्गुलिप्रक्षालनं चाभितप्य पात्रीस्थमेव ज्वलतोल्मुकेन तापयित्वा प्रत्यक्संस्थमसंस्यन्दमानं[4] परस्परं संगतिमप्राप्नुवदाप्त्येभ्यो देवताभूतेभ्यो निनयति । स्विष्टकृद्वदुभयरूपमेतत्कर्म प्रतिपत्तिरूपमपूर्वोत्पादकं च · तेन द्रव्यविनाशेऽपि स्विष्टकृद्वच्च द्रव्यान्तरेणापि निनयनं कर्तव्यम् अपरे तु द्रव्यप्रधानत्वात्तद्विनाशे नोत्पत्तिमिच्छन्ति ।

अन्वाहार्यं दक्षिणाग्नावधिश्रयति ॥ २७ ॥ हीनं यज्ञस्यान्वाहरतीत्यन्वाहार्यः । अध्वर्युरन्वाहार्यसंज्ञकं दक्षिणार्थं तण्डुलरूपमोदनं द° अ° · चतुर्णामृत्विजां तृप्तिर्यावता सम्भाव्यते तत्परिमाणं ततोऽधिकं वान्वाहार्यमोदनं कुर्यात् ।

अत्र वा व्रतोपायनम् ॥ २८ ॥ शाखान्तरात् ॥ ॥ पञ्चमी कण्डिका ॥ ५ ॥

अथ पद्धतिः ॥

ततस्तद्देवोपसर्जनीरग्नीदेव गार्हपत्येऽधिश्रयति · पिष्टसंयवनार्था आप उपसर्जनीशब्देनोच्यन्ते ॥ अथ पेषणमुच्यते ॥ तत्राध्वर्युः शर्मासीति (१. १९.) कृष्णाजिनमादाय अवधूतमिति (१. १९.) पूर्ववदवधूनोति · ततोऽप उपस्पृश्य प्रत्यग्रीवमदित्या इत्यास्तीर्य (१. १९.) सव्यहस्तेनाविमुक्ते कृष्णाजिने दक्षिणेन हस्तेन

---

1) सामर्थ्याच्चरुधानानामधस्तात्तापनम् Mahâd. 2) धानानां दर्शनात्पाकसंवित्तेः संमर्शनाभावः Mahâd. 3) आलम्भनेन मृतौ ज्ञातौ भस्मना आच्छादयति · सत्रे यजमानानामित्यूहः Mahâd. 4) प्रत्यक्संस्थं गार्हपत्यस्योत्तरतः Mahâd.

प्रागग्रां दृषदं कृष्णाजिनस्योपरि निदधाति धिषणासीति (१. १९.) · ततो दिव स्कम्भनीरिति (१. १९.) दृषदः पश्चाद्भागे अधस्तादुदगग्रां शम्यां प्रेरयति यथा दृषदः प्राचीनप्रवणता जायते · ततो धिषणासि पार्वतेयीत्युपलां (१. १९.) दृषद उपर्युदगग्रामुपदधाति · ततो धान्यमसीति (१. २०.) दृषदि तण्डुलानोप्य प्राणाय त्वेति (१. २०.) प्रतिमन्त्रं पिनष्टि ॥ पिष्यमाणेषु तण्डुलेषु कपालेषु च भृगूणामिति (१. १८.) ताप्यमानेषु यजमानो महीनामिति (१. २०.) पात्रान्तरादाज्यमाज्यस्थाल्यां प्रक्षिपति । ततो वेदोऽसीति (२. २१.)[1] मन्त्रेण वेदं करोति · तत्र पशुकामो यजमानः कुशमुष्टिं प्रदक्षिणावृत्तं वत्सजानुसदृशं प्रादेशमात्रं वेदं करोति ब्रह्मवर्चसकामस्त्रिवृतं त्रिगुणम् अन्नाद्यकामो मूताकारम् · काठके[2] वेदं करोति दर्भमुष्टिं प्रसव्यमावेष्ट्योपभुज्याग्राणा७ शुल्वं कृत्वा त्रिः परिहृत्य गुणेषु शुल्वान्तमवकृष्यायम्य शुल्वात्प्रादेशे छित्त्वाग्राण्यिध्मे निधायोत्करे मूलानीति · वत्सजानुर्वत्सजानुतुल्यः मूतकार्यो मूतवत्क्रियते मूतस्तृणवर्त्यादिनिर्मितं धान्यावपनस्थानम् कामाभावेऽप्येतऽएव वेदस्याकारा भवन्ति निष्कामस्याकारान्तरानुपदेशादिति धूर्तस्वामिनः[3] । ततोऽध्वर्युर्दीर्घामनु प्रसितिमिति (१. २०.) दृषद उपरि वर्तमानानि पिष्टान्युपलयैव कृष्णाजिने प्रोहति प्रेरणयाधः पातयति । ततश्चक्षुषे त्वेति (१. २०.) कृष्णाजिने पतितानि पिष्टानि विलोकयति । ततः पवित्रे पात्र्यां कृत्वा कृष्णाजिनात्पिष्टान्यादाय सपवित्रायां पात्र्यामावपति · कृष्णाजिनमुत्पाद्य[4] तेनैवावपेदिति हरिस्वामिनः · देवस्य त्वेति (१. २१.) संवपामीत्यन्तेन मन्त्रेण संवापः । तत उत्थाय गार्हपत्यस्य पश्चादुपविशति वेदिमध्ये वा । तत आग्नीध्रः स्फ्यं सव्ये गृहीत्वोपसर्जनीर्हस्ताध्वर्योर्दक्षिणेनानीय[5] पिष्टानामुपरि धृतस्य सपवित्रस्याध्वर्योर्हस्तस्योपरि निनयति · ततोऽध्वर्युरग्नीधा निनीयमाना उपसर्जनीर्दक्षिणहस्तधृताभ्यां पवित्राभ्यां प्रतिगृह्णाति समाप ओषधीभिरिति (१. २१.) · अग्नीधा च तया निनयनं कार्यम् यथाध्वर्योर्मन्त्रान्ते ग्रहणं सम्पद्यते । जनयत्यै त्वेति (१. २२.)

---

१) Káṇva, see Váj. S. pag. ३५. २) See the vyákhyá at १. ३. २३., where this same passage is quoted from Laugáxi. ३) This quotation is not accurate: the very words of Dhúrtasvámin see at १. ३. २३. pag. ५५. and ५६. ४) ? °त्पाद्य १. ५) ? °र्युर्दक्षि° १.

मन्त्रेणोदकं पिष्टानि च संयौति मिश्रयति · समं विभज्य द्वौ पिण्डौ कृत्वा पात्र्यामुदक्संस्थौ निधाय क्रमेणालभते[1] इदमग्नेरिति (१. २२.) प्रथमम् इदमग्नीषोमयोरिति (१. २२.) द्वितीयम् । ततोऽग्नीद्विदं सव्यहस्ते गृहीत्वा इषे त्वेति (१. २२.) मन्त्रेण दक्षिणात आज्यमधिश्रयति अग्नेरुपर्याज्यस्थालीं निदधातीत्यर्थः । अध्वर्युः सहैवाष्टासु कपालेषु प्रथमं पुरोडाशमधिश्रयति घर्मोऽसीति (१. २२.) स्फ्योपग्रहेण तत एकादशसु कपालेषु द्वितीयं पुरोडाशमधिश्रयति घर्मोऽसीति । तत उरुप्रथा इति (१. २२.) मन्त्रेण यावत्कपालं पुरोडाशं प्रथयति · अतुङ्गमनपूपाकृतिं कूर्मस्येव प्रतिकृतिमित्यापस्तम्बः · अतिपृथुं न करोति · एवमेव द्वितीयमपि पुरोडाशं प्रथयति । ततोऽग्निष्टे त्वचमिति (१. २२.) मन्त्रेण पुरोडाशमद्भिरभिमृशति सकृद्वा त्रिर्वा · त्रिःपक्षेऽपि मन्त्रः सकृदेव · एवं द्वितीयमपि अद्भिरभिमृशति श्लक्ष्णयति[2] प्रथने क्रियमाणे यत्र क्व चन विदीर्णं भवति तत्संदधातीत्यर्थः । ततः पात्र्या अङ्गुलीनां च प्रक्षालनम् । ततो गार्हपत्यादङ्गारमादायान्तरितं रक्ष इति मन्त्रेण पर्यग्निकरणं करोति आज्यस्थालीपुरोडाशान्परितः प्रदक्षिणमङ्गारं परिहरतीत्यर्थः · ततोऽङ्गारं गार्हपत्ये प्रक्षिप्य हस्तस्याप्रादक्षिण्येनानयनम् · तत उदकस्पर्शः । ततो देवस्त्वेति (१. २२.) मन्त्रेण ज्वलद्भिर्दर्भतृणैः प्रथमं पुरोडाशं श्रपयति · एवमेव द्वितीयम् · दर्भतृणैरभिज्वालयतीत्यापस्तम्बः । ततः शृताशृतज्ञानाय मा भेर्मा संविक्था इति (१. २३.) मन्त्रेण क्रमेण द्वौ पुरोडाशावालभते · अशृतौ चेत् पुनः श्रपणप्रक्षेपः · शृतौ चेत् अतमेरुरिति (१. २३.) वेदेनोपवेषेण वा तत्पतरेणाङ्गारमिश्रेण भस्मनाच्छादयति । ततः पात्र्यङ्गुलिप्रक्षालनजलं पात्रीस्थमेव गार्हपत्यादीतैस्तृणैर्ज्वलद्भिस्तापयित्वा विहारस्योत्तरतः स्फ्येन तिस्रो लेखाः प्राक्संस्थाः कृत्वा तासु लेखासु प्रत्यक्संस्थं परस्परं संसर्गमप्राप्नुवन्त्रिताय त्वेति (१. २३.) प्रतिमन्त्रं निनयति · इदं त्रितायात्याय इदं द्वितायात्याय इदमेकतायात्यायेति त्रयस्त्यागाः · तथा च स्मृतिः आदौ द्रव्यपरित्यागः पश्चाद्धोमो विधीयते प्रयोग इदमिन्द्राय न ममेति यथार्थतः अवत्तं तु त्यजेदन्नं मनसा वाचयापि च ततश्च प्रक्षिपेदग्नाविति धर्मः सनातनः अत्यक्त्वा जुहुयाद्यस्तु

1) यत्क्रमेणा° १. 2) श्लक्ष्णायेति १.

मोहेनान्वितमानसः देवा हव्यं न गृह्णन्ति कव्यं च पितरस्तथा यत्किं च जुहुयादग्नौ तत्सर्वं त्यागपूर्वकम् अन्यथा जुहुयाद्यस्तु नरकं स नु गच्छति इति · सर्वत्र त्यागादौ ओंकारप्रयोगः कार्यः यागहोमादिष्विति वचनात् · शाख्यायनः दानयज्ञतपःस्वाध्यायजपध्यानसंध्योपासनप्राणायामहोमदेवपित्र्यमन्त्रोच्चारणब्रह्मारम्भादीनि प्रणवमुच्चार्य प्रवर्तयेदिति · दाल्भ्यपरिशिष्टे च ब्रह्मयज्ञो जपो होमो देवऽर्षिपितृकर्म च अनोंकृत्य कृतं सर्वं न भवेत्सिद्धिकारकमिति । ततोऽन्वाहार्यं दक्षिणार्थमोदनं[1] चतुर्णामृत्विजां तृप्तिपर्यन्तभोजनसमर्थं दक्षिणाग्नावधिश्रयति श्रपणार्थम् । अत्रावसरे वा व्रतग्रहणम् ॥ ॥५॥

इति द्वितीयस्य पञ्चमी कण्डिका ॥ ॥

अपरेणाहवनीयं वेदिं खनति ॥१॥ [2]

त्र्यङ्गुलखाताम् ॥२॥ त्र्यङ्गुलं खातमस्याः ।

व्याममात्रीं पश्चात् ॥३॥ अपरस्यां दिशि तिर्यक्प्रमाणेन चतुररत्निमात्राम् । [3]

त्र्यरत्निं प्राचीम् ॥४॥ त्र्य॰ प्रा॰ पूर्वापरायतां दीर्घाम्[4] । पुरस्तात् (पूर्वपार्श्वे) तिर्यक्प्रमाणं यद्यपि नोक्तम् तथाप्यरत्नित्रयात्मकमेव दर्शनात् (१.२.५.१६.)।

अपरिमितां वा ॥५॥ अस्मिन्सूत्रग्रन्थे द्वाविवापरिमितशब्दौ श्रुतिवाक्यानुसरणादपरिमाणवाचिनौ अपरिमितां वा अपरिमितेष्टको वेति (१७.७.२८.) च अन्ये तु अपरिमितं प्रमाणाद्भूय इत्युक्तत्वात्पूर्वोक्तपरिमाणादतिशयेनाधिकपरिमाणवाचकाः ।

प्राक्प्रवणामुदग्वा ॥६॥ प्रवन्तेऽस्मिन्नापोऽनेन वेति प्रवणं नीचम् प्रवर्तते वा वनमुदकमस्मिन्निति तदेव निम्नम् ।

---

1) °र्थं यदन्नि° १. 2) विकृतौ गार्हपत्यचितिमपरेण अहरे Mahád. सर्वशाखाप्रत्ययेन मैत्रायणीयोक्तमन्तराहवनीयं गार्हपत्यं चानियतस्थानं वेदिकरणं मा भूत् Ananta. 3) आहवनीयस्य पश्चात्त्र्यरत्न्यन्तरालं हित्वा व्याममात्रीमुदीचीम् Mahád. 4) उदीचीरेखायाः प्रा॰ त्र्य॰ आहवनीयान्तम् विकृतौ गार्हपत्यचित्यन्तम् · पुरुषसंमिता हि त्र्यरत्निः प्राचीति श्रुतेः (१.२.५.१४.) · पुरुषसंमिता त्र्यरत्निस्तु (°रत्निः प्राची तु sec. h.) विष्णुवामनसंमिता वामनो ह विष्णुरासेत्युपक्रमात् (१.२.५.५.) Mahád.

मध्यसंगृहीताम् ॥७॥ [1] संग्रहसाधनप्रकारश्च परिशिष्टेऽउक्तः आनीय रज्जुं पूर्वार्धात्पश्चार्धं यावदेव तु द्विगुणीकृत्य तां रज्जुमन्ते तस्यास्तु शङ्कौ भ्रामयेत्तेन मानेन तया रज्ज्वाष्टभागया वा पृथुचतुरीयेण भागेनालिख्य संग्रहाविति · क्वचित् वेदिश्रोण्यंसयोर्मध्ये तया रज्ज्वाष्टभागयेति पाठः ।

अग्निमभितोऽंसौ ॥८॥ अंसौ आग्नेयैशानकोणौ आहवनीयमुभयतो भवतः अंसयोर्मध्ये आहवनीयो भवतीत्यर्थः · अतोऽंसावपि वेदेरेवावयवौ श्रोणिवत् खननस्तरणादयश्च वेदिसम्बन्धाः संस्कारास्तयोरपि प्रवर्तन्ते ॥ षडरत्निं रज्जुं मित्वा द्वितीयारत्न्यन्ते लक्षणं श्रोण्यङ्कनार्थम् ततोऽरत्नेश्चतुर्थे भागे लक्षणमाकर्षणार्थम् तृतीयारत्न्यन्ते प्राच्यन्ताङ्कनार्थम् ततश्चतुर्थभागोने (ऽरत्नौ) अंसाङ्कनार्थम् ततः सार्धेऽरत्नौ पाश इति अयं च पाशाविपर्यासेन साधनोपायः · विपर्यासपक्षे तु षडरत्निं रज्जुमुभयतः पाशौ कृत्वा प्रथमं सार्धारत्न्यन्ते अंसाङ्कनार्थम् ततोऽर्धारत्नौ श्रोण्यङ्कनार्थम् ततोऽरत्नेश्चतुर्थे भागे [2] आकर्षणार्थम् अरत्नित्रये च प्राच्यन्ताङ्कनार्थमिति · अपरिमितपक्षाश्रयणे च प्राचीप्रमाणं पुरस्तात्तिर्यक्प्रमाणं च तुल्यम् पश्चात्तिर्यक्प्रमाणं च प्राचीप्रमाणतृतीयभागेनाधिकमिति युक्त्या कल्पनीयम् · तत्र च प्राचीप्रमाणां रज्जुं द्विगुणां कृत्वा रज्जोर्मूलात्पुरस्तात्तिर्यक्प्रमाणस्यार्धे मूलरज्जोश्चान्तिमचतुर्थभागस्यादौ आकर्षणार्थं लक्षणमिति ॥ अथ खननप्रमाणे पक्षान्तरमाह ·

आ मूलोच्छेदनादोषधीनाम् ॥९॥ [3] प्राक्प्रवणानुदक्प्रवणेत्यस्मात्सूत्रान्मण्डूकप्लुतिन्यायेन वाशब्दोऽत्रानुवर्तते अध्याह्रियते वा । अस्मिन्पक्षऽएव विशेषमाह ·

ओषधीनां मूलान्युच्छेत्तवै ब्रूयात् ॥१०॥ इमं प्रैषमध्वर्युरग्नीधं प्रति ब्रूयात् । मूलानि च भूमिमध्ये दूरमपि यावत्प्रसरन्ति तावत्पर्यन्तम् ।

आहार्यपुरीषां पशुकामस्य ॥११॥ [4] प्रागनुमार्जनाद्वेदेः सकाशाद्वेदिपु-

---

1) मध्ये संकुचिताम् Mahád. 2) ? °श्चतुर्भागे २. 3) त्र्यङ्गुलान्तं वा Mahád.
4) वेदिं कुर्यात् Mahád. आहार्यमन्यस्मात्प्रदेशादाहरणीयं पुरीषं यस्याः सा Ss.

रीषमपसार्यान्यत्पुरीषमानीय[1] वेदिमध्ये प्रक्षेपणीयम् · एतच्च पुरुषार्थम् प्रणयने कांस्यादिवत् अतश्च विकृतौ न भवति । निष्क्रामेणापि वेदिः पुरीषवत्येव कार्या · वेदिपुरीषं तत्रैव तिष्ठति न ततो निष्काश्यते वचनाभावात् । खाता वेदिः नाद्भिः श्लक्ष्णीकरणीया किंतु पांशुलैव कार्या ।

वेदिं परिसमुह्य वितृतीयेऽग्नीदुत्तरत उत्करं करोति ॥१२॥ अन्वाहार्याधिश्रयणानन्तरं प्रथमं वेदिमानमध्वर्युः करोति यथोक्तम् · ततोऽग्नीद्दर्भैर्वेदिमध्यपतितं तृणपुरीषादिकमपसार्य वेदेरुत्तरतः परिसमूहनापसारितस्य तृणपुरीषादेरुत्करं राशिं करोति · उत्कीर्यत इत्युत्करः । वितृतीयं च वेदेः प्रकृतत्वात्तदीयमेव · गार्हपत्याहवनीयान्तरालं वितृतीयं च शुल्वकृतोक्तम् गार्हपत्याहवनीययोरन्तरं षड्ढा[2] सप्तधा वागन्तुसमं त्रेधा विभज्यापरवितृतीयलक्षणेन दक्षिणायम्य तस्मिन्नग्निर्विपर्यस्योत्तरत उत्कर इत्येकः प्रकारः अपि[3] वान्तरत्रिभागोनया रज्ज्वा पूर्वार्धे समचतुरश्रं कृत्वा श्रोण्यामग्निर्विपर्यस्योत्तरांसऽउत्कर इति · विपर्यासश्चैवम् पूर्वतृतीयलक्षणेनोत्तरत आयम्येति प्रथमे प्रकारे गार्हपत्याहवनीययोरन्तरत्रिभागोनया रज्ज्वापरार्धे समचतुरश्रं कृत्वा तस्य चतुरश्रस्योत्तरांसे उत्कर इति द्वितीयः प्रकारः । चात्वालोत्करावन्तरेण संचरः[4] · संनिहितो हि चात्वालस्योत्करः पूर्ववितृतीये भवतीति कर्कः ।

देवस्य त्वेति (१. २४.) स्फ्यमादाय सतृणं सव्ये कृत्वा दक्षिणेनालभ्य जपतीन्द्रस्य बाहुरिति (१. २४.) ॥१३॥[5] एतदन्वादानं स्तम्बयजुर्हरणार्थम् अतश्च तदभावेऽभावः ।

नोपस्पृशेत्पृथिव्यात्मानौ तेन स्तम्बयजुर्हरिष्यन् ॥१४॥ स्तम्बयजुर्हरणात्प्राक्[6] तेनाभिमृष्टेन वज्रेण पृ॰ नौ नोपस्पृशेत् ।

वेद्यां तृणं निदधात्युदक्पृथिव्यै वर्मासीति ॥१५॥[7]

---

1) °ह्वेदिपुरुष° २. 2) ? षोढा २. and Çulvapar. (Chambers 66a.) second hand. षड्ढा ibid. first hand. 3) °त्तरत उत्करोऽपि Çulvapar. 4) ततः प्रणीतोत्करयोरन्तराले आर्थिकं संचरणम् Mahád. 5) संहितास्वरेण जपति · पितृयज्ञे आददेऽध्वरकृतं देवपितृभ्य इत्यूहोऽङ्गप्रधानत्वात् Mahád. 6) स्तम्बयजुर्हरणमिति करिष्यमाणकर्मसंज्ञा Mahád. 7) तदात्तं तृणमुदगग्रं शाखान्तरीयेण मन्त्रेण वे॰ नि॰ Mahád. — See Káṇva-Váj. S. pag. ३५.

पृथिवि देवयजनीति (१.२५.) तृणेऽन्तर्हिते प्रहरति ॥१६॥ [1] अध्वर्युः तृणेऽन्तर्हिते भूप्रदेशे तृणस्याधस्ताद्भूमौ स्फ्येन प्रहरति । तृणमन्तर्धाय तस्योपरि प्रहर्तव्यमिति माधवाचार्याः · तथा च पितृभूत्याचार्या अपि · कर्काचार्यास्तु प्रहरणं च वेद्याम् न तृणे इतरथा हि तृणे प्रहरतीत्यवक्ष्यत् न तृणेऽन्तर्हिते अथ पुनरन्तर्धायवचनात्तादर्थ्यमेव तृणस्य न प्रहरणाधिकरणता तृणऽएव प्रहरणमिति सम्प्रदाय इति ।

व्रजं गच्छेति (१.२५.) पुरीषमादत्ते ॥१७॥ यत्र स्फ्येन प्रहारः कृतः तस्माद्वेदिस्थानात्स्फ्येनोत्खातं पुरीषमुत्खातान्पांसून्हस्तेन गृह्णाति ।

वर्षतु तऽइति (१.२५.) वेदिं प्रेक्षते ॥१८॥ यतः स्थानात्पुरीषं गृहीतं तं वेदेः प्रदेशं विलोकयति ।

बधानेत्युत्करे (१.२५.) करोति ॥१९॥ [2]

प्रहरणशेषो वाविशेषोपदेशात् ॥२०॥ प्रह्रियतेऽनेन मन्त्रेणेति प्रहरणमन्त्रः प्रहरणशब्देनाभिधीयते · व्रजं गच्छेत्यादिर्मा मौगित्यन्तो मन्त्रः · तस्य पृथिवि देवयजनीत्येव शेषो भवति अविशेषेण प्रहरणे उपदिश्यते यतः स प्रहरति पृथिवीत्यादिना (१.२.४.१६.) । अथवा एवं योजना · अविशेषोपदेशात् व्रजं गच्छेत्यनेन पुरीषमादत्ते वर्षतु तऽइति वेदिं प्रेक्षते बधानेत्युत्करे करोति एवंविधं विशेषविधानं शतपथे नास्ति केवलम् स प्रहरति पृथिवीत्येवमेव (१.२.४.१६.) सर्वोऽपि प्रहरणमुपक्रम्य पठितोऽस्ति · अत एवं ज्ञायते प्रहरणमन्त्रस्यैवायं शेष इति । अपरे त्वेवमाहुः · यद्यपि शतपथे विशेषोपदेशो नास्ति तथापि शाखान्तरे विशेषोपदेशोऽस्ति · अविशेषस्य च विशेषपरतैव न्यायात् · तस्माद्विदेनैवावयवशः पुरीषादानादौ यथोक्तो विनियोगः ।

अपारुमिति (१.२६.) द्वितीयं प्रहरणादि ॥२१॥ अपाररुम् अररो आसुर इति कात्यायनवचनात् (अनुक्रमणी १.७.) आसुरोऽयं मन्त्रः तत उच्चारणानन्तरमपामुपस्पर्शनम् । पितृयज्ञे च देवपितृयजनादित्यूहः ।

---

[1] देवपितृयजनीति पितृयज्ञेऽऊहः Mahâd. [2] आत्तं पुरीषमुत्करे प्रक्षिपति Mahâd.

अभिन्यस्यत्यग्नीदुत्करमररो दिवमिति (१.२६.) ॥२२॥ [१] अभिनिदधाति पाणिभ्यामुत्करस्य पिधानं करोति उत्कराभिमुखौ हस्तौ निदधाति हस्ताभ्यामुत्करस्यावबाधनं [२] नीचैराक्रमणं कर्तव्यम् ।

द्रप्सस्तऽइति (१.२६.) तृतीयम् ॥२३॥ [३]

तूष्णीं चतुर्थं सतृणम् ॥२४॥ सतृणं शाखान्तरात् उदङ्गिहितेन तृणेन सहितं पुरीषमुत्क[रे क]रोति ।

पूर्वं परिग्रहं परिगृह्णाति दक्षिणतः पश्चादुत्तरतश्च स्फ्येन गायत्रेणेति (१.२७.) प्रतिमन्त्रम् ॥२५॥ अध्वर्युर्ब्रह्मन्पूर्वं परिग्रहं परिग्रहीष्यामीति ब्रह्माणमामन्त्र्यों परिगृहाणेति तेनानुज्ञातः स्फ्येन क्रमेण दक्षिणतः पश्चादुत्तरतश्च वेदिं परिगृह्णाति परि समन्तात्स्फ्येन रेखाकरणादि(ना) इयती वेदिरिति ज्ञापनार्थं परिगृह्णाति । पूर्वं परिग्रहमित्यस्य कर्मणः संज्ञा संव्यवहारार्था । प्रतिमन्त्रमिति गायत्रेणेति दक्षिणतः दक्षिणपार्श्वे नैर्ऋतकोणादारभ्य पुरस्ताद्वेदिमध्यात् स्फ्येन लेखां करोति त्रैष्टुभेनेति पश्चात् अपरपार्श्वे दक्षिणश्रोणेरारभ्य उत्तरश्रोणिपर्यन्तम् जागतेनेत्युत्तरतः उत्तरश्रोणेरारभ्य उत्तरपार्श्वे पुरस्ताद्वेदिमध्यं यावत् । अंसपर्यन्तमाहवनीयखरपर्यन्तं वा परिग्रहणं कार्यम् ।

वेद्यां त्रिरुल्लिख्याह हर त्रिरिति ॥२६॥ [४] वेदिमध्ये स्फ्येन तिस्रो लेखाः प्राचीरुदक्संस्था उदीचीर्वा प्राक्संस्थाः कृत्वाग्नीधं प्रत्यध्वर्युराह ।

हृत्वाग्नील्लेखाः संमृशति ॥२७॥ एवं प्रेषितोऽग्नीत्ताभ्यो लेखाभ्यः पांसून् त्रिर्हृत्वा उत्करे प्रक्षिप्य तदा लेखाः संमर्शनेन समीकरोति ।

पितृयज्ञाग्निचित्ययोः ॥२८॥ एतदुक्तं लेखाकरणं हर त्रिरिति प्रैषो ऽग्नीधस्त्रिर्हरणं संमर्शनं च पितृयज्ञाग्निचित्ययोरेव भवति तत्रैव श्रुतत्वात् न दर्शपूर्णमासयोः अश्रुतत्वात् । पितृयज्ञाग्निचित्ययोरिति ततश्च तयोरेव वेदेरेतत्संस्काराधिक्यं वचनादिति प्राप्तऽआह ·

---

१) हस्तेन हस्ताभ्यां वा पीडयति Mahâd. २) ? °स्याववाधानं २. ३) प्रहरणादि उत्करे-करणान्तं कर्म Mahâd. ४) सकृदुल्लेखनं महापितृयज्ञे · वरुणप्रघासेष्वयं त्रिःशब्दो ऽभ्यसितव्यः वेदिद्वित्वात् Mahâd.

वा तत्रदर्शनादत्र ॥२९॥ वा पूर्वपक्षनिरासे · न पितृयज्ञाग्निचित्ययोरेव तत्संस्काराधिक्यम् किं तर्हि अत्रापि दर्शपूर्णमासयोर्भवति । कुतः तत्रदर्शनात् तयोरेव तत्र पितृयज्ञाग्निचित्ययोर्हि अन्यविधिपरे वाक्ये लेखाकरणादीनि दृश्यन्ते यतस्तत्र प्रकृतितः प्राप्तानां दर्शनमेव न तु विधानम् · कुतः वाक्यस्यान्यपरत्वात् · कथमन्यपरता · पितृयज्ञे तावत् स यज्ञोपवीती भूत्वाज्यानि गृह्णातीति (२. ६. १. १२.) आज्यग्रहणे यज्ञोपवीतित्वविधानपरं वचनम् यतः कर्मणः पित्र्यत्वेन प्राचीनावीतित्वमेव प्राप्नोति तत्र वचनाद्यज्ञोपवीतित्वं विधीयते अन्यत्स्तम्बयजुर्हरणादि सर्वं प्राप्तमेवानूद्यते · अग्निचित्यायाम् महावेदेः स्फ्यादिसंमर्शनात्तस्य कर्मणोऽवसरविधानार्थं वचनम् तत्र हि सौमिक्या वेदेरौपवसथ्यात्पूर्वेऽहनि स्फ्यादानादि कर्म प्रकृतितः प्राप्नोति प्रायणीयहविष्कृदन्ते च वचनेन विधीयते अतस्तत्र प्रकृतितः प्राप्तानां दर्शनमेव (न) विधानम् · अतो दर्शपूर्णमासयोरपि लेखाकरणादि भवतीति सिद्धम् ।

वेदिकरणं यथोक्तम् ॥३०॥ [अत्रेत्यनुवर्तते] · यथोक्तं यथा पूर्वमुक्तं[1] वेदिकरणम् तदत्रास्मिन्नवसरे लेखासंमर्शनानन्तरं भवति ।

उत्तरं परिग्रहं परिगृह्णाति सुक्ष्मा स्योनोर्जस्वतीति (१. २७.) प्रतिमन्त्रं पूर्ववत् ॥३१॥ [2] अत्रापि ब्रह्मन्नुत्तरं परिग्रहं परिग्रहीष्यामीति ब्रह्माणमामन्त्र्यों परिगृह्णाणेति तेनानुज्ञातः ।

पुरा क्रूरस्येत्यनुमार्ष्टि (१. २८.) ॥३२॥ तां प्रतिमार्ष्टीति (१. २. ५. १८.) श्रुतेः · प्रति पूर्वक्रियाविपर्यये वर्तते · पूर्वं खनित्रा विषमा कृता अधुना तां समीकरोतीत्यर्थः[3] । पुरस्तादारभ्य प्रत्यक्संस्थमनुमार्जनं कार्यम् स्वश्रुतौ सूत्रे च विशेषानुपदेशात् ।

अध्यधि वेदिं प्रोक्षणीर्धारयत्यन्यः ॥३३॥ पूर्वमुक्तम् (२. ३. ३०.) असंचरे प्रोक्षणीर्निधायेति · ता एवेदानीं तत उत्पाद्य वेदेरुपरिष्टाद्धारयति[4] ।

---

1) यथोक्तमिति व्याममात्रीं पश्चादित्याद्यंसकरणान्तमन्यूनातिरिक्ताकरणं Mahád. 2) अत्र यत्प्रतीकोच्चारणम् तद्वाक्यावसानप्रज्ञप्त्यर्थम् Mahád. 3) लोष्टादिनिष्काशनेन वा काष्ठादिना भङ्क्त्वा वा भूसमीकरणम् Mahád. 4) वेदेरुपरिष्टादत्यन्तसमीपऽएव अतिनीचैः Ss.

अथ स्फ्यमुद्यम्याह प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः संमृड्ढि [1] पत्नीꣳ संनह्याज्येनोदेहीति यदीच्छेत् ॥३४॥ अथ अग्नीत्कर्तृकप्रोक्षणीधारणानन्तरमध्वर्युर्यदि प्रैषवचनमिच्छेत् तदा प्रोक्षणीषु वेदिमध्येऽग्नीधा धार्यमाणासु वेदेः सकाशात्स्फ्यमुद्यम्य हस्तेनोर्ध्वमुत्थाप्याग्नीध्रं प्रति प्रोक्षणीरासादयेत्यादिमाज्येनोदेहीत्यन्तं प्रैषं ब्रूयात् · यदि प्रैषं दातुं नेच्छेत् ततो न ब्रूयात् स्वयमेवाग्नीध्रो ऽप्रेषितोऽपि आहननादिवत्प्रोक्षण्यासादनादि [2] कुर्यात् तेषामग्नीध एव कर्तृत्वमिति हरिस्वामिनः · अन्ये त्वप्रैषपक्षे अध्वर्युकर्तृत्वमाहुः स्वयमेवाध्वर्युर्वेदेरन्तः कर्म कर्तव्यमिति काण्वपाठात्। पत्नीशब्दस्यानेकपत्नीकेऽप्यनूहः एकवचनान्तस्यैव समाम्नानात् न प्रकृतावपूर्वत्वादिति न्यायात् । अथशब्दो धार्यमाणास्वेव प्रोक्षणीषु सर्वप्रैषाणां प्रापणार्थः अन्यथा (एकैक)प्रैषसमनन्तरमेव (एकैक)प्रैषार्थानुष्ठानस्य सर्वत्र न्याय्यत्वात् · तन्मा भूत् · सर्वप्रैषानन्तरमासादनं यथा स्यादित्येवमर्थोऽथशब्दः [3] । वरुणप्रघासेषूहः इध्मौ बर्हिषी आज्याभ्याम् · गृहमेधीयायाम् स्रुचम् · उपसदि स्रुचौ · अनेकयजमानके बह्वीषूदवसानीयासु इध्मान्बर्हीꣳष्यपि आज्यैः ।

यथाप्रेषितमन्यः पराधिकारात् ॥३५॥ अन्यश्च प्रैषं करोति परात् परमन्यमेवाधिकृत्य प्रैषः प्रवर्तते न हि कश्चिदात्मानं प्रेषयतीदं कुर्विति । अध्वर्युः प्रैषार्थेऽआग्नीध्रश्च प्रैषऽइति प्राप्तऽआह ·

स्वयं वाविरोधात् ॥३६॥ स्वयं वा अध्वर्युरेव प्रैषे स्यात् अर्थादग्नीत्प्रैषार्थे [4] · न ह्येवं क्रियमाणेऽपि समाख्या विरुध्यते · कुतः तत्प्रयोजको हेतुश्च चकारात्कर्ता चेति प्रयोजकत्वस्यापि कर्तृत्वस्मरणात् इतरथा तु पदार्थमात्रकर्तृत्वात्प्रैषे समाख्या बाध्येत ।

सम्प्रैषावचनाच्च ॥३७॥ सम्प्रैषेषु अध्वर्योरवचनाच्चाध्वर्युरेव प्रैषे स्यात् · यदि चाग्नीदग्नीन्विहरेत्यादौ (१.७.५.) अपि चाध्वर्यो प्रोक्षणीरासादयेत्येवं सम्प्रैष-

---

1) °मृड्ढि १. ३. 2) °णीरासा° २. 3) प्रोक्षणीधारणानन्तर्यप्रज्ञप्त्यर्थोऽथशब्दः · पञ्च प्रैषाः सावसाना इति वैद्यनाथमिश्राः Mahâd. 4) अप्रैषं कर्म स्वयमेव कुर्यात् Mahâd. यच्च कर्काचार्येणाभ्यधायि प्रैषार्थेऽध्वर्युः प्रैषेऽग्नीदिति तदत्यन्तवावदूकस्वभावतयाचिरंतनव्याख्या (? चिरंतनव्याख्या Cod.) Ananta.

मध्यऽएवाध्वर्योर्वचनं स्यात् तदा वचनादध्वर्युः प्रैषार्थे स्यादपि · न चैवम् · तस्मादध्वर्युरेव प्रैषे । उत्कृष्टोऽध्वर्युः निकृष्टमग्नीधं प्रेष्यति ।

प्राक्स्तरणाद्वेदिं नावमृशेत् ॥३८॥ [1]

शृतानि च हवींष्या प्रचरणात् ॥३९॥ [2] शृतानीति क्लेति (१.२.५.२६.) च विशेषोपादानाच्छ्रप्यमाणेषु हविःषु संस्क्रियमाणायां च वेदौ स्पर्शे न दोषः ।

अङ्गुष्ठाङ्गुलिभ्यां मांसमांसहिताभ्यामवद्यन्त्येके ॥४०॥ अवमर्शननिषेधप्रसङ्गात्तत्प्रति प्रसवार्थमेतत् । शाखिनो मांसोपलक्षितान्तःप्रदेशसम्बन्धाभ्यामङ्गुष्ठाङ्गुलिभ्यां [3] नखाभ्यामस्पृशन्तो हवींष्यवद्यन्ति अन्ये तु शृतावदानसंज्ञकेन वारणेन प्रादेशमात्रेण काष्ठेन · उक्तम् सामर्थ्यात्स्वधितिर्मांसे द्रवेषु स्यात्स्रुवस्तथा हस्तकाष्ठे पुरोडाशमवदातुं प्रकल्पत इति स्रुवेण स्वधितिना हस्तेन काष्ठेन चत्वार्यवदानसाधनानि ।

आपन्नं स्तृणान्निरस्येत् ॥४१॥ [4] स्तरणात्प्राक् पतिततृणाद्यपसारणार्थं हस्तेनापि न स्पृशेत् स्तरणे क्रियमाणे तु पदेनाप्यभिष्ठानं न दोषायेत्यर्थः ।

द्विषतो वध इति (१.२८.) स्फ्यमुदञ्चं प्रहरति ॥४२॥ अध्वर्युः प्रैषार्थमुद्यतं वज्रं प्रैषान्ते उदगग्रमुत्करे प्रक्षिपति · उदकोपस्पर्शनं चाभिचारपक्षे ।

अवनिज्य पाणीऽअपरेण प्रणीता स्फ्यं निदधाति ॥४३॥ हस्तावुत्करेऽद्भिः प्रक्षाल्य प्रणीतानां पश्चात्समीपऽएव स्फ्यमासादयत्यध्वर्युः [5] ।

इध्माबर्हिश्च पूर्वमिध्मम् ॥४४॥ चकारेण अपरेण प्रणीता निदधात्याग्नीध्रः उपविश्यासादयति · इध्मं पूर्वं प्रागग्रम् ततो बर्हिरपि प्रागग्रमेवेध्मादुत्तरम् ।

प्रणीता दक्षिणेन वाहृत्य ॥४५॥ प्रणीतानामाहवनीयस्य चान्तरालेन प्रदक्षिणमिध्माबर्हिराहृत्य निदधाति प्रणीतानां पश्चादेव । अव्यवायार्थोऽयं प्रयत्नः ।

स्रुवं प्रतप्य पूर्ववद्वेदग्रैरन्तरतः प्राक्संमार्ष्यनिशित इति (१.२९.) विपर्यस्य

---

१) अनुमार्जनादूर्ध्वं प्रा° णात् वेदिं न स्पृशेत् Mahâd. २) प्रचरणं प्रधानविषयम् · प्रधानयागान्तं शृ° ह° न स्पृशेत् Mahâd. ३) अङ्गुलिशब्देन प्रदेशिनी Mahâd. ४) (बर्हिःस्तरणात्प्राक्) वेदिमध्ये तृणकाष्ठपर्णादि यदापन्नं पतितं भवति (तदध्वर्युरुत्करे निरस्येत्) Ss. ५) अवनेजनं दृष्टार्थम् येन धूलिधवलावमलौ क्रियेते · अतो वेदिखननाभावऽएतस्याप्यभावः Mahâd.

बर्हिर्मूलैः प्राडुत्क्रम्य ॥४६॥ अग्नीत्स्रुवं प्रतप्य अप उपस्पृश्य ततोऽग्निदेशात्प्राडुत्क्रम्य प्राच्यां गत्वा वेद्ग्रैः अग्रे प्रतिपत्तिविधानाद्वेदात्पृथक्कृतैः अन्तरतो मुखप्रदेशे [1] स्रुवं प्राक्संमार्ष्टि वेदाग्रैर्मूलादारभ्याग्रपर्यन्तमुपरिप्रदेशे प्राञ्चं संमार्ष्टि मार्जनेन तत्संलग्नं रजः पातयतीत्यर्थः · तत एव स्रुवं बहिर्बुध्नप्रदेशे वेदस्य मूलैर्विपर्यस्य संमार्ष्टि [2] देशभेदात्पुनरप्यनेनैव मन्त्रेण प्रत्यक् अग्रादारभ्य बुध्नपर्यन्तम् · देशभेदाच्च मन्त्रावृत्तिः । प्राडुत्क्रमणं संमार्गमात्रे न प्रतपने · प्रतपनं तु पश्चात्स्वस्थानमागत्यैव कार्यम् · अतः पूर्ववदित्यनेन प्रत्युष्टं निष्टप्तमिति वेति (२.३.११.) वैकल्पिको मन्त्रो [ऽति]दिश्यते ।

प्रतप्य-प्रतप्य प्रयच्छति ॥४७॥ यस्य-यस्य स्रुवादेः संमार्गो विहितो विधास्यते तस्य-तस्य संमार्गानन्तरं तत्तत्प्रतप्य-प्रतप्याध्वर्यवे प्रयच्छति समर्पयति · ततश्च स्रुवस्य पूर्वं प्रतपनम् ततः प्राडुत्क्रम्य यथोक्तः संमार्गः पुनः प्रत्यागत्य प्रतपनम् उदकस्पर्शः समर्पणमिति क्रमः । अप्रैषपक्षे अध्वर्योः प्रतपनपक्षे चार्यादग्नीधे समर्पणम् ।

अनिशितेति (१.२१.) स्रुचः ॥४८॥ जुह्वाद्याः संमार्ष्टि समर्पणपर्यन्तम् ।

तूष्णीं प्राशित्रहरणं शृतावदानं पात्रीं च ॥४९॥ तदनन्तरं प्राशित्रहरणम् अविशेषाद्द्वयोरपि संमार्गः एकवचनं तु जात्यपेक्षम् · ततः शृतावदानम् · ततः पात्रीम् । अविशेषोपदेशात्पुरोडाशपात्र्योरिडापात्र्याश्च क्रमेण तूष्णीं संमार्गप्रतपनसमर्पणानीति कर्कः · तदयुक्तम् · एकवचनादत्रैकैव पात्री द्वयोः पुरोडाशयोरासादनार्था भवति शाखान्तरीयसर्वसूत्रेषु आसादनोपस्तारादौ चैकस्या एव दर्शनात् · इडापात्र्यास्तु संमार्गप्रतपने कुत्रापि सूत्रे विहिते न स्तः तेन इडापात्रीषडवत्तयोः संमार्गप्रतपनकल्पनं निर्मूलमेव · अत एव पितृभूत्याचार्यैरनयोर्न संमार्गाद्हेत्युक्तम् । तूष्णीं प्रतपने चोदकस्पर्शनाभावः रक्षोदेवतमन्त्रोच्चारणाभावात् । चकारात्षडवत्तस्यापि संमार्गादि भवति प्राशित्रेडासमानन्यायात् । दर्शौ सांनाय्यपयोधर्मप्रवृत्तेः सांनाय्यस्य च स्रुवेणावदानविधानात्

१) अन्तरत इति खातमध्ये Mahâd. २) पुष्कराद्बहिर्दण्डे मूलैर्वेदाग्रमूलैः । अर्थात्पूर्वं वेदाग्रनिष्पत्तिः ततः प्रतपनादि Mahâd.

पशुमांसावदानार्थस्यासेः स्थानापत्त्या स्रुवधर्मलाभः · ततश्च स्रुवसंमार्गानन्तरमसेः पूर्वं स्रुवमन्त्रेण प्रतपनम् अनिशितोऽसीति संमार्गः पुनः प्रतप्याप उपस्पृश्य समर्पणमिति । वसाहोमहवन्याः प्रचरण्याश्च जुहूवत्तूष्णीं संमार्गप्रतपने · अन्येषामपि जुहूस्थानापन्नानां शूर्पार्कपर्णदोहनौदुम्बरस्रुवादीनां जुहूवदेव संमार्गप्रतपनसमर्पणानि · पृषदाज्योपभृतश्चोपभृद्वत् · मेक्षणस्य शृतावदानवत् · वाजिनभाण्डस्य पुरोडाशपात्रीवदिति सम्प्रदायः · तत्तु विचारणीयम् उपदेशातिदेशयोरभावात् । कर्कस्य (मते) मूलैरिति वेदाग्रमूलैः · अन्ये तु वेदाग्रैर्वेदमूलैरिति ।

संमार्जनान्यपास्यति ॥५०॥ सर्वसंमार्गानन्तरं संमार्जनसाधनानि वेदाग्रमूलानि उत्करे प्रक्षिपति ।

आहवनीये प्रासनमेके ॥५१॥ आहवनीये वा · आपस्तम्बः संमार्जनान्यद्भिः सꣳस्पृश्याग्नौ प्रहरति यस्मिन्प्रतपत्युत्करे वेति ॥ ॥ षष्ठी कण्डिका ॥६॥

अथ पद्धतिः ॥

ततो वेदिमानम् · प्रथमं पश्चात्तिर्यक् व्याममात्रीं मिमीते चतुर्भिररत्निभिर्व्यामो भवति · ततो मध्ये त्र्यरत्निं प्राचीं मिमीते · ततः पुरस्तात्तिर्यक् त्र्यरत्निं मिमीते पुनः पुरस्तादुर्वीति (१. २. ५. १६.) वचनात् वरुणप्रघासेषु त्रयः पुरस्तादिति (५. ३. १३.) पुरस्तान्माने त्र्यरत्निदर्शनाच्च · ततः श्रोणेरारभ्य दक्षिणत उत्तरतश्च वेदिं मध्यसंगृहीतां कुर्यात् · ततोऽग्निमभितोंऽसौ च कुर्यात् । वेदिकरणोपायो लिख्यते[1] षडरत्निर्द्विपाशा च मध्ये पञ्चसु लक्षिता द्विहस्तेऽङ्गुलषट्के च त्रिघ्नष्टादशकेषु[2] च सार्धहस्ते च पाशः स्याद्वेदिः स्यात्पौर्णमासिकी[3] आनीय रज्जुं पूर्वार्धात्पश्चार्धं यावदेव तु द्विगुणीकृत्य तां रज्जुमन्ते तस्यास्तु शङ्कौ भ्रामयेत्तेन मानेन तया रज्ज्वाष्टभागया वा पृथुचतुरीयेण भागेनालिख्य[4] संग्रहौ इति · अथवा वेदिश्रोण्यंसयोर्मध्ये तया रज्ज्वाष्टभागया विलिखेन्मध्यतो वेदौ स ज्ञेयो मध्यसंग्रह इति । ततोऽग्नीद्वेदेः परिसमूहनं कृत्वा गार्ह-

१) See pag. २०६. २) Thus १. and Chamb. 622. 630. त्रिः षष्टादशकेषु Chamb. 196. त्रिघ्नष्टादशेषु Chamb. 792 s 5. ३) This hemistich is found in the Çulvapariçishṭa. ४) मध्येनालिख्य Chamb. 792 s 5.

पत्याहवनीययोरन्तरालस्योत्तरपूर्ववितृतीये उत्करं तृणधूल्यादिराशिं करोति · तच्च[1] गार्हपत्याहवनीययोरन्तरं षड्डा[2] सप्तधा वागन्तुसमं त्रेधा विभज्य पूर्ववितृतीयलक्षणेनोत्तरत आयम्य तत्रोत्करं कुर्यात् विपर्यस्योत्तरत उत्कर इति वचनात् · प्रकारान्तरं चोक्तम् अपि वान्तरत्रिभागोनया रज्ज्वा पूर्वार्धे समचतुरश्रं कृत्वा तस्य चतुरश्रस्योत्तरांसऽउत्करो भवति विपर्यस्योत्तराध्सऽउत्कर इति वचनात् · वेदिपूर्वापरायामस्यैव पूर्ववितृतीये उत्तरत उत्करो भवतीति कर्कः । ततोऽध्वर्युर्देवस्य त्वा° आददेऽध्वरकृतमिति (१. २४.) मन्त्रेणासादिततृणसहितं स्फ्यमादाय सव्ये हस्ते सतृणं स्फ्यं निधाय दक्षिणेन हस्तेनालभ्येन्द्रस्य बाहुरिति (१. २४.) स्वरेण जपति · अत्र हस्तमार्जनेन स्फ्यस्य तीक्ष्णीकरणं कार्यम् सध्श्यत्येवैनमेतदिति (१. २. ४. ७.) श्रुतेः · तेन वज्रेण स्तम्बयजुर्हरणादर्वाक् पृथिव्यात्मनोः स्पर्शो न कर्तव्यः · अभिचरतो द्विषत इत्यस्य स्थाने अमुष्य वध इति शत्रोर्नाम गृह्णीयात् तत उदकोपस्पर्शनम् अभिचाराभावे उदकोपस्पर्शनाभावः । ततः पृथिव्यै वर्मासीति मन्त्रेण तत्तृणं वेद्यामुदगग्रं निदधाति · पृथिवि देवयजनीति (१. २५.) मन्त्रेण तृणस्याधस्ताद्भुवि स्फ्येन प्रहरति · ततो व्रजं गच्छेति (१. २५.) प्रहरणेनोत्खातं पुरीषं हस्तेन गृह्णाति · ततो वर्षतु तऽइति (१. २५.) मन्त्रेण वेदिं प्रहरणदेशे प्रेक्षते । ततो बधान देवेत्यनेन (१. २५.) तद्गृहीतं पुरीषमुत्करे प्रक्षिपति · अत्राप्यभिचरतः तमतो मा मौगित्यत्र तमित्यस्य पदस्य स्थानेऽमुकमिति शत्रुनाम गृह्णीयात् तत उदकोपस्पर्शनम् अभिचाराभावऽउदकोपस्पर्शनाभावः । ततोऽपाररुमिति (१. २६.) मन्त्रेण पूर्वप्रहृतादुत्तरतस्तृणस्याधस्तात्स्फ्येन द्वितीयं प्रहरति · मन्त्रस्यासुरत्वादुदकस्पर्शः · ततः पूर्ववत्पुरीषादानवेदिप्रेक्षणपुरीषप्रक्षेपणानि । ततोऽग्नीत्स्फ्यं गृहीत्वा द्वाभ्यां पाणिभ्यामुत्करमभिन्यस्यति पाणिभ्यामधः पीडयतीत्यर्थः · उदकोपस्पर्शनम् । ततो द्रप्सास्तऽइति (१. २६.) मन्त्रेण द्वितीयप्रहृतादुत्तरतस्तृणस्याधस्तात्तृतीयं प्रहरति · अत्रापि पुरीषादानवेदिप्रेक्षणपुरीषनिरसनानि पूर्ववत् । ततस्तृतीयप्रहृतादुत्तरतस्तृणस्याधस्तात्तूष्णीं चतुर्थं प्रहरति · तूष्णीमेव सतृणपुरीषादानम् तूष्णीमेवो-

१) See pag. २१०. २) षड्ढा Chamb. 622. 630.

त्खातप्रदेशप्रेक्षणम् सतृणस्य पुरीषस्योत्करे प्रक्षेपस्तूष्णीमेव । ततो ब्रह्मन्पूर्वं परिग्रहं परिग्रहीष्यामीति ब्रह्माणं पृच्छति · ततो ब्रह्मा बृहस्पते परिगृहाणेतीमं मन्त्रं धेहीत्यन्तमुपांशु पठित्वा[1] ओं३ परिगृहाणेत्युच्चैरध्वर्युमनुजानाति · ततो ऽनुज्ञातोऽध्वर्युः स्फ्येन श्रोणेरारभ्य दक्षिणतो गायत्रेण त्वेति (१.२७.) वेदिं परिगृह्णाति आहवनीयखरपर्यन्तां रेखां करोतीत्यर्थः · त्रैष्टुभेनेति (१.२७.) दक्षिणश्रोणेरारभ्योत्तरश्रोणिं यावत् परिगृह्णाति · ततो जागतेनेत्यनेनोत्तरश्रोणेरारभ्योत्तरपार्श्वे परिगृह्णाति आहवनीयखरं यावत् । ततो वेद्यां प्रागायता उदक्संस्थास्तिस्रो लेखास्तूष्णीं स्फ्येन लिखित्वा हर त्रिरित्यग्नीधं प्रति ब्रूयात् · ततो ऽग्नीत्ताभ्यो लेखाभ्यः पांसूनुद्धृत्योत्करे प्रक्षिप्य ता लेखाः संमृशेत् मार्जनेन स्फोटयेत्[2] । ततोऽभ्रिमादाय प्रदक्षिणं सर्वतो वेदिं खनति त्र्यङ्गुलम् ओषधिमूलोच्छेदपर्यन्तं वा · अस्मिन्पक्षे ओषधीनां मूलान्युच्छेत्तवाऽइति प्रैषमध्वर्युराग्नीध्रं प्रति ब्रूयात् स च प्रैषितो[3] मूलच्छेदनपर्यन्तं खननं करोति । ततो ब्रह्मन्नुत्तरं परिग्रहं परिग्रहीष्यामीति ब्रह्माणं पृच्छति · ब्रह्मा च पूर्ववद्बृहस्पते परिगृहाणेति पठित्वा ओं३ परिगृहाणेति प्रसौति · ततः पूर्ववत्स्फ्येन दक्षिणपश्चिमोत्तरपार्श्वेषु वेदिं परिगृह्णाति सुक्ष्मा चासीति (१.२७.) दक्षिणतः स्योना चासीति पश्चात् ऊर्जस्वतीत्युत्तरतः । ततः स्फ्येन दक्षिणां दिशं प्रति वेदिपुरीषमुद्धृत्य पुरा क्रूरस्येति (१.२८.) मन्त्रेणानुमार्ष्टि · प्रत्यक्संस्थम् पुरस्तादारभ्य प्रतीचीं दिशं प्रति पुरा क्रूरस्येत्यनुमार्ष्टि · शाखान्तरसूत्रेषु सर्वेषु प्रत्यक्संस्थमेवानुमार्जनमुक्तमस्तीति तथैवानुष्ठेयम् स्वशाखायां विशेषानुपदेशात् · अनुमार्जनं चात्र खननेन विषमस्य समीकरणम् · पशुकामस्य यजमानस्य प्रागनुमार्जनाद्वेदिपुरीषं निष्काश्योत्करे प्रक्षिप्यान्यत्पुरीषमानीय वेदेः पूरणम् ततो ऽनुमार्जनेन समीकरणम् । ततोऽग्नीत्प्रोक्षणीर्गृहीत्वा वेदेरुपरिष्टात्समीपऽएव धारयति · ततो धार्यमाणासु प्रोक्षणीष्वध्वर्युः स्फ्यमुद्यम्य सर्वं प्रैषजातमाह प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः संमृड्ढि पत्नीꣳ संनह्याज्येनोदेहीति । अनेकपत्नीकेऽपि पत्नीशब्दस्य नोहः । यदि प्रैषणेच्छा भवति तदा प्रैषणं कुर्यात्

1) See २. २. ८-१२. 2) ? स्फोटयेत् १. 3) ? समप्रेषितो १.

यदि नेच्छेत् तदा अप्रेषितोऽप्याग्नीध्र एव कुक्कुटाह्ननादिवत्प्रोक्षणयासादनादिपदार्थान्कुर्यादिति हरिस्वामिनः · अप्रेषपक्षेऽध्वर्युः पदार्थान्करोतीत्यपरे । ततो द्विषतो वध इति (१.२८.) मन्त्रेण स्फ्यमुदगग्रमुत्करे प्रक्षिपति · अभिचरतोऽमुष्मै त्वा वध्रं [1] प्रहरामीति विशेषः अमुष्मै इत्यत्र [2] शत्रोश्चतुर्थ्येकवचनान्तं नामग्रहणम् ततोऽपामुपस्पर्शनम् · अभिचाराभावे उदकोपस्पर्शनाभावः । ततोऽध्वर्युः स्फ्यं गृहीत्वोत्करे पाणी प्रक्षाल्य प्रणीतानां पश्चात्प्रागग्रमुदगग्रं वा स्फ्यं निदधाति · ततोऽग्नीद्वेदिमध्ये उदगग्रामग्निहोत्रहवणीमासाद्य प्रणीतानां पश्चात्स्फ्यस्योत्तरतः प्रागग्रमिध्ममासाद्येध्मादुत्तरतो बर्हिः प्रागग्रमासादयति · अथवा इध्मं प्रणीता दक्षिणेन प्रदक्षिणावृत्य प्रणीतानां पश्चादेव प्रथममासादयति ततो बर्हिः । तत आग्नीध्रः खादिरं स्रुवमादाय प्रत्युष्टमिति (१.२९.) वा निष्टप्तमिति वा मन्त्रेण गार्हपत्ये प्रतप्याप उपस्पृश्याग्निसमीपात्प्राच्यां गत्वा वेदग्रैरन्तरतः प्राञ्चं संमार्ष्टि मूलादारभ्याग्रपर्यन्तम् अनिशितोऽसीति (१.२९.) मन्त्रेण · ततो वेदमूलैर्बहिःप्रदेशे स्रुवपुष्करस्य बुध्नादारभ्य मूलपर्यन्तं प्रत्यञ्चं संमार्ष्टि अनेनैव मन्त्रेण · ततोऽग्निसमीपे गत्वा पूर्ववत्प्रतप्याप उपस्पृश्याध्वर्यवे समर्पयति । ततो जुहूमादाय प्राङुत्क्रम्यानिशितासीति (१.२९.) स्रुववदन्तरतो बाह्यतश्च मन्त्रेण संमृज्य पूर्ववत्प्रतप्याप उपस्पृश्याध्वर्यवे प्रयच्छति · एवमेवोपभृतम् ध्रुवां च संमृज्य प्रतप्य प्रयच्छति । ततस्तूष्णीं प्राशित्रहरणे शृतावदानं पुरोडाशपात्रीं च प्रत्येकं प्राङुत्क्रम्य तूष्णीमन्तर्बहिश्च संमृज्याग्निसमीपमागत्य तूष्णीं प्रतप्याध्वर्यवे समर्पयति · तत्र रक्षोदेवतमन्त्रोच्चारणाभावादुदकोपस्पर्शनाभावः । ततः संमार्जनान्युत्करे प्रक्षिपत्याहवनीये वा । उत्ताना धारयमाणः स्रुचः संमार्ष्टि न संमृष्टान्यसंमृष्टैः स्पर्शयति प्रतप्याग्रेणोत्करं दर्भेषु सादयति जघनेन वा यथास्थानमुत्तानाः स्रुचः सादयतीति शाखान्तरीया अत्र विशेषाः । इडापात्रीषडवत्तयोस्तु न संमार्गः क्वचिदपि सूत्रेऽदर्शनात् · पुरोडाशपात्री च द्वयोः पुरोडाशयोः साधारणी एकैव भवति पात्रीमित्येकवचनात् ॥ ॥६॥

इति द्वितीयस्य षष्ठी कण्डिका ॥

---

१) ? °मुष्यै (°ष्य ४.) वा वध्रं १. See १.२.५.२२. २) अमुष्मै इत्यत्र १. अमुष्येत्यत्र ४.

पत्नीं संनह्यति प्रत्यग्दक्षिणत उपविष्टां गार्हपत्यस्य मुञ्जयोक्त्रेण त्रिवृता परिहृत्यधीवासोऽदित्यै रास्नेति (१. ३०.) ॥१॥ अग्नीत् गार्हपत्यस्य प्रत्यग्दक्षिणतो नैर्ऋत्यां दिश्यैशानदिङ्मुखीमुपविष्टां यजमानस्य भार्यां त्रिगुणेन मुञ्जमयेन योक्त्रेण संनह्यति बध्नाति । अदित्यै रास्नासीति मन्त्रेण वाससो बहिः परितो वेष्टयति [१]। अनेकपत्नीके सर्वासाम् । तच्चैतत्संनहनं नाभेरधः कटिप्रदेशे कर्तव्यम् अस्ति वै पत्न्या अमेध्यं यदवाचीनं नाभेरित्यादिश्रुतेः (१. ३. १. १३.) ।

दक्षिणं पाशमुत्तरे प्रतिमुच्योर्ध्वमुद्गूहति विष्णोर्वेष्य इति (१. ३०.) ॥२॥ अग्नीदेव तस्य योक्त्रस्य दक्षिणं पाशमुत्तरे पाशे शङ्कुस्थानीये [२] प्रतिमुच्य प्रोतयित्वा ततः सामर्थ्याद्द्विगुणं वेष्टयित्वा तं दक्षिणं योक्त्रपाशमूर्ध्वमुद्गूहति वेष्टिते योक्त्रेऽएव मध्ये प्रेरयति · ऊर्ध्वमेवोद्गूहनसामर्थ्याद्द्विर्वेष्टनम् एकवेष्टने उद्गूहनस्याशक्यत्वात् ।

न ग्रन्थिं करोति ॥३॥ [३]

ऊर्जे त्वेत्याज्यमुद्वास्य (१. ३०.) पत्नीमवेक्षयत्यदब्धेनेति (१. ३०.) ॥४॥ वेदं सव्येन गृहीत्वा आज्यमुद्वास्य पुरोडाशाभ्यां पूर्वत आनीयोत्तरतो भूमौ निधाय पत्नीं पत्न्याज्यमवेक्षस्वेति प्रेष्यति सा च वेदं हस्ते गृहीत्वा अदब्धेनेत्याज्यमवेक्षते · आपस्तम्बः सा निमील्य वीक्ष्यानुकृत्स्नी वीक्षतऽइति । अनेकपत्नीके एकैवेति कर्कः सर्वा अपीति तु गम्यते [४]। पितृयज्ञे अध्वर्युरेवावेक्षते आज्यसंस्कारस्याप्रतिषिद्धत्वात् [५] · एवं रजस्वलायां प्रसूतायां प्रोषितायां वा · पितृयज्ञे सुस्रुर्देवपितृभ्यः ।

वेद्यां करोत्यपरं प्रोक्षणीभ्यः ॥५॥ अग्नीत्तदाज्यं नीत्वा आसादितानां प्रोक्षणीनां पश्चाद्वेद्यां करोति ।

आहवनीये वा कृत्वा तत्रापिणः ॥६॥ आहवनीयश्रापिणो यजमानस्य आज्यमाहवनीये कृत्वा आहवनीयेऽधिश्रित्य पुनरुद्वास्य प्रोक्षणीभ्योऽपरं वेद्यां करोति · वा व्यवस्थायाम् आहवनीयश्रापिण एवमेव कर्तव्यम् गार्हपत्यश्रापिणस्तु प्रागुक्तमेव ।

१) पाशं बहिर्वाससो वेष्टयति Mahâd. २) उत्तरे प्रान्ते शङ्कुसदृशे · उत्तरो न पाशः पाशशब्दाभावात् Mah. ३) योक्त्रस्य Mah. ४) बहुपत्नीकेऽप्येकैवाज्यावेक्षणं कुर्यात् आज्यसंस्कारत्वात् · संनहनमप्येकस्या एवाज्यावेक्षणार्थत्वात् Mah. ५) द्रव्यसंस्कारानपायात् Mah.

सवितुस्त्वेत्याज्यमुत्पुनाति (१.३१.) ॥७॥ वेदमुपगृह्य · वेद्यामासादितमाज्यम् ।

प्रोक्षणीश्च पूर्ववत् ॥८॥ [1] चकारः उत्पुनातीत्यस्यानुकर्षणार्थः · कर्काचार्यास्तु चकारादाज्यं च पूर्ववदेव न ह्यन्यथा आज्योत्पवने पवित्रे प्राप्येते ऽइति व्याख्यातवन्तः । प्रोक्षणीनां पुनरुत्पवनमिध्माबर्हिषोः प्रोक्षणार्थम् अतश्च तदभावे न भवति ।

आज्यमवेक्षते तेजोऽसीति (१.३१.) ॥९॥ [2]

यजमानो वा ॥१०॥ स्रुवेणाज्यग्रहणम् ॥११॥

चतुर्जुह्वां धाम नामेति (१.३१.) सकृन्मन्त्रः ॥१२॥ [3] चतुरः स्रुवान्पूर्णान्गृह्णीयात् · धाम नामेति मन्त्रः सकृत्प्रयोज्यः प्रथमस्रुवग्रहणऽएव ।

अष्टाऽउपभृत्यल्पीयोऽनुयाजाश्चेत् ॥१३॥ अनुयाजाश्चेद्भवन्ति तदा उपभृति अष्टौ[कृत्वः] स्रुवाज्यं गृह्णीयात् · तच्च उपभृति आज्यमल्पीयः जौहवादाज्यादतिशयेनाल्पं ग्राह्यम् · सकृदेव मन्त्रः [4] । इहानुयाजानां नित्यत्वाच्चेच्छब्दो विकृतिविषयः ।

चतुरन्यत्र प्रतिविभागात् ॥१४॥ अन्यत्र अनुयाजवत्कर्मणोऽन्यस्मिन्कर्मणि अनुयाजाभाववति अन्यद्रव्यानुयाजके च उपभृति चतुरेव [गृह्णीयात् · कुतः प्रतिविभागात्] औपभृतस्याज्यस्य प्रयाजेष्वनुयाजेषु च यतः प्रतिविभागेनोपयोगो दृश्यते अर्धं प्रयाजेषूपयुज्यतेऽर्धमनुयाजेषु ।

पश्वातिथ्यादर्शनाच्च ॥१५॥ पशावातिथ्यायां च उपभृति चतुर्गृहीतस्य दर्शनाच्चैवं गम्यते यदनुयाजाभावे अन्यद्रव्यकेष्वनुयाजेषु [5] चोपभृति चतुर्गृहीतमेव गृह्णीयादिति ।

न कृत्स्नोपदेशात् ॥१६॥ [6] संज्ञि॰ नैतदेवम् यदुक्तम् उभयार्थमेतदिति · कुतः कृत्स्नोपदेशात् कृत्स्नस्य समग्रस्याप्यष्टगृहीतस्यानुयाजार्थत्वेन श्रुता-

---

१) पूर्ववदिति पवित्राभ्याम् सवितुरिति (१.३१.) मन्त्रेण Ss. २) अध्वर्युः Mahâd. ३) त्रिस्तूष्णीम् Mah. ४) सकृत्त्रिर्वा सप्तकृत्वो वा मन्त्रः Mah. ५) पशौ पृषदाज्यानुयाजद्रव्ये चतुर्गृहीतं दर्शयति अथोत्पूयेति (३.६.३.६.) · तथा चाननुयाजे कर्मण्यातिथ्यायाम् (३.४.१.१८.) Mah. ६) नोपभृति चतुर्गृहीतग्रहणम् सम्पूर्णस्याष्टगृहीतस्यानुयाजार्थत्वेनोपदिष्टत्वात् Mah.

वुपदेशात् [अथ यदष्टौ कृत्व उपभृति गृह्णातीति प्रकृत्य (१. ३. २. १.) अनुयाजेभ्यो हि तद्गृह्णातीति]।

पश्चातिथ्ययोर्वचनात् ॥१७॥ [1] यदा वाक्येन कृत्स्नस्यौपभृतस्यानुयाजार्थत्वम् तदा पशावातिथ्यायां चाष्टगृहीतमेवोपभृति प्राप्नोति · अतो वचनात्तत्र चतुर्गृहीतं विधीयते · अतो विधानमेतत् न दर्शनम् तद्धि प्राप्तिपूर्वकं भवति प्राप्तिश्च नास्तीत्युक्तमेवास्मिन्सिद्धान्ते। वरुणप्रघासेषु महाहविषि च अनुयाजार्थं पृथगुपभृति न गृह्यते।

ध्रुवायां च जुहूवत् ॥१८॥ आज्यं गृह्णीयात् · जुहूवदिति चतुर्गृहीतम् सकृन्मन्त्रवचनम् · चकारादुपभृत्यपि सकृन्मन्त्रवचनम् · त्रिर्मन्त्रवचनपक्षे चतुर्थं तूष्णीम्।

इध्मं प्रोक्षति विस्रंस्य वेदिं च बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद्ग्रन्थि कृष्णोऽसीति (२. १.) प्रतिमन्त्रम् ॥१९॥ [2] इध्मं वेदिं बर्हिश्च प्रोक्षति · बर्हिः प्रतिगृह्य आग्नीध्रात्समर्पितं हस्तेनादाय। ब्रह्मन्निध्मं (ब्रह्मन्बर्हिः) प्रोक्षिष्यामीत्यामन्त्रणम् ओं प्रोक्षेत्यनुज्ञातस्य प्रोक्षणम् वेदिप्रोक्षणे तु आमन्त्रणानुज्ञे न भवतः अविहितत्वात्। वरुणप्रघासेषु इध्मौ बर्हिषी। इध्मस्याग्निसमिन्धनार्थस्यैव प्रोक्षणं (अग्नये) मेध्यीकरणार्थम् · अतश्च शतरुद्रिये परिध्युपस्पर्शनार्थस्येध्मकाष्ठस्य न प्रोक्षणम् अग्न्यर्थत्वाभावात्। वेदेरपि स्तरणार्थमेव प्रोक्षणम् बर्हिषि मेध्यीकरणार्थम् · अतश्च पयस्यायां स्तरणाभावे वेदिप्रोक्षणाभावः।

शेषं मूलेषूपसिञ्चत्यदित्यै व्युन्दनमिति (२. २.) ॥२०॥ बर्हिषः प्रोक्षणानन्तरं प्रोक्षणीशेषं बर्हिर्मूलेषु निनयति।

पवित्रे निधाय प्रणीतासु बर्हिर्विस्रंस्य पुरस्तात्प्रस्तरग्रहणं विष्णोरिति (२. २.) ॥२१॥ अध्वर्युर्हस्तेन प॰ प्र॰ नि॰ बर्हिर्विस्रंस्य [3] तस्य बर्हिषः पूर्वभागात्प्रस्तरग्रहणं निष्काशनं करोति · स चायं पूलकात्प्रस्तरस्य पृथक्करणे मन्त्रः [4]।

---

1) पश्चातिथ्ययोरुपभृति यच्चतुर्गृहीतमुक्तम् न तद्दर्शनात् किं तु वचनात् प्राप्तिपूर्वकं हि दर्शनं भवति न चेह प्राप्तिरस्तीत्यतो वचनमिदमिति Mahâd. 2) इध्मं प्रोक्षत्यग्न्यर्थम् वेदिं बर्हिरर्थम् बर्हिः स्रुगर्थम् Mahâd. 3) विस्रंसनं संनहनविस्रंसनेन भवति Mahâd. 4) ग्रहणं व्यवच्छेदो बर्हिषः पृथक्करणम् · तेन पितृयज्ञे पृथक्करणाभावान्न मन्त्रः Mahâd.

ब्रह्मणे प्रदाय संनहनं विस्रंस्य दक्षिणस्यां वेदिश्रोणौ निधायान्यैरवछाद्य वेदिं स्तृणात्पूर्णम्रदसमिति (२. २.) त्रिवृत् ॥ २२ ॥ तं गृहीतं प्रस्तरमाहवनीयं पूर्वेण तूष्णीं ब्रह्मणे समर्प्य बर्हिषः संनहनं बन्धनरज्जुं विस्रंस्य विमुच्य रज्जुमुपत्तं परित्याज्य दक्षिणस्यां वेदिश्रोणौ प्रागग्रमुदगग्रं वा यथासम्भवं निधाय प्रस्तुताद्बर्हिषोऽन्यैर्बर्हिस्तृणैस्तं स्तृतं संनहनं प्रछाद्य त्रिधातुबर्हिषा वेदिमाछादयति । पितृयज्ञे देवपितृभ्यः ।

उपपत्त्या वा ॥ २३ ॥ वा विकल्पे · न त्रिवृत् · उपपत्त्यावृद्धा यावतीभिरावृद्भिर्वेदेः स्तरणमाछादनमुपपद्यते पञ्चधा सप्तधा · अयुग्मा आवृतो भवन्ति ।

बहुलम् ॥ २४ ॥ निबिडम् घनम् यथा भूमिर्न दृश्यते ।

अधरमूलम् ॥ २५ ॥ [1] पूर्वस्तृतस्य बर्हिषो मूलानि पश्चात्स्तीर्यमाणबर्हिषोऽग्रैः प्रछादनीयानि ।

पश्चादपवर्गम् ॥ २६ ॥ पश्चात्समाप्तिर्यस्य तत्पश्चादपवर्गम् वेदेः पूर्वभागादारभ्य पश्चिमभागे समाप्तिर्यथा भवति · एकं मुष्टिं वेदेः पूर्वभागे स्तीर्त्वा द्वितीयं मुष्टिं वेदेः मध्यमभागे पूर्वस्तृतबर्हिषो मूलान्यग्रैश्छादयन्स्तृणाति ततस्तृतीयं मुष्टिं वेदेः पश्चिमप्रान्ते पूर्ववत् द्वितीयमुष्टिस्तरणेन सम्बद्धं स्तृणीयात् · इत्येवं स्तरणस्य प्रत्यक्परिसमाप्तिरित्येकः पक्षः । पक्षान्तरमाह ·

प्रवृहन्वा ॥ २७ ॥ एवं च प्रागपवर्गमेव स्तरणं कृतं भवति · वेदेः पश्चिमपार्श्वे स्तीर्त्वा तस्याग्राणि यष्ट्यादिनोत्पाट्य तेषामधस्तादन्यस्य बर्हिषो यथा मूलानि भवन्ति तथा स्तृणीयात् [2] ।

अत्रोद्वासनमाहवनीयश्रापिणः ॥ २८ ॥ अत्रास्मिन्काले श्रा॰णो यजमानस्य हविषां [कपालानां च] उद्वासनम् इतरथाहवनीयकल्पने कृते सति हवींषि दह्येरन् [3] ।

---

1) अधराणि अधस्तान्मूलानि यस्य तदधरमूलम् Ss. 2) पूर्वपूर्वस्तृतबर्हिषोऽग्राणि प्रवृहन् ऊर्ध्वमुत्पाटयन् तेषामग्राणामधस्ताद्द्वितीयं मुष्टिं स्तृणाति Ss. See १. ३. ३. १०. 3) कुतः विरोधात् यदिदानीमुद्वासनं न क्रियेत तदाहवनीयकल्पने कृते हवींपि दह्येत (!) Ss.

इध्मात्समिधमादायाहवनीयं कल्पयत्युपर्युपरि प्रस्तरं धारयन् ॥२९॥ इध्मादेकां समिधमादाय ततो ब्रह्मणः सकाशात्प्रस्तरं चार्थादादाय आहवनीयस्योपरिष्टात्समीपऽएव प्रस्तरं धारयन् गृहीतया समिधा आहवनीयं कल्पयति[1] समिदाधानेन कृप्तमिन्धनेध्मादेर्ज्वालनसमर्थं करोति · लोकेऽपि काष्ठादिना पूर्वमग्निमाहृत्य पश्चात्संधुक्षणं क्रियते एवमत्रापि करोति ।

उल्मुकेऽउद्धृत्यनुयाजाश्चेत् ॥३०॥ यदि अनुयाजाः प्रकृते कर्मणि भवन्ति तदाहवनीयाद्द्वेऽउल्मुकेऽउद्धरति[2] अपसार्य पृथक्स्थापयति भूमिसंलग्नाविव पुरस्तात्प्रेरयति । इह त्वनुयाजा नित्यं भवन्त्येव चेहव्दस्यातिथ्योपसद्ध्रमेधीयपयस्यादिविकृतिविषयः । अनुयाजानामभावे उल्मुकोद्धरणाभावः अतोऽनुयाजार्थमेवैतदुल्मुकोद्धरणम् आहवनीयायातयामताकरणार्थं च ॥ ॥ सप्तमी कण्डिका ॥७॥

अथ पद्धतिः ॥

ततः पत्नीसंनहनम् · तत्राग्नीध्रोयोक्त्रमादाय गार्हपत्यान्नैर्ऋत्यां दिशीशानाभिमुखीमूर्ध्वज्ञुमुपविष्टां पत्नीं परिधानवस्त्राद्बहिर्योक्त्रेण प्रदक्षिणं वेष्टयति अदित्यै रास्नासीति (१. ३०.) मन्त्रेण · ततो दक्षिणं पाशमुत्तरे शङ्कुस्थानीये प्रतिमुच्य सामर्थ्याद्द्विर्वेष्टयित्वा योक्त्रस्यान्तमूर्ध्वमुद्गूहति विष्णोर्वेष्योऽसीति (१. ३०.) मन्त्रेण · ग्रन्थिं न करोति । ततो वेदोपग्रहणोर्जे त्वेत्याज्यस्थालीमुत्तरत (१. ३०.) उद्वास्य पत्न्या अग्रे निधाय पत्न्याज्यमवेक्षस्वेति वक्ति · सा पत्नी अदब्धेनेति (१. ३०.) मन्त्रेणाज्यमवेक्षते । अनेकासु पत्नीषु सर्वासां योक्त्रबन्धनम् पत्नीसंस्कारत्वात् · आज्यावेक्षणमपि सर्वासाम् अथ यत्पत्नीं नावकाशयेदन्तरियाद्ध यज्ञात्पत्नीमिति (१. ३. १. २०.) अनवेक्षणे निन्दार्थवाददर्शनात् · एकस्या एवेत्यपरे आज्यसंस्कारत्वात् । ततोऽग्नीत्पत्न्या अग्रत आज्यं गृहीत्वा वेदिमध्ये प्रोक्षणीभ्योऽपरं सादयत्युपविश्य · ततोऽध्वर्युर्वेदं गृहीत्वा प्रोक्षणीभ्यः पवित्रेऽआदाय सवितुस्त्वा प्रसवऽइत्याज्यमुत्पुनाति (१. ३१.) · ततः स्फ्यं गृहीत्वा आज्यलिप्ताभ्यामेव पवित्राभ्यां सवितुर्वः प्रसवऽइति मन्त्रेण प्रोक्षणीरुत्पुनाति · ततस्तेजोऽसि शुक्रमसीत्यनेन (१. ३१.)

1) See १. ३. ३. १२.　2) See १. ८. २. १.

मन्त्रेणाज्यमवेक्षतेऽध्वर्युर्यजमानो वा वेदोपग्रहेण । ततोऽध्वर्युः सव्येन जुहूं वेदं च गृहीत्वा दक्षिणेन स्रुवमादाय तेनाज्यस्थाल्याः सकाशात्तूष्णीमाज्यमादाय जुह्वां निनयति धाम नामासीति (१. ३१.) मन्त्रेण · जुह्वां चतुरः स्रुवान्गृह्णाति · तत्र एकवारं मन्त्रः त्रिस्तूष्णीम् अथवा त्रिर्मन्त्रः सकृत्तूष्णीम् । तत उपभृत्यष्टकृत्वो घृतं गृह्णाति · अत्रापि सकृद्धाम नामेति मन्त्रः सप्तकृत्वस्तूष्णीम् · अथवा त्रिर्मन्त्रः पञ्चकृत्वस्तूष्णीम् · अष्टकृत्वो गृह्णन्नपि जौहवादाज्यादल्पतरं यथा स्यात्तथा गृह्णीयात् । ततो ध्रुवायां चतुराज्यं गृह्णाति · अत्रापि धाम नामेति सकृन्मन्त्रेण त्रिस्तूष्णीम् · अथवा त्रिर्मन्त्रेण सकृत्तूष्णीमिति । ततो वेदिमध्यादाज्यस्थालीमादाय क्वचित्सुगुप्ते निदधाति । तत इध्मं विस्रंस्य ब्रह्मन्निध्मं प्रोक्षिष्यामीति ब्रह्माणं पृच्छति · ततो ब्रह्मा प्रोक्ष यज्ञमित्युक्त्वा प्रोक्षेत्यनुजानाति । ततोऽध्वर्युः प्रोक्षणीरादाय कृष्णोऽस्याखरेष्ठ इतीध्मं (२. १.) प्रोक्षणीभिः प्रोक्षति । ततो वेदिरसीति (२. १.) वेदिं प्रोक्षति । ततोऽग्नीत्समर्पितं बर्हिः प्रतिगृह्य प्रणीताहवनीयान्तरालेन प्रागनाहृतं चेत् इदानीं तेन मार्गेणाहृत्य वेद्यां प्राग्ग्रन्थि आसाद्य ब्रह्मन्बर्हिः प्रोक्षिष्यामीति ब्रह्माणं पृष्ट्वा प्रोक्ष यज्ञमिति तेन पूर्ववदनुज्ञातो बर्हिरसीति (२. १.) बर्हिः प्रोक्ष्य प्रोक्षणीशेषं समस्तं बर्हिर्मूलेषु निनयेत् । ततः पवित्रे प्रणीतासु निधाय बर्हिर्विस्रंस्य विष्णो स्तुप इति (२. २.) बर्हिःपूलकस्य पूर्वस्मात्प्रदेशात्प्रस्तरं गृह्णाति · ततस्तं प्रस्तरं तूष्णीं ब्रह्मणे प्रदाय बर्हिःसंनहनं विस्रंस्य दक्षिणस्यां वेदिश्रोणौ निधायान्यैर्बर्हिस्तृणैराछाद्य वेद्यां पतितं तृणपर्णकाष्ठादिकं हस्तेनैवादायोत्करे निरस्येत् । ततो वेदिं त्रिवृत्स्तृणाति · उपपत्त्यावृद्धा अयुग्धातु पञ्चवृत्सप्तवृद्वा । तच्चैवम् · स्फ्यं निधाय दर्भपूलकात्तृतीयं भागमादायोर्णाम्रदसमिति (२. २.) दक्षिणादंसादारभ्योत्तरांसं यावत्स्तृणाति · ततो द्वितीयं भागमादाय पूर्वस्तृतस्य बर्हिषो मूलान्याछादयंस्ततः पश्चात्स्तृणाति · ततस्तृतीयं भागमादाय तथैव वेदेः पश्चिमान्ते स्तृणाति · एतत्त्रिवृत्स्तरणम् । पञ्चवृत्पक्षे एवमेव तृतीयस्तृतस्य पश्चाच्चतुर्थम् ततः पश्चात्पञ्चममिति · एवं सप्तवृदादिपक्षेऽपि ज्ञेयम् · सर्वपक्षेष्वन्तिमस्तरणे स्फ्योपग्रहः कार्यः । बहुलं स्तृणाति · यथा वेदिभूमिर्न दृश्यते तथा बर्हिषाछादयतीत्यर्थः । एवं पश्चादपवर्गं

स्तरणमुक्तम् अथ प्रागपवर्गमुच्यते · अथवा पूर्वं वेदेः पश्चात्प्रदेशे तृतीयं भागं स्तीर्त्वा तदग्राणि यष्ट्यादिनोत्पाट्य तदग्राणामधस्ताद्द्वितीयं भागं स्तृणाति पुनरपि तथैव · एवं प्रागपवर्गं वा स्तरणम् । तत इध्मात्समिधमादाय ब्रह्मणो हस्तात्प्रस्तरं चादायाहवनीयस्योपरि समीपऽएव प्रस्तरं धारयन्समिधाहवनीयं कल्पयति हविर्दहनसमर्थं करोति · तत्र मतद्वयम् केचित्काष्ठप्रक्षेपणेन केचिदिध्मकाष्ठेनाहत्य । तत आहवनीयादुल्मुकद्वयमुद्धरति प्राञ्चं प्रेरयित्वा खरप्रान्ते निदधातीत्यर्थः · अनुयाजार्थे प्राचीऽउल्मुकेऽउद्धरतीति वाजसनेयकमित्यापस्तम्बः ॥ ॥७॥

इति द्वितीयस्य सप्तमी कण्डिका ॥

परिधीन्परिदधात्यार्द्रानेकवृक्षीयान्बाहुमात्रान्पालाशवैकङ्कतकार्श्मर्यबैल्वान्पूर्वालाभे-पूर्वालाभऽउत्तरान्खादिरौदुम्बरान्वा मध्यमदक्षिणोत्तरान्गन्धर्व इति (२.३.) प्रतिमन्त्रम् ॥१॥ [1] अशुष्कान् · एकजातीयवृक्षसम्बन्धिनः त्रीनपि पालाशान् अथवा कार्श्मर्यान् श्रीपर्णीवृक्षावयवान् न तु मुख्यद्रव्यालाभेनैको द्वौ वा पालाशौ एको द्वौ वा वैकङ्कतौ · यजमानबाहुप्रमाणान् बाहुः प्रसारिताङ्गुलिर्हस्त आ स्कन्धात् · पूर्वपूर्वोक्तवृक्षजातीयानामलाभे अप्राप्तौ उत्तरोत्तरान्परिदधाति कार्श्मर्यालाभे त्रयाणामपि बैल्वखादिरौदुम्बराणां तुल्यविकल्पता पालाशादीनां पूर्वालाभे-पूर्वालाभे उत्तरोत्तरोपादाने प्रायश्चित्ताभावः पूतीकावत्प्रतिनिधिनियमाभावात् प्रतिनिधित्वे तु प्रायश्चित्तं भवति । परितः समन्ततः स्थाप्यन्तऽइति परिधयः ततश्च यौगिकोऽयं शब्दो न संस्कारनिमित्तो जातिनिमित्तो वा · तल्लक्षणमाह कात्यायनः (कर्मप्रदीप° २.५.११.) बाहुमात्राः परिधय ऋजवः सत्वचोऽव्रणाः त्रयो भवन्त्यशीर्णाग्रा एकेषां तु चतुर्दिशमिति · परितो निधानाच्चेत्परिधय इति नाम तर्हि यदि त्रयाणां वचनं नास्ति तत्र चत्वारोऽपि भव[न्ती]ति कर्कः नेति सम्प्रदायः ।

---

१) पितृयज्ञे मित्रावरुणौ त्वोत्तरत इत्यत्र युक्तारूपौ विपरिणाम इति कर्कः · तेन मित्रावरुणौ त्वा पुरस्तात्परिधत्तामित्यूहः Mahâd.

प्रथमं परिधिं समिधोपस्पृश्य वीतिहोत्रमित्यादधाति (२.४.) ॥ २ ॥ इध्मादृहीता या पूर्वं समित् तया प्र° प° उपस्पृश्य उपविष्ट एव स्पृष्ट्वा तत उत्थाय तां समिधमाहवनीये प्रक्षिपति · उपस्पर्शनं च परिधेः संस्कारः परिधिमिति द्वितीयाश्रवणात् ।

अनुपस्पृश्य द्वितीयां समिदसीति (२.५.) ॥ ३ ॥ परिधिमनुपस्पृश्यैव इध्मादेवादाय द्वितीयां समिधम् ।

सूर्यस्त्वेति (२.५.) जपत्याहवनीयमीक्षमाणस्तद्वचनत्वात्[1] ॥ ४ ॥ अध्वर्युरुपविश्य आहवनीयं विलोकयन्संहितास्वरेण जपति । आहवनीयमीक्षमाण इति सूर्यस्त्वेति मन्त्रस्य आहवनीयवाचित्वात्[2] हे अग्ने सूर्यस्त्वां पुरस्तात्प्राच्यां दिशि पातु · पितृयज्ञे दक्षिणात इत्यूहः सम्प्रदायकारमतेऽनूहः पुरस्ताच्छब्दोऽग्रवचनो न दिग्वचन इति । परिधिपरिधानाच्चाहवनीयेक्षणान्तमिदमेकं कर्म · एकं हि कार्यम् अग्निसंस्कारः परिधयश्चाग्निरक्षणार्थाः · सूर्येक्षणजपोऽपि तदर्थ एव सूर्यमेव पुरस्ताद्गोप्तारं करोतीति (१.३.४.८.) प्रयोजनम् ।

आवृत्य वेदिं बर्हिषस्तृणे तिरश्ची निदधाति सवितुरिति (२.५.) ॥ ५ ॥ अध्वर्युर्वेदिं प्रत्यावृत्य आहवनीयसमीपाद्वेदिसमीपं प्रत्यागत्य स्तृतस्यैव बर्हिषो द्वे तृणेऽआदाय मध्ये स्तृतस्य बर्हिष उपरि आहवनीयस्य पश्चात्प्रदेशे तिरश्ची उदगग्रे निदधाति स्थापयति । आपस्तम्बः समावनन्तर्गर्भौ दर्भौ विधृती कुरुत ऽइति · तथा अन्तर्वेद्युदगग्रे निधायेति च · तथा अरत्निमात्रे विधृती करोतीति श्रूयते · काठके च पुरस्तात्प्रस्तरादनन्तर्गर्भौ विधृतीऽआदाय वेद्यामुदश्चौ निधायेति · काण्वीयायां तु तस्या द्वे तृणेऽआदायेति पठ्यते तेन बर्हिषस्तृणे इति सूत्रितम् । तिरश्चीऽइत्युदगग्रे · अत एव वेदिस्तरणं प्रागग्रैर्बर्हिर्भिः कर्तव्यम् ।

अन्ये वायुक्तत्वात् ॥ ६ ॥ अन्येऽएव वा तृणेऽआदाय तिरश्ची निधेये न स्तृतस्य बर्हिषस्तृणे · कुतः अयुक्तत्वात् अन्ययोरविनियुक्तत्वात् अन्ये हि

---

1) °स्त्वेति च जपत्या° Ss. 2) तद्वचनत्वादाहवनीयवाचित्वात्सूर्यमन्त्रस्य Ss. सूर्यस्त्वेति वाशब्दस्याग्निपरत्वादवभृथे (°शब्दोग्निप° Cod.) सूर्यो वः पुरस्तादिति · मन्त्रस्तमग्निं वक्तीति तद्वचनः Mahâd.

अविनियुक्ते · बर्हिषस्तृणे च वेदिस्तरणे विनियुक्ते न च विनियुक्तयोः वचनं विना अन्यत्र विनियोगो युक्तः · अत्र तु वचनमप्यस्ति काण्वीयायाम् अथ स्तीर्णां वेदिमुपावर्तते तस्या द्वे तृणेऽआदायेति · तर्हि अत्रापि भवतु वेदितृणयोरेवोपादानम् · अधिकरणं तु कृत्वा-चिन्ता वचने सति न्यायस्य दुर्बलत्वात् · तस्मादत्र प्रकृते बर्हिषस्तृणेऽएवादाय वेद्यां निधेये · तथा च हरिस्वामिनः अथ स्तीर्णां वेदिमुपावर्ततऽइत्युपावर्तनस्य (१. ३. ४. १०.) दृष्टार्थत्वात् काण्वानां च तस्या द्वे तृणेऽआदायेति वचनात्स्तीर्णाया एव वेदेर्बर्हिषस्तृणे ग्राह्येऽइति । उक्तन्यायमन्यत्रादिशति ·

अन्यत्रापि तृणार्थे ॥ ७ ॥ अतोऽन्यत्रापि पवित्रपस्रूपकरणग्रह्णोपस्पर्शनश्रपणाग्निमन्थनादौ तृणार्थे तृणकार्ये प्रस्तुताद्बर्हिषोऽन्यान्येव तृणानि ग्राह्याणि अयुक्तत्वादेव · यतः श्रुतिरेव विनियुक्तविनियोगे यत्नं करोति तस्या द्वे तृणेऽआदायेति अथ स्तीर्णायै वेदेरिति अतो वचनाभावे अन्यदेव ग्राह्यम् । अत्र प्रसङ्गादिदं चिन्त्यते यूपाञ्जने च सर्पिः किं प्रकृतं[1] स्थाल्यां गृहीताज्यम् उताप्रकृतं लौकिकमिति · किं तावत्प्राप्तम् आज्यस्थाल्याज्यम् प्रकृतौ यावदाज्यकार्यं[2] तत्सर्वं तेन कृतम् अतः पशावपि सर्वमाज्यकार्यं तेनैव कर्तव्यमिति प्राप्तऽआह ·

यूपाञ्जने च सर्पिः ॥ ८ ॥ घृतमन्यदेव ग्राह्यम् न तु प्रकृतं स्थाल्याज्यम् · यद्यपि तत्प्रकृतावसंयुक्तमुत्पन्नम् तथापि यानि प्रकृतावाज्यकार्याणि तदर्थमेव · अतः प्रकृतिवत्पशावपि तेन तदर्थेनैव भवितव्यम् न च प्रकृतौ यूपाञ्जनमस्ति तस्मान्नात्र[3] तदाज्यस्थाल्याज्यस्य प्रयोजकम् अतो लौकिकमेवोपादाय यूपाञ्जनं कर्तव्यम् ।

पुरोडाशपयस्याधानासु चेह्न् ॥ ९ ॥ [4] ज्योतिष्टोमे पु॰नासु इह्न्प्रकृतानि गृह्णीयात् इह्न्नप्रकृतानि लौकिकानीति विकल्पः । पितृभूत्याचार्यास्त्वेवं व्याचक्षते · चशब्दस्तुशब्दस्यार्थे पु॰नासु तु योऽप्रकृतान्युपादद्यात् स इह्न् स्वे-

[1]) प्राकृतं २　[2]) ॰दाज्यं कार्यं २　[3]) तस्मान्न २　[4]) इध्या प्राकरणिकानि (? प्राकरिकाणि Cod.) · सोमे पुरोडाशमात्रामैन्द्रवायवे प्रास्यति पयस्यां मैत्रावरुणे आश्विने धाना इत्यत्र (१. ११. २६ — २८.) Mahâd.

छयैवोपादेयात् न तु शास्त्रतः · अशास्त्रार्थ एवायम् यदप्रकृतस्योपादानम् [१] · कुतः पुरोडाशादिषु द्वितीयादर्शनात्पुरोडाशादीनामेवायं प्रतिपत्तिरूपः संस्कारो न ग्रहाणाम् · प्रतिपत्तिश्च विद्यमानानां क्वचिदुपयुक्तानां च भवति न प्रतिपत्त्यर्थमुत्पाद्यन्ते · अपि चावयवश्रवणान्येतानि विद्यमानानां चावयवा गृह्यन्ते नावयवार्थमुत्पाद्यन्ते · तस्माद्द्विदेवत्यपात्रेषु प्रतिपादितशेषं यजमानेन भक्षितव्यमिति । जैमिनेरप्ययमेव सिद्धान्तः (३. ८. ३४.) अपनयस्त्वेकदेशस्य विद्यमानसंयोगादिति · अत इदं व्याख्यानं युक्तम् ।

तयोः प्रस्तरꣳ स्तृणात्यूर्णम्रदसमिति (२. ५) ॥ १० ॥ तयोः उदगग्रस्तीर्णविधृत्योरुपरि प्रागग्रं प्रस्तरं स्तृणाति · अत्र प्रस्तरस्याङ्गप्रधानार्थजुहूधारणार्थत्वम् अतस्तत्स्तरणम् · मन्त्रे पितृयज्ञे स्वासस्थं देवपितृभ्य इत्यूहः ।

अभिनिदधात्या त्वा वसव इति (२. ५) ॥ ११ ॥ अध्वर्युर्द्वाभ्यामपि हस्ताभ्यां प्रस्तरमभिनिदधाति आक्रामति प्रस्तराभिमुखौ पाणी निदधाति · नात्रोदकस्पर्शनम् मन्त्रस्य प्रस्तरो देवता यतः ।

सव्याशून्ये जुहूं प्रतिगृह्य निदधाति घृताचीति (२. ६.) ॥ १२ ॥ [२] अध्वर्युर्जुहूमग्नीधा समर्पितां प्रतिगृह्य आदाय सव्येन हस्तेनाविमुक्ते प्रस्तरे तस्योपरि प्रागग्रामासादयति ।

एवमितरेऽउत्तराभ्यां प्रतिमन्त्रं बर्हिष्युपभृतं ध्रुवां चावकृष्टेऽनुपूर्वम् [३] ॥ १३ ॥ इतरे जुह्वा अन्ये द्वे स्रुचौ बर्हिष्यासादयति · एवमिति प्रतिगृह्य . उपभृतं ध्रुवां च अनुक्रमेण अवकृष्टे अपकृष्टे जुह्वपेक्षया उपभृतमवकृष्टाम् उपभृदपेक्षया च ध्रुवामवकृष्टाम् [४] · उत्तराभ्यां मन्त्राभ्यां प्रतिमन्त्रमेकैकामासादयति ।

पुरोडाशावभिघार्योद्वास्योपस्तीर्णे निधायानक्ति यस्ते प्राणः पशुषु प्रविष्टो देवानां विष्ठामनु यो वितस्थे आत्मन्वान्त्सोम घृतवान्हि भूत्वाग्निं गह स्वर्यजमानाय विन्देति ॥ १४ ॥ [५] ध्रुवासादनानन्तरं गार्हपत्यसमीपे गत्वा पुरोडा-

---

[१]) यदप्राक् ० २ [२]) गृहमेधीयायामनाज्यस्रुगासादने घृताच्यसीति पदद्वयं निवर्तते Mahád.
[३]) We expect ऽअनुपूर्वम्, as the *e* of अवकृष्टे is *pragrihya*, See Pâṇini १. १. ११.
[४]) जुह्वा नीचां बर्हिष्युपभृतम् उपभृतो नीचां ध्रुवाम् Mahád. [५]) Káṇva, see Váj. S. pag. ३५.

शावभिघार्य उत्तरत उद्वास्य पूर्वंतरमुपस्तीर्णे पात्रे निधाय अनक्ति · उपस्तीर्णऽइति पूर्वंतरमुपस्तरणम् यत उद्वास्योपस्तरणं कर्तुमशक्यम् पुरोडाशेन रुद्धस्तत्वात् । एतदभिघारणं हविर्मात्रस्य भवति · पुरोडाशग्रहणमुपलक्षणार्थम् · सूर्येत्याग्नेयं पुरोडाशमभिघारयति तूष्णीमुत्तरम् । एकैव पुरोडाशपात्री तस्यां दक्षिणोत्तरप्रदेशे निम्नस्थानद्वयं कृत्वा तत्रोपस्तीर्य पुरोडाशौ स्थापनीयौ । अयं क्रमः · प्रथमं वेदेन पुरोडाशविभस्मीकरणम् ततः पात्र्याः[1] स्थापनम् पुरोडाशयोरभिघारः पात्र्याः स्थानद्वयऽउपस्तारः अथवा प्रथमं पात्र्यामुपस्तारः ततः पुरोडाशयोरभिघारः उदगुद्वासनम् वेदेन पुनर्विरजस्करणम् स्थापनं पात्र्या[2] उपरि प्राणदानमिति । अनेकयजमानके यजमानाभ्यां यजमानेभ्यो विन्देति · महापितृयज्ञे च पशुषु प्रविष्टः पितॄणां विष्ठामनु इत्यूहः ।

यथादेवतमन्यत् ॥ १५ ॥[3] अञ्जनमन्त्रे अग्निं गछेत्यस्य स्थाने यथादेवतम् अग्नीषोमीये पुरोडाशे अग्नीषोमौ गछ दोह्योरिन्द्रं गछ ।

प्रत्यनक्ति कपालानि यानि घर्मे कपालान्युपचिन्वन्ति वेधसः पूष्णस्तान्यपि व्रतऽइन्द्रवायू विमुञ्चतामिति ॥ १६ ॥ स्रुवेण कपालानि अनक्ति प्रत्येकमुपधानक्रमेण · प्रतिकपालं च मन्त्रप्रयोगः · बहुवचनं तु पूजार्थम् ।

तूष्णीं वा ॥ १७ ॥[4] शाखान्तरात् मन्त्रं विनैव कपालान्यनक्ति प्रत्येकमुपधानक्रमेण ।

संख्ययोद्वासयति ॥ १८ ॥[5] संख्यया संख्यावाचिना पूरणप्रत्ययान्तेन शब्देन करणमन्त्रभूतेन प्रथमं द्वितीयमित्यनेन गणयन् उपधानक्रमेणैव कपालानि उद्वासयति · यावत्कपालं प्रयोगः · विकृतौ कर्परस्यापि कपालस्थानीयस्याञ्जनोद्वासने भवतः ।

प्रियेण धाम्नेति (२. ६.) हवींऽषि वेद्यां कृत्वा ध्रुवा असदन्निति (२. ६.) सर्वाण्यालभते ॥ १९ ॥ आज्यस्थालीपुरोडाशादीनि हवींषि उदक्संस्थानि ध्रुवा-

---

1) ? पात्र्योः २ 2) ? पात्र्योः २ 3) हविरनक्ति Mahád. 4) तूष्णीं वा कपालान्यनक्ति सर्वेवेति श्रीअनन्तः Mahád. 5) संख्याशब्देन करणभूतेन प्रथममुद्वासयामि द्वितीयमुद्वासयामीत्यादिप्रयोगेण Mahád.

या उत्तरतो वेद्यामासाद्य उपयोगक्रमेण ग्रालभते · तेन प्रथममाज्यस्थाल्याज्यस्य ततो जुहूपभृद्ध्रुवास्थस्याज्यस्य ततः पुरोडाशादेरिति । ग्रनेकयजमानके पाहि यज्ञपती यज्ञपतीन् । पशौ ध्रुवालम्भनादुत्तरं पृषदाज्यालम्भनम् ।

पाहि मामित्यात्मानम् (२.६) ॥२०॥ हृदयदेशं हस्तेन स्पृशति उपनिषत्सु हि ग्रत्र हृदयऽग्रात्मानं पश्येदिति कथ्यते · ततोऽप उपस्पृशति च । स चायमालम्भ ग्रात्मसंस्कारः करिष्यमाणकर्मार्थमाराडुपकारः · ततश्च पशौ सुत्यायां च पुनः पुनर्ह्वविरासादने कृते न भवति प्रथमत एव सकृत्कृतेनात्मनः कर्मसमाप्तिपर्यन्तं संस्कृतत्वादिति ।

ग्रत्र वा व्रतोपायनमत्र वा व्रतोपायनम् ॥२१॥ [1] शाखान्तरात् ॥ ॥ ग्रष्टमी कण्डिका ॥८॥

इति कात्यायनसूत्रव्याख्याने महायाज्ञिकदेवकृते द्वितीयोऽध्यायः ॥ ॥

ग्रथ पद्धतिः ॥

ततो गन्धर्वस्त्वा विश्वावसुरिति (२.३.) मन्त्रेणाहवनीयस्य पश्चादुदगग्रं स्थूलं मध्यमं परिधिं परिदधाति · तत इन्द्रस्य बाहुरसीति (२.३.) दक्षिणतः प्रागग्रमणिष्ठं द्वितीयं परिधिं निदधाति · ततो मित्रावरुणौ त्वेति (२.३.) उत्तरतस्तृतीयमणिष्ठतरं प्रागग्रं परिधिं परिदधाति । ततः स इध्मादृहीतया समिधा तूष्णीं प्रथमं परिधिं स्पृष्ट्वोत्थाय तां समिधं वीतिहोत्रमिति (२.४.) ग्राहवनीयेऽभ्यादधाति · तत इध्मादेव द्वितीयां समिधमादाय परिधिमस्पृष्ट्वैव समिदसीति (२.५.) ग्रनेन मन्त्रेणादधाति । तत उपविश्याहवनीयमीक्षमाणः सूर्यस्त्वेति (२.५.) जपति स्वरेण । ततः प्रादक्षिण्येन वेदिं प्रत्यावृत्यागत्य स्तीर्णायां एव वेदेर्द्वे तृणे साग्रेऽरत्निमात्रेऽग्रादाय वेदिमध्यऽउत्तराग्रे निदधाति सवितुर्बाहू स्थ इति (२.५.) · तत ऊर्णम्रदसमिति (२.५.) तयोस्तृणयोरुपरि मूलभागे प्रागग्रं प्रस्तरं स्तृणाति ग्रभिहततराणि प्रस्तरमूलानि बर्हिर्मूलेभ्यः करोतीत्यापस्तम्बः · तत ग्रा त्वा वसव इति (२.५.) उभाभ्यां हस्ताभ्यां प्रस्तरमभिनिदधाति ग्रधः पीडयतीत्यर्थः । ततोऽग्नीधा समर्पितां जुहूं दक्षिणेन पाणिना प्रतिगृह्य सव्यहस्तेनाविमुक्ते प्रस्तरे

[1] ग्रकृतं चेत् ग्रत्रैव कर्तव्यम् तुल्यशास्त्रत्वात् Mahád.

प्रागग्रां सादयति घृताच्यसि जुहूरिति (२. ६.) समं मूलैर्जुह्वा दण्डं करोतीति सूत्रम् · ततः सव्येन वेदं गृहीत्वोपभृतं तथैव प्रतिगृह्य घृताच्यस्युपभृदिति (२.६.) बर्हिष्येव जुह्वा उत्तरत आसादयति जुहूतोऽवकृष्टां पश्चाद्वर्तमानामसंस्पृष्टाम् · ततो घृताच्यसि ध्रुवेति (२. ६.) मन्त्रेण ध्रुवामुपभृत उत्तरतो विधृत्यग्रयोरुपर्यासादयति उपभृदपेक्षया अवकृष्टामसंस्पृष्टां च · अनूचीरसंस्पृष्टाः स्रुचः सादयतीति सूत्रम् · तथा उत्तरेण जुहूमुपभृतमासादयत्यधस्ताद्विधृत्योः प्रतिकृष्टतरामिव उत्तरेणोपभृतं ध्रुवां प्रतिकृष्टतरामिवोपरिष्टाद्विधृत्योरिति च · तथा

दक्षिणेन जुहूꣳ स्रुवꣳ सादयत्युत्तरेण वा ध्रुवामिति। अथ दक्षिणेनाज्यस्थालीं स्रुवं चादाय सव्ये पुरोडाशपात्रीं वेदं चादाय प्रदक्षिणमावृत्य प्रत्यगागत्य गार्हपत्यस्य पश्चादुपविश्य गार्हपत्यस्योत्तरत आज्यस्थालीं निधाय तस्या उत्तरतः पुरोडाशपात्रीमुदक्सं[स्थं] स्थापयित्वा वेदेन पुरोडाशाभ्यां भस्म पराकृत्य स्थाल्याः स्रुवेण पुरोडाशौ तूष्णीमभिघार्यैकस्यामेव पात्र्यां दक्षिणत उत्तरतश्च द्वयोः स्थानयोरुपस्तृणाति पात्र्या उपर्युभयत्रैकैकस्रुवं निनयतीत्यर्थः · तित्तिरिसूत्रे अथादत्ते दक्षिणेनाज्यस्थालीं स्रुवं च सव्येन पात्रीं वेदमित्येतत्समादाय प्रदक्षिणमावृत्य प्रत्यङ्ङागत्य जघनेन गार्हपत्यमुपविश्य पात्र्यां द्विधोपस्तृणीतऽइति · अन्येष्वपि सूत्रेषु पात्र्यामुपस्तृणातीत्येकवचनमेवास्ति। ततः पुरोडाशावपर्यावर्तयन्नुद्वास्योपस्तीर्णायाः पात्र्या उपरि क्रमेण निदधाति · तत्र प्रथमं पुरोडाशमपर्यावर्तयन्हस्तेन स्पर्शमकुर्वन्काष्ठाद्युपायेनादायोत्तरं पुरोडाशं पूर्वेणाज्यस्थालीमपरेण नीत्वा पात्र्यां स्थापयेत् द्वितीयं पुरोडाशमाज्यस्थालीं प्रथमं पुरोडाशं चापरेण नीत्वा पात्र्यां स्थापयेत् · मानवे वेदेन पुरोडाशयोर्भस्मापोह्यति वेदोपयाम आज्यस्थाल्याः स्रुवेणाभिघारयति पात्र्यामुपस्तृणात्युदगुद्वासयति वेदेनापभस्मानं करोत्यनभिघ्नन्पाणिना वेदशिरसा च तत उपस्तीर्णे सादयति यस्तऽइत्यनक्ति अपर्यावर्तयन्नधस्ताच्चोपानक्तीति · तित्तिरिसूत्रे चायमपि क्रमोऽस्ति[1] पुरोडाशविभस्मीकरणम् पात्रीस्थापनम् तयोरुपस्तारः कपालस्थयोरेव पुरोडाशयोरभिघारः उद्वासनमिति उभयोः पुरोडाशयोः। ततः कपालानि गण-

१) ? तैत्ति॰ ॰मधिक्रमोस्ति ?

यित्वा वेदोपग्रहः स्रुवेणाज्यस्थाल्या घृतमादाय पुरोडाशावनक्ति यस्ते प्राण इति मन्त्रेण अग्निं गच्छेति प्रथमम् अग्नीषोमौ गच्छेति द्वितीयम् यथास्वं मन्त्रे अयं विशेषः · ततः स्रुवेण सर्वाणि कपालान्याज्येनाभ्यनक्ति उपधानक्रमेण तूष्णीम् यानि घर्मे कपालानीति मन्त्रेण वा प्रतिकपालं मन्त्रावृत्तिः । ततः स्फ्यमादाय प्रथममुद्वासयामीति प्रथमं कपालमुत्तरत उद्वासयति · एवं सर्वाणि द्वितीयमुद्वासयामि तृतीयम् चतुर्थम् पञ्चमम् षष्ठम् सप्तमम् अष्टममिति प्रथमस्य · द्वितीयस्याष्टावेवमेवोद्वास्य नवमम् दशमम् एकादशम् उद्वासयामीति सर्वत्र शेषः · अनेन प्रकारेण पूरणप्रत्ययान्तेन संख्याशब्देन करणमन्त्रभूतेन कपालान्युद्वासयति । ततः सर्वाणि हवींषि वेदिसमीपे नीत्वा वेदोपग्रहेणाज्यस्थालीं ध्रुवाया उत्तरतो बर्हिष्यासाद्य स्फ्योपग्रहेण तस्या उत्तरतः पुरोडाशावुदक्संस्थावासादयेत् · प्रियेण धाम्नेति (२.६) अयमेव सर्वेषामासादनमन्त्रः । ततो वेदं गृहीत्वा ध्रुवा असदन्नृतस्येति (२.६) आज्यस्थाल्याज्यमालभते ततो जौहवम् तत औपभृतम् ततो ध्रौवम् . ततो वेदं ध्रुवायाः पुरस्तान्निधाय स्फ्योपग्रहेण प्रत्येकं पुरोडाशावालभते · ध्रुवा असदन्नित्ययमेव सर्वेषामालम्भे मन्त्रः · ततोऽध्वर्युः पाहि मामिति (२.६) स्वमात्मानं हृदयऽआलभते तत उदकोपस्पर्शः · अस्मिन्काले वा यजमानस्य व्रतग्रहणम् ॥ ॥ ८॥

इति द्वितीयस्याष्टमी कण्डिका ॥ ॥

इति श्रीत्रिरग्निचित्सम्राट्स्थपतित्रिंशत्क्रतुकृन्महायाज्ञिकश्रीप्रजापतिसुतयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ द्वितीयोऽध्यायः समाप्तः ॥ ॥

इति कातीये श्रौतसूत्रे द्वितीयोऽध्यायः ॥ २॥ ॥

होतृषदनं कृत्वापरेण वेदिं श्रोणिं वोत्तरेणेध्मात्समिधमादायाग्नये समिध्यमानायानुब्रूहीत्याह ॥१॥ अध्वर्युर्वेदिमपरेण वेदेः पश्चाद्गार्हपत्याहवनीययोरन्तराले होतुरुपवेशनार्थं वारणादिवृक्षजं शुष्ककुशैरास्तीर्णमासनं स्थापयित्वा अथवा वेदिश्रोणिमुत्तरेण स्थापयित्वा तत एहि होतरित्येवं होतारमामन्त्र्य होतरि तत्रागते सति इध्मादेकां समिधं हस्ते गृहीत्वाग्नये समिध्यमानायानुब्रूहीत्येवं होतारं प्रति ब्रवीति · होतुरामन्त्रणं शाङ्खायनसूत्रात् (१.४.४.)। वरुणप्रघासेषु अग्निभ्यां समिध्यमानाभ्याम् · अनेकयजमानके उदयनीयावकुल्पयन्ते ऽग्निभ्यः समिध्यमानेभ्यो ऽनुब्रूहीत्यूहः ।

होतरिति चैके ॥२॥ शाखिनो ऽग्नये समिध्यमानाय होतरनुब्रूहीत्येवंविधं प्रैषं कुर्वन्ति ।

प्रथमस्थानेन प्राक्स्विष्टकृतः ॥३॥[1] सर्वे मन्त्राः स्विष्टकृतः प्राक् स्विष्टकृत्प्रैषा अपि उपांश्वपेक्षया किंचिदुच्चैर्भवता स्वरेण प्रयोक्तव्याः ।

मध्यमेनेडायाः ॥४॥[2] स्विष्टकृत आरभ्य आ इडायाः मध्यमेन स्वरेण सर्वं मन्त्रजातं प्रयोज्यम् ।

शेषमुत्तमेन ॥५॥[3] इडात आरभ्य कर्मापवर्गान्तं सर्वे मन्त्रा उत्तमेन । अत उपांशु प्रयोगः श्रुतेरित्यस्य (१.३.१०.) दर्शपूर्णमासयोरप्रवृत्तिः स्वरान्तरविधानात्।

---

1) प्रातःसवनेन (!) मन्द्रस्वरेण प्रधानान्तं सम्प्रैषा भवन्ति Mahâd. See १.६.१६. ff.
2) मध्यमेन स्वरेण माध्यन्दिनेन सवनेन (!) स्विष्टकृत्प्रभृतीडान्तम् · न सम्प्रैषा इत्युच्चैः प्राप्ते (१.३.११) स्थानानि नियम्यन्ते Mahâd. 3) अनुयाजप्रभृति शेषमुत्तमेन तृतीयसवनेन (!) Mahâd.

संतन्वन्निव मेऽनुब्रूहीत्याह यजमानः ॥ ६॥ यजमानोऽनेन मन्त्रेण संतन्वन्निवेत्यादिना होतारं सम्बोधयति । यजमाने प्रोषितेऽध्वर्युः । अनेकयजमानके एक एव · संतन्वन्निव नावनुब्रूहि नोऽनुब्रूहीत्यूहः ।

अङ्गुष्ठाभ्यां चाववाधते पाद्याभ्यां वेदमहममुमवबाधऽइति द्वेष्यम् ॥ ७॥ चकाराद्यजमान एव · इदमहमिति द्वेषार्ह वैरिणमववाधते अङ्गुष्ठाभ्यां भूमिमाक्रामति भूमौ पीडयतीत्यर्थः द्वेष्यस्य संनिधावभावात् । वाशब्दोऽवधारणे पाद्याभ्यामेव न हस्ताङ्गुष्ठाभ्याम् काण्वानाम् पाद्याभ्यामङ्गुष्ठाभ्यामिति विशेषश्रवणात् सामान्यस्य विशेषपरताया न्याय्यत्वात् [1)]। अववाधनं च प्र वो वाजा इत्याद्यासु (१.४.१.७.) सामिधेनीष्वृक्षु पठ्यमानासु कर्तव्यम् । प्रोषिते यजमानेऽध्वर्युः ।

अभावे द्विषन्तं भ्रातृव्यमिति वा ॥ ८॥ अमुमित्यस्य स्थाने द्वेष्यस्य नाम प्रयोज्यम् · तदभावे द्विषन्तमिति भ्रातृव्यमिति वा शाखान्तराद्विकल्पः ।

यावत्सामिधेनि वेदेदमहं तावतिथेन वज्रेणेति ॥ ९॥ इदमहममुमवबाधऽइति मन्त्रे अयमधिको विशेषः · इदमहमित्यस्यानन्तरम् यावत्संख्याः सामिधेन्योऽस्मिन्कर्मणि तद्यावत्सामिधेनि प्रस्तुतं कर्म यावत्संख्यसामिधेनीकं जानीयात् तावतिथेन वज्रेण द्विषन्तमवबाधऽइत्येवंविधमन्त्रप्रयोगेणाववाधते · यत्पञ्चदशसामिधेनीकं कर्म सप्तदशसामिधेनीकं वा तत्रेदमहं पञ्चदशेन वज्रेणेति सप्तदशेनेति वा ब्रूयात् · पित्र्यायाम् इदमहं तृतीयेन उपसत्सु नवमेन इष्टकापशौ चतुर्विंशेन प्राजापत्यपशुपक्षे एकविंशेन ।

प्रतिप्रणवमाधानम् ॥ १०॥ सामिधेन्यनुवचनं कुर्वन्होता पञ्चदशानामपि सामिधेनीनामन्तेषु प्रत्यृचं प्रणवं पठति · तत्राध्वर्युः प्रतिप्रणवम् प्रणवे-प्रणवे एकैकस्येध्मस्याहवनीये आधानं प्रक्षेपं करोति । स चायं कालार्थः संयोगो नाङ्गाङ्गिभावः उभयोरप्यग्न्यर्थत्वात् इध्मो ह्यग्नीन्धनार्थः सामिधेन्योऽपि पठ्यमाना अग्न्यनुवादिन्यः · प्रयोजनम् सामिधेन्यामनुक्तायामिध्मकाष्ठे प्रक्षिप्ते सामिधेनी अनूच्यतऽएव । सामिधेन्यभावेऽपि पयस्यायामिध्मकाष्ठानां प्रक्षेपो भवति

---

१) सामान्यस्य विशेषपरतान्त्रिवोचितेति कर्कः · पाद्याभ्यामिति काण्वीयानां नियमः पाद्याभ्यामङ्गुष्ठाभ्यामिति श्रुतेः Mahâd.

अग्नीन्धनार्थत्वात् उपवाजनसंमार्गादिवदग्निसंस्कारकत्वात् । सौत्रामण्यां च प्रतिप्रस्थातुरपि दक्षिणाग्नौ ।

समिद्ध इति प्रागतः सर्वमिध्मम् एकवर्जमनुयाजार्थेत् ॥ ११ ॥ समिद्धो अग्न आहुतेत्यतः (१.४.१.३८.) प्रतीकात्प्राक् यः प्रणवस्तस्मिन्प्रणवे[1] एकवर्जम् एकां समिधं[2] वर्जयित्वा अवशिष्टं सर्वमिध्मं प्रक्षिपेत् यदि अनुयाजा भवन्ति । अनुयाजार्थेदिति तद्विकृतिविषयम् आतिथ्यादावनुयाजाभावे समित्परिशेषणं न भवति ।

अनुवचनान्ते वेदेनाहवनीयं त्रिरुपवाज्य स्रुवेण पूर्वमाघारमाघार्याहाग्निमग्नीत्संमृड्ढीति ॥ १२ ॥ त्रिरेव प्रथमां त्रिरुत्तमामन्वानन्ननुब्रूयादिति[3] प्रकृत्यैतदनुवचनमिति (१.३.५.१३.) श्रुतेः अतोऽनुवचनान्तः सामिधेन्यन्तः तस्मिन्सामिधेनीनामन्ते[4] अध्वर्युः वेदेन आहवनीयं त्रिर्वाजयित्वा आज्यस्थाल्याः सकाशादाज्यं गृहीत्वा स्रुवेण आहवनीये उत्तरे भागे ऋजुं दीर्घं संततं प्राञ्चं तूष्णीमेव पूर्वमाघारमाघार्य ततोऽग्नीधं प्रति अग्निमग्नीत्संमृड्ढीति प्रैषमाह प्रजापतिर्देवता तेन स्वाहाकाराभावः । वरुणप्रघासेषु सौत्रामण्यां च अग्नीऽअग्नीत्संमृड्ढीत्यूहः क्रमेणोभयोः संमार्गः । दशाहुतिपक्षेऽवभृथेष्ट्याम् अपोऽग्नीत्संमृड्ढीत्यूहः । षडाहुतिपक्षे तु संमार्ग एव न भवति पूर्वाघारस्तु अदृष्टार्थ आराडुपकारकः अतश्च यावदुक्तो गृहमेधीयपयस्यादौ न भवति उपवाजनं तु प्रवर्तत एवाग्नेरदृष्टसंस्कारत्वात् ।

इध्मसंनहनैरनुपरिधि संमार्ष्ट्यग्ने वाजजिदिति (२.७.) त्रिस्त्रिः परिक्रामम् ॥ १३ ॥[5] इध्मबन्धनार्थैस्तृणैरनुपरिधि परिधिसंनिकृष्टेषु त्रिष्वग्निप्रदेशेषु प्रदक्षिणं क्रमेणैकैकस्मिन्प्रदेशे आहवनीयमग्निं त्रिस्त्रिः संमार्ष्टि संमार्जनेन विरजस्कमुज्ज्वलं करोति परिक्रम्य-परिक्रम्य तत्तत्परिधिदेशं गत्वा तदायामानुसारेण पार्श्वतोऽग्निं संमार्ष्टि ।

---

1) शोचिष्केशस्तमीमहेऽ३मिति प्रणवे Mahád. 2) ? सामिधेनीं २. 3) °त्वानमनु° २. 4) अग्ने महाँ३ असि ब्राह्मण भारतेति (१.४.२.२.) पठ्यमाने Mahád. 5) अवभृथेष्ट्यां विपरिणाम्यते आपो वाजजितो वाजं वः सरिष्यन्तीर्वाजजितः संमार्ज्मीति Mah.

तूष्णीमुपरि ॥१४॥ 1) परिक्रम्याहवनीयस्योपरि मध्यप्रदेशे तूष्णीं त्रिः संमार्ष्टि · तूष्णीमिति यत्नादन्यासु तिसृषु दिक्षु प्रतिदिशं मन्त्रावृत्तिर्भवतीति ज्ञापयति ।

अपरमाहवनीयादञ्जलिं करोति नमो देवेभ्यः स्वधा पितृभ्य इति (२.६.) दक्षिणत उत्तानम् ॥१५॥ आहवनीयस्य पश्चाज्जुहूपभृतोः पुरस्तात् अञ्जलिं करोति नमस्कारार्थत्वाच्च पुटाञ्जलिः · ततः स्वधा पितृभ्य इत्यनेन मन्त्रेण तस्मादञ्जलेर्दक्षिणतो द्वितीयमञ्जलिमुत्तानं करोति पूर्वाभिमुखो 2) यज्ञोपवीत्येव। तदञ्जलिकरणमुत्तराघारार्थम् अतश्च तदभावे न भवति ।

अप उपस्पृश्य सुयमे मऽइति (२.७-८.) जुहूपभृतावादायोत्तरां जुहूं कृत्वा दक्षिणातिक्रामत्यङ्घ्रिणा विष्णाविति (२.८.) ॥१६॥ उदकं स्पृष्ट्वा प्रथमं पाणिभ्यां जुहूमादाय उत्तरां कृत्वा उपभृत उपरि निधाय ततः सुयमे मऽइति द्वेऽअपि स्रुचौ सकृदेवादाय अङ्घ्रिणा विष्णाविति दक्षिणस्यां दिशि गच्छति । महापितृयज्ञे देवपितृभ्य इत्यूह्यः । अपामुपस्पर्शनस्य पित्र्यं मन्त्रमुक्त्वा इति (१.१०.१४.) प्राप्तस्य प्राचीनावीतित्वदक्षिणामुखत्वयोर्व्युदासार्थं पुनरुक्तमित्यदोषः । अङ्घ्रिणा विष्णावित्ययं यज्ञतिस्थानं प्रति गमने मन्त्रः ।

परिधीनपरेण संचरो होष्यतः ॥१७॥ परिधीनां पश्चात्स्रुचां पूर्वेण होमं करिष्यतोऽध्वर्योर्गमनागमनमार्गः · सर्वार्थोऽयं संचरः नोत्तराघारमात्रे ।

सव्येनेतो दक्षिणेनामुतः ॥१८॥ सव्येन पादेन इतोऽस्मात्स्थानाद्यज्ञतिदेशं गच्छति यज्ञतिदेशात्प्रत्यागच्छन्दक्षिणेन पादेन गच्छति । एतदपि सर्वार्थमेव ।

वसुमतीमित्यवस्थाय (२.८) ॥१९॥ 3) वसुमतीमिति मन्त्रेण यज्ञतिदेशे उदङ्प्राङ् अवस्थाय ईशानाभिमुखः स्थित्वा ॥ ॥ प्रथमा कण्डिका ॥१॥

अथ पद्धतिः ॥

अथाध्वर्युर्होतुरासनं दर्भास्तृतं गार्हपत्याहवनीययोरन्तरालेऽंशस्य मध्यभागे 4)

1) मध्यमदक्षिणोत्तरपरिधिपरिधानक्रमेण · परिक्रम्य-परिक्रम्योत्तरत उपविश्य · सकृन्मन्त्रवचनम् । महापितृयज्ञे सकृत्सकृत्संमार्जनम् Mahád. 2) °मुख २. 3) २ joins this sútra with the beginning of the next ka*nd*iká. 4) ? °राले शस्यम° १.

वेदेः पश्चात्स्थापयित्वा एहि होतरिति होतुरामन्त्रणं करोति · ततो होतर्याचन्यागते सति अध्वर्युरिध्मादिकां समिधमादाय होतारं प्रति अग्नये समिध्यमानायानुब्रूहीति ब्रवीति · होता च ब्रह्मन्त्सामिधेनीरनुवक्ष्यामीति ब्रह्माणं पृच्छति · ब्रह्मा च प्रजापतेऽनुब्रूहि येहीत्यन्तमुपांशु पठित्वा ओ३मनुब्रूहीति होतारं प्रसौति · ततो होता कं प्रपद्यऽइत्यादि[1] जपति · अस्यान्ते यजमानः स्फ्यं गृहीत्वा संतन्वन्निव मेऽनुब्रूहीति होतारं प्रेष्यति[2]। अस्मिन्कर्मण्यादित आरभ्य स्विष्टकृतः प्राक् सर्वं मन्त्रजातं प्रथमस्थानेन प्रयोज्यम् स्विष्टकृत आरभ्येडामार्जनान्तं मध्यमस्वरेण ततः शेषं समाप्तिपर्यन्तमुत्तमेन स्वरेणेति तट्टीकायाम् · प्रैषाणामिवायं धर्मो न मन्त्रान्तराणामिति[3] कर्कादयः सर्वे। ततो होत्रा उपांशु त्रिर्हिंकृत्य प्र वो वाजा इत्यासु ऋक्षु मध्यमस्वरेणानूच्यमानासु यजमानः पादाङ्गुष्ठाभ्यां भूमिमधः पीडयति इदमहं पञ्चदशेन वज्रेणामुकमवबाधऽइति वैरिनाम द्वितीयान्तं गृहीत्वा · शत्रोरभावे इदमहं पञ्चदशेन वज्रेण द्विषन्तमवबाधऽइति प्रयोगः वज्रेण भ्रातृव्यमवबाधऽइति वा नात्रापां स्पर्शः अभिचाराभावात् · पाप्मानमिति पदं तु स्वश्रुतौ सूत्रे च नास्ति शाङ्खायने (१.४.३.) होतुर्वेद्यभिमर्शने पठितमस्ति। अध्वर्युः स्फ्यमादाय तिष्ठन्सामिधेनीनां प्रणवे-प्रणवऽएकैकमिध्मकाष्ठमाहवनीयेऽभ्यादधाति · समिध्यमानोऽअध्वर इत्यस्या ऋचः प्रणवे समिद्धोऽअग्नऽइत्यतः प्राक् एकमिध्मकाष्ठं परिशिष्यावशिष्टानां पञ्चानां काष्ठानां सहैव प्रक्षेपं कुर्यात्। तत उत्तरत उपविश्य दक्षिणं जान्वाच्य वृणीध्व हव्यवाहनो३म् अग्ने[4] महां असीत्येतस्मिन्होत्रा पठ्यमाने वेदेनाहवनीयं त्रिरुपवाज्य वेदोपयमः स्रुवेणाज्यस्थाल्या आज्यं गृहीत्वोत्तरं परिधिसंधिमन्ववहृत्य प्रजापतिं मनसा ध्यायन्नग्नेरुत्तरप्रदेशे ऋजुं दीर्घं संततं प्राञ्चं पूर्वमाघार[माघार]यति इदं प्रजापतये। ततोऽग्नीधे स्फ्यमिध्मसंनहनं च समर्पयन्नग्निमग्नीत्संमृड्ढीति अग्नीधं प्रेष्यति · ततोऽग्नीत्स्फ्यं सव्ये गृहीत्वाग्निं प्रदक्षिणीकृत्य दक्षिणपरिधिसंनिधौ स्थित्वा इध्मसंनहनैर्दक्षिणपरिधिसमीपपार्श्वेऽग्निं त्रिः प्राक्संमार्ष्टि

---

1) See Çánkháy. १.३.५. 2) ? प्रेषयति १ 3) ? मन्त्रान्तरामीं इति १· 4) ? °वाहना३अग्ने १ See १.३.१.३१—२.२.

अग्ने वाजजिदिति मन्त्रेण सकृत् द्विस्तूष्णीम् · ततस्तत्रैवावस्थितो मध्यमपरिधिसंनिहितपार्श्वेऽग्निं त्रिरुदक्संमार्ष्टि अत्राप्यग्ने वाजजिदिति सकृन्मन्त्रेण द्विस्तूष्णीम् · ततो दक्षिणपार्श्वादुत्तरपार्श्वं गत्वोत्तरपरिधिसंनिहितपार्श्वेऽग्निं त्रिः प्राक्संमार्ष्टि सकृन्मन्त्रेण द्विस्तूष्णीम् स एव मन्त्रः · ततस्तत्रैवावस्थितो मध्ये प्राञ्चं तूष्णीं त्रिः संमार्ष्टीति हरिस्वामिनः · अन्ये तु उत्तरपार्श्वाद्दक्षिणपार्श्वं गत्वा दक्षिणपरिधिसंनिधौ संमृज्योत्तरपार्श्वं गत्वा मध्यमपरिधिसंधावग्निं संमृज्य पुनर्दक्षिणपार्श्वं गत्वोत्तरपरिधिसंनिधावग्निं संमृज्य पुनः प्रादक्षिण्येन उत्तरतो गत्वा मध्ये तूष्णीं त्रिः संमार्गः कार्य इत्याहुः । ततो जुहूपभृतोः पुरस्तादाहवनीयमपरेण भूमौ पुटाञ्जलिं निदधाति नमो देवेभ्य इति (२.७.) मन्त्रेण · ततस्तस्मादञ्जलिकरणस्थानाद्दक्षिणस्यां द्वितीयमञ्जलिमुत्तानं करोति स्वधा पितृभ्य इति मन्त्रेण · तत उदकोपस्पर्शनम् नात्रापसव्यम् नापि दक्षिणामुखता । तत उभाभ्यां पाणिभ्यां जुहूं परिगृह्योपभृतोऽग्रस्योपरिमार्गेणानीयोपभृत उपरि निदधाति · ततः सुयमे मऽइति (२.७-८.) मन्त्रेण ते सहैव जुहूपभृतावादायोत्थायाङ्घ्रिणा विष्णाविति (२.८.) मन्त्रेण सव्येन पदेनाग्रतोऽग्रतश्चालितेन वेदेर्दक्षिणभागं प्रति गच्छति · तत्र स्रुचः पूर्वेण परिधीनपरेण प्रस्तराग्रमनाक्रामतो गमनागमनमार्गः · एवमनेन मार्गेण गत्वा वेदेर्दक्षिणभागे वसुमतीमग्नऽइति (२.८.) मन्त्रेणावस्थानं कृत्वेशानाभिमुखस्तिष्ठति ॥ ॥१॥

इति तृतीयस्य प्रथमा कण्डिका ॥

इत इन्द्र इति (२.८-९.) जुहोत्युत्तराघारम् ॥१॥ जुहूमवतार्य इत इति मन्त्रेण आहवनीयस्य दक्षिणभागे ऋजुं दीर्घं संततं प्राञ्चं जौहवेनाज्येन उत्तराघारं जुहोति । मन्त्रवर्णादिन्द्रो देवता [1] · इदमिन्द्रायेति त्यागः · यागे होमे च प्रक्षेपात्पूर्वमवश्यं सर्वत्र त्यागः कर्तव्यः · तथा च कारिकायाम् आदौ द्रव्यपरित्यागः पश्चाद्धोमो विधीयते · तथा च त्रिकाण्डे मण्डनः तुल्य एवाधिकारः

1) वाचो देवतात्वम् वाचे वाऽएतमाघारमाघारयतीति श्रुतेः (१.४.५.४.) · परं तु इन्द्रो वागित्यु वाऽआहुरिति (ibid.) श्रुतेः इन्द्रस्यैव देवतात्वम् · अत एवेत ऐन्द्रमित्यनुक्रमणिकाकारेणोक्तम् (१.६.) Mahâd.

स्याद्दम्पत्योरुभयोर्मिथः कर्तृत्वं च तयोस्तुल्यं द्रव्यत्यागे प्रचक्षते · त्यागवाक्यस्यादावोंकारश्च कर्तव्यः यागहोमादिष्विति सर्वानुक्रमण्यामुक्तत्वात् । स चायमुत्तराघार आराडुपकारकोऽदृष्टार्थः ततश्च गृहमेधीयोपसत्ययस्यादौ यावदुक्ते निवर्तते · वचनाच्च प्रयाजार्थेन चतुर्गृहीतेन जौहवेन क्रियते अतश्च दर्विहोमेषु प्रयाजाभावेन तदर्थजौहवाभावेऽप्याघारस्यावश्यकर्तव्यत्वात्स्याल्याः सकृद्गृहीतेन इन्द्राय स्वाहेति मन्त्रेण तिष्ठतैव होतव्यः । महापितृयज्ञे देवपितृभ्यः ।

आघार्यासंस्पर्शयन्त्स्रुचावेत्य जुह्वा ध्रुवां समनक्ति सं ज्योतिषेति (२.१.) ॥२॥ आघारानन्तरं स्रुचौ परस्परमसंस्पर्शयन् एत्य यजतिस्थानाद्वेदेः पश्चादागत्य उपविश्य जौहवेनाज्येन ध्रौवं समनक्ति जौहवं ध्रौवमध्ये जुह्वैव क्षारयति । अत्र गह्णतामित्यध्याहारः ।

निधायेध्मसंनहनान्यादायोश्रावयेत्याह ॥३॥ ततः स्रुचौ स्वस्थाने सादयित्वा होतारमुत्तरेण गत्वा उत्करस्य पश्चात्प्राङ्मुखोऽवस्थाय इध्मसंनहनानि हस्ते गृहीत्वा प्रवरायाश्रावयति ।

अस्तु श्रौषडित्यग्नीत् ॥४॥ अध्वर्योरुत्तरतो दक्षिणामुखोऽवस्थितोऽस्तु श्रौषडित्येवमग्नीत्प्रत्याश्रावयति ।

वेदिबर्हिरिध्मशकलमपछिद्यैके ॥५॥ शाखिनो वेदौ स्तृतं बर्हिरादाय इध्मशकलं वापछिद्यादायाश्रावयन्ति[1] · अभिपद्येति (१.५.१.२.) अस्य आदाय गृहीत्वेत्यर्थः सर्वत्र सूत्रकारेण स्वीकृतः ।

एवं सर्वत्राश्रुतेषु ॥६॥ एवमित्याश्रावणेऽध्वर्युः प्रत्याश्रावणेऽग्नीत् । आथर्वणे आग्नीध्रस्योत्तरत उपचारः स्फ्यसंमार्गपाणेस्तिष्ठतो दक्षिणामुखस्य यथास्वरमस्तु श्रौषदिति प्रत्याश्रावणमिति ।

अथ प्रवृणीतेऽग्निर्देवो दैव्यो होता देवान्यक्षद्विद्वांश्चिकित्वान्मनुष्वद्भरतवदमुवदमुवदिति यजमानार्षेयाण्याह परस्तादर्वाञ्चि त्रीणि ॥७॥ क्रमस्य पाठादेव प्राप्तत्वादथशब्द उपग्रहऽइत्यस्योत्तरत्रानुकर्षणार्थः अथ गृहीतेनैवेध्मसंन-

---

1) इध्मं भङ्क्त्वा तच्छकलं गृहीत्वा Mahâd.

हनादिना होतारं प्रवृणीते [1] · अथवाश्रुतप्रत्याश्रुतयोः प्रवरणार्थत्वज्ञापनायाथ-शब्दः। अमुवदमुवदित्यत्र [2] सर्वनामस्थाने यजमानसम्बन्धीनि पूर्वजभूतानि परस्तात् पितृस्थानीयादर्वाञ्चि पितृतत्पुत्रतत्पौत्ररूपाणि त्रीणि आर्षेयाणि ऋषेरपत्यानि वृणीते साम्ना कर्मणि प्रवर्तयति यजतु चावहतु चेति। त्रीणीति कुतः त्रीन्वृणीतऽइति शाखान्तरात्। यजमानग्रहणमृत्विगार्षेयव्युदासार्थम् यजमानस्य य ऋषिस्तत्पूर्वजो मन्त्रदृक् तस्यापत्यमार्षेयं प्रवृणीतऽइति हरिस्वामिनः।

यावन्तो वा मन्त्रकृतः ॥८॥ अथवा यजमानस्य वंशसम्बन्धिनामृषीणां मध्ये यावन्तः ऋषयो मन्त्रकृतः मन्त्राणां द्रष्टारो भवेयुस्तान्वृणीते न त्रीण्येवेति नियमः · ते च प्रवराध्याये गोत्रविशेषेण सर्वेषां कथिताः सन्ति केषांचिदेकः केषांचिद्द्वौ केषांचित्त्रयः केषांचित्पञ्च · तेन यद्गोत्रस्य यावन्तस्तत्र उक्ताः तस्य तावन्तो वरीतव्या इत्यर्थः। आपस्तम्बः ऊर्ध्वज्ञुमासीन७ होतारं वृणीते मनुवद्भरतवदमुवदिति यथार्षेयो यजमानस्त्रीन्यथऽऋषि मन्त्रकृतो वृणीतेऽपि वा एकं द्वौ त्रीन्पञ्च न पञ्चातिवृणीतऽइति।

पुरोहितार्षेयेण वा ॥९॥ [3] राज्ञो यजमानस्य पुरोहितार्षेयेण वा · पुरोहितस्य गुरोरार्षेयाणि वा वृणीते स्वकीयानि वेति विकल्पः।

क्षत्रियवैश्ययोश्च नित्यम् ॥१०॥ अभिषेकादिरहितस्य क्षत्रियमात्रस्य [4] वैश्यस्य च नित्यं पुरोहितार्षेयोच्चारणेनार्षेयं वृणीते।

मनुवदिति वा सर्वेषाम् ॥११॥ अथवा सर्वेषां ब्राह्मणक्षत्रियविशां मनुवदित्येतत्पदं सकृदेवार्षेयस्थाने प्रयोज्यम् अभ्यासे कारणाभावात्। आपस्तम्बः पुरोहितस्य प्रवरेण राजा वृणीतऽइति अपि वा नार्षेयं वृणीते मनुवदित्येव ब्रूयादिति च · मनुः यद्यब्राह्मणो यजेत पुरोहितस्य प्रवरेण प्रवृणीयादिति।

ब्रह्मण्वदा च वक्षद्ब्राह्मणा अस्य यज्ञस्य प्राविताराऽसौ मानुष इति होतृनामग्रहणम् ॥१२॥ आर्षेयोच्चारणादनन्तरं ब्रह्मण्वदित्यादिकं मन्त्रशेषं ब्रू-

---

1) अथशब्दो यजमानव्युदासे यजमानस्य परिभाषितत्वात् होतारं प्रवृणीतऽइति Mah.
2) अमुवदमुवदित्यार्षेयोच्चारणम् भृगुवत् च्यवनवत् अप्नवानवदित्यादि Mah.
3) अयमपि ब्राह्मणविषयः Mahád.
4) अत्र राजन्यक्षत्रिययोरभेदः Mahád.

यात् · तदन्ते ऽसौ मानुष इत्यत्रासावित्यस्य पदस्य स्थाने ऽमुकशर्मेति होतुर्नामग्रहणं कुर्यात् ।

उपांशु वा ॥ १३ ॥ उच्चैर्वा । अग्निर्देव इत्यादेरयमर्थः । अग्निरयं देवः न मानुषः न भूतमात्रमचेतनम् दैव्यो दैवैरपि पुरस्कृतः सम्भावितशक्तिः होता साधुह्वाता · य ईदृशो होता स देवान्यक्षत् यजतु आवक्षतु च तमहं होतारं वृण ऽइत्यर्थः · विद्वान् जानानः यथा यत्र च यष्टव्यो ऽनादौ संसारे ऽभ्यस्तकर्मेत्यर्थः · कथम् चिकित्वान् चेतनावानविस्मरणशीलः · सो ऽधुनाप्यप्रमत्तः सन् मनुष्वत् मनोरिव यथा स्वायम्भुवादेर्मनोर्यज्ञे ऽग्निना देवा इष्टास्तथास्यापि यजमानस्य यज्ञे यजत्वित्यर्थः · भरतवत् भरतो मानवो वर्षाधिपतिस्तस्येव · वसिष्ठादिर्यजमानस्य पूर्वजो मन्त्रदृक् तस्येव · ब्रह्मा सर्वेषां पूर्वजः तस्येव · आ च वक्षत् आवक्षतु च · यद्यपि चैवमग्निरेवात्र होता तथापि ब्राह्मणा अस्य यज्ञस्य प्रकर्षेण अवितारः रक्षितारः ते ह्येनं तन्वानाः प्रत्यक्षमुपलभ्यन्ते अग्निस्तु आगमात् · सो ऽपि च सति ब्राह्मणशरीरे तदेवाधिष्ठाय होत्रं करोति न तस्माद्विना · ततश्चैव न मन्तव्यम् यदि तावदग्निर्होता ततः किं मानुषेण अथ मानुषस्ततः किमग्निनेति · तयोः संहत्यकारिताख्यापनायाह ब्राह्मणा इति · संहत्यकारित्वे विशेषमाह असौ देवदत्तो यज्ञदत्तो वा मानुषो होता देवान्यक्षदा च वक्षदिति वर्तते तमग्निं यजन्तमन्वयमपि यथाशक्ति आरम्भमात्ररूपेण यजत्वित्यर्थः · एष तावान्प्रकाश्यो मन्त्रार्थः ।

संमृष्टाऽउपविशतः ॥ १४ ॥ वरणानन्तरं होता उत्थाय अध्वर्युमग्नीधं चांसयोः संमृशति तौ च संमृष्टावुपविशतः ।

अग्निर्होतेति स्रुगादापनं प्रयाजेषु संनिधेः ॥ १५ ॥[1] अग्निर्होतेत्येतत्स्रुगादापनं प्रयाजेषु भवति · स्रुचावध्वर्युणा आदाप्येते अनेन पठितेनेति स्रुगादापनम् · प्रयाजेष्वेव कुतः संनिधेः प्रयाजसंनिधौ स्रुगादापनस्य पाठात् । पशावेकादशप्रयाजोत्कर्षे पुनरप्युच्चारणम् · अन्वर्थसंज्ञाविज्ञानात्सर्वत्र प्राप्नोति तेन प्रयाजे-

---

[1]) स्रुगादापनमग्निर्होतेत्यस्य संज्ञा प्रयाजार्थस्रुगादापनविषया संनिधेरित्युक्तत्वात् (? °प्रयात्सं° Cod.) · प्रयोजनम् प्रयाजोत्कर्षे पुनरुच्चारणम् Mahâd. — See १.५.२.१.

ष्विति नियम्यते समाख्यातः संनिधेर्बलवत्त्वादिति ।

घृतवतीमित्युक्ते स्रुचावादायातिक्रम्याश्राव्याह समिधो यजेति ॥१६॥ होत्रा घृतवतीमित्येतस्मिन्पदे उक्ते अध्वर्युर्जुहूपभृतावादाय अतिक्रम्य वेदेरपरस्माद्देशात्परिधीनपरेण सव्येन पादेन यज्ञतिदेशं गत्वा आश्राव्य समिधो यजेत्याह[1]· प्राप्तमेवातिक्रमणमनुवाक्यापरिसंख्यानार्थमुच्यते[2]· घृतवतीमध्वर्यो स्रुचमास्यस्वेति तदध्वर्युं प्रसौतीति श्रुतेः (१.५.३.८)· आपस्तम्बः पञ्च प्रयाजान्प्राचः प्रतिदिशं वा समिधः पुरस्तात्तनूनपातं दक्षिणत इडः पश्चाद्बर्हिरुत्तरतः स्वाहाकारं मध्ये ।

पञ्च प्रयाजान् ॥१७॥ सकृदतिक्रान्त एव पञ्च प्रयाजान्यजति · संज्ञा· पञ्चग्रहणात्पञ्चैतानि कर्माणीति ज्ञायते ।

समिद्धतमे ॥१८॥ताननतिशयेन समिद्धे वह्निप्रदेशे जुहुयात् । आपस्तम्बः सर्वान्वैकध्यमिति · सर्वानपि प्रयाजानेकस्मिन्नेव स्थाने जुहुयादित्यस्यार्थः ।

यज-यजेति शेषम् ॥१९॥ समिधो यजेति हि प्रथमे प्रयाजेऽउक्तम् · शेषं प्रयाजचतुष्कं प्रति यज-यजेत्येव प्रैषो भवति (१.५.३.८) ।

ध्रुवस्तिष्ठन् ॥२०॥ एकस्मिन्नेव स्थाने स्तम्भ-इव तिष्ठन् पञ्च प्रयाजान्यजति · अपक्रमणकारणे सत्यपि नापक्रामेत् ।

पूर्व-पूर्व वाभिक्रामम् ॥२१॥ पक्षान्तरमाह · वा विकल्पे · अभिक्रम्याभिक्रम्याहवनीयसंमुखं गमनं कृत्वा पूर्व-पूर्व प्राक्संस्थपङ्क्त्या पञ्चापि प्रयाजान्पृथक्पृथकस्थाने जुहोति ध्रुवपक्षे तु समिद्धतमे । सर्वयजतिषु होम ईशानदिङ्मुखेन वेदेर्दक्षिणभागेऽवस्थितेन च कर्तव्यः वषट्कारेण सह वा वषट्कृते वेति ।

उपभृतो जुह्वामानयत्यनवमृशंश्चतुर्थम् ॥२२॥ उपभृति गृहीतस्य मध्ये ऽर्धाज्यस्य प्रयाजार्थत्वाच्चतुर्थं प्रयाजं प्रति उपभृतः सकाशादर्धमाज्यं जुह्वामासिञ्चति उपभृता जुह्वाः स्पर्शमकुर्वन् । आपस्तम्बः त्रीनिष्ट्वार्धमौपभृतस्य जुह्वा-

---

१) ओ३श्रावयेत्युक्त्वा समिधो यजेति प्रेष्यति Mahád. २) यजतिवात्पुरोऽनुवाक्याप्राप्तेः अथ यदपुरोऽनुवाक्यकाः प्रयाजा भवन्तीति (११.४.१.१२.) श्रुतेः पुरोरुगभावः Mahád.

मानीय प्रत्याक्रम्य शेषेण ध्रुवामभिघार्यानुपूर्व७ हवीᳬष्यभिघारयत्युपभृतमत्त-
त इति ।

एवं प्रवृद्धौ ॥२३॥ प्रयाजप्रवृद्धाविवमेव चतुर्थे-चतुर्थे समानयनं का-
र्यम् . वरुणप्रघासेषु नवभिः प्रयाजैः · पशौ दशभिः चतुर्थे समानीय चतुर्थमा-
रभ्य पुनश्चतुर्थे सप्तमे तमारभ्य चतुर्थे दशमे · अत एव याज्ञिका वदन्ति चतुर्थ-
सप्तमदशमेषु समानयनमिति ।

अनुयाजेषु च ॥२४॥ अनुयाजेष्वपि प्रवृद्धौ एवं ज्ञेयम् · वरुणप्रघासेषु
पशौ शाखान्तरात् ।

उत्तरां जुह्वमध्युह्य प्राचीमवहृत्य जुहोति ॥२५॥ जुह्वमुत्तरामुपरिमार्गे-
णैव प्राचीमवहृत्य उपभृदग्रेणावतार्य [1] जुहोति प्रथमं प्रयाजम् पुनरप्यध्युह्य
तेनैव मार्गेण उपभृत उपरि निधाय पुनस्तथैवावहृत्य जुहोति · एवं प्रतिप्र-
याजम् न सकृदवतारितया सर्वानिति । उपभृदग्रप्रदेशेनैव जुह्वा अवहरणाध्यू-
हने कार्ये न पार्श्वमार्गेण ।

एव७ सर्वत्र ॥२६॥ न केवलं प्रयाजेषु सर्वहोमेष्वेवं ज्ञेयम् जुह्वा अ-
वतारणाध्यूहने प्रतिहोमम् ॥ ॥ द्वितीया कण्डिका ॥२॥ ॥

अथ पद्धतिः ॥

ततो जुह्वमुपभृतोऽग्रस्योपरिमार्गेण प्राचमिवावतार्य दक्षिणपरिधिसं[नि]धिम-
न्ववहृत्येत इन्द्रो वीर्यमिति (२.८-१.) मन्त्रेणाग्नेर्दक्षिणपार्श्वे समिद्धे ऋजुं दीर्घं
संततं प्राञ्चमुत्तराघारं जुहोति ओᳬमिदमिन्द्राय न ममेति त्यागः । ततः स्रुचोः
परस्परं स्पर्शमकुर्वन्नेव दक्षिणेन पादेनाग्रतोऽग्रतः प्रेरितेन प्रत्यागत्य जुह्वस्थेना-
ज्येन ध्रुवास्थमाज्यं जुह्वेव समनक्ति सं ज्योतिषेति (२.१.) मन्त्रेण जुह्वा ध्रौ-
वाज्यमध्ये बिन्दुं पातयतीत्यर्थः · तत उपभृतं सव्ये गृहीत्वा दक्षिणेन जुह्वं प्रस्त-
रस्योपरि निधाय वेदं सव्येन गृहीत्वोपभृतं जुह्वा उत्तरतः स्वस्थाने निदध्यात् ।
ततो होतारं प्रादक्षिण्येन मुक्त्वोत्करमपरेण प्राङ्मुखोऽध्वर्युरिध्मसंनहनान्यादा-
यो३श्रावयेत्याह · ततोऽग्नीद्दक्षिणामुखोऽध्वर्युमुत्तरेण स्थितः स्फ्यसंनहने पाणी

[1] उपभृदुपरि कृत्वा प्रागग्रामवतार्य Mahâd.

गृहीत्वैवास्तु श्रौश्षडिति प्रत्याह · आपस्तम्बः अस्तु श्रौषडित्याग्नीध्रोऽपरेणोत्करं दक्षिणामुखस्तिष्ठन् स्फ्यसंमार्गांश्च धारयन्प्रत्याश्रावयत्याग्नीध्रे सोमे सर्वत्रैवमाश्रुतप्रत्याश्रुते भवत इति । ततोऽध्वर्युर्गृहीतसंनहन एवाह · अग्निर्देवो दैव्यो होता देवान्यक्षद्विद्वांश्चिकित्वान्मनुष्वद्भरतवदित्युक्त्वा परस्तादर्वाञ्चि यजमानस्य त्रीणि प्रवरनामधेयान्याह तद्यथा कश्यपवदवत्सारवन्नैध्रुववदिति[1] · तदनन्तरम् ब्रह्मण्वदा च वक्षद्ब्राह्मणा अस्य यज्ञस्य प्रावितारोऽमुकशर्मा होता मानुष इति होतृनामग्रहणमुच्चैरुपांशु वा कर्तव्यम् । ततो होता देव सवितरित्यादिकं (१.५.१.१५) जपित्वोत्थायाध्वर्युमग्नीधं चांसयोः प्रादेशेन संमृशति · ततस्तौ होत्रा संमृष्टौ सन्तावुपविशतः तावत्पर्यन्तं तिष्ठत एव । ततो यदा होता अग्निर्होता वेत्त्विति स्रुगादापनं पठति तदाध्वर्युरुभाभ्यां पाणिभ्यां जुहूमुपभृत उपरि पूर्ववन्निधाय घृतवतीमित्यस्मिञ्छब्दे होत्रा उक्ते जुहूपभृतावादाय हवींष्युत्तरेण परिधीनपरेण सव्येन पादेन वेदेर्दक्षिणभागे गत्वा ईशानाभिमुखः स्थित्वाश्राव्यास्तु श्रौषडिति प्रत्युक्ते समिधो यजेति होतारं प्रति ब्रूयात् · ततो जुहूं प्राचीमवतार्य वषट्कारेण सह वा वषट्कारे कृते वा समिद्धतमे वह्नेः प्रदेशे जुहूस्य[तृतीयांशं जुहोति][2] ॥ ॥२॥

इति तृतीयस्य द्वितीया कण्डिका ॥ ॥

नाभिदेशे धारणम् ॥१॥ अध्वर्युः स्वनाभिसमीपे स्रुचोर्धारणं कुर्यात् · वषट्कारान्ते होमविधानादा वषट्कारात्प्रतीक्षणीयम् तत्रानियमेन स्रुचोर्धारणे प्राप्ते नियमोऽयम् नाभिदेशे धारणमिति । प्रगृह्य बाहू (११.४.२.४) स्रुचोर्धारणं त्वर्थवादत्वान्न सूत्रितम् · एवमत्र ब्राह्मणे तद्व तथा न कुर्यादित्येवं निषिद्धाः पक्षाः सर्वे अर्थवादा ज्ञेयाः ।

प्रयाजानुमन्त्रणम् ॥२॥[3] प्रयाजानां प्रत्येकमनुमन्त्रणमभिधास्यतऽइति शेषः ।

एको ममैका तस्य योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्येवं मिथुनैर्यथासंख्यम्

---

1) अङ्गिरोवद्बार्हस्पत्यवद्भरद्वाजवत् श्यैतवत् गार्गवत् Chamb. 196. 2) ?? Thus Chambers 196. जुहूस्यद्वहूस्यघृतवति १ (!). 3) कृतस्य प्रयाजस्यानुमन्त्रणं यजमानेन कर्तव्यम् आत्मगामिवाक्यत्वात् Mahâd.

॥३॥ [1] एवंप्रकारैर्यथासंख्यं मिथुनैः स्त्रीलिङ्गपुंलिङ्गशब्दवद्भिर्मन्त्रैः क्रमेण प्रयाजानामनुमन्त्रणं करोति। किमुक्तं भवति · यथा एकः एकेति मिथुनं प्रथममुक्तम् यथासंख्यं मिथुनैरित्युक्तत्वादेवंशब्दाच्च द्वौ द्वे त्रयस्तिस्रः चत्वारश्चतस्र इत्युक्तं भवति [2]।

न तस्य किं चनेति पञ्चमे ॥४॥ पञ्चमे प्रयाजे पञ्च ममेत्यस्यानन्तरम् न तस्य किं चन योऽस्मान्द्वेष्टीति मन्त्रेणानुमन्त्रणं कुर्यात् · एतच्चानुमन्त्रणं त्यागानन्तरं हविःप्रक्षेपे च कृते कर्तव्यम्। त्यागाश्च मान्त्रवर्णिकीभ्यः समिदादिदेवताभ्यः कार्याः · प्रथमे इदं समिद्भ्यो न मम एको ममेत्यादि · द्वितीये इदं तनूनपाते नराशंसाय वा न मम द्वौ मम द्वे तस्येति · तृतीये इदमिड्भ्यो न मम त्रयो मम तिस्रस्तस्येति · चतुर्थे इदं बर्हिषे न मम चत्वारो मम चतस्रस्तस्येति · पञ्चमे इदमग्नये सोमायाग्नयेऽग्नीषोमाभ्यामग्नीषोमाभ्यां देवेभ्य आज्यपेभ्यो न मम पञ्च ममेत्यादि · अमावास्यायां तु इदमग्नयेऽग्नीषोमाभ्यामिन्द्राय देवेभ्य इति संनयतः इदमग्नये विष्णवऽइन्द्राग्निभ्यां देवेभ्य इत्यसंनयत इति।

त्विषिमानपचितिमान्यशस्वी ब्रह्मवर्चस्यन्नाद इति च ॥५॥ चकारः पूर्वोक्तानुमन्त्रणैः सह समुच्चयार्थः [3] · त्विषिमानित्यादिभिः पञ्चभिर्मन्त्रैः यथासंख्यं पञ्च प्रयाजाननुमन्त्रयते प्रथमेन प्रथमम् · भूयासमिति प्रतिपदमध्याह्रियते। पूर्वस्मादनुमन्त्रणादिदं भिद्यते पृथग्विधानात् · प्रयोजनम् सावसानं द्वयोः प्रयोगः। अनेकयजमानके एक एवानुमन्त्रणं करोति क्रत्वर्थत्वात् · तत्र एको ममेत्यत्र ऊहाभावः आशीर्योगाभावात् त्विषिमानित्यादौ तु ऊहः आशीर्योगात् त्विषिमन्तौ भूयास्व त्विषिमन्तो भूयास्मेति · अन्ये तु विपरीतमिच्छन्ति।

आगन्तूनां चतुर्थपञ्चमाभ्यां स्थानात् ॥६॥ चातुर्मास्येषु पशौ च प्रयाजप्रवृद्धौ [4] चतुर्थपञ्चमयोरन्तराले आगन्तवो द्वारादय इज्यन्ते · तत्रानुमन्त्रणद्वो-

---

१) द्विषम इत्यन्ते भूयादित्यध्याहारः Mahád. २) अध्याहारोऽपि द्वितीये द्विवचनेन ततो बहुवचनेन Mahád. ३) अनुमन्त्रणस्यासंनिपातात्प्रोषितोऽपि यजमानः करोति Mah. ४) नवैकादशद्वादशप्रयाजकर्मसु Mahád. — See २.५.२.१० ३.८.१.३.

मस्थानादिधर्मजातं प्रति संदेहः किं यस्य-कस्यचित्प्रयाजस्य धर्माः उत नियम इति · प्रयाजत्वसामान्यस्याविशेषाद्यस्य-कस्यचिदिति प्राप्ते आग° चतु° इत्याह आगन्तूनां प्रयाजानां चतुर्थपञ्चमाभ्यां प्रयाजाभ्यां सकाशाद्धर्मा भवन्ति यतस्त-योर्मध्ये क्रमादागन्तवः पठ्यन्ते · अतश्च संनिधानात्तयोरेव धर्मा आगन्तुषु भवन्ति यतो धर्मापेक्षायां संनिहितव्यतिक्रमे कारणं नास्ति ।

प्रथमचतुर्थाभ्यां वा यथालिङ्गम् ॥७॥ यथालिङ्गं प्रथमाच्चतुर्थाच्चागन्तूनां धर्मा भवन्ति · यथालिङ्गमिति योऽनेकदेवत्यः [पञ्चमः षष्ठोऽष्टमश्च] तस्य प्रथम-धर्माः यश्चैकदेवत्यः [सप्तमो नवमो दशमश्च] तस्य चतुर्थधर्माः · लिङ्गमेवात्र धर्माणां पर्युपस्थापनम् । सिद्धान्तमाह ·

सर्वान्वोत्तमेनोपायित्वात् ॥ ८ ॥ अथवा सर्वानागन्तूनुत्तमप्रयाजधर्मेण सम्बध्नीयात् योजयेत् · आगन्तूनामुपायित्वात् यतस्ते पञ्चममुत्कृष्यागन्तव उपयन्ति उपगच्छन्ति चतुर्थस्तु स्वस्थानऽएव भवति पञ्चमे पुनरननुष्ठितेऽआगच्छन्त आ-गन्तवस्तस्य स्थाने भवन्ति तत्स्थानाच्च तद्धर्मता तेषां न्याय्या । अत एतस्यैवो-त्तमस्याभ्यासेन विकृतिषु नवसंख्यैकादशसंख्या च श्रूयमाणा प्रयाजानां पूरणी-या । यतः पञ्च प्रयाजान्यजतीति इयं पञ्चसंख्या प्रयाजानामुत्पत्तिशिष्टा नव प्रयाजान्यजतीति एकादश प्रयाजान्यजतीति इयं वैकृती संख्या चोत्पत्तिशिष्टा उत्पत्तिशिष्टायाश्च पञ्चसंख्यायाः उत्पत्तिशिष्टया नवैकादशसंख्यया बाधायोगाद्वै-कृती संख्याभ्यासेनैव पूरणीया · तत्राभ्यासेऽवश्यं कर्तव्ये न्यायात्पञ्चमस्यैवाभ्या-सः प्राप्नोति पूर्वेषां स्थाने आगन्तूनां यागाभावात् · तेन तद्धर्मा एवागन्तुषु भवन्तीति सिद्धान्तः । अतश्च द्वाःप्रभृतीनां पञ्चमस्थाने होमः पञ्च मम न त-स्येत्याद्यनुमन्त्रणम् अन्नादो भूयासमिति च सर्वेषां भवति । अभ्यासविनाशे च साभ्यासः पञ्चम आवर्तते आध्वर्यवं कुर्वेति गदाधरकर्काचार्या[द्य]ः विनष्टस्यै-कैकस्यावृत्तिरिति याज्ञिकाः · अनुयाजेषु समिष्टयजुःषु अनूबन्ध्यासु चैवमेव द्रष्ट-व्यम्[1] द्रव्याभावे च द्रव्यमप्युत्पादनीयम्॥ अत्र यद्यपि शतपथे अविशेषेण श्रुतम् अथ तनूनपातं यजतीति (१.५.४.२) परं तु शाखान्तरे विशेषः श्रूयते

---

१) ? द्रष्टव्यं २

राजन्यात्रिवध्र्यश्ववसिष्ठवैश्यशुनकानां कण्वकश्यपसंकृतीनां नराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामिति [1] · एवं मानवसूत्रेऽपि · वसिष्ठादिकं गोत्रं येषां ते वसिष्ठादय इति केचिदाहुः अन्ये तु वसिष्ठादिप्रवरवन्तो वसिष्ठा इति · ये तु कश्यपसगोत्राः [2] कश्यपप्रवरवन्तश्च तेषां निःसंदिग्धं नराशंस एव भवति ।

एत्य जुह्वाभिघारणं ध्रुवाया हविष उपभृतश्च ॥ ९ ॥ पञ्चप्रयाजहोमानन्तरं यजतिस्थानादेत्य वेदेः पश्चादागत्योपविश्य जुहूस्थेनैव प्रयाजशेषेण [3] ध्रुवायाः ध्रौवस्याज्यस्य हविषः आज्यस्थाल्याज्यस्य पुरोडाशयोश्च उपभृतः उपभृत्स्थस्याज्यस्य अध्वर्युरभिघारणं करोति उपयोगक्रमेण · अयं च हविःसंस्कारो न प्रयाजशेषप्रतिपत्तिः हवींष्यभीति (१.५.३.२५) द्वितीयया श्रुतेर्हविषः संस्कार्यत्वावगमात् · अतः संनिहितानि सर्वाणि हवींषि शेषेणाभिघारणीयानि शेषविनाशे च द्रव्यमात्रमुत्पाद्य तेनाभिघारणीयानि · प्रयाजशेषप्रतिपत्तिरेवेयमिति कर्काचार्याः मीमांसकाश्च [4] ।

आज्यभागाभ्यां चरत्याग्नेयेन सौम्येन ॥ १० ॥ आज्यभागावनुतिष्ठति एकमाग्नेयमपरं सौम्यम् · अग्निर्यं द्रव्यं यस्मिन्नाज्यभागे स आग्नेयः ।

चतुरवत्तं सवषट्कारासु ॥ ११ ॥ सवषट्कारासु आहुतिषु चतुरवत्तं होतव्यम् [5] ।

अनिधायावदायावदाय ध्रुवामभिघारयत्याप्यायतां ध्रुवा हविषा घृतेन यज्ञं-यज्ञं प्रति देवयद्भ्यः सूर्याया ऊधोऽदित्या उपस्थ उरुधारा यज्ञेऽअस्मिन्निति [6] ॥ १२ ॥ स्रुचावनिधाय हस्तधृतयोरेव तयोर्जुह्वां ध्रुवात आज्यमवदायावदाय आप्यायतामिति स्थालीतो ध्रुवामभिघारयति यदवत्तं तत्पूरयति । आज्यभागावित्यन्वर्थसंज्ञयैवाज्यद्रव्यकत्वमवगतम् · तच्चाज्यं ध्रुवाया एवावदेयम् · तेन प्रत्यवदानमिह ध्रुवाया आप्यायनं विधीयते । अवदायावदायेति वीप्सा प्रतिस्रुच-

---

1) See ११.६.८-९. and Çânkhây. १.७.३: नराशंसोऽग्नऽआज्यस्य वेत्विति द्वितीयो वसिष्ठशुनकानामत्रिवध्र्यश्वानां कण्वसंकृतीनां राजन्यानां प्रजाकामानां च · 2) ? काश्यपस्यगोत्रं २· 3) जुह्वा करणभूतया स्वाज्येन Mahâd. 4) °सकश्च २ 5) पञ्चावत्तिनामपि च चतुरवत्तमिति वचनसामर्थ्यात् Mahâd. 6) See Kânva-Vâj. S. pag. ५८.

माप्यायनविधानार्था · अन्यथा चतुरवदानान्ते सकृदाप्यायनं प्राप्नोति · तच्च नोपपद्यते मूलाक्षयात्। तत्पुरस्तादाज्यभागावग्नीषोमाभ्यां यजतीति (१.६.३.१३) आज्यभागयोर्यजतित्वात् याज्यापुरोऽनुवाक्यावत्त्वम् · तां चानुवाक्यां याज्यां च प्रेषित एव होता पठति सम्प्रेषितोऽन्वाह तथा यजतीति शाङ्खायनोक्तेः (१.२.२८) अतश्चानुवाक्यापाठनार्थमग्नयेऽनुब्रूहीत्येवं प्रैषः कर्तव्यः · आश्रावणानन्तरं चाग्निं यजेति एवं प्रैषः कार्यः। अनुवाक्याप्रैषश्चावदानात्प्राग्देयः[1] वरुणप्रघासे तथैव दर्शनात् · अतश्च सर्वयागेष्वप्ययं क्रमः अनुवाचनम् अवदानम् अतिक्रम्याश्राव्य याज्यार्थः प्रैष इति · वाजिने पशुयागेऽवदानोत्तरकालमनुवाचनम् वचनात् · पशुपुरोडाशयागे वपायागेऽवभृथे वारुणयागे सवनीययागे वचनात्सहानुवाचनम् · अवभृथस्विष्टकृद्यागे जुह्वां पुरोडाशशेषमवद्धतो[2]ऽनुवाचनम् वचनादपि · अन्यत्र यजतिमात्रे पूर्वमनुवाचनम्। आपस्तम्बः आग्नेयः सौम्यश्चाज्यहविषा चाज्यभागौ चतुर्गृहीताभ्यां जामदग्नीनां तु पञ्चावत्ताभ्यामथ जामदग्न्यो जामदग्न्यमामन्त्र्य पञ्चावत्तं कुर्वीत सर्वत्रावद्यन्नमुष्माऽअनुब्रूहीति पुरोऽनुवाक्यां सम्प्रेष्यत्यवदायावदाय स्रुवेण प्रस्तरबर्हिः समज्य जुहूपभृतावादाय दक्षिणातिक्रम्याश्राव्य प्रत्याश्रावितेऽमुं यजेति याज्यामिति सार्वत्रिकमिति।

अनुब्रूहीत्युक्ता नापव्याहरेद्धोता चाश्रावणात् ॥ १३ ॥[3] अनुवाक्याव्यतिरिक्तं किमपि न ब्रूयात्।

आश्राविते ऽग्नीदा प्रत्याश्रावणात् ॥ १४ ॥ अस्तु श्रौषडित्येतस्मादन्यत्किमपि न ब्रूयात् · अस्तु श्रौषडित्यस्य प्रत्याश्रावणसंज्ञा।

प्रत्याश्राविते ऽध्वर्युरा होतृप्रैषात् ॥ १५ ॥[4] यजेति होतृप्रैषाद्व्यतिरिक्तं किमपि न ब्रूयात्।

होता वषट्कारात् ॥ १६ ॥ यजेति प्रैषश्रवणानन्तरं याज्यावषट्कारव्यतिरिक्तं किमपि न ब्रूयात्। प्रसङ्गादाह ·

---

१) अवदानात्पूर्वमनुवाचनं प्रतिपत्तव्यम् यजतित्वात् Mahâd. २) Thus २. °वद्यतो?
३) अपव्याहारो लौकिकवदनम् Mah. अध्वर्युर्होता च न व्याहरेत् आश्रावणं यावत् Ss.
४) अग्नीधास्तु श्रौषडिति प्रत्याश्राविते Mahâd.

सोमे च ग्रहं गृहीत्वोपाकरणात् ॥१७॥ सोमयागे ज्योतिष्टोमेऽध्वर्युर्ग्रहं गृहीत्वा आत्तस्य तृणाभ्यां ग्रहमुपस्पृश्या स्तोत्रोपाकरणान्नापव्याहरेत् · उपावर्तध्वमित्ययं स्तोत्रप्रैष उपाकरणशब्देनोच्यते तद्व्यतिरिक्तं किमपि न ब्रूयात् · तेन [उपाकरणेन] अध्वर्युरुद्गातृभ्यो यज्ञं प्रयच्छति ।

उपाकृतऽउद्गातार आ होतृप्रैषात् ॥१८॥[1] एषोत्तमेति (१.५.२.१३.) प्रस्तोतृकर्तृको होतृप्रैषः तत्पर्यन्तम् · प्रस्तोता सर्वेषु स्तोत्रेषु उत्तमाया ऋचः प्रस्तावादनन्तरं शस्त्रकर्तारं प्रेष्यति एषोत्तमेति · तेन होत्रे यज्ञं प्रयच्छति ।

होता वषट्कारात् ॥ १९ ॥ होतृग्रहणमन्येषामपि शस्त्रकर्तॄणामुपलक्षणार्थम् · तेन प्रशास्त्रादयोऽपि एषोत्तमेति प्रैषं श्रुत्वा शस्त्रव्यतिरिक्तं किमपि न ब्रूयुः ।

आग्नेयमुत्तरपूर्वार्धे ॥२०॥ आग्नेयमाज्यभागमाहवनीयस्य उत्तरपूर्वार्धे ईशानभागे जुहोति ।

दक्षिणपूर्वार्धे सौम्यम् ॥२१॥ आहवनीयस्य आग्नेयभागे ।

समिद्धतमे वा ॥२२॥ अथवा उभावपि समिद्धतमे ।

हविर्भ्यां च ॥२३॥[2] समिद्धतमे वह्निप्रदेशे प्रचरति ।

पुरोडाशावन्तरेणाग्नीषोमाऽउपांश्वाज्यस्य ॥२४॥ पुरोडाशसाध्ययोर्यागयोरन्तराले मध्ये आज्यस्य द्रव्यस्य उपांशु अग्नीषोमाभ्यां यजति । अयं क्रमः · आग्नेय आज्यभागो ध्रुवातश्चतुर्गृहीतेन · सौम्य आज्यभागोऽपि · आग्नेयेन पुरोडाशेन यागः तत्राग्नयेऽनुब्रूहीत्यनुवाचनम् जुह्वां ध्रुवायाः स्रुवेणाज्यं गृहीत्वोपस्तारः आज्यस्थाल्याः सकाशाद्ध्रुवाया अभिघारणम् पुरोडाशमध्यादङ्गुष्ठपर्वमात्रं तिरश्चीनमवदानं ग्राह्यम् द्वितीयं पूर्वार्धात् पञ्चावत्तिनस्तृतीयं पश्चार्धात् ध्रौवेणोपर्यभिघारः पुनर्ध्रुवाया आप्यायनम् आज्यस्थाल्याज्येनावत्तस्य हविषोऽवदानयोः प्रत्यभिघारः अतिक्रम्याश्राव्याग्निं यजेत्युक्त्वा वषट्कृते सह वा स्रुक्पार्श्वेन होमः · आज्यभागवत् ध्रुवातश्चतुः पञ्चकृत्वो वावदायोपांशुयागः ·

---

[1]) उद्गातृप्रस्तोतृप्रतिहर्तार इत्युद्गातारः Mahâd. [2]) पुरोडाशाभ्याम् Mahâd. चरतीति शेषः Ss.

आग्नेययागवत् द्वितीयेन पुरोडाशेनाग्नीषोमीययागः · स्विष्टकृदिति ।

विष्णुर्वामावास्यायाꣳ हौत्राम्नानात् ॥ २५ ॥ अमावास्यायां विष्णुर्वा उ-
पांशुयाजस्याज्यभागस्य देवता भवति · एवं हि हौत्रे आम्नायते वैष्णवश्चेदिदं
विष्णुर्वषट्के विष्णावास ऽइति याज्यापुरोऽनुवाक्ये ऽइति [1] । व्यवस्थितोऽयं वि-
कल्पः संनयतोऽग्नीषोमौ असंनयतो विष्णुरिति हौतृवशादेव · शाङ्खायनः
(१.३.१६-१८.) ऐन्द्रं सांनाय्यं संनयतो माहेन्द्रं वा वैष्णवं त्वसंनयन्नुपांशुयाजमिति·
उपांशुयाजधर्माः शाङ्खायनेनोक्ताः (१.१.३६-३७.) प्रणवो ये-यजामहो वषट्कारः सम्प्रे-
षाः प्रैषाश्चोच्चैरुपांशुहविःषु देवतानामधेयं चोपांश्विति ।

यावद्धविरुत्तरार्धात्स्विष्टकृतः ॥ २६ ॥ यावन्ति हवींषि भवन्ति तेषां स-
र्वेषामुत्तरार्धादुत्तरस्मात्प्रदेशात् स्विष्टकृतः स्विष्टकृद्यागार्थमवद्यति [2] · तत्र जम-
दग्नीनां द्वेऽअवदाने इतरेषां त्वेकम् · अभिघारणं चोपरिष्टाद्द्विर्भवति · सर्वेषां
हविषामुत्तरार्धादवदाय सकृदेवैकं प्रदानं कर्तव्यम् ।

तत एव होमः ॥ २७ ॥ ततः अग्नेरुत्तरार्धे एव स्विष्टकृदवदानानां होमो
भवति । उपांशुयाजशेषाद्ध्रौवादपि स्विष्टकृदवदाने प्राप्तेऽआह ·

नाज्यादशेषात् ॥ २८ ॥ [3] आज्यात् ध्रौवाज्यात्स्विष्टकृतो नावद्यति · न
ह्येतदुपांशुयाजस्य शेषः सर्वार्थत्वात् तथा हि उपस्तृणन्नभिघारयन्नाज्यस्य यज-
न्ध्रुवायां गृह्णातीति । अपरा व्याख्या [4] · न ह्याज्यं शेषरूपमस्ति शेषस्य हि
कृतार्थस्य प्रतिपत्त्यपेक्षस्य स्थितस्य प्रतिपत्त्यर्थानि शेषकार्याणि · न चाज्यमे-
वंविधमस्ति · न ह्युपांशुयाजार्थं [5] पूर्वं पृथक्प्रकल्पितमस्ति यस्य शेषो भ-
वति · अतः साधारणादेव ध्रौवाद्वचनेनोपांशुयाजार्थं गृह्यते · यत्तावद्ध्रुवाया-
मुपांशुयाजार्थं गृहीतेऽवशिष्टमाज्यम् तत्पश्चाद्भाव्युपस्तरणाभिघारणाद्युपयोगीत्य-
कृतार्थम् न प्रतिपत्त्यर्हम् · सर्वान्ते च तेन निःशेषेण समिष्टयजुर्हूयतेऽइति न

---

1) See Çânkh. १.८.८. इदं विष्णुर्विचक्रमे विष्णवितीति वैष्णवस्य· 2) प्रतिपत्त्यर्थं कर्म चैतत् Mahâd. 3) न ध्रौवाज्यात्स्विष्टकृतेऽवद्यति आज्यस्य शेषभावरहितत्वात् · आज्यभागादिस्विष्टकृदन्ता [आहवनीय]यजतयो ध्रुवाया भवन्तीत्युक्तम् Mahâd. 4) अथवा आज्यात्स्विष्टकृतो नावदेयम् · कुतः अशेषात् न हि आज्यं शेषरूपमस्ति Ss. 5) ?त-स्युपांशु° २·

ततः शेषकार्यम् · यज्जुह्वां चतुर्गृहीतं तन्निःशेषं हुतमिति शेषाभावादेव तत्सम्बन्धिकार्यस्याभावः ।

असंस्पृष्टामाहुतिभिः ॥ २९ ॥ स्विष्टकृदाहुतिं जुहुयात् इतराभिराज्यभागप्रधानाहुतिभिः सह अस्पृष्टाम् · अभ्यर्धः (१.९.३.२९.) पृथगस्पृष्टः ॥

निधाय ॥ ३० ॥ स्विष्टकृद्धोमानन्तरमप उपस्पृश्य स्रुचौ निधाय स्थाने सादयित्वा ॥ ॥ तृतीया कण्डिका ॥ ३ ॥

अथ पद्धतिः ॥

आश्रावणकाले स्रुचोर्नाभिदेशे धारणं कुर्यात् · यजमानश्च इदं समिद्भ्यो न ममेति त्यागं विधाय एको ममेति विषिमानिति च द्वेऽअनुमन्त्रणे कुर्यात् । ततोऽध्वर्युः पुनराश्राव्य यजेति प्रेष्यति · पूर्ववद्धोमः · इदं तनूनपातऽइति इदं नराशंसायेति वा द्वितीयप्रयाजस्य त्यागः · तत्रेयं व्यवस्था वसिष्ठशुनकात्रिवध्य्रश्वकण्वकश्यपसंकृतिप्रवराणां यजमानानां नराशंसः एभ्योऽन्येषां तनूनपादिति · त्यागानन्तरं द्वौ ममेति अपचितिमानिति चानुमन्त्रणे । ततः पुनरपि जुहूमध्युह्याश्राव्य यजेति प्रेष्यति · ततो जुहूं प्राचीमवतार्य पूर्ववत्सर्वं घृतं जुहोति इदमिड्भ्यो न ममेति त्यागः · त्रयो ममेति यशस्वीति चानुमन्त्रणे । ततो जुहूमध्युह्य सव्येन जुहूं गृहीत्वा दक्षिणेनोपभृतमधोविद्यमानजुह्वग्रमार्गेणोपरिष्टादानीयोपभृता जुह्वाः स्पर्शमकुर्वन्नुपभृतः सकाशादर्धमाज्यं जुह्वां निनयति · ततः पुनरुपभृतमधस्तात्कृत्वा पुनरप्याश्राव्य यजेति होतारं ब्रूयात् · समिद्धे जुहोति इदं बर्हिषे न ममेति त्यागः · चत्वारो मम ब्रह्मवर्चसीति चानुमन्त्रणे पुनर्जुहूमध्युह्याश्राव्य यजेति प्रेष्य वषट्कृते जुहोति इदमग्नये सोमायाग्नयेऽग्नीषोमाभ्यामग्नीषोमाभ्यां देवेभ्य आज्यपेभ्यो न ममेति त्यागः · पञ्च मम न तस्येति अन्नादो भूयासमिति चानुमन्त्रणे । ध्रुवो निश्चलः एकस्मिन्नेव स्थाने स्थितः सर्वान्प्रयाजाननतिप्रदीप्तेऽग्निप्रदेशे जुहोति · अथवा प्रतिहोममाहवनीयसंमुखं स्तोकं-स्तोकं गत्वा-गत्वा प्राक्संस्थान्पञ्चसु स्थानेषु प्रयाजान्जुहुयात् । ततो दक्षिणपादेन हविःसमीपे प्रत्यागत्योपविश्य जुह्वास्थेन प्रयाजशेषेण जुह्वैव ध्रुवाया आज्यस्थाल्याः पुरोडाशयोरुपभृतश्च क्रमेणाभिघारणं करोति · तत उपविष्ट ए-

वाग्नयेऽनुब्रूहीति होतारं प्रेष्यति · ततो ध्रुवायाः स्रुवेणाज्यं जुह्वामवद्यति तू-
ष्णीमिव · तत आज्यस्थाल्यास्तूष्णीं स्रुवेणाज्यं गृहीत्वा आप्यायतामिति मन्त्रान्ते
ध्रुवामभिघारयति · एवं चतुरवत्तिनश्चतुर्वारं कुर्यात् पञ्चावत्तिनस्तु पञ्चकृत्वः ·
एवं चतुरवत्तं कृत्वोत्थायातिक्रम्याश्राव्याग्निं यजेति होतारं प्रेष्यति · उत्तरपूर्वार्धे
होमः इदमग्नये । अत्र सर्वत्रानुब्रूहीत्येवमुक्ताधर्युर्विहितमन्त्रादिव्यतिरिक्तं
किमपि न वदेत् · होतापि न वदेत् आश्रावणं यावत् · आश्रावणानन्तरं प्र-
त्याश्रावणात्प्राक् अग्नीदपि नापव्याहरेत् प्रत्याश्रावणव्यतिरिक्तं किमपि न व-
देत् · प्रत्याश्रावणानन्तरमधर्युः प्राग्यजेति प्रैषात्तद्व्यतिरिक्तं न वदेत् · यजेत्यन-
न्तरं होता वषट्कारपर्यन्तं याज्यादिव्यतिरिक्तं किमपि न वदेत् यद्यपव्याहरेत्पु-
नरप्याश्रावणादि कुर्याद्व्याहृतीर्वा जपेदित्यापस्तम्बः । आग्नेयाज्यभागहोमा-
नन्तरं दक्षिणेन पादेन हविःसमीपे आगत्योपविश्य सोमायानुब्रूहीति प्रैषः · पूर्व-
वच्चतुरवत्तमाज्यं ध्रुवाया गृहीत्वातिक्रम्याश्राव्य सोमं यजेति प्रैषः · दक्षिणपूर्वार्धे
होमः इदं सोमायेति त्यागः । अथवा समिद्धतमे अतिशयेन प्रदीप्तऽएवाग्नि-
प्रदेशे आज्यभागयोर्होमः अन्यासामाहुतीनां च । सर्वत्र सव्येन पादेनाग्रतो
ऽग्रतश्चालितेन होमार्थं गमनम् हुत्वा च तथैव दक्षिणेन पादेन प्रत्याग-
मनम् । ततः प्रधानहविर्यागः । आगत्योपविश्याग्नयेऽनुब्रूहीति प्रैषः · ध्रु-
वातः सकृत्स्रुवेणाज्यं गृहीत्वा जुह्वामुपस्तारः · आप्यायतामिति ध्रुवाया अभिघा-
रः · ततः प्रथमपुरोडाशस्य मध्यात्पूर्वार्धाच्च शृतावदानेनाङ्गुष्ठपर्वमात्रे तिर्यक् अ-
वदानद्वयं क्रमेणावदाय पुनर्ध्रुवायाः स्रुवेणोपरिष्टादभिघार्य ध्रुवामाप्याय्य हविषि
कृते अवदानस्थाने आज्यस्थालीतः स्रुवेण प्रत्यभिघारयेत् · पञ्चावत्तिनो हविषः
पश्चाद्भागात्तृतीयमवदानं गृहीत्वा पञ्चावत्तं सम्पादनीयम् · ततोऽतिक्रम्याश्राव्या-
ग्निं यजेति प्रैषः मध्ये समिद्धतमे होमः इदमग्नयऽइति त्यागः । प्रत्यागत्याग्नी-
षोमाभ्यामित्युपांशु उक्त्वा अनुब्रूहीति प्रथमस्वरेण प्रैषः · आज्यभागवत् ध्रुवाया-
श्चतुर्ग्रहणम् पञ्चावत्तिनः पञ्चकृत्वः · अतिक्रम्याश्राव्य अग्नीषोमौ उपांशु
यजेति प्रथमस्वरेण मध्ये होमः इदमग्नीषोमाभ्याम् । प्रत्यागत्याग्नीषोमाभ्याम-
नुब्रूहीति प्रथमस्वरेण प्रैषः ध्रुवाया जुह्वामुपस्तारः ध्रुवाभिघारणम् द्विती-

यपुरोडाशस्य पूर्ववदवदानम् उपरिष्टादभिघारः ध्रुवाभिघारणम् जताभ्यङ्गः . अतिक्रम्याश्राव्याग्नीषोमौ यजेति प्रैषः · प्रदीते मध्ये होमः इदमग्नीषोमाभ्याम् । ततः प्रत्यागत्याग्नये स्विष्टकृतेऽनुब्रूहीति मध्यमस्वरेण प्रैषः · जुह्वामुपस्तारः · द्वयोरपि पुरोडाशयोरुत्तरार्धादेकैकमवदानम् पञ्चावत्तिनो द्विर्द्विः · उपरिष्टाद्द्विरभिघारः · हुते प्रत्यभिघारणाभावः · उत्थायातिक्रम्याश्राव्याग्निं स्विष्टकृतं यजेति प्रैषः · अग्नेरुत्तरार्धे समिद्धे होमः · स्विष्टकृदाहुतेरितराभिराहुतिभिरग्निमध्ये संसर्गो न कार्यः · ततोऽपामुपस्पर्शनम् · प्रत्यागत्य स्वस्थाने स्रुचोरासादनम् । पञ्चार्षेयाणां जमदग्नीनामाज्यभागादिषु सर्वत्र पञ्चावत्तं भवति · प्रधानयागे तु पुरोडाशस्य पश्चाद्भागात्तृतीयमवदानम् उत्तरार्धात्स्विष्टकृत्यवदानद्वयम् पत्नीसंयाजेष्वपि पञ्चावत्तम् इति विशेषः · अन्यत्सर्वं समानम् ॥ ॥३॥

इति तृतीयस्य तृतीया कण्डिका ॥ ॥

संचरमभ्युह्य प्राशित्रमवद्यति यवमात्रं पिप्पलमात्रं वा ॥१॥ परिधीनपरेण संचरमद्भिरभ्युह्य प्राशित्रहरणे प्राशित्रं ब्रह्मणो भागमध्वर्युर्द्विरवद्यति तच्च पुरोडाशस्य मध्यात् यवप्रमाणं पिप्पलप्रमाणं वा । संचरस्याभ्युक्षणमनुयाजार्थम् अतोऽनुयाजाभावे आतिथ्योपसत्पयस्याग्रहमेधीयादौ न भवति · पशौ तु भवति च अङ्गस्विष्टकृद्यागानन्तरम् · सुत्यायां च तृतीयसवनसम्बन्धिसवनीयपुरोडाशस्विष्टकृद्यागानन्तरम् ।

अन्यतरत आज्यम् ॥२॥ तस्य प्राशित्रस्य अन्यतरतः आज्यं भवति उपस्तृणाति वा अभिघारयति वेति · अधस्ताद्वा उपरिष्टाद्वा ।

उभयतो वा ॥३॥[1] उपस्तारेऽभिघारे च · प्राशित्रावदाने उभयत आज्यमवद्यति ।

आग्नेयात् ॥४॥[2] पुरोडाशात्प्राशित्रमवद्यति ।

भागांश्च ॥५॥[3] षडवत्तब्रह्मभागयजमानभागान् आग्नेयादवद्येत् · भा-

---

१) अधस्ताच्चोपरिष्टाच्च · आद्यन्तयोरित्यर्थः Mahád. २) आग्नेयग्रहणं प्रथमहविष उपलक्षणार्थम् न वैकदेवत्योपलक्षणार्थम् · सर्वेभ्यो हविर्भ्य इति कर्कः Mahád. ३) बहुवचनमग्नीद्ब्रह्मयजमानविषयम् Mahád.

गानामत्र कीर्तनमात्रम् तेषामवदानक्रममुपरिष्टाद्वक्ष्यति · अयं च तेषां पूर्वपक्ष एव सिद्धान्तस्त्वग्रे भविष्यति।

अध्वर्युसंचरेण ब्रह्मणे प्रदाय पूर्वेणैकेऽप उपस्पृश्येडां पञ्चावत्तां दक्षिणतो मध्याच्च यावद्धविः स्विष्टकृद्वदाज्यम् ॥ ६॥ प्राशित्रमवत्तमध्वर्युसंचरेण परिधीनपरेण ब्रह्मणे समर्प्य आहवनीयं पूर्वेण शाखिनः ततोऽध्वर्युरप उपस्पृश्य पञ्चावत्तामिडामवद्यति यावन्ति हवींषि भवन्ति तेषां सर्वेषाम् प्रथमं दक्षिणस्मात्प्रदेशात् मध्याच्च सर्वहविषां मध्यप्रदेशाच्च · तत्राज्यं स्विष्टकृद्वद्भवति सकृदुपस्तृणाति द्विरभिघारयतीति [1]। इडावदानस्य हविःशेषप्रतिपत्तित्वात् यावद्धविरित्युक्तम् · अप उपस्पृश्येति प्राशित्रस्य रुद्रियत्वादुक्तम् · इडेति संज्ञा।

यजमानभागं पूर्वार्धाद्दीर्घं प्रशीर्य पुरस्ताद्ध्रुवायाः करोति ॥ ७॥ इडावदानानन्तरं भागावदानावसरः। ततश्च पूर्वमग्नीधः षडवत्तमवद्यति तत्र एकस्मिन्वारणे पात्रे उभयत्राघातवति उभयत्रोपस्तीर्यैकैकमवदानमवदायोपरिष्टादभिघार्य षडवत्तं सम्पादनीयम् · ततः पुरोडाशस्यानियतप्रदेशाद्ब्रह्मभागमवद्यति · ततः पुरोडाशस्य पूर्वार्धात् पूर्वस्मात्प्रदेशादणुं दीर्घं च यजमानभागं प्रशीर्य पुरोडाशात्पृथक्कृत्य ध्रुवायाः पुरस्ताद्बर्हिषि करोति निदधाति।

इडां होत्रे प्रदायाविसृजन्दक्षिणातिक्रामति [2] ॥ ८॥ तामवत्तामिडां होत्रे समर्प्य अध्वर्युरविसृजन् तामिडां हस्तेनाविमुंचन् होतारं दक्षिणेनातिक्रम्य प्रदक्षिणमुक्तोत्तरपार्श्वेन होतुः पुरस्तादागत्योपविशति प्रत्यङ्मुखः।

इडां प्रतिगृह्य होतुरङ्गुलीपर्वणीऽअनक्ति ॥ ९॥ [3] उपविष्टोऽध्वर्युर्होत्रा समर्पितामिडामादाय इडास्थैनैवाज्येन होतुरङ्गुलीपर्वणी अनक्ति उत्तमं मध्यमं च · पर्वशब्दः संधिवाची काण्डवाची वा।

अवान्तरेडामादधाति पूर्ववत् ॥ १०॥ [4] होतुः पाणौ पूर्ववदवान्तरेडामादधाति अवद्यति · तां चेडाया एव · पुरोडाशावदानादेव पञ्चावत्तता · न

---

1) See १.७.४.११. 2) °सृजं दक्षि°1. °सृज दक्षि°2 °सृजन् दक्षि°२. 3) अङ्गुल्यास्तर्जन्याः संधी Mahád. 4) पूर्ववदित्युपस्तारो द्विरवदानं द्विश्चाभिघारणं चेति पञ्चावत्तस्वरूपसामर्थ्यात् Mahád.

ह्याल्यं संमृष्टत्वपत्वाद्विवेकेन ग्रहीतुं शक्यतऽइति कर्कः। लेपादुपस्तीर्य लेपादभिघारयतीति मानवे।

इडां च ॥ ११ ॥ होतुर्हस्ते आदधाति समर्पयति।

सर्वेऽन्वारभन्ते ॥ १२ ॥ उपहूयमानामिडामिडाशब्दवाच्यं पुरोडाशादिद्रव्यं यत्यात्र्यामवत्तम् तत्सर्वे ऋत्विग्यजमाना अन्वारभन्ते · आपस्तम्बादिसूत्रेष्विडामेव तस्या एव प्रकृतत्वात्[1]।

इडोपहूतेत्युच्यमान[2]ऽआग्नेयं बर्हिषदं करोति अन्न पिन्वस्वायुर्मे धुक्ष्व प्रजां मे धुक्ष्व पशून्मे धुक्ष्व ब्रह्म मे धुक्ष्व क्षत्रं मे धुक्ष्व विशो मे धुक्ष्व यो ऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्य प्रजया पशुभिराप्यायस्वेति तं चतुर्धा कृत्वा ॥ १३ ॥[3] तमाग्नेयं पुरोडाशं चतुर्धा कृत्वा बर्हिषदं करोति मन्त्रान्ते बर्हिषि प्रक्षिपति[4]। आग्नेयमेव शाखान्तरात् नाग्नीषोमीयम्।

बर्हिष्यृत्विग्भ्य आदिशति ॥ १४ ॥ पितॄणां संविभागार्थं कृतान् तांश्चतु[र]ः पुरोडाशखण्डान्बर्हिष्यवस्थितानेव यजमानः ऋत्विग्भ्यः आदिशति इदं ब्रह्मण इदं होतुरिदमध्वर्योरिदमग्नीध इति प्रकाशयति · एतच्चाग्नेयकोणस्या[ना]दारभ्य प्रदक्षिणम् · सत्त्रेषु व्यादिशाभावाच्चतुर्धाकरणाभाव इति कर्कः।

उभौ वाविशेषात् ॥ १५ ॥[5] वा पूर्वपक्षनिरासे · उभावपि पुरोडाशौ प्राशित्रावदानेन भागावदानेन च प्रतिपाद्यौ अविशेषेण हविर्मात्रात्प्राशित्रं भागाश्च श्रूयन्ते यतः। पुरोडाशसंयोगाद्भागाः सांनाय्यस्य न भवन्ति चतुर्धाकरणमपि सांनाय्यस्य न भवति · अत एव तत्सिद्धम् प्राशित्रं हविर्मात्रात् भागाश्च पुरोडाशमात्रात् न चतुर्धाकरणमाग्नेयस्यैवेति · विकृतिष्वपि आग्नेयविकारस्यैव

---

१) होत्रान्वारम्भस्तु शाखान्तरीयः Mahâd. २) viz. होत्रा उच्यमाने. See १. ८. १. २४. ३) See Çânkhây. ४. १. २. ४) तूष्णीं बर्हिषि आदधाति Mahâd. See १. ८. १. ४०. ५) उभौ वा पुरोडाशौ चतुर्धा करोति अविशेषश्रवणात् चरितार्थत्वाविशेषात् संस्कारार्थत्वाविशेषात् प्रतिपत्तिसव्यपेक्षत्वादिति याज्ञिकाः। तस्मान्माध्यन्दिनानां स्वश्रुतिसूत्रपरित्यागे शाखान्तरपरिग्रहे मानाभावादुभयोश्चतुर्धाकरणं भवति · आग्नेयं चतुर्धा करोतीत्यादि कर्कलिखनम् तच्छाखान्तरविषयमिति स्पष्टम्। न प्राशित्रभागचतुर्धाकरणानि सांनाय्यस्य तद्विकारस्य [पशोः] च। आह च प्राशित्रभागानाग्नेयाद्धविर्मात्रादिडां तथा सर्वेषां चतुर्धा कुर्याच्छ्रुतिसूत्राशयो यत इति Mahâd.

एकदेवत्यस्य चतुर्धाकरणम् नानेकदेवत्यस्य भागास्तु सांनाय्यव्यतिरिक्तसर्वहविषां भवन्ति । ब्रह्मभागादयोऽप्रतिषिद्धत्वादिडावदवदेयाः · अग्नेयादेव भागा इति मानवे तैत्तिरिसूत्रे च · अनेकयजमानके एक एव यजमानभागः ।

अत्र पितर इति (२.३१.) यजमानो जपति ॥ १६ ॥ अग्रिमसूत्रे (१७) विसर्गस्य वक्ष्यमाणत्वात् तस्य चान्वारम्भपूर्वकत्वात् अन्वारम्भस्य च याजमानत्वात् चतुर्धाकृतं पुरोडाशमालभ्य यजमानोऽत्र पितरो मादयध्वमिति संहितास्वरेण जपति पित्र्यत्वान्मन्त्रस्य प्राचीनावीतं कृत्वा ।

विसृज्यामीमदन्तेति (२.३१.) ॥ १७ ॥[1] चतुर्धाकृतं पुरोडाशं विसृज्य मुक्त्वा प्राचीनावीत्येव अमीमदन्तेति मन्त्रस्वरेण जपति · अनयोर्मन्त्रयोरुच्चारणानन्तरं सव्यं कृत्वापामुपस्पर्शनम् पित्र्यत्वात् ।

एकैकमाहरति ॥ १८ ॥ एकैकं भागं भागिने आहरति आदेशक्रमेण समर्पयति इदं ब्रह्मणे इदं होत्रे इदमध्वर्यवे इदमग्नीधऽइति · भक्षणार्थम् न परिक्रयार्थम् · पक्वान्नोपहारस्य भक्षणार्थत्वप्रसिद्धेः ।

द्यावापृथिव्योरुपह्वानेऽग्नीधे षडवत्तम् ॥ १९ ॥ होत्रा उपहूते द्यावापृथिवीऽइत्येवं पठ्यमाने यजमानोऽग्नीधे षडवत्तं ददाति · आङ्पूर्वो दधातिः (१.८.१.४१.) अन्यत्र स्थापने प्रयुक्तः अत्र तर्पणे द्रष्टव्यः । न चैष इडाभागः किं तर्ह्यन्य एवायमग्नीद्भागः · ब्रह्मभागयजमानभागयोरपीडाभिदः प्रसिद्धः ।

प्राश्नात्युपहूता पृथिवीति (१.१०.) ॥ २० ॥[2] तत्षडवत्तमग्नीत्प्राश्नाति । अथ द्वितीयमुपहूतो द्यौरित्येवं शाखान्तरे श्रुतमपि[3] सूत्रकृता नोपबद्धम् वाक्यभेदानामस्यार्थस्य सिद्धत्वात् तेनैवानुष्ठेयम् ।

आशास्तानि मयीदमिति (२.१०.) यजमानो जपति ॥ २१ ॥[4] भूयसि हविष्करणऽउपहूत इत्येवमाशीःप्रार्थनमाशासनम् (१.८.१.३३.) एषा वाऽआशीरित्युक्तत्वात् (१.८.१.३६.) · आशास्तानि होतरि यजमानो मयीदमिति स्वरेण जपति । अनेकयजमानके सर्वेषां जपः प्रत्येकं जपेऽनूहः ।

---

१) प्रोषिते यजमानेऽध्वर्युरेव कर्तृवम् Mahâd. २) न्यायेन एक एव मन्त्रः प्राशने · एवमनुक्रमणिकाकारोऽपि उपहूता द्यावापृथिव्यमिति Mahâd. ३) but it is found also in the Mâdhyandina school at २. ११. ४) उपहूतोऽयं यजमान इति पठ्यमाने Mah.

उपहूतां प्राश्नन्ति युक्ताः ॥ २२ ॥ उपहूतामिडां सर्वे ऋत्विजः प्राश्नन्ति ।

यजमानश्च ॥ २३ ॥ इडां प्राश्नाति ।

पवित्रयोर्मार्जयन्तेऽपरेण वेदिं सुमित्रिया न इति (६.२२.) ॥ २४ ॥ वेदिमपरेण उपविष्टाः पवित्रयोरेव स्थिताभिरद्भिरात्मानं शोधयन्ति · आधारभूते पवित्रे तत्राधेयभूता आपः आप इति मन्त्रलिङ्गात् शाखान्तराच्च · शाङ्खायनब्राह्मणे वैतानसूत्रे च अद्भिः · अपरे तु तृतीयार्थे सप्तमी पवित्राभ्यां पूता इति कर्काचार्या हरिस्वामिनश्च [1]।

यजमानस्य प्राणापानौ पातमिति प्रस्तरे ते करोति ॥ २५ ॥ ते पवित्रे प्रस्तरमध्ये प्रवेशयति · अनेकयजमानके यजमानयोः यजमानानाम् ।

तूष्णीं वा ॥ २६ ॥ अत्र वा ब्रह्मा प्राश्नाति ॥ २७ ॥ [2]

भागमस्मै परिहरति ॥ २८ ॥ [3] परिहरणं चाहवनीयं पूर्वेण प्रदक्षिणं नयनम् · अयं च चतुर्धाकरणभागव्यतिरिक्तः तेषां दानस्य पूर्वमेव विहितत्वात् ।

यजमानभागं चाप्रोषिते ॥ २९ ॥ [4] गार्हपत्यमपरेण नीत्वा व्यवायपरिहाराय · ब्रह्मा चाध्वर्युसमर्पितं भागं प्रतिगृह्य प्राशित्रे निदधाति लाट्यायने दर्शनात् । प्रोषिते यजमाने तद्भागो वेदिमध्यऽएव तावत्तिष्ठति यावत्प्रस्तरहोमः तदनन्तरं हूयते ।

अन्वाहार्यमभिघार्योद्वास्यान्तरा ब्रह्मयजमानौ हृत्वा वेद्यां निधायालभते प्रजापतेर्भागोऽस्यूर्जस्वान्पयस्वान्प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाह्यूर्गस्यूर्जं मे धेह्यक्षितिरसि मा मे क्षेष्ठा अमुत्रामुष्मिंलोकऽइह चेति ॥ ३० ॥ [5] भागपरिहरणानन्तरमध्वर्युरन्वाहार्यमभिघार्य स्थालीस्थेनाज्येनोपरि निक्त्वा [6] उत्तरत उद्वास्य दक्षिणाग्नेरुपरिष्टादुत्तार्य गार्हपत्यदक्षिणाग्न्योरन्तरालेन

---

1) At १.८.१.४३. See Edit. pag. १२७. 2) अथ वास्मिन्काले ब्रह्मा प्राशित्रं प्राश्नाति · भक्षार्थं पूर्वं निहितं चेत् (२.२.१२.) अत्राग्नेऽइति (२. ११.) ब्रह्मा प्राश्नाति · माध्यन्दिनानामत्रैव प्राशनं युक्तं शाखानुग्रहात् Mah. 3) आहवनीयं पूर्वेण ब्रह्मभागं परिहृत्य अस्मै समर्पयति भक्षार्थम् Mahâd. 4) अप्रोषिते अकृतप्रवासे Ss. यजमानाय परिहृत्य प्रयच्छेत् भक्षस्तु व्रतविसर्गान्ते Mah. 5) Kâṇva, see Vâj. S. pag. ५८. Çâṅkhây ४. १. ४. 6) अन्वाहार्यं दक्षिणाग्निपक्वं चरुं स्थाल्याज्ये नाभिघार्य Mahâd.

प्रत्यङ्गीत्वा दक्षिणाग्नेर्दक्षिणेन अन्तरा अग्नी हृत्वा ब्रह्मयजमानयोरन्तरालेन नीत्वा[1] तत्रापि यजमानं दक्षिणेन ब्रह्माणमुत्तरेण पूर्वेणाहवनीयम् प्रणीतोत्करावन्तरा हृत्वा वेदिमध्ये आसाद्य आलभतेऽध्वर्युः । अत्रऽर्त्विक्कृतौ ऊर्गसीत्यस्य स्थाने दक्षिणाद्रव्यवाचिपदप्रयोगः कर्तव्यः आग्रयणे प्रथमजो गौरसीति दाक्षायणे च हिरण्यमसीति · बहुष्वपि द्रव्येषु द्वन्द्वैकवद्भावेनैकवचनान्तस्यैव प्रयोगः प्रथमजगवधेन्वृषभौष्टाराश्वमसीति · द्विगुसमासैकवद्भावेन वा त्रिगवमसीति । अभिघारणं त्वन्वाहार्यस्यैव अन्येषामनुपयोगात् · स्वादिम्नेत्योदनो ऽभिघार्यते न चान्येषां स्वादिम्ना प्रयोजनम् । आलम्भस्तु गवादेरपि भवति । गोस्तु ब्रह्मयजमानयोरन्तरा हरणं न भवति विरोधात् · वासस्तु प्रवर्तते विरोधाभावादिति कर्कः ।

सा दक्षिणा ॥ ३१ ॥[2] एषोऽन्वाहार्य उक्तः सात्र दर्शपूर्णमासयोर्दक्षिणा ज्ञेया · समविभागेन ऋत्विग्भ्यो दानम् · ब्राह्मणा अयं व ओदनः प्रतिगृह्णीतेति दानमन्त्रः । दानमात्रं कार्यम् न दर्भाक्षतोदकपूर्वम् · प्रतिग्रहस्तूष्णीम् ओंकारेण वा द्यौस्त्वा ददात्विति गृह्योक्तेन वा (पारस्कर° ३.१५.) ।

उदगुद्वासयति ॥ ३२ ॥ दानानन्तरं वेदिमध्यादन्वाहार्यमुदीच्यां दिश्युद्वासयति बहिर्निष्काशयति शाखान्तरात् ।

हविश्च ॥ ३३ ॥[3] यदग्नीषोमीयसांनाय्यादिकं शेषभूतम् चतुर्धाकरणं यस्य न भवति तद्धविः वेदेर्बहिर्निष्काशयति ॥ ॥ चतुर्थी कण्डिका ॥ ४ ॥

अथ पद्धतिः ॥

ततः स्फ्यं गृहीत्वाद्भिः संचरं होमार्थगमनागमनमार्गमभ्युक्ष्य प्राशित्रहरणे प्राशित्रमवद्यति · तत्र प्राशित्रहरणं सव्ये गृहीत्वा आज्यस्थाल्या उपस्तीर्य पुरोडाशमस्तकाद्द्वे शकले यवमात्रे पिप्पलमात्रे वा अवदाय द्वितीयपुरोडाशस्यापि तथैवावदायोपरिष्टादभिघारयेत् · अत्रोपस्ताराभिघारयोरेकं[4] कुर्यात् उभयं वा ।

---

1) यजमानस्य बहिर्भावेन अग्न्योर्मध्ये हृत्वा Mahád. 2) स दक्षिणेति वक्तव्ये सेत्युक्तम् दक्षिणागतलिङ्गान्तर्भावेन Mahád. 3) पुरोडाशादि Mahád. 4) ? °स्ताराद-भिघा° ?

ततः प्राशित्रं द्वितीयेन पात्रेणापिधायाध्वर्युसंचरेण होमार्थगमनागमनमार्गेणैव
तत्प्राशित्रं ब्रह्मणे प्रदायाहवनीयं पूर्वेण वा प्रदायाप उपस्पृशेत् । ब्रह्मा चाध्व-
र्युणावदीयमानं समर्प्यमाणं वा प्राशित्रं मित्रस्य त्वा चक्षुषेति[1] प्रतीक्षते · ततः
सपात्रं प्राशित्रं देवस्य त्वा°भ्यां प्रतिगृह्णामीति (२.११) अञ्जलिना प्रतिगृह्णाति ·
अवदीयमानं प्रेक्षतऽइत्यापस्तम्बः समर्प्यमाणमिति मानवे अञ्जलिना प्रति-
गृह्य प्राग्दण्डं सादयतीत्याश्वलायनः · ततो दक्षिणांसे स्तृतानि बर्हींष्यपोह्य
पृथिव्यास्त्वा नाभाविति मन्त्रेणानास्तृतभूमौ सपात्रं सादयति · पुनरनामिकाङ्गु-
ष्ठाभ्यां देवस्य त्वेति प्राशित्रहरणादवत्तं द्रव्यमादायाग्नेष्ट्वास्येनेति (२.११) दन्तैरच-
र्वयन्प्राश्नाति · आचम्य प्राशित्रहरणे पात्रेऽअद्भिरुत्करे प्रक्षाल्य या अप्स्वन्तरिति[2]
मन्त्रेण नाभिमालभते । ततोऽध्वर्युरिडापात्रीं गार्हपत्ये प्रतप्य तस्यां स्थाल्या
एवोपस्तीर्य पुरोडाशस्य दक्षिणतो मध्याच्चावद्यति · एवमेव द्वितीयपुरोडाशस्य
दक्षिणतो मध्याच्चावदाय स्थाल्या एवोपरिष्टाद्द्विरभिघारयति · ततः षडवत्ते स्था-
नद्वये स्थाल्या एवोपस्तीर्याग्नेयपुरोडाशस्यानियतप्रदेशादेकैकमवदाननमुभयत्राव-
दाय स्थाल्या एवोपरिष्टादभिघारयति · तत आग्नेयपुरोडाशादेवानियतस्थानाद्ब्र-
ह्मभागमवदाय ध्रुवायां निदधाति · तत आग्नेयपुरोडाशस्य पूर्वार्धाद्यजमानभाग-
मणुं दीर्घं प्रशीर्य शेषयित्वा[3] ध्रुवायाः पुरस्ताद्बर्हिषि निदधाति ध्रुवाग्रस्योप-
रि निदधातीति कर्कः । प्रधानावदानापेक्षया महास्विष्टकृदवदानम्[4] तदपेक्षया
महदिडावदानम् ऐडापेक्षया महच्चतुर्धाकरणानाम् दैवतसौविष्टकृतैडचातुर्धाक-
रणिकानामुत्तरमुत्तरं ज्याय इति वचनात् । ततः प्रत्यङ्मुखो भूत्वा होत्रे इडां प्र-
दाय हस्तेनापिमुञ्चन्होतारं प्रदक्षिणीकृत्य होतुरग्रे प्रत्यङ्मुख उपविश्य होत्रा
समर्पितामिडां प्रतिगृह्येडाया एव स्रुवेणाज्यमादाय होतुः प्रादेशिन्या उत्तमे प-
र्वणि मध्यमे च स्रुवेणैवानक्ति · पर्वशब्दः संधिवाची काण्डवाचीति केचित् ।
ततो होतुर्हस्ते इडाया एव पञ्चावत्तमवद्यति · होता च पञ्चममवदानं स्वयमे-
वादत्ते · अत्र पुरोडाशावदानादेव पञ्चावदानानि ग्राह्याणीति कर्कः · शाखान्तर-

---

1) Kâṇva, see Vâj. S. pag. ५८.—The paddhati gives here what it has omitted at २.२.१५ foll. 2) Kâṇva 3) ?? शेवयित्वा १ 4) महास्वि° १

सूत्रेषु लेपादुपस्तारः द्विरवदानम् लेपाद्विरभिघारणमिति · काठके च लेपाद्विरुपस्तारः सकृत्पुरोडाशावदानं लेपाद्विरभिघारणमिति । तत इडां पुनर्होत्रे ददाति · उपहूयमानायां सर्वेऽन्वारभन्ते होतारमिति कर्कः इडामित्यन्ये शाखान्तरसूत्रेषु च · इडाशब्देनेडापात्र्यामवत्तं पुरोडाशादि द्रव्यमुच्यते न तु पात्री । तत इडोपहूतेति होत्रा पठ्यमाने आग्नेयं पुरोडाशं चतुर्धा कृत्वा ब्रह्म पिन्वस्वेति मन्त्रान्तेऽध्वर्युर्बर्हिषि निदधाति । ततो यजमान आग्नेयादिविदिक्षु चतुरो भागान्निधाय प्रदक्षिणमाग्नेयस्थानादारभ्य इदं ब्रह्मणः इदं होतुः इदमध्वर्योः इदमाग्नीध्रस्येति ऋत्विग्भ्य आदिशति ऋत्विक्सम्बन्धित्वेन प्रकाशयतीत्यर्थः · ततो यजमानोऽपसव्यं कृत्वा दक्षिणाभिमुखो भागानालभ्यात्र पितर इति (२.३१) स्वरेण जपति · ततो भागान्विसृज्यापसव्येनैवामीमदन्तेति (२.३१) स्वरेण जपति · ततः सव्यं कृत्वाप उपस्पृश्य ऋत्विग्भ्यो भागान्यथादिष्टं समर्पयति इदं ब्रह्मणे इदं होत्रे इदमध्वर्यवे इदमाग्नीध्रायेति । तत उपहूते द्यावापृथिवीऽइति होत्रा पठ्यमानेऽग्नीधि षडवत्तं समर्पयति · उपहूतोऽयं यजमान इत्यस्मिन्होत्रा पठ्यमाने मयीदमिति (२.१०) मन्त्रं स्वरेण यजमानो जपति । अत्र चतुर्धाकरणमाग्नेयादेव अन्यत् प्राशित्रेडाषडवत्तब्रह्मयजमानभागानुभाभ्यामप्यवद्येदिति कर्कः · इडाप्राशित्रयोरवदानमुभाभ्याम्[1] तद्व्यतिरिक्तं सर्वमाग्नेयादेवेत्यन्ये सर्वेषु शाखान्तरसूत्रेषु च । ततः सर्वे प्रणीतोत्करावन्तरेण निष्क्रम्य समर्पणक्रमेण भक्षयन्ति · अग्नीत्प्रथमं चतुर्धाकरणभागं प्राश्याचम्योपहूता पृथिवीति (२.११) मन्त्रेण प्रथमावत्तं षडवत्तभागं प्राश्नाति तत आचम्य द्वितीयमुपहूतो द्यौरिति (२.१२) तत इडां भक्षयति · अन्येऽपि सर्वे प्रथमं चतुर्धाकरणभागं प्राश्येडां प्राश्नन्ति · यजमानोऽपीडायामवत्तस्य पञ्चमं भागं भक्षयति न न्यूनाधिकम् · ततः सर्वे आचम्य यथागतं प्रत्यागत्य वेदेः पश्चादुपविश्य ब्रह्मादिक्रमेण सुमित्रिया न इति (६.२२) पवित्रयोरवस्थिताभिरद्भिर्मार्जयन्ते · ततोऽध्वर्युर्यजमानस्य प्राणापानाविति पवित्रे प्रस्तरमध्ये प्रवेशयति तूष्णीं वा प्रस्तरे करोति । अत्रावसरे वा ब्रह्मा प्राशित्रप्राशनं नाभ्यालम्भनान्तं करोति । ततोऽध्वर्युर्ब्रह्मभागमाहवनीयं पूर्वेण प-

1) ? इडापात्रयोः ?

रिहृत्य ब्रह्मणे समर्पयति · ब्रह्मा च तं भागं प्रतिगृह्य प्राशित्रे निदधाति · ततोऽध्वर्युर्यजमानभागमपरेण गार्हपत्यं परिहृत्य यजमानाय परिसमर्पयति अप्रोषिते यजमाने · प्रोषिते तत्रैव तिष्ठति · यजमानस्तु तं भागं बर्हिष्येव निदधाति · तथा चाश्वलायनः मार्जयित्वास्मिन्ब्रह्मभागमवदधाति पश्चात्कुशेषु यजमानभागमिति । ततोऽध्वर्युरन्वाहार्यं स्थाल्याः स्रुवेणाभिघार्योदगुद्वास्य गार्हपत्यदक्षिणाग्न्योरन्तरालेन दक्षिणाग्नेर्दक्षिणेन च नीत्वा ब्रह्मयजमानयोरन्तरालेन हृत्वा तत्रापि यजमानाद्बहिर्ब्रह्माणमन्तरेणाहवनीयं पूर्वेण संचरेणानीय वेद्यां निधाय प्रजापतेर्भागोऽसीत्यालभते । ततो यजमानो ऽस्याः पौर्णमासेष्टेः समृद्ध्यर्थमन्वाहार्यं दक्षिणां ब्रह्मणे होत्रे अध्वर्यवे अग्नीधे च समविभागेनाहं सम्प्रददे ब्रह्मन्यस्ते भागः स प्रतिगृह्यताम् होतर्य॰ह्यताम् अध्वर्यो य॰ह्यताम् अग्नीद्य॰ह्यताम् · द्यौस्त्वा ददात्विति सर्वेषां प्रतिग्रहणमन्त्रः · ब्राह्मणा अयमोदनः प्रतिगृह्णीतेति शाखान्तरे दानमन्त्रः पठितोऽस्ति । ततस्तमन्वाहार्यमुदगुद्वासयति पात्र्यादिस्थं हविरुच्छिष्टं चोदगुद्वासयति ॥ ॥४॥

इति तृतीयस्य चतुर्थी कण्डिका ॥

समस्योल्मुके समिधमादायाह ब्रह्मन्प्रस्थास्यामि समिधमाधायाग्निमग्नीत्संमृड्ढीति ॥१॥ अध्वर्युरुल्मुके समस्य आहवनीयमध्यऽएव प्रक्षिप्याहवनीयेन मिश्रयित्वा[1] ततः प्राक्परिशेषितां समिधमादाय[2] ब्रह्मन्प्रस्थास्यामीति ब्रह्माणं प्रत्याह ब्रवीति · ततः समिधमाधायेत्यादिकमग्नीधं प्रत्याह · अत एव प्रैषभेदात् ब्रह्मन्प्रस्थास्यामीत्यत्रावसानम् ततः समिधमाधायेत्यादिकम् · एवं चैतौ द्वौ प्रैषौ · तत्र एकोऽनुयाजार्थः ततश्च अनुयाजाभावे आतिथ्यापयस्यागृहमेधीयोपसदादौ न भवति · अग्निसंमार्गस्त्वनुयाजाभावेऽप्यग्निसंस्कारकत्वादातिथ्यादौ प्रवर्ततऽएव तदर्थश्च प्रैषोऽपि । गृहमेधीये तु न प्रवर्तते सांतपनीयातन्त्रमध्यपातात् । समिदादानमाधानार्थम् न तु प्रैषार्थोऽयमुपग्रहः ततश्चानुयाजाभावे तस्या अभावादेवादानाभावः । उल्मुकसमासश्चानुयाजार्थ आहवनीय-

---

१) आहवनीये एकीकृत्य Mahád. २) उपवेषेण परिशेषितां Mahád. See ३.१.११.

संस्कारः · अतश्च समासविस्मरणे अनुयाजसमाप्त्यनन्तरं पुनरसमासः । वरुणप्रघासेषु ब्रह्मन्प्रस्थास्यावः समिधावाधायाग्नीऽग्नीत्संमृड्ढीत्यूहः [1] · दशाहुतिपक्षे ऽवभृथेष्टावपोऽग्नीत्संमृड्ढीत्यूहः · षडाहुतिपक्षे च संमार्ग एव न भवति ।

एषा तऽइति (२.१४) होतानुमन्त्रयते ॥ २ ॥ [2] होता तां समिधमनुमन्त्रयते । प्रैषश्रवणानन्तरं चाग्नीत्तां समिधमिध्मकाष्ठरूपामाहवनीयेऽभ्यादधाति · ततस्तस्या अनुमन्त्रणम् ।

अजानाति यजमानः ॥ ३ ॥ अनुमन्त्रणं कर्तुं होतरि अजानाति यजमानः एषा तऽइति समिधमनुमन्त्रयते । अनेकयजमानके प्रस्थास्यामः अग्नीनग्नी॰ प्रतिष्ठत एता वोऽग्नयः समिधस्ताभिर्वर्धध्वं चा च प्यायध्वमित्यूहः · वरुणप्रघासेषु एते वामग्नी समिधौ ताभ्यां वर्धेथां चा च प्यायेथामिति · कर्कमते त्वग्निपदस्य कुत्राप्यूहो न भवति [3] ।

संमार्ष्टि पूर्ववदपरिक्रामꣳ सकृत्सकृत्ससृवाꣳसमिति (२.१४) ॥ ४ ॥ [4] अग्नीदग्निम् दक्षिणपश्चिमोत्तरमध्येषु चतुर्ष्वप्यग्निप्रदेशेषु · तेन च तं विरजस्कमुज्ज्वलं करोति · अपरिक्रामम् एकत्र उत्तरत स्थित एव । अग्ने वाजजिदिति तत्र मन्त्रे ससृवांसमिति विशेषः · दशाहुतिपक्षे अवभृथे पूर्ववदूहः आपो वाजजितो वाजं वः ससृवांसीर्वाजजित इति ॥

ब्रह्मानुज्ञातोऽनुयाजैस्त्रिभिश्चरत्यौपभृतꣳ समानीय ॥ ५ ॥ ब्रह्मणा ओं प्रतिष्ठेत्येवमनुज्ञातोऽध्वर्युरौपभृतमाज्यं सशेषं जुह्वां समानीय त्रिभिरनुयाजैः चरति ।

अतिक्रम्याश्राव्याह देवान्यजेति ॥ ६ ॥ [5] समानयनानन्तरं जुहूमध्युह्य अतिक्रम्य यजतिदिशं गत्वा · अतिक्रम्याश्राव्येत्यनेन यजतित्वेन प्राप्तपुरोऽनुवाक्यानिरासः ।

यज-यजेत्युत्तरौ ॥ ७ ॥ उत्तरौ द्वावनुयाजौ यज-यजेत्येवं प्रेष्यति · प्रथम ऽएव देवान्यजेति ।

---

1) वरुणप्रघासे ब्रह्मन्प्रस्थास्यावः समिधावाधायेति सम्प्रदायः न कर्कः · अग्नोऽग्नीत्संमृड्ढीति कर्को न सम्प्रदायः · सम्प्रदायमतेऽवभृथेष्टावपोऽग्नीदित्यूहः Mah. 2) वरुणप्रघासेषु एते तेऽअग्ने समिधौ ताभ्यामित्यूहः Mahád. 3) ? ॰प्यूहेन २ 4) इध्मसंनहनैरनुपरिधि · न त्रिस्त्रिः Mahád. See ३.१.१३. 5) अतिक्राम्यादिग्रहणमनुवाचनव्युदासार्थम् अथ यदपुरोऽनुवाक्यका अनुयाजा भवन्तीति श्रुतेः (११.४.१.१२.) Mahád.

देवान्देवानिति वा सर्वत्र[1] नियमशब्दात् ॥८॥[2] देवान्यजेत्येवाध्वर्युराहेति (१.८.२.१४.) नियमात् नियमप्रतिपादकस्यैवशब्दस्य श्रवणात् ।

विकृतिदर्शनाच्च ॥९॥ विकृतावुत्तरयोरप्यनुयाजयोर्देवान्यजेत्यस्य दर्शनात् प्रकृतावपि सर्वेष्वेवं प्रैषो भवतीत्यवसीयते · यत्तु वरुणप्रघासेषु यज-यजेति श्रवणम् तद्गुणविधानार्थमेकदेशानुवाद इति पितृभूतिः · प्रकृतौ शाखान्तराद्विकल्पः[3] वरुणप्रघासेषु पुनर्यज-यजेति वचनं तस्यैव प्रयोगनियमार्थमिति कर्कः ।

प्रतीचो जुहोति ॥१०॥ एतांस्त्रीननुयाजानध्वर्युः प्रत्यक्संस्थाञ्जुहोति । अनुवृत्तिलोभेन प्रसङ्गादाह ·

उपसत्सु च ॥११॥ ज्योतिष्टोमे उपसत्संज्ञास्विष्टिषु चाग्निसोमविष्णुदेवतयागेषु प्रत्यक्संस्थान्होमान्करोति[4] । प्रयाजवत्कर्तुरप्यपसरणे प्राप्ते सत्याह ·

ध्रुवः ॥१२॥ अध्वर्युर्निश्चल एकत्र स्थित एव त्रीनप्यनुयाजान्प्रत्यक्संस्थाञ्जुहोति न प्रतिहोमं प्रत्यगपसरणम् ।

चतुर्थं समानीय प्राचीम् ॥१३॥ तृतीयानुयाजहोमानन्तरमुपविश्यौपभृतं सर्वं जुह्वां समानीय चतुर्थहोमं करोति · प्राक्संस्थामाहुतिम् · यजतिस्थानादित्योत्तरत उपविश्य तद्धि जुहोतीनां स्थानम् । तच्चतुर्थग्रहणमस्य होमस्यानुयाजाङ्गत्वप्रज्ञप्त्यर्थम् · अन्यथा पूर्वाघारवदपूर्वोत्पादके स्वतन्त्रं होमान्तरं स्यात् · अङ्गत्वे तु सत्यनुयाजसद्भावे भवति तदभावे च न भवति । अनुयाजान्ते स्वरुं जुहोतीति (६.३.१२) स्वरुहोमोऽपि साङ्गानुयाजोत्तरकालं भवति । अथवा देवानामेव देवतात्वमस्मिन्होमे यथा स्यादित्येवमर्थं चतुर्थग्रहणम् · मन्त्राभावेऽपि स्वाहाकारेण होमः कर्तव्यः ।

अभिचरन्ननुयाजानुमन्त्रणमशन्यमुं जहि ह्राडुन्यमुं जह्युल्कुष्यमुं जहीति ॥१४॥ अध्वर्युरेव समाख्यानात् पुरुषयोगाभावाच्च ।

---

1) देवादेवा॰३ देवांदेवान्सर्वत्र १.२. 2) त्रिष्वप्यनुयाजेषु Mahâd. देवान्यजेत्येव देवं देवमिति सर्वेषु होतेति (१.८.२.१४.) Ss. 3) ? शाखान्त॰ २. 4) प्रधानहोमान् Mahâd. 5) प्रत्यग्घोमेऽभिक्रम्याभिक्रम्ये(ति) प्राप्ते ध्रुव इति नियम उच्यते Mahâd.

एवं प्रवृद्धौ समं विभजेत् ॥ १५ ॥ [1] विकृतौ वरुणप्रघासेषु पशौ चानुयाजप्रवृद्धौ एतानि त्रीण्यनुमन्त्रणानि समं विभजेत् ।

स्वस्थानान्त्येन वोपायिवात् ॥ १६ ॥ वा पूर्वपक्षनिरासे · स्वस्थाने यो ऽन्त्यः स स्वस्थानान्त्यः तेनागन्तूनामनुमन्त्रणं कुर्यात् तस्य स्वस्थानान्त्यस्य हि स्थानमुपयन्त्यागछन्त्यागन्तवः अतस्तत्स्थानमापन्नास्तद्धर्मं लभन्ते । प्रथमानुयाजबर्हिषोऽनन्तरं द्वितीयस्य नराशंसस्य स्थानम् तस्मिन्द्वितीयस्य स्थाने देवीर्द्वार इत्यादयः षडागन्तवः पठिताः [2] ततः सप्तमो नराशंसः · तेनैष नराशंसो द्वाःप्रभृतीनां सप्तानामन्त्यः · अत एतेषां नराशंसानुमन्त्रणेन ह्राडुनीत्यनेनानुमन्त्रणम् · द्वितीये स्थाने एकत्र सप्तानां होमश्च कार्यः । ततस्तृतीयस्य स्विष्टकृतः स्थाने देवो वनस्पतिर्देवं बर्हिरिति द्वौ वैकृतौ पठितौ भवतो देवोऽग्निः स्विष्टकृदिति प्रकृतोऽन्त्यः अतो वनस्पतिप्रभृतीनामसौ स्वस्थानान्त्यः · अत एतेषां तृतीयस्यानुमन्त्रणेनोल्कुषीत्यनेनानुमन्त्रणम् तृतीयस्थाने होमश्चेति सिद्धम् । विकृतौ चानुयाजसंख्या प्राकृतानुयाजाभ्यासेनैव पूरणीया तस्या उत्पन्नशिष्टत्वेनोत्पत्तिशिष्टया त्रिसंख्यया सह विकल्पसमुच्चयबाधानुपपत्तेः · अतो ऽभ्यासेनैव पूरणीया · तस्मादत्र द्वितीयतृतीययोरभ्यासेन पूरणं युक्तम् । तदुक्तम् अनुत्पत्तौ तु या संख्या साभ्यासेनैव पूर्यते इष्टस्तेनानुयाजानामभ्यासो विकृताविति तत्रान्त्याभ्यास इष्येत तस्मात्पाठो यदान्तरा [3] सति त्वन्तरापाठे तु नान्त्यस्याभ्यास इष्यते · यतो वैकृतानां सप्तानां पठनादनन्तरं मध्ये नराशंसः पठितः अतस्तत्पूर्वेषां नराशंसधर्मसम्बन्धस्तत्स्थानापन्नत्वात् ततः परेषां तूत्तमस्येति · प्रयाजेषु तु वैकृतमध्ये प्राकृतस्य पाठो नास्ति किंतु चतुर्थानन्तरं सर्वे वैकृताः पठिताः ततोऽन्ते स्वाहाकारः पञ्चमः पठितः तेन तत्रान्त्यस्यैवाभ्यासो युक्तः सर्वेषां तत्स्थानापन्नत्वादिति सर्वमनवद्यम् । अत्रेयं कृत्वा-चिन्ता · अनुमन्त्रणं हि विकृतौ न प्राप्नोत्येव तस्याक्रत्वर्थत्वेन विकृतावनपेक्षितत्वात् · न च वानस्पत्यचमसन्यायः तत्र हि वानस्पत्यचमसः क्रत्वपेक्षयैव प्र-

---

१) यथा प्रथमत्रिके तथा द्वितीये तथा तृतीयेऽनुमन्त्रणमित्यर्थः Mahâd. २) ? पतिताः २ ३) ? यन्नान्तरा ?

वृत्तः इह त्वनुमन्त्रणनिबन्धनोऽभिचारो नानुयाजनिबन्धनः अनुमन्त्रणं च पुरुषार्थत्वान्न क्रत्वपेक्षया गृह्यते · अतो न्यायोपप्रदर्शनार्थं कृत्वा-चिन्तैवेयम्। अथवाभ्यस्यमानानां होमस्थानादिसम्बन्धनिर्णयार्थमिदमधिकरणम् · तेन द्वितीयप्रभृतीनां नराशंसान्तानां द्वितीयस्थाने होमः ततो वनस्पतिप्रभृतीनामन्त्यस्य स्थानऽइति सिद्धम्। अत्राहुः पितृभूत्याचार्याः अनुमन्त्रणस्य पुरुषार्थत्वाद्विकृतावप्रवृत्तेर्वचनात्प्रवृत्तिः कृत्वा-चिन्ता वेति।

एत्य जुहूपभृतौ व्यूहति ॥१७॥ यजतिस्थानादागत्य स्रुचौ स्वस्थाने सादयत्यध्वर्युः ततो यजमान एत्य स्वस्थानाद्वेदेः पश्चादागत्य जुहूपभृतौ व्यूहति · ऊह वितर्के अत्र प्रेरणे द्रष्टव्यः विविधम् अन्योऽन्यविपरीतं प्रेरयति · जुहूमन्यस्यां दिशि उपभृतमन्यस्यामिति विशब्दस्यार्थः। अनेकयजमानके इतरान्वारब्ध एक एव।

अग्नीषोमयोरिति (२.१५) जुहूं प्राचीं दक्षिणेनोत्तानेन ॥१८॥ प्रस्तरात्प्राचीं प्रेरयति · अत्राग्नीषोमग्रहणं मन्त्रे न्यायप्राप्तप्रधानदेवतामात्रोपलक्षणार्थम्।

अग्नीषोमौ तमितीतरेणेतरां (२.१५) नीचा प्रतीचीम् ॥१९॥ सव्येन न्युब्जेन प्रतीच्यां दिशि बहिर्वेदि प्रेरयति प्रत्यगग्रामेव [1] सतीमित्यर्थः। अत्रैवाग्नीषोमग्रहणं मन्त्रे न्यायप्राप्तप्रधानदेवतामात्रोपलक्षणार्थम् · ततश्चैवं प्रयोगः अग्नेरग्नीषोमयोरग्नीषोमयोरुज्जितिमिति अग्निरग्नीषोमावग्नीषोमौ तमपनुदन्त्विति। अत्र मतभेदः · प्रैषव्यतिरिक्तस्य सर्वस्योपांशुत्वपक्षे उपांशुयाजपुरोडाशदेवताभूतयोर्द्वयोरग्नीषोमयोस्तन्त्रेणोच्चारणम् गुणभेदाभावात् · शेषमुत्तमेनेत्यनेन (३.१५) अनुयाजप्रभृतिमन्त्रमात्रस्योत्तमस्वरविधानपक्षे च गुणभेदाद्भेदेनोच्चारणम् तदा चोपांशुयाजाग्नीषोमयोरुपांशूच्चारणम् पुरोडाशदेवतयोस्तूच्चैरिति · एवं सर्वत्रोपांशुदेवतेषु अन्यदेवतासहितेषु ज्ञेयम्।

यथादेवतमन्यत् ॥२०॥ अग्नीषोमयोरित्येवं व्यूहनप्रकारप्रदर्शनार्थमु-

१) ? प्रागग्रा° २

क्तम् · अन्यदपि यथादैवतं व्यूहति एकैकस्या देवतायाः षष्ठ्यन्तं नाम कीर्तयित्वा जुहूं व्यूहति प्रथमान्तं च कीर्तयित्वा उपभृतमिति ।

अध्वर्युर्वा ॥२१॥ स्रुचौ व्यूहति न स्वयं यजमानः । तत्पक्षे व्यूहनमन्त्रे विशेषमाह ·

अनूज्जयवयं यजमानो वाजस्येनमिति पूर्वे ॥२२॥ [1] पूर्वे जुहूव्यूहनमन्त्रे ।

यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टीत्युत्तरे ॥२३॥ ऊहः । जुहूस्थानापन्नानां च शूर्पार्कपर्णदोहनौदुम्बरस्रुवादीनामपि व्यूहनं भवति · वसाहोमहवन्याश्च · पृषदाज्योपभृतश्चोपभृत्स्थानापन्नत्वात् ।

अभ्युद्य जुह्वा परिधीननक्ति यथापूर्वं वसुभ्य इति (२.१६) प्रतिमन्त्रम् ॥२४॥ व्यूहनानन्तरं ते स्रुचावभ्युद्य स्वस्थाने प्रत्यानीय जुह्वा यथापूर्वमिति उपधानक्रमेण परिधीननक्ति वसुभ्य इति प्रतिमन्त्रमेकैकम् · अञ्जनं च वेदोपग्रहणेन । न च रुद्रेभ्यस्त्वेत्यत्रापामुपस्पर्शनम् मन्त्रस्यारौद्रत्वात् वसुभ्यस्त्रयाणां परिधय इति कात्यायनेन (अनुक्रमणी° १.७) परिधिदेवतत्वस्योक्तत्वाच्च ॥ ॥ पञ्चमी कण्डिका ॥५॥

अथ पद्धतिः ॥

ततोऽध्वर्युरुल्मुकेऽआहवनीयमध्यऽआनीय परिशेषितमिध्मकाष्ठं हस्तेन गृहीत्वा प्रेष्यति ब्रह्मन्प्रस्थास्यामीति ब्रह्माणं पृच्छति समिधमाधायाग्निमग्नीत्संमृड्ढीत्यग्नीधं प्रति प्रैषः · ततो ब्रह्मा एतं ते देव सवितरित्यादि मादयन्तामित्यन्तं (२.१२-१३) पठित्वा ओं३ प्रतिष्ठेति (२.१३) ब्रूयाद्वानुब्रूयात् [2] · ततोऽग्नीदुत्तरतस्तिष्ठन्समिधमाहवनीयेऽभ्याधायोत्तरपार्श्वे स्थित एवाग्ने वाजजिद्वाजं त्वा ससृवाꣳसमिति (२.१४) मन्त्रेणानुपरिधि दक्षिणपश्चिमोत्तरपार्श्वेषु अग्निं सकृत्सकृत्संमार्ष्टि प्रतिदिशं मन्त्रावृत्तिः ततः सकृत्तूष्णीं मध्ये उपरिष्टात्संमार्ष्टि । ततो होता आहवनीयेऽभ्याहितां तां समिधमेषा तेऽअग्ने इत्यनुमन्त्रयते (२.१४) · होतर्यनुमन्त्रणं कर्तुमजानति यजमानोऽनुमन्त्रयते । ततो ब्रह्मणा प्रतिष्ठेत्यनुज्ञातोऽध्वर्यु-

---

१) पूर्वमन्त्रे अनूज्जयवयं यजमानो वाजस्येनमिति अनूज्जेषं वाजस्य मेति स्थाने Mah.
२) See २.२.२१—२२.

रौपभृतं सशेषं जुह्वां समानीय स्रुचावादायातिक्रम्याश्राव्य देवान्यजेति होतारं प्रेष्यति । ततो जुहूमवतार्य प्रदीप्तायाः समिधः पूर्वार्धे प्रथमं तृतीयं भागं जुहोति इदं देवाय बर्हिषऽइति त्यागः । पुनर्जुहूमध्युह्याश्राव्य देवान्यजेति प्रैषः · जुहूमवतार्य पूर्वहुतात्प्रतीच्याः[1] समिध उपरि मध्यभागे होमः इदं देवाय नराशंसायेति त्यागः । पुनर्जुहूमध्युह्याश्राव्य देवान्यजेति प्रैषः · अवतार्य द्वितीयवारहुतापेक्षया पश्चात्समिधो[2] मूलभागे होमः इदं देवायाग्नये स्विष्टकृतऽइति त्यागः । एवं प्रत्यक्संस्था एते होतव्याः · स्वयं तु ध्रुव एकत्राविचलः स्थित एव जुहोति । अभिचारं कुर्वन्नशन्यमुं जहीति प्रथममनुयाजमनुमन्त्रयते ह्राडुनीति द्वितीयम् उल्कुषीति तृतीयम् · तत उदकस्पर्शः · अभिचाराभावे उदकस्पर्शाभावः । ततः प्रत्यागत्योत्तरत उपविश्यौपभृतं जुह्वां सर्वं समानीय देवेभ्यः स्वाहेति प्राचीमाहुतिं जुहोति अनया आहुत्या समिधि प्रत्यक्संस्थान्हुतांस्त्रीनुयाजान्सम्भिनत्तीति सूत्रान्तरेषु · इदं देवेभ्य इति त्यागः । ततः प्रत्यागत्य स्वस्थाने स्रुचावासाद्य व्यूहति । तत्राध्वर्युः सव्येन वेदं गृहीत्वा दक्षिणेन पाणिनोत्तानेन जुहूं प्रस्तरात्प्राचीं प्रेरयति · तन्मन्त्रः अग्नेः अग्नीषोमयोः उपांशु अग्नीषोमयोरुज्जितिमनूज्जयत्वयं यजमानो वाजस्यैनं प्रसवेन प्रोहामीति । ततो दक्षिणेन वेदमादाय सव्यहस्तेनाधोमुखेनोपभृतं प्रतीचीं बहिर्वेदि प्रेरयति · अग्निः अग्नीषोमौ उपांशु · अग्नीषोमौ तमपनुदन्तु यमयं यजमानो द्वेष्टि यश्चैनं द्वेष्टि वाजस्यैनमिति मन्त्रेण । यजमानो वा स्वस्थानाद्वेदेः पश्चादागत्य स्रुचाविवमेव व्यूहति · मन्त्रमात्रे विशेषः · अग्नेः अग्नीषोमयोः अग्नीषोमयोरुज्जितिमनूज्जेषं वाजस्य मा प्रसवेन प्रोहामीति (२.१५) जुह्वाः · अग्निः अग्नीषोमौ अग्नीषोमौ तमपनुदन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामीत्युपभृतः (२.१५) । ततोऽध्वर्युः स्रुचावभ्युद्य स्वस्थाने प्रत्यासादयति । मानवे विषूची व्यूहति प्राचीं जुहूं प्रस्तरात्प्रतीचीमुपभृतं बहिर्वेदेर्निरस्याभ्युद्य प्रत्यासादयति न जुहूं प्रस्तरऽइति · एवं सर्वेषु ॥ ॥५॥

इति तृतीयस्य पञ्चमी कण्डिका ॥ ॥

1) ? °तीच्यां १ 2) ? °मिधि १

प्रथमं परिधिं गृहीत्वाश्राव्याहेषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहीति ॥ १ ॥[१] होतारं प्रत्याह । आश्रावणार्थमेतत्परिधिग्रहणम् ततश्चाश्रावणाभावे दर्विहोमेषु न भवति ।

पशौ प्रेष्येति ॥ २ ॥ पशौ सूक्ता ब्रूहीत्येतस्य स्थाने सूक्ता प्रेष्येत्येवं मैत्रावरुणं प्रत्याह · न सूक्ता ब्रूहीत्येवं होतारं प्रति ।

संज्ञानाथामिति (२. १६) प्रस्तरादानम् ॥ ३ ॥ प्रैषानन्तरमध्वर्युः हस्तेन प्रस्तरस्य ग्रहणं कुर्यात् ।

विधृती स्थाने कृत्वानक्त्येनं व्यन्तु वय इति (२. १६) ॥ ४ ॥[२] विधृती तृणे स्थाने कृत्वा बर्हिषो यस्मात्स्थानादृहीते तत्रैव निधाय ततः एनं प्रस्तरमग्रमध्यमूलेष्वनक्ति ।

अग्रं जुह्वाम् ॥ ५ ॥ उपभृति मध्यम् ॥ ६ ॥

मूलमितरस्याम् ॥ ७ ॥ ध्रुवायाम् · त्रिष्वपि स्थानेषु व्यन्तु वय इत्ययमेवाञ्जनमन्त्रः ।

मरुतामिति (२. १६) नीचैर्हृत्वा तृणमादायानुप्रहरति ॥ ८ ॥ मरुतामिति तमक्तं प्रस्तरं स्रुचो दक्षिणेन चापरेण चानीयाहवनीयं प्रति नीचैर्भूमिसंलग्नमिव हृत्वा आहवनीयसमीपमानीय ततः प्रस्तरादेकं तृणमादाय पृथक्कृत्वा जुह्वा प्रस्तरमनुप्रहरति प्रागग्रमुदगग्रं वा आहवनीयऽएव प्रक्षिपति · अञ्जनानन्तरं प्रस्तरः स्रुचां दक्षिणतः पश्चाच्च नेयः स्रुक्षु वर्तमानस्याज्यस्य हविष्ट्वात् प्रस्तरस्य पात्रत्वात् हविष्पात्रस्वाम्यृत्विजामित्यनेन (१. ८. ३१) पात्रस्य हविष्टो बहिर्भावोपदेशात् ।

हस्तेनाचरति ॥ ९ ॥[३] आचरणं चोपसमूहनमग्निमध्ये प्रेरणम् · अग्नौ हुतं प्रस्तरं हस्तेन प्रेरयति अङ्गुलिभिरेव न पाणितलेन तमङ्गुलिभिरेव योयुप्येरन्निति श्रुतेः (१. ८. ३. १८) · युप विमोहने पुनः पुनः संमूर्छयेयुः ।

---

१) See १. ८. ३. १. — प्रथमं मध्यमम् · प्रैषाभावे परिधिग्रहणाभावः Mahâd. २) विधृत्योः स्थानमाहवनीय इति कर्कः उत्कर इति वैद्यनाथमिश्राः उत्करो वाऽअतिरिक्तस्य प्रतिष्ठेति श्रुतेः (८. ७. २. १६) · तत्र विधृती प्रक्षिप्य Mahâd. ३) होत्रा पठ्यमाने सूक्तवाके प्रस्तरं हस्तेन प्रेरयति Mahâd.

यजमानभागं च प्रोषिते ॥१०॥   हस्तेन जुहोति · कृतप्रवासे यजमाने ।

क्षत्रियवैश्ययोश्च नित्यम् ॥११॥[1]   क्ष॰योः यजमानयोः प्रोषिते चाप्रोषिते च यजमानभागं हस्तेन जुहोति ।

अहं त्वदस्मि मदसि त्वमेतन्मम त्वं योनिस्तव योनिरस्मि   ममैव सन्दिवि[2] देवेष्वधि पुत्रः पित्र्ये लोककृज्जातवेदः स्वाहेति ॥१२॥   अयं सर्वेषां ब्राह्मणादीनां भागहोममन्त्रः   स्वाहाकारान्तत्वात् संनिधानाच्च · जातवेदा देवता इदं जातवेदसऽइति त्यागः ।

सूक्तवाकान्ते ॥१३॥[3]   प्रस्तरानुप्रहरणं यजमानभागहवनं चैतदुभयं सूक्तवाकान्ते भवति   सूक्तवाकेन प्रस्तरं प्रहरतीति शाखान्तरात् । तत्रायं यागः प्रस्तरद्रव्यको देवताकश्च   अग्न्यादयो ह्यत्र संकीर्त्यन्ते · अयमेव जैमिनेरपि सिद्धान्तः · तेन सूक्तवाकान्ते जुह्वा प्रस्तरमाहवनीये जुहोति   इदमग्नये सोमायाग्नयेऽग्नीषोमाभ्यामग्नीषोमाभ्यां देवेभ्य आज्यपेभ्योऽग्नये होत्रायेत्येवं त्यागश्च कर्तव्यः । आतिथ्योपसत्पित्र्यादौ च प्रस्तरप्रहरणाभावेऽपि वचनात्सूक्तवाकस्य प्रयोगः · कर्कमते तु विपरीतम् कालार्थोऽयं संयोगः   प्रस्तरस्य हस्तेनैवाहवनीये प्रक्षेपमात्रम् त्यागाभावश्चेति । प्रस्तरहोमानन्तरमेव हस्तेन यजमानभागो होतव्यः · केचित्तु यजमानस्य भक्षणकालऽएव तद्भागस्य होममिच्छन्ति ।

अग्नीदाद्दानुप्रहरेति ॥१४॥   अध्वर्यु प्रति । वरुणप्रघासेष्वनुप्रहरतम् बहुपूद्वसानीयासु अनुप्रहरतेति ।

प्रास्य तृणं चक्षुष्पा इत्यात्मानमालभते (२. २६) ॥१५॥   अध्वर्युः प्रस्तराद्गृहीतं तृणमाहवनीये प्रक्षिप्य आत्मानं हृदयदेशे स्पृशति[4]   ततोऽप उपस्पृशति च ।

संवदस्वागानग्नीदगञ्छ्रावय श्रौषट् स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शम्योर्ब्रूहीत्येतेषां७ संवदस्वागञ्छ्रौषडित्यग्नीदेषमितरो व्यत्यासं ब्रूतः ॥१६॥[5] अग्नीदध्वर्युं प्रेष्यति   संवदस्व त्वं मया सह   शम्युवाकप्रैषार्थमिति । तमध्वर्युः

---

१) भागं हस्तेनाचरति नित्यं नियमेन भक्षप्रतिषेधात् Mahád.   २) संदिवि १. ३. ३) होतुः सूक्तवाकपाठान्ते Mahád.   ४) चक्षुषीऽआलभतऽइति वैद्यनाथमिश्राः Mahád. ५) संवादश्च शम्योरङ्गम् Mahád.

पृछति अगानग्नीत् हे अग्नीत् किमगमत्प्रस्तरशरीरो यजमानः स्वर्गं लोकम् किं दग्धः प्रस्तर इत्यर्थः । अग्नीत्तु अगन्निति प्रतिवचनं ददाति गतो यजमानः दग्धः प्रस्तर इत्यर्थः । अध्वर्युस्त्वाह यद्येवम् ततः शम्युवाकपरिधिप्रहरणयोः कालो वर्तते ततश्च श्रावय होतारमाकर्णयेत्यर्थः । अग्नीत्त्वाह श्रौषट् शृणोत्येवायमवहितो ब्रूहि त्वं यद्विवक्षितमिति । स्वगा दैव्या होतृभ्य इति शम्युवाकप्रैषः · हे होतः शम्योर्बार्हस्पत्यस्य ऋषेरार्षं ब्रूहि · स्वगा स्वस्थानगामित्वं देवेभ्यो होतृभ्यः परिधिशरीरेभ्यो हूयन्तां परिधय इत्यर्थः मानुषेभ्यः तु होतृभ्यः स्वस्तिरविनाशोऽस्त्वित्येवंरूपं वाक्यं ब्रूहि । अयं तावद्वाक्यार्थः श्रुतिस्तु गूढमर्थान्तरमाह अथाह संवदस्वेतीत्यादिना (१.८. ३.२०)।

परिधीननुप्रहरति यं परिधिमिति (२.१७) प्रथममितरौ च युगपदग्नेः प्रियमिति (२.१७) ॥ १७ ॥[1] ततोऽध्वर्युर्हस्तेनैव परिधीनाहवनीये प्रक्षिपति ।

स्रुचौ प्रगृह्णाति सञ्स्रवभागा इति (२.१८) सञ्स्रवान्जुहोति ॥ १८ ॥ अध्वर्युर्जुहूपभृतौ उभाभ्यां हस्ताभ्यां गृह्णाति ताभ्यामुभाभ्यामपि च संस्रवान्जुहोति · विश्वे देवा देवता । संस्रवाणामविशेषि[त]त्वान्नाज्यसाधनकयागाङ्गता ततश्च सर्वत्र प्रवृत्तिः ।

घृताचीऽइति (२.१९) धुरि निदधात्यनसि चेद्ग्रहणम् ॥ १९ ॥ अध्वर्युरनसो धुरि स्रुचौ स्थापयति यदि अनसि हविर्ग्रहणं प्राक्कृतं भवति । पशौ सर्वाः स्रुचः घृताच्य स्थ धुर्यौ पात सुम्ना स्थ सुम्ने मा धत्तेति · गृहमेधीयायामेकस्यां जुह्वाम् घृताच्यसि धुर्यौ पाहि सुम्नासि सुम्ने मा धेहि ।

स्फ्ये पात्र्यां चेत् ॥ २० ॥[2] स्फ्ये वेद्या उत्तरांसदेशे उदगग्रे निहिते स्रुचौ प्रागग्रेऽएव निदधाति ।

यज्ञ नमश्च तऽइति (२.१९) वेदिमालभते ॥ २१ ॥[3] आपस्तम्बसूत्रेऽयं पदार्थो याजमानकाण्डे पठितोऽस्ति । अनेकयजमानके एक एवेतरैरन्वारब्धः · स्विष्टं नः संतिष्ठस्वेत्यूहः कर्कमते त्वध्वर्युकर्तृकत्वादूहाभावः ।

---

१) प्रथमं मध्यमम् दक्षिणोत्तरौ सहैव · अवभृथे अपां प्रियं पाथोऽपीतमित्यूहः Mah.
२) तदांसदेशे स्फ्ये निदधाति न च अपणस्य पश्चादनःस्थाने Mahâd. ३) यजमानः · वेद्यालम्भनमिदं शम्योरङ्गम् Mahâd.

वेद७ होता स्रुक्स्रुवमध्वर्युराज्यस्थालीमग्नीदादाय ॥ २२ ॥ [1] ॥ षष्ठी कण्डिका ॥ ६ ॥

अथ पद्धतिः ॥

ततो जुहूमादाय वसुभ्यस्त्वेति (२.१६) मध्यमं परिधिं जुह्वा अनक्ति रुद्रेभ्यस्त्वेति दक्षिणम् आदित्येभ्यस्त्वेत्युत्तरम् · ततो जुहूं प्रस्तराडुत्तरतः सादयति न प्रस्तरे · ततः प्रथमं परिधिमालभ्याश्राव्येषिता दैव्या होतार इति प्रैषं होतारं प्रत्याह । ततः संज्ञानाथामिति (२.१६) सपवित्रं प्रस्तरमादाय विधृती यतः प्रदेशाद्गृहीते तत्रैव निधाय व्यन्तु वय इति (२.१६) प्रस्तरस्याग्रं जुह्वामनक्ति मध्यमुपभृति मूलं ध्रुवायाम् ते तेनैव मन्त्रेणानक्ति · ततः स्फ्यं गृहीत्वा प्रस्तरं स्रुचो दक्षिणेनानीय नीचैर्भूमिलग्नमिव होमार्थमाहवनीयं प्रति हरति मरुतां पृषतीरिति मन्त्रेण (२.१६) · ततः प्रस्तरादेकं तृणं पृथगादाय सूक्तवाकान्ते जुह्वा प्रस्तरं प्रागग्रमुदगग्रं वा जुहुयात् तं प्राञ्चमनुसमस्यति अथोऽउदञ्चमित्युभयथा श्रुतेः (१.८.३.१८) · तत्र इदमग्नये सोमायाग्नयेऽग्नीषोमाभ्यामग्नीषोमाभ्यां देवेभ्य आज्यपेभ्योऽग्नये होत्रायेति त्यागः · ततो हुतं प्रस्तरमध्वर्युरङ्गुलीभिरग्नौ प्रेरयेत् । यजमानः प्रोषितश्चेत् सूक्तवाकान्तेऽध्वर्युर्हस्तेनैव यजमानभागमाहवनीये जुहुयात् इदं जातवेदसऽइति त्यागः । ततोऽग्नीदनुप्रहरेत्यध्वर्यु प्रति ब्रूयात् · ततोऽध्वर्युः प्रस्तराद्गृहीतं तृणमग्नावनुप्रहृत्य चक्षुष्पा इत्यात्मानमालभते (२.१६) उदकस्पर्शः । ततोऽग्नीत्संवदस्वेत्याह · अगानग्नीदित्यध्वर्युः · अगन्नित्यग्नीत् · आ३वयेत्यध्वर्युः · औ३षडित्यग्नीत् · स्वगा दैव्येत्यध्वर्युः । ततोऽध्वर्युः यं परिधिमिति (२.१७) प्रथमं परिधिं हस्तेनैवानुप्रहरति दक्षिणोत्तरौ परिधीऽअग्नेः प्रियमित्यनुप्रहरति (२.१७) । ततो जुहूपभृतावादाय सञ्स्रवभागा इति (२.१८) संस्रवानुभाभ्यां स्रुग्भ्यां जुहोति इदं विश्वेभ्यो देवेभ्य इति त्यागः । ततो घृताची स्थो धुर्यावित्ति (२.१९) मन्त्रेण स्रुचौ अनसो धुरि निदधाति अनडुहोर्योजनस्थाने य-

---

1) Mahâd. closes the sixth ka*n*d*i*kâ by the beginning sûtra of the seventh: but १.२.३.४. agree in breaking off here, and in the paddhati the contents of this sûtra are given in the seventh ka*n*d*i*kâ.

यनस्तः पूर्वं हविर्ग्रहणं कृतं भवति · अथ यदि पात्र्याः सकाशाद्धविर्ग्रहणं कृतम् तदोत्तरांसे स्फ्यमुदगग्रं निधाय तस्योपरि प्रागग्रे जुहूपभृतौ निदधाति घृताची ऽइति मन्त्रेण (२.१६)। ततो लिङ्गाद्यजमानो यज्ञ नमश्च तऽइति (२.१७) वेदिमालभते स्फ्योपग्रहेण ॥ ॥ ६ ॥

इति तृतीयस्य षष्ठी कण्डिका ॥

पत्नीसंयाजेभ्यो गार्हपत्यं गच्छन्ति ॥ १ ॥ पत्नीसंयाजान्कर्तुम्। अध्वर्योर्गमनाय मार्गमाह ·

अध्वर्युः पूर्वदक्षिणेन गार्हपत्यमेत्य ॥ २ ॥[१] गार्हपत्यदक्षिणाग्न्योरन्तरालेनागत्य पत्नीसंयाजैश्चरति।

पूर्वेण ॥ ३ ॥ अथवा अध्वर्युराहवनीयं पूर्वेण परीत्य दक्षिणतो वितानं गार्हपत्यं गच्छति।

अपरेणान्तरेण पत्नीमेकेषाम् ॥ ४ ॥ अथवा अध्वर्युरपरेण गार्हपत्यं यजतिदेशं प्रति गच्छति। तत्रापि मार्गद्वयम् एकेषां मते पत्नीमन्तरेण [गार्हपत्यात्] नैर्ऋतदिगुपविष्टां पत्नीमग्निं चान्तरेण दक्षिणतो यजतिस्थानं गच्छति अर्थात् अन्येषां मते पत्न्या बाह्यतः · अध्वर्युणा गार्हपत्यस्य दक्षिणतो गन्तव्यम् गार्हपत्यमपरेण च अतो विकल्पः अन्तरेण बाह्येन वा पत्नीमिति। स्रुक्स्रुवग्रहणमुपभरणार्थं प्राप्ताया उपभृतो निरासार्थम्।

उपविश्य दक्षिणं जान्वाच्य ॥ ५ ॥ अध्वर्युर्गार्हपत्यस्य दक्षिणात ईशानाभिमुखः दक्षिणं जानु भूमौ पातयित्वा सोमादीन्यजति · यजतिष्वात्तिष्ठद्धोमे प्राप्ते (१.२.६) उपविश्येत्याह।

एवꣳ सर्वत्रोपविष्टहोमेषु ॥ ६ ॥ एवमिति उपविश्य दक्षिणं जान्वाच्येति गृह्यते · न केवलमत्रैवम् किंतु सर्वत्र सर्वेषु उपविष्टहोमेषु पूर्वाघारदक्षिणाग्निहोमकर्मापवर्गहोमयूपाहुतिसावित्रहोमादिषु।

उपांꣳशु चरन्ति ॥ ७ ॥[२] पत्नीसंयाजैः।

---

१) अपराग्न्योर्मध्ये यजतिदेशमेत्य · पत्नीसंयाजान्यजतीति शेषः · प्रथमपक्ष एव श्रेयान् पूर्वेण गार्हपत्यमन्तरेणाहवनीयम् Mahâd. २) शनैरुच्चारयन्मन्त्रानोष्ठदोष्ठौ प्रचालयेत् किंचिच्छब्दं स्वयं विद्यादुपांशु स जपः स्मृत इति Mahâd.

चरणशब्दे सर्वम् ॥ ८ ॥　यत्र चरणशब्दो विधिवाक्ये तत्र सर्वमुपांशु भवति ।

देवतान्यत्र ॥ ९ ॥　यत्र चरणशब्दो न भवति तत्र देवता उपांशु भवति　नान्यत् ।

यजति सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमिति ॥ १० ॥　स्थालीस्थेनाज्येन चतस्रो देवता यजति ।

तृतीयेऽन्तर्धानं पुरस्तात् ॥ ११ ॥　तृतीये पत्नीसंयाजे पुरस्तात्कटादिना अन्तर्धानं करोति ।

पत्न्यन्वारभतेऽध्वर्युम् ॥ १२ ॥[१]　अधिकारात्तृतीयऽएव पत्नीसंयाजे · स चायमध्वर्युसंस्कारो द्वितीयानिर्देशात्　अतः पत्न्यभावेऽपि येन केनचित्कर्तव्यः ।

शम्य्वन्तं भवतीडान्तं वा ॥ १३ ॥　वाशब्दस्य शम्य्वन्तेन सम्बन्धः · तेनायमर्थः　तदिदं पत्नीसंयाजाख्यं कर्म इडान्तं भवत्येव शम्य्वन्तं वा भवति　शम्युर्भवति न वेत्यर्थः । नियमेनेडान्तं श्रूयते　तदिडान्तं भवतीत्यादिना (१.३.२.१४) · तथा　उतो प्रस्तरस्यैव रूपं क्रियते स यदि प्रस्तरस्य रूपं कुर्यादित्येवमादिकं (१.३.२.१४-१५) कर्म यदिशब्दाद्विकल्पेन विधीयते । ततश्च गृहपतियागानन्तरं पूर्ववदिडां पञ्चावत्तामाज्येनावदायेडां होत्रे प्रदायाविसृजन्दक्षिणातिक्रामतीडां प्रतिगृह्य होतुरङ्गुलिपर्वणीऽअनन्तर्यवान्तरेडामादधाति पूर्ववदिडां च सर्वेऽन्वारभन्ते मयीदमिति यजमानो जपत्युपहूतां प्राश्नन्ति युक्ता यजमानश्च पवित्रयोरभावाद्दर्भैर्मार्जयन्तेऽपरेण वेदिं सुमित्रिया न इत्येतावत् इडान्तं भवतीत्यनेन गृह्यतऽइति कर्काचार्यः ।

शम्य्वन्ते वेदतृणमादायानक्ति प्रस्तरवत्स्रुचि स्रुवे स्थाल्यां च ॥ १४ ॥[२]　शम्य्वन्ते कर्मणि क्रियमाणे एष विशेषः · वेदतृणं वेदस्य तृणम् । एकेषां प्रस्तरवदित्यनेन मन्त्रो न गृह्यते　अश्रुतत्वादिति · युक्तं चैतत् ।

---

१) चरणशब्दादन्यत्र देवतापदमुपांशु भवति Ss.　२) पत्नीसंयाजे येन प्रविष्टस्तेन निष्क्रामेत् Mahâd.　३) अग्रं जुह्वाम् मध्यं स्रुवे मूलं स्थाल्याम् व्यन्तु वय इति मन्त्रेण Mahâd. See ३. ६. ४-७.

अग्नीदाह्वानुप्रहरेति ॥१५॥[1] अध्वर्युं प्रति।

प्रास्य तृणादि पूर्ववत् ॥१६॥[2]

शम्य्वन्ते स्रुक्स्रुवं प्रगृह्यात्यग्नेऽदब्धायविति (२.२०) ॥१७॥ शम्य्वन्ते कर्मणि कृते सति अध्वर्युः स्रुक्स्रुवमुभयं गृह्णाति होमार्थम् अग्नेऽदब्धायविति संस्रवान्जुहोति। एतत्तृणाञ्जनादि होमान्तं गार्हपत्यस्योत्तरत उपविष्टेन कर्तव्यम्· मन्त्रवर्णादग्निरदब्धायुरशीतमो देवता तस्मै त्यागः· एतदपि गार्हपत्यऽएव जुहोति। प्रतिपत्त्यर्थं कर्म चैतत् पत्नीसंयाजशेषसाध्यत्वाच्च तदभावे न भवति· पशावपि न भवति संस्रवाभावेनार्थलोपात्[3]· अदब्धाहुत्यभावेऽपि पशौ शम्योर्वाको भवतीति युक्तमिति याज्ञिकाः· पत्नीसंयाजानामर्थकर्मत्वाद्यावदुक्तात्तापश्चिन्नेषु निवृत्तिः।

सव्येनावृत्य दक्षिणाग्नौ जुहोत्यग्नयऽइति (२.२०) सरस्वत्याऽइति (२.२०) च ॥१८॥ तं प्रकृतं गार्हपत्यमग्निं सव्येनावृत्य प्रदक्षिणं परीत्य दक्षिणाग्नेः पश्चादुपविश्य दक्षिणाग्नौ सकृद्गृहीतमाज्यं जुह्वा जुहोति समिदाधानपूर्वकम् अग्नये संवेशपतयऽइति प्रथमाहुतिम् सरस्वत्याऽइति द्वितीयाम्। एतदप्यर्थकर्म ततश्च यावदुक्तात्तापश्चिन्नेषु न भवति· सव्येनावृत्येत्येतत्साङ्गपत्नीसंयाजान्ते अतीत्य निष्क्रमणम् तेन यदि गार्हपत्यदक्षिणाग्न्योरन्तरालेनागतस्तदैव तद्भवति नान्यमार्गेणागमने।

उलूखले मुसले यच्च शूर्पऽआशिश्लेष दृषदि यत्कपाले उत्प्रुषो विप्रुषः संजुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहेति पिष्टलेपान्जुहोति ॥१९॥[4] अनेन मन्त्रेणाध्वर्युः पिष्टलेपामाहुतिं[5] जुहोति अधिकाराद्दक्षिणाग्नाविव। अत्र विप्रतिपत्तिः केचिदाज्यं जुह्वति केचिच्च पिष्टसम्बन्धिनो लेपानिति[6]· आ-

[1] अञ्जनान्ते Mah. [2] शम्युप्रैषान्तं कर्म कुर्यात् Mah. See ३.६.१५-१६. [3] पशौ संस्रवाभावान्न प्रग्रहहोमः· एतस्य प्रग्रहसंज्ञा जुहोतिशब्दाभावात्· सम्प्रगृह्णाति समिष्टयजुश्चेति (११.२.१.५.) समिष्टयजुःसाहचर्याद्यथा समिष्टयजुरिति संज्ञा तथा प्रग्रह इति संज्ञा· संस्रवहोमस्यापि पाक्षिकी प्रग्रहसंज्ञा Mahád. [4] स्वाहेति ॥७॥ पिष्टलेपां जुहोति १.३.५. Thus also the paddhati.—Kâṇva, see Vâj. S. pag. ५८. [5] संज्ञा marg. [6] पिष्टलेपानेकीकृत्य दक्षिणाग्नौ जुहोतीति याज्ञिकाः पिष्टलेपाहुतिमाहवनीयऽइति पितृभूतिः· अत्र पुरोडाशद्वयसम्बन्धाद्द्वे देवते प्राप्ते तत्र मुख्यत्वादग्निरेव देवता· विकृतावग्निरेव देवतेति कर्कसिद्धान्तः Mahád.

ज्यसाधनत्वं चोक्तं तैत्तिरिसूत्रे मन्त्रलिङ्गाद्विश्वेभ्यो देवेभ्य इति त्यागः · ये तु पिष्टलेपानां होममिच्छन्ति तेषां पिष्टलेपानिति द्वितीयाबहुवचनम् होमविधानादेव च पात्र्यङ्गुलीसंलग्नान्पिष्टलेपानुपादाय होमार्थं स्थापयित्वा पात्र्यङ्गुलीप्रक्षालनं कार्यम् · तन्मते च प्रतिपत्त्यर्थकर्मैव पुरोडाशसाधनकऽएव कर्मणि भवति नाज्यादिसाधनके । पिष्टलेपहोमप्रकारस्तु शाखान्तरे आपस्तम्बे मानवे च । सर्वसूत्रेषु विश्वदेवलिङ्गस्य होममन्त्रे[1] दर्शनात्तदुद्देशेनैव त्यागः कार्यः · स्वसूत्रेऽपि आज्यहोमपक्षे पक्षान्तरे च होमस्य अङ्गप्रधानभूतप्रस्तुतसर्वदेवताहविषां क्वाचित्संश्लिष्टानां स्वावयवहीनतानिमित्तप्रत्यवायपरिहारार्थं तत्प्रतिनिधिभूतेनाज्येन क्रियमाणत्वाद्देवतान्तरस्यानुपदेशाच्च प्रस्तुतसर्वदेवताकत्वम् तत्सम्बन्धिद्रव्यस्य ताभ्य एव होतुमुचितत्वात् · अत एव विश्वेभ्यो देवेभ्य उद्देशः विश्वे देवाः सर्वे देवा इति यास्कोक्तेः (१२.३१) · किं च अनादिष्टदेवतानां मन्त्राणां प्रस्तुतदेवताकत्वमेव युक्तम् कुतः तद्येऽनादिष्टा मन्त्रास्तेषु देवतोपपरीक्षा यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्तीति यास्कोक्तेः (७.४) · अत्र यज्ञाङ्गस्य हूयमानस्याज्यादिद्रव्यस्य मन्त्रलिङ्गेन प्रस्तुतबहुदेवतासम्बन्धित्वं गम्यते बह्व्यश्चात्राङ्गप्रधानदेवताः प्रस्तुताः अतश्च बहुदेवतत्वाद्विश्वेषां देवानां देवतात्वं युज्यतऽएव यत्तु किंचिद्बहुदैवतं तद्विश्वदेवानां स्थाने युज्यतऽइति च यास्कोक्तेः (१२.४०) · याज्ञिका अपि आज्याहुतिं प्रस्तुतसर्वप्रधानदेवताकामाहुः[2] · कर्काचार्यास्त्वेवमूचुः[3] एकस्यैव देवस्य सिद्धत्वात्किमर्थमनेकदेवतत्वं कल्प्यतऽइति प्राथम्यादेकैवात्राग्निर्देवतेति अतस्तन्मते प्रकृतिविकृतिरूपसर्वकर्मसु इदमग्नय ऽइत्येवास्य त्यागः । वैतानसूत्रे पिष्टलेपहोमानन्तरं पठ्यते आग्नीध्रः संमार्गमग्नौ प्रहरतीति · संमार्गमिध्मसंनहनम् अग्नौ आहवनीये ॥ ॥ सप्तमी कण्डिका ॥ ७ ॥

अथ पद्धतिः ॥

ततो होता वेदमादायाध्वर्युराज्यलिप्तां जुह्वं स्रुवं च प्रक्षाल्यादायाग्नीदाज्यस्था-

---

1) ? °देवस्यलिंगहोम° २ 2) ? अपि मनोऽज्याहुतिप्रस्तुतसर्वेप्रधान° २ 3) See the scholion at १.२.२. pag. २१.

त्नीमादायाग्नीध्रप्रथमाः पत्नीसंयाजान्कर्तुं गार्हपत्यं प्रति गच्छन्ति · आपस्तम्बः आज्यलेपान्प्रक्षाल्य समुवे जुहूपभृतावादायेति · तथा आग्नीध्रप्रथमाः प्रत्यञ्चो यन्ति अपरेण गार्हपत्यमूर्ध्वज्ञव आसते दक्षिणोऽध्वर्युरुत्तरत आग्नीध्रो मध्ये होतेति वेदमुपभृतं कृत्वा जुह्वा स्रुवेण चेत्येकऽइति । तत्राध्वर्युर्गार्हपत्यदक्षिणाग्नीऽअन्तरेण गत्वा पत्न्या अग्रे गार्हपत्यस्य दक्षिणात ईशानाभिमुख उपविशति अथवा आहवनीयं पूर्वेणेत्य दक्षिणाग्निं दक्षिणेनैवागत्य पूर्वोक्तस्थानऽउपविशति अथवा गार्हपत्यमुत्तरेण च गत्वा पत्नीमन्तरेण पत्नीं बाह्यतो वा गत्वा पूर्वोक्तस्थाने तथैवोपविशति इत्यध्वर्योः संचरचतुष्टयं विकल्पेन · गार्हपत्यस्य पश्चाद्धोता ऊर्ध्वज्ञानुरास्ते तस्योत्तरतो दक्षिणामुखोऽग्नीत् । ततोऽध्वर्युर्वेदं गृहीत्वा सोमायानुब्रूहीत्युक्त्वा आज्यस्थाल्या जुह्वां चतुर्गृहीतमाज्यं गृहीत्वाश्राव्य सोमं यजेत्याह इदं सोमायेति त्यक्ते जुहोति · ततस्त्वष्ट्रेऽनुब्रूहीत्युक्त्वा पुनश्चतुर्गृहीतं गृहीत्वाश्राव्य त्वष्टारं यजेत्याह इदं त्वष्ट्रे · कृत्वा अन्तर्धानं गार्हपत्यस्य पुरस्तात्कृत्वा पत्न्यध्वर्योरन्वारम्भे कृते देवानां पत्नीभ्योऽनुब्रूहीत्युक्त्वा जुह्वां चतुर्गृहीतं गृहीत्वाश्राव्य देवानां पत्नीर्यजेत्याह इदं देवानां पत्नीभ्यः · कृत्वान्तर्धानं हस्तेन पराकरोति · अन्वारम्भश्चानुवचनादि होमान्तः पत्न्या असंनिधाने येन केनचिदध्वर्योरन्वारम्भः कार्यः अध्वर्युसंस्कारत्वात् · ततोऽग्नये गृहपतयेऽनुब्रहीत्युक्त्वा जुह्वां चतुर्गृहीतं गृहीत्वाश्राव्याग्निं गृहपतिं यजेत्याह इदमग्नये गृहपतयऽइति त्यक्ते जुहोति । ततः स्रुचं भूमौ निधायेडापात्र्यां पञ्चकृत्व आज्यमवदाय प्रत्यङ्मुखो होत्रे इडां प्रदायाविसृजन्होतारं पत्नीं च प्रदक्षिणीकृत्य होतुः पुरस्तात्प्रत्यङ्मुख उपविश्य होत्रार्पितामिडां प्रतिगृह्येडायाः सकाशात्स्रुवेणाज्यमवदाय होतुरङ्गुलिपर्वणोऽउत्तममध्यमे स्रुवेणाक्त्वा होतुर्हस्ते चतुष्कृत्वोऽध्वर्युराज्यमवद्यति होता स्वयं पञ्चमं गृह्णीयात् · तत उपहूयमानायामिडायां सर्वऽऋत्विजो यजमानश्च होतारमन्वारभन्ते इडां वा · उपहूतोऽयं यजमान इति होत्रा पठ्यमाने यजमानो मयीदमिति (२.१०) जपति · सर्वे संचरेण निष्क्रम्येडां भक्षयित्वा पुनस्तथैवागत्यापरेण वेदिमुपविश्य ब्रह्मादिक्रमेण दर्भैरुदकमादाय सुमित्रिया न इति (६.२२) मार्जयन्ते · ततः सर्वे यथास्थानमुपविशन्ति ।

अध्वर्युर्गार्हपत्यस्योत्तरत उपविश्य वेदस्यैकं तृणमाच्छिद्य तस्य तृणस्याग्रं जुह्वाम-नक्ति मध्यं स्रुवे मूलं स्थाल्याम् · अक्का[1] अग्नीदनुप्रहरेत्याह · अध्वर्युस्तदक्तं तृणं गार्हपत्ये प्रक्षिप्य चक्षुष्पा इत्यात्मानमालभ्य (२.१६) अप उपस्पृशति । ततोऽग्नी-त्संवदस्वेत्याह · अध्वर्युरगानग्नीदित्याह · अग्नीदगन्निति प्रत्याह · श्राश्वयेत्यध्वर्युः · श्रौषडित्यग्नीत् · स्वगा दैव्या होतृभ्य इत्यध्वर्युर्होतारं प्रेषयेत् । ततो जुहूं स्रुवं च सम्प्रगृह्याग्नेऽदब्धायवित्येनेन (२.२०) उभाभ्यां संस्रवान्जुहोति इदमग्नयेऽद-ब्धायवेऽशीतमायेति त्यागः · ततो गार्हपत्यदक्षिणाग्नीऽअन्तरेण निष्क्रम्याप्रद-क्षिणं गार्हपत्यं परीत्य दक्षिणाग्नेरुत्तरतः उपविश्य समिदाधानपूर्वं सकृद्गृहीत-माज्यं जुह्वा दक्षिणाग्नौ अग्नये संवेशपतये स्वाहेति (२.२०) जुहोति इदमग्नये संवेशपतये · पुनः सकृद्गृहीतं गृहीत्वा सरस्वत्यै यशोभगिन्याऽइति (२.२०) इदं सरस्वत्यै यशोभगिन्यै ॥ ॥७॥

इति तृतीयस्य सप्तमी कण्डिका ॥ ॥

पत्नी वेदं प्रमुञ्चति वेदोऽसीति (२.२१) ॥१॥ विस्रंसयति । पित्र्यायां चास्य मन्त्रस्य वेदबन्धने विमोके चोहः देवपितृभ्यः · अनेकयजमानके आ-वाभ्याम् अस्मभ्यम् · अनेकपत्नीके एकैव परार्थत्वात् ।

योक्त्रं च प्र मा मुञ्चामि वरुणस्य पाशाद्येन माबध्नात्सविता सुशेवः ऋ-तस्य योनौ सुकृतस्य लोकेऽरिष्टां मा सह पत्या दधात्विति ॥२॥[2] यो-क्त्रविमोको यावदुक्तेऽन्तापक्षिन्ने च भवति · वेदविमोकश्च कृतप्रयोजनत्वेन प्रति-पत्तिरूपत्वात् ।

स्तृणात्या वेदेः ॥३॥[3] वेदं होता गार्हपत्यस्योत्तरप्रदेशादारभ्य वेदि-पर्यन्तं स्तृणाति · आङत्र मर्यादायाम् । आङत्राभिविधौ वेदिं व्याप्येति हरिस्वा-मिनः (१.३.२.२४) · शाङ्खायने तूत्तरेण गार्हपत्यमा बर्हिष स्तीर्त्वेति (१.१५.१५) · शाखान्तरवशादा वेदेरित्ययमाङभिविधौ व्याख्येयः ।

---

1) sic! i. e. अञ्जनानन्तरम्. 2) चशब्दात्पत्नी प्रमुञ्चति योक्त्रमत्रैव वेदविमोकान्ते Mahád. 3) वेदिपर्यन्तं वेदतृणानि Mahád.

ध्रौवꣳ समिष्टयजुर्जुहोति देवा गातुविद इति (२.२१) ॥ ४ ॥ ध्रौवमाज्यं[1] देवा गातुविद इति स॰जुर्जुहोति · समिष्टयजुरिति कर्मणः संज्ञा संव्यवहारार्था · वेदस्य विमुक्तत्वात्कुशोपग्रहेण । वातश्चात्र देवता स्वाहा वाते धा इति मन्त्रलिङ्गात् ततश्च जुहोतौ वाताय स्वाहेति होमः । अर्थकर्मैतदिति कर्कः ततश्चात्तापहृत्रियावदुक्तेषु निवृत्तिः · प्रतिपत्तिरिति तन्नटीकायाम् तानि वा ऽएतानि नव समिष्टयजूꣳषि जुहोतीत्यत्र (४.४.४.१) हरिस्वामिभाष्येऽपि प्रतिपत्तिर्हि समिष्टयजुरित्युक्तम् ततश्चात्तापहृत्रादिष्वपि भवति । आपस्तम्बः पूर्ववद्ध्रुवामाप्याय्य देवा गातुविद इत्यन्तर्वेद्यूर्ध्वस्तिष्ठन्ध्रुवया समिष्टयजुर्जुहोतीति । संततं यजमानभागं च प्रवसतः समिष्टयजुषा सह प्रवसति जुहोतीति (४.१३.१) शाङ्खायनः ।

बर्हिः सम्बर्हिरिति (२.२२) ॥ ५ ॥ जुह्वा जुहोति । प्रतिपत्तिरियम् चरितार्थत्वात् ततश्चात्तापहृत्रे यावदुक्ते च प्रवर्तते · नाशदोषादौ सकृद्गृहीतिनाज्येन होमः ।

वेद्यां प्रणीता निनयति परीत्य कस्त्वेति (२.२३) ॥ ६ ॥ अध्वर्युः स्वयमाहवनीयं परीत्य वेदेर्दक्षिणभागे उदङ्मुख उपविश्य प्रणीता आदाय वेदिमध्ये आसाद्य तत्रैव निनयति · अत एव पूर्वं वेदिमध्ये अनासादनं गम्यते । प्रतिपत्तिरियम् चरितार्थत्वात् ततश्चात्तापहृत्रेऽपि भवति · नाशदोषादौ च प्रायश्चित्तमात्रम् ।

पुरोडाशकपालेन कणानपास्यत्यधःकृष्णाजिनꣳ रक्षसामिति (२.२३) ॥ ७ ॥[2] पु॰लेन मुख्यत्वात्प्रथमेन अध॰नं कृष्णाजिनस्याधस्तात्समीपऽएव[3] कणानुत्करे प्रक्षिपति । एभ्य इति चतुर्थ्या (१.१.२.३५) रक्षसामत्र देवतात्वम् रक्षसां राक्षसमिति कात्यायनोक्तेश्च (अनुक्र॰ १.७) · इदं रक्षोभ्य इति त्यागः अपां स्पर्शश्च । इयमपि प्रतिपत्तिः ततश्चात्तापहृत्रादौ भवति ।

---

1) ध्रुवायां भवमाज्यं Mahâd. 2) कणान्फलीकृत्य स्थापितान् Mahâd. See ५.४.२४.
3) यथा कृष्णाजिनस्याधो भवन्ति उपरि कृष्णाजिनं कुर्वेत्यर्थः । चर्विष्ठां भूतपुरोडाशकपालमुपादेयम् Mahâd.

पूर्णपात्रं निनयति परीत्य संततम् ॥८॥ अध्वर्युराहवनीयं परीत्य दक्षिणत उदङ्मुखोऽवस्थितः संततं पूत्रं निनयति · पूर्णं च तत् पात्रं च पूर्णपात्रम् अद्भिः पूर्णम् शान्तिराप इति वाक्यशेषात् (१.१.३.४) ।

यजमानोऽञ्जलिना प्रतिगृह्णाति सं वर्चसेति (२.२४) ॥९॥[1] तदध्वर्युणा संततं निनीयमानं पूर्णपात्रम् । तत्र ग्रहणं प्रधानम् निनयनं तदर्थम् · तेन प्रोषिते यजमाने [यत्र] यजमानस्तत्रैव पूर्णपात्रस्य निनयनं केनचित्कारणीयम् यजमानेनाञ्जलिना प्रतिग्रहश्च कार्यः ।

मुखं विमृष्टे ॥१०॥ ग्रहणानन्तरं यजमानस्तूष्णीमेव तेन गृहीतोदकेन मुखं विमृष्टे उपस्पृशति शोधयति । एतच्चार्थकर्म ततश्चान्तापच्छिन्नादौ न भवति । अनेकयजमानके उपर्युपर्यञ्जलीन्कृत्वा सर्वैः पूर्णपात्रजलं ग्राह्यम् · विष्णुक्रमणं च सर्वैः कर्तव्यम् ।

विष्णुक्रमान्क्रमते दिवि विष्णुरिति (२.२५) प्रतिमन्त्रम् ॥११॥[2] यजमानः स्वासनादुत्थाय दक्षिणाद्वेदिश्रोणिदेशादारभ्याहवनीयं यावद्विष्णुक्रमसंज्ञान्क्रमणान्करोति । एतदप्यर्थकर्म तेनान्तापच्छिन्नादौ न भवति ।

पृथिव्यामितीत ऊर्ध्वो वा ॥१२॥ अथवा पृथिव्यां विष्णुरिति प्रथमं क्रमति अन्तरिक्षे विष्णुरिति द्वितीयम् दिवि विष्णुरिति तृतीयम् · इतः पृथिवीलोकात् ऊर्ध्वः आरोहणक्रमेण · उभयथा श्रवणाद्विकल्पः परस्तादर्वाग्वा · अवरोहणक्रमेण दिवि अन्तरिक्षे पृथिव्याम् ।

अस्मादन्नादिति (२.२५) भागमवेक्षते ॥१३॥[3] यजमानः स्वस्थानऽउपविष्ट एव स्वं भागमवेक्षते । अयं च भागसंस्कारः तेनान्तापच्छिन्नादौ भवति । अनेकयजमानके एकः सर्वैरन्वारब्धः · सर्वैर्वा स्वांशावेक्षणम् ।

अस्यै प्रतिष्ठायाऽइति (२.२५) भूमिम् ॥१४॥ वेदिभूमिम् · उपविष्ट एव । उतदर्थकर्म ततश्चान्तापच्छिन्ने न भवति ।

---

1) इतः प्रभृति सर्वमर्थकर्म याजमानं च · ग्रहणस्य प्राधान्यात् प्रोषिते यजमाने तत्रैव निनयनम् · सत्रे सर्वैर्ग्राह्यं पूर्णपात्रम् Mahád. 2) क्रमणादि याजमानं स्वासनऽएव कर्तव्यम् Mahád. 3) अवाचीनेन मुखेनेक्षते · साकाङ्क्षत्वान्निर्भक्ता इत्यनुषङ्गः Mahád.

अगन्म स्वरिति (२.२५) प्राक् ॥ १५ ॥ प्राचीं दिशं प्रेक्षते । एतदध्वर्युकर्म ।

सं ज्योतिषेत्याहवनीयम् (२.२५) ॥ १६ ॥ एतदध्वर्युकर्म अप्रतिपत्तिरूपत्वात् · ज्योतिषा हि सम्भवनमत्र प्रार्थ्यते · तेनाहवनीयसंस्कारकल्पनं न कार्यम् · ततश्चात्तलुप्ते निवृत्तिरिति कर्कः · वरुणप्रघासेषु तु वेदिद्वयस्याप्यवेक्षणमप्योऽश्चिति सम्प्रदायः ।

स्वयम्भूरिति (२.२६) सूर्यम् ॥ १७ ॥

वर्चोदा इति (२.२६) यं वा कामं कामयते ॥ १८ ॥ सूर्यादीक्षणानन्तरं वर्चोदा इति सूर्यं प्रार्थयेत् · अथवा यजमानो यं काममभिलाषं पुत्रपश्वादिकं वाञ्छेत तं ब्रूयात् गोदा धनदा पुत्रदा वर्चोदा इति ।

सूर्यस्येत्यावर्तते (२.२६) प्रदक्षिणम् ॥ १९ ॥ [1] यजमानः प्रदक्षिणमावृत्तिं भ्रमणं करोति । प्रसङ्गादाह ·

ग्रहग्रहणप्रतिगरहोमेषु च तूष्णीम् ॥ २० ॥ ग्रहग्रहणानन्तरं प्रागासादनात्प्रदक्षिणावर्तनं कर्त्रा कार्यम् प्रतिगरदानानन्तरं च शस्त्रसमाप्तौ ग्रहहोमानन्तरं च · सशस्त्रग्रहेष्वेवायं धर्मः न शस्त्रमात्रे प्रतिगीर्य न ग्रहग्रहणमात्रे न होममात्रऽइति · प्रदक्षिणक्रियाशेषत्वान्मन्त्रोऽपि प्रातस्तूष्णीमित्यनेन व्यावर्त्यते ।

गार्हपत्यमुपतिष्ठतेऽग्ने गृहपतऽइति (२.२७) ॥ २१ ॥ यजमानः गार्हपत्यमुपतिष्ठते गार्हपत्यसमीपे स्थित्वाग्ने गृहपतऽइति तं प्रकाशयति । एतदध्वर्युकर्मैव · ततश्चात्तलुप्तायौ न भवति ।

शतꣳ हिमा इति ब्रूयाद्वा ॥ २२ ॥ गार्हपत्यमुपस्थाय शतं हिमा इतीमं मन्त्रं [2] यजमानो ब्रूयाद्वा न ब्रूयाद्वेति विकल्पः ।

सूर्यस्येत्यावर्वर्तते (२.२७) प्रदक्षिणम् ॥ २३ ॥ गार्हपत्योपस्थानानन्तरं पुनरपि सूर्यस्येति प्रदक्षिणमावर्तते पुनरपि मन्त्रपाठात् श्रुतावपि पुनर्विधानात् (१.९.३.२०) ।

गच्छति प्राङुरु विष्णाविति (५.३८) ॥ २४ ॥ [3] एतदध्वर्युकर्म ।

---

1) दक्षिणाङ्गमन्तरं कृत्वावर्तनं कुर्यात् Mahâd. 2) i. e. मन्त्रस्यांशम् . See the paddhati, and Kâṇva Vâj. S. pag. ५९. 3) Kâṇva, see Vâj. S. pag. ५९. — स्वासने प्राङ्मुखो गच्छति Mahâd.

ततोऽसि तन्तुरस्यनु मा तनुह्यस्मिन्यज्ञेऽस्यां साधुकृत्यायामस्मिन्नन्नेऽस्मिंल्लोकऽइदं मे कर्मेदं वीर्यं पुत्रोऽनुसंतनोत्विति पुत्रस्य नाम गृह्णाति ॥ २५ ॥ [1] पुत्र इत्यत्र पुत्रस्य नाम प्रथमैकवचनान्तं गृह्णाति इदं॰ पुत्रोऽमुकशर्मानुसंतनोतु · ततोऽसि तन्तुरसीत्येतस्मिन्मन्त्रे तत्पदैरेकवाक्यभूतं गृह्णाति कुतः काण्वसमाम्नानात् इदं मे कर्मेदं वीर्यं पुत्रो देवदत्तोऽनुसंतनोत्विति हरिस्वामिनः (१.१.३.२१)। अनेकेषु पुत्रेषु सर्वेषाम् [2] · ज्येष्ठस्य पुत्रस्य नामाभिव्याहृत्य यावन्तो वा भवन्तीति शाङ्खायनः (२.१२.११) · प्रियस्य पुत्रस्य नाम गृह्णातीत्यापस्तम्बः।

आत्मनोऽविद्यमाने ॥ २६ ॥ कथंचित्पुत्ररहितश्चेन्मृतपुत्रो वा तदा आत्मनो नाम गृह्णीयात् इदं मे कर्मेदं वीर्यं देवदत्तोऽहं संतनवानीति हरिस्वामिनः [3]।

तन्त्वे वा ज्योतिषे वेति वा ॥ २७ ॥ अथवा अविद्यमाने पुत्रे इदं मे कर्मेदं वीर्यं तन्त्वे वा ज्योतिषे वानुसंतनोत्विति प्रयोगो भवति [4]। एतदप्ययं कर्म। अनेकयजमानके विष्णुक्रमणभागभूमिप्राक्सूर्यावेक्षणप्रदक्षिणावर्तनप्राग्गमनेष्वन्वारम्भः · आहवनीयविक्षणगार्हपत्योपस्थानपुत्रनामग्रहणतूष्णीमाहवनीयोपस्थानव्रतविसर्गभागप्राशनानि भेदेनेति सम्प्रदायः।

आहवनीयमुपतिष्ठते तूष्णीम् ॥ २८ ॥ समीपे स्थित्वा तं विलोकयति · तूष्णीमिति लौकिकवागुच्चारणनिषेधः क्रियते मन्त्राभावात्। दिवि विष्णुरिति क्रमणप्रभृत्याहवनीयोपस्थानान्तं कर्म विष्णुक्रमसंज्ञं भवति।

व्रतं विसृजते येनोपेयात् ॥ २९ ॥ यजमानः शास्त्रितं सत्यवदनादिनियमं मुञ्चति तेन मन्त्रेण येन व्रतमुपेयात् · पूर्वं हि व्रतग्रहणे द्वौ मन्त्रावुक्तौ (२.१.११) अग्ने व्रतपतऽइदमहमिति वेति · अत्र इदमहमित्येव मन्त्रः श्रुत्यभिमत इति हरिस्वामिनः (१.१.३.२३)।

---

1) Káṇva, see Váj. S. pag. ५६. 2) प्रतिपुत्रं मन्त्रावृत्त्या नामग्रहणम् · सत्रे सर्वैः पुत्रनामग्रहणं कर्तव्यम् Mah. 3) See १.१.३.२१. Edit. pag. १३०. — अविद्यमाने अजाते वा मृते वा यजमान आत्मनो नाम गृह्णीयात् Ss. 4) मन्त्रान्तेऽनुसंतनोमीति Mahád.

सं यज्ञपतिराशिषेति भागं प्राश्नाति ॥३०॥[1] स्वभागम् · अनेकयजमानके सर्वे विभज्य प्राशनं कुर्युः । व्रतविसर्गभागप्राशनयोरन्त्यापह्निनेऽपि प्रवृत्तिः प्रतिपत्तिरूपत्वात् ।

ब्राह्मणं तर्पयितवै अयाज्ञमेवैतत्तर्पयतीति श्रुतेः (१.७.३.२८) तर्पयतीति श्रुतेः ॥३१॥ भागप्राशनानन्तरमध्वर्युः ब्राह्मणं तर्पयितवाऽइतीमं प्रैषं यजमानं प्रति ब्रूयात्[2] उपविष्ट एव · प्रैषानन्तरमेवात्र ब्राह्मणस्तृप्तिपर्यन्तं भोजयितव्यः । ब्राह्मणतर्पणेनैव यज्ञस्तृप्तो भवति नान्यथा · अतश्च प्रैषार्थानुष्ठानं ब्राह्मणभोजनरूपमत्र पदार्थो न प्रैषमात्रमित्येवं ज्ञापयितुमत्र श्रुत्युपादानम् । अयं च प्रयाजादिसदृश आराडुपकारकोऽदृष्टोत्पादकः पदार्थः क्रतोरङ्गम् तेन प्रयाजाद्यकरणऽइवास्याकरणे क्रतोर्वैगुण्यं भवति · अकृते च तस्मिन्निष्टेरसमाप्तत्वादिष्ट्यन्तरारम्भो न कार्यः · ब्राह्मणभोजनानन्तरं च नमः कृतायेत्यनेन (२.२.२३) समिदाधानोपस्थानहोमानामन्यतमद्ब्रह्मा करोति । द्विरभ्यासोऽध्यायपरिसमाप्तिसूचनार्थः ॥ ॥ समाप्तोऽयं पौर्णमासः सर्वास्विष्टिषु पशुबन्धेषु यागेषु सौत्रामण्यां च प्रकृतिभूतः । यद्यप्ययं कृताधानस्य भवति तथाप्याधानेष्टीनां तनूहविःसंज्ञकानां पौर्णमासयागः प्रकृतिः तस्मात्पर्वमुपदेश्यः · तनूहविषामेव सर्वेष्टिप्रकृतित्वं कृत्वापि तथापि तेष्वितिकर्तव्यतावैकृत्यदर्शनात्सर्वप्रकृतित्वं न सम्भवति तस्मात्पौर्णमासयाग एव पर्वमुपदिष्टः ॥ ॥ अष्टमी कण्डिका ॥८॥

इति कात्यायनसूत्रव्याख्याने श्रीदेवकृते तृतीयोऽध्यायः समाप्तः ॥ ॥

अथ पद्धतिः ॥

ततो जुह्वां चतुर्गृहीतं गृहीत्वा केवलमाज्यं प्रायश्चित्तार्थं जुहोति · अथवा चतुर्गृहीतं गृहीत्वा तत्र पिष्टलेपं निधाय वा · अथवोपस्तीर्य पिष्टलेपं द्विरवदा-

---

१) युज्यताम् गच्छतामित्यध्याहारः Mahâd. २) प्रैषस्तु भोजनार्थो न संकल्पार्थः · भोजनं तु स्त्रीसाध्यम् पाकपरिवेषणयोः स्त्र्यधिकारात् · अतः प्रैषसमनन्तरमेव यथारुचि परिवेषणेन ब्राह्मणं तर्पयेत् · तस्मादत्र प्रैषे यजमानस्याधिकारः सर्वोत्कृष्टत्वात् प्रैषस्य स्वकाण्डे पठितत्वाच्च प्रैषार्थे स्त्रिया अधिकारः परिवेषणार्थत्वात् । प्रैषोऽध्वर्योर्यजमानेन संकल्प इति सम्प्रदायः । कर्कस्त्वस्पष्ट एवात्र पाक्याभावे गोः पयोऽधिश्रयितवै ब्रूयादित्यत्र (४.१३.१०) प्रैषे यजमान इति कर्केणालेखि Mahâd.

याभिघार्योलूखले मुसलऽइति जुहोति · तैत्तिरीयसूत्रे अथ स्रुचि चतुर्गृहीतं गृहीत्वापसलवि पर्यावृत्यान्वाहार्यपचने प्रायश्चित्तं जुहोत्युलूखले मुसलऽइत्यादिना · मानवे तस्यां पुनर्गृहीत्वा पिष्टलेपं द्विरवत्तमभिघार्योलूखलऽइत्यादि · आपस्तम्बः चतुर्गृहीतऽआज्ये पिष्टलेपानोप्य जुहोत्युलूखलऽइत्यादि · त्यागश्च प्रकृतौ विकृतौ च इदं विश्वेभ्यो देवेभ्य इत्येव कार्यः । ततो वेदोऽसीति (२.२१) मन्त्रेण पत्नी वेदं विमुञ्चति · ततः प्र मा मुञ्चामीति योक्त्रं पत्नी विमुञ्चति · ततो होता वेदयोक्त्रे परिपिच्य पत्नीं वाचयित्वा गार्हपत्यस्योत्तरत आरभ्य वेदेः पूर्वान्तं यावद्वेदं स्तृणाति । ततोऽध्वर्युर्ध्रौवमाज्यं विलाप्य बर्हिषः सकाशात्कुशमुष्टिं सव्ये पाणौ गृहीत्वोर्ध्वस्तिष्ठन्देवा गातुविद इति (२.२१) मन्त्रेण संततं ध्रुवयैव समिष्टयजुर्जुहोति इदं वाताय न ममेति त्यागः · दर्भमुष्टिमनुप्रहरति । ततः सर्वं बर्हिर्जुह्वामवधाय सं बर्हिरित्याहवनीये (२.२२) जुहोति इदं दिव्याय नभसे इदं बर्हिषे न ममेति केचित् । ततः प्रणीता वेदिमध्यऽआसाद्याहवनीयं प्रदक्षिणीकृत्य वेदिमध्यऽउदङ्मुख उपविष्टो वेद्यां प्रणीता निनयति कस्त्वा विमुञ्चतीति मन्त्रेण (२.२३) · ततोऽप्रदक्षिणं प्रत्यागच्छति । ततः प्रथमकपाले फलीकरणानन्तरं स्थापितान्कणान्निधायोत्करस्योपरि समीपऽएव कृष्णाजिनं सव्येन धारयन्कृष्णाजिनस्याधस्तादुत्करे कपालेनैव कणान्प्रास्यति रक्षसां भागोऽसीति (२.२३) मन्त्रेण · उदकोपस्पर्शः । ततः पूर्णपात्रमादाय पूर्वेणाहवनीयं परीत्य दक्षिणत उत्तराभिमुखो यजमानस्याञ्जलौ संततं निनयति · निनीयमानं पूर्णपात्रं यजमानोऽञ्जलिना प्रतिगृह्णाति सं वर्चसेति (२.२४) · ततस्तूष्णीं मुखं विमृष्टे · अत आरभ्य भागप्राशनान्तं सर्वं कर्म यजमानः करोति । तत उत्थाय दक्षिणवेदिश्रोणेरारभ्याहवनीयादर्वाग्विष्णुक्रमान्क्रमते । आपस्तम्बः दक्षिणवेद्यन्ते दक्षिणपदा चतुरो विष्णुक्रमान्प्राचः प्रक्रामत्युत्तरमुत्तरं ज्यायाऽसमनतिहरन्सव्यं नाहवनीयमतिक्रामतीति · दक्षिणाद्वेदिश्रोणिदेशादाहवनीयं यावदिति[1] शाङ्खायनः (४.१२.२) · तेन दक्षिणश्रोणेरारभ्य दिवि विष्णुरिति

1) This quotation is not verbatim: Çânkhâyana has: दक्षिणाद्वेदेः श्रोणिदेशादाहवनीयात् (i. e. °शात् आ आह°) ·

(२.२५) मन्त्रेण दक्षिणपादेन दक्षिणे वेद्यन्ते प्राच्यां गच्छति सव्यं पादं ततोऽर्वागेव स्थापयति ततोऽन्तरिक्षे विष्णुरिति ततः प्राच्यां द्वितीयम् पृथिव्यां विष्णुरिति ततोऽपि प्राच्यां तृतीयम् · अथवा प्रथमं पृथिव्यां विष्णुरिति मन्त्रेण क्रामति ततोऽन्तरिक्षऽइति ततो दिवि विष्णुरिति क्रमविकल्पः · क्रमणं कुर्वता आहवनीयस्यातिक्रमणं न कर्तव्यम् । ततोऽस्मादन्नान्निर्भक्त इति (२.२५) स्वं भागमवेक्षते उपविष्ट एव · ततोऽस्यै प्रतिष्ठायै निर्भक्तो योऽस्मानिति (२.२५) वेदिभूमिमवेक्षते · ततोऽगन्म स्वरिति (२.२५) प्राचीं दिशमीक्षते · ततः सं ज्योतिषाभूमित्याहवनीयमीक्षते (२.२५) · स्वयम्भूरिति (२.२६) सूर्यमीक्षते · वर्चोदा इति (२.२६) सूर्यं प्रार्थयते अथवा वर्चोदा इत्यस्य स्थाने धनदा असि धनं मे देहि गोदा असि गा मे देहि पुत्रदा असि पुत्रान्मे देहीत्येवं यं कामं वाञ्छति तं याचते · ततः सूर्यस्यावृतमिति (२.२६) प्रदक्षिणमावर्तनं च करोति ततोऽप्रदक्षिणं चावर्तते । ततो गार्हपत्यसमीपे आगत्याग्ने गृहपतऽइति (२.२७) गार्हपत्यमुपतिष्ठते · अत्र मन्त्रे शत७ हिमा इत्ययमंशः पठनीयो न वा · पुनः सूर्यस्यावृतमिति (२.२७) प्रदक्षिणमावर्तते ततस्तूष्णीमप्रदक्षिणं चावर्तते ।

तत उरु विष्णाविति मन्त्रेण गार्हपत्यसमीपात्प्राच्यां गच्छति · ततो वेदिमध्यऽउपविष्टः पुत्राणां नाम गृह्णाति · तत्र मन्त्रः ततोऽसि तन्तुरस्यनु मा तनुहीति · अस्मिन्मन्त्रे इदं मे कर्मेदं वीर्यं पुत्रोऽनुसंतनोत्वित्यत्र वीर्यं पुत्रो यज्ञदत्तशर्मानुसंतनोत्वित्येवं पुत्रनाम गृह्णाति · अनेकेषु पुत्रेषु सर्वेषां ज्येष्ठानुक्रमेण नामग्रहणम् प्रतिपुत्रं च ततोऽसि तन्तुरसीत्यस्यावृत्तिः · ज्येष्ठस्य पुत्रस्य वेति यावन्तो वा भवन्ति तावतां नाम ग्राह्यमिति[1] शाङ्खायनः (२.१२.११) प्रियस्य पुत्रस्येत्यापस्तम्बः । अविद्यमाने पुत्रे इदं मे कर्मेदं वीर्यं विष्णुमित्रोऽनुसंतनोत्वित्यात्मनो नाम गृह्णाति इदं मे कर्मेदं वीर्यं देवदत्तोऽहं सतनवानीति हरिस्वामिनः प्रयोगं प्रदर्शितवन्तः । तत उत्थाय तूष्णीमाहवनीयमुपतिष्ठते · ततोऽग्ने व्रतपते इदमहमित्यनयोर्मध्ये येन मन्त्रेण पूर्वं व्रतं गृहीतं भवति तेनैवेदानीं विसृजते आहवनीयस्याग्रे स्थित्वा तं मन्त्रं पठतीत्यर्थः · यद्यग्ने व्रतपते व्रतं

1) The verbatim-quotation see at ३. ८. २५.

चरिष्यामीत्यनेन गृहीतम् तदग्ने व्रतपते व्रतमचारिषमित्यनेन विसर्गः कार्यः यदीदमहमनृतादित्यनेन प्राग्व्रतमुपेतम् तदा इदमहं य एवास्मि सोऽस्मीत्यनेन विसर्गः कार्यः । तदनन्तरं पूर्वेणाहवनीयं गत्वा दक्षिणाग्नेरुत्तरेण गत्वापराग्न्योरन्तरालेन निष्क्रामेत् ततः सं यज्ञपतिराशिषेति मन्त्रेण स्वभागं प्राश्नाति । ब्रह्माप्यत्रैव स्वभागं प्राश्नाति तमिष्टौ संस्थितायां प्राश्नीयादिति छन्दोगसूत्रे (लाट्यायन ४.११.१८) ब्रह्मा भागमाहरति नासंस्थिते तं भक्षयतीत्यापस्तम्बः तं शम्युले प्राश्नात्यूर्ध्वं वा समिष्टयजुष इति मानवे संस्थिते यत्प्राशनं तत्कर्मापवर्गान्ते कार्यम् ऊर्ध्वं वा समिष्टयजुष इत्यस्मिन्पक्षे समिष्टयजुषोऽनन्तरं यदेष्टा तदा प्राशनम्।

ततोऽध्वर्युर्ब्राह्मणं तर्पयितवाऽइत्येवं यजमानं प्रेष्यति ततो यजमानो वाग्रूपवयःश्रुतशीलवृत्तादिगुणवन्तं ब्राह्मणं तृप्तिपर्यन्तमन्नं भोजयति कर्मापवर्गे ब्राह्मणभोजनं वाग्रूपवयःश्रुतशीलवृत्तादिगुणाः श्रुतं तु सर्वानत्येति न श्रुतमतीयादिति बह्वृचगृह्ये (शाङ्खायनगृह्य १.२) श्रुतत्वात् । ततो ब्राह्मणभोजनानन्तरं ब्रह्मा यथेतमेत्य[1] ब्रह्मवरणानन्तरं येन मार्गेण स्वासनं प्रत्यागतो भवति आहवनीयं पूर्वेण वापरेण वा तेनैव प्रत्यागत्य नमः कृतायेति स्वाहाकारान्तेन मन्त्रेणाहवनीये प्रादेशमात्रीं समिधमादधाति अथवा स्थाल्याः सकृद्गृहीतं जुह्वा अनेनैव मन्त्रेण जुहोति अथवानेनैवाहवनीयमुपतिष्ठते ॥ ॥ इति पौर्णमासेष्टिः समाप्ता ॥ ॥८॥

इति तृतीयस्याष्टमी कण्डिका ॥

इति त्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ तृतीयोऽध्यायः समाप्तः ॥ ॥

इति कातीये श्रौतसूत्रे तृतीयोऽध्यायः ॥३॥ ॥

1) See २. २. २३.

श्रुतिक्रमानुसारिणाचार्येण प्रथमं पौर्णमासमनुविहितम् अधुना दर्शस्यानुविधानं करिष्यंस्ततः प्राक्कालीनं पिण्डपितृयज्ञमनुविदधाति ·

अपराह्णे पिण्डपितृयज्ञश्चन्द्रादर्शनेऽमावास्यायाम् ॥ १ ॥ दिवसस्य समं द्वेधा विभक्तस्य द्वितीयो भागोऽपराह्णः समं त्रेधा विभक्तस्य तृतीय इत्यपरे पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितॄणामिति (२.४.२.८)[1] · अह्नो ऽदन्तादिति (पा° ८.४.७) णत्वम् । पिण्डपितृयज्ञ इति वक्ष्यमाणस्य कर्मणः समानसंज्ञा · सा च पिण्डदानपदार्थस्यैवार्थानुगमात् पिण्डैः पितॄणां यज्ञः पिण्डपितृयज्ञ इति अतश्च होमजपादयस्तदङ्गम् · प्रयोजनं चिन्तायाः पिण्डदानस्याकरणे अभ्यावृत्तिः न होमादेः । अमावास्यायामपराह्णे चन्द्रादर्शने पिण्डपितृयज्ञो भवतीत्यन्वयः · तत्र अमावास्यायामपराह्णे पिण्डपितृयज्ञ इत्येतावत्युक्ते दाक्षायणराजसूयकौण्डपायिनामयनसारस्वतसत्त्रादौ पक्षमध्येऽमावास्ये पिण्डपितृयज्ञप्राप्तेः तद्व्यावृत्त्यर्थं चन्द्रादर्शनऽइति विशेषणम् · चन्द्रस्यादर्शनमभ्रादिना द्वीपान्तरवर्तित्वादिनापि भवति तेन तच्चन्द्रादर्शनममावास्यापदेन विशेषयति[2] ·

---

1) पञ्चधा विभक्तस्याह्नश्चतुर्थो भागोऽपराह्णः Mahâd. 2) चन्द्रादर्शनमभ्रादिनापि भवति · तन्मा भूदित्यमावास्यया विशेष्यते · तदेवोच्यतामिति चेत् न अमावास्याशब्दस्य कर्मविषयतापि दृश्यते चतुर्होत्रा पौर्णमासीमभिमृशेत्पञ्चहोत्रामावास्यायामिति (°स्याया° Cod.) · तत्र को दोषः · चतुर्दश्युपवासपक्षेऽपि प्राप्नोति · अस्तु तथेति चेत् न श्रुतिविरोधात् य-देवैष न पुरस्तान्न पश्चाद्ददृशऽइति (२.४.२.७.) · अनेन च क्षयो लक्ष्यते तस्मिन्क्षीणे ददातीति (२.४.२.७.) हि श्रूयते · स च परमः क्षयः इतरस्तु प्रत्यहमेव भवति · एवं च सति परमक्षयविशिष्टऽएव काले पिण्डपितृयज्ञो नान्यत्रेति । यथा राजसूये पक्षमध्यऽआमावास्ये (?अमा° Cod.) दाक्षायणे च खर्विकामावास्यायां दृष्टेऽपि चन्द्रमस्यपराह्णे परमक्षय इति क्रियतऽ एवं (?एव Cod.)- काले पिण्डपितृयज्ञः यदेवैष न पुरस्तान्न पश्चाद्ददृशऽइति क्षयोपलक्षणार्थत्वात् Karka.

चन्द्रादर्शनशब्देनात्र चन्द्रमसः परमक्षयो लक्ष्यते न क्षयमात्रम् तस्य प्रतिदिनं सद्भावात् · अतोऽमावास्यातिथौ अपराह्णे चन्द्रस्य परमक्षयविशिष्टेऽएव काले पिण्डपितृयज्ञो भवतीति सूत्रार्थः · तेन दाक्षायणादौ पक्षमध्ये अमावास्यानुष्ठाने पिण्डपितृयज्ञस्य निमित्तभूतकालाभावाद्[न]नुष्ठानं सिद्धम् । काल उक्तोऽथ विधिमुपदिशति ·

दक्षिणाग्नौ श्रपणम् ॥ २ ॥[1] चरोः । गार्हपत्याहवनीययोरपवादोऽयं शाखान्तरात् ।

होमश्च ॥ ३ ॥

परिस्तीर्य तं पूर्ववत्पात्रासादनमेकशः ॥ ४ ॥ पूर्ववदिति पौर्णमासवत्[2] · एकशो न द्वन्द्वम् · तच्चोपयोगक्रमेण दक्षिणाग्नेरुत्तरतो दक्षिणसंस्थम् · स्फ्यः शूर्पम् अग्निहोत्रहवणी वा चरुस्थाली वा कृष्णाजिनम् · शाखान्तरात् उलूखलम् मुसलम् व्रीहयः स्रुचि ग्रहणपक्षे अत्र चरुस्थाली चरुश्रपणार्थमुदकम् आज्यम् मेक्षणम् समित्त्रयम् उदकपात्रम् सकृदाच्छिन्नानि दर्भतृणानि सूत्रादीनामन्यतमदिति। परिस्तरणस्याकृतिमात्राङ्गत्वाद्धोमात्पूर्वं प्राप्तस्य अस्मिन्काले कार्यमिति पुनर्वचनम् · एतच्च परिस्तरणं होमाङ्गत्वाद्धोमस्य यज्ञोपवीतिना करणपक्षे इदमपि यजमानेनैव प्रागुदग्भिर्दर्भैः प्रागुदक्संस्थं प्राङ्मुखेन कार्यम् प्राचीनावीतिना करणपक्षे परिस्तरणमपि तथैव कर्तव्यम्[3] · अन्यत्तु[4] सर्वं कर्मापसव्येन दक्षिणाभिमुखेन कार्यम् · अत्र नीवीविस्रंसनविधानात् (१५) प्रथममेव नीवीबन्धनं कार्यम् ततः परिस्तरणादि ।

अपरेण गार्हपत्यं चरुमपूर्णं स्रुचं वा तूष्णीं गृहीत्वोत्तरेण दक्षिणाग्निमवहन्ति तिष्ठन् ॥ ५ ॥ गार्हपत्यादपरस्यां दिशि अपूर्णं चरुं चरुस्थालीम्[5] तूष्णीं मन्त्रस्याविधानाल्लौकिकवागुच्चारणवर्जम् व्रीहीन्युब्जेन मुष्टिना प्राचीनावी-

---

1) पिण्डपितृयज्ञार्थपाकः Mahâd. 2) अनेन श्रपणस्य पश्चादुत्तरतो वा अर्थवच्चेति (२.३.८-१.) सर्वमतिदिश्यते · द्विश इति निवृत्त्यर्थमेकश इति Ss. 3) अप्रादक्षिण्येन दक्षिणाग्निं दर्भैः परिस्तीर्य Mahâd. 4) ? अत्र २. 5) चरुं मृन्मयपात्रम् चरुर्मृच्चयो भवतीति यास्कोक्तेः (६.११.) Mahâd.

ती दक्षिणामुखोऽधर्युर्गृह्णीयात् अथवा अपूर्णां स्रुचम्[१] · एवं गृहीत्वा दक्षिणाग्नेरुत्तरतो गार्हपत्यस्य पुरस्ताद्दक्षिणाभिमुखस्तिष्ठन्नवहन्ति अत्र शाखान्तराद्दक्षिणाग्नेरुत्तरत उदग्ग्रीवं कृष्णाजिनमास्तीर्य तत्रोलूखलं निधाय तस्मिन्व्रीहीणां प्रक्षेपं कृत्वा मुसलमादाय दक्षिणाभिमुखस्तिष्ठन्नवहननं कण्डनं व्रीहीणां करोति ततः शूर्पमादायोलूखलाद्व्रीहीन्निष्काश्य निष्पवनेन तुषान्निष्काशयेत्।

सकृत्फलीकरोति ॥६॥[२] लोके तस्य पुनः-पुनः क्रियमाणत्वात् सकृदित्युच्यते ।

सारतण्डुलमपूर्णं श्रपयित्वाभिघार्योद्वास्य मेक्षणेन जुहोत्यग्नयऽइति (२.२९) सोमायेति च ॥७॥ इममेव चरुं सारतण्डुलमीषत्स्विन्नतण्डुलम्[३] अपूर्णं यथा शृतेन चरुणा स्थाल्याः पूरणं न भवति तथा श्रपयित्वा आसादितेनाज्येनाभिघार्य दक्षिणत उद्वास्य दक्षिणाग्नेः पूर्वमार्गेणाप्रदक्षिणमुत्तरत आनीय सव्यं कृत्वा तिष्ठंस्तिस्रः समिध आधायोपविश्य प्राङ्मुखो मेक्षणेन चरुं जुहोति दक्षिणाग्नौ । कात्यायनः (कर्मप्रदीप° २.८.१२) अग्नौ-करणहोमश्च कर्तव्य उपवीतिना प्राङ्मुखेनैव देवेभ्यो जुहोतीति श्रुतिः श्रुतेरिति · अत्र केचिदपसव्येन होमं कुर्वन्ति[४] तेषाम् स उद्वास्याग्नौ द्वेऽआहुती जुहोति देवेभ्य इति (२.४.२.११) श्रुतिविरोधः · अतस्तच्छाखान्तरीयं विधानम् · तथा च कात्यायनः (कर्म° २.८.१३) अपसव्येन वा कार्यो दक्षिणाभिमुखेन वेति । मेक्षणं च होमसाधनवद्विकङ्कतम् पालाशमपि भवति · कात्यायनः (कर्मप्र° २.५.१४) इध्मजातीयमिध्मार्धप्रमाणं मेक्षणं भवेत् वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षममिति । हरिस्वामिनः एते

१) अपूर्णता चरोः स्रुचश्च अपूर्णं पितॄणामिति Karka. २) तान्वितुषीकृतान्व्रीहीन् Mahâd. ३) ? °मीषत्स्विन्न° २. सारतंडुलं ईषत्स्विन्नतंडुलं Ss. सारशब्दः सकलतण्डुलवाची प्रसिद्धेः · ईषच्छिन्नता (!) वाक्यशेषात् शृताशृतं पितॄणामिति · प्रसिद्धिरनैकान्तिकी फल्गुण्यपि सारशब्दप्रयोगात् Karka. सारतण्डुलद्रव्यं तुषकणादिरहितमीषत्स्विन्नं Mahâd. ४) होमश्च यज्ञोपवीतिना प्राङ्मुखेनैव दैवत्वात् (? देवत्वात् Cod.) स उद्वास्याग्नौ द्वेऽआहुती जुहोति देवेभ्य इति (२.४.२.११.) · न वा पित्र्यकर्माङ्गत्वात् प्रधानोपचारन्यायाच्चाङ्गानाम् महापितृयज्ञे च देवाद्यग्रहणे यज्ञोपवीतित्वविधानात् स यज्ञोपवीती भूत्वाज्यानि गृह्णातीति (२.६.१.१२.) · प्राप्तानुवाद इति चेत् न अनन्यपरत्वाद्वाक्यस्य · मन्त्रलिङ्गाच्च कव्यवाहनाय पितृमतऽइति (२.२९) कव्यवाहनः पितॄणामिति (२.६.१.३०) पितृसम्बन्धात् · तस्मात्पित्र्यवदेव होमः Karka.

आहुती पिण्डदानाङ्गभूते ततश्च विस्मृतयोर्न चरुरुत्पाद्यः किं तर्हि प्रायश्चित्तं कृत्वा आ समाप्तेराज्येन होतव्यमिति ।

प्रास्य तद्दक्षिणेनोल्लिखत्यपहता इत्यपरेण वा (२.२९) ॥ ८ ॥ तन्मेक्षणं दक्षिणाग्नौ प्रास्य प्रस्तुतत्वाद्दक्षिणाग्निं दक्षिणेन अथवा तमपरेण स्फ्येन दक्षिणसंस्थां लेखां करोति । सव्येन होमपक्षे मेक्षणप्रासनमपि सव्येनैव तदङ्गत्वश्रुतत्वात् · अपसव्येन तु होमपक्षे अपसव्येनैव मेक्षणप्रासनम् । स्फ्येनेति शाखान्तरात् ।

उल्मुकं परस्तात्करोति ये रूपाणीति (२.३०) ॥ ९ ॥[1] रेखायाः परस्ताद्दक्षिणप्रदेशे उल्मुकं दक्षिणाग्नेरेकदेशं निदधाति ।

उदपात्रेणावनेजयत्यपसव्यं सव्येन वोद्धरणसामर्थ्यादसाववनेनिक्ष्वेति[2] यजमानस्य पितृप्रभृति त्रीन् ॥ १० ॥ उदकस्य पात्रमुदपात्रं पूर्णपात्रादि · तेनाध्वर्युः यजमानस्य पितृप्रभृति पितुरारभ्य त्रीन्पुरुषान्पितृपितामहप्रपितामहान् अपसव्यं यथा स्याद्धस्तस्य सव्यप्रदेशाद्दक्षिणप्रदेशेनोदकनिनयनं यथा स्यात् तथाङ्गुष्ठप्रदेशिन्योरन्तरालेन अवनेजयति अवनिक्तान् शुचीन्करोति पिण्डदानाय । असाविति सम्बुद्ध्यन्तगोत्रनामादेशपूर्वकम् अमुकसगोत्र यजमानस्य पितरमुकशर्मन्नवनेनिक्ष्व । रेखाया मूलमध्याग्रप्रदेशेषु दक्षिणसंस्थमवनेजनं कार्यम् । अग्रेण[3] देवानां होमः कनिष्ठिकाप्रदेशेन मनुष्याणामुद्धरणं परिवेषणापरपर्यायम् अङ्गुष्ठप्रदेशिन्योरन्तरालमेव पितृणां परिशिष्यते · अत इदमाह अपसव्यमिति ।

उपमूलं सकृदाच्छिन्नानि लेखायां कृत्वा यथावनिक्तं पिण्डान्ददात्यसावेतत्तऽइति ॥ ११ ॥ ततो मूलसमीपे एकेनैव प्रयत्नेन छिन्नानि दर्भतृणानि दक्षि-

1) परस्तादग्रे अर्वाक् · परस्तात्पश्चादिति गुरुचरणाः Mahád. 2) ? सव्येन वोद्ध° १. २. सव्येनोद्ध° ४. 3) सव्येनोद्धरणसामर्थ्यात् उद्धरन्ति मनुष्येभ्य इति कनिष्ठिकाप्रदेशेन मनुष्याणामुद्धरणं परिवेषणापरपर्यायम् Ss. अत्राभिनयश्रुतिरुद्ध्यादितोद्धरणसामर्थ्यादिति इतीव वै देवेभ्यो जुह्वत्युद्धरन्ति मनुष्येभ्योऽथैवं पितृणामिति (२.४.२.१८) · पाणौ हि तीर्थचतुष्टयम् अग्रे देवतीर्थम् मूले मनुष्याणामिति अथैवमिति अङ्गुष्ठमूलं वा कनिष्ठिकाप्रदेशो वा तत्राङ्गुष्ठमूले पितृतीर्थं स्मर्यतऽइति कनिष्ठिकोद्देशे हि सव्यता भवति सा च पित्र्येऽनुचितेति Karka. कनिष्ठामूले सव्यता तेन सव्येनोद्धरणं परिवेषणम् · तर्जनीमूलेऽपसव्यता पितृतीर्थम् तेनावनेजनमित्यर्थः · एतद्विपरीतेनैवोद्धरणं समर्थं भवति Mahád.

णाग्राणि रेखायामास्तीर्य यथावनिक्तम्[1] यत्र-यत्रावनेजनं यस्य-यस्य दत्तं तत्र-तत्र पिण्डान्ददाति · असावित्यस्य स्थानेऽमुकसगोत्रामुकशर्मन्निति[2]।

ये च त्वामन्विति चैके ॥१२॥ एके एतत्ते ये च त्वामनु इत्येवं पिण्डदानमन्त्रशेषं कुर्वन्ति[3]। यदि द्विपितृकः स्यादेकैकस्मिन्पिण्डे द्वौ-द्वावुपलक्षयेदिति विशेषः · शौनकः नामान्यविद्वान्पितः पितामह प्रपितामहेति · व्याघ्रपात् गोत्रात्नाने काश्यप इति · ततश्च काश्यपगोत्र पितः पृथिवीसत् अवनेनिक्ष्व पितामहान्तरिक्षसत् प्रपितामह दिविसदिति प्रयोज्यम्।

अत्र पितर इत्युक्त्वोदङ्ङास्त (२.३१) ऽआ तमनात् ॥१३॥ पिण्डसंमुखः संहितास्वरेण पठित्वाप्रदक्षिणं पर्यावृत्य उदङ्मुखो भूत्वा श्वासधारणं कृत्वा उपविशेत् ग्लानिपर्यन्तम् · न चोदङ्मुखावस्थापनमात्रेण ग्लानिः सम्भवति अतः शाखान्तरोक्तं श्वासधारणमर्थात्कार्यम् · विष्णुः यथाशक्ति प्राणनिरोधं कृत्वासीतेति।

आवृत्यामीमदन्तेति (२.३१) जपति ॥१४॥ प्रदक्षिणं प्रत्यावृत्य पिण्डसंमुखो भूत्वा।

अवनेज्य पूर्ववन्नीविं विस्रस्य नमो व इत्यञ्जलिं (२.३२) करोति ॥१५॥[4] षड्भिर्मन्त्रैः षडञ्जलीन्। नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो व इति षष्ठो मन्त्रः · गृहाणां पत्नीनां वा पिण्डानां वावेक्षणं कुर्वता गृहान्नः पितर इति जपश्च महापितृयज्ञवदत्रापि कार्यः समानश्रवणात्।

एतद्व इत्युपास्यति (२.३२) सूत्राणि प्रतिपिण्डम् ॥१६॥ प्रतिपिण्डं बहुवचनात्त्रीणि-त्रीणि सूत्राणि उपास्यति पिण्डानामुपरि निदधातीत्यर्थः।

ऊर्णादशा वा ॥१७॥ ऊर्णा मेषरोमाणि तन्निर्मितवस्त्रदशा वा ब-

---

१) यथावनेजनं कृतम् पितृतीर्थेन लेखामूलमध्याग्रेषु Mahâd. २) अन्नमिति चाध्याहारः Karka. ३) अन्नमित्यध्याहारान्ते Mahâd. ४) पूर्ववदिति उदपात्रेणापसव्येन यजमानस्य पितृप्रभृति त्रीनवनेज्य · भूमौ वा · नमो व इत्यारभ्य पितरो देष्म इत्यन्तेन Mah. विस्रंसनोपदेशात्पूर्वमिव नीविमत्परिधानम्। प्रतिनमस्कारं वाञ्जलिकरणम् षट्कृत्वो नमस्करोतीति वचनात् (२.४.२.२४) · षट्कृत्वो नमस्करोतीति सूत्रकारानुपदेशान्नेति चेत् स्यात् महापितृयज्ञेऽउक्तत्वात् (५.९.२५) षट्कृत्वा-नमस्करोतिश्रुतेश्च तुल्यत्वात् (२.६.१.४२) Karka.

कुत्वविशिष्टाः प्रतिपिण्डमेतद्व इत्युपास्यति । अथवा ऊर्णा वा दशा वेति पक्ष-द्वयम् · तथा च मानवे वासस ऊर्णां दशा वेति ।

वयस्युत्तरे यजमानलोमानि वा ॥ १८ ॥ यजमानस्य पञ्चाशत्तमवर्षादूर्ध्वं यजमानलोमानि पलितानि हृदयस्थानि सूत्रस्थाने प्रतिपिण्डं प्रास्यति · उत्तर-शब्दोपादानात्पूर्वोत्तरभागेन शतवर्षरूपस्य वयसो द्वेधा विभागः · तथा च पारा-शरः पञ्चाशद्वार्षिको यस्तु दद्याल्लोम स्वयं शुकमिति · शाट्यायनिः पञ्चाश-दूर्ध्वमुरोलोम यजमानस्येति ।

ऊर्जमित्यपो (२.३४) निषिञ्चति ॥ १९ ॥ पितॄणामधिष्ठानं पिण्डाः · तेन ऊर्जं वहन्तीरित्यनेन मन्त्रेणोदपात्रेणावनेजनावशिष्टमुदकं पिण्डानामुपरि निषि-ञ्चति पिण्डसमीपे भूमौ वा उभयथा शाखान्तरे श्रवणात् स्वधा स्थ तर्प-यत मे पितॄनिति मन्त्रलिङ्गात् ।

अवधायावजिघ्रति यजमानः ॥ २० ॥ पिण्डानध्वर्युः स्थाल्यां प्रत्यवधाय स्थाल्यां पिण्डान्समाधायेत्यापस्तम्बः · ततो यजमानः सव्यं कृत्वा पिण्डान्स्थाली-स्थानवजिघ्रति । अवघ्राणं यजमानसंस्कारः स यजमानभाग इत्यर्थवादात् (२.४.२.२४) · ततश्च प्रोषिते यजमाने न भवति । अत्र ल्यबादेशः पूर्वकालतामात्रे न समानकर्तृकतायाम् निरुप्याज्यं प्रातर्दोहनमिति-वत् (४.२.३७) ।

उल्मुकसकृदाछिन्नान्यग्नौ ॥ २१ ॥ पूर्वं सकृदाछिन्नानि यानि रेखायामा-स्तृतान्यभूवन् तान्यग्नौ दक्षिणाग्नौ प्रक्षिप्य ततः उल्मुकं तत्रैव प्रक्षिपति अ-ग्नौ सकृदाछिन्नानीत्यादिश्रुतेः (२.४.२.२४) · सूत्रे चोल्मुकपदस्य प्रथमोच्चारणम् अ-ल्पाच्तरत्वात् · तेन प्रथमं सकृदाछिन्नप्रासनम् तत उल्मुकस्य ।

आधत्तेति (२.३३) मध्यमपिण्डं पत्नी प्राश्नाति पुत्रकामा ॥ २२ ॥ गर्भग्रह-णायोग्या ऋतुस्नाता पत्नी मध्यमपिण्डं पितामहस्य पिण्डं प्राश्नाति · पत्नीबहुत्वे पिण्डविभागो मन्त्रावृत्तिश्चेति धूर्तस्वामी · मानवे मध्यमपिण्डं पत्नी प्राश्नीया-दम्नावितरावादध्याद्ब्राह्मणोऽधिभक्षयेदप्सु वा गमयेदिति · पाराशरः पिण्डानां मध्यमं पिण्डं पितॄन्ध्यायन्समाहिता प्राशयेत्पुत्रकामा तु भार्या तं श्राद्धदस्य च स्नुषा वापि सगोत्रा वा पुत्रकामा द्विजाज्ञया आधत्त पितरो गर्भं व्या-

हरेयुर्द्विजातयः महारोगगृहीता वा तद्रोगोपशमाय च अस्तु मे पितरो रोगमित्युक्त्वा प्राशयेच्च तम् अन्यानप्सु हुताशे वा क्षिपेद्गवे द्विजाय वा अजाय वा प्रदद्याच्च पश्चाद्विप्रविसर्जनमिति ।

प्रेतेभ्यो ददाति ॥२३॥ यत्पितृप्रभृतिभ्यो दानमुक्तम् तत्प्रेतेभ्यो मृतेभ्यः पितृपितामहप्रपितामहेभ्यो ददाति ।

जीवपितृकोऽपि ॥२४॥ पिण्डपितृयज्ञेऽधिक्रियते ।

जीवान्तर्हितेऽपि ॥२५॥ जीवपितृकस्य जीवेन पित्रादिना अन्तर्हिते ऽपि व्यवहितेऽपि पितामहादौ पिण्डदानं भवति · होमादाविव · येभ्य एव पिता दद्यात्तेभ्यो दद्यात्तथा सुत इति स्मृतेः ।

जीवपितृकस्य होमान्तमनारम्भो वा ॥२६॥ जीऽस्य यजमानस्य होमान्तमेव पिण्डपितृयज्ञसंज्ञं कर्म भवति अथवानारम्भ एव पिण्डपितृयज्ञस्य · वाशब्दः पूर्वपक्षनिरासार्थः । अत्रानारम्भपक्ष एव युक्तः यतः पिण्डदानं प्रधानम् तदभावे होमस्याङ्गभूतस्यानुष्ठानं न घटते । एवं जीवान्तर्हितेऽपीति पक्षं दूषयित्वा जीऽस्य होमान्तमित्यत्रोपपत्तिमाह ·

न व्यवेते जातूकर्ण्यो न जीवन्तमतिददातीति ॥२७॥ जीवपितृकस्य होमान्तकर्म कुर्वतः यतो जातूकर्ण्य आचार्यो न व्यवेते जीवता पित्रा व्यवहिते पितामहादौ पिण्डदानं न भवतीत्याह · कुतो न भवतीत्यत्र हेतुः न जीवन्तमतिददातीति शाखान्तरे श्रवणात् · अतः प्रधाने पिण्डदाने जीवपितृकस्य निषिद्धे अनारम्भ एव घटते न होमान्तता । आपस्तम्बः यदि जीवत्पिता न दद्यादा होमात्कृत्वा विरमेदिति · मानवे च यदि दद्याद्येभ्य एव पिता दद्यात्तेभ्यो दद्यादिति · काठके पितापुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात् पिता प्रेतः स्यात्पितामहो जीवेत्पित्रे पिण्डं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यादिति ॥ ॥ श्वो नोदेतेत्यदृष्टे वेति (४.२.१) पक्षे चतुर्दश्यामुपवासो विहितः · तदा चतुर्दश्यामग्न्यन्वाधानादि कृत्वा प्रातरमावास्यायां दर्शेष्टिः क्रियते · ततोऽपराह्णे पिण्डपितृयज्ञः प्राप्नोति अपराह्णे पिण्डपितृयज्ञश्चन्द्रादर्शनेऽमावास्यायामिति तत्कालस्य प्रागुक्तत्वात् (४.१.१) । अमावास्योपवा-

सपत्ने चामावास्यायां पूर्वाह्णे दर्शार्थमग्नौ विहृत्याग्न्यन्वाधानं कृत्वा वैश्वदेवं च कृत्वा ततोऽपराह्णे पिण्डपितृयज्ञः प्राग्दर्शेष्टेः प्राप्नोति । एवं कदाचित्प्राक् कदाचित्पश्चादित्यनियमे प्राप्ते नियमार्थमाह ·

पूर्वो वाङ्गत्वात्पिण्डपितृयज्ञः [1] ॥ २८ ॥ पूर्व एव दर्शेष्टेः पिण्डपितृयज्ञः न पश्चात् अङ्गत्वप्रतिपादकवाक्यात् [2] । जीवपितृकस्यैव चतुर्दश्यामुपवासपक्षो न मृतपितृकस्य · तस्य हि पिण्डपितृयज्ञोऽवश्यं दर्शात्प्रागेव कर्तव्यः न चासौ चतुर्दश्यामुपवासपक्षे प्राग्दर्शात्सम्भवति विहितकालाभावात् · अतो मृतपितृकस्यामावास्यायामेव उपवासो जीवपितृकस्य चतुर्दश्याममावास्यायां वेति विकल्पः । [कर्क° इदमेव विचार्यते किं पिण्डपितृयज्ञो दर्शाङ्गमुतानङ्गमिति किं तावत्प्राप्तम् अनङ्गमिति ब्रूमः ·]

प्रकरणकाललिङ्गानुग्रहवचनानाहिताग्निश्रुतिभ्योऽनङ्गम् ॥ २९ ॥ पिण्डपितृयज्ञो दर्शस्य अङ्गं न भवति प्रकरणादिभिन्नत्वात् । प्रकरणभेदात् · यस्य प्रकरणे यद्यत्पठ्यते तत्तदङ्गं भवति · न चायं दर्शप्रकरणे पठ्यते · अतोऽनङ्गम् । किं च कालभेदात् · अङ्गानां प्रधानकालता न्याय्येति न्यायादङ्गानां प्रधानानामेककालता भवति · अत्र च कालभेदो विद्यते दर्शस्य प्रतिपत् पूर्वाह्णश्च पिण्डपितृयज्ञस्यामावास्यापराह्णश्चेति । लिङ्गाच्च · यज्ञेन गृहीतः पौर्णमासेन यजेत पितृयज्ञेनैवामावास्यामवरुन्द्ध [3] इत्यमावास्यां विनापि केवलं पितृयज्ञं दर्शयति · दर्शाङ्गं स्यात् तदा दर्शं प्रधानं विना केवलस्याङ्गमात्रस्यानुष्ठानदर्शनं न स्यात् अस्ति च अतोऽस्माल्लिङ्गादपि न दर्शाङ्गम् । अनुग्रहवचनाच्च · अस्य पिण्डपितृयज्ञस्य गवामयनादौ संवत्सरसत्त्रे दर्शात्पृथगनुग्रहवचनमस्ति कथमेषां पितृयज्ञोऽनन्तरितो भवतीति (१२.३.५.५) · यद्यङ्गं स्यात् तदा कथमेषामामावास्यं हविरनन्तरितं भवतीति दध्ना च पुरोडाशेन चेति (१२.३.५.६) अमावास्यानुग्रहेणैव पितृयज्ञस्यापि प्रयाजादिवदनुग्रहसिद्धेः पृथगनुग्रहवचनं न स्यात् · अस्ति च पृथगनुग्रहवचनम् औपासनैरिति ब्रूयादिति (१२.३.५.५) अतो

---

1) वाङ्गत्वात् Karka. 2) पूर्वेद्युः पितृभ्यो यज्ञं निष्क्रीय (? नियृणीय Cod.) प्रातर्देवेभ्यः प्रतनुतऽइति Karka. 3) Thus Karka. यजेतत्पितयज्ञेन चामा° २. यजते पितृयज्ञेनामा° Ss.

ऽप्यनङ्गम् । अनाहिताग्निश्रुतेश्च[1] . अनाहिताग्नेरपि पिण्डपितृयज्ञः श्रूयते अप्यनाहिताग्निना कार्य इति · यदि दर्शाङ्गं स्यात् तदा अनाहिताग्नेर्दर्शाभावान्न श्रूयेत ।

अङ्गं वा समभिव्याहारात् ॥३०॥[2] अथवा दर्शाङ्गमेव पिण्डपितृयज्ञः समभिव्याहारात् समित्येकीभावे अभीत्याकाङ्क्षायाम् ततश्चाकाङ्क्षायोग्यतासंनिधिमतां पदानामुच्चारणं समभिव्याहारो वाक्यम् तस्मात् पूर्वेद्युः पितृभ्यो यज्ञं निष्क्रीय प्रातर्देवेभ्यः प्रतनुतऽइति[3] । प्रकरणान्तरपठितमप्यङ्गं भवति[4] यथा प्रवर्ग्यः सौत्रामणी चेति । भिन्नकाले विहितमपि वचनादङ्गं भवति यथाग्निहोत्रदर्शपूर्णमासादावुद्धरणादि । यद्मणा गृहीत इत्यादि[5] यदनङ्गत्वे लिङ्गमुक्तम् तत्तु वाचनिकं दर्शं विना पिण्डपितृयज्ञस्य केवलानुष्ठानम् नास्ति वचनस्यातिभारः · अतस्तदपि नानङ्गत्वे साधकम् । अनुग्रहवचनमर्थवादप्रापकम् अङ्गत्वेऽप्युपपद्यतऽएव । यच्चोक्तम् अनाहिताग्निश्रुतेश्चेति तदपि न्यायविरुद्धं वाचनिकमनाहिताग्नेः दर्शं विना पिण्डपितृयज्ञस्यानुष्ठानविधानम् · न हि वचनप्रापितं न्यायसहस्रेणापि पराकर्तुं शक्यम् । तस्मादङ्गं पिण्डपितृयज्ञ इति । जैमिनेस्त्वनङ्गमेव · तथा चाह पितृयज्ञः स्वकालत्वादनङ्गं स्यादिति (४.४.१९) ।

अनाहिताग्नेरप्येषः ॥३१॥[6] ॥ प्रथमा कण्डिका ॥१॥ ॥

अथ पद्धतिः ॥

पौर्णमासेष्टिरुक्ता अथ दर्शेष्टिरुच्यते । तत्र चतुर्दश्यां रात्रौ सायं प्रातर्दध्नाग्निहोत्रं हुत्वा स्थालीस्थस्य प्रातर्हुतशेषस्य सायंहुतस्य वातघ्ननार्थं स्थापनम् · सांनाय्यवति दर्शयागे करिष्यमाणे चतुर्दश्यां दध्ना होमो नान्यथा । अमावास्यायां पञ्चभूसंस्कारपूर्वकं पूर्वाह्णऽएवाग्न्योरुद्धरणम् ततोऽग्न्यन्वाधानम् ततो

---

१) अनाहिताग्निश्रुतेरनाहिताग्नेरप्येष इत्यतोऽनङ्गम् Mahád. २) वावधारणे Mahád. ३) समभिव्याहारो वाक्यम् वाक्यादित्यर्थः · पूर्वेद्युः पितृभ्यो नि(ः)क्रयं कृत्वा प्रातर्देवेभ्यः प्रतननम् · यच्च येन विना न भवति तत्तदर्थम् · तादर्थ्यलक्षणं तु शेषत्वम् · तस्मादङ्गमिति Karka. ४) यत्तु प्रकरणभेदादनङ्गमिति प्रकरणान्तरे समधीतमप्यङ्गं भवत्येव Karka. ५) ? उत्पातादि २. ६) Thus १. Mahádeva, and the paddhati. In २. and Karka this sútra is wanting, and I consider it therefore as having been originally only a marginal gloss which has afterwards crept into the text itself.

मांसमैथुनवर्जनसंकल्पः वपनं वा ततो वैश्वदेवः ततोऽपराह्णे पिण्डपितृयज्ञः ततो दर्शश्राद्धम् । तदुक्तम् पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः पितृयज्ञं[1] प्रकुर्वीत ततोऽन्वाहार्यकं बुध इति · पक्षान्तं कर्माग्न्यन्वाधानम् ॥ ॥ अथ पिण्डपितृयज्ञ उच्यते । अस्य चाध्वर्युः कर्ता · स च त्रिधाविभक्तदिनतृतीयांशे भवतीति कर्कः[2] द्विधाविभक्तस्यैव द्वितीयभागऽइत्यपरे । तत्र पूर्वं नीविकरणम् तच्च कुशतिलसंयुक्तानां वस्त्रदशानां सव्यभागे परिहितवस्त्रेण संवेष्ट्यावगाहनम् । ततः सव्येनैव दक्षिणाग्नेः परिस्तरणम् इष्टिवत् होमस्य दैवत्वात् परिस्तरणस्य तदङ्गत्वात् · येषामपसव्येनाग्नौकरणहोमः तेषां परिस्तरणमप्यपसव्येन पित्र्यवत् · अत्र होमवर्जं सर्वं कर्मापसव्येन दक्षिणाभिमुखेन च कर्तव्यम् । ततोऽपसव्यं कृत्वा दक्षिणाग्नेरुत्तरतो दक्षिणासंस्थं दक्षिणाग्राणां पात्राणामेकैकेनासादनम् न द्विशः · स्फ्यः शूर्पम् अग्निहोत्रहवणी वा स्थाली वा व्रीहयः कृष्णाजिनम् उलूखलम् मुसलम् स्रुचिग्रहणपक्षे अत्र चरुस्थाली श्रपणार्थमुदकम् आज्यम् मेक्षणम् तिस्रः समिधः उदपात्रम् सकृदाच्छिन्नानि सूत्राणि च ऊर्णा वा वस्त्रदशा वा । ततो गार्हपत्यस्य पश्चाद्दक्षिणाग्रेषु कुशेषु स्फ्यं निधाय तस्योपरिष्टात्पात्र्यां व्रीहीन्निदध्यात् । ततः स्रुचि-ग्रहणपक्षे शूर्पेऽग्निहोत्रहवणीं निधाय चरुस्थाल्यां ग्रहणपक्षे शूर्पे चरुस्थालीं निधाय गार्हपत्यमपरेण दक्षिणामुख उपविश्य मनसोद्दिश्य तूष्णीमपूर्णां स्रुचं व्रीहीन्गृह्णीयात् अपूर्णां स्थालीं वा तूष्णीं गृह्णीयात् · अत्र स्थाल्येव ग्रहणम् सकृदेव स्रुक्पक्षे च स्रुचैव मुष्टिना वा नीचा मुष्टिना व्रीहीन्गृह्णातीति शाङ्खायनः (४.३.६) · आपस्तम्बः पितृभ्यो जुष्टं निर्वपामीति वा तूष्णीं वेति · मुष्टिना ग्रहणपक्षेऽपि तावदेव सकृद्ग्राह्यम् यावता स्रुक्स्थाली वा न पूर्यतऽइति । तत उत्थाय दक्षिणाग्नेरुत्तरत उदग्ग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य तस्मिन्नुलूखलं निधाय व्रीहीनोप्य मुसलमादायाव-

---

१) पिण्डपितृय°१, against the metrum. २) This is not quite exact: Karka says: अह्नोऽपरो भागः अपराह्णः · तृतीयो भाग इत्यपरे वाक्यशेषात् पूर्वाह्णो वै देवानामित्युपक्रम्य (२.४.२.८) अपराह्णः पितृणामिति ।

धाय दक्षिणाभिमुखस्तिष्ठन्नवहन्ति · ततो वितुषीभूतेषूलूखलान्निष्काश्य शूर्पे न्युप्य निष्पूय तुषान्पृथक्कृत्वा सकृत्फलीकृत्य निष्पवनेन कणान्पृथक्कुर्यात् · ततः स्थाल्यामोप्य सकृत्प्रक्षाल्य दक्षिणाग्नावधिश्रित्य श्रपयित्वाभिघार्य दक्षिणत उद्वास्य दक्षिणाग्निं पूर्वेणाप्रदक्षिणमानीय सव्यं कृत्वा तिस्रः समिधोऽभ्याधायोत्तरतः प्राङ्मुख उपविश्य दक्षिणं जान्वाच्य मेक्षणेन द्वेऽआहुती देवेभ्यो जुहोति ओमग्नये कव्यवाहनाय स्वाहा इदमग्नये कव्यवाहनाय ओं सोमाय पितृमते स्वाहा इदं सोमाय पितृमते । ततः सव्येनैवाग्नौ मेक्षणप्रक्षेपः होमाङ्गत्वात् । ततोऽपसव्यं कृत्वा दक्षिणाभिमुखो भूत्वा दक्षिणाग्नेर्दक्षिणतः पश्चाद्वा अपहता इति (२.२९) स्फ्येन दक्षिणसंस्थां लेखामुल्लिखेत् । ततो रेखायाः परस्तादग्रतो ये रूपाणीत्युल्मुकं (२.३०) निदधाति । तत उदपात्रमादाय लेखायां यजमानस्य पितृप्रभृति त्रीन्पुरुषानवनेजयति अमुकसगोत्र यजमानपितः अमुकशर्मन्नवनेनिक्ष्वेति रेखामूले अमुकसगोत्र यजमानपितामहामुकशर्मन्नवनेनिक्ष्वेति रेखामध्ये अमुकसगोत्र यजमानप्रपितामहामुकशर्मन्नवनेनिक्ष्वेति रेखान्ते । इति दक्षिणसंस्थं त्रयाणामवनेजनं कृत्वा मूलसमीपे एकप्रयत्नेनैव छिन्नानि दर्भतृणानि लेखायां दक्षिणाग्राण्यास्तीर्यावनेजनस्थाने पिण्डदानं करोति अमुकसगोत्र यजमानपितः अमुकशर्मन्नेतत्तऽइति मन्त्रेण ये च त्वामन्वितीमं मन्त्रशेषं च केचित्कुर्वन्ति · एवं रेखामूले पितुः पिण्डं निधाय ततः अमुकसगोत्र यजमानपितामह अमुकशर्मन्नेतत्तऽइति रेखामध्ये ततोऽमुकसगोत्र यजमानप्रपितामह अमुकशर्मन्नेतत्तऽइति रेखान्ते · आर्द्रामलकमात्रः प्रथमः पिण्डः तदपेक्षया द्वितीयः स्थूलः तृतीयः स्थूलतरः । एवं स्तीर्णेषु सकृदाछिन्नेषु मूलमध्याग्रदेशेषु दक्षिणसंस्थान् त्रीन्पिण्डान्दत्वा अत्र पितर इत्यमुं मन्त्रं (२.३१) पिण्डाभिमुखः स्वरेण जपेत् · ततो हस्तं प्रक्षाल्याप्रदक्षिणमुदङ् पर्यावृत्या तमनादास्ते · पुनः प्रदक्षिणं पर्यावृत्य पिण्डाभिमुखोऽमीमदन्तेति (२.३१) स्वरेण जपति । ततः पूर्ववत्पिण्डानामुपर्यवनेज्य नीविं विस्रंस्य नमो व इति (२.३२) षडञ्जलीन्करोति नमस्कारार्थत्वाच्च पुटाञ्जलयः · तत्र नमो वः पितरो रसाय १ शोषाय २ जीवाय ३ स्वधायै ४ घोराय ५ नमो वः पितरो मन्यवे नमो वः

पितरः पितरो नमो व इत्येतावता मन्त्रेण षष्ठमञ्जलिं कुर्यात् ततो गृहान्नः पितर इति जपति । एतद्वः पितर इति (२.३३) प्रतिपिण्डं पृथक्पृथक्त्रीणि-त्रीणि सूत्राण्युपास्यति पञ्चाशद्वर्षादूर्ध्वं यजमानस्य हृदयाग्रुत्तमस्थानलोमानि वा प्रतिपिण्डमुपास्यति · आपस्तम्बः वाससो दशां छित्त्वा निदध्यात्पूर्णास्तुकां वा पूर्वे[1] वयस्युत्तरऽआयुषि स्वं लोम वेति । तत ऊर्जं वहन्तीरिति (२.३४) मन्त्रेण उदपात्रस्थमवनेजनावशिष्टमुदकं पिण्डानामुपर्येव निषिञ्चति । ततः पिण्डान्स्थाल्यां प्रत्यवदधात्यध्वर्युः । ततो यजमानः स्थालीस्थान्पिण्डानवजिघ्रति । ततोऽध्वर्युः सकृदाछिन्नान्यग्नौ प्रक्षिप्य सव्यं कृत्वोल्मुकं दक्षिणाग्नौ प्रतिप्रास्यति । तत उदकोपस्पर्शनम् । पुत्रकामा गर्भग्रहणयोग्या ऋतुमती पत्नी आधत्त पितर इति (२.३३) मन्त्रेण मध्यमं पिण्डं प्राश्नाति · तस्मिन्यज्ञे तस्यावघ्राणं न कार्यम् ।

ततः पार्वणं श्राद्धम् ॥ जीवपितृकस्य पितृयज्ञाभावः । पिण्डपितृयज्ञो दर्शाङ्गमिति कर्कादयः सर्वे भाष्यकाराः नेति सम्प्रदायः · पिण्डपितृयज्ञः स्वकालत्वादनङ्गं स्यादिति जैमिनिः (४.४.१९) । अनाहिताग्नेरप्ययं पिण्डपितृयज्ञो भवति ॥१॥ ॥

इति चतुर्थस्य प्रथमा कण्डिका ॥ ॥

पिण्डपितृयज्ञ उक्तः । इदानीं दर्शेष्टिमाह ·

श्वो नोदेतेत्यदृष्टे वा पर्णशाखां छिनत्ति शामीलीं[2] वेषे त्वोर्जे त्वेति (१.१) वा ॥१॥ श्व आगामिनि दिवसे नोदेता नोदेष्यति चन्द्रमा इति ज्ञात्वा चतुर्दश्याम् · अदृष्टे चन्द्रमसि वा अमावास्यायामित्यर्थः · पर्णस्य पलाशस्य शाखां वृक्षात् छिनत्ति शामीलीं वा शमीमयीं वा · शम्या अवयवः शामीली शम्याः ष्ट्लन्[3] टिड्ढाणञिति ङीप् (पा॰ ४. १. १५) । उभयोर्मन्त्रयोः छेदने विधानात्करणमन्त्रत्वेन समुच्चयासम्भवाद्विकल्पः[4] ।

छिनद्मीति वोभयोः साकाङ्क्षत्वात् ॥२॥[5]

---

1) ? वापर्व्ये २ at ४.१.१७. 2) शामिलीं २ 3) sic! ष्ट्लञ् see पा॰ ४.३.१४२. 4) तामाछिनत्तीषे त्वोर्जे त्वेति हि श्रूयते (१.७.१.२) · न चानयोर्मन्त्रयोः करणत्वात्समुच्चयः Karka. 5) छिनद्मीति उभाभ्यां सम्बध्यते · कुतः साङ्क्षत्वात् उभयोश्छेदने विनियुक्तत्वात् तामाछिनत्तीषे त्वोर्जे त्वेति Karka.

संनमयामीति वोत्तरे ॥३॥[1] ऊर्ज्जे वेत्यनुमार्ष्टीति शाखान्तरात् अनुमार्जनं तत्पर्णादिपातनेन प्रगुणीकरणम् · तच्च मन्त्रलिङ्गादेव प्राप्तत्वादाचार्येण न सूत्रितम् · अतश्च माध्यन्दिनीयपाठाश्रयणाद्द्वयोर्मन्त्रयोर्विकल्पेन छेदने विनियोगः काण्वशाखापाठाश्रयणादुत्तरस्त्वनुमार्जनऽएव विनियुज्यते । तथा चापस्तम्बः ऊर्ज्जे वेति संनमयत्यनुमार्ष्टि वेति · संनमनमृजूकरणम् मूलादारभ्याग्रात्स्पर्शनमनुमार्जनमिति धूर्तस्वामी ।

बहुलपलाशामशुष्काग्रां प्रागुदीचीमन्यतमां वा ॥४॥ बहुपर्णाम् · अशुष्कमग्रं यस्याः · प्रागुदीचीं वृक्षादैशान्यां दिशि प्रसृताम् अन्यतमां वा प्राचीं वा उदीचीं वा ।

व्रतमुपैति ॥५॥ ततोऽन्तरेणापराग्नी गत्वापरेणाहवनीयं प्राङ्तिष्ठन्नग्निमीक्षमाणोऽप उपस्पृश्य व्रतमुपैति अग्ने व्रतपते इदमहमिति वा । अज्ञातावसरस्य शाखाछेदनस्य कालविधानायेदमुक्तम् · व्रतोपायनीयाशनानन्तरं शाखां छित्वा प्रगुणीकृत्य व्रतोपायनं कर्तव्यम् · शाखां छित्वा व्रतमुपैतीति शाखान्तरात् ।

यथोक्तं वा ॥६॥ शाखाछित्त्वस्मिन्नेवावसरे नियमेन भवति · व्रतग्रहणं तु यथोक्तम् यस्मिन्काले वैकल्पिकं प्रागुक्तं तथैव तत्र-तत्र काले वा भवति वा इह । केचिदग्न्यन्वाधानानन्तरं पूर्वाह्णऽएव शाखाछेदः कर्तव्य इत्याहुः तेषां मते व्रतमुपैतीत्यनेन व्रतोपायनस्यापि कालान्तरविधिः क्रियतऽइति ।

मातृभिर्वत्सान्त्समवसृज्य वत्सं शाखयोपस्पृशति वायव स्थेति (१.१) ॥७॥[2] मात्रा संगतं वत्सम् · प्रतिवत्सम् । षडवरार्ध्यान्वत्सान्मातृभ्यः पृथक्करोति दर्भैर्दर्भपिञ्जूलैर्वेत्यापस्तम्बः । लिङ्गस्याविवक्षितत्वात् स्त्रीवत्सा अपि गावः सांनाय्यार्थं दोह्याः · अग्निहोत्रे पुंवत्सामिति (४.१४.१) नियतदर्शनादन्यत्रापुंवत्सापि भवतीति प्रतीयते ।

---

१) तत्कृतः ऊर्ज्जे वेत्यनुमार्ष्टीति वचनात् · अनुमार्ष्टीति च प्रगुणीकरणम् तच्च मन्त्रलिङ्गादेव प्राप्तमाचार्येण नाभिहितम् · एवं च सति द्वावपि मन्त्रौ माध्यन्दिनपाठाच्छेदने विनियुज्येते विकल्पेन उत्तरस्त्वनुमार्जनऽएव काण्वपाठात् Karka. २) प्रतिशब्दाभावान्मन्त्रस्य बहुवचनत्वाचैकस्यैवोपस्पर्शनम् इत्युवटः · कर्कस्तु प्रतिवत्सम् · उपस्पर्शनं वत्सपृथक्करणार्थम् Mahád.

उपायव स्थेति चैके ॥८॥[1]

देवो व इति (१.१) मातॄणामेकां व्याकृत्य ॥९॥[2] अनेकयजमानके ध्रुवा अनयोर्गोपत्योरेषु गोपतिषु स्यात । एकस्या गोरुपस्पर्शनेन सर्वासां गवां संस्कारो भवति मन्त्रे आप्यायध्वमघ्न्या इति बहुवचनदर्शनात् · अतो वह्निनीदध्येन्द्रमित्यत्र (१५.१.२८) आप्यायस्व अघ्न्येऽइत्यूहः[3] · अपरे तु उपस्पर्शनस्य संनिपत्योपकारकत्वादेकस्या एव गोरयं संस्कार इत्याहुः बहुवचनं च पूजार्थम् ।

ऐन्द्रं भवति माहेन्द्रं वा ॥१०॥[4] तत्सांनाय्यं हविः । गोरुपस्पर्शनमन्त्रे इन्द्रस्यैव दर्शनादिन्द्रस्यैव देवत्वं मा भूदिति माहेन्द्रं वेत्युक्तम् ।

यजमानस्य पशूनित्यग्न्यगारस्यान्यतरस्य (१.१) पुरस्ताच्छाखामुपगूहति ॥११॥ द्वे ह्यग्न्यगारे आहवनीयागारं गार्हपत्यागारं च · पुरस्तात्प्रदेशे पूर्वभागे वा। अनेकयजमानके यजमानयोर्यजमानानाम् · पशुं पाहीति च वह्निनीदधनि राजसूये ।

मूलादुपवेषं करोति वेषोऽसीति[5] ॥१२॥[6] प्रथमं तूष्णीं शाखामूलमरत्निप्रमाणादधिकप्रमाणं छित्त्वा पृथक्कार्यम् ततस्तस्मादुपवेषं करोति · उपवेषश्चारत्निमात्रः प्रादेशमात्रो वा परिशिष्टोक्तः · तस्य च कपालोपधानार्थत्वात्केवलपयोहविष्के केवलपयस्याहविष्के चोपधानाभावादुपवेषकरणाभावेऽपि तूष्णीं शाखामूलस्य परिवासनं भवत्येव ।

सांनाय्ये शाखासंयोगात् ॥१३॥ इदं शाखोपवेषकरणं [स]सांनाय्यकदर्शि-

---

1) चशब्दात्समुच्चयः वायव स्थोपायव स्थ Mahâd. See १.७.१.३. 2) शाखयोपस्पृशति वत्सेन पृथक्कृत्य Mahâd. 3) वह्निनीदध्येन्द्रमित्यत्रैकवचनविपरिणाम इति सम्प्रदायो नेति कर्कः Mahâd., but Karka has: ततश्च व॰द्रमित्यत्र मन्त्रो विपरिणाम्यत ऽइति सम्प्रदायः · अपरे तु न्यायनिगदवादविपरिणाममिच्छन्ति यैवोपस्पृश्यते तस्या एव संस्कार इति · बहुवचनं पूजार्थम् एता उ त्या उषसः केतुमक्रतेति-वत् · 4) सांनाय्यमिति शेषः। इन्द्रस्तु मन्त्रलिङ्गात् महेन्द्रस्तु वचनात् (१.६.४.२१.) Mahâd. 5) वेषोऽस्युपवेष इति Karka. — Kâṇva, see Vâj. S. pag. ५८. 6) मूलतः शाखां परिवास्योपवेषं करोतीति वचनात् · उपवेषनिष्पत्तौ च मन्त्रः शाखायाश्च परिवासनसंस्कारः · ततश्च केवलायामामिक्षायां तूष्णीमेव शाखापरिवासनम् परिवासितया हि पयसोऽपाकरणमिति Karka.

ष्टाविव भवति नान्यत्रासांनाय्यकदर्शेष्टौ पौर्णमासे वा · शाखाया वत्सापाकरणार्थत्वादसांनाय्यके च वत्सापाकरणाभावे शाखाया अभावात्तत्सम्बद्धस्य तस्या उत्पाद्यमानस्योपवेषस्याभाव एव युक्तः ।

उपधानाद्वोभयोः ॥ १४ ॥ वा पूर्वपक्षनिरासे · उपवेषस्य कपालोपधानार्थत्वात् तस्य च ससांनाय्यके असांनाय्यके च कर्मणि भावादुभयत्रोपवेषो भवत्येव · ततश्च शाखाया अभावे वारणो भवति यतस्तं विना तेन प्राचोऽङ्गारानुदूहतीत्यादि (१.२.१.४) न सिध्यति ।

वसोः पवित्रमिति (१.२) पवित्रमस्यां बध्नाति कुशौ ॥ १५ ॥ [१]

त्रिवृद्वा ॥ १६ ॥ त्रिशलाकम् त्रीणि दर्भतृणानि [२] · हस्तप्रदेशमात्रं तु त्रिवृत्कृत्वा पवित्रकमित्यत्र त्रिवृत्त्रिशलाकमिति हेमाद्रिणाप्येवं व्याख्यातत्वात् · आपस्तम्बः त्रिवृद्दर्भमयं पवित्रं शाखायाऽ शिथिलमवसज्जति मूले मूलान्यग्रेऽग्राणि न ग्रन्थिं करोतीति · नवभिस्त्रिगुणैः त्रिगुणमिति केचित् . वेण्याकारमिति केचित् [३] ।

यवाग्वाग्निहोत्रहोमः संनयतस्ताऽ रात्रिम् ॥ १७ ॥ [४] संनयतः सांनाय्यं दुग्धदधिरूपं हविः कुर्वतो यजमानस्य तस्याममावास्यासम्बन्धिन्यां रात्रौ यवागूसंज्ञेन द्रव्येण अग्निहोत्रहोमः सायं प्रातर्भवति · तण्डुलैः शिथिलपक्वा [५] यवागूरित्युच्यते । असंनयतो न यवाग्वा होमनियमः · नापि चरू सांनाय्यालाभ ऽइति (२५.५.६) सांनाय्यस्थाने चरुकरणे । आपस्तम्बः स्वयं यजमानोऽग्निहोत्रं जुहोति अग्निहोत्रोहृषणमातञ्चनार्थं निदधातीति · पूर्वापकृतेन दध्ना आतञ्चनानन्तरं यवागूशेषस्य दोहमध्ये प्रक्षेप उक्तोऽस्ति तदर्थमवशेषणम् ।

हुतऽउपसृष्टां प्रब्रूतादित्याह ॥ १८ ॥ [६]

प्रोक्ते घ्यौरसीति (१.२) स्थाल्यादानम् ॥ १९ ॥ दोग्धुरध्वर्युं प्रति उपसृष्टे-

---

१) द्वे साग्रे दर्भतृणे पवित्रं कर्तुं शाखायां बध्नाति · उपवेषपवित्रबन्धने शाखोपगूहनात्पूर्वमिति कर्कः पवित्रं कृत्वा शाखायां बन्धनमिति सम्प्रदायः Mahâd. २) From Ss. ३) कुशत्रयस्य रज्ज्वाकारं कृत्वा वा बध्नाति · वेणीमिति कर्कः · नवकुशवेणीमिति श्रीऽअनन्तः Mahâd. ४) तां रात्रिमिति वचनात्पक्षमध्ये आमावास्ये राजसूये न यवागूनियमः Karka. ५) ? पक्वाः २ ६) अग्निहोत्रे हुते वत्सेन संगतां गां मां प्रति ब्रूहि इति दोग्धारमाह Mahâd.

ति प्रोक्ते प्रतिवचने अध्वर्युः द्यौरसीति स्थाल्या आदानं करोति · गौरुपसृष्टा वत्सेन संगता तत्र यत्स्थाल्यादानादि कर्तव्यं भवति तत्कुर्विति प्रैषार्थः । आदानं चाधिश्रयणार्थम् तेन वायव्ये पयसि अधिश्रयणाभावे न तदादानमिति कर्कः · तदयुक्तम् स्वेनैव वपाश्रपण्योरधिश्रयणाभावेऽपि तदादानमन्त्ले ऊहस्योक्तत्वात्स्वोक्तविरोधात्[1] अधिश्रयणाभावेऽपि क्वचित्प्रदेशे स्थापनमवश्यं कर्तव्यम् तदर्थमप्यादाने मन्त्रो भवत्येवेत्यपरे । स्थालीस्थानापत्त्या पशौ वपाश्रपण्योरादाने मन्त्रस्य द्यौ स्थ पृथिवी स्थ इत्यूहः · शूलादाने चोखादाने चानूहितस्यैव ।

मातरिश्वन इत्यधिश्रयति (१.२) ॥२०॥[2] स्थालीं गार्हपत्येऽधिश्रयति आहवनीयश्रापिण आहवनीये · अनेकयजमानके यज्ञपती ह्वार्ष्टाम् यज्ञपतयो ह्वार्षुः ।

वसोः पवित्रमिति (१.३) पवित्रमस्यां करोत्युदग्वा ॥२१॥[3] स्थाल्या उपरि स्थापयति प्रागग्रमुदगग्रं वा । केचित्पवित्रं शाखाया वियोज्य स्थाल्यां निदधति दोहानन्तरं च पुनः तस्यां बध्नन्ति अन्ये तु शाखाबद्धमेवोखायां निदधति ।

वाग्यतो दोहयत्यशूद्रेण ॥२२॥[4] दोहयतीति ण्यन्तोपदेशात् गां धुक्ष्वेति दोग्धारं प्रेष्यति स च दोग्धि ।

स्थाल्यन्वारब्धे देवस्त्वेत्यासिंच्यमाने (१.३) जपति ॥२३॥ स्थाल्यामन्वारब्धे यजमाने दोहानन्तरं दोग्ध्रा दोहपात्रेणैव स्थाल्यामासिच्यमाने पयसि ।

कामधुक्ष इति (१.३) प्रश्नः ॥२४॥

प्रोक्ते सा विश्वायुरित्याह (१.४) ॥२५॥ दोग्ध्रा अमूमिति गोनाम्नि प्रोक्ते ।

एवमितरेऽउत्तराभ्यां प्रतिमन्त्रम् ॥२६॥[5] एवमिति दोहनप्रैषः दो-

---

1) Karka's words are: तच्चाधिश्रयणार्थम् अतश्च वायव्ये पयसि अधिश्रयणाभावादनादानम् एवं कार्यापत्त्या च वपाश्रपण्योरादाने विपरिणामः द्यौ स्थ पृथिवी स्थ इति · 2) वायव्ये पयस्यधिश्रयणाभावः Mahâd. 3) प्राग्वेति विकल्पः · तच्चैतच्छ्रौतं प्रागुदग्ग्रहणम् स्मार्तं हि वचनमन्तरेणापि प्राप्नोत्येव · प्रयोजनम् तदपचारे श्रौतं प्रायश्चित्तम् Karka. 4) त्रैवर्णिकेन Mahâd. शूद्रपर्युदासाच्च क्षत्रियवैश्ययोरभ्यनुज्ञा Karka. 5) एवमितरे द्वे गावौ दोहयति · उत्तराभ्यां मन्त्राभ्यां प्रतिमन्त्रमभिदधाति Mahâd.

ह्नम् स्थाल्यामन्वारब्धायामासेकः आसिच्यमाने जपः नामप्रश्नः तत्कथनम् मन्त्राभिधानम् ।

विसृष्टवागुत्तरा अनन्वारब्धे ॥ २७ ॥[1] गाः धुद्त्वेति प्रैषः आसेकजपौ वारत्रयम् ।

यावत्स्वमधिकारात् ॥ २८ ॥ यावत्यः स्वा आत्मीया गावो भवन्ति त्रिप्रभृति तावतीः सर्वा दोह्यति तासां दोहनेऽधिकारोऽस्ति यतः ।

तिस्रो वा नित्यत्वात् ॥ २९ ॥ वा पक्षव्यावृत्तौ तिस्र एव त्रित्वे बहुवचनस्य नित्यत्वात् नियतत्वात् ।

आदिसामर्थ्यात् ॥ ३० ॥ यद्यपि चतुष्ट्वादावपि बहुवचनं नियतमेव तथाप्यादिसामर्थ्यात्त्रित्वगतमेव ग्राह्यम् प्रथमातिक्रमे कारणाभावादिति न्यायात् तिस्रो दुग्धा तावतैव शास्त्रार्थस्य कृतत्वात्किमर्थमधिकानां दोहनम् ।

दर्शनाच्च ॥ ३१ ॥ श्रुतौ चैवं दृश्यते यथा बहुवचनेन त्रित्वसंख्यैव परिगृह्यतऽइति अश्वमेधे हि शतपथोक्तसंख्योपबन्धनं तदैवोपपद्यते यदा बहुवचनेन त्रित्वसंख्याविशिष्टा एव गृह्यन्ते नाधिकाः[2] ।

परिक्षालनमानयति सम्पृच्यध्मृतावरीरूर्मिणा मधुमत्तमाः पृञ्चतीर्मधुना पयो मन्द्रा धनस्य सातयऽइति[3] ॥ ३२ ॥ दोहनपात्रस्य प्रक्षालनोदकं स्थालीस्थदुग्धमध्ये निनयति ।

उद्वास्यातनक्ति प्राग्घृतशेषेणेन्द्रस्य त्वेति (१.४) ॥ ३३ ॥[4] तां दुग्धस्थालीमुत्तरत उद्वास्य प्राग्घुतशेषेण पूर्वदिने कृताग्निहोत्रहोमशेषेण दध्ना दुग्धमातनक्ति अवशिष्टं दधि दुग्धमध्ये प्रक्षिपति दधित्वसम्पत्त्यर्थम् । अत्र विप्रतिपत्तिः केचित्प्रातर्होमशेषेण केचित्प्राग्दिनस्य सायंहोमशेषेण केचिदुभयहोमशेषेण[5] । शाखान्तरे चोपवसथस्य पुरस्तादेकाहे द्व्यहे चातञ्चनस्योपकल्पनमुक्त-

---

१) अध्वर्युः उत्तरास्तिस्रो गाः पूर्ववत् दोहयति अनन्वारब्धे यजमाने Mahád. अन्वारम्भवाग्यमयोश्च प्रतिषेधः Karka. २) See १३. २. ५. १-४. ३) See Taitt. Sanh. १. १. ३. १. ed. *Roer* pag. ६५. ४) पक्षे महेन्द्रस्य त्वेति सरस्वत्यै-दध्यादौ विपरिणामः Mahád. इन्द्रस्य त्वेति चोपलक्षणम् महेन्द्रस्यापि भावात् (१. ६. ४. २१) Karka. ५) प्रातर्हुतशेषेणेति सम्प्रदायः नेत्यपरे तदा प्रातर्हुतशेषेणेत्यवक्ष्यत् अतः प्राक्शब्दस्य पूर्वकालवाचित्वात् पूर्वं यद्धुतशेषं (? यद्वुत° Cod.) सायंहोमशेषमित्यर्थः Karka.

मस्ति अग्निहोत्रोच्छेषेण दध्यातनक्तीति · तद्दिने सायंहुतावशिष्टयवाग्वाः पिण्डमवदधातीति मानवे · आपस्तम्बः एकस्या द्वयोस्तिसृणां वैकाहे द्व्यहे त्र्यहे चतुरहे वा पुरस्तादुपवसथादातञ्चनार्थं दोहयित्वा तेन शीतदुग्धेनातनक्तीति · अत एव चतुर्दश्यां रात्रौ दध्यग्निहोत्रहोमः कार्य इति प्रतीयते । हुतशेषश्च स्थालीस्थो ग्राह्यो न स्रुग्गतः न चामावास्यायां सायं यवाग्वा हुताग्निहोत्रहोमशेषेण आतञ्चनार्थत्वाप्रसिद्धेः दध्ना इति श्रुतत्वाच्च । उच्छेषणाभावे तण्डुलैरोषधीभिर्वातञ्च्यात् पर्णवकुलकुवलवर्जम् ।

सोदकेनापिदधात्यमृन्मयेण विष्णो हव्यमिति (१.४) ॥३४॥ जलवतोत्तानेन पात्रेण दोहस्थालीं ढक्कयति[1] · यदि मृन्मयं स्यात्तृणं दारु वान्तर्दधाति ।

निधाय वत्सापाकरणं पूर्ववत् ॥३५॥[2] तां दोहस्थालीं सुगुप्ते देशे निधाय · मातृभिर्वत्सान्संसृज्य शाखोपगूहनान्तम् · प्रातर्दोहार्थम् ।

प्रातराग्नेय ऐन्द्राग्नश्च द्वादशकपालोऽसंनयतः ॥३६॥ प्रातः प्रतिपदि दर्शेष्टौ विशेष उच्यते · आग्नेयोऽष्टाकपालः पुरोडाशो भवति असंनयतश्च सांनाय्यमकुर्वतो यजमानस्य द्वादशकपालः ऐन्द्राग्नः द्वितीयं हविर्भवति[3] ।

निरुप्याव्यं प्रातर्दोहनमन्यस्मिन् ॥३७॥ सायंदोहपात्रादन्यस्मिन्पात्रे ।

परिद्वाल्लनान्तं कृत्वा सायंदोहमाहृत्य प्रातर्दोहं[5] अपयित्वाभिघार्योद्वास्योभावनक्ति ॥३८॥ उपसृष्टादि परिद्वाल्लनान्तं (१८–३२) सायंहोमवत्कृत्वा प्रातर्दोहं देवस्त्वेति (१.२२) अपयित्वा[4] सायंदोहमाहृत्य प्रातर्दोहमेवाभिघार्य ततस्तमुद्वास्य पुरोडाशाञ्जनानन्तरं यस्ते प्राण इति उभौ सायंप्रातर्दोहौ क्रमेण अनक्ति । अभिघारणं तु पयस एव न दध्नः · अञ्जनं तु प्राणदानमेव प्रकृतावव्यनक्ति यस्ते प्राण इत्युक्तेः (२.८.१४) । अत्र प्राणदानादयः संस्काराः प्रथमं दध्नः कार्यास्ततः पयसः अवदानं तु पयसः पूर्वम् वचनात् (३१) ।

---

1) ढंक° २. 2) पवित्रविशिष्टया शाखया Mahád. 3) असांनाय्ययाजिनः हविर्द्वयम् Mahád. 4) See २. ५. २३. 5) दुग्धस्य पयस आदौ सुच्यव्रधाति ततो दध्नः Mahád. अपन्यायत्वाङ्कृतिग्रहणान् दध्नो हि पूर्वं क्रम इति Karka.

शृतस्याग्रेऽवद्यतीति श्रुतेः ॥३९॥[4] शाखान्तरीयायाः श्रुतेः · न्यायविरोधः · दधिपयसोः स्रुवेण द्विरवदानं प्रत्येकम् तल्लेणोपस्तराभिघारौ सह प्रदानं च देवतागुणयोरेकत्वात् · स्रुवेणाज्यसांनाय्ययोरेवावद्यतीत्यापस्तम्बः।

समस्य मार्जनम् ॥४०॥[1] शाखापवित्रं प्रणीतासु निहिते पवित्रे च समस्य भद्यान्ते मार्जनम् तदनन्तरं च शाखापवित्रं शाखायामेव कर्तव्यम् प्रस्तरे करणं तु तस्य न भवति[2]।

इन्द्राग्न्योरिति (२.१५) व्यूहनम् ॥४१॥[3] एतद्वचनमिन्द्राग्न्योरिति मन्त्रस्यामावास्यायां विनियोगज्ञापनार्थत्वात् अन्यथा परादिना पूर्वान्त इति (१.३.२) परिभाषितत्वात्तस्य पूर्वमन्त्रशेषता स्यात्।

सह शाखया प्रस्तरानुप्रहरणम् ॥४२॥ यदा सूक्तवाकान्ते प्रस्तरानुप्रहरणं क्रियते[4] तदा शाखया सह कार्यम् · प्रस्तरेण सह वत्सापाकरणार्थशाखाया अग्न्याहवनीये प्रक्षेपः।

परिधिभिः सहोपवेषं जुहोति जुहोमि त्वा सुभग सौभगाय पुत्रतमं पुरुहूत अवस्यन्निति[5] ॥४३॥ यदा परिध्यनुप्रहरणमध्वर्युः करोति[6] तदा परिधिभिः सहैव विरोधादग्नीक्षावामूलाडुत्यादितमुपवेषं जुहोति। प्रतिपत्तिरियम् चरितार्थत्वात् नाशदोषादौ सकृद्गृहीतेनाज्येन होमः · वारणस्योपवेषस्य न होमः पौर्णमासप्रकरणेऽउपवेषस्याविधानात्।

पौर्णमासवदन्यदसद्यः ॥४४॥ उक्तादन्यत्सर्वं पौर्णवद्भवति · एतावान्विशेषः असद्यः पौर्णमासे तु सद्यो वा प्रातरिति (२.१.१६) पक्षे अग्न्यन्वाधानादिकर्मापवर्गान्तं यत्सद्यस्त्वमुक्तमस्ति तदिह न भवति।

सोमयाजी संनयेत् ॥४५॥ सोमेनाग्निष्टोमादिना य इष्टवान् स सांनाय्यं दधिदुग्धद्रूपं हविर्द्वयममावास्यायां कुर्यात्।

कामादितरः ॥४६॥

त्रिंशतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत ॥४७॥ उक्ताभ्यां दर्श्यां त्रिंशद्-

---

1) See ३. ४. २४. 2) See ३. ४. २५. 3) See ३. ५. १८. 4) See ३. ६. १४-१५.
5) Kāṇva, see Vāj. S. pag. ५१. 6) See ३. ६. १७.

र्षाण्येव यजेत तत ऊर्ध्वं न यजेत · सांनाय्यस्य प्रस्तुतत्वात्ससांनाय्ययोरेव दर्शपूर्णमासयोरयं नियमः स्यात् तन्मा भूदिति तयोः प्रस्तावेऽपि पुनर्दर्शपूर्णमासग्रहणम् ।

पञ्चदश दाक्षायणयज्ञी ॥४८॥ दाक्षायणयज्ञसंज्ञकदर्शपूर्णमासयाजी पञ्चदश वर्षाण्येव यजेत · दर्शपूर्णमासाविव गुणभूतौ दाक्षायणयज्ञौ न ततः कर्मान्तरमित्यग्रेऽपि (४.४.३) वक्ष्यति ।

अग्निहोत्रमेव वा जुहुयात् ॥४९॥[1] प्राकृतदर्शपूर्णमासपक्षे त्रिंशद्वर्षानन्तरम् दाक्षायणगुणकपञ्चदशवर्षानन्तरम् केवलमग्निहोत्रमेव जुहुयाद्वा नान्यत्किंचित्कुर्यात् । केचिदेवशब्दमिवार्थे व्याचक्षते अग्निहोत्रमिव वा जुहुयात् यथाग्निहोत्रं यावज्जीवं जुहुयात्तथा दर्शपूर्णमासावपीत्येव उभयत्र यावज्जीवमनुष्ठानश्रवणात्[2] · अतश्च विकल्पः यावज्जीवं दर्शपूर्णमासयागः कार्यः त्रिंशद्वर्षाणि वा दाक्षायणपक्षे पञ्चदश वर्षाणि वेति । आपस्तम्बः स्वर्गकामो दर्शपूर्णमासावेवाकामः सर्वकामो वा युगपत्कामयेताहारपृथक्त्वे वा यावज्जीवं यजेत त्रिंशतं वर्षाणि जीर्णो वा विरमेदिति · अत्र यावज्जीवादिविकल्पः दर्शपूर्णमासोपरमे तद्विकाराणामप्युपरतिः तत्प्रकृतित्वात् दर्विहोमाग्रयणं क्रियते सोमानामपि निवृत्तिः केवलमग्निहोत्रमित्युपदेशः अग्निहोत्रमेव जुहुयादिति कात्यायन इति[3] धूर्तस्वामी ॥ ॥ चतुर्थस्य द्वितीया कण्डिका ॥२॥ ॥

अथ पद्धतिः ॥

जीवपितृकस्य चतुर्दश्यां वा उद्धरणाद्युपक्रमः अमावास्यायां यागः · पिण्डपितृयज्ञस्यानङ्गत्वपक्षे मृतपितृकस्यापि विकल्पः अङ्गत्वपक्षे तु मृतपितृकस्यामावास्यायामेवोपवासनियमः । आधानान्तरं पत्नीयजमानौ व्रत्यमश्नीतः । ततोऽध्वर्युः पलाशशाखां छिनत्ति इषे त्वेति (१.१) शमीशाखां वा · या शाखा वृ-

---

1) एवेति नियमशब्दाज्जुहुयादिति विधेर्होममात्रमेव भवति · वाशब्दाद्दर्शपूर्णमासौ वा दाक्षायणयज्ञो वा अग्निहोत्रमेव वेति त्रयः पक्षाः Mahâd. 2) Thus Karka: उभयोस्तुल्यशास्त्रत्वात् यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति 3) °नमिति २·

त्वात्प्राच्यां प्रसृता उदीच्यां वा ऐशान्यां वा सा छेत्तव्या इषे त्वा छिनद्मी-
ति मन्त्रेण · ऊर्जे त्वा संनमयामीति मन्त्रेण तस्याः शाखायाः पर्णादि पातयति ।
ततो व्रतग्रहणं वा । ततः षड्भिर्गोभिः सह षड्वत्सात्संसृज्य तान्वत्सान्प्रत्येकं
शाखयोपस्पृशति वायव स्थेति (१.१) मन्त्रेण शाखोपस्पर्शनेन गोभ्यो वियोज-
यतीत्यर्थः · प्रतिवत्सं मन्त्रावृत्तिः · सांनाय्ये स्त्रीवत्सा अपि गावो भवन्ति · के-
चिद्वायव स्थोपायव स्थेत्येवं मन्त्रं पठन्ति । ततो मातृभ्यो वत्सान्वियोज्य षण्णां
गवां मध्ये एकां गां देवो वः सवितेति (१.१) शाखयोपस्पृशति · आप्यायध्वम-
घ्न्या इन्द्राय भागम् महेन्द्राय भागमिति वा मन्त्रे विशेषः · सांनाय्यस्य दध्नो दु-
ग्धस्य च इन्द्रो देवता महेन्द्रो वेत्यादिविकल्पः प्रथमे प्रयोगे याङ्गीकृता इ-
न्द्रो वा महेन्द्रो वा सैव यावज्जीवं भवति · तत्रापि शाखान्तरे व्यवस्थोक्ता
नागतश्रीर्महेन्द्रं यजेत त्रयो ह वै गतश्रिय इत्युक्तमौर्वो गौतमो भारद्वाजस्ते
ऽनन्तरः सोमेज्याया महेन्द्रं यजेरन्यो वा कश्चिदित्यापस्तम्बः · मानवे च सो-
मयाजिनां गतश्रीरौर्वो गौतमो भारद्वाजस्ते महेन्द्रं यजेरन्न त्वितरे संवत्सरमिन्द्र-
मिष्ट्वाग्नये व्रतपतयेऽष्टाकपालं निरुप्य ते महेन्द्रं यजेरन्निति । ततो यजमानस्य
पशूनिति (१.१) मन्त्रेण गार्हपत्यागारस्य पुरस्तादाहवनीयागारस्य पुरस्ताद्वा शा-
खामुपगूहति । ततः प्रादेशमात्रमधिकं वा शाखाया अग्रं परिशिष्य तूष्णीं छि-
त्त्वा मूलं पृथक्कुर्यात् · ततस्तस्मान्मूलादरत्निमात्रं वेषोऽसीत्युपवेषं करोति प्रा-
देशमात्रं वा । ततो वसोः पवित्रमसीति (१.२) मन्त्रेण प्रादेशमात्री या शाखा
परिशेषिता तस्यां साग्रौ द्वौ कुशौ पवित्रं बध्नाति त्रीन्वा कुशान् । तस्यां
रात्रौ सायं प्रातश्च नियमेन यवाग्वा स्वयमग्निहोत्रहोमः सांनाय्यं कुर्वतो यज-
मानस्य भवति · तण्डुलशिथिलपक्वा यवागूरिति कर्कः[1] यवागूर्विरलद्रवा
इत्यपरे यवागूरल्पतण्डुलचूर्णमिश्रं द्रवद्रूपमन्नमिति स्मृतिचन्द्रिकाकारः पे-
या यवागूरिति धूर्तस्वामिनः । ततोऽग्निहोत्रे हुते अध्वर्युरुपसृष्टां प्रब्रूतादिति
दोग्धारं प्रति प्रेष्यति · दोग्धा उपसृष्टेति प्रत्युक्तेऽध्वर्युर्द्यौरसीति (१.२) स्थाली-
मादत्ते · मातरिश्वन इति (१.२) गार्हपत्ये स्थालीमधिश्रयति · वसोः पवित्रम-

1) but not here!

सीति (१.३) स्थाल्या उपर्युदगग्रं प्रागग्रं वा पवित्रं निदधाति । वाग्यतोऽध्वर्युस्तिस्रो गा अशूद्रेण दोहयति गां धुक्ष्वेति प्रैषेण · ततः प्रेषितो दोग्धा काष्ठमये दोहने प्रथमापाकृतां गां दोहयित्वा आनीय दोहनेनैव स्थाल्यां यजमानेनान्वारब्धायां पवित्रस्योपरि दुग्धमासिञ्चति · अध्वर्युरासिच्यमाने पयसि देवस्त्वा सवितेति (१.३) जपति · ततोऽध्वर्युः कामधुक्ष इति (१.३) दोग्धारं पृच्छति · दोग्ध्रा अमूमिति गोनाम्नि द्वितीयैकवचनान्तेन प्रत्युक्ते सा विश्वायुरित्याह (१.४) । पुनर्गां धुक्ष्वेति दोग्धारं प्रेष्यति · ततः प्रेषितो दोग्धा द्वितीयां गां दुग्ध्वा पुनः स्थाल्यां यजमानेनान्वारब्धायां पवित्रस्योपरिनिनयति · अध्वर्युरपि निनीयमाने पयसि देवस्त्वेति जपति · ततः कामधु° · अमूमिति दोग्ध्रा प्रत्युक्ते सा विश्वकर्मेत्यध्वर्युराह (१.४) । पुनर्गां° · ततः °तृतीयां गां दुग्ध्वा तत्पयः स्थाल्यां पूर्ववदासिञ्चति · ततः कामधु° · स प्रत्याह अमुकीमिति · ततोऽध्वर्युः सा विश्वधाया (१.४) इत्याह । अध्वर्युर्वाचं विसृज्यात ऊर्ध्वं तिस्रो गा दोहयति · अत ऊर्ध्वं यजमानस्य स्थाल्यन्वारम्भो न भवति · ततो गा धुक्ष्वेति अध्वर्युर्दोग्धारं प्रेष्यति · दोग्धा दुग्ध्वा-दुग्ध्वा आनीय स्थाल्यामासिञ्चति · आसिच्यमानेऽध्वर्युः पूर्ववज्जपति । षष्ठीं दोहयित्वा येन पात्रेण दोहयति तस्मिन्पात्रे स्तोकमुदकमासिच्य तत्पात्रं प्रक्षाल्य तत्प्रक्षालनजलं स्थाल्यां दुग्धमध्ये आसिञ्चति सम्पृच्यधमिति । ततः स्थालीमुद्वास्य स्थापितेन प्रातरग्निहोत्रशेषेण दध्ना स्थालीस्थेनातनक्ति इन्द्रस्य त्वेति (१.४) · महेन्द्रपक्षे महेन्द्रस्य त्वा भागमिति · ओषधयः पूतीकाः[1] कलास्तण्डुलाः पर्णवल्का इत्यातञ्चनविकल्पाः उक्तेषणाभावे तण्डुलैरातञ्च्यात्तण्डुलाभावेऽओषधीभिरित्यापस्तम्बः । ततोऽमृन्मयेन पात्रेण सोदकेनोत्तानेन दोहस्थालीमपिदधाति विष्णो हव्यमिति (१.४) ततस्तां सुगुप्ते देशे निधाय प्रातर्दोहार्थं मातृभिर्वत्सान्संसृज्य तेषां पूर्ववदपाकरणं शाखोपगूहनान्तं कुर्यात् । रात्रौ आहवनीयागारे गार्हपत्यागारे वा यजमानः सपत्नीकः शयीत । प्रातः स्वयमेव यवाग्वाग्निहोत्रं हुत्वा अनुदितऽएव सूर्ये तन्त्रोपक्रमं कुर्यात् । पौर्णमासवद्ब्रह्मवरणादि कर्मापवर्गान्तं कुर्यात् । तत्र विशेषो लिख्यते · °गोत्र °शर्मन्दर्शेष्ट्या[2] वयं

---

१) ? पूतिकाः१. २) ? गोत्रशर्मन्द°१.

यक्ष्यामहेऽ इति ब्रह्मणो वरणम् · व्रतग्रहणमत्र वा · प्रणीताप्रणयनम् · पात्रा-
सादने अष्टौ कपालानि शाखोपवेषः वेदश्च दोहनचतुष्टयम् तत्र दोह-
नम् नियोजनम् शाखापवित्रम् स्थाली चेति पुरोडाशपात्र्येका शेषं पूर्व-
वत् · हविर्ग्रहणे एकस्याग्नेयपुरोडाशस्यैव ग्रहणम् · वेदबन्धनानन्तरं प्रोक्षणान्ते
उपसृष्टादिपरिक्षालनान्तो दोहः पूर्ववत्कर्तव्यः · ततश्चनुषे त्वेति (१.२०) कृष्णा-
जिनस्थहविषः प्रेक्षणादि · पयसः पर्यग्निकरणाभावः · देवस्त्वेति (१.२२) मन्त्रे-
णाधः श्रपणं भवत्येव नोपरि श्रपणप्रक्षेपः · ध्रुवामासाद्य सायंदोहाहरणम् ·
ततः पुरोडाशविभस्मीकरणम् · पुरोडाशपात्रीस्थापनम् · तस्यामुपस्तारः पुरो-
डाशे पयसि च तत्रस्याभिघारः न दधनि · उद्वास्य पुरोडाशं तस्योत्तरतो दध्नः
स्थापनम् तस्योत्तरतः पयसः · ततः पुरोडाशदधिपयसां प्राणदानम् दधनि
पयसि च इन्द्रं गच्छेति प्राणदानमन्त्रे विशेषः महेन्द्रपक्षे महेन्द्रं गच्छेति[1] · ततः
कपालान्यभ्यज्योद्वास्याज्यस्थालीपुरोडाशदधिपयसां प्रियेण धाम्नेति (२.६) क्रमेणा-
सादनम् · आज्यस्थाल्यादीनामालम्भः आत्मालम्भनऽ उदकालम्भः[2] · होतुरा-
मन्त्रणादि उत्तमप्रयाजान्तम् इदमग्नये सोमायाग्नयेऽग्नीषोमा[भ्यामग्नीषोमा]भ्यामि-
न्द्राय देवेभ्य आज्यपेभ्यो न मम यच्च ममेत्यादि · आग्नेययागानन्तरमग्नीषोमीय उ-
पांशुयाजः · ततो दधिपयोभ्यां तन्त्रेण यागः · तत्र इन्द्रायानुब्रूहीति होतारं स-
म्प्रेष्य जुह्वामुपस्तीर्य प्रथमं पयसो द्विरवदानम् मध्यात्पूर्वार्धाच्च ततो दध्नः ·
तत उपरि सकृदभिघारः दधिपयसोः प्रत्यभिघारः · उत्थायातिक्रम्याश्राव्येन्द्रं
यजेति प्रैषः · इदमिन्द्रायेति त्यागः · महेन्द्रपक्षे च महेन्द्रायानुब्रूहि महेन्द्रं
यज इदं महेन्द्रायेति विशेषः शेषं पूर्ववत् · ततः सर्वहविर्भ्यः स्विष्टकृद्या-
गादि · दधिपयसोः प्राशित्रहरणे इडायां चावदेयम् नान्यत्र तत्रापि पूर्वं प-
यसः पश्चाद्दध्नः · ऐष्टिकं पवित्रं शाखापवित्रं चोभे समस्य मार्जनम् पुनः शा-
खायामेव तस्य पवित्रस्य करणम् यजमानस्येति[3] प्रस्तरे करणं शाखापवित्र-
योर्न भवति · व्यूहने अग्नेः अग्नीषोमयोः इन्द्रस्योज्जितिमिति अग्निः अग्नीषो-
मौ उपांशु इन्द्रस्तमपनुदन्त्विति · प्रस्तरहोमकाले प्रस्तरेण सह शाखाया

1) See २.८.१५. 2) ? आज्यालंभन१. 3) See ३.४.२५.

होमः · इदमग्नये सोमायाग्नयेऽग्नीषोमाभ्या[मग्नीषोमाभ्या]मिन्द्राय देवेभ्य आज्यपेभ्योऽग्नये होत्रायेति त्यागः · शेषं सर्वं पौर्णमासवत्कर्मापवर्गान्तम् । इति सांनाय्ययाजिनः अमावास्येष्टिरुक्ता · अथासांनाय्ययाजिन उच्यते । उद्धरणादि पूर्ववत् · शाखाछेदादिवत्सापाकरणान्तस्याभावः · न च यवाग्वा होमनियमः · होमानन्तरमुपसृष्टाप्रैषादिवत्सापाकरणस्याभावः · प्रातरनुदिते ब्रह्मवरणादि · पात्रासादने विंशतिः कपालानि द्वयोः पुरोडाशयोः साधारण्येकैव पुरोडाशपात्री दोहनचतुष्टयस्याभावः उपवेषो वारणः अन्यत्पौर्णमासवत् · हविर्ग्रहणे आग्नेयपुरोडाशग्रहणानन्तरमैन्द्राग्नस्य ग्रहणम् तत्र इन्द्राग्निभ्यां जुष्टं गृह्णामीति · विभक्त्यालम्भने इदमग्नेः इदमिन्द्राग्न्योरिति · कपालोपधाने आग्नेयस्याष्टौ कपालान्युपधायोत्तरत ऐन्द्राग्नस्य द्वादशकपालोपधानम् अग्नीषोमीयवत् उत्तरतश्चत्वारीति विशेषः · प्राणदाने अग्निं गछ इन्द्राग्नी गछेति · उत्तमप्रयाजत्यागे इदमग्नये सोमायाग्नये विष्णवऽइन्द्राग्निभ्यां देवेभ्य इत्यादि · आग्नेययागानन्तरं वैष्णव उपांशुयाजः तत्र विष्णवे उपांशु अनुब्रूहीत्युच्चैः ध्रुवातश्चतुरवत्तमाज्यमवदायोत्थायाश्राव्य विष्णुमुपांशु यजेति प्रथमस्वरेण प्रेष्यति इदं विष्णवऽइति त्यागः · तत इन्द्राग्निभ्यामनुब्रूहि जुह्वामुपस्तारः ऐन्द्राग्नस्य हविषो मध्यात्पूर्वार्धाच्चावदायाभिघार्यावदाने प्रत्यभिघार्योत्थायातिक्रम्याश्राव्येन्द्राग्नी यजेति सम्प्रेष्य मध्ये जुहोति इदमिन्द्राग्निभ्यामिति त्यागः ततः स्विष्टकृदादि ऐन्द्राग्नस्य प्राशित्रेडाव्यतिरिक्तं किमपि न भवति · व्यूहने अग्नेर्विष्णोरिन्द्राग्न्योरुज्जितिम् अग्निर्विष्णुरिन्द्राग्नी तमपनुदन्त्विति अत्राप्युपांशुयाजस्य देवताया विष्णोरुपांशूच्चारणम् · प्रस्तरहोमे इदमग्नये सोमायाग्नये विष्णवऽइन्द्राग्निभ्यां देवेभ्य इति विशेषः · अन्यत्सर्वं ससांनाय्यामावास्येष्टिवत् । सोमयाजिनो नियमेन सांनाय्यं भवति असोमयाजिनस्त्विछया सांनाय्यं भवति।

त्रिंशतं वर्षाण्येव दर्शपूर्णमासाभ्यां यागो भवति यावज्जीवं वा · दाक्षायणयागपक्षश्चेत् पञ्चदश वर्षाण्येव यावज्जीवं वा । उत्सर्गपक्षेऽपि यावज्जीवमग्निहोत्रं हूयतऽएव · अन्यान्यपि सर्वाणि कर्माणि भवन्त्येव ॥ ॥२॥

इति चतुर्थस्य द्वितीया कण्डिका ॥

आचार्येण सधर्मकौ दर्शपूर्णमासावुक्तौ । अथ तद्विकारानिष्टिपश्वादीन्वदिष्यन् सौर्यं चरुं निर्वपेदग्नीषोमीयमजमालभेतेत्येवमाद्यानां वैकृतीनां चोदनानां यजतिवनिरूपणपूर्वकं तदुपयुक्तान्सामान्यातिदेशविशेषातिदेशबाधान्विकृतिकालं[1] च निरूप्य दाक्षायणयज्ञं वक्ष्यति । ननु दाक्षायणयज्ञोऽनन्तरमतिदेशादि निरूपणीयम् तस्यापि गुणमात्रविकृतिर्दर्शपूर्णमासत्वेन प्रकृतित्वात् · सत्यम् · दाक्षायणयज्ञे पयस्या विद्यते अमावास्यायां पयस्या मैत्रावरुणीति (४.४.७) तस्याश्च सांनाय्यपयोविकारत्वादतिदेशादिनिरूपणाधीना तत्र पयोधर्माणां प्राप्तिः · तेन प्राग्दाक्षायणयज्ञादतिदेशादिनिरूपणं युक्तम्[2] । इदानीमिदं विचार्यते · सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः अथ बार्हस्पत्यं चरुं नैवारं सप्तदशशरावं निर्वपति (५.१.४.१२) अथ सारस्वतं चरुं निर्वपति (५.४.५.७) अथैतं वायवे नियुत्वते शुक्लं तूपरमालभेत (६.२.२.६) तत्र अग्नीषोमीयमजमालभेतेत्येवमाद्यासु वैकृतीषु चोदनासु किं व्रीहीनवहन्ति-व्रीहीन्प्रोक्षतीति-वद्यावदुक्तनिर्वापालम्भरूपसंस्कारमात्रविधिः उत यागविधिरिति · तत्र धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यादिति न्यायेन निर्वापालम्भमात्रं प्राप्नोतीत्यत आह ·

कर्मशब्दो द्रव्यदेवतायुक्तो यजतिः ॥ १ ॥ द्र॰ क॰ क्रियाशब्दः आख्यातप्रत्ययान्तो निर्वपत्यादिशब्दो यजतिः प्रत्येतव्यः यागो ज्ञेय इत्यर्थः न निर्वापालम्भादिरूपसंस्कारमात्रविधायकः · यजतिशब्दोऽत्र तदर्थयागपरः । एवं यागत्वे सिद्धेऽपि इदं संदिह्यते सौर्यं चरुं निर्वपेदग्नीषोमीयमजमालभेतेत्यादौ किं यागमात्रं भवति उत धर्मा अपि भवन्तीति · यदा च धर्मा भवन्तीति पक्षस्तदापि संदेहः किं पूर्णाहुतिसम्बन्धिनो धर्मा भवन्ति उताग्निहोत्रसम्बन्धिनः आहोस्विद्दर्शपूर्णमासयोः अथवा ज्योतिष्टोमस्येति अथवा दर्शपूर्णमासयोरेवेति । धर्माणामनाम्नानाद्यथाश्रुतं यागमात्रं कर्तव्यमिति प्राप्त आह ·

---

१) ? °क्तात्सा°बाधात् वि°२· २) दर्शपूर्णमासयोः सांनाय्यवतोऽसांनाय्यवतोश्चानुविधानं कृतम् इदानीं दाक्षायणगुणकयोः कर्तव्यम् · तत्र च पयस्या विद्यते सा च दधिपयोभ्यां भाव्यते · विकारत्वाच्च धर्मातिदेशं प्रत्यपेक्षा किमत्र दध्नो धर्मा उत पयस इति · अनेनातिदेशप्रसङ्गेन यावानतिदेशः स सर्वोऽभिधीयते तत्सर्वकत्वाच्च विशेषातिदेश ऊहो बाधश्चेति Karka.

दर्शपूर्णमासधर्मा इष्टिपशुषु सामर्थ्यात् ॥२॥ सौर्यादौ धर्मा भवन्ति न यागमात्रम् · एवमेतानि विधिवाक्यानि समर्थान्यर्थवन्ति सप्रयोजनानि भवन्ति अन्यथा साकाङ्क्षत्वादर्थप्रतिपादनाभावेन निरर्थकान्येव स्युः । तथा हि · सौर्येण यागेन ब्रह्मवर्चसं भावयेदित्यत्रांशत्रयवती भावना विधीयते किम् केन कथमिति · किमंशो ब्रह्मवर्चसम् केनांशः सौर्येणेति कथमंशस्तु वाक्यमध्ये नास्ति · तेन कथं भावयेदिति वाक्यं कथमंशसापेक्षम् · यच्च सापेक्षं भवति तदध्याहारेणानुषङ्गेण वा पूरयित्वा निराकाङ्क्षं कर्तव्यम् अन्यथा तस्यानर्थक्यापत्तेः न च वेदे मात्रामात्रस्य तदिष्यते · तस्मादत्र निराकाङ्क्षीकरणाय विध्यन्तेतिकर्तव्यतापरपर्यायः कथमंशोऽत्र कस्यचिदनुषञ्जनीय इति सिद्धे आह दर्श° र्थ्यादिति · सर्वासु इष्टिषु अग्नीषोमीये पशौ च दर्शपूर्णमासयोरेव धर्मा भवन्ति सामर्थ्यात् पूर्वोक्त एव हेतुरत्रापि योज्यः दर्शधर्मा एव सौर्यादिविधीनां शेषीभवितुं समर्थाः चरुपुरोडाशादयो ह्यवघातादिभिरेव सिध्यन्ति नाभिषवादिभिरिति । इष्टिपशुष्विति इष्टिषु सर्वासु अग्नीषोमीये पशौ च पश्वन्तरेषु ह्यग्नीषोमीयधर्मा भवन्ति ।

दर्शनाच्च ॥३॥ सावित्रेष्टौ प्रयाजानां दर्शनात् (१३.४.२.८) अग्नीषोमीये पशावुत्तराघारदर्शनात्[1] । तदेवं प्रकृतिवद्विकृतिः कर्तव्येत्येवंरूपेणानुमानिकवचनेन सर्वेष्टिषु दर्शधर्मा भवन्तीत्युक्ते अधुना तदपवादत्वेन प्रत्यक्षशब्देन धर्मप्राप्तिमाह ·

वैश्वदेवधर्माश्चातुर्मास्येषु वचनप्रवृत्तिभ्याम् ॥४॥ चातुर्मास्येषु चत्वारि पर्वाणि सन्ति वैश्वदेवम् वरुणप्रघासाः साकमेधाः शुनासीरीयं चेति · तत्र प्रथमे वैश्वदेवे पर्वणि दर्शपूर्णमासधर्मा भवन्ति ततोऽतिरिक्ता औपदेशिका अपि धर्मा भवन्ति प्राचीनप्रवणे त्रेधा बर्हिः कुशप्रस्वः प्रस्तरोऽहतवासाः पत्नी चेत्येवमादयः · तत्र वरुणप्रघासादिषु त्रिषु पर्वसु वैश्वदेवस्य धर्मा भवन्ति । कस्मात्

---

1) पशौ स उत्तरमाघा°समनक्तीति (३.७.४.७) तत्र उत्तराघारो न विधीयते किंतु प्रकृतितः प्राप्ते उत्तराघारे पश्वञ्जनं विधीयते Ss.

वचनात् इत्ययमुपदेशो हेतुश्च[1]। तत्रैव नान्यत्र मारुत्यानीकवतीसांतपनीयागृहमेधीयाक्रैडिनीयापित्र्यासु[2] अतश्च मारुत्यादिषु प्राकृतमेव बर्हिरेकधा संनद्धम् न त्रेधा प्रस्तरोऽपि प्राकृत एव न कुशप्रस्वः · प्रत्यक्षवचनातिदेशोऽयम्। प्रवृत्तेश्च श्रुतौ शुनासीरीये धर्मप्रवृत्तिदर्शनाच्च (२.६.३.३-४)।

सोमाच्चावभृथे सामप्रतिषेधात् ॥ ५ ॥ वरुणप्रघाससम्बन्धिन्यवभृथसंज्ञके कर्मणि सौत्रामणीदार्षद्वताख्यवभृथे च सोमात् सौमिकादवभृथाद्धर्मा भवन्ति। कुतः सामप्रतिषेधात् तत्र न साम गीयतऽइति (२.५.२.४६) सामगानस्य प्रतिषेधात् सामगानं च सौमिकावभृथऽएव विहितमस्ति तत्प्रतिषेधश्च तदैवोपपद्यते यदि सौमिकादवभृथाद्वारुणप्रघासिकावभृथे धर्मा भवेयुः। चकारो वचनप्रवृत्तिभ्यामित्यस्य (४) हेतोरनुकर्षणार्थः · उच्यतेऽभिधीयतेऽनेन शब्देनेति वचनं नामधेयमुच्यते अवभृथ इत्येवंरूपम् तेनावभृथ इति नामसामान्येन तत्र सौमिकादवभृथाद्धर्मप्रवृत्तिर्भवति · धर्मप्रवृत्तिरपि सामप्रतिषेधाज्ज्ञायते तस्य प्राप्तिपूर्वकत्वात् तेनोरुं हीति वाचनादि सर्वं तदीयं भवति प्रतिषिद्धवर्जम् · एवं कुण्डपायिनामयने मासमग्निहोत्रं जुह्वति दर्शपूर्णमासाभ्यां मासम् (२४.४.२४-२५) वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यादौ तत्र नामधेयाद्धर्मप्राप्तिर्ज्ञेया।

कणावत्पशौ न मन्त्रोपदेशात् ॥ ६ ॥ तयोऽएवासृक्पशोरिति (१.३.२.३५) वचनेन पशौ कणापासनवत्कपालेनाधोऽधः कृष्णाजिनं रुधिरापासनमाशङ्क्य निषेधति[3] पशौ कणावत् रुधिरापासनं न भवति। कुतः मन्त्रोपदेशात् यदि च तयोऽएवासृगित्यनेन सर्वस्याः कणापासनेतिकर्तव्यतायाः प्राप्तिः स्यात् तदा रक्षसां भागोऽसीति पुनर्मन्त्रोपदेशो न स्यात् मन्त्रस्यापि प्राप्तत्वात् · अस्ति च मन्त्रोपदेशः तयोऽएवासृक्पशो रक्षसां भागोऽसीति (१.३.२.३५) तस्माद्रुधिरापासनमात्रमेव भवति।

---

१) वचनादिति हेतुश्चायमुपदेशश्च · ततश्च यत्रैव वचनम् तत्रैव प्राप्तिः · प्रतिपर्व वचनं भवति अथैतान्येव पञ्च हवींष्यपि भवन्तीति (२.५.२.७) तानि चाग्नेयादीनि वैश्वदेविकानि पञ्च चोच्यन्ते तेषां चोपक्षीणत्वात्तद्धर्मकाणीति गम्यते · धर्मप्रवृत्तिं च दर्शयति शुनासीरीये अथैतान्येव पञ्च हवींष्यपि भवन्तीत्यभिधाय (२.६.३.४) तस्यावृन्नोपाकरत्युत्तरवेदिं न गृह्णन्ति पृषदाज्यं न मन्थन्त्यग्निमिति (२.६.३.३) प्रतिषेधति निषेधश्च प्राप्तिपूर्वको भवति अप्राप्तवाचोत्तरवेदिप्रतिषेधोऽनुवादकः Karka. २) मारुत्यनीकवतीसंतपनी° याक्रीडिनी°२. ३) अशेषक्रियाविषयं वचनमित्याशङ्कानिवृत्त्यर्थमुक्तम् Karka.

विशये लौकिकमयुक्तत्वात् ॥७॥ यत्र-यत्र कर्मणि विशयः[1] संशयो भवति किमत्र लौकिकं वस्तु ग्राह्यमुत वैदिकमिति तत्र लौकिकं ग्राह्यम्[2] लौकिकस्य (अग्नेः) कुत्रापि वाक्येनाविनियुक्तत्वात् इतरस्य (गार्हपत्यादेः) वचनेन कार्यान्तरविनियुक्तत्वात् ॥ इष्टिपशुषु दर्शपूर्णमासधर्मा भवन्तीत्युक्तम्(२) दर्शपूर्णमासयोश्चाग्नेयादयः षट् प्रधानयागाः · तत्रायं संदेहः किं यतः कुतश्चिदाग्नेयादेर्धर्मा भवन्ति उतास्मिन्नस्मादेवेति नियम इति · तत्र नियमकाराभावादनियमे प्राप्त ऽआह ·

विधिविशेषः कर्मण्येकद्विशब्दपरिमाणद्रव्यदेवतागुणसामान्येभ्यः ॥८॥ कर्मणि वैकृते प्रधानकर्मणि अस्मादेव प्राकृतात्प्रधानयागादस्मिन्वैकृते प्रधानकर्मणि धर्मा भवन्तीत्येवंविधो विधिविशेषो भवतीत्यर्थः । कुतः एक° न्येभ्यः · सामान्यशब्दः प्रत्येकमभिसम्बध्यते । एकद्वीति भावप्रधानो निर्देशः अतश्च एकत्वसामान्यात् द्वित्वसामान्यात् । यथासम्भवमेतेभ्यो हेतुभ्यो विशेषधर्माणां प्राप्तिर्भवति । तद्यथा । वैकृते एकदेवत्ये सौम्यसारस्वतपौष्णवारुणादौ यागे एकदेवत्यत्वेनावान्तरसामान्येन प्राकृताग्नेययागतः धर्मा भवन्ति · तेन सर्वेष्वेकदेवत्येषु चतुर्धाकरणाद्याग्नेयधर्मा भवन्ति · यद्यपि व्यक्तचोदनया[3] औषधद्रव्यैकत्वादिसामान्यमग्नीषोमीयादिष्वप्यस्ति तथाप्याग्नेये एकदेवत्यत्वमवान्तरसामान्यमधिकम् · तेनैवं नियमः आग्नेयादेवेति नाग्नीषोमीयादेरिति · सदृशं हि दृष्ट्वा सदृशे प्रतीतिर्भवति तत्सादृश्यात्तद्धर्मत्वमनुमीयते । तथा द्विदेवत्यत्वसामान्यात् आग्नावैष्णवेऽग्नीषोमीयस्य धर्मा भवन्ति · ननु द्विदेवत्यत्वसामान्यमैन्द्राग्नेऽपि विद्यते ततश्चानियमो भविष्यत्यग्नीषोमीयादैन्द्राग्नाद्वेति · मैवम् · शब्दपरिमाणसामान्यमधिकमग्नीषोमीये ऐन्द्राग्नात् । शब्दपरिमाणसामान्यं च तुल्यसंख्याक्षरत्वम्[4] · अथ आग्नावैष्णवाग्नीषोमीययोरुभयोः पञ्चाक्षरत्वरूपावान्तरसामान्यात् अग्नीषोमीयादेवाग्नावैष्णवे धर्मा भवन्ति नैन्द्राग्नादिति · अनेनैव शब्दपरिमाणसामान्येन

1) विषयः २· 2) उभयाभावऽउल्कु°ष्मतोरिति (८·२·१०) · तथा गर्गत्रिरात्रे आऽध्यदोहे सामस्वग्निमुपसमाधाय स्तुवते Ss. यथाग्नीषोमीये पशौ अस्तमिते सूर्ये वसतीवरीग्रहणार्थमुल्कुषीकरणे लौकिकमग्निद्रव्यम् न वैदिकम् Mahád. 3) ? व्यक्तानोदया २· 4) अविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयादिति यास्कोक्तेः Mahád.

मारुतऽऐन्द्राग्नस्य धर्मा भवन्ति उभयोरपि त्र्यक्षरत्वात् नाग्नीषोमीयात्। तथा द्रव्यसामान्यादपि तत्सदृशे वैकृते द्रव्यान्तरे धर्मप्राप्तिर्भवति · यथा ओषधसामान्यात्पुरोडाशस्य धर्माश्चरुधानामन्थादिषु भवन्ति सांनाय्याच्च सांनाय्यपयस्यादिषु द्रवत्वसामान्यात् आज्यधर्मा मधूदकादिषु छागधर्मा मेषादिषु। देवतासामान्यादपि धर्मा भवन्ति · यथाग्नेये आग्नेयस्य ऐन्द्राग्ने ऐन्द्राग्नस्येति · नन्वेतत्पुनरुक्तम् देवतैकत्वादिना सिद्धत्वात् सत्यम् द्रव्यदेवताविरोधे द्रव्यस्य समवायादिति वक्ष्यति (१) तदर्थं देवतैक्यादित्युच्यते अन्यथा द्रव्यदेवताविरोधऽइत्येतस्य वक्तुमशक्यत्वात्। गुणसामान्यादपि वैकृते प्रधाने धर्मप्रवृत्तिर्भवति · यथा प्राकृतादुपांशुयाजाद्विकृते सावित्रसौर्याग्युपांशुयागे तेन प्रणवो येयजामहो वषट्कारः सम्प्रैषाः प्रैषाश्चोच्चैरुपांशुरुविःषु देवतानामधेयं चोपांश्वित्यादयो (शाङ्खायन° १.१.३६) धर्मास्तेषु भवन्ति · यथा वैश्वानरयागादौ पौर्णमास्यां क्रियमाणे पौर्णमासाग्नेयधर्मा उदिते-आरम्भादयो भवन्ति अमावास्यायां क्रियमाणे चामावास्याग्नेयधर्मा अनुदितारम्भादयो भवन्ति कालो ह्यत्र गुण इति कालस्यापि कर्मार्थत्वेन परार्थत्वादङ्गत्वं भवत्येव तदुक्तं जैमिनिना (३.१.२) शेषः परार्थत्वादिति · अथवा इदमुदाहरणम् द्वादशकपाले वैश्वदेवे अनेकदेवतात्वसामान्येनाग्नीषोमीयधर्मा ऐन्द्राग्नधर्मा वानियमेन प्राप्नुवन्ति तत्र द्वादशकपालत्वरूपगुणसामान्यदैन्द्राग्नस्यैव नाग्नीषोमीयस्येति शब्दपरिमाणसामान्यं त्वत्रैकस्यापि नास्ति॥ अथ द्रव्यदेवताविरोधे चिन्त्यते[1]· यथा आतिथ्यायां वैष्णवो नवकपालः पुरोडाशो विहितोऽस्ति तत्र द्रव्यसामान्यात्पौरोडाशिका धर्माः प्राप्नुवन्ति देवतासामान्याच्च वैष्णवे उपांशुयाजस्य धर्मा इति · अनियमे प्राप्ते आह ·

नियमो द्रव्यदेवताविरोधे द्रव्यस्य समवायात्॥९॥ द्रव्यदेवताविरोधे द्रव्यस्यैव द्रव्यसामान्यादेव धर्मा भवन्तीति नियमः द्रव्यसामान्यमेव बलीय इति। कुतः द्रव्यस्य यागे समवायात् द्रव्यं हि स्वरूपेण त्यज्यमानं (यागे समवैति) यागं निष्पादयति देवता तूद्देशमात्रेणाग्नयऽइत्याद्यक्षरमात्रोच्चारणेन तत्रोपकरोति न द्रव्यवत्स्वरूपेण · तेन यागस्य द्रव्यं संनिकृष्टम् देवता तु

[1] किं द्रव्यसामान्येन विध्यन्तनियमोऽस्तु उत देवतासामान्येन Karka.

विप्रकृष्टा तेन द्रव्यं बलवत्[1] · अथवा वैष्णवादौ द्रव्यस्य हृदये विशेष्यत्वेन समवायो देवतायाश्च विशेषणत्वेन विशेषणविशेष्ययोर्मध्ये विशेष्यमेव बलीयः ॥ दाह्यायणे श्रूयते मैत्रावरुणी पयस्येति (२.४.४.१०) तथा चातुर्मास्येषु वैश्वदेवी पयस्येति (५.१.१८) पयस्ये वारुणी मारुती चेति (५.४.२३) · सा च पयस्या दधिपयोभ्यां निष्पाद्यते · तत्र संदेहः किमस्यामुभयोर्धर्मा उत दध्नः अथवा पयस एवेति · तत्राद्यं पक्षमुद्भावयति ·

आमिक्षायामुभयोस्तन्निर्वृत्तेः ॥१०॥ आमिक्षा पयस्येति चानर्थान्तरम् · आमिक्षायां पयस्यायामुभयोर्दधिपयसोर्धर्मा भवन्ति । कुतः तन्निर्वृत्तेः यतस्ताभ्यां निर्वर्त्यते निष्पाद्यते । तं पक्षं दूषयति ·

नैकचोदनात् ॥११॥ पूर्वं यदुक्तम् तन्न · कुतः एकचोदनात् यत इयमेकचोदना मैत्रावरुण्यामिक्षेति · एकं हि पयस्याद्रव्यं विधीयते एकवचनश्रवणात् · एकस्य चोभयधर्मत्वं न सम्भवति विरोधात् दधिधर्मत्वे हि अपरिवासितया शाखया वत्सापाकरणं प्राप्नोति पयोधर्मत्वे तु परिवासितया[2] । अथ द्वितीयं पक्षमुद्भावयति ·

दध्नः संघातात् ॥१२॥ संघातः काठिन्यम् कठिनत्वसामान्यात् । सिद्धान्तमाह ·

पयसस्तद्भावात् ॥१३॥ आमिक्षायां पयस एव धर्माः न दध्नः · कुतः तद्भावात् पयसो ह्यामिक्षा भवति । ननु दध्नोऽपि उभयोस्तन्निर्वृत्तेरिति (१०) तन्न घनत्वसम्पादनायैव दधिनिनयनं क्रियते पयस्या तु पयस एव भवति ॥ अथाग्नीषोमीये पशौ देवतासामान्यात्प्राकृताग्नीषोमीयपुरोडाशधर्मप्राप्तेराह ·

पशोः सांनाय्यस्य तदुक्तम् ॥१४॥ अग्नीषोमीयस्य पशोः सांनाय्यस्य धर्मा भवन्ति · तदुक्तम् नियमो° मवायादिति (१) । अत्र कथं द्रव्यदेवतयोर्विरोधः इह हि पशुद्रव्यं विधीयते तच्च प्रकृतौ नास्ति · उच्यते · पशुस्तावत्य-

---

१) चरु सांनाय्यालाभऽइत्यत्र (२५.५.६) द्रव्यसामान्येन पुरोडाशस्यैव न देवतासामान्यात्स्थानापत्त्या वा सांनाय्यस्येति सिद्धम् Ss.　२) पयोधर्मत्वे दोहनचतुष्टयस्यासादनम् न दधिधर्मत्वे Ss.

शोरुत्पद्यते पयोऽपि पशोरुत्पद्यते अतः पशुद्रव्ये प्रतीते सांनाय्यं बुद्धावागच्छति अतः पशुद्रव्यं सांनाय्यधर्माणां प्रापकम् अग्नीषोमदेवता तु अग्नीषोमीयपुरोडाशस्य · अतः करणादेव अयमपि द्रव्यदेवताविरोध एव भवति · अतः साधूक्तम् तदुक्तमिति न च पुनरुक्तम् · तत्र हि वैष्णवादौ साक्षात्प्राकृतमेव पुरोडाशादिद्रव्यं धर्माणां प्रापकम् इह तु [1] प्राकृतसांनाय्यद्रव्यसदृशं पशुद्रव्यमिति · व्यवधानात्पुनः सूत्रारम्भः [2]।

प्रायश्चित्तश्रुतेश्च ॥१५॥ पशूखा चेत्स्रवेत्सांनाय्योखा वा तामभिमन्त्रयेतेति (२५.१.१४) प्रायश्चित्तश्रुतेः · अस्यां हि श्रुतौ पशावुखा दृश्यते सा च तदैवोपपद्यते यदि पशौ सांनाय्यधर्मा भवन्ति नान्यथा [3]। सांनाय्यं द्विविधम् दधि च पयश्च · तत्र संघातसामान्यात्पशौ दध्नो धर्मप्राप्तौ आह ·

पयसः कालानन्तर्यधर्मानुग्रहेभ्यः ॥१६॥ पशौ पयस एव धर्माः न दध्नः । कुतः काला° भ्यः । कालात् कालसामान्यं हि श्रूयते तस्माद्यदा योषा रेतो धत्तेऽथ पयो धत्तऽइति तत्र गर्भधारणं पयोधारणं चैककालमुच्यते · तथा यदा पशुर्जायतेऽथ पयो जायतऽइति · अथवा पशुः सद्यस्कालो य इ-ष्ट्येत्यादिवाक्यात् पयोऽपि सद्यस्कालम् न दधिवद्द्व्यहनिष्पाद्यम् । आनन्तर्यात् पशुरपि गोरजादेर्वा पशोः साक्षादुत्पद्यते पयश्च · दधि तु पयस उत्पद्यते न साक्षात्पशोः · अतः पशोः पयोऽनन्तरम् दधि तु पयसा व्यवहितम् · तेनानन्तर्यात्पशौ पयोविध्यन्त एव भवति । धर्मानुग्रहाच्च पयोधर्मत्वे सति पशुपात्राणां वपाश्रपणीशूलोखानामासादनप्रोक्षणादीनां प्राकृतानां धर्माणामनुग्रहः कृतो भवति न दधिधर्मत्वे · ततश्च वपा° खानामासादनप्रोक्षणे द्यौः स्थ पृथिवी स्थ इत्यूहितेन मन्त्रेण वपाश्रपण्योरादानम् विरोधादर्थलोपाच्चा-

---

1) हि२· 2) सांनाय्यधर्माणां पशुद्रव्यं पर्यवस्थापकम् देवता पौरोडाशिकानाम् अतो द्रव्यदेवताविरोध एवायम् · ननु तेनैव गतार्थत्वादवाच्यमेतत् न तत्राव्यवहितं द्रव्यम् इह पशुद्रव्येण व्यवधानादारम्भः Karka. 3) ननु विपरीतमेतल्लिङ्गम् सांनाय्यविध्यन्ते हि सति तदुखास्रुत्यभिमन्त्रणं पशूखायां प्राप्नोत्येव विधाने तु सुतरामप्राप्तिर्गम्यते · सत्यम् · सांनाय्ये तु (व Cod.) प्रधानस्य स्रुतिः पशावुपसर्जनभूतस्योदकस्येति तेन द्रव्यान्यत्वात्पुनरुच्यते Karka.

धिश्रयणाभावः अन्वारब्धे यजमाने वपाप्रोर्णवनम् वपाश्रपण्योः स्थिताया एव वपाया वेद्यामासादनम् इत्यादि ॥ दर्श॰ मर्थ्यादित्यनेन (२) आनुमानिकवचनेन प्राकृतं पदार्थमात्रं विकृतौ भवतीत्युक्तम् तेन प्रकृतौ या यद्दकालता कर्मण उक्ता सापि विकृतौ प्राप्नोत्यत आह ·

सद्यस्त्वं काशकृत्स्निः ॥१७॥ विकृतीनां सद्यःकालत्वं ब्रवीति · य इष्ट्या पशुनाग्रयणेन सोमेन यक्ष्यमाणः स पौर्णमास्याममावास्यायां वा यजेतेति वचनात् ।

अनुवादः पूर्वस्येति वात्स्यबादरी ॥१८॥ वात्स्यश्च वादरिश्च वात्स्यवादरी · य इष्ट्येत्यनेन वाक्येन पौर्णमास्याममावास्यायां वा विकृतीनामनुष्ठानमुच्यते तच्च प्रकृतितः प्राप्तमेव · अतः कारणाद्य इष्ट्येत्याद्यनुवाद एव पूर्वस्य प्रकृतितः प्राप्तस्य नापूर्वविधिरिति । स्थितं तावदसिद्धान्तितमेतदधिकरणम्[1] अतश्च अन्यच्चिन्त्यते[2] ·

स्थानापत्तेर्द्रव्येषु धर्मलाभोऽविप्रतिषिद्धः ॥१९॥ श्रूयते मौद्गं चरुं निर्वपेच्छ्रियैकाम इति बार्हस्पत्यं चरुं नैवारं सप्तदशशरावं निर्वपति (५.१.४.१२) रुद्राय पशुपतये रौद्रं गावीधुकं चरुं निर्वपति (५.३.३.७) · तत्र किं मुद्गादिषु प्राकृतद्रव्यस्थानापन्नेषु प्राकृतव्रीह्यादिद्रव्यधर्मा भवन्ति उत न भवन्ति । तदर्थं चेदं चिन्त्यते किं प्रकृतौ धर्माणां व्रीहिस्वरूपं प्रयोजकम् अपूर्वसाधनत्वं वा[3] · किं चातः · यदि स्वरूपं प्रयोजकम् तदा स्वरूपस्य विकृतौ मुद्गादिष्वभावान्न तद्धर्मप्राप्तिः अपूर्वसाधनत्वस्य धर्मप्रयोजकत्वे तस्य मुद्गादिष्वपि भावात्तत्प्रयुक्तानां धर्माणामपि प्राप्तिर्भवतीति । तत्र व्रीहीनवहन्ति व्रीहीन्प्रोक्षतीति व्रीहिसंयोगेन धर्माणां श्रवणान्मुद्गादिषु न भवन्तीति प्राप्ते आह द्रव्येषु वैकृतेषु मुद्गादिषु प्राकृतद्रव्यधर्मलाभो आसादनग्रहणप्रोक्षणाकण्डनादिर्भवति स्थानापत्तेः

---

१) See at २५. २) विकृतिविषयत्वेन पौर्णमासो वामावास्या वोच्यते · तच्च प्रकृतितोऽपि चोदकेन प्राप्तमेवातोऽनुवादोऽयमिति (प्त एवा Cod.) · स्थितं तावदपर्यवसितम् अन्यदन्तरा (र Cod.) चिन्त्यते · यन्नाम प्राकृतस्य द्रव्यस्य कार्ये वैकृतमन्यद्द्रव्यान्तरं विधीयते यथा मौद्गं चरुं निर्वपेच्छ्रियै श्रीकाम इति किं तत्प्राकृतद्रव्यधर्माँल्लभते उत न लभतऽइति Karka. ३) ? प्रयोजनम॰२.

कार्यापत्तेः वैकृतस्य द्रव्यस्य प्राकृतद्रव्यकार्यापन्नत्वात् यतः प्रकृतौ व्रीहीणामपूर्वसाधनत्वं धर्माणां प्रयोजकम् न व्रीहिस्वरूपम् व्रीहिस्वरूपस्य प्रयोजकत्वे धर्माणामानर्थक्यापत्तेः विना संस्कारान्व्रीहित्वस्यासिद्धत्वात् अतो व्रीहीन्प्रोक्षतीत्यादौ अपूर्वसाधनं प्रोक्षतीत्यर्थः · अपूर्वसाधनत्वं च वैकृतेष्वपि मुद्गेष्वस्तीति भवत्येव प्राकृतधर्मलाभः · कीदृशः अविप्रतिषिद्धः[1] यथा परिधौ पशुनियोजनमित्यत्र (२२.७.५) परिधेर्यूपकार्यापन्नस्य यूपधर्मप्राप्तौ उच्छ्रयणं न भवति परिधानेन विप्रतिषेधात् । एवं वैकृते द्रव्ये प्राकृतद्रव्यकार्यापन्ने प्राकृतद्रव्यधर्माः सर्वे भवन्तीत्युक्तम् · तेन प्राकृतद्रव्यसम्बन्धिमन्त्रैरपि तस्याभिधानं प्राप्तम् · तत्र किमूहितेन उत नोहितेन यथाश्रुतेन · विशेषानुपदेशाद्यथाश्रुतेनानूहितेनाभिधाने प्राप्तऽआह ·

यथार्थमूहश्चोदिते ॥२०॥[2] चोदिते विहिते वैकृते द्रव्ये यथार्थमूहः विपरिणामः यो-यो वैकृतो यथार्थः यस्यां विकृतौ यः प्राकृतद्रव्यस्थानापन्नो वैकृतोऽर्थः तस्यां तद्वाचिपदप्रयोगः कार्यः · यथा प्रकृतौ अग्नीषोमाभ्यां छागस्य वपाया मेदस इति (३.८.२.२६) छागस्य यागसाधनत्वे तस्याभिधानं कृतम् विकृतौ च सारस्वतो मेष ऐन्द्र ऋषभ इत्यादौ मेषर्षभयोर्यागसाधनत्वेन विधानात् छागस्य इत्यस्य स्थाने मेषस्य ऋषभस्य इति · चोदितऽइति विशेषोपादानान्मुख्यसादृश्येन गृहीते प्रतिनिधिभूते मेषादावूहो न भवति · तथा चोक्तम् (१.४.१) शब्दे अविप्रतिपत्तिरिति । एवं सर्वत्रोहे प्राप्ते क्वचिदपवादमाह ·

न प्रकृतावपूर्वत्वात् ॥२१॥ प्रकृतौ पत्नीं संनह्य (२.६.३५) पत्नि वाचं विसृजस्व (७.४.१४) इत्येकवचनमेकपत्नीकप्रयोगे उपपन्नार्थम् अनेकपत्नीकप्रयोगे ऊहितव्यम् न वेति संदेहे निर्णीयते · प्रकृतौ ऊहो न भवति अपूर्वत्वात्प्रकृतेः यतः प्रकृतेरन्या प्रकृतिर्नास्ति · अतोऽनेकपत्नीकेऽपि पत्नीमिति · एवं पवित्रे स्थ इत्येतदपि पवित्रत्रयपक्षे (२.३.३२) । प्रकृतिवद्विकृतिः कर्तव्येत्यनेन प्रकृतितः सर्वे धर्मा विकृतौ प्राप्नुवन्ति · तत्र केषांचिद्धर्माणां बाधमाह ·

---

१) प्राकृतद्रव्यधर्मो वैकृतेन धर्मेण न विरुध्यते Ss. २) शाक्त्यानामयने तरसमये पुरोडाशे धान्यमसीति स्थाने तरसमसीत्यूहः Mahád.

विकृतौ वचनार्थलोपविरोधेभ्योऽप्रवृत्तिः ॥ २२ ॥ विकृतौ प्राकृतधर्माणां वचनादप्रवृत्तिर्भवति न प्रस्तरं गृह्णाति न होतारं प्रवृ॰ न प्राशित्रमित्यादौ (२.६.१.१४-२३-३३) · तथा अर्थलोपादपि यथा मुद्गेषु कण्डनस्य · विरोधादपि यथा चरौ पेषणमभिवासनं च ।

परार्थोत्पत्तेस्तदभावेऽभावः ॥ २३ ॥ [1] परार्थमन्यार्थमुत्पत्तिर्यस्यासौ परार्थोत्पत्तिः · तस्य परस्याभावे तस्य परार्थोत्पत्तेरप्यभावः । यथा प्रकृतौ तण्डुलनिष्पत्तिनिमित्तकणानामुत्पत्तिः परार्था तण्डुलार्था · अतः परार्थोत्पत्तेः कणादेः (तदभावे) तस्य परस्य तण्डुलादेरभावे पयस्यादौ (अभावः) तस्यापि कणादेरभावो भवति तदभावाच्च तदर्थस्यापासनस्याप्यभावः । एवं सर्वत्र · क्वचिद्विशेषमाह ·

चोदितत्वाद्वा भावः ॥ २४ ॥ यत्र परार्थोत्पन्नं द्रव्यं क्वचित्कार्यान्तरसाधनत्वेन चोदितं भवति तत्र परस्याभावेऽपि परार्थोत्पत्तेर्द्रव्यस्य भावो भवति · तद्यथा यूपशकलेन शुक्रं संमार्ष्टीति [2] यूपे तक्ष्यमाणे उत्पन्नं शकलम् तस्य ग्रहसंमार्गसाधनत्वेन विहितत्वाद्यूपाभावेऽपि शकलमात्रं गृह्यते संमार्गसिद्ध्यर्थम् · यतः शकलादिद्रव्यं क्रियार्थम् तेन क्रिया प्रधानभूता तदङ्गभूतं शकलमात्रं स्वसिद्ध्यर्थमाक्षिपति · यत्र तु क्रिया द्रव्यार्था तत्र द्रव्यस्य साधनभूतस्याभावेऽङ्गभूतायाः क्रियाया अभाव एव प्रयुज्यते ॥ स्थितादुत्तरमुच्यते · तत्रैवं पूर्वपक्षः कृतोऽस्ति पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेत्येवमादिना प्रकृतिविहितस्य प्रतिपल्लक्षणस्य यागकालस्य विकृतावपि प्राप्तत्वाच्च इष्येति वाक्ये अमावास्यायां पौर्णमास्यामित्यनुवाद एव नापूर्वकालविधिरिति (१८) · तत्र सिद्धान्तमाह ·

न विपक्षे क्रियाः स्युः समभिव्याहारात् ॥ २५ ॥ [3] विपक्षशब्देन प्रति-

---

1) पुरोडाशश्रपणार्थं कपालोपधानम् पुरोडाशाभावे कपालोपधानस्याप्यभावः Mahád.
2) See ४.२.१.१४. 3) पक्षः शुक्लपक्षः तस्य प्रतिपक्षो विपक्षो कृष्णपक्षः स एव विपक्षः कृष्णपक्षः · समभिव्याहारात् शुक्लपक्षे पञ्चमीं सप्तमीं वा प्रसुत इति (७.१.२६) अष्टम्यां नवम्यां वा फाल्गुनीशुक्लस्येत्यादि (२०.१.२) Mahád. — विपक्षे प्रतिपदि Ss. — किंचिद्विगतं पक्षस्येति विपक्षः प्रतिपदुच्यते · तत्र च वैकृत्यः क्रिया न स्युः क्व तर्हि प-

पद्युच्यते · प्रतिपदि वैकृत्यः क्रियाः न स्युः किं तर्हि पौर्णमास्याममावास्यायामेव स्युः । कुतः समभिव्याहारात् समभिव्याहारो वाक्यम् तस्मात् न इष्येत्यादिवाक्यात् । ननु प्राकृतस्यैव कालस्यायमनुवाद इत्युक्तम् (१८) नानुवादः अनुवादे हि वाक्यानर्थक्यमेव स्यात् प्रवृत्तिविशेष्यकत्वाभावात् पौर्णमास्यमावास्याशब्दयोर्लक्षणाप्रसङ्गाच्च · अनुवादे हि पौर्णमास्यमावास्याशब्देन गौण्या वृत्त्या प्रतिपल्लक्ष्यते तथा च श्रुतार्थपरित्यागो भवति न चैतदुपपन्नम् यल्लक्षणानुरोधेन श्रुतिर्बाध्यते · किं च सोमस्येदमेव कालविधानम् न हि वाक्यान्तरेण तस्य कालो विहितोऽस्ति यस्यायमनुवाद इत्युच्यते · अतोऽपि नानुवादः । य इष्ट्येत्यत्र वाक्ये इष्टिग्रहणेनैवाग्रयणग्रहणे सिद्धेऽनिष्टिरूपस्याग्रयणस्य पौर्णमास्यमावास्यालक्षणाकालविधानाय पृथगाग्रयणग्रहणम् तेन दर्शपूर्णमासानीजानो दक्षिणाग्निपक्वचातुष्प्राश्यं ब्राह्मणान्भोजयेदित्यादावनिष्टिरूपेऽपि (४.६.१०) आग्रयणेऽयं कालः सिद्धो भवति ॥ ॥ तृतीया कण्डिका ॥ ३ ॥

अथ पद्धतिः ॥

ऐन्द्राग्नं द्वादशकपालं निर्वपेत् सौर्यं चरुं निर्वपेत् अग्नीषोमीयं पशुमालभेतेत्येवमादिर्यत्र द्रव्यदेवतायुक्तः कर्मशब्दः आख्यातप्रत्ययान्तः शब्दो वेदवाक्ये दृश्यते स सर्वोऽपि यज्ञतिर्यागो ज्ञेयः । सर्वास्विष्टिषु अग्नीषोमीये पशौ च दर्शपूर्णमासयोर्धर्मा भवन्ति । चातुर्मास्येषु वैश्वदेवपर्वणो धर्मा वरुणप्रघासमहाहविःशुनासीरीयेष्वेव भवन्ति · तत्रैव अथैतान्येव पञ्च हवींषि भवन्तीति वचनात् अतो मारुत्यां पयस्यायामानीकवत्यादिषु [1] च न भवन्ति · सौमिकादवभृथाद्वारुणप्रघासिकावभृथे धर्मा भवन्ति । उल्मुकमेवादायोपपरेयादित्यादौ (३.१.२१) यत्र संदेहो जायते किमत्र लौकिकोऽग्निर्ग्राह्य उत वैदिक आहवनीया-

---

ज्ञात्तऽएव स्युः · कुतः पौर्णमास्याममावास्यायां वा यजेतेति वचनात् । ननूक्तम् अयमनुवाद इति (१८) · नानुवादः · अनुवादे हि पौर्णमासीशब्देन गौण्या वृत्त्या प्रतिपल्लक्ष्यते तत्र श्रुतिः परित्यक्ता भवति न चैतद्युक्तम् यल्लक्षणानुरोधेन श्रुतिर्बाध्यते · सोमस्य चैतदेव कालविधानम् य इष्ट्या सोमेन पशुनाग्रयणेन यक्ष्यमाणः स पौर्णमास्याममावास्यायां वा यजेतेति न ह्यन्यत्र सोमस्य पौर्णमास्यमावास्ये विहिते अतोऽपि नानुवादः Karka.

1) ? °यामनीक° १.

दिरिति तत्र सर्वत्र लौकिक एवाग्निरविनियुक्तत्वाद्ग्राह्यः · एवमन्यत्राप्यूह्यम् ॥

वैकृते कर्मण्येकदेवत्ये सर्वत्राग्नेयधर्मा भवन्ति अनेकदेवत्ये त्वग्नीषोमीयैन्द्राग्नादेः । तत्राप्याग्नावैष्णवादौ अग्नीषोमीयादैन्द्राग्नाद्वेति संदेहे उभयोः पञ्चाक्षरत्वलक्षणस्य शब्दपरिमाणस्य साम्यादग्नीषोमीयस्यैव नैन्द्राग्नस्येति निर्धार्यते तथा मारुतेष्वेवं संदेहे शब्दपरिमाणादैन्द्राग्नस्यैवेति निर्धार्यते । द्रव्यसामान्येनापि धर्मप्रवृत्तिर्भवति यथा पुरोडाशचरुधानासक्त्वादौ पुरोडाशस्य सांनाय्ये सांनाय्यस्य आज्ये आज्यस्येति । देवतागुणस्योपांशुत्वादेः साम्ये धर्मप्रवृत्तिर्भवति यथोपांशुयाजे उपांशुयाजस्य । ऐन्द्रपुरोडाशादौ देवतासामान्यात्सांनाय्यविध्यन्तः प्राप्नोति द्रव्यसामान्यात्पुरोडाशस्येति · एवं द्रव्यदेवताविरोधे द्रव्यसामान्यादेव धर्मा भवन्ति न देवतासामान्यादिति । पयस्यायां च पयस एव धर्मा भवन्ति न दध्नः · अतश्चातुर्मास्यादौ परिवासितया शाखया पवित्रबन्धनानन्तरं वत्सापाकरणं दोहनचतुष्टयासादनं च भवति । पशावपि पयस एव धर्मा भवन्ति न दध्नः अत एव सांनाय्योखास्थानापन्नानां वपाश्रपणीशूलोखानामासादनप्रोक्षणे भवतः । द्रव्येषु स्थानापत्तेर्धर्मा भवन्ति · यथा श्यामाकानां व्रीहियवस्थानापत्तेस्तद्धर्माणां ग्रहणासादनप्रोक्षणकण्डनादीनां प्रवृत्तिः · यथा च ऐन्द्रो वृष्णिः षोडशिनीत्यत्र (१.८.४) वृष्णेर्मेषस्य छागस्थानापन्नत्वात्तद्धर्माणामुपाकरणादीनां प्रवृत्तिर्भवति । प्राकृतद्रव्यस्थानापन्नस्यापि ये स्थानिनो धर्मा विरुध्यन्ते स्थानापन्ने द्रव्ये ते न भवन्ति यथा परिधौ पशुनियोजनमित्यत्र (२२.७.५) परिधेर्यूपस्थानापन्नस्यापि तक्षणाष्टाश्रिकरणादयो यूपधर्मा न भवन्ति विरुद्धत्वात् । विकृतौ यत्र प्राकृतद्रव्यदेवतादेः स्थानेऽन्यद्रव्यदेवतादि विधीयते तत्र प्राकृतमन्त्राणां यथार्थमूहो भवति यथा-यथा तं विकृतिविहितमर्थं प्रकाशयन्ति तथा-तथोहः कर्तव्यः · यथा ऐन्द्राग्नादौ अग्नये जुष्टमित्यस्य प्राकृतस्य मन्त्रस्येन्द्राग्निभ्यां जुष्टमित्यूहः · यथा ऐन्द्रो वृष्णिरित्यत्राग्नीषोमाभ्यां छागस्येत्यस्य (३.८.२.२६) मन्त्रस्य इन्द्राय मेषस्येत्यूहः · एवं सर्वत्र ज्ञेयम् । प्रकृतौ मन्त्राणामूहो न भवति प्रकृतेरपूर्वत्वात् · यथा एकपत्नीके प्रयोगे पत्नि७ संनह्येत्येकवचनान्तो (२.६.३५) मन्त्रो यथार्थः अनेकपत्नीकप्रयोगेऽप्येकवचनान्त एव प्र-

युज्यते नोह्यते · तथा पवित्रे स्थ इत्यविकृत एव (२.३.३२) पवित्रत्रयपत्नेऽपि प्रयुज्यते न पवित्राणि स्थेत्येवमूह्यते । विकृतौ वचनात्प्राकृतधर्मा न भवन्ति · यथा पितृयज्ञे नार्षेयं वृणीते न होतारम् · यथा शुनासीरीये न मन्यत्यग्निमिति (२.५.३.३) । अर्थलोपात्प्रयोजनलोपादपि प्राकृता धर्मा न भवन्ति · यथा नैवारे चरौ कण्डनस्य प्रकृतितः प्राप्तस्यापि प्रयोजनाभावादभावः यथा चरौ प्रथनाभिमर्शनसंयवनादेः यथा च पयस्यादौ कृष्णाजिनोलूखलमुसलादेरासादनादेः । तथा विरोधादपि प्राकृतधर्माणां विकृतावप्रवृत्तिर्भवति · यथा चरौ पेषणस्याभिवासनस्य च दध्युपसर्जनीनामधिश्रयणस्य च । यच्च प्रकृतौ परार्थमुत्पन्नं भवति विकृतौ तस्य परस्याभावे तस्याप्यभावो भवति · यथा प्रकृतौ प्रतिपत्तिकर्मणां परार्था प्रतिपाद्यद्रव्यार्था उत्पत्तिरस्ति अतो विकृतौ परस्य प्रतिपाद्यद्रव्यस्याभावे द्रव्यकर्मणामप्यभावो भवति । यत्र तु परार्थोत्पन्नं द्रव्यं क्वचित्कार्यान्तरसाधनत्वेन विहितं भवति तत्र परस्याभावेऽपि परार्थोत्पन्नस्य भावो भवति परार्थोत्पन्नेन द्रव्येण यत्कार्यम् तदन्येनापि येन केनचित्कर्तव्यमित्यर्थः · तद्यथा यूपशकलेन शुक्रं संमार्ष्टीति यूपार्थं यूपे तक्ष्यमाण उत्पन्नं शकलम् यूपाभावे तत्सम्बन्धिशकलाभावेऽपि ग्रहसंमार्गसाधनत्वेन विहितत्वाद्येन केनचिच्छकलेन शुक्रसंमार्जनं कर्तव्यम् · तत्रेदं रहस्यम् यत्र परार्थोत्पन्नं द्रव्यं क्रियार्थम् तत्र क्रिया प्रधानभूता स्वसिद्ध्यर्थं द्रव्यान्तरमाक्षिपति यत्र तु[1] क्रिया द्रव्यार्था तत्र द्रव्याभावे क्रियाया अभाव एव भवति । य इष्ट्वा पशुनाग्रयणेन सोमेन वा यक्ष्यमाणः सोऽमावास्यायां पौर्णमास्यां यजेतेत्यनेन वाक्येन सर्वविकृतीनां साङ्गानां मुख्यायां पौर्णमास्याममावास्यायां च सद्योऽनुष्ठानं विधीयते · तेन सर्वा विकृतयः सद्यस्काला एव भवन्ति न प्रकृतिवद्व्यहकालाः । प्राकृतकालस्यैवायं य इष्ट्वेत्यनुवाद इति वात्स्यबादरिमतनिराकरणार्थं न विपन्ने क्रियाः स्युरिति सूत्रम् · विपन्ने प्रतिपदि वैकृत्यः क्रिया न स्युः कस्मात् समभिव्याहारात् य इष्ट्वेत्यादिवाक्यात् · ननु प्राकृतकालस्यैवायमनुवाद इत्युक्तम् नानुवादः अनुवादे हि वाक्यमनर्थकमेव भवेत् प्रवृ-

1) ? न१.

त्तिविशेषकरत्वाभावात् पौर्णमास्यमावास्याशब्दयोर्लक्षणाप्रसङ्गाच्च　न च मुख्यार्थे सम्भवति सा न्याय्या · किं च　सोमस्येदमेव कालविधानम् न ह्यन्येन वाक्येन सोमस्य कालो विहितोऽस्ति　तस्मादपि अपूर्वविधिरेवायम् नानुवादः · अत्रेष्टिग्रहणेनैवाग्रयणस्यापि (ग्रहणे) सिद्धेऽनिष्टिरूपस्यापि तदाशिताया वा पयसेत्यादिरूपस्य (४.६.१२) आग्रयणस्यैतत्कालसिद्ध्यर्थं पृथगाग्रयणाग्रहणम् ॥　॥ ३ ॥

इति चतुर्थस्य तृतीया कण्डिका ॥

अथ दाक्षायणयज्ञमुपनिबध्नाति ·

दाक्षायणयज्ञः प्रजापशन्नयशस्कामस्य ॥ १ ॥[1]　पर्यायेणैकैकफलसिद्धिः । सदेवतानि दार्शपौर्णमासिकान्येव हवींषि प्रत्यभिज्ञायन्ते　केवलं तु अग्नीषोमीयैन्द्राग्नसांनाय्यानां तिथिक्रमभेदेन विकारः · अत्र संदेहः　किं दार्शपौर्णमासिका एवैते यागा गुणमात्रविकृताः[2]　उत यागान्तराण्येतानि तुल्यद्रव्यदेवताकानि विधीयन्तऽइति · तत्र सूत्रेणैव पूर्वपक्षयति ·

नामफलगुणयोगात्कर्मान्तरम् ॥ २ ॥　नामान्यत्वात् · फलभेदात् फलभेदे च फलिनोऽन्यत्वं भवति · गुणान्यत्वात् गुणान्यत्वं च दृश्यते　मैत्रावरुण्यामिक्षा　अथ वाजिभ्यो वाजिनं जुहोतीत्यादि (२.४.४.२२) ।

गुणविधानं वा संनिधिसम्पद्वचनाभ्याम् ॥ ३ ॥　वा पक्षव्यावृत्तौ · न दर्शपूर्णमासतोऽन्यत्कर्मान्तरम्　किं तर्हि गुणविकृतौ दर्शपूर्णमासावेवैतौ इति । संनिधेः　दर्शपूर्णमाससंनिधावेव दाक्षायणयज्ञस्य पाठात् आजिं वाऽएते धावन्ति ये दर्शपूर्णमासाभ्यां यजन्तऽइति (११.१.२.१०) दर्शपूर्णमासौ प्रकृत्य तस्माद्व त्रिंशतमेव वर्षाणि यजेतेत्यभिधायाह यद्यु दाक्षायणयाजी स्यादथोऽअपि पञ्चदशैव वर्षाणि यजेतेति (११.१.२.१३) । सम्पद्वचनाच्च　अत्र ह्येव सा सम्पत्सम्पद्यते　द्वे हि पौर्णमास्यौ यजते द्वेऽअमावास्येऽअत्रोऽएव खलु सा सम्पद्भवतीति (११.१.२.१३) · दर्शपूर्णमासयागपक्षे हि एकैकः पौर्णमास्यमावास्यायागः　अत्र द्वौ-द्वौ पौर्णमास्य-

---

१) प्रत्येकं भवति Sa.　२) °कृतात् २.

मावास्यायागौ तेन त्रिंशद्वर्षसम्पत्पञ्चदशभिरेव वर्षैः सिध्यति · एवं[1] श्रुतिर्दाक्षायणयज्ञस्य दर्शसत्त्रूपतां गमयति । यदुक्तम् नामान्तरत्वात्कर्मान्तरत्वमिति (२) तद्गुणसंयोगादेकस्यापि नामान्तरत्वं भवति यथा क्षत्रियो राजेति धर्मभेदादेकस्यैव नामान्तरम् तथा अत्रापि पयस्यादिगुणान्तरयोगान्नामान्तरत्वान्न कर्मान्तरसाधकम् · गुणा एव फलसाधनत्वेन विधीयन्ते न तु यागाः अतो गुणफलं न कर्मणो भिन्नत्वं सम्पादयति · यथा चाग्निहोत्रऽएव दधिलक्षणगुणान्यत्वेऽपि न कर्मान्तरता तथात्रापि गुणमात्रविकृतौ दर्शपूर्णमासयागावेवैताविति सिद्धम् । चिन्तायाः प्रयोजनम् दाक्षायणयज्ञानुष्ठानपक्षे दर्शसयोरननुष्ठानम् · अञ्जसा ह वाऽअस्य दर्शसाभ्यामिष्टं भवतीति (२.४.४.१७) श्रुतिरप्यमुमेवार्थं प्रकाशयति । अथ दर्शसतः कालक्रमभेदेन हवींष्युपदिशति ·

अग्नीषोमीयः पौर्णमास्याम् ॥४॥ मुख्यायां पौर्णमास्यामुद्धरणादिकर्मापवर्गान्तोऽग्नीषोमीयः एकादशकपालः पुरोडाशो भवति · अथ यत्पूर्वेद्युरग्नीषोमीयेण यजते पौर्णमास्यामिति (२.४.४.७) केवलस्य विधानादग्नेयोपांशुयाजयोर्निवृत्तिः ।

ऐन्द्राग्नोऽमावास्यायाम् ॥५॥ मुख्यायाममावास्यायाम् । अत्राप्येकस्यैव विधानादग्नेयोपांशुयाजयोर्निवृत्तिः · स वै द्वे पौर्णमास्यौ यजते द्वेऽअमावास्येऽइति (२.४.४.६) द्वयोर्मुख्यामुख्ययोर्यागं विधायाथ यत्पूर्वेद्युरिति (७) विधानादत्र पौर्णमास्यमावास्याशब्दौ मुख्यार्थौ ।

सांनाय्यवत्प्रातः ॥६॥ प्रातः पौर्णमासीप्रतिपदि सांनाय्यवत्कर्म भवति · तथा च तत्राग्नेयः पुरोडाशः दधिपयसी च हविषी इन्द्रश्च देवता एवमपि भवतीत्यर्थः · ऐन्द्रमिति (२.४.४.६) श्रुतेः पाक्षिकस्य महेन्द्रस्य निवृत्तिः । अत्राग्नेयः स्वस्थाने स्थित एव उपांशुयाजस्थाने त्विदं सांनाय्यममावास्यायामपकृष्य विहितम् अग्नीषोमीयपुरोडाशस्तु पूर्वेद्युरपकृष्ट इत्येषोऽत्र गुणविकारः । ऐन्द्र७

1) ? सिद्धतिवद्तां२· 2) यत्तु नामान्तरत्वादीनि भवत्येकस्यापि नामान्तरम् हस्तः करः पाणिरिति · धर्मान्तरत्वाच्च नामान्यत्वम् ब्राह्मणपरिव्राजकवत् · फलं गुणाश्रयम् गुणान्यत्वेऽपि च न गुणिनोऽन्यता न हि देवदत्तस्योत्साहादिनान्यत्वं भवति · तस्मात्तदेवेदं कर्म गुणविकृतमिति · प्रयोजनम् दर्शसयोरक्रिया Karka.

सांनाय्यमित्यत्र (२.४.४.८) तु दध्येव केवलं भवति न पय इति केचित् पयस्त्वमावास्यायामेव मैत्रावरुणी भविष्यतीति · तथा च शाखान्तरे ऐन्द्रं दध्युत्तरस्यामिति श्रूयते · इतरथा ह्यपूर्व एव मैत्रावरुणीयागः स्यात् न दार्शपौर्णमासिकस्य गुणविकारस्तस्मात्पौर्णमास्यां दध्येवैकं भवति न पय इत्याहुः · एवं चैकवचनमुपपद्यते इतरथा दधिपयसोर्द्वित्वाद्द्विवचनं स्यात् · सांनाय्यशब्दश्च संनीयते गोभिरिति सांनाय्यमिति यौगिकत्वात्प्रत्येकमेव वर्ततऽइति · न तु तद्युक्तमिव · शतपथे अग्नीषोमीय एव पौर्णमासऽ हविः सांनाय्यमामावास्यम् (१.६.२.६) ऐन्द्रं वा सांनाय्यमित्यादौ (११.२.६.५) समस्तयोरेव दधिपयसोरेकवचनान्तस्य सांनाय्यशब्दस्य दर्शनात् । तस्मात्पौर्णमास्यां प्रतिपदि आग्नेयः पुरोडाशो दधिपयसीऽइति त्रीणि हवींषि भवन्ति अमावास्यायां तु आग्नेयो मैत्रावरुणी पयस्या इति द्वेऽएव हविषी उपांशुयाजस्त्वेकत्रापि न भवति विधानाभावात् । अत्र मुख्यायां पौर्णमास्यामुद्धरणादिकर्मापवर्गान्तमग्नीषोमीयं सद्य एव प्रातः परिसमाप्य पुनरुद्धृत्याग्न्यन्वाधानव्रत्याशनशाखाहृद्दध्यर्थवत्सापाकरणोपवेषकरणपवित्रबन्धनानि यथाकालं कृत्वा सायंहोमानन्तरं दोहयित्वा निधानान्तं कृत्वा प्रातर्दोहार्थं वत्सापाकरणं शाखोपगूहनं च कुर्यात् ।

अमावास्यायां पयस्या मैत्रावरुणी ॥७॥ अमावास्यायां प्रातः प्रतिपदि मै॰ प॰ भवति · अत्राप्याग्नेयः स्वेस्थाने स्थित एव पयस्या त्वपूर्वा उपांशुयाजस्थाने विधीयते ऐन्द्राग्नश्च पूर्वस्युरपकृष्ट इति गुणविकारोऽत्र । अत्र मुख्यायाममावास्यायां प्रातःकाले सद्य एवोद्धरणादि कर्मापवर्गान्तमैन्द्राग्नयागं कृत्वा तदानीमेव पुनरुद्धृत्याग्न्यन्वाधानपिण्डपितृयज्ञव्रत्याशनशाखाहृदनसंनमनोपवेषकरणपवित्रबन्धनानि यथाकालं कृत्वा सायंहोमानन्तरं मैत्रावरुणपयस्यार्थं वत्सापाकरणं कुर्यात् अत्र मित्रावरुणाभ्यां भागमिति गोरूपस्पर्शने (४.२.१) विशेषः शाखोद्गूहनं च । प्रातर्विशेषमाह ·

तत्रैव दोहनऽ शृते वा दध्यानयति ॥८॥ तत्रैव तस्मिल्लौकिकदधन्येवाज्यनिर्वापानन्तरं पयस्यार्थं दोहनं कर्तव्यम् प्रथममुखायां लौकिकं घनीभूतं दध्यासिच्येत्यर्थः · अथवा पयसि शृते तप्ते सति पश्चाद्दध्यानयति न प्रथमम् ।

केचिदेवं व्याचक्षते · तत्रैव दोहनम् अमावास्यायां प्रातः प्रतिपदि मैत्रावरुणी पयस्या भवति सांनाय्यवत्प्रातरिति (६) सायंदोहे प्रातर्दोहे च प्राते सायंदोहनिवृत्त्यर्थमाह तत्रैव दोहनम् तत्रैवेति प्रातरेव न सायमिति · तथा शृते वा दध्यानयतीति वाशब्दादशृते वा पयसि लौकिकं दध्यानयति · एतदपि समीचीनं व्याख्यानम् । अपरे चैवं व्याचक्षते · सांनाय्यवत्प्रातरिति (६) उभयत्र दधिपयसी स्त एव तत्रैव दोहनं दोहनप्राप्तिरिति पयस्यायाः पयोविकारत्वान्निरूप्याद्यं प्रातर्दोहनं कार्यम् अथवा शृते प्रातर्दोहे सायंदोहदधि आनयति एवं दधिपयोभ्यां पयस्या उत्पाद्यतऽइति · पूर्वेद्युर्दध्यपि मित्रावरुणाभ्यां निष्पादनीयमस्मिन्पक्षे · शाखान्तरे च पयस्योत्पत्तावस्यैव प्रकारस्य दर्शनादिदमपि न निर्मूलम् · तथा चापस्तम्बः तप्ते प्रातर्दोहे सायंदोहमानयतीति · मानवे च · सर्वत्र पयस्योत्पादनस्यायमेव प्रकारः · तथा च न सम्प्रदायो व्यवस्थित इति स्वश्रुतौ पयस्यानिष्पादनप्रकारस्यानुपदेशात् शाखान्तरश्रुतिनिर्णयः ।

वाजिनं निषिच्योत्करे करोति ॥ ९ ॥[1] तप्ते पयसि दधिनिनयने कृते दधिपयसोः सारभूतं यत्कठिनं सम्पद्यते सा पयस्या यच्च उदकं पृथग्भवति तद्वाजिनम् · पयस्योद्वासनकाले तद्वाजिनं निषिच्य पात्रान्तरेऽवस्थाप्य तत्रस्थमुत्करे करोति सर्वहविषामासादनानन्तरमुत्करे आसादयति · उत्करे वाजिनमासादयतीति शाखान्तरे श्रूयते सूत्रकारस्तु आसादयतीत्यस्य स्थाने प्रायेण करोतेः प्रयोगं करोति ।

अनाज्यलिप्तं वा ॥ १० ॥ तत्रस्थाभिघारस्यायं विकल्पः · पयस्यायास्तप्ताज्याभिघारे[2] कृते अकृते वा वाजिनं निषिञ्चेत् · यदा चाकृते तदा अनाज्यलिप्तं निषिक्तं भवति तदा च वाजिननिषेकानन्तरं पयस्यावाजिनयोः पृथक्तप्ताभिघारणम् · प्राणदानं चोभयपक्षेऽपि । अथवा अनाज्यलिप्तम् वाजिनस्याज्य-

———

१) प्राणदानं कृत्वोत्करे सादयति पयस्यासादनान्ते · वाजिनयागसम्बन्धाद्यागधर्माः प्रवर्तन्ते तेन वेद्यामासादने प्राप्ते उत्करे विधीयते · उत्करे विहितत्वान्नात्र वेदिधर्माः प्रवर्तन्ते Mahâd. २) °स्तप्ताभि°२· °स्तप्तास्याभि°२·

लेपो न कार्यः अस्मिन्पक्षे वाजिनस्य तप्ताभिघारप्राणदानोपस्ताराभिघारणानामभावः । वाजिनयागस्य कालमाह ·

प्रहृत्य तृणं तेन चरति ॥११॥[1] तृणं प्रहृत्य प्रस्तरहोमानन्तरं प्रस्तरमध्याद्गृहीततृणस्यानुप्रहरणं कृत्वात्मानमालभ्यापः स्पृष्ट्वा वाजिनेन चरति यागमनुतिष्ठति । कालान्तरमाह ·

विमुच्य वा स्रुचौ ॥१२॥ अथवा घृताचीऽइति[2] (२.१३) मन्त्रेण स्रुचौ धुरि स्फ्ये वा निधानानन्तरं (३.६.१३) वाजिनेन चरति ।

बर्हिरवसिञ्चन्गृह्णाति ॥१३॥ द्रवत्वात्स्रुवेण ग्रहणे प्राप्ते बर्हिरवसिञ्चन्नित्युपदेशादेव प्रतीत्य श्रवणाच्च स्थालीमुखेनैव जुह्वां निनयति बर्हिषि स्कन्दनं कुर्वन् · न हि स्रुवेण सकृद्ग्रहणे क्रियमाणे बर्हिरवसेचनवाजिनयागदिग्व्याघारणभक्षणपर्याप्तं वाजिनं सम्भवति । अत्र वाजिनस्याज्यनिषेधपक्षे नोपस्ताराभिघारौ शृताभिघारमात्रनिषेधपक्षे तु भवत एव । कस्मादेवमन्याय्यं हविष स्कन्दनमुच्यतऽइत्यत आह ·

तदृषभेषु रेतो दधातीति श्रुतेः ॥१४॥ शाखान्तरे यद्बर्हिरवसिञ्चन्गृह्णाति तदृषभेषु रेतो दधातीति · तेन श्रुतिबलादेवमन्याय्यमपि युक्तमेव नास्ति वचनस्यातिभार इति ।

वाजिभ्योऽनुवाचयति ॥१५॥ ग्रहणानन्तरं वाजिभ्योऽनुब्रूहीत्यनुवाचयति होतारम् तदनन्तरमेवोपदेशात् न पूर्वम् ।

प्रतिवषट्कारे हुत्वा वाजिनशेषेण दिशो व्याघारयति दिश इति (६.१९) प्रतिमन्त्रं प्रदक्षिणं पुरस्तात्प्रथमम् ॥१६॥ होतुर्हि तत्र द्वौ वषट्कारौ स्तः वषट्कारोऽनुवषट्कारश्च प्रतिवषट्कारम् द्वयोरपि वषट्कारयोः हुत्वा यजतिस्थानाज्जुहोतिस्थानमागत्य स्रुक्स्थेन वाजिनशेषेण दिशः प्रदिश इत्यादिभिर्मन्त्रैः प्रतिमन्त्रं प्रतिदिशं सर्वासु दिक्षु आहवनीयस्याग्नेः प्रदक्षिणं दिशो व्याघारयति दिशः कर्मभूता अभिलक्षीकृत्य वाजिनशेषं क्षारयति · एवं चतुर्भिर्मन्त्रैश्चतसृषु दिक्षु व्याघारणे सिद्धे आह ·

1) अनुप्रहृत्येत्युक्तो Mahâd. See ३.६.१५. 2) ? घृताच्यसीतिरे·

उत्तमाभ्यां मध्ये पूर्वार्धे च ॥१७॥ दिश इत्यादीनां षणां मन्त्राणां मध्ये उत्तमाभ्याम् उद्दिशः दिग्भ्य इत्याभ्यां मन्त्राभ्यां यथाक्रममग्निमध्ये अग्नेः पूर्वभागे च व्याघारयति · वषट्कारानुवषट्कारयोर्होमस्तु आहवनीयस्य पूर्वभागऽएव कार्यः । अत्रैव विशेषमाह ·

स्वाहाकारः सर्वत्र साकाङ्क्षत्वात् ॥१८॥ सर्वत्र दिशः प्रदिश इत्यादिषु स्वाहाकारोऽप्यनुषञ्जनीयः · दिग्भ्यः स्वाहेत्यत्रैव पठितत्वादत्रैव प्राप्नोति नान्यत्रेत्यत उच्यते सर्वत्रेति · क्रियापदाभावे निराकाङ्क्षीकरणाय । ननु तर्हि स्वाहाकारयोगे दिग्भ्य इत्यादौ चतुर्थ्या भवितव्यम् नैवम् मन्त्रत्वात् · मन्त्रा ह्येते मन्त्राश्च यथाश्रुता एव प्रयुज्यन्ते सुपां सुपो[1] भवन्तीति (पा° ७.१.३९ वा°१.) प्रथमैव तत्र चतुर्थ्यर्थे भविष्यति[2] ।

शेषमुपह्वयस्वेत्यामन्त्र्यामन्त्र्य भक्षणानुपहूत इति प्रसूतः ॥१९॥ शेषं स्रुक्स्थं[3] हस्ते भक्षणार्थं गृहीत्वामुकोपह्वयस्व भक्षणार्थमनुजानीहीत्येवं होत्रादीन्सर्वानामन्त्र्यामन्त्र्य पृष्ट्वा-पृष्ट्वा उपहूत इति तेन पृष्टेन प्रसूतः अनुज्ञातः सन् तस्य शेषस्य भक्षणं करोति · शेषमित्यस्य द्वितीयान्तस्य भक्षणमित्यनेनान्वयाद्भक्षणार्थं हस्ते गृहीत्वेत्यध्याहृत्य योज्यम् । व्यावहारिकैर्नामभिर्होत्रादीनामामन्त्रणे प्राप्तऽआह ·

युक्तनामभिर्वा ॥२०॥ वावधारणे · युक्तनामानि च होत्रादीनि तैर्होत्रध्वर्य्वादिनामभिरेवामन्त्रणं[4] कर्तव्यम् न व्यावहारिकैर्यज्ञदत्त इत्यादिभिः[5] · तेन होतरध्वर्यऽउप ह्वयस्वेत्येवम् । प्रसङ्गात्सोमभक्षणेऽपीमं विधिमुपदिशति ·

सोमे च ॥२१॥ अग्निष्टोमादौ ग्रहचमसादिस्थस्य हुतशेषस्य सोमस्यैवमेव होतरुपह्वयस्वेति भागिन[6] आमन्त्र्योपहूत इति तैरनुज्ञातो[7] भक्षणं

---

१) उपांशवोः२· उपांशुयोः२· २) सुपां सुपो भवन्तीति यथाश्रुतमन्त्रेण प्रयोगो न चतुर्थ्यन्तेन यथा दिशः स्वाहेत्यादि · यदात्र स्वाहाकारो नोक्तः स्यात् तदा दिशः व्याघारयामीति स्यात् Mahâd. ३) स्रुचि शेषासम्भवात्स्थालीशेषं वाजिनं ग्राह्यम् · असम्भवात्कुतः वाजिनशेषेण दिशो व्याघारयतीति (१५) Mahâd. ४) ? तैर्होता अध्वर्वादि°२· तैर्होता अध्वर्यवादि°२· ५) न पितृकृतैर्नामभिः Mahâd. ६) ? भागिनाः२· ७) अध्वर्युसमनन्तरं प्रतिप्रस्थातुरुपह्वानं भक्षश्च होतृसमनन्तरं मैत्रावरुणस्य होतृविकारात् Mahâd.

कुर्यात् नानुपहूतः सोमः पातव्य इति वचनात् । अविशेषाद्धोमाभिषवव्रषट्कारसमाख्यादिनिमित्तेनानेकसाधारणेषु सोमेषु असाधारणेषु च सोपहवे भक्षणे प्राप्त आह·

साधारणेषु वा सामर्थ्यात् ॥२२॥ वावधारणे साधारणेष्वेव हुतशेषसोमेषु सोपहवं भक्षणम् नासाधारणेषु नाराशंसचमसादिषु । कुतः सामर्थ्यात् साधारणेषु च सोमेषु अनुज्ञाप्रार्थनं समर्थं युक्तं भवति · अधिकपाने दोषाशङ्कायां हि भागिभ्यः अनुज्ञा प्रार्थ्यते अनुज्ञातस्याधिकपानेऽपि दोषो न भवतीति । अथ वाजिनभक्षणे मन्त्रानाह·

ऋतूनां वा वाजिनां वाजिनं भक्षयामीति ॥२३॥ अनेन मन्त्रेण वाजिनशेषभक्षणं सर्वे कुर्वन्ति ।

वाऽयहं वाजिनस्योपहूतस्योपहूतो भक्षयामीति वा ॥२४॥

वाजे वाजी भूयासमिति वा ॥२५॥[1] अथ भक्षणक्रमं भक्षयितॄंश्चाह·

होत्रध्वर्युब्रह्माग्नीध्रयजमानाः ॥२६॥

प्रथमो वोभयतस्तु यजमानः ॥२७॥[2] उभयत इति प्रथम उत्तमश्च· ततश्चोपहवप्रार्थने प्रथमं पश्चाच्च यजमानः सर्वैः प्रष्टव्यः ।

दाक्षायणं वा दक्षिणा ॥२८॥ दाक्षायणं सुवर्णमुच्यते · तेनात्र हिरण्यं दक्षिणा तच्च शतमानं रक्तिकाशतपरिमितम् हिरण्यपरिमाणेऽन्यत्रापीत्यश्वमेधे सूत्रणात् (२०.१.२५) · अन्वाहार्यो वेति विकल्पः ।

संवत्सरं वा यजेत ॥२९॥ यावज्जीवं वा पञ्चदश वर्षाणि वा यजेतेति प्रोक्तम् अधुना पक्षान्तरमभिधीयते · संवत्सरमिति कालाध्वनोरत्यन्तसंयोग इति (पा॰ २.३.५) द्वितीया साकल्येन संयोगश्चात्यन्तसंयोग इत्युच्यते तेन सकलं संवत्सरं दाक्षायणयज्ञेन व्याप्नुयात् · अत्र संवत्सरः सावनः परिगृह्यते[3] न चान्द्रादिः · यतोऽत्रापि पक्षे सैव सम्पत्कर्तव्या पञ्चदशभिर्वर्षैर्यावत्य इष्टयो भवन्ति तावत्य एव संवत्सरयागपक्षेऽपि सम्पादनीयाः तावत्यश्च सावनऽ ए-

१) ऋतूनां वेति मन्त्रान्ते वाऽयहमिति स्थाने वाजे वाजी भूयासमिति वा मन्त्रो भवति Mahâd. २) उभयतस्त्विति प्राथम्यपक्षे उत्तमोऽपि भक्षयेत् अथोऽअप्युत्तम इति वचनात् (२.४.४.२५) Karka. ३) त्रिंशद्दिनं सावनमाङ्गः (viz. मासं) marg. in २.

व संवत्सरे सम्पद्यन्ते नान्यस्मिन्निति । तत्रैवम्[1] प्रथमपौर्णमास्यां श्राद्धान्वारम्भणीयापूर्वकोऽग्नीषोमीययागः पुनरुद्धृत्य सांनाय्यवदुपक्रमः · प्रतिपद्याग्नेयेन पुरोडाशेनैन्द्रेण दध्ना पयसा च यागः पक्षे वैमृधः मांसमैथुनवर्जनसंकल्पः पुनरुद्धृत्य तस्मिन्प्रतिपद्दिनऽएवैन्द्राग्नयागः पुनरुद्धृत्य मैत्रावरुण्याः पयस्याया उपक्रमः · प्रातर्द्वितीयायामाग्नेयेन मैत्रावरुण्या च यागो यथोक्तः पक्षे आदित्यश्चरुः तदानीमेव पुनरुद्धृत्याग्नीषोमीययागः ततः पुनरुद्धरणादि दधियागप्रक्रमः · प्रातस्तृतीयायामग्नियसांनाय्ययागः पक्षे वैमृधः तदानीमेवोद्धृतेन्द्राग्नयागः पुनरुद्धृत्य मैत्रावरुण्या उपक्रमः तदनन्तरमादित्यो वा इत्येवम्प्रकारेण संवत्सरं यावत्प्रत्यहं कर्तव्यम् ।

माꣳसस्त्र्यनृतमूत्रकृतवासाꣳसि वर्जयेत् ॥३०॥[2] मांसं न भक्षेत् स्त्रियं न गच्छेत् · अनृतं न वदेत् · मूत्रकृतं रजकधौतं वासश्च न परिदधीत · मूत्रकृतमिति कारुधौतम् तत्कृतवस्य परिहार्यत्वात्[3] तदधीनत्वादेव करणस्य । एतानि पौर्णमास्यमावास्ययोरन्तराले वर्जयेत् ॥ ॥ चतुर्थी कण्डिका ॥४॥ ॥

अथ पद्धतिः ॥

अथ दाक्षायणयज्ञ उच्यते · स च प्रजाकामपशुकामान्नाद्यकामयशस्कामानां भवति अत्र पर्यायेण सर्वफलसिद्धिर्न सह · दर्शपूर्णमासयाग एवायं गुणविकृतो न कर्मान्तरम् । तत्र प्रथमायां पौर्णमास्यां पूर्वाह्णे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धमन्वारम्भणीयां च कृत्वा तदानीमेव पुनरुद्धृत्याग्नीषोमीयः पुरोडाशोऽग्न्यन्वाधानादिकर्मापवर्गान्तः पौर्णमासाग्नीषोमीयवद्भवति · हिरण्यं दक्षिणेति विशेषः तत्र प्रजापतेर्भागोऽसीति मन्त्रे (३.४.३०) ऊर्गसीत्यस्य स्थाने हिरण्यमसीति प्रयोगः अथवान्वाहार्य एव दक्षिणा · ततः पुनरुद्धरणम् अग्न्यन्वाधानम् मांसमैथुनवर्जनसंकल्पः वपनं वा अपराह्णे पत्नीयजमानयोर्व्रत्याशनम् शाखाच्छेदः ऊर्जे त्वेत्यनुमार्जनम् व्रतग्रहणमत्र वा वत्सापाकर-

---

[1]) तत्र प्रतिदिनमिष्टी द्वे-द्वे कर्तव्ये Mahâd. [2]) मूत्रकृतं रजकधौतं Ss. अहनि माꣳसमैथुने वर्जयेदिति (२.१.८) तत्कर्मणि वर्तमाने द्रष्टव्यम् अहनीति वचनात् · एतत्पुनर्दर्शप्रयोगादन्तरालधर्मो (र्मे Cod.) वचनसामर्थ्यादिति Karka. [3]) ? °वस्यत्वानिर्मितस्यापरि°?.

णम् इन्द्राय भागमिति देवतानियमः ऐन्द्रꣳ सांनाय्यमिति श्रुतेः न पाक्षिको महेन्द्रः उद्धूहनम् शाखापरिवासनम् मूलादुपवेषकरणम् पवित्रबन्धनम् · रात्रौ स्वयमेव यवाग्वाग्निहोत्रहोमः कृते उपसृष्टादि निधाय वत्सापाकरणं पूर्ववदित्यन्तम् आरण्याशनं वा अन्यतरागारशयनम् · प्रातर्यवाग्वा स्वयं होमः उदिते ब्रह्मवरणादि दाक्षायणयज्ञेनाहं यक्ष्यऽइति वा ससांनाय्यामावास्येष्टिवत्सर्वं भवति उपांशुयाजाभावः आग्नेयः पुरोडाशः ऐन्द्रं दधि ऐन्द्रं पय इति हविस्त्रयम् अन्वाहार्यो हिरण्यं वा दक्षिणा उत्तमे प्रयाजे इदमग्नये सोमायाग्नयऽइन्द्राय देवेभ्य आज्यपेभ्य इति प्रस्तरहोमे च व्यूहने अग्नेरिन्द्रस्योज्जितिम् अग्निरिन्द्रस्तमपनुदतामिति सह शाखया प्रस्तरानुप्रहरणम् परिधिभिः सहोपवेषहोमः पक्षे वैमृधेष्टिरन्वाहार्यदक्षिणा · अमावास्यापर्यन्तं मांसस्त्र्यनृतकारुधौतवाससां च वर्जनम् । अमावास्यायां पूर्वाह्णे ऐन्द्राग्नो द्वादशकपाल उद्धरणादिकर्मापवर्गान्तोऽमावास्येष्ट्यन्तर्गतैन्द्राग्नवत् दर्शेष्ट्यर्थं दर्शेष्ट्याहं यक्ष्यऽइत्येवं प्रयोगः अन्वाहार्यो दक्षिणा हिरण्यं वा · कर्मापवर्गान्ते पुनरुद्धरणम् अग्न्यन्वाधानम् मांसमैथुन[वर्जन]संकल्पः वपनं वा अपराह्णे पिण्डपितृयज्ञः दर्शश्राद्धम् व्रत्याशनम् शाखाछेदः संनमनम् व्रतग्रहणं वा शाखापरिवासनम् उपवेषनिष्पत्तिः पवित्रबन्धनम् · रात्रौ स्वयमग्निहोत्रहोमः कृते पयस्यार्थं षड्वत्सापाकारणम्[1] तत्र मित्रावरुणाभ्यां भागमिति विशेषः उद्धूहनम् आरण्याशनं वा अन्यतरागारे शयनम् · प्रातः स्वयंहोमः अनुदिते ब्रह्मवरणादि दर्शेष्ट्याहं यक्ष्यऽइति पात्रासादनादि दर्शेष्टिवत्सर्वम् शृतावदानान्तरं वाजिनभाण्डम् दक्षिणाहिरण्यं वा पयस्यार्थं दधि चेति · तत्रस्याभिघारमदत्त्वा वा वाजिनस्यावस्रावणम् तत्रस्याभिघारः यथाक्रममुद्वासनम् वाजिनस्य च यथाक्रमं प्राणदानम् अग्निं गृह्णेति पुरोडाशे मित्रावरुणौ गृह्णेति पयस्यायां वाजिनो गृह्णेति वाजिने पुरोडाशपयस्ययोर्वेद्यामासादनम् उत्करे वाजिनस्यासादनम् सर्वाण्यालभ्यान्ते वाजिनस्यालम्भः उत्तमप्रयाजे इदमग्नये सोमायाग्नये मित्रावरुणाभ्यां देवेभ्य आज्यपेभ्यो वाजिभ्यश्च इति विशेषः · आग्नेयया-

1) ? षड्वर्गास्यावा°१.

गानन्तरं मित्रावरुणाभ्यामनुब्रूहीत्युक्त्वा जुह्वामुपस्तीर्य शृतावदानेन पयस्याया मध्यात्पूर्वार्धाच्च पयोविकारत्वात्स्रुवेण वा द्विरवदायोपरिष्टादभिघार्यावदाने प्रत्यभिघार्येत्यायातिक्रम्याश्राव्य मित्रावरुणौ यजेत्युक्त्वा वषट्कृते जुहोति इदं मित्रावरुणाभ्यामिति त्यागः · उपांशुयाजाभावः · ततः स्विष्टकृदादि · पयस्यायाः प्राशित्रेडयोरेवावदेयम् नान्यत्र · अन्वाहार्यो हिरण्यं वा दक्षिणा · व्यूहने अग्नेर्मित्रावरुणयोरुज्जितिम् अग्निर्मित्रावरुणौ तमपनुदन्त्विति · प्रस्तरहोमे इदमग्नये सोमायाग्नये मित्रावरुणाभ्यां देवेभ्य आज्यपेभ्योऽग्नये होत्राय वाजिभ्य इति विशेषः । तृणं प्रास्यात्मानमालभ्याप उपस्पृश्य वाजिनयागः स्रुग्विमोकानन्तरं वा · तत्र बर्हिषि वाजिनमवसिञ्चन् स्थाल्यैव जुह्वां निनयति · ग्रहणानन्तरं वाजिभ्योऽनुब्रूहीत्यनुवाचनम् · उत्थायातिक्रम्याश्राव्य वाजिनो यजेत्युक्त्वा वषट्कृते अग्नेः पूर्वभागे जुहोति इदं वाजिभ्य इति त्यागः · अनुवषट्कृते पुनः पूर्वभागऽएव जुहोति स वै प्रागेव जुहोतीति (२.४.४.२२) श्रुतेः · ततोऽप उपस्पृश्याग्नेरुत्तरत उपविश्य जुह्वस्थेन वाजिनशेषेण दिशः स्वाहेति प्रतिमन्त्रं दिशो व्याघारयति दिशः स्वाहेत्यग्नेः पूर्वभागे इदं दिग्भ्यः प्रदिशः स्वाहेति दक्षिणत इदं प्रदिग्भ्यः आदिशः स्वाहेति पश्चात् इदमादिग्भ्यः विदिशः स्वाहेत्युत्तरतः इदं विदिग्भ्यः उद्दिशः स्वाहेति मध्ये इदमुद्दिग्भ्यः दिग्भ्यः स्वाहेति पूर्वार्धे इदं दिग्भ्यः · ततः स्रुक्स्थं वाजिनशेषमुपहवपूर्वकं होत्रध्वर्युब्रह्माग्नीध्यजमानाः क्रमेण भक्षयन्ति तद्यथा होता वाजिनं हस्ते गृहीत्वा अध्वर्य उपह्वयस्व ब्रह्मन्नुपह्वयस्वाग्नीदुपह्वयस्व यजमानोपह्वयस्वेति पृष्ट्वा भक्षयति ततोऽध्वर्युर्वाजिनं भक्षार्थं हस्ते कृत्वा होतरुपह्वयस्व ब्रह्मन्नुपह्वयस्व अग्नीदुपह्वयस्व यजमानोपह्वयस्वेति पृष्ट्वा भक्षयति भक्षणे विकल्पेन त्रयो मन्त्राः ऋतूनां त्वेति वा वाज्यहं वाजिनस्येति वा वाजे वाजीति वा एवं ब्रह्मा होत्रध्वर्य्वग्नीध्यजमानान्पृष्ट्वा तेनैव मन्त्रेण भक्षयति ततोऽग्नीद्धोतारमध्वर्युं ब्रह्माणं यजमानं च पृष्ट्वा भक्षयति ततो यजमानो होतारमध्वर्युं ब्रह्माणमग्नीधं च पृष्ट्वैव भक्षयति एवं पञ्च भक्षयन्ति · अथवा सर्वेभ्यः पूर्वं पश्चाच्चोभयतो यजमानो भक्षयति तदा चोपहवेऽपि पूर्वं पश्चाच्चोभयतो यजमानोपह्वयस्वेति यज-

मानः प्रष्टव्यः · परिधिभिः सहोपवेषहोमः · ततः पुनरुद्धृत्यादित्येष्टिर्वा । दाक्षायणयज्ञेन पञ्चदश वर्षाण्येव यजेत अथवा संवत्सरमेवान्वहं दाक्षायणयज्ञेन यजेत न तत ऊर्ध्वम् · तत्र यस्यां पौर्णमास्यामारम्भः क्रियते तस्यां पूर्वाह्णेऽग्नीषोमीयः पुरोडाश उद्धरणादिब्राह्मणतर्पणान्तः[1] ततस्तस्मिन्नेव दिने पुनरुद्धरणादि सायंदोहातञ्चनान्तं कृत्वा प्रातर्दोहार्थं वत्सापाकरणं कुर्यात् · प्रतिपदि प्रातर्ब्रह्मवरणादि आग्नेयपुरोडाशेनैन्द्रेण सांनाय्येन दध्ना पयसा च यागो ब्राह्मणतर्पणान्तः पत्नी वैमृधेष्टिश्च ततस्तस्मिन्नेव दिने पुनरुद्धृत्य कर्मापवर्गान्त ऐन्द्राग्नः कर्तव्यः ततस्तस्मिन्नेव दिने उत्तरेष्ट्युपक्रमः पयस्यार्थं वत्सापाकरणान्तः · प्रातर्द्वितीयायां ब्रह्मवरणादि आग्नेयेन पुरोडाशेन मैत्रावरुण्या पयस्यया च यागः कर्मापवर्गान्तः तत आदित्येष्टिर्वा ततस्तस्मिन्नेव दिने पुनरग्नीषोमीयः कर्मापवर्गान्तः पुनरुद्धरणाद्युत्तरेष्ट्युपक्रमश्च · एवं संवत्सरं यावत्प्रतिदिनमिष्टिद्वयं भवति संवत्सरेण च पञ्चदशवर्षसंख्या सम्पद्यते · पञ्चदशभिर्वर्षैः सप्तशतानि विंशतिश्चेष्टयो भवन्ति संवत्सरे प्रतिदिनमिष्टिद्वयानुष्ठाने चैतावत्य एवेष्टयो भवन्ति । अथवाग्निहोत्रहोमवद्यावज्जीवं दाक्षायणयज्ञेन यजेत ॥ ॥ ४ ॥

इति चतुर्थस्य चतुर्थी कण्डिका ॥ ॥

दर्शपूर्णमासप्रकरणऽएव स एव उभयत्राच्युत आग्नेयोऽष्टाकपालः पुरोडाशो भवतीत्युपक्रम्य (१.६.२.५) सैव[2] कामसंयोगं विदधाति यत्कामो ह वाऽएतेन यज्ञेन यजते सोऽस्मै कामः समृध्यतऽइति (७) · इममेव काम्यमाग्नेयं[3] प्रकृत्योपांशुत्वं विहितमस्ति स यदीष्टिं कुर्वीत सप्तदश सामिधेनीरनुब्रूयादुपांशु देवतां यजति तद्धीष्टिरूपं मूर्धन्वत्यौ याज्यानुवाक्ये स्यातां वार्त्रघ्नावाज्यभागौ विराजौ संयाज्येऽइति (१२) · अस्य चोपांशुत्वं सूत्रकारेणात्र वक्तव्यम् तत्प्रसङ्गेनान्यत्रापि यस्य-यस्योपांशुत्वं भवति तस्य-तस्योच्यते ·

---

1) ? °णाद्यात्राह्म°१. 2) viz. श्रुतिः 3) ? इदमेव काम्य आग्नेयं २.

उपाꣳशु काम्यदेवता ॥१॥ काम्यस्य कर्मणो देवता · यज्ञायर्वणं[1] वै काम्या इष्टयस्तस्मात्ता उपांशु कार्या इति शाखान्तरात् ।

आग्रयणो वैश्वदेवः ॥२॥[2] एककपालाश्चावारुणाः ॥३॥[3]

प्राजापत्यः ॥४॥[4] सावित्रश्चातुर्मास्येषु ॥५॥[5]

वैश्वदेवी ॥६॥ चातुर्मास्येषु वैश्वदेवपर्वणि वैश्वदेवी पयस्या ।

वायव्यम् ॥७॥ शुनासीरीये वायुदेवत्यं हविः ।

पयो [यवागूर्वा] ॥८॥[6] अत्रापि चातुर्मास्येष्वित्यनुवर्तते तेन प्राजापत्यं वायव्यमित्यादौ (१२.४.१.६) नोपांशुत्वम् । ननु वायव्यमिति नपुंसकनिर्देशात्पयःपक्ष एव उपांशुत्वं भविष्यति न यवागूपक्षे नैवम् तेषां वै चतुर्णां द्वयोस्त्रीणि-त्रीणि हवींष्यनिरुक्तानि भवन्ति द्वे-द्वे द्वयोरिति (११.५.२.७) हविःसम्बन्धेनैवोपांशुत्वविधानात् · तेन वायव्यं हविरित्येव व्याख्येयम् · अतो यवागूपक्षेऽप्युपांशुत्वं भवत्येव · एवं वैश्वदेवे त्रीणि हवींष्युपांशु भवन्ति सावित्रो वैश्वदेवो द्यावापृथिवीयश्चेति वरुणप्रघासेषु द्वे सावित्रः कायश्च साकमेधेषु महाहविषी द्वे सावित्रो वैश्वकर्मणश्च शुनासीरीये त्रीणि सावित्रो वायव्यं सौर्यश्चेति[7] ।

तनूहवींष्यपि ॥९॥ तानि च अग्नये पवमानाय प्रथमाग्नये पावकायाग्नये शुचये च द्वितीयादित्ये चरुस्तृतीयेत्येतानि (४.१०.१-१०) त्रीणि तनवो वा

---

1) sic!? आथर्वणा वै काम्यास्ता उपांशु कर्तव्या इति Müller in Zeitschrift der Deutschen Morg. Ges. IX, pag. LXV. 2) चरुः Mahâd. 3) पुरोडाशाः Mahâd. 4) पशुः पुरोडाशश्चरुश्च Mahâd. 5) सावित्रः पुरोडाशः सर्वेषु चा॰षु Mahâd. 6) Thus २.–Mahâdeva reads वायव्यं पयः as one sûtra and omits the यवागूर्वा wholly: this latter is done also in १ and by Karka, who moreover omits even the पयः, which word may indeed have been originally merely a gloss belonging to वायव्यं and afterwards added to the text. यवागूर्वा is no doubt a still more modern addition. 7) सावित्रः चातुर्मास्येषु · उपांशु । तत्रैव वैश्वदेवी · पयस्या । वायव्यम् · पयः नपुंसकलिङ्गोपदेशात् · यवाग्वां तर्हि न प्राप्नोति · प्राप्स्यति यागधर्मत्वात् न हि द्रव्यधर्मोऽयम् अपूर्वप्रयुक्तत्वात् · दर्शयति च पर्वाणि प्रकृत्य तेषां वै चतुर्णां ॰द्वे द्वयोरिति वैश्वदेवशुनासीरीययोस्त्रयाणामनिरुक्ततां दर्शयति · तस्माद्यवाग्वामप्युपांशुत्वम् Karka.

ऽएता श्रग्न्याधेयस्येति श्रुतेः । देवताया एव उपांशुत्वम् न सकला इष्टयः तथा च मानवे श्राग्न्यधेयिक्य इष्टयः सद्यस्कालाः सर्वा उपांशुदेवता इति ।

दीक्षणीयाप्रायणीयातिथ्यादेवताः ॥ १० ॥ उपांशु चरन्ति प्रागग्नीषोमीयादित्यस्मिन्पक्षे (७.२.३०) दीक्षणीयादीनां सकलानामिष्टीनां सदेवताकानामुपांशुत्वं सिद्धमेव · यदा तु वागन्तेन वा दीक्षणीयां नीचैस्तरांनीचैस्तरामितरे ऽइति (३१) पक्षस्तदा दीक्षणीयादिदेवतानामुपांशुत्वविधानार्थमिदं सूत्रम् ।

देवसूदेविकाहवीᳲषि ॥ ११ ॥[1] वायव्योऽग्नौ ॥ १२ ॥[2]

मैत्रावरुणी च ॥ १३ ॥[3] ऐन्द्रः सौत्रामण्यां प्रथमः ॥ १४ ॥[4]

वायोधसश्च ॥ १५ ॥[5] ॥ ॥

आग्नेयं प्रतिकाममाहरेत ॥ १६ ॥ श्रग्नेयमष्टाकपालं पुरोडाशं प्रतिकामं कुर्यात् यत्किंचित्कामयन्ते तस्य सर्वस्य साधकोऽयमित्यर्थः[6]

वर्षार्थे प्रकृतौ वा ब्रूयाद्वृष्टिकामोऽस्मीति ॥ १७ ॥ आग्नेयं प्रतिकाममाहरेतेत्युक्तम् तेन वृष्टिकामस्याग्नेयः प्राप्नोति तत्र विशेष उच्यते · वृष्ट्यर्थे आग्नेये क्रियमाणे यजमानः उद्धरणकाले ऋत्विजः प्रति एवं ब्रूयात् वृष्टिकामो ऽस्मीति · अथवा प्रकृतौ प्राकृतदर्शपूर्णमासेष्टावेवैवं ब्रूयात्[7] । तेनैवं सिद्धम् वृष्टिकामः पृथगाग्नेयीमिष्टिं[8] कुर्यात् प्रकृताविव वा वृष्टिकामोऽस्मीत्यादिकमधिकं कुर्यादित्याग्नेय्याः प्राकृत्येष्ट्या[9] (सह) विकल्पः ।

अध्वर्यु ब्रूयात्पुरोवातं च विद्युतं च मनसा ध्यायेति ॥ १८ ॥ प्राक् प्रयाजेभ्योऽध्वर्यु प्रति यजमानो ब्रूयात् ।

अभ्राण्यग्नीधम् ॥ १९ ॥ स्तनयित्नुं च वर्षं चेति होतारम् ॥ २० ॥

सर्वाण्येतानीति ब्रह्माणम् ॥ २१ ॥[10] ॥ ॥

---

१) राजसूये चयने च Mahád. २) चमने वायव्य इष्टकापशुः Mahád. ३) पयस्या चयने Mahád. ४) पशुः Mahád. ५) पशुः सौत्रामण्याम् Mahád. ६) आग्नेयं प्रकृत्य श्रूयते सोऽस्मै कामः समृध्यते यस्मै कामायेष्टिं निर्वपतीति (see १.३.५.१० and ६.२.७) Karka. ७) वर्षार्थे आग्नेययागोद्धरणकाले वृष्टिकामोऽस्मीति ऋत्विजं (!) प्रति ब्रूयात् · अथवा प्रकृते (प्रा°?) आग्नेययागे इष्टावेवायं प्रैषो भवति Ss. See १.५.२.१९. ८) ? प्रथमाग्ने° २. ९) ? प्रकृत्येष्ट्या २. १०) सर्वाण्येतानीति चार्थनिर्देशो न शब्दनिर्देशः न ह्येतानीत्येतावता नैतत्सुक्तं भवत्यतः प्रतिपदमुच्चारणम् Karka.

अन्वारम्भणीयाग्नावैष्णव एकादशकपालः सरस्वत्यै चरुः सरस्वते द्वादशकपालो दर्शपूर्णमासारम्भे ॥ २२ ॥ दर्शपूर्णमासारम्भे प्रथमप्रयोगे अन्वारम्भणीया इष्टिर्भवति उद्धरणादिकर्मापवर्गान्ता । चरुशब्देनानवस्रावितोऽन्तरूष्मपक्व ईषद्दग्धव्रीहितण्डुलसिद्ध[1] ओदन उच्यते · स्थाली तु तत्सम्बन्धाल्लक्ष्यते सलेपं चरुमित्यादौ (७.५.१७) · चरुलक्षणं छन्दोगपरिशिष्टे (कर्मप्रदीप° २.५.१३) स्वशाखोक्तश्च सुस्विन्नो ह्यदग्धोऽकठिनः शुभः न चातिशिथिलः पाच्यो न चरुश्चारसस्तथेति · स्थालीलक्षणमपि तत्रैवोक्तम् (२.५.१२) तिर्यगूर्ध्वं समिन्मात्रा दृढा नातिवृहन्मुखी मृन्मय्यौदुम्बरी वापि चरुस्थाली प्रशस्यते · तथा मेक्षणेन चरोरवदानं कार्यम् लक्षणमपि तत्रैवोक्तम् (२.५.१४) इध्मजातीयमिध्मार्धप्रमाणं मेक्षणं भवेत् वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षममिति । इयं चाधानानन्तरं प्रथमपौर्णमास्यां मातृश्राद्धानंतरं पूर्वाह्णऽएव सद्यो भवति · द्वादशरात्राद्यग्निधारणमध्ये चेत्पौर्णमासी भवति तदा तेष्वेव धृतेष्वग्निषु अन्वारम्भणीया पौर्णमासेष्टिश्च कार्या अन्यथा पृथक्पृथगुद्धृत्य । आरम्भऽइत्युक्तत्वात्[2] प्रथमप्रयोगऽएवान्वारम्भणीया शाखान्तरात् · इयं च दर्शपूर्णमासविकारेषु सर्वेष्वपि प्रथमारम्भे भवति · तत्र नित्यानामारम्भे सकृत् काम्यानां चारम्भे पुनः कार्या सोमसौत्रामणीवर्ज्जम् · तथा चोक्तम् नित्यानां सकृदारम्भे काम्यानां च पुनः-पुनः सोमसौत्रामणीवर्ज्जमन्वारम्भः प्रशस्यतंऽइति ।

पष्ठौही दक्षिणा मिथुनौ वा ॥ २३ ॥ अस्यामन्वारम्भणीयायाम् · पष्ठौही वालगर्भिणीत्यमरः (२.९.६९) बालैव या गर्भिणी सा पष्ठौही[3] । मिथुनौ मिथुनार्हौ गावौ स्त्रीपुरुषरूपौ · ननु मिथुनशब्दे[न] स्त्री[पुं]युग्ममुच्यते द्विवचने[4] तु द्वे स्त्रीपुंयुग्मे कुतो न भवतः · उच्यते · मिथुनौ ते गावौ तिस्रस्ते ऽन्या इत्यत्र (३.३.२.४) निश्चितम्[5]

---

1) ? °वितरंतरोष्मपक्वाविषद्दग्धव्रीहि°? 2) दर्शपूर्णमासारम्भऽइति श्रुतत्वात्प्रथमप्रयोगऽएव भवति · एवं हि श्रूयते दर्श°सावारप्स्यमाणोऽन्वारम्भणीयया यजेतेति · आरम्भस्य च विद्यमानत्वाद्विकारेऽपि प्रवृत्तिः यथा आग्रयणेष्ट्यां चातुर्मास्येषु चारम्भस्य एकत्वात्सकृदेव भवति क्षामवत्यादिषु वारम्भभेदात्पुनः-पुनः प्रयोगः Karka. 3) पृष्ठेन (!) या वृषभं वोढुं समर्था सा पष्ठौही Mahád. and Karka. 4) ? °वचनं? 5) मिथु-

इन्द्राय विमृधऽएकादशकपालः पौर्णमासमनु ॥२४॥ पौर्णमासेष्टिसमाप्त्यनन्तरम् । उद्धरणादिकर्मापवर्गान्तः ।

आदिविकल्पः ॥२५॥ आदावारम्भऽएव विकल्पो यस्य सः · आरभ्यते न वेति यद्यारभ्यते तदा यावज्जीवं क्रियतऽएव । तथा चोक्तम् द्रव्यं कालोऽनुनिर्वापो देवता श्रपणं तथा आदौ ये विधृताः पश्चात्तऽइमे सर्वदा स्मृता इति · द्रव्यं दर्शपूर्णमासदाक्षायणादि काल उदितानुदितादिः अनुनिर्वापो वैमृध आदित्यश्च देवता इन्द्रो महेन्द्रो वा श्रपणं गार्हपत्यऽआहवनीये वेति [1] ।

आदित्यश्चरुरामावास्यम् ॥२६॥ अमावास्येष्टिसमाप्त्यनन्तरम् · उद्धरणादि कर्मापवर्गान्तः । अन्वाहार्यो दक्षिणा एव · अयमप्यादिविकल्प एव ॥ इन्द्राय विमृधऽइत्यादि दाक्षायणेऽपि ॥ ॥ पञ्चमी कण्डिका ॥५॥

अथ पद्धतिः ॥

अथ सर्वकर्मसूपांशु देवताः कथ्यन्ते · काम्यस्य कर्मणो देवता उपांशु भवति · अत्राहुः कर्काचार्याः व्यक्तत्वे चोदनैकत्वे तन्त्रैक्ये यत्र कामना तादर्थ्येनैव चोत्पत्तिस्तत्रैव स्यादुपांशुतेति [2] । आग्रयणे वैश्वदेव उपांशु भवति । वारुणवर्जिताः सर्वऽएककपाला उपांशु भवन्ति । प्राजापत्यः सर्वत्रोपांशु भवति । चातुर्मा-

---

नयोर्यो गावौ स्त्रीपुमांसौ न मिथुने · कुतः तद्यन्मेषश्च मेषी च भवत इत्युपक्रम्य (२.५.२.१५) मिथुनौ भवत इति श्रुतेः (१६) · तूपरौ मिथुनौ दद्यादिति (१.५.१.५७) श्रुतेश्च · पुंलिङ्गत्वाच्च Mahâd.

1) See schol. at १.८.३५. pag. १४१. 2) This çloka is only quoted by Karka, not his own: his scholion on the first sûtra runs thus: काम्ये कर्मणि देवतानामुपांशुत्वं भवति । देवताग्रहणं न कर्तव्यम् चरणशब्दे सर्वं देवतान्यत्रेत्युक्तत्वादुपांशुत्वस्य (३.७.८-१) एवं चेत् व्यक्ताचोदनादेवतास्वेवोपांशुत्वम् नाव्यक्तासु सोमविकारेष्विति देवताग्रहणम् · सौत्रामण्यां तर्हि व्यक्तत्वादुपांशुत्वमस्तु नैतदेवम् तन्त्रभेदस्तु तत्र · एकतन्त्रे चोपांशुत्वमित्याचार्याभिप्रायो येनैन्द्रवायोधसयोरुपांशुत्वं (१४.१५) विदधातीष्टिषु च · एवं च राजसूयेऽव्यनुमत्यादिषु नैवोपांशुत्वम् तन्त्रभेदात् · प्रजाकामवैश्वदेवे तर्ह्यस्तु उपांशुत्वम् व्यक्तत्वादेकतन्त्रत्वाचोदनैकत्वात्काम्यत्वाच्च · तथा पञ्चबिले नैतदेवम् न हि तत्र काम्यतयैवोत्पत्तिः · तेन यत्र व्यक्तत्वं चोदनैकत्वं चैकतन्त्र्यं च कामार्थं चोत्पत्तिस्तत्रैवोपांशुत्वम् यथा मित्रविन्दायाम् । आह च व्यक्तत्वेऽपांशुता ।

स्येषु चतुर्ष्वपि पर्वसु सावित्र उपांशु भवति · चातुर्मास्येष्वेव वैश्वदेवपर्वणि वैश्वदेवी पयस्योपांशु भवति वैश्वदेवीति स्त्रीलिङ्गनिर्देशात्पाशुकेषु वैश्वदेवः पशुः पुरोडाशो वा नोपांशु · शुनासीरीये वायव्यं पय उपांशु भवति यवागूपक्षेऽपि वायोरुपांशुत्वं भवति तेषां वै चतुर्णां द्वयोस्त्रीणि-त्रीणि हवींष्यनिरुक्तानि भवन्तीति (११.५.२.७) श्रुतत्वात् । अग्न्याधेये तनूहविषां देवता उपांशु भवन्ति न सकला इष्टयः चरणशब्दाभावात् · यत्रोपांशु चरन्तीत्येवं चरणशब्दस्तत्रैव सर्वमुपांशु भवति चरणशब्दे सर्वमित्युक्तत्वात् (३.७.८) · आदित्येष्ट्यास्तनूहविष्ट्वाभावेऽपि बह्वृचवशादुपांशुत्वम्[1]। दीक्षणीयाप्रायणीयातिथ्येष्टीनां देवता उपांशु भवन्ति । अग्नौ[2] चयने वायव्य इष्टकापशुरुपांशु भवति · चयन एवान्ते या मैत्रावरुणी पयस्या सोपांशु भवति अग्नाविति विशेषोक्तेर्दाक्षायणाग्निष्टोमादौ मैत्रावरुण्याः पयस्याया नोपांशुता । सौत्रामण्यां प्रथम ऐन्द्रः पशुरुपांशु प्रथमग्रहणात्त्रिपशौ ऐन्द्र ऋषभ इत्यत्र (१९.२.३) नोपांशुत्वम् · वायोधसोऽपि सौत्रामण्यामन्ते भवति सोऽप्युपांशु । अत्र बह्वृचानां विशेष उक्तः (शाङ्खायन°१.१.३६-३७) प्रणवो ये-यजामहो वषट्कारः सम्प्रैषाः प्रैषाश्चोच्चैरुपांशुहविःषु देवतानामधेयं चोपांश्विति ॥ ॥ सर्वकामावाप्त्यर्थमाग्नेयोऽष्टाकपालः काम्यो भवति · तत्रापि देवता उपांशु भवति । वृष्ट्यर्थे आग्नेये क्रियमाणे विशेषः · आग्नेयस्यारम्भे वृष्टिकामोऽस्मीत्येवं यजमानो ब्रूयात् · अथ यजमान एव पुरोवातं च विद्युतं च मनसा ध्यायेत्यध्वर्युं प्रति ब्रूयात् ततोऽभ्राणि मनसा ध्यायेत्यग्नीधं प्रति ब्रूयात् ततः स्तनयित्नुं च वर्षं च मनसा ध्यायेति होतारं प्रति ब्रूयात् ततः पुरोवातं च विद्युतं चाभ्राणि च स्तनयित्नुं च वर्षं च मनसा ध्यायेति ब्रह्माणं प्रति ब्रूयात् · एवं कृते आग्नेययागाद्वृष्टिलक्षणं फलं भवति । अथवा वृष्टिकामो यजमानः प्रकृतौ दर्शपूर्णमासेष्टावेवोद्धरणकालऽएवं ब्रूयात् · न पृथगाग्नेयेष्टिः कार्या ॥ ॥ अथान्वारम्भणीयेष्टिरुच्यते · सा च दर्शपूर्णमासयोरारम्भे मातृश्राद्धानन्तरं पौर्णमास्यां भवति द्व्यहपक्षे · सद्यः पौर्णमासानुष्ठानं चेत् प्रतिपद्येवान्वारम्भणीया भवतीति सम्प्रदायः । तस्यां त्रीणि ह-

---

1) See Çânkh. २.३.१५. 2) the देवसूदेविकाहवींषि are here erroneousty omitted!

वीेपि भवन्ति आग्नाविष्णव एकादशकपालः पुरोडाशः सरस्वत्यै चरुः सरस्वते द्वादशकपालः पुरोडाशः । उद्धरणादिकर्मापवर्गान्ता पौर्णमासेष्टिवत् । विशेषः · अन्वारम्भणीयेष्ट्यर्थमित्युद्धरणे · अन्वारम्भणीयेष्ट्या वयं यक्ष्यामहऽ इति वरणे · पात्रासादने दशगणे[1] शूर्पाग्निहोत्रहवणि स्फ्यः कपालानि त्रयोविंशतिः चरुस्थाल्येका शम्यादि अर्थवति अन्वाहार्यस्थाने पष्ठौही दक्षिणा पष्ठौही बालगर्भिणी मिथुनौ मिथुनार्हौ गावौ स्त्रीगवी पुंगवश्च विंशतिकाष्ठक इध्मः शृतावदानानन्तरं मेक्षणम् अन्यत्पूर्ववत् · ग्रहणे अग्नाविष्णूभ्यां जुष्टं गृह्णामि पुरो॰ सरस्वत्यै जुष्टम् चरुः सरस्वते जुष्टम् पुरो॰ · प्रोक्षणे अग्नाविष्णूभ्यां त्वा जुष्टं प्रोक्षामि सरस्वत्यै त्वा जुष्टम् सरस्वते त्वा जुष्टम् · कणान्ते चरोस्तण्डुलान्विभज्यालम्भः इदमग्नाविष्णवोः सरस्वतश्च इदं सरस्वत्याः · एतच्च व्रीहिमयपुरोडाशपक्षे · यवपुरोडाशपक्षे चरुर्व्रीहिमय एव तदा नानाबीजपक्षे उरु वातायेतीक्षणं (२.३.१६) भेदेन अपहृत्यनिरसनं (१७) भेदेन अभिमर्शनं चेत् (१८) भेदेन यच्छन्तामिति (१९) भेदेन शेषाभिमर्शनं (२३) च भेदेन · अवघाते फलीकरणान्तमेकस्य कृत्वा ततो द्वितीयस्य मन्त्रेणावपनम् मुसलं तु गृहीतमेव (२.४.११) स इदं तु भवति (१२) न शूर्पादानमन्त्रः (१६) प्रति त्वेत्युद्वपनम् (१७) पूर्वस्य तुषैः सह तुषनिरसनम् (१९) भेदेन वा निष्पवणादि फलीकरणान्तं (१८-२२) भेदेन । चरोः पेषणासंयवनपात्र्यांसंवापोपधानभृगूणामितितापनप्रथनाद्भिरभिमर्शनज्वालयोपरिश्रपणाभिवासनस्थाल्याउद्धृत्यपात्र्यामासादनानि[2] न भवन्ति अन्यत्सर्वं भवति · तथा चोक्तम् पेषणं यवनं वापस्तापश्चोपधितिः प्रथा मार्जनाभ्यूहनज्वालास्तथा व्युद्धृत्य-सादनमिति पेषणं चूर्णनम् यवनं पिष्टस्योदकमिश्रणम् वापः उदकमिश्रणाय पात्र्यां प्रक्षेपः तापः कपालानामङ्गारैः प्रतापनम् उपधितिः अङ्गारेषु कपालस्थापनम् प्रथा कपालेष्ववस्थापितस्य पुरोडाशस्य हस्तसंघट्टनेन सर्वेषु कपालेषु प्रसारणम् मार्जनं श्लक्ष्णीकरणम् अभ्यूहनं भस्मनाङ्गारैश्चोपर्याच्छादनम् ज्वाला दर्भैरवज्वालनम् व्युद्धृत्य-सादनं कपालेभ्यः पुरोडाशं पृथक्कृत्यान्तर्वेद्यवस्थापनम् ।

1) See २.३.८-९ 2) a very ungrammatical compound!

पिष्टानामीक्षणं कृत्वा चरोस्तण्डुलानामीक्षणम् · पिष्टानि पात्र्यामोप्य सपवित्रे चरुपात्रे तण्डुलावापः ततस्त्रिः प्रक्षालनम् तत उपसर्जन्यानयनम् · पिष्टेषूपसर्जनीर्निनीय चरावपि निनयति · संयवनानन्तरं विभज्य पुरोडाशयोरालम्भः इदमग्नाविष्णवोः इदं सरस्वतः · प्रथमपुरोडाशस्योत्तरतश्चरोरधिश्रयणम् चरोरुत्तरतो द्वितीयस्य पुरोडाशस्य · कपालोपधानकालऽएव प्रथमस्य कपालान्युपधाय तस्योत्तरतश्चरोः स्थानं परिकल्प्य तस्योत्तरतो द्वितीयपुरोडाशकपालानामुपधानं कर्तव्यम् · चरोरधस्ताद्रूपणादानम् प्रसिद्धेः नोपरि · प्राणदाने (२.८.१४) अग्नाविष्णू गछ सरस्वतीं गछ सरस्वन्तं गछेति · अववाधने सप्तदशेन वज्रेणेति · उत्तमप्रयाजत्यागे इदमग्नये सोमायाग्नाविष्णुभ्यां सरस्वत्यै सरस्वते देवेभ्य इत्यादि · आज्यभागानन्तरं प्रधानयागे अग्नाविष्णुभ्यामनुब्रूहि अग्नाविष्णू यज सरस्वत्याऽअनुब्रूहि सरस्वतीं यज सरस्वतेऽनुब्रूहि सरस्वन्तं यज · ततः स्विष्टकृदादि आग्नावैष्णवस्य चतुर्धाकरणभागानामभावः इतरयोस्तु सर्वं भवति[1] · दक्षिणालम्भे प्रजापतेर्भागोऽसीति-मन्त्रे ऊर्गसीत्यस्य स्थाने पष्ठौही गौरस्यूर्जमित्यादि अस्या अन्वारम्भणीयेष्टेः समृद्ध्यर्थं पष्ठौहीं गां दक्षिणां ब्रह्मणे होत्रऽइत्यादि ब्राह्मणा इयं वः पष्ठौही गौः प्रतिगृह्णीतेति द्यौस्त्वा ददात्वित्येव प्रतिग्रहमन्त्रः सर्वेषाम् · मिथुनौ वेति-पक्षे गोमिथुनमस्यूर्गिति ब्राह्मणा इदं वो गोमिथुनं प्रतिगृह्यतामिति · व्यूहने अग्नाविष्णवोः सरस्वत्याः सरस्वत उज्जितिम् अग्नाविष्णू सरस्वती सरस्वांस्तमपनुदन्त्विति · प्रस्तरे होमत्यागे इदमग्नये सोमायाग्नाविष्णुभ्यां सरस्वत्यै सरस्वते देवेभ्य इति · पिष्टलेपकृतौ इदं विश्वेभ्यो देवेभ्य इति त्यागः । अन्यत्सर्वं कर्मापवर्गान्तं प्रकृतिवत् । इयं च दर्शपूर्णमासप्रकृतिषु सर्वास्विष्टिषु आरम्भे भवति · व्रीह्याग्रयणयवाग्रयणयोः साधारणी एकैव एकस्यैवाग्रयणस्याग्निहोत्रवदभ्यस्यमानत्वात् · याज्ञिकानां मते पशोरप्यारम्भे भवति कर्कमते[2] ॥ ॥ पौर्णमासेष्ट्यनन्तरं विकल्पेन तत्कालमेवोद्धरणादिकर्मापवर्गान्त इन्द्राय विमृधऽएकादशकपालः पुरोडाशो भवति · अन्वाहार्यो दक्षिणा । ग्रहणादौ विशेषः इन्द्राय विमृधे जुष्टम्

---

१) चरोर्मेक्षणेनावदानम् marg. in १. २) Some words seem to be missing here.

इन्द्राय विमृधे वा जुष्टम् इन्द्रं विमृधं गह इन्द्राय विमृधेऽनुब्रूहि इन्द्रं विमृधं यज · चतुर्धाकरणादि सर्वं भवति इन्द्रस्य विमृध उज्जितिम् इन्द्रो विमृत्तमपनुदतु · शेषं पौर्णमासवत् ॥ दर्शेष्ट्यनन्तरं विकल्पेनादित्यै चरुर्भवति · तत्र चरुधर्मा अन्वारम्भणीयायामुक्ताः · उद्धरणादि कर्मापवर्गात्समाग्नेयवत् · अन्वाहार्यो दक्षिणा । ग्रहणे अदित्यै जुष्टम् · प्रोक्षणे अदित्यै त्वा जुष्टम् · अदितिं गह अदित्याऽअनुब्रूहि अदितिं यज अदित्या उज्जितिम् अदितिस्तमपनुदतु · प्राशित्रादि सर्वं भवति ॥ अनयोरिष्ट्योरादिविकल्पः · दर्शपूर्णमासारम्भऽएकवारं यदि कृते तदा यावज्जीवं कर्तव्ये · यदि न कृते तदा यावज्जीवं न क्रियेतेऽएव ॥ ॥५॥

इति चतुर्थस्य पञ्चमी कण्डिका ॥ ॥

आग्रयणमैन्द्राग्नमग्रपाकस्य व्रीहीणां यवानां च ॥१॥ व्रीहीणां यवानां च अग्रपाकस्य आग्रयणसंज्ञं कर्म भवति · तत्र च प्रथमं हविरैन्द्राग्नम् ऐन्द्राग्नः एकादशकपालः पुरोडाशो भवति । शरदि व्रीह्याग्रयणं वसन्ते च यवाग्रयणमिति केचित् केचिदग्रपाकस्येत्यनुरोधात्प्रथमपक्वव्रीहियवादिसम्पत्तिकालऽएव कुर्वन्ति । वैश्वदेवश्चरुरिति तस्य यवमयत्वस्यापि सिद्ध्यर्थं यवानामित्युक्तम् अन्यथा ओदनशब्दस्य व्रीहितण्डुलसिद्धान्ने रूढत्वात् चरोरोदनत्वं च ।

वैश्वदेवश्चरुः ॥२॥ द्वितीयं हविः · उपांशु (४.५.२) ।

पयसि वा ॥३॥ वैश्वदेवश्चरुः पयसि दुग्धे वा अप्यते वा उदके · तत्र पयःपक्षे दुग्धोपसर्जनीनिनयने मन्त्र (१.२१) ऊहनीयः सं पय ओषधीभिः समोषधयो रसेन सꣳ रेवज्जगतीभिः पृच्यताꣳ सं मधुमन्मधुमतीभिः पृच्यतामिति ।

द्यावापृथिवीय एककपालः ॥४॥[1] उपांशु (४.५.३) ।

---

१) अयं सर्वेषामेककपालानां प्रकृतिः Mahâd. अस्य च वैश्वदेविकद्यावापृथिवीयप्रकृतित्वम् (५.१.११) लिङ्गदर्शनात् · तस्य हि सर्वहुतं करोति अपर्यावर्तं जुहोतीति चाम्नायते · ते चैते सर्वहोमापरिवृत्तीऽआद्ययागविधिपरे वाक्येऽनुवदति तस्य परिचक्षाऽथैतꣳ सर्वमेव जुहोति न स्विष्टकृतेऽवद्यति सा परिचक्षोतो ऊतः पर्यावर्ततऽइति (२.४.२.१) सा द्विती-

उद्वास्यान्तांश्छादयेदाज्येन ॥ ५ ॥ द्यावापृथिवीयमुद्वास्य प्राणदानानन्तरमस्यान्तानाज्येन लौकिकघृतेनाछादयेत् । द्यावापृथिवीयस्य सर्वस्यावदानम् उपरिष्टाद्विरभिघारणम् चतुरवत्तत्वसम्पादनाय पञ्चावत्तत्वसम्पादनाय तु उपस्तारोऽपि द्विः कर्तव्यः छन्दोगगृह्ये (गोभिल १.८.१४) तथा दर्शनात् सर्वहोमः[1] तथा होमः कर्तव्यो यथा न पर्यावर्तते उत्तानो न भवति । अस्य वैश्वदेविकद्यावापृथिवीयप्रकृतित्वं जैमिनिनोक्तम् (७.१.१३) एककपालानां वैश्वदेविकः प्रकृतिराग्रयणे सर्वहोमापर्यावृत्तिदर्शनादिति[2] । पक्षान्तरमाह

आज्यस्य वा यजेत् ॥ ६ ॥ अथवा द्यावापृथिवीयमाज्यस्य यजेत् आज्यमेव ध्रुवायाश्चतुरवत्तमवदाय यागः कर्तव्यः न पुरोडाशेन आज्ययागत्वेऽप्युपांशुत्वं भवत्येव शाखान्तरे यागसम्बन्धेनैवोपांशुत्वस्य दर्शनात्[3] ।

पुराणानां वा चरुः ॥ ७ ॥ अथवा वैश्वदेवश्चरुः जीर्णानां यवानां व्रीहीणां च कर्तव्यः वा नवानामिति तुल्यो विकल्पः । ऐन्द्राग्नद्यावापृथिवीयौ पुरोडाशौ नवानामेव चरुग्रहणात्

प्रथमजो गौर्दक्षिणा ॥ ८ ॥ अस्मिन्नाग्रयणे तस्मिन्वर्षे जायमानानां वत्सानां यजमानस्य गोष्ठे यः प्रथमो जातो वत्सः स दक्षिणा ये प्राचीनमेकाष्टकाया[4] वत्सा जायन्ते तेषां प्रथमं ददातीत्यापस्तम्बः । इदं चाग्रयणमेकमेव शरद्वसन्तयोरभ्यस्यते तेन द्वयोरेकैवान्वारम्भणीया भवति ॥ अधिकारमुपजीवन्नाह

वैश्वदेवस्य च ॥ ९ ॥ वैश्वदेवस्य चातुर्मास्यानां प्रथमस्य पर्वणः चकारात्प्रथमजो गौर्दक्षिणा ।

या परिचचा तचैतदुभयमप्यनिष्टमित्याज्यस्यैव यागः कर्तव्य इति तस्माद्वैश्वदेविकैककपालप्रकृतित्वमिति । एवं च सति त्रेधा बर्हिः (५.१.२५) अहतवासःपरिधानं (२२) चेहापि भवति नवप्रयाजाद्यपीति (५.२.७) चेत् न ऐन्द्राग्नवैश्वदेवविरोधात् । आज्ययागेऽपि उपांशुत्वं भवत्विति (? वासःपरिधानत्वविति Cod.) चेत् नैतदेवम् पुरोडाशेन हि तत्पर्वप्रस्याप्यते न चाज्यस्यासौ धर्मः तस्मादप्रवृत्तिरिति यत्तु वायव्ये पयसि द्रव्यान्यत्वेऽप्युपांशुत्वं भवति युक्तं तत्र प्रत्यक्षो ह्यसौ धर्मः (४.५.७-८) इह पुनश्चोदकत(?)इति Karka.

1) एतस्मात्स्विष्टकृदादि किमपि न भवति किंतु सर्वहुतो भवति Mahâd. 2) ? °मपरेव°? 3) पुरोडाशपक्षे उपांशुयागो नाज्यपक्षे Mahâd. 4) ? °ष्टकया ?.

दर्शपूर्णमासानीजानो दक्षिणाग्निपक्वं चातुष्प्राश्यं ब्राह्मणान्भोजयेत्किंचिद्दद्यात् ॥ १० ॥ [१]) सूतकशुक्रास्तादिनिमित्तवशाद्दर्शपूर्णमासारम्भोत्कर्षे सति आग्रयणकाले आगते तदतिक्रमणाशङ्कायामयं प्रकारः · निमित्तवशाद्दर्श॰साभ्यामनिष्ट्वान्यजमानो नवमन्नं व्रीहियवरूपं दक्षिणाग्नौ पक्त्वा चातुष्प्राश्यं चतुर्णां तृप्तिपर्यन्तं चतुरो ब्राह्मणान्भोजयेत् तेभ्यो भुक्तवद्भ्यो यथाशक्ति किंचिद्दक्षिणां दद्यात् · अत्र ब्राह्मणानामशनेनैवाग्रयणं [२]) सिध्यतीत्यभिप्रायः । एतच्चैत्र्यां दर्श॰सारम्भाभावे ज्ञेयम् चैत्र्यामारम्भे ततो [३]) दर्शेष्ट्यनन्तरं वैशाखे आग्रयणस्य कर्तुं शक्यत्वात् · वैशाख्यां दर्श॰सारम्भे च तदनन्तरं ज्यैष्ठे [४]) वसन्ताभावादाग्रयणकालातिक्रमः स्यादित्ययं प्रकारोऽनुष्ठेयः · अस्याग्रयणत्वात्पौर्णमास्याममावास्यायां वानुष्ठानमिति य इष्ट्याग्रयणेन (इत्यादौ) आग्रयणग्रहणस्यैवमर्थत्वात् इष्टिरूपस्याग्रयणस्य [५]) य इष्ट्येत्यनेनैव कालस्य सिद्धत्वात् ।

अग्निहोत्रायणिनो नवैः सायम्प्रातरग्निहोत्रहोमः ॥ ११ ॥ [६]) दर्शपूर्णमासोत्सर्गे कृते (४.२.४१) अग्निहोत्रमेव जुह्वतः आग्रयणस्य प्रकारमाह · अग्निहोत्रमेवायनं [यस्य] नान्यानि कर्माणि सोऽग्निहोत्रायणी तस्य नवैः व्रीहियवान्नैः सायम्प्रातरग्निहोत्रहोमो भवति आग्रयणकाले । अपरे अग्निहोत्रेणैव अग्निहोत्रहोमेनैव (अयनं) आग्रयणप्राप्तिमाग्रयणसिद्धिं य इच्छति सोऽग्निहोत्रायणी तस्यैवं कर्तव्यम् अनुत्सृष्टदर्शपूर्णमासस्यापि · एतदपि युक्तम् शाखान्तरे सामान्येनैवोक्तत्वात् ।

तदाशिताया वा पयसा ॥ १२ ॥ [७]) तन्नवमाशिता तदाशिता तस्या नवान्नं खादितायाः गोः पयसा वा सायम्प्रातरग्निहोत्रहोमः ।

दीक्षितव्रतं च ॥ १३ ॥ [८]) संवत्सरदीक्षादौ यज्ञे प्रारब्धे आग्रयणकाला-

---

१) दर्श॰साभ्यां त्रिंशतं वर्षाणीष्ट्वानिदानीं यः अनीजानः न यजते स दर्श॰जानः । शक्त्यनुसाद्दक्षिणा किंचिच्छब्देनोच्यते अष्टमुष्टि भवेत्किंचिदिति स्मृतेः Mah. २) ? ब्राह्मणानाशने॰ २. ३) ? ॰रम्भेत्ततो २. ४) ? ज्येष्ठे २. ५) ? इष्टरू॰ २. ६) अग्निहोत्रेणैवायनं गमनं कालयापनं करोति सोऽग्निहोत्रायणी · सायम्प्रातर्ग्रहणमेककर्मज्ञापनार्थम् · तत्पर्वणि वा शुक्लपक्षे वा Mahád. ७) तन्नवद्रव्यमाशितं यस्याः सा तदाशिता Mah. ८) न पत्नीव्रतम् दीक्षितग्रहणात् Mahád.

तिक्रमणाशङ्कायां नवान्नेन दीक्षितव्रतं कर्तव्यम् · तेनैवाग्रयणसिद्धिः · एतदस्याग्रयणाकालऽ एव ।

उपसत्सु रौहिणौ कुर्वीत ॥१४॥ संवत्सरोपसत्कादौ यज्ञे उपसत्सु आग्रयणाकालऽएव प्रवर्ग्ये[1] नवान्नेन रौहिणौ पुरोडाशौ कुर्वीत · ताभ्यामेवाग्रयणसिद्धिः ।

सुत्यासु सवनीयान्[2] ॥१५॥ संवत्सरसुत्यादौ आग्रयणाकाले नवान्नेन सवनीयान्पुरोडाशान्कुर्वीत ।

सौम्यः श्यामाकचरुरारण्यस्य ॥१६॥[3] आरण्यस्य धान्यस्याग्रयणं सोमदेवताकः श्यामाकश्चरुर्भवति · एतच्च वर्षासु शरदि वा भवति शाखान्तरात् श्यामाकाग्रपाकस्य तदानीमेव भावाच्च । आपस्तम्बसूत्रे चायं समानतन्त्र उक्तोऽस्ति · भिन्नतन्त्रोऽपि विकल्पेन तेन चोक्तः यदि नानातन्त्रां श्यामाकेष्टिं कुर्वीतेति ।

वैणवो ग्रीष्मे ॥१७॥ ग्रीष्मे ऋतौ वंशमयः सौम्यः चरुर्भवति · आपस्तम्बः वेणुयवानामिष्टिमेके समामनन्तीति । श्यामाकवैणवाग्रयणयोर्दक्षिणामाह ·

पुनःसंस्कृतो रथो दक्षिणा क्षौमं मधुपर्को वर्षाधृतं वा वासः ॥१८॥ वाशब्दः प्रत्येकं योज्यः · यो रथो भग्नः सन्पुनः सज्जीकृतः स पुनःसंस्कृतः · क्षुमा अतसी तत्तन्तुनिर्मितं क्षौमम् · मधुपर्कशब्देन दधिमधुघृतान्युच्यन्ते · वर्षा[सु] ऋतौ यजमानेन परिहितं तद्वर्षाधृतं वासः । शाखान्तरात्तु आग्रयणस्य पक्षान्तराण्यपि सन्ति ॥ ॥ षष्ठी कण्डिका ॥६॥ ॥

अथ पद्धतिः ॥

अथाग्रयणमुच्यते । तच्च शरद्वसन्तयोर्भवति नवधान्यस्य प्रथमप्राप्तौ वा · तदुक्तम् (कर्मप्रदीप॰ ३.७.१) शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते धान्यपाकवशादन्ये श्यामाको वनिनः स्मृत इति । एतदाग्रयणं पौर्णमास्याममावास्यायां वा

1) ? प्रवर्ग्ये २· 2) सवनीयाः Karka. (कर्तव्याः) · 3) आरण्यस्य अरण्यवासिनः · आरण्यं (!) श्यामाकनीवारादीति कर्कः Mahâd. आरण्याग्रयणं (!) श्याम्ग़ादि Karka.

भवति शुक्लपक्षे वा पुण्ये नक्षत्रे बह्वृचब्राह्मणे श्रवणात् · यदि पूर्वाह्णे पर्वा-न्तस्तदा सद्यस्कालपौर्णमासेष्टेः पूर्वमाग्रयणेष्टिः ततः पौर्णमासेष्टिः अमावास्ये-ष्ट्यनन्तरं चाग्रयणेष्टिः · तदा च वचनादमावास्येष्टिरमावास्यामध्यऽएव समापनी-या · तदुक्तम् अथो पूर्वाह्णपर्वक्षये दर्शेष्ट्याः परमुक्तमाग्रयणाकम् प्राक्पौर्णमासाच्च तदिति · अथो पूर्वाह्णपर्वक्षये चान्या इष्टिपश्वाद्या विकृतय उभयत्र प्राकृतेष्टेरन-न्तरमेव[1] भवन्ति । अत्रोक्तकाले नवानां व्रीहीणां नवानां यवानां चाग्रयणसं-ज्ञकेष्टिर्भवति । तत्र त्रीणि हवींषि भवन्ति ऐन्द्राग्नो द्वादशकपालः पुरोडाशः वैश्वदेवश्चरुर्यवकाले यवानाम् व्रीहिकाले व्रीहीणाम् नवानां वा पुराणानां वा पुराणा जीर्णाः द्यावापृथिवीय एककपालः पुरोडाशो वा आज्ययागो वो-पांशुयाजवत् · एतानि त्रीणि हवींषि व्रीहिकाले नवानां व्रीहीणां भवन्ति य-वकाले नवानां यवानाम् चरुस्तु विकल्पेन नवानां जीर्णानां वा । तत्रोद्धरणे व्रीह्याग्रयणेष्ट्यर्थं यवाग्रयणेष्ट्यर्थं वा · ब्रह्मवरणे व्रीह्याग्रयणेष्ट्या वयं यक्ष्या-महे यवाग्रयणेष्ट्या वा · पात्रासादने ऐन्द्राग्नस्य द्वादश कपालानि एका चरु-स्थाली द्यावापृथिवीयपुरोडाशपक्षे तस्यैकं कपालं पाणिसंमितम् द्वितीया दुग्धोपसर्जनी विकल्पेन वैश्वदेवचरुश्रपणार्था दक्षिणार्थे प्रथमजो वत्सः विं-शतिरिध्मकाष्ठानि द्वे पात्र्यौ एका वा शृतावदानानन्तरं मेक्षणम् अन्य-त्सर्वं प्रकृतिवत् · ग्रहणे इन्द्राग्निभ्यां जुष्टम् विश्वेभ्यो देवेभ्यो जुष्टम् द्यावा-पृथिवीभ्यां जुष्टम् · प्रोक्षणे इन्द्राग्निभ्यां वा जुष्टम् विश्वेभ्यस्त्वा देवेभ्यो जुष्टम् द्यावापृथिवीभ्यां वा जुष्टम् · कणनिधानान्ते चरोस्तण्डुलान्पृथक्कृत्यालम्भः इदमिन्द्राग्न्योर्द्यावापृथिव्योश्च इदं विश्वेषां देवानाम् · कपालोपधाने ऐन्द्रा-ग्नस्य द्वादश कपालान्युपधाय तस्योत्तरतश्चरुस्थानं कृत्वा तस्योत्तरत एककपाल-स्य प्रथमकपालधर्मेणोपधानम् · तपसा तप्यस्वेत्यभ्यूहनम् · पयसि वेति वैश्वदे-वचरोः पयसा श्रपणपक्षे पयस उपसर्जनीमधिश्रित्योद्वास्य चरौ निनयति त-त्र प्रतिग्रहमन्त्रऽऊहः सं पय ओषधीभिः समोषधयो रसेन सꣳ रेवतीर्जगतीभिः पृच्यताꣳ सं मधुमन्मधुमतीभिः पृच्यतामिति · उदकेन श्रपणपक्षे प्रकृतिवत् · च-

---

1) ? प्रकृते° १.

एधर्मा अन्वारम्भणीयायामुक्ताः · पुनरपि संयवनानन्तरं समं विभज्यालम्भः इ-
दमिन्द्राग्न्योः इदं द्यावापृथिव्योः · पुरोडाशयोर्मध्ये चरोरधिश्रयणम् · द्यावापृथि-
वीयस्य प्राणदानं कृत्वा लौकिकेनाज्येन तस्याप्तांश्छादयेत् · प्राणदाने इन्द्रा-
ग्नी गह विश्वान्देवान्गह द्यावापृथिव्यौ गह प्राकृतं च विकृताविति न्यायात् ·
अववाधने सप्तदशेन वह्निणेति · उत्तमप्रयाजे इदमग्नये सोमायेन्द्राग्निभ्यां वि-
श्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां देवेभ्य आज्यपेभ्यः · आज्यभागौ प्रधानयागे इ-
न्द्राग्निभ्यामनुब्रूहि इन्द्राग्नी यज विश्वेभ्यो देवेभ्यः उपांशु अनुब्रूहीति प्रथ-
मेन चरोर्मेक्षणेनावदानम् विश्वान्देवान् उपांशु यज द्यावापृथिवीभ्याम्
उपांशु अनुब्रूहि द्यावापृथिव्यौ उपांशु यज · सकृदुपस्तीर्य सर्वमपि पुरो-
डाशमखण्डमेव जुह्वां निधायोपरिष्टाद्द्विरभिघारयति · मानवे एककपालमन्य-
स्यां पात्र्यामलंकुर्वन्नभिपूरयति प्रचरणवेलायां बर्हिषि सादयित्वोपस्तीर्यैकक-
पालं सकृत्सर्वमवद्यत्याशयस्यान्वासिच्य द्विरभिघार्योपांश्वेककपालेन प्रचर्य वष-
ट्कृते मध्ये पाणिना जुह्वोत्यूतुं प्रतिष्ठितमाशयेनाभिजुह्वोतीति · अथवोपांशुया-
जवत् ध्रुवायाश्चतुरवदाय द्यावापृथिवीययागः कर्तव्यः · ततः स्विष्टकृदादि प्रा-
शित्रिडाव्यतिरिक्तं किमपि न भवति कर्कमते[1] चतुर्धाकरणवर्ज सर्वं भवत्ये-
व · दक्षिणायाम् ऊर्गसीत्यस्य स्थाने प्रथमजो गौरस्यूर्ज्जमिति अस्या इष्टेः
समृद्ध्यर्थं प्रथमजं गां दक्षिणां ब्रह्मणऽइत्यादि पूर्ववत् ब्राह्मणा अयं वः प्रथ-
मजो गौः प्रतिगृह्णीतेति द्यौस्त्वा ददात्वित्ययमेव प्रतिग्रहणमन्त्रः · व्यूहने
इन्द्राग्न्योर्विश्वेषां देवानां द्यावापृथिव्योरुज्जितिम् इन्द्राग्नी विश्वे देवा द्यावापृ-
थिव्यौ तमपनुदन्त्विति · प्रस्तरत्यागे इदमग्नये सोमायेन्द्राग्निभ्यां विश्वेभ्यो दे-
वेभ्यो द्यावापृथिवीभ्यां देवेभ्य इत्यादि · कर्मापवर्गान्तमन्यत्प्रकृतिवत् ॥ ॥

दर्शपूर्णमासेष्ट्यनन्तरमेवाग्रयणाख्या विकृतयो भवन्ति न ततः पूर्वम् ॥ ॥ तत्र
कृताधानस्य सूतकशुक्रास्तादिनिमित्तवशेनानिष्टदर्शपूर्णमासस्य यजमानस्याग्रयणा-
कालऽआगते कालातिक्रमे जायमाने आग्रयणकालऽएव मातृश्राद्धं कृत्वा दक्षि-
णाग्नौ नवान्नं चातुष्प्राश्यं पक्त्वा ब्राह्मणान्भोजयेत् तेभ्यो भुक्तवद्भ्यो यथाशक्ति

---

1) Karka's commentary gives here nothing the like.

किंचिद्दक्षिणां दद्यात् । दर्शपूर्णमासोत्सर्गानन्तरं केवलाग्निहोत्रहोमिनो यजमानस्य नवान्नेन सायम्प्रातरग्निहोत्रहोमः कर्तव्यः · अथवा पूर्वदिनेऽग्निहोत्रीं गां नवान्नं खादयित्वा तस्यां गोः पयसा सायम्प्रातरग्निहोत्रं जुहुयादाग्रयणकाल एव · तेनैवाग्रयणसिद्धिः । गवामयनादिमध्ये आग्रयणकालेऽआयाते नवान्नाशितायाः पयसा दीक्षितव्रतं कार्यम् · तेनैवाग्रयणसिद्धिः । संवत्सरोपसत्कादौ उपसत्स्वाग्रयणकालेऽआगते नवान्नेन रौहिणौ पुरोडाशौ कार्यौ । सुत्यास्वाग्रयणकाले नवान्नेन सवनीयाः कार्याः ॥ आपस्तम्बसूत्रे बह्वृचब्राह्मणे च दर्शपूर्णमासाभ्यां समानतन्त्रमाग्रयणं पठितमस्ति · तत्र पूर्वं प्राकृतानि हवींषि पश्चादाग्रयणस्य · सामिधेन्यः प्राकृतसंख्या एव · दक्षिणापि प्राकृत्येव ॥ ॥

अथ श्यामाकाग्रयणमुच्यते · तच्च वर्षासु शरदि वा यजनीयेऽहनि शुक्लपक्षे पुण्ये नक्षत्रे वा भवति । तत्र प्रथमप्रयोगे मातृश्राद्धमन्वारम्भणीयां च कृत्वा श्यामाकेष्टिः कार्या । तत्र सोमदेवत्यः श्यामाकानां चरुर्भवति · तत्र श्यामाकाग्रयणेष्ध्वर्यमित्युद्धरणे · श्यामाकाग्रयणेष्ट्याहमिति वरणे · पात्रासादने कपालस्थाने चरुस्थाली उपवेषाभावः दक्षिणार्थे पुनःसंकृतो रथः क्षौमं वा मधुपर्को वा दधिमधुघृतानि वर्षाकाले धृतं परिहितं वासो वा एते दक्षिणाविकल्पाः

हविः श्यामाकाः विंशतिरिध्मकाष्ठानि शृतावदानस्थाने मेक्षणम् अन्यत्प्रकृतिवत् · ग्रहणे सोमाय जुष्टम् · प्रोक्षणे सोमाय त्वा जुष्टम् · चरुधर्मा अन्वारम्भणीयायामुक्ताः · कणनिधानान्ते अध्वर्योः स्वयमेवोपसर्जन्यधिश्रयणम् यजमानस्याज्यनिर्वापो वेदबन्धश्च तण्डुलानामीक्षणम् सपवित्रे चरौ तण्डुलावापः उपसर्जन्यानयनादि पात्र्यङ्गुलिप्रक्षालननिनयनाभावः · प्राणदाने सोमं गच्छ · इदमहं७ सप्तदशेनेत्यवबाधनम् · उत्तमप्रयाजे इदमग्नये सोमाय सोमाय देवेभ्य इति त्यागः · प्रधानयागे इदं सोमाय मेक्षणेन चरोरवदानग्रहणम् चतुर्धाकरणादि सर्वं भवति · दक्षिणालम्भमन्त्रे ऊर्गसीत्यस्य स्थाने पुनःसंस्कृतो रथोऽसीति क्षौममसीति वा मधुपर्कोऽसीति वा वर्षाधृतं वासोऽसीति वा ब्राह्मणा [अयं वः पुनःसंस्कृतो रथः प्रतिगृह्णीतेति] इदं वः क्षौमं प्रतिगृह्णीतेति अयं वो मधुपर्कः इदं वो वर्षाधृतं वास इति · व्यू-

ह्ने सोमस्योज्झितिम् सोमस्तमपनुदत्विति · प्रस्तरहोमे इदमग्नये सोमाय [सोमाय] देवेभ्य इति · शेषं प्रकृतिवत् । ग्रीष्मे ऋतौ वेणुयवानामिष्टिमेके समामनन्ति वेणुयवेषु पक्वेषु वेणुयवानुद्धर्तवाऽइति सम्प्रेष्यति तस्या एतदेव तन्त्रमेषा देवता आग्नेयी मैत्रावरुणी प्राजापत्या वेति · एतत्तन्त्रमेषा देवतेति श्यामाकेष्टौ यदुक्तम् तस्यादेशः · अत्र देवतान्तरपक्षे आरम्भे वृद्धिश्राद्धान्वारम्भणीये भवतः देवतान्यत्वे कर्मान्यत्वात् सोमदेवतापक्षे तु न भवतः[1] · श्यामाकेष्टिस्तु आपस्तम्बसूत्रे वैतानसूत्रे च व्रीह्याग्रयणेन समानतन्त्रतयाप्युक्तास्ति ॥ ॥ ६ ॥

इति चतुर्थस्य षष्ठी कण्डिका ॥ ॥

अमावास्यायामग्न्याधेयम् ॥ १ ॥[2] अग्न्याधेयमिति संज्ञा कुरुक्षेत्रे परीणाह्नि स्थलेऽग्न्याधेयमित्यादौ (२४.६.३४) अग्न्यगारकरणादीष्ट्यन्तस्य कर्मसमुदायस्य संज्ञा मन्थनमात्र[स्य] स्थापनमात्रस्य वा । तत्र चामावास्याशब्देन गौण्या वृत्त्या प्रतिपदुच्यते श्रुतौ तथा दर्शनात् · स योऽमावास्यायामग्नीऽआधत्तऽइति प्रकृत्य (११.१.१.२) यदह्नेवैष न पुरस्तान्न पश्चाद्ददृश्येत तदहरुपवसेत्तर्हि ह्येष इमं लोकमागच्छतीति (४) मुख्यामावास्यायामुपवासं दर्शयति · अत्रोपवासशब्देन यमनियमयुक्तावस्थानमुच्यते यदहरस्य श्वोऽग्न्याधेयं स्याद्दिवैवाश्नीयात् (२.१.४.१) अथ जाग्रति जाग्रति देवा इत्यादिकम् (७) तेनोपवसेत् यमनियमयुक्तो भवेदित्यर्थः · तस्मान्मुख्यामावास्यायामग्न्यगारादि ब्रह्मौदनान्तमुपक्रम्य प्रतिपद्याधानं कार्यम् । नक्षत्राधानपक्षे तु पूर्वदिने उपक्रमः नक्षत्रदिने मन्थनम् । श्वोऽग्नीनाधास्यमान उपवसेत्पूर्वां पौर्णमासीमुत्तराममावास्यां नक्षत्रं वेति[3] शाखान्तरम् · अतश्च पौर्णमास्याधाने चतुर्दश्यामुपवासाद्युपक्रमः पौर्णमास्यामग्न्युत्पत्तिरिष्टयश्च श्वोऽन्वारम्भणीया पौर्णमासं चेति पूर्वदिने वा पौर्णमास्यामन्वारम्भणीयेति सिद्धम् · कठसूत्रे पौर्णमास्यामादधानः पूर्वामुपोष्याधायाग्न्याधेये-

१) ? भवति १· २) एतदग्न्याधेयं वर्णविभागान्तं भवति · यावद्वर्णविभागोऽस्ति यावद्वेदाः प्रवर्तन्ते संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगऽइति स्मृतेः Mahâd. ३) नक्षत्रे चेति २· but see the paddhati, where the same passage is quoted from the Mânavam.

ष्टिभिरिष्ट्वा जुह्वदग्निहोत्रमुपतिष्ठमानो वसति श्वोऽन्वारम्भणीया पौर्णमासं चेति · मानवे पौर्णमास्यामाधाय सोपवासमन्वारम्भणीयां कृत्वा सद्यस्कालया पौर्णमास्या[1] यजेतामावास्या[यामा]धाय नक्षत्रे वा पौर्णमासीमुपोष्यारम्भणीयां कुर्वीतोत्तरामुपोष्य पौर्णमास्या यजेतेति ।

कृत्तिकारोहिणीमृगशिरःफल्गुनीषु ॥२॥[2] कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु च · अयममावास्यया सह विकल्पः · न समुच्चयः अमावास्यायामेवैतेषु नक्षत्रेष्विति[3] ।

हस्तो लाभकामस्य ॥३॥[4] य इच्छेत्प्र मे दीयेतेति (२.१.२.११) प्रकर्षार्थप्रशब्दप्रयोगाल्लाभशब्देन प्रतिग्रहेणार्थप्राप्तिरुच्यते · तेनायं ब्राह्मणस्यैव कालः प्रतिग्रहस्य ब्राह्मणस्यैव व्रतत्वात् ।

चित्रा च क्षत्रियस्य ॥४॥[5] चकाराल्लाभकामस्य ॥ व्यवहारसारे अग्न्याधानं द्विजेन्द्राणां स्यात्कृत्तिकाविशाखयोः रेवतीरोहिणीपुष्यमृगज्येष्ठोत्तरात्रये । शाखान्तरेष्वन्येष्वपि नक्षत्रेष्वाधानं श्रूयते · तथा अमावास्यायां पौर्णमास्यां वा आधेय इति ।

वसन्तो ब्राह्मणब्रह्मवर्चसकामयोः ॥५॥ ब्राह्मणस्य निष्कामस्य · ब्रह्मवर्चसकामस्यापि ब्राह्मणस्यैव युक्तम् ।

ग्रीष्मः क्षत्रियश्रीकामयोः ॥६॥ निष्कामस्य क्षत्रियस्य · श्रीकामस्य त्रैवर्णिकस्यापि अक्षत्रियजातिरपि श्रिया सम्पदा कीर्त्या च क्षत्रात्मकः स्यामिति कामयमानस्य ब्राह्मणादेः (२.१.३.७) ।

वर्षाः प्रजापशुकामवैश्यरथकृताम् ॥७॥ प्रजाकामस्य पशुकामस्य त्रैवर्णिकस्य वैश्यस्य निष्कामस्यापि रथकृतश्च निष्कामस्य । शाखान्तरे शिशिरः सर्ववर्णानाम् तथा च शिशिरः सार्ववर्णिक[6] इति । एवं कालमुक्त्वा कर्तव्यमाह[7] ·

---

1) ? °मप्यार° °लायाः पौ° स्या २. 2) शुद्धं नक्षत्राधानं क्षत्रियविषयम् Mahâd. 3) एवं हि समामनन्ति स योऽमावा° मियादेवं तदित्यमावास्यायां विधाय (११.१.१.२.) नक्षत्रनिषेधेन संस्तौति अथ यो नक्षत्रऽ °देवं तादिति (३) · तस्मादत्रापि नक्षत्रविकल्पः Karka. 4) स हस्तोऽमावास्याविशिष्ट आश्विने भवति Mahâd. 5) सा चित्रामावास्याविशिष्टा कार्त्तिके भवति Mahâd. 6) ? सर्व° २. 7) इदानीं पूर्वेषुरुपक्रममाह Karka.

अग्न्यगारे कुर्वन्ति ॥ ८ ॥[1] अगारं गृहम् अग्न्योरगारे गृहे अग्न्यगारे अर्थात्परिमाणे अग्न्युत्पत्तिक्रमेण कुर्वन्ति चत्वारः अध्वर्य्वादयः पूर्वं गार्हपत्यगृहम् पश्चादाहवनीयगृहम् ।

उदग्वंशं वापरम् ॥ ९ ॥ अपरं गार्हपत्यागारमुदग्वंशं वा वा प्राग्वंशम् · आहवनीयागारं तु प्राग्वंशमेव ।

दक्षिणपूर्वे द्वारे ॥ १० ॥ उत्पत्तिक्रमेण गार्हपत्यागारस्य दक्षिणं द्वारम् आहवनीयागारस्य प्राच्याम् । अर्थाद्गार्हपत्यागारे पूर्वद्वारम् आहवनीयागारे अपरद्वारम् तस्मान्न विहिते · न ह्यन्यथा गार्हपत्याहवनीयपर्यन्तं धारानिनयनविधानं गार्हपत्यावेक्षणं च सम्भवति ।

पौर्णमासवद्वपनम् ॥ ११ ॥ यजमानस्य पौ॰वत्केशश्मश्रुवपनं भवति · शाखान्तरे नखनिकृन्तनमपि ।

क्षौमे वस्तेऽहते ॥ १२ ॥[2] यजमानोऽहते अधौते सकृत्प्रक्षालिते वा क्षौमे परिधत्ते · क्षुमा अतसी तद्विकारे क्षौमे ।

पत्नी च ॥ १३ ॥ अहते क्षौमे वाससी परिधत्ते ।

संस्थितेऽध्वर्यवे देये ॥ १४ ॥[3]

गार्हपत्यागारे निर्मथ्याभ्यादधाति ॥ १५ ॥[4] अर्थाद्विहितकाष्ठाभ्यामग्निं निर्मथ्य · गा॰गारे गार्हपत्यखरस्य मध्ये अग्नेः स्थानमुल्लिख्य ।

वैश्यकुलाम्बरीषमहानसाद्वा ॥ १६ ॥ अग्निमाहृत्य गार्हपत्यागारेऽभ्यादधातीति शेषः । वैश्यकुलाच्च लौकिकोऽग्निर्हुतोच्छिष्टो वा ग्राह्यः न तु परिगृहीत आवसथ्यादिः · अथवा अम्बरीषात् भ्राष्ट्रात् कन्दुकगृहात्[5] · महानस-

---

1) दशदशहस्तपरिमाणे · अग्निहोत्रशालाव्यवहारात् त्रिमितं परिमितमेकैकमगारं भवति · तथा विंशत्यरत्नि(:) शाला स्यात्तदर्धेन तु विस्तृता त्रिमितं चतुरस्रं स्याद्दशारत्निप्रमाणत इति · नवहस्तमितमेकैकमिति शाखान्तरात् । कुर्वन्तीति बहुवचनसामर्थ्यादप्राकृताः Mahâd. 2) नवं श्वेतं सकृद्धौतं नान्यपुरुषधारितम् अहतं तद्विजानीयात्पवित्रं सर्वकर्मसु इति स्मृतिः · यत्त्वमुतोऽइति कर्कः Mahâd. but Karka says here merely: क्षौमे ऽआतसेऽअहतेऽअधौते · 3) संस्थिते कर्मणि Mahâd. 4) मन्थनं संनिधानात्प्रकृताभ्यामेवारणिभ्याम् अनयोर्हि संनिधानात् Karka. 5) अम्बरीषात्कन्दुगृहात् Ss. अम्बरीषो भ्राष्ट्रः कन्दुरिति यः प्रसिद्धः Mahâd.

शब्देन धान्यादिपाकार्थं गृहमुच्यते यत्रानवरतबहुपाकवशादक्षीयमाणोऽग्निर्भवति । स चाग्निः पञ्च भूसंस्कारान्कृत्वा स्थापनीयः ।

दिवाश्नाति रात्रौ वा ॥ १७ ॥[1] यजमानः ।

उपास्तमयम् देवाः पितरः पितरो देवा योऽहमस्मि स सन्यजे यस्याहमस्मि न तमन्तरयामि स्वं मऽइष्टꣳ स्वꣳ श्रान्तꣳ स्वꣳ हुतमस्त्विति ॥ १८ ॥ अस्तमयसमीपकाले आहवनीयागारस्य पुरस्तादुपविष्टो यजमानः देवाः पितर इति देवान्पितॄंश्चाह्वयति · पत्न्यपि तत्र दक्षिणतस्तिष्ठति ।

पूर्वेण प्रविशति ॥ १९ ॥ ततो यजमानः पूर्वेणाहवनीयागारद्वारेणाग्न्यगारयोः प्रविशति ।

दक्षिणेन पत्नी ॥ २० ॥ गार्हपत्यागारस्य दक्षिणेन द्वारेण पत्न्यग्न्यगारे प्रविशति ।

पश्चादग्नेरुपविशतो दक्षिणतः पत्नी ॥ २१ ॥ स्थापितस्याग्नेः पश्चात् · तयोर्मध्ये पत्नी दक्षिणतः अर्थाद्यजमान उत्तरतः ।

अश्वत्थशमीगर्भारणी प्रयच्छति ॥ २२ ॥ शमीमध्यऽउत्पन्नोऽश्वत्थः शमीगर्भ इत्युच्यते शम्या गर्भः शमीगर्भः · अश्वत्थश्चासौ शमीगर्भश्च अश्वत्थशमीगर्भः · तन्निर्मिते द्वे अरणी अध्वर्युर्यजमानाय समर्पयति । तल्लक्षणं चैवम् · शमीगर्भस्याश्वत्थस्य प्राङ्मुख्या उदङ्मुख्या वा ऊर्ध्वगाया[2] वा शाखायाः छेदं कृत्वा तन्मय्यौ अरणी कार्ये · ते चतुर्विंशत्यङ्गुष्ठदैर्घ्ये षडङ्गुष्ठविस्तारे[3] चतुरङ्गुष्ठोच्छ्राये भवतः मानं मध्यमेनाङ्गुष्ठपर्वणा कर्तव्यम् · एवंविधा एका अधरारणिः द्वितीया उत्तरारणिरिति · ते चैते अरणी अग्निमन्थनार्थं परिगृह्येते । तेऽएव सदा धार्ये अन्ते प्रतिपत्तिविधानात् अरणी वृषणयोरिति (२५.७.३०) · अत एव कात्यायनेनोक्तम् (कर्मप्रदीप॰ ३.१.१८) अरण्योरल्पमप्यङ्गं यावत्तिष्ठति पूर्वयोः न तावत्पुनराधानमन्यारण्योर्विधीयतऽइति[4] · नाशक्षयदाहादिनिमित्तेष्वन्ययोः परिग्रहोपदेशाच्च अरण्योर्दग्धयोर्वापि नष्टयोः क्षीणयोस्तथा आहृत्यान्ये समा-

---

१) न चायं दिवसनियमः किं तर्हि रात्र्यशनविकल्पार्थमिदमुक्तम् Karka. See २.१.४.२.
२) ? ऊर्ध्वगायतावा २. ३) ? षडंगुल॰ २. ४) See also the Yajnapârçva २११.

रोप्य पुनस्तत्रैव निर्मथेदिति · तथा च कात्यायनः (कर्मप्रदीप° ३.१.३) अरण्योः क्षयनाशाग्निदाहेष्वग्निं समाहितः पालयेदुपशान्तेऽस्मिन्पुनराधानमिष्यतऽइति · एवं च निमित्ताभावे परिगृहीतयोः अरण्योरात्मेच्छया तावन्न परित्यागो यावत्कथमपि अग्निमन्थनसम्भवः ।

अभावेऽगर्भस्य ॥२३॥ शमीगर्भस्याश्वत्थस्याभावे अगर्भस्य अश्वत्थमात्रस्य । कात्यायनः (कर्मप्रदीप° १.७.३) अलाभे वशमीगर्भाद्धरेदेवाविलम्बित[1] इति ।

वाचं यच्छा पूर्णाहुतेरित्याहास्तमिते निशायाम् ॥२४॥ अस्तमिते सूर्ये तदानीमेव निशायां यजमानं प्रति अध्वर्युराह · शाखान्तरात् ।

पर्युदयं वा प्रधानकालत्वात् ॥२५॥ वा पक्षव्यावृत्तौ · सूर्योदयसमीपे वा रात्रिविवाग्न्युपशमनानन्तरम् नास्तमितमात्रे । कुतः प्रधानकालत्वात् वाग्यमो हि पदार्थाङ्गम् पदार्थाश्च व्युष्टायामुपशमय्येत्येवमादयो (४.८.१५) व्युष्टायां रात्रौ पर्युदयं विधीयन्ते · अतोऽङ्गानां प्रधानकालता न्याय्येति न्यायाद्वाग्यमनस्य तदर्थप्रैषस्य च पर्युदयकालतैव घटते · एवं वाग्यमनस्य दृष्टार्थता भवति यतवाक्केन हि पदार्थाः सुखेन कर्तुं शक्यन्ते अन्यथा अदृष्टार्थता भवेत् · तस्मात्पर्युदयमेवेत्यवधारणा । केचिच्च खरसंस्कारानन्तरं प्रागश्वानयनप्रैषादिमं प्रैषमिच्छन्ति ॥ सप्तमी कण्डिका ॥७॥

अथ पद्धतिः ॥

अथाग्न्याधेयमुच्यते ॥ तच्चामावास्यायां भवति शाखान्तरात्पौर्णमास्यां च · तथा कृत्तिकासु वा रोहिण्यां वा मृगशिरसि वा पूर्वोत्तरफाल्गुनीषु वा · लाभकामस्य ब्राह्मणस्य हस्तनक्षत्रे वा क्षत्रियस्य लाभकामस्य चित्रानक्षत्रे वा · वसन्ते ब्राह्मणस्य निष्कामस्य ब्रह्मवर्चसकामस्यापि · ग्रीष्मे क्षत्रियस्य निष्कामस्य श्रीकामानां सर्वेषामपि · वर्षासु प्रजाकामस्य पशुकामस्य च त्रैवर्णिकस्य वैश्यस्य निष्कामस्यापि रथकारस्य च · यदहरेवैनं श्रद्धोपनमेत्तदहरादधीतेति श्रुतेर्यदा श्रद्धोत्पद्यते तदैवाधानम् नात्र कस्यापि कालस्य नियमः । आपस्तम्बः हस्ते यः कामयेत प्र मे दीयेतेति चित्रायां राजन्यो भ्रातृ-

---

1) Thus Káty. अभावे °जेद्धा अवि° २.

व्यवान्विशाखयोः प्रजाकामोऽनुराधेष्वृद्धिकामः श्रवणे पुष्टिकाम उत्तरेषु प्रोष्ठपदेषु प्रतिष्ठाकामः सर्वाणि नित्यवदेके[1] समामनन्तीति · ज्योतिःशास्त्रे अग्नेः परिग्रहं कुर्याद्विशाखाकृत्तिकामृगे रेवतीरोहिणीपुष्ये ज्येष्ठायामुत्तरात्रये[2] · कारिकायाम् माघादिपञ्चमासेषु श्रावणे चाश्विने तथा कुर्यान्मृगोत्तमाङ्गे वा आधानं शुक्लपक्षतः हस्तद्वये विशाखासु कृत्तिकादित्रये तथा पुनर्वसुद्वये तद्वद्रेवतीपूत्तरासु च भौमार्कवर्जिते वारे माधिमासे तथा क्षये चन्द्रेऽनुकूले पूर्वाह्णे रिक्ताविष्टिविवर्जिते · मानवे श्वोऽग्नीनाधास्यमान उपवसेत्पूर्वां पौर्णमासीमुत्तराममावास्यां नक्षत्रं वेति · आपस्तम्बः पौर्णमास्यां तु पूर्वस्मिन्पर्वणि सेष्टि सान्वारम्भणीयमपवृज्य श्वो भूते पौर्णमासेन यजतऽइति · काठके च आधानं चेत्पौर्णमास्यां पूर्वां तनूदेवताभ्य उपवसेदुत्तरामन्वारम्भणीयायै पर्वणे चेति · लौगाक्षिः[3] पौर्णमास्यामादधानः पूर्वामुपोष्याधायाग्न्याधेयेष्टिभिरिष्ट्वा[4] जुह्वदग्निहोत्रमुपतिष्ठमानो वसति श्वोऽन्वारम्भणीया पौर्णमासं चेति । अतश्चामावास्यायामाधाने अमावास्यायामुपक्रमः प्रतिपदि मन्थनादीष्ट्यन्तम् · पौर्णमास्यां चेत् चतुर्दश्यामुपक्रमः पौर्णमास्यां मन्थनादि इष्ट्यन्तम् · ह्रस्वपक्षे तस्मिन्नेव दिनेऽन्वारम्भणीया पौर्णमासार्थमुद्धरणाद्यन्वाधानाद्युपक्रमश्च प्रतिपदि पौर्णमासयागः · सद्यश्चेत्पौर्णमासं तदा प्रतिपद्येवान्वारम्भणीया पौर्णमासं चेति · नक्षत्राधानपक्षेऽपि पूर्वेद्युरुपक्रमः नक्षत्रदिने मन्थनादि · त्रिरात्रषड्रात्राद्यग्निधारणमध्ये चेत्पौर्णमासेष्ट्यारम्भः तदा तेषु नित्यधृतेष्वेवाग्निष्वन्वारम्भणीया पौर्णमासेष्टिश्च कार्या न पृथगुद्धरणम्[5] ॥ ॥ अथात्र पदार्थक्रमः । तत्र देहशुद्धये कृतप्रायश्चित्तो यजमानो मातृपूजापूर्वकं मातृश्राद्धं[6] कृत्वा ऋत्विजो वृणीते · तत्र स्फ्योपयद्धो यवानादाय ऋत्विजो दक्षिणं जान्वालभ्य अमुकसगोत्रामुकशर्मन्नित्यनैमित्तिककाम्यकर्मानुष्ठानार्थं श्रौतानग्नीनहमाधास्ये तत्र मे त्वं ब्रह्मा भव होता भव अध्वर्युर्भव अग्नीद्भवेति वृत्वा तानभ्यर्च्य[7] सुप्रोक्षिता-

1) °देव २ at ४. ७. ४. 2) °त्तरे त्रये १. but see schol. at ४. ७. ४. 3) This same passage appears in ३. at ४. ७. १. as quoted from the कठसूत्र. 4) °ग्नेधे° १. 5) See pag. ३३८, १२. 6) ? °कमाभ्युदयिकं श्राद्धं Chamb. 622. 7) वृत्वा गंधपुष्पवस्त्रादिभिर्यथासंभवं तानर्चयेत् Chamb. 622.

दि · यजमानस्य तिलकादि माङ्गल्यम् · आशीर्वादाः[१] । अरण्यादेर्लक्षणमुच्यते · शमीगर्भस्याश्वत्थस्य या प्राङ्मुखी शाखा भवति उदङ्मुखी वा ऊर्ध्वगा वा तां छित्त्वोभेऽअरणी कुर्यात् अरणिश्चतुर्विंशत्यङ्गुष्ठदीर्घा षडङ्गुष्ठविस्तारा चतुरङ्गुष्ठोच्छ्राया च भवति एवंविधा अधरारणिरुत्तरारणिश्च कार्या · अष्टाङ्गुलदीर्घो द्व्यङ्गुलोत्सेधविस्तार[२] उत्तरारण्या ईशानदिग्भागस्थितः प्रमन्थो[३] गृह्यते · द्वादशाङ्गुलं खादिरं चात्रं[४] वृत्तमष्टाश्रि मूलेऽग्रे च[५] लोहपट्टिकया नद्धम् तस्याग्रे लोहमयः कीलकः कार्यः मूले च चतुरस्रो गर्तः प्रमन्थाग्रप्रवेशनार्थः कार्यः · ओवीली[६] च खादिरी द्वादशाङ्गुला अधोभागे लोहपट्टिकायुक्ता च कार्या · तस्यां पट्टिकायां कीलकस्योपरि स्थापनार्थानि निम्नानि स्थानानि[७] कार्याणि · गोवालैः शणमिश्रैस्त्रिगुणं वृत्तं व्यामप्रमाणं च नेत्रं कार्यम् । अत्र पूर्वं द्वेऽअग्निगृहेऽअर्धपरिमाणे कर्तव्ये · तत्राहवनीयगृहमध्ये वेदिराहवनीयखरसंयुक्ता गार्हपत्यगृहमध्ये गार्हपत्यखरो दक्षिणाग्निखरश्च कार्यः । तत्साधनोपाय एवम् पूर्वं केनचिदुपायेन प्राचीं निश्चित्याग्न्यगारयोर्मध्ये पूर्वापरायतां रज्जुदण्डरेखां कृत्वा गार्हपत्यागारस्यापरभागे यथासम्भवं भूमिं परित्यज्य चतुर्दशाङ्गुलैर्वृत्तं गार्हपत्यखरं कुर्यात् । अत्रारत्नेश्चतुर्विंशो भागोऽङ्गुलम् न त्वङ्गुष्ठवृहत्पर्वप्रमाणम् षड्यवप्रमाणं वा[८] · कुतः · परिशिष्टेषु सर्वखराणामरत्निप्रमाणत्वोक्तेः · तथा हि अरत्निश्चतुरस्रस्तु पूर्वस्याग्नेः खरो भवेत् रथचक्राकृतिः पश्चाच्चन्द्रार्ध एव दक्षिण इति यज्ञपार्श्वे[९] · निगमेऽपि (२३) परिमण्डलं गार्हपत्यस्य धिष्ण्यमरत्निमात्रं चतुरश्रमाहवनीयस्यार्धचन्द्रवद्दक्षिणाग्नेः सभ्यावसथ्ययोर्गार्हपत्यवदिति । एवमरत्निमात्रक्षेत्रफलं गार्हपत्यखरं साधयित्वा

---

१) आशीर्वादांश्च ऋत्विजः पठेयुः Chamb. 622. २) °त्सेधविपुल Chamb. 622. ३) उत्तरारणिसमुत्थेन येन काष्ठेनोत्पत्त्यर्थं मथ्यते स प्रमन्थः स च प्रमन्थो यत्र लग्नं भवति तच्चात्रम् तदपि चात्रं यत्र प्रोतं क्रियते सा ओवीली Âçârka at the कर्मप्रदीप १.७.५. ४) चत्रं Chamb. 622. ५) वृत्तं मूलेऽग्रे च Chamb. 622. ६) Thus १. and Chamb. 622. ओवीली चात्रप्रोतकाष्ठविशेषः Âçârka. ७) कीलकप्रोतनार्थं स्थानानि Chamb. 622. ८) See Çulvapar. çloka २४. अङ्गुलस्य प्रमाणं हि षड्यवाः पार्श्वसंस्थिताः चतुर्विंशाङ्गुलोऽरत्निर्वितस्तिर्द्वादशाङ्गुलः । ९) I do not find there this passage, but it occurs in the çloka-part of the Çulvapariçishṭa (२०b and २१a).

तस्या मध्यादारभ्याष्टासु प्रक्रमेष्वेकादशसु द्वादशसु मत्या वेति (४.८.१७) उक्तप्रमाणादधिकेषु वा न्यूनेषु वा प्रक्रमेषु आहवनीयखरस्य मध्यं कुर्यात्· ततो यावत्प्रमाणा रज्जुः स्यात्तावानेवागमो भवेत् आगमार्धे भवेच्छङ्कुस्तदन्ते च निरञ्छनमित्यनेनोपायेनारत्निमात्रं[1] चतुरश्रमाहवनीयखरं[2] साधयेत् । ततो गार्हपत्याहवनीययोरन्तरं षड्वा सप्तधा वागन्तुसमं त्रेधा विभज्यापरवितृतीयलक्षणेन दक्षिणायम्य तस्मिन्नग्निरित्यनेनोपायेन[3] दक्षिणाग्निखरस्य मध्यमङ्कयित्वा विपर्यस्योत्तरत उत्कर इत्युत्करस्थानमप्यङ्कयेत्[3] · प्रकारान्तरमप्युच्यते अपि वान्तरत्रिभागोनया रज्ज्वा पूर्वार्धे समचतुरश्रं[4] कृत्वा श्रोण्यामग्निरित्यनेनोपायेन[3] दक्षिणाग्निस्थानमध्यमङ्कयित्वा विपर्यस्योत्तरांऽसऽ उत्कर इत्युत्करस्थानं[3] कुर्यात् · ततः सयवैरङ्गुलैः षड्भिरर्धं वृत्तमालिखेत् चतुर्भिः सयवैस्त्रिंशद्वरैर्न्मण्डलकं तत इति दक्षिणाग्निखरमर्धचन्द्राकारं साधयेत् · अथवा षोडशाङ्गुलतार्तीयि[5] वृत्तं स्यात्षोडशाङ्गुलम् तावदेव ततो गत्वा द्वेरेद्वृत्तमर्धके इत्युपायेन वा दक्षिणाग्निखरं साधयेत् · अत्राप्यरत्नेश्चतुर्विंशो भागोऽङ्गुलम् अतोऽरत्निप्रमाणरज्जोस्तृतीयं भागं परित्यज्य भागद्वयेन षोडशाङ्गुलं[6] वृत्तं कुर्यात् । वेदिसाधनोपायस्तु दर्शपूर्णमासेष्टाविवोक्तः (२.६.१-१०) । सभ्यस्य खरोऽपि गार्हपत्यखरवद्वृत्तः कार्यः ॥ ॥ अत्रायं पदार्थक्रमः । पूर्वं गार्हपत्यागारकरणम् तच्चार्थात्परिमाणम् पूर्वदक्षिणद्वारम् प्रागंशमुदगंशं वा कार्यम् · तत आहवनीयागारं नियमेन प्रागंशं पूर्वापरद्वारं च कार्यम् । सर्वे ऋत्विग्यजमानाः सम्भूयाग्न्यगारे कुर्वन्ति बहुवचनात् । ततः पौर्णमासवद्वपनम् · अत्राहापस्तम्बः केशश्मश्रु वपते नखानि निकृन्तते स्नात्येवं पत्नी केशवर्जमिति । ततः क्षौमेऽअहते वाससी यजमानः परिधत्ते · पत्नी च · तत्र यजमानस्य परिधास्ये[7] यश इति परिधानमन्त्रः[8] यशसा मेत्युत्तरीयस्य · द्विराचमनम् · पत्न्याश्च । ततो

---

1) °च्छंकुस्तदन्ते निरं°२. From the Çulvapar. çloka ३२b. ३३a, where we read °च्छंकुस्तदर्धे च निरंछनं · Chamb. 622 has: भवेच्छंकुं तदर्धेन नि°. 2) समचतुरश्रमा° Chamb. 622. 3) From the Çulvapariçish/a, see pag. २१०,१० ff. 4) पूर्वार्धे चतुरश्रं Chamb. 622. 5) Thus Chamb. 622. तार्तीये १· 6) °शांगुले Chamb. 622. 7) Thus Chamb. 622. परिधास्यै १· 8) परिधानवस्त्रस्य मन्त्रः Chamb. 622.

ऽध्वर्युर्गार्हपत्यागारे अर्थाजितकाष्ठाभ्यामग्निं निर्मथ्य गार्हपत्यागारमध्ये गार्हपत्यखरे पञ्चभूसंस्कारपूर्वकं स्थापयति · अथवा वैश्यकुलादग्निमाहृत्याम्बरीषाद्वाभ्राष्ट्राद्वाहृत्य अथवा महानसादाहृत्य महानसं नित्यपाकार्थं गृहम् । ततो यजमानो दिवाश्नात्येव रात्रौ चेच्छया[1] · ततोऽस्तमयसमीपे आहवनीयागारात्पूर्वस्यां दिश्युपविश्य स्फ्योपग्रहो देवाः पितर इति मन्त्रेण देवान्पितॄंश्चाह्वयति पत्न्यपि तत्र संनिधावुपविशति अग्रे उभयोः प्रवेशविधानात् । ततो यजमानः पूर्वेणाहवनीयागारद्वारेण प्रविशति गार्हपत्यस्य दक्षिणद्वारेण पत्नी प्रविशति· गार्हपत्यागारमध्ये स्थापितस्याग्नेः पश्चात्पत्नीयजमानौ प्राङ्मुखावुपविशतः तयोर्मध्ये पत्नी दक्षिणत उपविशति । ततोऽध्वर्युः पूर्वोक्तलक्षणेऽअरणीऽआचाराद्दहतवस्त्राच्छादिते यजमानाय समर्पयति । पत्नी तु यजमानहस्तादधरारणिं गृहीत्वाङ्के निदधाति यजमानोऽप्यङ्कऽउत्तरारणिं निदधाति · उभावप्यरण्योः कुङ्कुमचन्दनपुष्पादिभिः पूजां कुरुतः । ततस्तिलकादि माङ्गल्यम् आशीर्वादाश्च[2] । ततो दम्पती आचम्य देवान्ब्राह्मणांश्च नमस्कृत्य पीठाद्युपर्यरणी निधत्तः ॥ ॥७॥

इति चतुर्थस्य सप्तमी कण्डिका ॥ ॥

गार्हपत्यागारेऽजं बध्नाति न वा ॥ १ ॥ अरणिप्रदानानन्तरं गा॰रे स्वकीयं परकीयं वा छागं बध्नन्ति · अथवा न वा बध्नन्तीति विकल्पः · अस्तमयसमयकालमेव ।

विद्यमानं प्रातरग्नीधे दद्यात् ॥ २ ॥ यजमानस्य गृहे स्वत्वेन विद्यमानमजम् अबन्धनपक्षेऽपि संस्थिते कर्मणि अग्नीधे दद्यात् · स७स्थितऽइति च काण्वपाठात् । यदि स्वीयोऽजो नास्ति तर्ह्यवश्यं परकीयोऽप्यानीयः यदि तु गृहे स्वीयोऽजो भवति तर्ह्यबद्ध्वैव प्रातरग्नीधे देय इति केचित् · अपरे तु स्वकीयः परकीयो विकल्पेन बन्धनीयः अत्र स्वकीयस्य बन्धनपक्षे प्रातरग्नीधे दानम् नान्यबन्धनपक्षऽइति ।

---

1) Thus Chamb. 622. चेच्छया १. 2) ब्राह्मणास्तु आशीर्मन्त्रान्पठित्वा तिलकादिमाङ्गल्यपूर्वं पत्नीयजमानयोरक्षतैर्वर्धापनं कुर्वन्ति Chamb. 622.

अस्तमिते[१] रोहिते चर्मण्यानडुहे चत्वारि हविष्यपात्राणि मिमीते ॥३॥ अस्तमिते सूर्ये रोहिते रक्तत्वमापादिते आनडुहे बलीवर्दसम्बन्धिनि चर्मणि उत्तरलोम्नि प्राग्ग्रीवे अधिकरणभूते चत्वारि हविष्यस्य तण्डुलद्रूपस्य पात्राणि मिमीते प्रक्षिपति । अत्र हविष्यशब्देन व्रीहितण्डुला एवोच्यन्ते न व्रीहयो यवा वा कण्डनस्यानुक्तत्वात् अथ चातुष्प्राश्यमोदनं पचतीत्योदनश्रवणात् (२.१.४.४) तस्य च व्रीहितण्डुलसिद्धान्ने रूढत्वात् । पात्राणि प्रसृतित्रयपरिमाणानि ओदनस्य चतुर्णां प्राशनार्थत्वात् प्राशनस्य च तृप्त्यर्थत्वात् तृप्तेश्च प्रसृतित्रयपरिमिततण्डुलौदनेन सम्भाव्यमानत्वादिति ।

तं चातुष्प्राश्यं पचति ॥४॥ तं चतुर्भिः पात्रैश्चर्मणि प्रक्षिप्तं हविष्यं चातुष्प्राश्यं चतुर्णां प्राशनार्हं तृप्तिजननसमर्थमोदनं तस्मिन्गार्हपत्यागारे स्थापितेऽग्नौ पचति । तमिति मितमात्रस्यैव निर्देशः संस्कारान्तरशङ्कानिरासार्थम् तेन सिद्धानेव तण्डुलान्मित्वा प्रक्षाल्य पचेत् ।

उद्वास्यासेचनं मध्ये कृत्वा सर्पिरासिच्याश्वत्थीस्तिस्रः समिधो घृताक्ता आदधाति समिधाग्निमिति (३.१) प्रत्यृचम् ॥५॥ तं शृतमोदनमुत्तरत उद्वास्य तस्य मध्ये आसेचनं गर्तं कृत्वा तस्मिन्नसंस्कृतमेव सर्पिर्घृतमासिच्य · घृताक्तास्तेन गर्तसिक्तेनैवाज्येनाक्ताः · तस्मिन्नेव स्थापितेऽग्नौ आदधाति ।

उप त्वेति (३.४) जपति ॥६॥ यजमानः उत्तरसूत्रेऽध्वर्युग्रहणात् · शाखान्तरादाग्नेयैस्त्रिभिर्मन्त्रैः समिदाधानम् चतुर्थीं जपति ।

द्वितीयां वाध्वर्युः ॥७॥ अथवा न उपत्वेति जपतीति · किंतु द्वितीयां सुसमिद्धायेतीमामृचम् (३.२) अध्वर्युर्जपति स्वस्थानस्थितामेव केचिदन्ते स्थिताम् समिद्वतीभिर्घृतवतीभिर्ऋग्भिरभ्यादधातीति श्रुतेः (२.१.४.५) समिच्छब्दवतीभिः घृत-[शब्द]वतीभिश्चाधानम् द्वितीयायां च समिच्छब्दो नास्ति तेन नास्याः समिदाधाने विनियोगः ।

चत्वार ऋत्विजः प्राश्नन्ति ॥८॥[२]

---

१) Karka joins अस्तमिते to the two preceding sûtras, which he gives as but one. एतां रात्रिमजं बध्नातीति चास्तमितग्रहणम् · २) तमोदनम् Karka.

राद्धस्ते ब्रह्मौदन इत्याह ॥ ९ ॥ ब्रह्मौदनप्राशनानन्तरम् राद्धस्ते ब्रह्मौदन इति प्रैषमध्वर्युर्यजमानं प्रत्याह ।

वरं ददाति ॥ १० ॥ तत एवमुक्तो यजमानः ऋत्विग्भ्यो वरं ददाति · वरशब्देन येभ्यो दीयते तदभिलषितं स्वाधीनं वस्तु यथासम्पन्नं हिरण्यादिकमुच्यते · तदत्र चतुर्भ्योऽपि ददाति ।

संवत्सरं वा पुरस्तात्कुर्यात्ततः सर्वानादधीत ॥ ११ ॥ इदमन्यत्पक्षान्तरम् · आधानस्य पुरस्तात्संवत्सरं मानादिवरदानान्तमोदनं प्रत्यहं कुर्यात् ततः एवंविधसंवत्सरसमिदाधानेन संस्कृतादग्नेः सकाशात् सर्वानग्नीन्गार्हपत्याहवनीयदक्षिणाग्निसभ्यानादधीत । अस्मिंश्च पक्षे संवत्सरस्य प्रथमदिने अग्न्यगारकरणाद्युपास्तमयं जपान्तं कर्तव्यम् · ततः पूर्णे संवत्सरे उत्तमेऽहनि चत्वारः पदार्था भवन्ति दिवा अशननियमोऽजबन्धनं जागरणं वाग्बन्धश्चेति एतेषामाधानात्पूर्वाहोरात्रऽएव श्रवणात् । अस्मिन्पक्षे अग्निहोत्रकाले गार्हपत्यशमने सति प्रायश्चित्तमाह ·

गार्हपत्येऽनुगते ग्रामाग्निमाहृत्य चातुष्प्राश्यं पक्त्वा विहरेत् ॥ १२ ॥ [1] होमकाले गार्हपत्येऽनुगते उपशान्ते ग्रामाग्निं लौकिकाग्निमाहृत्य तस्मिंश्चातुष्प्राश्यमोदनं पक्त्वा चातुष्प्राश्यमिति शब्दसामर्थ्यात्तेन चतुरो ब्राह्मणान्भोजयित्वा तस्मादग्नेः अग्निहोत्रहोमार्थं विहरेत् ।

रात्रिं जागरणधारणे ॥ १३ ॥ सपत्नीकेन यजमानेन तस्यां रात्रौ जागरणमग्निधारणं च कर्तव्ये । तत्र धारणे करणनियममाह ·

शकलैर्वा ॥ १४ ॥ शकलैः काष्ठखण्डैर्वा सामर्थ्याद्धोमयपिण्डैर्वा स्थापितस्याग्नेर्धारणं कर्तव्यम् ।

व्युष्टायामुपशमय्य दक्षिणा वा संहरेदन्वाहार्यपचनश्चेत् ॥ १५ ॥ व्युष्टायां रात्रौ तं गार्हपत्यागारे स्थापितमग्निमुपशमय्य अनुगमयित्वा वक्ष्यमाणं कुर्यात् अथवा तमग्निं दक्षिणा संहरेत् तत उत्पाद्य दक्षिणस्यां दिश्यद्दूरे स्थापयेत्

---

1) चातुष्प्राश्यपचनोपदेशादिदमादिष्टम् · गुणविधिवाच्च नात्र मानादि भवति Mahâd.

यदि सोऽग्निः अन्वाहार्यपचनं कर्तुमिष्टो भवति · अस्मिन्पक्षे दक्षिणाग्निमादधातीत्यस्मिन्काले तमेव दक्षिणा संहृतमग्निमाहृत्य दक्षिणाग्निखरे भुव इति स्थापयेत् न गार्हपत्यादाहृत्य ।

स्थानमुल्लिख्याभ्युक्ष्यान्वारब्धे हिरण्यं निधायोषाखूत्करान्निवपत्यक्षेषु शर्कराः ॥१६॥[1] उपशमितस्याग्नेः स्थानं भूप्रदेशं स्फ्येन उल्लिख्य यजमानेऽन्वारब्धे उदकेनाभ्युक्ष्य तत्र भूमौ हिरण्यशकलं निधाय तत्रैवोषामाखूत्करं च निवपति · ऊषाशब्देन[2] च क्षारमृत्तिका अभिधीयते आखूत्करशब्देन चाखुभिरुत्कीर्णाः पांसवः · ऊषाखूत्करनिवापानन्तरं चोषाखूत्करैररत्निमात्रक्षेत्रफलो वृत्ताकारः[3] खरः कर्तव्यः · ततस्तस्य खरस्य अक्षेषु प्रान्तेषु शर्कराः परितो निदधाति ताश्च पञ्चाशत्[4] पञ्चाशच्छर्करा नर्यऽइति परिशिष्टोक्तेः · अथ च प्रथममग्निस्थापनाङ्गभूताः पञ्च भूसंस्काराः पूर्वतरं कर्तव्याः ।

हिरण्यमुपर्येके ॥१७॥ एके उपरिष्टात्सम्भाराणां सर्वेषां हिरण्यनिधानमिच्छन्ति एके पुरस्तादिति ।

एवमितरयोः ॥१८॥ इतरयोः आहवनीयदक्षिणाग्न्योरेवमेव स्थाने कर्तव्ये । तत्राहवनीयस्थानमाह ·

पुरस्तादाहवनीयस्याष्टासु प्रक्रमेष्वेकादशसु द्वादशसु मत्या वा ॥१९॥[5] गार्हपत्यस्य खरस्य मध्यात्प्राच्यां दिशि अष्टासु पदिकेषु प्रक्रमेषु आहवनीयख-

---

1) अत्र चोल्लेखनोपलक्षिताः स्मार्ता अपि पदार्थाः परिसमूहनादयः पूर्वं कर्तव्याः अभ्युक्षणं तु तन्त्रेणैव भवति Karka. 2) तत्रैवोखामा° उखाशब्देन २· 3) उखाखू° चोखाखू° वृत्तिकारः २· वृत्ताकारः २· 4) तेषां (!) प्रमाणम् (Yajnap· ५३) पञ्चाशच्छर्कराः पश्चात्पूर्वे दद्यात्त्रिसप्ततिम् दक्षिणे तु खरस्थाने दश सप्त च पञ्च च Mahâd. 5) संख्योक्ता प्रक्रमस्य नोक्तं प्रमाणम् । केचिद्द्वादशाङ्गुलः प्रक्रम इति · तदयुक्तम् · तत्र द्वयोरगारयोः कर्तुमशक्यत्वात् तथा चाष्टप्रक्रमपक्षे वेदिरेव न सम्भवति दक्षिणाग्निनावरुद्धत्वात् तत्रागारयोस्तु सुतरामसम्भवः तस्मादिदं न च प्रक्रमप्रमाणम् । तर्हि प्रक्रमास्त्रिपद इत्यग्नौ (१६· ८· २१·) पठितत्वात्त्रिपद एवास्तु सर्वत्र · नैवम् · अग्निचित्प्रकरणे पठितत्वात्तस्यैवाङ्गम् त्रिपदः प्रक्रम इति । तस्मादाधानसोमयोः प्रत्यक्षवचनाभावाद्यौगिकः प्रक्रमो ग्राह्यः · योगस्तु क्रमु पादविक्षेपे प्रकर्षेण क्रमणं प्रक्रमः क्रमणेनारत्निमात्रः प्रक्रमो भवति तस्मात्प्राङ् प्रक्रामति त्रीन्विक्रमानित्यादिश्रुतेः (३·५·१·१·) · अरत्निस्तु पुरुषपञ्चमांशः तस्माद्द्विपदः प्रक्रमः Mahâd.

रस्य मध्यं कुर्यात् · मत्या वा उक्तसंख्यातो न्यूनेष्वपि सतसु षडादिषु । अत्राह्वनीयखरे पञ्च भूसंस्कारान्कृत्वा पुनरुल्लिख्यान्वारब्धे यजमानेऽभ्युक्षणादि शर्करानिधानान्तं कुर्यात् · अत्र ऊषाखूत्करैः अरत्निमात्रश्चतुरस्रः खरः कार्यः · अन्तेषु त्रिसप्ततिसंख्याः शर्करा निधेयाः पूर्वे दध्यात्त्रिसप्ततिमिति[1] वचनात् (यज्ञपार्श्व ५३)।

इतरस्य वितृतीये दक्षिणतः ॥२०॥ इतरस्य दक्षिणाग्नेः दक्षिणतो वितृतीये स्थानम् । तस्य साधनोपायः शुल्वकारेणोक्तः[2] गार्हपत्याह्वनी° तस्मिन्नग्निरित्येकः प्रकारः · अपि वान्तर° श्रोण्यामग्निरिति द्वितीयः प्रकारः · एवमन्यतरोपायेन स्थानं कृत्वा ततः षोडशाङ्गुलतार्तीये °मर्धयकऽइत्यनेनोपायेनारत्निक्षेत्रफलमर्धचन्द्राकारं क्षेत्रं कार्यम् · अत्रोपलेपनादि शर्करानिधानान्तं पूर्ववत् · ऊषाखूत्करैरर्धचन्द्राकारः कार्यः · ततः प्रान्तेषु द्वाविंशतिः शर्करा निधेयाः ॥ सभ्यावसथ्ययोर्गार्हपत्यवदाधानमिति परिशिष्टोक्तेः (निगम° २३) गार्हपत्यखरवत्सभ्यस्यापि वृत्तः खर उपलेपनादिपञ्चाशच्छर्करानिधानान्तैः संस्कारैः कर्तव्यः ।

उत्सृतेऽग्निमन्थनम् ॥२१॥[3] गार्हपत्यस्य ।

अनुत्सृतऽएके ॥२२॥

उदिते तूद्धरणम् ॥२३॥ उभयपक्षेऽपि ।

अपरेण गार्हपत्यायतनम् ॥२४॥[4] गार्हपत्यखरस्य पश्चात्प्रदेशे ।

अश्वमानयेति ब्रूयात् ॥२५॥[5] अध्वर्युरग्नीधं प्रति ।

स्थितेऽश्वे पुरस्तात् ॥२६॥ अश्वे पुरस्तात्प्रत्यङ्मुखे स्थिते मन्थनं कुर्यात् । तत्र च प्रथममधरारणिमुत्तराग्रां निधाय उत्तरारण्या ईशानदिग्भागादष्टाङ्गुलदीर्घं द्व्यङ्गुलविपुलं प्रमन्थं[6] छित्त्वा तस्य मूलं चात्रबुध्ने[7] प्रवेश्य अधरारण्या मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलं त्यक्त्वा तदन्तराले अङ्गुल-

---

1) °तिरिति २· 2) See pag. २१०,१. ff. and ३५७,५. ff. 3) उदिते सूर्ये गृहीताभ्यामरणिभ्यां मन्थनं कर्तव्यम् Mahâd. 4) मन्थनं भवतीति शेषः Ss. 5) तस्माद्यत्राग्निं मन्थिष्यन्स्यात्तदश्वमानेतवै ब्रूयादिति (२·१.४.१६) · अतश्च यो मन्थिष्यन् स प्रैषं ददाति · स चाध्वर्युः शाखान्तरे विहितः तस्मादध्वर्युः प्रत्यङ्मुखो मन्थतीति · अग्नीत्तु प्रैषार्थं करोति Karka. 6) Thus २· प्रथमं २· 7) ? तत्रबुध्ने २·

चतुष्टयपरिमिते पूर्वेऽरण्यन्ते मन्थनस्थानं कृत्वा चात्रबुध्नप्रोतस्य प्रमन्थस्याग्रं तत्र निधाय चात्राग्रकीलकाग्रस्योपर्युदगग्रामोवीलीं[1] निधाय पत्नीं धारयित्वा चात्रं नेत्रेण प्रदक्षिणं त्रिर्वेष्टयित्वा तथा मन्थनं कुर्यात् यथा जातोऽग्निः प्राच्यां पतति · तत्र यजमानः प्राङ्मुखो पत्नीधारणं करोति पत्नी चात्रं नेत्रेण त्रिर्वेष्टयित्वा मन्थनं करोति · ततः शाखान्तरादध्वर्युश्च तस्मादध्वर्युः प्रत्यङ्मुखोऽभिमन्थतीति । चात्रं[2] च खादिरं द्वादशाङ्गुलदीर्घं वर्तुलम् अग्रे लोहकीलयुक्तम् बुध्ने प्रमन्थाग्रप्रवयणार्थगर्तयुक्तम् मूलेऽग्रे च लोहपट्टिकया संयुक्तं कार्यम् । ओवीलीं[1] च खादिरीं द्वादशाङ्गुलदीर्घां चतुरङ्गुलविपुलामधोभागे समां चात्राग्रस्थितकीलकोपरिस्थापनार्थलोहपट्टिकायुक्ताम्[3] उपरिभागे वर्तुला च कार्या । नेत्रं च गोवालशणसूत्रैस्त्रिवृत् व्याममात्रं कार्यम् । केचित्प्रमन्थाग्रेण मन्थन्ति अपरे तु मूलेन । मन्थनं कात्यायनेनोक्तम् गृह्यकारिकायां च · तद्यथा (कर्मप्रदीप १.८.२-४) चात्रबुध्ने प्रमन्थाग्रं गाढं कृत्वा विचक्षणः कृत्वोत्तराग्रामरणिं तद्बुध्नमुपरि न्यसेत् चात्रायःकीलकाग्रस्तामोवीलीमुदगग्रकाम् विष्टम्भाद्धारयेत्पत्नीं निष्कम्पं प्रयतः शुचिः त्रिरुद्वेष्ट्याथ नेत्रेण चात्रं पत्न्योऽहताांशुकाः पूर्वं मन्थन्त्यरण्यन्ते प्राच्यग्नेः स्यात्तथा च्युतिरिति ।

जाते वरदानम् ॥ २७ ॥[4]

मनसैके ॥ २८ ॥ एके इदानीमहमिदं वस्तु अध्वर्यवे दास्यामीति मनसा संकल्प्य पश्चात् कर्मसमाप्त्यनन्तरं ददति[5] नेदानीम् ।

तस्याभिश्वासः प्राणममृते दधऽइति ॥ २९ ॥[6] यजमानेन अग्निमभिलक्षीकृत्य मुखेन श्वासस्य प्रेरणम् फूत्कारकरणम् ।

---

1) °मोविलीं २. 2) See Karmapradipa १.७.२ सारवद्दारवं चात्रमोवोलो च प्रशस्यते · ibid. ५ अष्टाङ्गुलः प्रमन्थः स्याच्चात्रं स्याद्द्वादशाङ्गुलम् ओवोली द्वादशैव स्यादेतन्मन्थनयन्त्रकम् 3) ? समा चात्राग्र्यस्थि° २. 4) मन्थनादग्नौ जाते ऽध्वर्यवे वरदानम् Mahád. सूत्रक्रमस्त्वेवमपेक्षितः २५. २४. २६. २१. २२. २३. २७. इति idem. 5) ददाति २. (and Ss). 6) अभिश्वासेन च प्राण्यते अग्निः समर्थीक्रियते · ततश्च मुखेनाभिश्वासः क्रियते Karka.

उच्छ्वासोऽमृतं प्राणऽआदधऽइति ॥ ३० ॥[1] वह्निज्वालाया ऊर्ध्वश्वसिन मुखमध्ये ग्रहणमुच्छ्वासः · यजमानेन आत्मसंस्कारत्वात् ॥ ॥ अष्टमी कण्डिका ॥ ८ ॥ ॥

अथ पद्धतिः ॥

ततोऽस्तमयादारभ्य सकलां रात्रिं स्वकीयं परकीयं वा अश्वं गार्हपत्यागारे बध्नाति न बध्नाति वा · यदि बद्धः स्वकीयो भवति तदा प्रातः कर्मणि संस्थिते तमश्वमग्नीधे दद्यात् स्वकीयाभावे दानाभावः । ततोऽस्तमिते सूर्येऽध्वर्युः रक्ते आनडुहे चर्मणि चत्वारि तण्डुलपात्राणि प्रक्षिपति · प्रसृतित्रयपरिमितं चैकैकं पात्रम् एवंविधानि चत्वारि · ततस्तांस्तण्डुलान्स्थाल्यामोप्य द्विः प्रक्षाल्य स्थापितेऽग्नावधिश्रित्य तं चातुष्प्राश्यसंज्ञकमोदनं पचति । तत उद्वास्य पक्वस्यौदनस्य मध्ये गर्तं कृत्वा तत्र गर्ते घृतमासिच्य तेन घृतेनाक्ता आश्वत्थीस्तिस्रः समिधः प्रादेशमात्रीर्हस्ते कृत्वोत्थाय तस्मिन्नग्नौ समिधाग्निमित्यनेन (३. १) मन्त्रेण तासां समिधां मध्यादिकामादधाति · तत उपविश्य सुसमिद्धायेति (३. २) स्वरेण जपति · तत उत्थाय तं त्वा समिद्भिरित्यनेन (३. ३) द्वितीयां समिधमादधाति · तत उप त्वाग्नेरिति (३. ४) तृतीयां समिधमादधाति । ततो यजमानश्चतुर्णामृत्विजां ब्रह्मादिक्रमेण पादौ प्रक्षाल्योपवेश्य तान्गन्धमाल्यादिभिरभ्यर्च्यान्नं संकल्प्य भोजयेत्[2] · तत्र छन्दांसि एतद्वः पाद्यम् छन्दोभ्य इदमासनम् इदमर्चनं छन्दोभ्यः स्वाहा इदमन्नं परिविष्टं परिवेक्ष्यमाणं चा तृप्तेः छन्दोभ्यः स्वाहा छन्दांसि प्रीयन्ताम् छन्दांस्यनेन[3] प्रीणामि इति (२. १.४.४) श्रवणादत्रैवं कुर्वन्ति · ततस्ते ब्रह्मादयश्चत्वार ऋत्विजस्तमोदनं प्राश्नन्ति · ततोऽशनानन्तरं स्मृतिशुद्धो भूत्वाध्वर्युः स्फ्यं गृहीत्वा राहस्ते ब्रह्मौदन इत्याह । ततो यजमान ऋत्विग्भ्यो वरं ददाति · अस्य चातुष्प्राश्यपचनकर्मणः समृद्ध्यर्थमिमं[4] वरं ब्रह्मादिभ्य ऋत्विग्भ्यो

---

1) वायूपादानमुच्छ्वासः सैव चापाननक्रिया · यजमानसंस्कारोऽयमिति तत्कर्तृकः अतश्च पुनराधेये न भवति अग्निसंस्कारत्वात् अभिश्वासस्तु भवत्येव · द्वावपि चैतावेककर्तृकौ स पुनरपानितीति वचनात् · अभिश्वासः पुनर्जातसंयोगात् ततः सर्वानादधीतेत्यत्र न भवति उच्छ्वासस्यात्मसंस्कार[त्व]ाद्भवत्येवेति Karka. 2) °र्च्यान्नं संकल्पयेत् Chamb. 622. 3) °वेक्ष्यमाणं छंदोभ्यः स्वाहा इदं छंदोभ्य इति त्यागः । छंदांस्यनेन Chamb. 622. 4) ? °र्थं इमं १·

ऽहं सम्प्रददे ब्रह्मन्यो विभाग इत्यादि[1] · वरशब्देनात्र येभ्यो दीयते तदभीष्टं यद्यजमानेन दातुं शक्यते हिरण्यवस्त्रधान्यादि तदुच्यते । अथवैतच्चातुष्प्राश्यमाधानदिनात्पूर्वं संवत्सरं प्रतिदिनमुक्तविधिना कृत्वा संवत्सरे पूर्णे वर्षं यावत्समिदाधानसंस्कृतात्तस्मादग्नेः सकाशात्सर्वान्गार्हपत्याहवनीयदक्षिणाग्निसभ्यानादधीत · अत्र संवत्सरस्यान्त्यरात्रौ अशनमजवन्धनं जागरणं वाग्बन्धश्चेष[2] इत्येतानि भवन्ति पूर्वैस्तुर्विधानात् । अयं श्रौताग्नीनामरणी विनैवोत्पादनप्रकारः · अस्मिन्पक्षे यदा गार्हपत्योऽनुगच्छति तदा लौकिकाग्निमाहृत्य चातुष्प्राश्यं पक्त्वा चतुर्भ्यो दत्त्वा ततोऽग्निहोत्रार्थं[3] विहरेत् · पुनः स्वयोनेराहरणमिति सम्प्रदायः ॥ अथ प्रकृतमुच्यते[4] । रात्रौ यजमानस्य जागरणम् । स्थापितस्याग्नेः सकलायां रात्रौ शकलैरेव धारणम् गोमयपिण्डैरेव वा न समुच्चितैः । ततोऽन्ये वाससी परिधाय परिहिते वाससी क्षालयित्वा शोषणार्थं विस्तार्येते[5] · तत उषसि स्नात्वा पुनः परिदधीयाताम् । रात्रौ विभातायामरुणोदये कालेऽध्वर्युः स्नात्वा तं स्थापितमग्निं स्वप्रयत्नेनोपशमयेत् · अथवा यदीममेवाग्निमन्वाहार्यपचनं करिष्यन्भवति तद्दिनमग्निं तत उत्सार्य दक्षिणाग्निस्थापनावसरं यावद्दक्षिणस्यां दिशि क्वचित्सुगुप्ते धारयेत्[6] नोपशमयेत् । ततोऽध्वर्युर्वाचं यच्छ पूर्णाहुतेरिति यजमानं प्रेष्यति · ततो यजमानः पूर्णाहुतिहोमपर्यन्तं वाग्यतो भवति । ततोऽध्वर्युर्गार्हपत्यखरे पञ्च भूसंस्कारान्कृत्वा पुनस्त्रिरुल्लिख्य यजमानेऽन्वारब्धे पुनरभ्युक्ष्य हिरण्यशकलं मध्ये निधाय ऊषान्मध्ये निवपति · ततस्तैस्त्रिपर्वृत्तः खरः कार्यः ऊषाः क्षारमृत्तिकाः · ततो मध्ये आखूत्कराणाम् आखुभिर्मूषिकैरुत्खातानां पांसूनां निवापं कृत्वा वृत्तं सम्पादनीयम् · ततः खरस्य परितः पञ्चाशतं शर्कराः संलग्ना निदधाति · एके सम्भाराणामुपरि हिरण्यनिधानं कुर्वन्ति । ततो गार्हपत्यखरमध्यादष्टासु प्रक्रमेषु पदप्रमाणेषु एकादशसु द्वादशसु वा मत्या वा आहवनीयखरस्य मध्यं कर्तव्यम् · तत्रापि पूर्ववदेव परिसमूहनादीन्पञ्च भूसंस्कारान्कृत्वा पुनरुल्लिख्य यजमानेऽन्वारब्धेऽभ्युक्ष्य हिरण्यश-

१) ?? Thus Chamb. 622. संप्रपदे ब्रह्मन्नयोविभाग १. २) ? जागरणं वा । वाग्ब° १. ३) °त्रायर्थ Chamb. 622. ४) ? प्राकृत° Chamb. 622. ५) Thus Chamb. 622. विर्येते १. ६) धारयेत १. स्थापयेत् Chamb. 622.

कलं निधायोषाखूत्कराणामावापं च कृत्वा तैश्चतुरश्रमाहवनीयस्य खरं स्थण्डिलं कुर्यात् · ततस्त्रिसततिसंख्याभिः शर्कराभिः परितः खरस्य तथा संलग्नं वेष्टनं कुर्यात् यथोषाखूत्करा निःसृत्य न यान्ति एवं सर्वखरेषु ज्ञेयम् । ततो दक्षिणाग्निखरे पञ्च भूसंस्कारान्कृत्वा तत उद्दिष्टान्वारब्धेऽभ्युक्ष्य हिरण्यं निधायोषाखूत्करनिवापं कृत्वा तैरर्धचन्द्राकारं खरं कुर्यात् · ततो द्वाविंशतिं शर्कराः परितः संलग्ना निदधाति । ततो गार्हपत्यखरवत्तस्यस्य खरं संस्कुर्यात् · तत्रापि पञ्चाशच्छर्कराः । तत उदितेऽनुदिते वाग्निमन्थनं कुर्यात् । तत्र पूर्वमश्वमानयेति प्रैषमग्नीधं प्रति ब्रूयात् · ततोऽग्नीदश्वमानीय पुरस्तात्प्रत्यङ्मुखं स्थापयति · अश्वस्तरुणो भवति तदभावेऽतरुणः तदभावेऽनड्वान् · अश्वाभावे प्रैषाभावः अनभिधानात् प्रकृतावूहस्य निषिद्धत्वाच्चोहोऽपि न भवति । ततो गार्हपत्यायतनमपरेण दर्भाद्यास्तृतायां भूमौ अधरारणिमुत्तराग्रां निधायोत्तरारणेरीशानदिक्स्थमष्टाङ्गुलं प्रमन्थं[1] छित्त्वा तस्य प्रमन्थस्याग्रं श्लक्ष्णं कृत्वा चात्रबुध्नगतगर्तमध्ये[2] प्रवयति[3] · ततोऽधरारणेर्मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलं त्यक्त्वा तत्र यच्चतुरङ्गुलमन्तराले भवति तन्मध्येऽग्निमन्थनार्थं तीर्थं कृत्वा प्राच्यामग्निनिःसरणाय वाहिनीं कृत्वा चात्रयुक्तं प्रमन्थं तीर्थस्योपरि निदध्यात् · ततो यजमानः प्राङ्मुख उपविश्य चात्राग्रे यो लोहकीलको भवति तस्योपर्योवीलीमुदगग्रां[4] निधायावष्टभ्य यत्नं कम्परहितं धारयेत् · ततः पत्नी चात्रं नेत्रेण त्रिर्वेष्टयित्वा मन्थति · ततोऽध्वर्युः प्रत्यङ्मुखो मन्थति । अग्नौ जाते यजमानोऽध्वर्यवे वरं ददाति अध्वर्यो वरं तुभ्यमहं सम्प्रददऽइति वाचा · मनसैके संकल्पं कुर्वन्ति । ततस्तमग्निं शुष्कगोमयचूर्णाकीर्णे कर्परे निधाय तं जातमग्निमभिलक्षीकृत्य यजमानो मुखेन श्वासं प्रेरयति फूत्कारं करोति प्राणममृते दधऽइति मन्त्रेण · ततः सुसमिद्धेऽग्नौ जातेऽग्नेर्ज्वालामूर्धश्वासेन मुखमध्ये गृह्णाति अमृतं प्राणऽआदधऽइति मन्त्रेण ॥ ॥८॥

इति चतुर्थस्याष्टमी कण्डिका ॥ ॥

---

1) ? प्रथमं १. and Chamb. 622. 2) चत्र° Chamb. 622. here and throughout. 3) प्रोतयेत् Chamb. 622. 4) तदुपर्योवालो° Chamb. 622.

दारुभिर्ज्वलन्तमादधाति भूर्भुव इति (३.५)[१] सम्भारेष्वमुष्य वा व्रतपते व्रतेनादधऽइति यथर्षि ॥ १ ॥[२] तं जातमग्निं दारुभिर्यज्ञियवृक्षकाष्ठैः ज्वलन्तं दीप्यमानं सम्भारेषु सम्भाराणां हिरण्यादीनामुपरि भूर्भुव इति मन्त्रेण अमुष्य वेति मन्त्रेण च स्थापयति यथर्षि[३] यस्य य ऋषिर्भवति तस्यामुष्येति स्थाने तदृषिवाचि पदं षष्ठ्यन्तं प्रयोज्यम् · तद्यथा अङ्गिरसां वा देवानामित्यङ्गिरसाम् भृगूणां वा देवानामिति भार्गवाणाम् भार्गवाङ्गिरसव्यतिरिक्तानां सर्वेषाम् आदित्यानां वा देवानामित्येव · एवं हि शाखान्तरे पठ्यते · तथा चापस्तम्बः भृगूणां वा देवानामिति यो भार्गव स्यात् अङ्गिरसां वा देवानामिति यो ब्राह्मण आङ्गिरस स्यात् आदित्यानां वा देवानामित्यन्यासां प्रजानाम् वरुणस्य वा राज्ञो व्रतपतऽइति राज्ञ इन्द्रस्य वेन्द्रियेण व्रतपतऽइति राजन्यस्य मनोर्ग्रामण्यो व्रतपतऽइति वैश्यानाम् आदित्यानां वेति रथकारस्येति यथर्ष्याधानमिति ।

वरुणस्य वेति क्षत्रियस्य ॥ २ ॥ इन्द्रस्य वेति राजन्यस्य ॥ ३ ॥[४]

मनोर्ग्रामण्य इति वैश्यस्य ॥ ४ ॥

ऋभूणां वेति रथकृतः ॥ ५ ॥[५] माहिष्येण करण्यां जातो रथकृत् इति केचित् · ऋभुसौधन्वनसावतापरपर्यायस्त्रैवर्णिकेभ्यो हीनो नियतः कश्चिज्जातिविशेष इति पार्थसारथिमिश्राः[६] ।

---

१) आदधामीत्यध्याहारः Mahâd. २) Mahâdeva divides this sûtra into two, closing the first of them by सम्भारेषु · — वसिष्ठस्य वा व्रतपते व्रतेनादधऽइतीमं मन्त्रं यजमानो जपति आदधऽइत्यात्मनेपदसामर्थ्यात् क्रियाशून्यत्वाच्च · यथर्षि यथा यस्य ऋषिस्तथा तस्य प्रयोगः · कश्यपगोत्रिणः कश्यपस्य वा व्रतपते भृगुगोत्रिणः भृगोर्वेति भृगूणां वेति वा · न भृगूणां वा देवानां व्रतपते सूत्रे देवानामित्यपठितत्वात् । अध्वर्योर्मन्त्रद्वयमित्यन्ये · तत्र · सम्भारेष्विति सूत्रेण व्यवधानात् क्रियापदस्यात्मगामित्वात् अकर्मकरणस्य मन्त्रस्य जपसंज्ञत्वाच्च Mahâd. ३) यथर्षिग्रहणेन शाखान्तरपरिपठितमार्षेयं गृह्यते · यद्यङ्गिरा अङ्गिरसां वा देवानां व्रतपते व्रतेनादधऽइति यदि भृगवः भृगूणां वा देवानां व्रतपते व्रतेनादधऽइति भार्गवाङ्गिरसव्यतिरिक्तानाम् आदित्यानां वा देवानामिति · एवं हि शाखान्तरे पठ्यते Karka. ४) राजन्यशब्देन मूर्धाभिषिक्तो गृह्यते Mahâd. राजन्यग्रहणेन च कैश्चिदभिषिक्तो गृह्यते अनभिषिक्तः क्षत्रिय इति · तच्चायुक्तम् यत्कारणं क्षत्रियायां ब्राह्मणजातो राजन्य इति स्मर्यते तस्मात्स एव ग्रहीतव्यः Karka. ५) देवानामित्यत्रापि हि पठ्यते Karka. ६)See schol. at १. १. ११. pag. १४, १४.

रथन्तरं गायेति प्रेष्यति ॥ ६ ॥[1] न ज्ञायते कः प्रैषे को वा प्रेषार्थ ऽइत्यत आह ·

गानमध्वर्योः ॥ ७ ॥[2] अत्राधाने सामगानमध्वर्योः स्यात् समाख्यानात् यतो[3]ऽध्वर्युवेदे सामगानं विहितम् सामवेदस्तु उत्पत्तिमात्रम् · प्रेषार्थस्य प्रधानभूतत्वाच्च । एवं प्राप्तऽआह ·

ब्रह्मा वा वेदयोगात् ॥ ८ ॥ वा निरासे · नाध्वर्युः किं तु ब्रह्मा सामानि गायति । कुतः वेदयोगात् ब्रह्मणो हि सामवेदेन योगोऽस्ति[4] ग्रहणधारणद्रूपेण यतस्त्रिवेदस्यैव ब्रह्मत्वे विनियोगः ।

युक्तत्वाच्चाध्वर्योः ॥ ९ ॥ अध्वर्योः पदार्थान्तरेषु युक्तत्वाच्च ब्रह्मैव गायति सामगानेऽधिक्रियते[5] · अत एव सूत्रान्तरम् प्रस्तोता परिसामानि गायति अग्न्याधेये सौत्रामण्यां च ब्रह्मेति[6] ।

इध्मेनोद्धरणमुपयम्य ॥ १० ॥ पालाशवैकङ्कतादिपरिधिवृक्षसम्बन्धिसप्तविंशतिकाष्ठप्रभृत्यपरिमितकाष्ठकेन त्रिवृन्नबद्धेन इध्मेन गार्हपत्ये प्रदीप्तेन आहवनीयस्य उद्धरणं कर्तव्यम् · उपयम्य उपयमनीभिर्मृत्तिकाभिः क्वचित्पात्रान्तरस्थाभिः प्रदीप्तस्येध्मस्याधस्तादुपगृह्य[7] तं मृत्तिकासहिते कर्परे आधाय । अग्रे-
(१७) इध्मपूर्वार्धस्य ग्रहणविधानादत्र मूलस्यादीपनं कार्यम् ।

यथैनं धूम उपेयात् ॥ ११ ॥ यथा धूम एनं यजमानमुपगच्छेत् · अनेन प्रकारेण यजमानो धूममनुगच्छेदिति विधीयते · अथवा व्यजनादिना तथा यत्नः कर्तव्यः ।

वामदेव्यमिति प्रेष्यति ॥ १२ ॥ प्रदीप्तमिध्ममुपयम्य वामदेव्यं गायेति ब्रह्माणमध्वर्युः प्रेष्यति ।

अश्वः पुरस्ताद्युवा तदभावेऽयुवाश्वाभावेऽनड्वान् ॥ १३ ॥ उद्धरणे क्रियमाणे अश्वः अग्नेः पुरस्तादग्रतो याति · युवा तरुणः पूर्ववाट् · मन्थनकाले य

---

1) कर्तृभेदात्प्रैषे यजमानः Mahâd. 2) स्ववेदविहितत्वात् Mahâd. 3) ? ततो २. 4) ब्रह्मणोऽपि स्वाध्वर्युवेदविहितकर्मयोगोऽस्ति · वेदत्रयविहितं हि ब्रह्मणः अतः समाख्यातस्तत्रापि घटते Karka. 5) ? गायति । अत एव साम° २. 6) ? Thus Karka, who quotes the same passage. ब्रह्मणेति २. 7) °गृहीत्वा २.

आहृतोऽश्वः स एवात्रापि प्रकृतत्वात् · तेन मन्थनकालऽएवैतत्पदत्रयम् · तदा चानुत्पन्ने[1] अश्वमानयेति प्रैषाभावः अनभिधानात् न चोक्तः प्रकृतित्वादिति ।

सम्भारानधिष्ठाप्य दक्षिणपूर्वपादेन प्राञ्चं नीत्वावर्त्य स्थापयति ॥ १४ ॥ एवं प्राङ्मुखेऽश्वे अग्रतो नीयमाने आहवनीयखरसमीपं प्राप्य प्राङ्मुखस्यैवाश्वस्य दक्षिणपूर्वपादेनाग्निमदक्षिणचरणेनाहवनीयखरस्यान्हिरण्यादिसम्भारानधिष्ठाप्य अश्वपादेनाक्रमय्य तमश्वं प्राञ्चं नीत्वा तत आवर्त्य प्रदक्षिणावर्तनेन प्रत्यङ्मुखं कृत्वा संमुखं स्थापयति । अत्र हि उत्तरतोऽश्वस्य नीयमानत्वाद्दक्षिणेन पादेनाक्रमणमुक्तम् अत एवोखासम्भरणे (१६. २. १८) अश्वस्य दक्षिणेन नीयमानत्वादग्निमः सव्यपादः संनिहित इति सव्येनैव पिण्डस्याक्रमणं कर्तव्यम् ।

बृहदिति प्रेष्यति ॥ १५ ॥ अश्वं प्रत्यङ्मुखमवस्थाप्याध्वर्युर्बृहद्गायेति ब्रह्माणं प्रेष्यति ।

अग्निना पदं द्विरुपस्पृश्य तृतीयेनादधाति द्वितीयेन प्रथमेन वा भूर्भुवः स्वरिति (३. ५) पूर्ववत् ॥ १६ ॥ इध्मस्थेनाग्निना खरमध्ये सम्भारस्योपरि कृतमश्वस्य पदं पदमुद्रां द्विर्वारं स्पृष्ट्वा तृतीयेनोपस्पर्शनेन तमग्निं तत्राश्वपदे स्थापयति अथवाश्वपदं सकृदुपस्पृश्य अथवा प्रथमेनैवोपस्पर्शनेन सह । पूर्ववदिति[2] अमुष्य त्वेत्यादि (१) लभ्यते ।

पुरस्तात्परिक्रम्येध्मपूर्वार्ध[3] गृहीत्वा द्यौरिव भूम्नेत्याह (३. ५) ॥ १७ ॥[4] ततः स्थापनानन्तरं यजमानोऽग्नेः पुरस्तात्परिक्रम्य इध्मस्याग्रभागं हस्तेनालभ्यादाय जपति ।

आयं गौरिति (३. ६) चोपतिष्ठते सार्पराज्ञीभिः ॥ १८ ॥[5] चशब्दाद्यजमान एव · तिसृभिः सर्पराज्ञ्या दृष्टाभिः ।

---

1) ? °नङ्गान्वन्ने२ 2) पूर्ववच्छब्देन च यथर्षीति लभ्यते Karka. पूर्ववद्गार्हपत्यवत् Mahád. 3) पूर्वार्ध्य Karka. 4) तच्चैतद्यजमानः करोति इध्मपूर्वार्धान्वारम्भण इति (४. १०. ३) अन्वारम्भोपदेशात् तस्य च याजमानत्वात् (१. १०. १२) · मन्त्रलिङ्गाच्च अग्निमन्नादमन्नाद्यायादधऽइति Karka. 5) आहवनीयम् · सार्पराज्ञीसंज्ञकाभिर्ऋग्भिः Mahád. सार्पराज्ञीग्रहणं च संव्यवहारार्थम् सार्पराज्ञीर्न वा कुर्यादिति (४. १०. ३) Karka.

दक्षिणाग्निमादधाति ॥१९॥ गार्हपत्यादग्नेरेकदेशमादाय दारुभिर्ज्वलन्तं दक्षिणाग्निखरे स्थापयति · अत्र शाखान्तराद्भुवः अमुष्य त्वेति च भवति · आपस्तम्बः लौकिकमग्निमाहृत्य मथित्वा वा द्वितीयया व्याहृत्या दक्षिणाग्निमादधातीति। यदि च गार्हपत्यागारे पूर्वदिने स्थापितोऽग्निर्दक्षिणा संहृतो भवति अन्वाहार्यपचनोऽयं करिष्यतऽइति बुद्ध्या तदा तमेवानीय भुव इत्यादिना दक्षिणाग्निखरे स्थापयति · तदुक्तम् (४.८.१५) दक्षिणा वा सञ्हरेदन्वाहार्यपचनश्चेदिति · अस्मिन्पक्षे स एव नित्यो दक्षिणाग्निः सर्वदा धार्यते।

सभ्यं च निर्मथ्य ॥२०॥[1] ततो गार्हपत्यवत्सभ्यसंज्ञमग्निं निर्मथ्य चकारादादधाति सभायां स्थापयति · सभ्यावसथ्ययोर्गार्हपत्यवदाधानमिति परिशिष्टोक्तेः (निगम° २३) · सभायां भवः सभ्यः।

गां दीव्यध्वमित्याह ॥२१॥ यजमान ऋत्विजः प्रति प्रैषमाह। इदं द्यूतं सभ्याङ्गम्[2] सभ्यस्य प्रस्तावात् धारणोपस्थानमत इत्यग्रेऽपि (२२) सभ्याङ्गस्यैवोपदेशाच्च · अतः पुनराधेये न भवति तत्र सभ्यस्य विद्यमानत्वादिति कर्कः[3] · तत्रापि सभ्यस्योत्सर्गे कृते भवत्येव।

---

१) क्षत्रियस्य नियतसभाकार्यत्वात्क्षत्रियविषयं सभ्याधानमिति श्रोअनन्तः Mah. २) दीव्यति(:) क्रीडार्थः · गां पणं कृत्वा द्यूतं रमध्वमित्यर्थः · बहुवचनोपदेशात्प्रकृतत्वाच्च ऋत्विजोऽभिधीयन्ते द्यूतस्य कर्तृत्वेन · तच्चैतद्द्यूतं सभ्याङ्गम् सभ्यस्य प्रकृतत्वात् (घततवात् Cod.) उपरितनसूत्रे च (मूचेव Cod.) तद्धर्मोपदेशात् Karka. बहुवचनत्वादृत्विज एव प्रति (अतो Cod.) प्रैषो यजमानस्येति प्राप्ते दीवनं ब्राह्मणानां न भवति नाक्षैः क्रीडेदिति याज्ञवल्क्यनिषेधात् (१·१३८) · द्यूतप्रकृतौ राजसूयद्यूते ब्राह्मणानामदृष्टत्वाच्च तत्र राजा राजभ्रात्रऽइत्यादौ (५.४.४.१६-१९) राजा राजभ्राता सूतो वा स्थपतिर्वा ग्रामणीः सजातश्च तेषामेकैकस्माऽएकैकं युगं निदध्यात् कृतयुगादिक्रमेण तेन सजाताय कलियुगं भवति · [अत] एते द्यूतकर्तारश्च क्षत्रियादयो न ब्राह्मणाः क्षत्रियाणामुचितत्वात् · क्षत्रियाणामृत्विक्कर्मण्यनधिकारादप्रकृता द्यूतकर्तारो (? °रादप्राकृताद्द्यूत° Cod.) भवन्ति ऋत्विजो द्यूतं कुर्वन्तीत्यादिवचनाभावात् · सभाद्यूतस्य च (? समाद्यूतं च Cod.) क्षत्रियाणामेव दृष्टत्वात्सभ्याधानं क्षत्रियस्यैव भवतीति गम्यते · अन्ननिवपनोत्तरं गां दीव्यध्वमिति प्रकृतौ (५.४.४.२३) दृष्टत्वादत्रापि तथैव भवतीति युक्तम् अतः सभ्यमन्थनादारभ्य स्थापनान्तं द्यूतं भवति द्यूतस्य सभ्याङ्गत्वात्। अथवा गां दीव्यध्वमित्यत्र गोशब्दस्त्वग्निवाची · दिवुधातोः स्तुत्यर्थत्वात् अग्नेः स्तुतिरेव भवति · तत्रायं गौरिति तृचेन (३.६-८) अग्न्युपस्थानं यजमानेन कर्तव्यम् प्रैषस्त्वधुर्यणा कर्तव्य इति · अर्हार्थेऽप्येकस्मिन्साधु बहुवचनम् यजमानज्येष्ठत्वात् एकस्या एव पूजनार्थे बहुवचनं स्यादिति यास्कोक्तेश्च Mah. ३) सभ्याङ्गत्वं (? °त्वे Cod.) च पुनराधेये न भवत्ये-

धारणोपस्थानमतः ॥ २२ ॥ अत एवारभ्य सभ्यस्य धारणमुपस्थानं च यावज्जीवं कर्तव्यम् । अत इत्युक्तत्वात् तनूहविषां संवत्सरषण्मासादिकालान्तरेऽनुष्ठानेऽपि सभ्यस्य धारणम् अनशित्वा प्रातर्मुहूर्तव सभ्यस्येत्येतदुपस्थानं (४. १५. ३३) च ॥ ॥ नवमी कण्डिका ॥ ९ ॥ ॥

अथ पद्धतिः ॥

ततोऽग्निं यज्ञियदारुभिर्ज्वलन्तं कृत्वा गार्हपत्यखरे स्थापयति · तत्र मन्त्रः ओं भूर्भुवः आदित्यानां त्वा देवानां व्रतपते व्रतेनादधऽइति · येषामङ्गिराः प्रवरो भवति तेषाम् अङ्गिरसां त्वा देवानामिति स्थापनमन्त्रः येषां च भृगुः प्रवरस्तेषाम् भृगूणां त्वा देवानामिति भृग्वङ्गिरोव्यतिरिक्तानाम् आदित्यानां त्वा देवानामित्येव भवति · वरुणस्य त्वेति क्षत्रियमात्रस्य मन्त्रः · इन्द्रस्य त्वा व्रतपतऽइति राज्ञः क्षत्रियस्य · मनोस्त्वा ग्रामण्यो व्रतपतऽइति वैश्यस्य · ऋभूणां त्वा देवानां व्रतपतऽइति रथकृतो मन्त्रः । ततो रथन्तरं गायेति ब्रह्माणं प्रेष्यति · ततो ब्रह्मा रथन्तरं साम गायति । ततोऽपरिमितकाष्ठं त्रिवृन्नबद्धमिध्मं गार्हपत्ये मूलभागेऽधिश्रयेत् · ततः प्रदीप्तमिध्ममुद्यम्योपयमनीभिर्मृद्भिः कर्परस्थाभिरधस्तादुपयम्याहवनीयखरं प्रति नयति · अश्वश्च पुरस्तादग्रतो नीयते · यजमानश्च धूममनुगच्छति · गमनप्रारम्भऽएव वामदेव्यं गायेति प्रैषः ब्रह्मणो वामदेव्यगानम् । तत आहवनीयखरसमीपे गत्वोपविश्याश्वस्य पूर्वदक्षिणपादेनाहवनीयखरे न्युप्तान्सम्भारानधिष्ठाप्याक्रमय्य ततोऽश्वं प्राञ्चं नीत्वा प्रदक्षिणमावर्त्य संमुखं स्थापयति · ततो बृहद्गायेति प्रैषः ब्रह्मणो बृहत्सामगानम् · ततोऽध्वर्युरग्निनाश्वस्य पदं द्विर्वारमुपस्पृश्य तृतीयेनोपस्पर्शनेनाग्निं स्थापयति द्वितीयेन वा प्रथमेन वा · तत्र मन्त्रः ओं भूर्भुवः स्वः आदित्यानां त्वेति · तत्संनिधावेवोपयमनीरुपनिवपति · ततो यजमानोऽग्नेः पुरस्तात्परिक्रम्योपविश्येध्मस्य पूर्वार्धं गृहीत्वा द्यौरिव भूम्नेति (३. ५) मन्त्रं जपति · तत उत्थायायं गौरित्याद्याभिस्तिसृभिः (३. ६-८) सार्पराज्ञीभिरुपतिष्ठते · अत एवेध्मपूर्वार्धस्य ग्रहण-

व विद्यमानत्वादेव सभ्यस्य · यद्यपि च तनूहवींषि कालान्तरे क्रियन्ते तथापि तु सभासनमत एवारभ्य कर्तव्यम् Karka.

विधानादिध्ममूलस्यादीपनम्। ततोऽध्वर्युर्गार्हपत्यात्कर्परेणाग्निमादाय ज्वलन्तं दक्षिणाग्निं खरे स्थापयति भुवः आदित्यानां त्वेति। ततो गार्हपत्यवदेव सभ्यस्य मन्थनम् · ततो यजमानो गां दीव्यध्वमित्यृत्विजः प्रेष्यति · ततो ब्रह्मादय ऋत्विजो विहारस्योत्तरत[1] आनडुहं चर्मास्तीर्य तस्योपर्यधोमुखं कांस्यपात्रं निधाय पञ्च कपर्दकान्हस्ते गृहीत्वा समेन जयामि विषमेण जीयसऽइत्युक्त्वा कांस्यपात्रस्योपरि चतुर्वारं प्रक्षिपन्ति · तदलाभे शलाकादिभिर्वा द्यूतं कुर्वन्ति · ऋत्विज एव दीव्यन्ति न यजमानः तस्य प्रेषणे कर्तृत्वात् · ततस्तां गां तेभ्य ऋत्विग्भ्यो दद्यात् अस्मिन्द्यूते पणीकृतां गां ब्रह्मणे होत्रे अध्वर्यवे अग्नीधे च समविभागेनाहं सम्प्रददऽइति द्यौस्त्वेति प्रतिग्रहमन्त्रः · ततो दारुभिर्ज्वलन्तं सभ्यं स्थापयति भूर्भुवः आदित्यानां त्वेति · अतः प्रभृति सभ्यस्य धारणमुपस्थानं च सदा कार्यम्॥ ॥१॥

इति चतुर्थस्य नवमी कण्डिका॥ ॥

श्यैतवारवन्तीययज्ञायज्ञियानीति च प्रेष्यति॥१॥ चकारात्सभ्याधानानन्तरम् श्यैत्यानि गायेति ब्रह्माणमध्वर्युः प्रेष्यति · एवमेकवारमेव त्रयाणां प्रैष इति केचित् · अपरे तु श्यैतं गाय वारवन्तीयं गाय यज्ञायज्ञियं गायेति क्रमेण तत्तद्गानानां प्रैषत्रयमाहुः तथा सति प्रैषप्रैषार्थयोरानन्तर्यमनुगृहीतं भवति।

दक्षिणेनाग्नीन्परीत्योदगुत्सृजति॥२॥ अध्वर्युः प्रदक्षिणं सर्वानग्नीन्परिक्रम्य परिगत्याश्वमुदक् उदीच्यां दिश्युत्सृजति · दक्षिणेनेति ग्रहणान्नेतरथावृत्तिः।

ऋतुनक्षत्रसम्भारसामवपनचातुष्प्राश्यजागरणेध्मपूर्वार्धान्वारम्भणसार्पराज्ञीर्न वा कुर्यात्॥३॥[2] एतानि अग्न्याधेये कुर्यात् न कुर्याद्वेति विकल्पः स-

---

1) °जः अग्निभ्य उत्तरत Chamb. 622. 2) ऋत्वादिविकल्पार्थमिदमुक्तम्। ऋतौ तावत् ते वाऽएतऽऋतव इति प्रकृत्याह तस्माद्यदैवैनं कदा च यज्ञ उपनमेदथाग्नीऽआदधीतेति (२.१.३.१) तथा यदि त्वेनं श्वो यज्ञोपनमेदथादधातीति ऋत्वनादरः · तस्मात् नक्षत्रऽआदधीतेति नक्षत्रविषयोऽनादरः · नक्षत्रानादरे चामावास्यायां नियम इति सम्प्रदायः तत्पुनर्नातीव युक्तरूपम् यत्कारणममावास्या नक्षत्रं च भेदेन विहिते · कृत्तिकादिष्वादधीतेति नक्षत्रविधानम् तदनादरे चाकृत्तिकादिष्वपीति गम्यते · तथा चाह यद्यु° तदुपेत्सेत् (२.१.२.११) · एवं सति अमावास्यायामकृत्तिकादिष्वप्याधानं भवत्येव। सम्भारेषु

र्वेषां विहितप्रतिषिद्धत्वात् · सामसु वपने च शाखान्तराद्विकल्पः । अग्निहोत्रस्य वैकल्पिकत्वमाशङ्क्य निराकरोति ·

अग्निहोत्रं च तूष्णीं-श्रुतेः पूर्णाहुत्यन्ते ॥ ४ ॥ अत्राग्निहोत्रशब्दः सायंप्रातर्विहितनित्याग्निहोत्रधर्मातिदेशार्थः · चकारो न वा कुर्यादित्यस्यानुकर्षणार्थः तेनाग्निहोत्रं च जुहुयात् न वा जुहुयात् होतव्यमग्निहोत्रं न होतव्यमग्निहोत्रमिति शाखान्तरे विधिप्रतिषेधयोः श्रवणात् · तदनुपपन्नम् तूष्णींश्रुतेः तूष्णीमेवात्राग्निहोत्रहोमस्य श्रुतत्वात्[1] यदि जुहोत्ययथा कुर्यादथ न जुहोत्यग्निः परापतेत्तस्मात्तूष्णीं जुहुयादिति · अतो न विकल्पः । तदिदमग्निहोत्रं नित्यात्कर्मान्तरमाधानाङ्गम् नाम्ना तद्धर्मकम् ततश्च तद्वदेव सायमादि प्रातरन्तमेकं कर्म प्रचक्षतऽ इत्यादिवचनात्सायारम्भं प्रातरपवर्गमिदमेकं कर्म · ततश्चात्रैकस्मिन्नेव काले सायम्प्रातर्विहितस्य प्रयोगद्वयस्य विधानात्कालभेदाभावादङ्गानि परिस्तरणपर्युक्षणादीनि सकृदेव कर्तव्यानि प्रधानाहुतयश्च भेदेन[2] । तत्रैवं कर्तव्यम् प्रातर्होमकालसंनिकर्षात्तत्र प्रातर्होमधर्माः होमश्चात्राध्वर्युकर्तृकः । तत्रायं क्रमः (४.१३.१२-१४.२६) · यजमानस्य संचरेण प्रवेशनम् तूष्णीमेवाचमनम् अध्वर्योः कूर्चनिधानम्[3] त्रयाणामग्नीनां परिस्तरणम् प्राक्संस्थं पर्युक्षणम् धारा च संजयैवाग्निहोत्र्या दोहनम् अङ्गाराणामुत्तरतो निहरणम् पूर्वेणाहवनीयं दुग्धानयनम् अधिश्रयणम् अवज्योतनम् अपामासेकः . पुनरवज्योतनम् उत्तरतो निधाय त्रिरुद्वासनम् वैकङ्कतस्रुक्स्रुवप्रतपनम् पाणिना संमार्गः पुनः प्रतपनम्

विहितप्रतिषेधाद्विकल्पः नैवैकं चनेति वचनात् (२. १. १. १४) । सामस्वपि वालोऽग्निस्तेजो वत्ति सामानि तस्मान्न गेयानीति । वपनेऽपि शाखान्तराद्विकल्पः । चातुष्प्राश्येऽपि चातुष्प्राश्यमोदनमिति विधाय यद्वा अस्य ब्राह्मणा इति (२. १. ४. ४) विकल्पः । जागरणमपि विधायोच्यते तदपि काममेव स्वप्यादिति (२. १. ४. ७) । इध्मपूर्वार्धान्वारम्भणे च पूर्वार्धमुल्मुकानामित्युक्त्वाह स यदोति (२. १. ४. २८) । सर्पराज्ञ्युपस्थानमपि अथ सर्पराज्ञ्या इति विधायाह तस्मान्न सर्पराज्ञ्या इति (२. १. ४. २९) Karka.

[1]) न ह्येतौ विधिप्रतिषेधौ · तूष्णींहोमप्रशंसैषा यदि जुहोऽण्णीं जुहुयादिति Karka.
[2]) तच्चैतदग्निहोत्रं सायारम्भं प्रातरपवर्गं प्रयोगद्वयपरिसमापनम् · आग्नेयी सायमाहुतिः सौरी प्रातराहुतिः प्रधानभूते · अत्र चैककालत्वादङ्गानि तन्त्रेण · प्रधानाहुतौ तु चतुर्गृहीतेनाग्नेयीं हुत्वा पात्रान्तरे तदुन्नीय चतुर्गृहीतान्तरेण सौरी शेषमेकीकृत्योत्तराहुतिरिति · तच्चैतत्पूर्णाहुत्यन्ते भवति Karka. [3]) ? पूर्वनि° २.

संज्ञयैव यजमानं पृच्छति तथैवानुज्ञा चतुर्गृहीतस्योन्नयनम् जामदग्नीनां पञ्चावत्तस्योन्नयनम् समिध उपरिधारणम् स्रुचमादाय गार्हपत्यस्योपरिष्टान्नीत्वा मध्ये निगृह्योद्गृह्योपविश्य तूष्णीं समिदाधानम् अग्निं ध्यात्वा पूर्वाहुतिहोमः शेषस्य पात्रान्तरे तत्रैव स्थापनम् · गार्हपत्यं प्रत्यागत्य ततः पूर्ववदेव चतुः पञ्चकृत्वो वोन्नीय तथैवागत्य पुनः समिधं हुत्वा सूर्यं ध्यात्वा मध्ये होमः उभयशेषं[१] समासिच्य तन्त्रेणोत्तराहुतिः तूष्णीं कूर्चे निमार्जनम् दक्षिणात उत्तानहस्तनिधानं च अपां स्पर्शः · गार्हपत्यहोमे समिधमाधाय एकैकं स्रुवं पात्रान्तरऽउन्नीय तृतीयं स्रुवं गृहीत्वा प्रथमोन्नीतेन सह तूष्णीं प्रथमाहुतिं जुहोति ततश्चतुर्थं गृहीत्वा द्वितीयोन्नीतेन सह द्वितीयां जुहोति · एवं दक्षिणाग्नाविति · शेषभक्षादिकं च पर्युक्षणान्तं सर्वं सकृदेव तूष्णीमध्वर्युः करोति · नाग्न्युपस्थानम् होममात्रोपदेशात् आचमनम् अतीत्य निष्क्रमणमिति । तदेवंविधमग्निहोत्रं पूर्णाहुत्यन्ते पूर्णाहुतिहोमानन्तरं भवति नेदानीम् । तामेव पूर्णाहुतिमाह ·

पूर्णाहुतिं जुहोति निरुप्याज्यं गार्हपत्येऽधिश्रित्य स्रुक्स्रुवं च संमृज्योद्वास्योत्पूयावेक्ष्य गृहीत्वान्वारब्धऽएव७ सर्वत्र स्वाहेति ॥५॥ पूर्णया स्रुचा आहुतिः पूर्णाहुतिः वक्ष्यमाणाया आहुतेः संज्ञा · घृतेन स्रुचं पूरयित्वा होतव्या। प्रथममाज्यं निरुप्य पात्रान्तरादाज्यस्थाल्यां प्रक्षिप्य ततो गार्हपत्यस्योपरि तामाज्यस्थालीं निधाय । ततः स्रुक्स्रुवं संमृज्य च अग्रे[२] दर्भैः स्रुवम् ततः स्रुचः न सह · सूत्रे च अल्पाच्तरत्वात्स्रुचः पूर्वं निर्देशः · स्रुगत्र पालाशी जुहूः[३] स्रुवश्च खादिरः · संमार्गश्च[४] यथा दर्शपूर्णमासयोर्वेदाग्रैरन्तरतः प्राक् मूलैर्बहिः प्रत्यगिति (२. ६. ४६) । तत उद्वास्य गार्हपत्यस्योपरिष्टादाज्यस्थालीं गृहीत्वोत्तरतः खराद्बहिर्भूमौ निधाय । उत्पूय साग्राभ्यां दर्भपवित्राभ्यामाज्यस्थालीस्थमाज्यमुत्पूतं कृत्वा । अवेक्ष्य तस्याज्यस्यावेक्षणं कृत्वा । गृहीत्वा आज्यस्थाल्याः स्रुवेण[५] गृहीत्वा स्रुचः पूरणं कर्तव्यम् । ततोऽन्वारब्धे यजमाने स्वाहेत्येतेन मन्त्रेणा-

---

१) ? उभयसशेषं २· २) ? चात्र २· ३) होमसम्बन्धाद्धैकङ्कती स्रुक् स्रुवस्त्वविशेषित्वात्खादिर एव Karka. ४) ? ॰र्गस्य २· ५) स्रुवस्य संमार्जनविधानाद्ग्रहणार्थता Karka.

हवनीये पूर्णाहुतिं जुहोति · ग्रहणात्तं गार्हपत्यसमीपऽएव कर्तव्यम् · ततः एकां समिधमुपसंगृह्याहवनीयसमीपमागत्य परिस्तरणासमिदाधाने कृत्वा होमः कार्यः　पूर्णाहुतेः प्रकृतिभूतायामनुद्रुताभ्यस्तमयाहुतौ तथा दर्शनात्　गार्हपत्यऽश्राज्यमधिश्रित्येत्यादौ (१२.४.४.६) · सूत्रे दक्षिणं जान्वाच्येति तु प्रागभिहितवान्नोक्तम्[1] . एवं सर्वत्रोपविष्टहोमेष्वपि · अत्र चाग्निर्देवता तेनाग्निं ध्यात्वा स्वाहाकारेण होमः ।　　एवं सर्वत्र · यत्र-यत्राव्यक्तं जुहोतीति विधानम् यथा　यूपाहुतिं जुहोति (६.१.४) षड्ढोतारं जुहोति (६.१.३६) सावित्राणि जुहोतीति　तत्र सर्वत्र एवम् निरुप्याज्यमित्यादि सर्वं भवति ।

वरं ददामीति वाग्विसर्जनम् ॥ ६ ॥　　पूर्णाहुतिहोमानन्तरं यजमानः · ततोऽध्वर्यवे वरं ददाति ब्रह्मणे च　तयोस्त्रोपयुक्तत्वात् ।　　आचार्येण पूर्णाहुतितोऽन्यास्वाहुतिषु धर्मप्राप्तिरभिहिता　श्रुतौ तु अनुद्रुताभ्यस्तमयाहुताविते धर्माः पठिताः सन्ति (१२.४.४.६) ।

द्वादशाहान्ते तनूहवींषि निर्वपति मासे द्वितीये तृतीये षण्मास्ये संवत्सरे सद्यो वा न वा ॥ ७ ॥　　आधानदिवसात् द्वादशेऽहनि तनूहवींषि अग्नये पवमानायेत्यादीनि निर्वपति · सद्यो वा पूर्णाहुत्यनन्तरं तस्मिन्नेवाहनि · एते सर्वे समविकल्पाः · शाखान्तरे घ्यहे त्र्यहे चतुरहेऽर्धमासेऽपि · द्वादशाहान्तऽइत्यत्रान्तग्रहणात्सर्वत्र घ्यहान्ते मासान्ते इति ज्ञेयम् न्यायस्य समत्वादिति । अथवा तनूहवींषि न निर्वपति पूर्णाहुत्यन्तमेव करोति । तनूहवींषि वक्ष्यमाणानां हविषां संज्ञा · तान्याह ·

अग्नये पवमानाय प्रथमा ॥ ८ ॥[2]　इष्टिः　अष्टाकपाला · अग्न्यन्वाधानादि कर्मापवर्गान्तम् · तत्र ब्रह्मवरणाभावः　अन्यत्सर्वं भवति　पूर्वमेव ब्रह्मणः प्रकृतत्वात्[3] ।

अग्नये पावकायाग्नये शुचये च[4] द्वितीया ॥ ९ ॥　　द्वितीया इष्टिर्द्विहवि-

---

1) see ३. ७. ५.　2) नात्र ब्रह्मवरणमिति केचित् तदयुक्तम् ब्रह्मवरणस्य दर्शपूर्णमासाङ्गत्वात् Mahâd.　3) ? प्रकृतत्वात् २.　4) च is wanting with Karka.

ष्का भवति · अष्टाकपालो । केवलबर्हिः प्रथमं हविर्भवति समानबर्हिषी ऽउत्तरे (२. २. १. १६) ।

अदित्यै चरुस्तृतीया ॥ १० ॥[1] शाङ्खायनसूत्रादाद्ययोरिष्ट्योरष्टादशेध्मकाष्ठकानि तृतीयायां विंशतिरिति · तथा च शाङ्खायनः (२. ३. १६-१७) पाञ्चदश्यं च सामिधेनीनाम् सप्तदशादित्यायामिति । एकस्तनूहविषामयं पक्षः · पक्षान्तरमाह ·

आग्नेय एव वा पुरस्तादादित्यस्य ॥ ११ ॥ अथवा आदित्यस्य चरोः पुरस्तादाग्नेय एव केवलो भवति न प्रागुक्ते द्वेऽइष्टी · तस्मिन्पक्षे द्वेऽएवेष्टी न त्रिष्टित्रयम् । शाङ्खायने आदित्येऽप्युपांशुत्वं पठ्यते (शा° २. ३. १५) · कात्यायनेन तनूहविषामेवोपांशुत्वमुक्तमस्ति (४. ५. १) तनूहविष्ट्वं च पवमानादीनां त्रयाणामेव नादित्यस्य स एतास्तिस्रस्तनूरित्यादिश्रवणात् (२. २. १. १४) । अधुना उभयपक्षेऽपि तनूहविषां दक्षिणामाह ·

षड्दक्षिणाः प्रतिविभज्य ददाति द्वादश चतुर्विंशतिं वा ॥ १२ ॥ षड्गाः प्रतीष्टि विभज्य ददाति न तु प्रतीष्टि समुदिताः[2] । द्वयोः तिस्रस्तिस्रः षट् षट् द्वादश-द्वादश · केवलाग्नेयपक्षे विभागासम्भवात्सर्वासां तत्रैव दानम् ।

भूयसीश्च यथाश्रद्धम् ॥ १३ ॥ यावतीषु श्रद्धा भवति · ततश्चतुर्विंशतेरूर्ध्वमा परार्ध्यात्[3] यावतीर्दातुमिच्छेत् · गुणविशेषे फलविशेष इति (१. १०. ११) फलभूयस्त्वं कामयमानस्य भवत्येवाधिकदानेऽपि श्रद्धा तथा सति अधिकदानगुणातिशयादग्नयो महावीर्या स्युस्तेषु क्रियमाणानि सर्वाणि कर्माणि महाफलानि स्युरिति ।

धेनुरादित्यस्य ॥ १४ ॥[4] ता एताः षडादिदक्षिणाः इष्ट्यङ्गम् न त्वाधानाङ्गम् उलूखलमुसलादिवत्तस्य समृद्ध्यर्थमेव दक्षिणायाः श्रुतत्वात् (२. २. २. १-२) · तेन इष्ट्यकरणपक्षे दक्षिणाया अप्यभावः ।

---

१) न चेयं तनूहविषां मध्ये पठ्यते तेनास्या उपांशुत्वं न भवतीति सम्प्रदायः · शाङ्खायनशाखायां तूपांशुत्वमस्याः पठ्यते (शा° २. ३. १५) Karka. अदितेरुपांशुत्वं सम्प्रदाये शाङ्खायनपाठात् न कर्के इयं तनूहविःसंज्ञका भवति तृतीयेत्युक्तो Mahâd.(!) २) ? °दितो: २. ३) °र्ध्वात् ? see Vâj. S. १७. २. ४) सवत्सा गौर्धेनुरुच्यते Mahâd.

अनृतातिथ्यपनोदपूतिदार्वाधानर्बीसपक्वनाव्युदकानि वर्जयेत् ॥१५॥[1] सायंकाले समागतस्य अतिथेर्निराकरणम् । दुर्गन्धिदारूणामग्नौ प्रक्षेपणम् पूतिशब्दस्य दुर्गन्धिवाचित्वदर्शनात् · अथवा पूति क्लिन्नम् न क्लिन्नं दार्वादध्यादिति शाखान्तरात् । ऋबीसपक्वम् ऋबीसशब्दः पृथिवीवाची योऽयमृबीसे पृथिव्यामिति यास्कोक्तेः (६.३६) पृथिव्यां यत्पक्वम् तिन्दुकादि । नाव्युदकम् · नौशब्देन नौर्ह वा एषा स्वर्ग्या यदग्निहोत्रमिति (२.३.३.१५) श्रुतेरग्निहोत्रमुच्यते तेन अग्निहोत्रार्थमुद्धरणे कृते तत्समाप्तिं यावत् उदकपानं न कुर्यादित्यर्थः[2] · अथवा नावि नौकायां यदुदकम् तस्य पानं न कुर्यादिति · मानवे या अन्तर्नाव्यापः स्युर्न तासामाचमेन्न क्लिन्नं दार्वादध्यादिति । यजमान आधानानन्तरमेतानि यावज्जीवं वर्जयेत् · अनृतम् तस्य वा एतस्याग्न्याधेयस्य सत्यमेवोपचार इति श्रुतेः (२.२.२.१२) तदपराधे श्रौतं प्रायश्चित्तम् · इतरच्छाखान्तरात् । अधिकारित्वाविशेषात्पत्न्या अप्येते नियमा भवन्त्येव ।

ब्रह्मचार्यग्निनित्यधारी क्षीरहोम्यग्निमुपशायी द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः ॥१६॥ यजमान आधानानन्तरं द्वादशरात्रम् अथवा षड्रात्रम् अथवा अन्ततः अन्तिमपक्षे त्रिरात्रम् ब्रह्मचारी भवत् · अग्निनित्यधारी गार्हपत्याहवनीयदक्षिणाग्निसभ्यान्नित्यं धारयेत् · क्षीरहोमी दुग्धेनैवाग्निहोत्रं जुहुयात् · अग्निमुपशायी अग्निसमीप एव भूमौ शयीत । एते नियमाः पुरुषार्थाः · तेन सोमाधाने समारोह्याग्नीऽइति (७.१.३६) समारोपस्य क्रत्वर्थत्वात् तेन पुरुषधर्मौ

---

1) अनृतातिथ्यपनोद[प्रतिषेध]ः स्मृतिप्राप्त एवानूद्यते नानृतं वदेदिति स्मृतिः (मनु° ३.२२१) अप्रणोद्योऽतिथिरिति च (याज्ञवल्क्य १.१००) तदनुवादोऽयम् न वा आहिताग्निनानृतं वदितव्यमिति (२.२.२.२०) · तदेतन्नातीव युक्तरूपम् यतोऽनुवादमात्रमनर्थकम् विधौ च प्रवृत्तिविशेषकरत्वम् · तस्मादेवायं सत्यवदननियमः · एवं च तदपचारे श्रौतं स्मार्तं च प्रायश्चित्तम् Karka. 2) ऊष्मापक्वमिति केचित् ऋबीसं पिष्टपचनं कंसोऽस्त्री पानभाजनमित्यमरः (२.९.३२) marg. २. but the text of Amara has ऋजीषं! — पृथिव्यां योऽग्निः स ऋबीसशब्देनोच्यते योऽयमृबीसे पृथिव्यामग्निरिति यास्कोक्तेः (६.३६) Mah. ऋबीसपक्वम् यत्पृथिव्यां गर्ते तिन्दुकादि पाचितम् ऋबीसशब्दश्च पृथिवीवचनो नैरुक्ताभिप्रायात् योऽयमृ°ग्निरिति Karka. 3) अग्निहोत्रार्थमुद्धृतेऽग्नावुदकदानप्रतिषेधः स यदुद्धृतेऽग्नावभ्यागताय नोदकं यावत्त(?) इति · नौशब्दश्चात्र अग्निहोत्रविषयो नौर्ह°त्रमिति Karka.

ऽग्निनित्यधारित्वं बाध्यते · ततश्च तयोरेव नित्यधृतयोर्गार्हपत्याहवनीययोस्त्त्रारण्योः समारोपः क्रियते अनपवृत्तत्वात् · अत एव पुनराधाने कृते त्रिरात्रादिमध्ये अमावास्यापाते यवाग्वा अवर्थया¹⁾ होरहोमित्वस्य पुरुषार्थस्य बाधः · वरुणप्रघासादिपाते (५.३.१) समारोपेणाग्निनित्यधारित्वस्य च · अत एव नित्यधारित्वविधानात्सायम्प्रातर्होमदर्शपूर्णमासतदन्वारम्भणीयादि सर्वं प्रसङ्गात्तस्मिन्नेव नित्यधृते विहारे कर्तव्यम् प्रतिकर्मोद्धरणमप्रसङ्ग इत्युक्तत्वात् ॥ ॥ दशमी कण्डिका ॥ १० ॥ ॥

अथ पद्धतिः ॥

ततः श्यैतं गायेति प्रैषः तद्गानम् · ततो वारवन्तीयं गायेति प्रैषः तद्गानम् · ततो यज्ञायज्ञियं गायेति प्रैषः ततस्तद्गानम् · अथवा समुदित एव यथासूत्रितं प्रैषः²⁾ श्यैतवारवन्तीययज्ञायज्ञियानि गायेति ब्रह्मणः क्रमेण गानम् । ततः सर्वानग्नीन्प्रदक्षिणं परीत्याश्वमुदगुत्सृजति अजस्तु प्रातरुत्सृष्ट एव । अत्र वसन्तादीनामृतूनां कृत्तिकादीनां नक्षत्राणामभ्युक्षणादीनां सम्भाराणां रथन्तरादिसाम्नां वपनस्य चातुष्प्राश्यस्य जागरणस्येध्मपूर्वार्धान्वारम्भणस्य सार्पराज्ञीनां च विकल्पः ॥ ॥ ततः पूर्णाहुतिहोमः । तत्र विधिः । पात्रान्तरादाज्यस्थाल्यमाज्यनिर्वापः गार्हपत्येऽधिश्रयणम् · खादिरस्रुवस्य दर्भैः संमार्गः जुह्वाश्च अग्रैरन्तरतः प्राक्. मूलैर्बाह्यतः प्रत्यक् · आज्यस्योद्वासनम् पवित्राभ्यामुत्पवनम् अवेक्षणम् स्रुवेणाज्यं गृहीत्वा स्रुक्पूरणम् स्रुचोऽधस्ताद्भाजनादिनिधानं यथा स्कन्दनं न भवति · तत एकां पालाशीं प्रादेशमात्रीं समिधमुपसंगृह्योत्थाय गत्वाहवनीयस्योत्तरत उपविश्याहवनीयं परिस्तीर्योत्थाय समिधमाधायोपविश्य दक्षिणं जान्वाच्याग्निं मनसा ध्यायन्स्वाहाकारेण यजमानेऽन्वारब्धे जुहोति इदमग्नय इति त्यागः । ततो यजमानो वरं ददामीति मन्त्रेण वाचं विसृजते · ततो यजमानोऽध्वर्यवे वरं ददाति अस्याः पूर्णाहुतेः समृद्धये वरं दक्षिणां ब्रह्मणेऽध्वर्यवे चाहं सम्प्रदद इति · वरशब्देनात्र यस्मै दीयते तदभि-

1) ? ॰ग्रावर्थया २. ॰ग्रावर्थयस्य २. 2) समुदितानामेव प्रैषः Chamb. 622.

लषितं यद्यजमानेन दातुं शक्यते वस्त्रहिरण्यधान्यादि तदुच्यतऽइति हरिस्वामिनः ॥ ततोऽध्वर्युरेव तूष्णीमग्निहोत्रं जुहोति[1] । तत्र पूर्वं यजमानो गार्हपत्यदक्षिणाग्न्योरन्तरालेनाहवनीयसमीपऽआगत्याप्रदक्षिणमाहवनीयं परीत्य स्वस्थानऽउपविश्य तूष्णीमाचामति पत्न्यप्येवमेवागत्य स्वस्थानऽउपविश्याचामति । ततोऽध्वर्युरपरेणाहवनीयं कूर्चं प्रागग्रमुदगग्रं वा निदधाति · तत आहवनीयस्य परिस्तरणम् पुरस्तात्पश्चाचोदगग्रैर्दर्भैः दक्षिणत उत्तरतश्च प्रागग्रैः पुरस्तात्प्रथमम् ततः प्रदक्षिणमुदक्संस्थम् · ततो गार्हपत्यस्य परिस्तरणम् ततो दक्षिणाग्नेः । ततो गार्हपत्यस्य पर्युक्षणम् · ततो दक्षिणाग्नेः · ततो गार्हपत्यादारभ्याहवनीयं यावदुदकधारां संततां निनयति · तत आहवनीयस्य पर्युक्षणम् । ततोऽशूद्रेण पुंवत्सामग्निहोत्रीं गां दोहयति संकेतादिना दोहने प्रेरयति · सा च गौर्विहारं दक्षिणेन प्राङ्मुखी वोदङ्मुखी वा स्थाल्यां त्रैवर्णिककृतायामूर्धकपालायां मार्त्तिक्यां दोह्यते । ततोऽध्वर्युर्गार्हपत्यस्य कतिपयानङ्गारानुत्तरतः पृथक्कृत्वा तत आहवनीयं पूर्वेण तद्दुग्धमन्तरतः कुर्वन्नाहृत्य[2] तेषूत्तरतः कृतेष्वङ्गारेष्वधिश्रयति · ततो ज्वलता एकेन दर्भतृणेन स्थाल्या उपरि धृतेन दुग्धमवज्योत्य स्रुवेण दुग्धमध्ये उदकमवनीय पुनस्तथैवावज्योत्योत्तरत उद्वास्य निदधाति हस्तं विमुच्य पुनरादाय तत उत्तरतो निदधाति पुनरप्यादाय ततोऽप्युत्तरतो निदधाति · एवं त्रिरुदगुद्वास्य वैकङ्कतं स्रुक्स्रुवं प्रतप्य पाणिना संमृज्य पुनः प्रतप्य यजमानं संकेतादिना पृष्ट्वा तिष्ठता यजमानेन तथैवानुज्ञातोऽग्निहोत्रहवण्यां सव्यहस्तगृहीतायां स्रुवेण चतुरुन्नयति पञ्चावत्तिनः पञ्च स्रुवानुन्नयति · ततः स्रुवं स्थाल्यां[3] मुक्त्वा पालाशादियज्ञियवृक्षसम्बन्धिनीं प्रादेशमात्रीं समिधं प्रागग्रां स्रुग्दण्डस्योपरि अङ्गुल्याव्यन्तरितां धारयन्गार्हपत्यस्योपरि समीपऽएव स्रुचं धृत्वा ततो मुखमात्रे स्रुचं धारयन्नाहवनीयं प्रति हरति · ततो गार्हपत्याहवनीययोर्मध्ये स्रुचं नीचैः कृत्वा पुनर्मुखमात्रऽएव धारयित्वाहवनीयं प्राप्य तत्समीपऽउत्तरत उपविश्य सव्यहस्ते स्रुचं कृत्वा तूष्णीं समिधमाधाय प्रदीप्तायां समिधि द्व्यङ्गुलं समिधो मूलादतिहृत्याग्निं ध्यात्वा गृहीतस्य चतुर्थांशं तूष्णीं जुहो-

1) see ४. १३. १२—१४. २७. 2) °न्नाहृत्य Chamb. 622. 3) ? स्थाल्या ९.

ति   इदमग्नयऽइति यजमानस्य त्यागः । ततः स्रुक्स्थमवशिष्टं पयः पात्रान्तरे कृत्वा तत्रैव निधाय प्रत्यागत्य पुनः संकेतादिना यजमानं पृष्ट्वा तथैव तिष्ठता यजमानेनानुज्ञातः पुनश्चतुरुन्नीय तथैव समिधमुपरि धारयंस्तथैवाहवनीये पुनः समिधमभ्याधाय सूर्यं मनसा ध्यायंश्चतुर्थांशं हुत्वा पूर्वमन्यत्र पात्रान्तरे कृतं पयः स्रुचि निनीय तां स्रुचं कूर्चे निधाय गार्हपत्यमवेक्षते · पुनः स्रुचमादाय पूर्णाहुतेरुत्तरतः स्रुवत्रयपर्याप्तामाहुतिं प्रजापतिमुद्दिश्य जुहुयात्   इदं प्रजापतयऽइति यजमानस्य त्यागः । ततः स्रुचं द्विरूर्ध्वामुत्क्षिप्य कूर्चे निदधाति · ततः स्रुगग्रं प्राक्प्रत्यक्चोपमृज्य कूर्चे निमार्ष्टि तूष्णीम् · पुनरुत्तानेन हस्तेन तथैव द्विरुपमृज्य कूर्चस्य दक्षिणतो भूमौ पाणिमुत्तानं निदधाति · ततः उदकं स्पृष्ट्वा गार्हपत्यं गत्वा तत्र समिधमाधाय क्वचित्पात्रऽएकं स्रुवं गृहीत्वा पात्रान्तरे द्वितीयं स्रुवं स्थापयित्वा तृतीयं स्रुवं गृहीत्वा पूर्वगृहीतेन सह तूष्णीं गार्हपत्ये जुहोति इदमग्नये गृहपतये रयिमते पुष्टिपतयऽइति मनसा त्यागः · ततश्चतुर्थं स्रुवं गृहीत्वा द्वितीयवारं पात्रान्तरस्थापितेन सह जुहोति   इदं प्रजापतयऽइति त्यागः · ततो दक्षिणाग्नावेवमेव वारद्वयं जुहोति   इदमग्नयेऽन्नादायान्नपतय ऽइदं प्रजापतयऽइति त्यागौ · ततः स्रुचं गृहीत्वा बहिर्निष्क्रम्यानामिकया स्रुक्स्थं दुग्धं गृहीत्वा प्राश्याचम्य पुनरनामिकयैव गृहीत्वा प्राश्नाति · तत आचम्य स्रुचः सकाशात्सर्वं पयो हस्तेन गृहीत्वा प्राश्य दुग्धलिप्तं हस्तं जिह्वया सकृन्निर्लेढि आस्वादयति · तत आचम्याहवनीयसमीपऽआगत्य स्रुचि दक्षिणहस्तेनोदकं निनीय स्रुचोत्तरत उदकमुत्सिञ्चति तूष्णीम् ततोऽपसव्यं कृत्वा स्रुचमुदकेन पूरयित्वा दक्षिणत उत्सिञ्चति पितृतीर्थेन तूष्णीम् · ततः सव्यं कृत्वाप उपस्पृश्य पुनस्तृतीयवारं स्रुचं पूरयित्वा प्रागुदीच्यां दिश्यूर्ध्वमुदकमुत्क्षिपति · पुनः स्रुचं पूरयित्वा कूर्चस्थानऽआहवनीयमपरेण प्राक्संस्थं त्रिर्निषिञ्चति · ततः स्रुक्स्रुवमाहवनीये प्रतप्य वेदिमध्ये निधाय गार्हपत्यदक्षिणाग्न्याहवनीयेषु क्रमेण तिस्रस्तिस्रः समिध आदधाति तूष्णीम् · अत्राग्न्योरुपस्थानं न भवति · ततो गार्हपत्यदक्षिणाग्न्याहवनीयानां क्रमेण पर्युक्षणम् · ततः पत्नीयजमानौ वाचं विसृज्याचम्याहवनीयं प्रदक्षिणं परीत्य गार्हपत्यदक्षिणाग्नीऽअन्तरेण यथाप्रविष्टं नि-

ष्क्रामतः । इति तूष्णीमग्निहोत्रहोमः समाप्तः ॥ ॥ अथ तनूहवींषि लिख्यन्ते ॥ तत्राग्नये पवमानाय प्रथमा इष्टिर्भवति । तत्र विशेषः । उद्धरणाभावः · त्रिष्वप्यग्निष्वन्वाधानम् · ब्रह्मवरणाभावः तदभावाद्धृतजपस्याप्यभावः · चतुरासनम् · ब्रह्मा समन्त्रकमहे दैधिषव्य इत्यादिनासनं संस्कृत्योपविशति · ततो यजमानस्य व्रतग्रहणम् · प्रणीताप्रणयनम् · पात्रासादने अष्टौ कपालानि दक्षिणार्थे तिस्रो गावः षड्वा द्वादश वा त्रयोदशप्रभृति परार्धपर्यन्तमिष्टासंख्या[1] वा अष्टादशेध्मकाष्ठानि पाञ्चदश्यं च सामिधेनीनामिति (२. ३. १६) शाङ्खायनोक्तेः अन्यत्सर्वं प्रकृतिवत् · ग्रहणे अग्नये पवमानाय जुष्टम् · प्रोक्षणे अग्नये पवमानाय त्वा जुष्टम् · प्राणादाने अग्निं पवमानं गह · अववाधने इदमहं पञ्चदशेन वज्रेणेति · उत्तमप्रयाजत्यागे इदमग्नये सोमायाग्नये पवमानाय देवेभ्य इत्यादि · प्रधानयागे देवतापदमात्रमुपांशु अग्नये पवमानाय उपांशु अनुब्रूहीति प्रथमस्थानेन अग्निं पवमानम् उपांशु यजेति प्रथमस्वरेण इदमग्नये पवमानाय · ततः स्विष्टकृदादि · प्राशित्रादि सर्वम्[2] · दक्षिणालम्भमन्त्रे ऊर्गसीति पदस्य स्थाने त्रिगवमसीति वा षड्गवमसीति वा द्वादशगवमसीति वा त्रयोदशगवम् पञ्चदशगवम् शतगवम् सहस्रगवमित्यादि परार्धपर्यन्तं[3] विकल्पेन ज्ञेयम् अन्यत्प्रकृतिवत् ब्राह्मणा इमा वस्तिस्रो गावः प्रतिगृह्णीतेति एवं षट्पक्षे षड्गाः दक्षिणाः द्वादश गाः दक्षिणाः शतं गाः सहस्रं गा इत्यादि अत्र भूयसीदानं चतुर्थं पक्षान्तरमेव न तु भूयसीनां षडादिभिः सह समुच्चयः · व्यूहने अग्नेः पवमानस्योज्जितिम् अग्निः पवमानस्तमपनुदत्विति · प्रस्तरत्यागे इदमग्नये सोमायाग्नये पवमानाय देवेभ्य इत्यादि · शेषं प्रकृतिवत्कर्मापवर्गान्तम् । इति प्रथमेष्टिः ॥ अथ द्वितीया द्विहविष्का । अग्नये पावकायाष्टाकपालः पुरोडाशः अग्नये शुचयेऽष्टाकपालः । तत्र विशेषः । अग्न्यन्वाधानम् चतुरासनम् समन्त्रकं ब्रह्मोपवेशनम् व्रतग्रहणम् प्रणीतादि · पात्रासादने षोडश कपालानि दक्षिणापक्षाः पूर्वेष्टिवत् अष्टादशेध्मकाष्ठानि पाञ्चदश्यं च सामिधे-

---

१) परार्ध्यं Chamb. 622. २) सर्वं चतुर्धाकरणसहितं Chamb. 622. ३) ? परार्ध्य° १.

नीनामिति शाङ्खायनवचनात् (२. ३. १६)[१] अन्यत्प्रकृतिवत् · ग्रहणे अग्नये पावकाय जुष्टम् अग्नये शुचये जुष्टम् · प्रोक्षणे अग्नये पावकाय त्वा जुष्टम् अग्नये शुचये त्वा जुष्टम् · विभज्यालम्भे इदमग्नेः पावकस्य इदमग्नेः शुचेः · प्राणदाने अग्निं पावकं गच्छ अग्निं शुचिं गच्छ · अववाधने इदमहं पञ्चदशेन वज्रेणेति · उत्तमप्रयाजत्यागे इदमग्नये सोमायाग्नये पावकायाग्नये शुचये देवेभ्य इत्यादि · प्रधानयागे द्वयोरपि यागयोरुपांशु देवतापदम् अन्यदुच्चैः अग्नये पावकाय उपांशु अनुब्रूहि अग्निं पावकम् यज अग्नये शुचये अनुब्रूहि अग्निं शुचिम् यज इदमग्नये [पावकाय इदमग्नये] शुचये · स्विष्टकृदादि · प्राशित्रादि सर्वम् · दक्षिणालम्भे दाने च पूर्वेष्टिवत् · व्यूहने अग्नेः पावकस्याग्नेः शुचेरुज्जितिमित्यादि · शेषं कर्मापवर्गान्तं प्रकृतिवत् । इति द्वितीयेष्टिः ॥ अथ तृतीयोच्यते । तत्रादित्यै चरुरेकं हविः । तत्र विशेषः । अग्न्यन्वाधानम् ब्रह्मवरणाभावः चतुरासनम् ब्रह्मोपवेशनं समन्त्रकम् व्रतग्रहणम् प्रणीताप्रणयनादि · पात्रासादने कपालस्थाने चरुस्थाली उपवेषाभावः दक्षिणार्थे धेनुः विंशतिरिध्मकाष्ठानि सप्तदशादित्यायामिति शाङ्खायनसूत्रात् (२. ३. १७) पात्र्या अभावः मेक्षणम्[२] शेषं प्रकृतिवत् · ग्रहणे अदित्यै जुष्टम् · प्रोक्षणे अदित्यै त्वा जुष्टम् · चरुधर्मा अन्वारम्भणीयायामुक्ताः · पात्र्यङ्गुलिप्रक्षालननिनयनयोरभावः · प्राणदाने अदितिं गच्छ · [अववाधने सप्तदशेन वज्रेणेति · उत्तमप्रयाजत्यागे इदमग्नये सोमायादित्याऽइति][३] · प्रधानयागे शाङ्खायनसूत्राद्देवतापदमुपांशु (२. ३. १५) अदित्यै अनुब्रूहि अदितिं यज इदमदित्यै · ततः स्विष्टकृदादि · भागचतुर्धाकरणादि सर्वं भवति · दक्षिणालम्भे धेनुरस्यूर्जमिति अस्या इष्टेः समृद्ध्यै धेनुं दक्षिणां ब्रह्मणे इत्यादि ब्राह्मणा इयं वो धेनुः प्रतिगृह्णीतेति · व्यूहने अदित्या उज्जितिम् अदितिस्तमपनुदत्विति · प्रस्तरत्यागे इदमग्नये सोमायादित्यै देवेभ्य इत्यादि · अन्यत्कर्मापवर्गान्तं सर्वं प्रकृतिवत् ॥ उद्धरणाद्ब्रह्मवरणवर्जमग्न्यन्वाधानादि कर्मापवर्गान्तं सर्वेष्टिषु सर्वं भवति । कर्माप-

---

१) द्वे पात्र्यौ is added in Chamb. 622. २) शृतावदानस्थाने मेक्षणं Chamb. 622. ३) From Chamb. 622., deest in १.

वर्गान्ते शतं ब्राह्मणान्भोजयेत् आधाने च पशौ शतमिति परिशिष्टात् · अस्य श्रौताग्नीनामाधानकर्मणः समृद्ध्यर्थं यथासम्पन्नेन तृप्तिपर्यन्तभोजनपर्याप्तेनान्नेन शतं ब्राह्मणानहं तर्पयामीति प्रयोगः । ततोऽन्यानि वस्त्राणि परिधाय परिहितान्यहतवासांस्यध्वर्यवे ददाति यजमानः आत्मवाससी पत्नीवाससी चाध्वर्यो तुभ्यमिति । ततो गृहे विद्यमानस्यान्नस्याग्नीधे दानम् सऽस्थिते दद्यादिति कण्वपाठात् इममन्नमग्नीत्तुभ्यमिति । ततो यजमानस्य तिलकादिमाङ्गल्यम् आशीर्वादादि ॥ ॥ अथवा त्रयाणां तनूहविषां स्थाने केवल आग्नेयोऽष्टाकपालः पुरोडाशो भवति · तत्र षड्वा द्वादश वा चतुर्विंशतिर्वा पञ्चविंशतिप्रभृतिपरार्ध्यसंख्या वा यथाश्रद्धं गावो दक्षिणा भवन्ति · अत्रापि देवतापदमुपांशु अन्यत्सर्वं तनूहविर्वत् · इत्येका इष्टिः । अथ द्वितीयेष्टिः · अदित्यै चरुः पूर्ववद्भवति न कोऽपि विशेषः · शाङ्खायनसूत्रे त्वस्मिन्पक्षे आग्नेय्यां प्रथमायामिष्टौ वैकल्पिकोऽयं विशेषः · तथा च सूत्रम् (२.३.१-१०) आग्नेयी वा द्वयोः पूर्वाज्येन तनूदेवताः पुरस्तात्पुरोडाशस्याग्निं पवमानं पावकं च शुचिं चोपरिष्टादिति तेनात्राज्यभागानन्तरं प्रधानयागात्पूर्वमग्नये पवमानाय यागः उपांशुयागवत् प्राक्स्विष्टकृतोऽग्नये पावकायाग्नये शुचये चाज्येन यागद्वयम् · उपांशु देवतापदम् उपांशुयाजवत् · ततः स्विष्टकृदादि · अस्मिन्पक्षे अनेनैव क्रमेणोत्तमप्रयाजादिषु देवतानां संकीर्तनं कर्तव्यम् अग्नेः पवमानस्याग्नेः[1] पावकस्याग्नेः शुचेरुज्जितिम् अग्निः पवमानो ऽग्निः[2] पावको ऽग्निः शुचिस्तमपनुदन्त्विति व्यूहने · शेषं पूर्ववत् · इदमग्नये सोमायाग्नये पवमानायाग्नये पावकायाग्नये शुचये देवेभ्य इत्युत्तमप्रयाजे प्रस्तरहोमे च त्यागः । शाङ्खायनानां दक्षिणाविशेषः षड्दक्षिणा द्वादश वा[3] अश्वः शतमानरथवासोऽजाश्चेति (२.३.१८-२१) एतासु तिसृष्विष्टिषु समं विभज्य दीयन्त इति तद्भाष्ये · छन्दोगानां तु विशेषः धेनुमनड्वाहं वत्सतरीं वत्सतरमजं पूर्णपात्रं तत्प्रथमायामिष्टौ दद्यादेवमितरयोरन्यत्राजपूर्णपात्राभ्यामिति[4] · तत्र द्वन्द्वैकवद्भावेनैकवचनान्तं दक्षिणापदमूर्गसीत्यस्य स्थाने प्रयोज्यम् धेन्वनडु-

१) °ग्नेरग्ने: Chamb. 622. २) °ग्निरग्निः Chamb. 622. ३) चतुर्विंशतिर्दक्षिणा द्वादश षड्वाश्वः शत° Çânkh. ४) दद्यात्तथोत्तरयोरन्यत्रा° Lâṭyâyana 8. १२. ११-१२.

द्वत्सतरीवत्सतराजपूर्णपात्रमसीति[१] प्रथमायाम् धेन्वनडुद्वत्सतरीवत्सतरमसीत्यु- त्तरयोः · शाङ्खायनानामपि द्विगवाश्वशतमानमसीति प्रथमायाम् द्विगवरयवा- सोऽसीति द्वितीयायाम् द्विगवाजमसीति तृतीयायामिति ॥ ॥ अथ यजमानस्य नियमा उच्यन्ते । आधानानन्तरं यजमानो यावज्जीवमनृतं न वदेत् · अतिथि- मागतं नापनुदेत् · दुर्गन्धिकाष्ठस्याग्नौ प्रक्षेपं न कुर्यात् अथवा पूतिदारुशब्देन छिन्नं दारु कथ्यते न छिन्नं दार्वादध्यादिति शाखान्तरात् · पृथिव्यां गर्ते पक्वं तिन्दुकादि नाश्नीयात् · अग्निहोत्रार्थमुद्धृतेषूदकदानं पानं च वर्जयेदिति कर्कः अथवा नावि नौकामध्ये यदुदकम् तस्य पानं यजमानो न कुर्यात् या अन्तर्नाव्यापः स्युर्न तासामाचामेदिति तथा अन्तर्नाव्यपां नाश्नीयादिति च सूत्रान्तरे · एता- वद्यावज्जीवम् । ततो द्वादशरात्रं वा षड्रात्रं वा त्रिरात्रं वा यजमानो ब्रह्मचारी स्यात् गार्हपत्याहवनीयदक्षिणाग्नीनां नित्यं धारणं कुर्यात् दुग्धेनैवाग्निहोत्रं जुहुयात् अग्निसमीपे भूमौ शयीत । एते नियमास्त्रिरात्रादिकालपर्यन्तं शक्त्यपे- क्षया ज्ञेयाः · तत्राधिककालपक्षाश्रयणे फलाधिक्यं भवति ॥ पुनराधाने चाधानवत्सर्वं भवति · तत्र केनचिन्निमित्तेन विनष्टेष्वग्निषु विनष्टानग्नीनुत्सृज्य[२] पुनराधानं कुर्यात् · ब्रह्मचर्याग्निधारणाद्यो नियमा अपि भवन्त्येव ॥ ॥१०॥

इति चतुर्थस्य दशमी कण्डिका ॥ ॥

अग्न्याधेयमुक्तम् । इदानीं श्रुतिक्रमानुसारेण पुनराधेयमुच्यते ·

पुनराधेयमाधानाप्रतिज्ञातस्य ॥ १ ॥[३] आधानेन लक्षणेन यस्याप्रतिज्ञा- तमप्रकाश्यमुपजायते स आधानाप्रतिज्ञात इति भर्तृयज्ञाचार्याः । यस्याधानान- न्तरमेव[४] प्रतिज्ञातमपगतं स आधानाप्रतिज्ञात इति कर्कः[५] । अत्र एवं श्रूयते यस्याधानमपार्थकं[६] स्यात्स पुनरादधीतेति ततो योऽग्नीऽआधाय सर्वज्यानिं जीयते स पुनरादधीतेति । सूत्रार्थस्तु · प्रतीतः प्रसिद्धो ज्ञातः प्रतिज्ञातः प्राद्यो

---

१) ? °उद्वत्स° १. २) °ग्निषु स्थितानुत्सृज्य Chamb. 622. ३) अग्नीनामाधा- नमप्रतिज्ञातं नष्टं यस्य स आधानाप्रतिज्ञातः Mahád. ४) Thus Karka. °मेवा २. ५) °मनर्थकं Karka.

गताध्वर्ये प्रथमयेति समासः · यो धनवृत्ताध्ययनादिमत्तयातिप्रसिद्धः पुरुषः स प्रतिज्ञात इत्युच्यते न प्रतिज्ञातोऽप्रतिज्ञातः आधानलक्षणेन निमित्तेनाप्रतिज्ञातः आधानाप्रतिज्ञातः यः प्रागाधानाल्लब्धप्रतिष्ठोऽपि अग्न्याधानसमनन्तरं संवत्सरादर्वागेव वित्तमानादिहानेर्लाभाभावाद्वाप्रतिष्ठितोऽप्रसिद्ध-इव स्यात् अप्रतिष्ठ-इव भवेत् तस्येदं दुष्टाग्न्युत्सर्गपूर्वकमदुष्टाग्न्युत्पादकं पुनराधेयसंज्ञकं कर्म भवति। तथाथर्वणे पठ्यते आधानादृद्धिहानिश्चेदर्वाक्संवत्सराद्रोहिण्यामग्निहोत्रमुत्सृज्य पुनर्वस्वोः पुनरादधीतेति। शाङ्खायनश्च (२.५.१) काम्यं पुनराधेयमव्रानानस्येति आधानसंस्कृतेष्वग्निषु पुत्रादिकामप्राप्त्यर्थानि कर्माणि कुर्वन्नपि अग्निदोषाद्यः कामान्न प्राप्नोति सोऽव्रानानः तस्य दुष्टाग्निपरित्यागेनादुष्टाग्न्युत्पादकतया काम्यं कामेभ्यो हितं पुनराधेयं भवतीत्यर्थः। तेन भर्तृयज्ञकृतं व्याख्यानं युक्तमिवाभाति। अथवा अयमर्थः। प्रतिज्ञातशब्दः प्रियवचनः एतद्वास्य प्रतिज्ञाततमं धामेति (८.६.३.२४. ९.१.१.२२) दर्शनात् हरिस्वामिभिर्माधवाचार्यैश्च तथैव व्याख्यातत्वाच्च · अतः प्रतिज्ञातं प्रियम् न प्रतिज्ञातमप्रतिज्ञातमप्रियम् आधानसमनन्तरमेव सर्वस्वहानिपुत्रमरणप्रतिष्ठाहान्याद्यनिष्टदर्शनेनाधानमप्रतिष्ठितमप्रियमनिष्टफलत्वादवल्लभं यस्य स आधानाप्रतिज्ञातः तस्य। अयमेवोज्ज्वल(:) सूत्रार्थः। फलान्तरमाह ·

राड्ययशस्कामस्य वा ॥२॥

त्रिरात्रावरमग्नीनुत्सृज्य ॥३॥ त्रिरात्रमवरं निकृष्टमन्तिमपक्षभूतं यस्य स त्रिरात्रावरः कालः · तेनान्तिमपक्षे त्रिरात्रमग्नीन्गार्हपत्याहवनीयदक्षिणाग्निसभ्यानुत्सृज्य पुनराधेयं भवति · अत एव त्रिरात्रावरमित्युपदेशाच्चतूरात्रपञ्चरात्रषड्रात्रादि संवत्सरपर्यन्तं पुनराधेयस्य पुरस्तादग्नीनामुत्सर्गः। बहुवचनस्य त्रिष्वग्निषूत्सृष्टेषु चरितार्थत्वात्त्रयाणामेवोत्सर्गः न सभ्यस्येति कर्कः[1] · सर्वानिति युक्तमविशेषात् · शंस्यावसथ्ययोस्तूद्धृत्योत्सर्गः कार्यः बहुवचनोपदेशात्।

सद्यो वा ॥४॥ अथवा समानेऽहन्येव यस्मिन्नहनि पुनराधेयं क्रियते

---

[1]) अतश्च सभ्यस्यानुत्सर्गः Karka.

तस्मिन्नेवाह्नि प्रातरग्नीनुत्सृज्य पुनरादधीतेति · अस्मिन्पक्षे विशेषं वक्ष्यति व्रीह्यपूपम॰ सद्यश्चेदिति (८)।

पुनर्वस्वोः ॥५॥ पुनर्वसुनक्षत्रे पुनराधेयं भवति।

वर्षासु मध्यन्दिने वा ॥६॥ वर्षासु ऋतौ · अथवा मध्यन्दिने मध्याह्नकाले · मध्यन्दिनस्य वर्षाभिः सह विकल्पो न समुच्चयः यदा मध्यन्दिनोऽथ वर्षा इति (२.२.३.९) मध्यन्दिनस्य वर्षाकालत्वसम्भवात्।

कुशैराधानम् ॥७॥ न दारुभिः (४.१.१) नेध्मेन (४.१.१०)।

व्रीह्यपूपमर्कपलाशयोः पक्वं गार्हपत्यस्थाने निदधात्येवमाहवनीयस्य यावं सद्यश्चेत् ॥८॥ चेद्यदि सद्योऽग्नय उत्सृष्टाः (४) तदायं विशेषः · व्रीहिमयमपूपमर्कपत्त्रयोः कपालस्थानीययोर्लौकिकाग्निना वा आवसथ्याग्निना वा पक्वं शृतं गार्हपत्यस्थाने निदधाति एवं यावं यवमयमपूपमाहवनीयस्थाने · स्मार्तान्यच्च भूसंस्कारान् श्रौतमुल्लेखनं च कृत्वापूपस्थापनं कार्यम्[1] ततोऽन्वारब्धेऽभ्युक्षणादि। रात्र्यन्तर्धानपक्षेऽपूपनिधाननिषेधात्सद्यश्चेदित्युक्तम्।

आग्नेयः पञ्चकपाल उपांशु प्रागुत्तमादनुयाजात् ॥९॥[2] अत्र पूर्णाहुत्यनन्तरतनूहविषां स्थाने इदमुच्यते · आग्नेयमेवेति (२.२.३.१४) एवकारकरणादन्येषां तनूहविषां निरासः।

तद्वर्जं वा ॥१०॥[3] अथवा उत्तमानुयाजं वर्जयित्वान्यत्सर्वं कर्मोपांशु भवति उत्तमानुयाजमात्रस्यैवोच्चैष्ट्वविधानात् (२.२.३.१७) तस्मादयमेव पक्षः।

अग्नीनिति वा प्रथमे प्रयाजेऽनुयाजे च ॥११॥[4] अग्नीन्यजेति वा प्रयोज्यम् वा समिधो यजेति देवान्यजेति वा।

---

1) स चायमपूपः प्राक् सम्भारेभ्यः स्थाप्यते · सम्भारेषु ह्यग्निनिधानं विहितम् भूर्भुव इति सम्भारेष्विति (४.१.१) · न चापूपस्य सम्भारैः सह विकल्पो धर्ममात्रत्वात् · अतः परिसमूहनादीन्पञ्च पदार्थान्कृत्वा अपूपस्थापनम् · सद्यःपक्षे चापूपौ भवतः न रात्र्यन्तरपक्षे · अपूपं प्रकृत्याह पूर्वाभ्यामेवर्द्धम इति (२.२.३.१३) पुनस्तन्निराकरणायाह रात्रिभिर्व्यवान्तरितौ भवत इति (ibid). Karka. 2) उत्तमानुयाजवर्जं स आग्नेय उपांशु भवति Ss. 3) उत्तमानुयाजवर्जं सर्वं कर्मोपांशु भवति Ss. तेनोपांश्चु चरन्तीति (२.२.३.१६) · चरणशब्दे च सर्वस्योपांशुताचार्येणोक्ता चरणाशब्दे सर्वमिति (३.७.८) Karka. 4) एवं श्रूयते प्रयाजान्प्रकृत्य स आश्राव्याह समिधो यजेति अग्नीन्यजेति त्वेव ब्रूयात् (२.२.३.१८) तेन

आज्यभागौ द्वितीयोऽग्नये पवमानायेन्दुमते वा ॥१२॥[1] प्रथम आज्यभाग आग्नेय एव. द्वितीयस्तु अग्नये पवमानाय अग्नये इन्दुमते वा कर्तव्यः न सोमायेति ।

हिरण्यं दक्षिणानड्वान्वाग्न्याधेयिकीश्चेहुज्जुतेः ॥१३॥ अस्मिन्नाग्नेये हिरण्यं दक्षिणा अनड्वान्बलीवर्दो वा इहन्नग्न्याधेयिकीः अग्न्याधेयसम्बन्धिनीः[2] ता वै षड्दद्यादित्यादिकाश्च (२.२.२.३) ददाति अग्न्याधेयिकीर्दत्त्वा पौनराधेयिकीर्ददातीति शाखान्तरेऽउभयीनां श्रवणात् · तत्पुनर्नोपपद्यते यतोऽस्मिन्वाक्ये अग्न्याधेयिकीर्दत्त्वेत्यनुवाद एवायमिति पूर्वमीमांसकैः सिद्धान्तितमस्ति अग्न्याधेयिक्यो यतः पूर्वं दत्ताः[3] अतः पौनराधेयिक्य इति · तेनात्र श्रुतिग्रहणं विध्याशङ्कानिरासार्थम् अन्यथा अग्न्याधेयिकीश्चेत्युक्ते शाखान्तरीयवचनमूलं विधित्वमाश्रयणीयं स्यात्[4] ।

अग्न्याधेयवदन्यत्सद्यः ॥१४॥ वासःपरिधानादि पूर्णाहुत्यन्तम् · विशेषमाह इदं च सद्य एव समाने एकस्मिन्नेवाहनि भवति नाग्न्याधेयवद्व्यहम् । अत्राग्न्यगारकरणं न भवति तयोर्विद्यमानत्वात्[5] · अत एवारणिप्रदानं च · उक्लासोऽपि न भवतीत्यग्निसंस्कारत्वादिति केचित् · सर्वमेव पुनर्भवतीत्यपरे अदृष्टार्थत्वात् वचनं विना परित्यक्तुमशक्यत्वाच्च । अधुना पुनराधेयस्य पक्षान्तरमाह ·

अपराह्णे मैत्रावरुणी वशानस्तमिते पुरोडाशेडान्तं कृत्वा रात्रिशृतया प्रातश्च-

---

विकल्पाशङ्कया अग्नेोनिति वेत्युक्तम् · यद्येवम् अग्नेोनित्येवेत्यवधारयितव्यम् स चायं वाचनिको देवताविकल्पः Karka.

१) this sûtra is wanting in Karka's gloss! २) ? आग्नेयसंब° २. ३) दत्तः २. ४) श्रुतिग्रहणं (श्रति° Cod.) समुच्चयविधानार्थमिति केचित् · तदयुक्तम् · अग्न्याधेयिकीर्दत्त्वा पुनराधेयिकोर्ददा[ती]त्ययमनुवाद एव · अग्न्याधेयिक्यो (आद्या° Cod.) हि पूर्वं दत्तास्ततः पुनराधेयिक्यः · श्रुतिग्रहणं च विध्याशङ्कानिवृत्त्यर्थम् Karka. च समुच्चयार्थः · अग्न्याधेयसम्बन्धिनीर्दक्षिणा दद्यान्न वा · दद्याच्छाखान्तरश्रुतेः Mahád. ५) अग्न्यगारकरणमरणिप्रदानमुक्लासश्च न भवति अनग्निसंस्कारात् Karka. नाग्न्यगारकरणारणिप्रदाने विद्यमानत्वात् · उक्लासोऽपि न भवति संस्कारस्य ज्ञातत्वात् Mahád.

रन्ति तत आधानम् ॥१५॥[1] पुनराधेयदिवसात्पूर्वदिनेऽपराह्णे मैत्रावरुणी वशा वन्ध्या गौरालभ्यते · तस्याश्च सूर्यास्तमयात्प्राक् पशुपुरोडाशेडान्तं कर्म कृत्वा रात्रिशृतया वशया रात्रौ विशसनादि अर्पणान्तं कृत्वा उद्वासनादि प्रातः प्रचरन्ति · ततो वशासमाप्त्यनन्तरं सभ्योऽग्नीनुत्सृज्याधानम् पुनराधेयसंज्ञं कर्तव्यम् प्रागुक्तेष्वेव कालेषु । अस्मिन्पक्षे पूर्वदिने मैत्रावरुण्या वशायाः करणविधानात्त्रिरात्रावरमग्न्युत्सर्गो न भवति तत्स्थानमपूपान्तर्धानमपि न भवतीति केचित् सभ्यश्चेदित्युक्तत्वाद्भवत्येवेत्यन्ये ॥ ॥ एकादशी कण्डिका ॥११॥ ॥

अथ पद्धतिः ॥

समाप्तमग्न्याधेयम् अथ पुनराधेयमुच्यते । आधानानन्तरं संवत्सरादर्वागेव यस्य महत्त्वस्य कीर्तिर्हानिर्भवति धनधान्यादिहानिर्वा[2] तस्य पुनराधेयं भवति । पुनराधेयमाधानाप्रतिज्ञातस्येति सूत्रम् · प्रतीतः प्रसिद्धो विख्यातो ज्ञातः प्रतिज्ञातः न प्रतिज्ञातः अप्रतिज्ञातः आधानेन निमित्तेनाप्रतिज्ञातः अप्रसिद्धो ज्ञातः अप्रतिष्ठ-इव ज्ञातः आधानाप्रतिज्ञातः तस्येदं भवतीत्यर्थः · अथवा प्रतिज्ञातं प्रियम् एतद्वास्य प्रतिज्ञाततमं धाम यथा प्रियो वा पुत्रो हृदयं वेत्यत्र (१.८.१.२२) तथा दर्शनात् न प्रतिज्ञातमप्रतिज्ञातम् पुत्रमरणसर्वस्वहानिप्रतिष्ठाहान्याद्यनिष्टफलदत्वादाधानमप्रतिज्ञातमप्रियं यस्यासावाधानाप्रतिज्ञातः तस्य पुनराधेयं भवतीत्यर्थः । तथा राज्यकामस्य यशस्कामस्य वा पुनराधेयं भवति । तत्र पुनराधेयकरणदिनात्पूर्वं त्रिरात्रचतूरात्रप्रभृति संवत्सरपर्यन्तमग्नीनामुत्सर्गः कर्तव्यः संवत्सरपरार्ध्यमुत्सृष्टाग्निर्भवतीत्यापस्तम्बः · अथवा सभ्योऽग्नीनुत्सृज्य पुनराधेयं कर्तव्यम् । तत्र सभ्यस्योत्सर्गो न भवति अग्नीनुत्सृज्येति बहुवचनस्य त्रिष्वप्युत्सृष्टेषु चरितार्थत्वादिति कर्कः · अविशेषात्सभ्यस्याप्युत्सर्ग इत्यपरे । तच्च पुनराधेयं वर्षास्वृतौ भवति मध्यन्दिने वा · पुनर्वसुनक्षत्रे भवति । तत्राग्न्याधेयवत्सर्वः सर्वं भवति न ह्रस्वम् । अमुकनिमित्तं पुनराधेयमहं करिष्यऽइति

---

1) इदं पश्चात्तरमुच्यते नोत्सर्गो नापूपौ Mahâd. अपराह्णे मैत्रावरुणीं वशामालभ्य रात्रौ अपयित्वा प्रातः प्रचारः तत आदधीत · पुनर्वस्वोरेव नान्यत्र · न त्रिरात्रावरमुत्सर्गो नापूपाविति Karka. 2) ? धनाधान्या° १.

वरणे । तत्राग्न्यगारकरणम् वपनम् अहतक्षौमपरिधानम् गार्हपत्यागारेऽग्नेः
स्थापनम् देवाः पितर इति जपः यजमानस्य पूर्वद्वारेण प्रवेशनम् दक्षिणद्वारेण
पत्न्याः अग्नेः पश्चात्तयोरुपवेशनम् अरणिप्रदानम् अजबन्धनं वा मानादि
वरदानान्तं चातुष्प्राश्यं वा स्थापितस्याग्नेरुपशमनम् वाचं यच्छ पूर्णाहुतेरिति
प्रैषः वाग्यमनं यजमानस्य · ततो गार्हपत्यखरे पञ्च भूसंस्काराः पुनस्त्रिरु-
ल्लेखनम् · सद्योऽग्नय उत्सृष्टाश्चेद्व्रीहिमयमपूपमर्कपर्णयोः कपालस्थानीययोर्लौकि-
काग्निपक्वमावसथ्याग्निना वा गार्हपत्यस्थानेऽस्मिन्नवसरे निदधाति · ततोऽन्वा-
रब्धेऽभ्युक्षणादि शर्करान्तम् · तत आहवनीयखरे पञ्च भूसंस्कारान्कृत्वा पुनरु-
ल्लिख्य यवमयमपूपं पूर्वापूपवत्पक्वमाहवनीयस्थाने निधायान्वारब्धेऽभ्युक्षणादि
शर्करान्तम् त्रिरात्राद्युत्सर्गपक्षेऽपूपाभावः · ततो दक्षिणाग्निखरे प्रकृतिवच्छर्करा-
न्तम् · सभ्यखरे गार्हपत्यवदपूपवर्जम् · ततो मन्थनादि उद्धासो भवत्येव ·
कुशैर्ज्वलतोऽग्नेः स्थापनम् इध्मस्थाने कुशैरेवोद्धरणम् · सभ्यमन्थनादि स्थाप-
नान्तं भवत्येव · अन्यदग्निहोत्रहोमान्तं सर्वमग्न्याधेयवत् । ततस्तनूहविषां
स्थाने आग्नेयः पञ्चकपालः पुरोडाशो भवति · तत्राग्न्यन्वाधानादि कर्मापवर्गान्तं
सर्वमुपांशु भवति उत्तममनुयाजं वर्जयित्वा स तूच्चैर्भवति · तत्र विशेषः ·
अग्न्यन्वाधानम् ब्रह्मवरणाभावः ब्रह्मणः समन्त्रकमासनसंस्कारपूर्वकमुपवेश-
नम् व्रतग्रहणम् प्रणीतादि · पात्रासादने पञ्च कपालानि दक्षिणार्थे हिर-
ण्यमनड्वान्वा अष्टादशेध्मकाष्ठानि · ग्रहणे अग्नये जुष्टम् · प्रोक्षणे अग्नये
त्वा जुष्टम् · कपालोपधाने आद्यानि चत्वार्युपधाय चतुर्थस्य पश्चात्पञ्चममुपद-
ध्यात् · प्राणदाने अग्निं गच्छ · प्रथमप्रयाजे आश्राव्याग्नीन्यजेत्येव प्रैषः द्वि-
तीयादिषु यज-यजेत्येव · प्रथमे इदमग्निभ्य इति त्यागः इदमग्नयऽइति द्वि-
तीयादिषु त्यागः · त्यागे इदमग्नये अग्नये पवमानायाग्नये अग्निभ्य आज्यपेभ्य
इति · शाङ्खायनमते[1] देवेभ्य आज्यपेभ्य इत्येव न त्वग्निभ्य आज्यपेभ्य इति
विशेषः · पूर्वेऽपि त्यागाः प्रकृतिवदेव तन्मते · अन्ये त्यागाः प्रकृतिवत् · प्रथम
आज्यभाग आग्नेयः द्वितीये अग्नये पवमानायानुब्रूहि अग्निं पवमानं यज इदम-

1) See Çânkh. २.५.११ and २१.

ग्नये पवमानाय अथवा अग्नयऽइन्दुमतेऽनुब्रूहि अग्निमिन्दुमन्तं यज इदमग्नय ऽइन्दुमते · प्रधानयागे अग्नयेऽनुब्रूहि अग्निं यज इदमग्नये .· ततः स्विष्टकृदादि · प्राशित्रादि सर्वं भवति · दक्षिणालम्भे हिरण्यमसीति अनड्वानसीति वा ब्राह्मणा इदं वो हिरण्यम् प्रतिगृह्णीत अयं वोऽनड्वान् प्रतिगृह्णीतेति वा · प्रथमानुयाजे अग्नीन्यजेत्येव प्रैषः द्वितीयतृतीययोर्य[ज-य]जेत्येव इदमग्निभ्य इति त्यागाः · व्यूहने अग्नेरुज्जितिम् अग्निस्तमपनुदत्विति · प्रस्तरहोमे इदमग्नयेऽग्नये पवमानाय वा अग्नयऽइन्दुमते वा अग्नये अग्निभ्य आज्यपेभ्योऽग्नये होत्रायेति · अन्यत्कर्मापवर्गान्तं प्रकृतिवत् । तदन्ते शतब्राह्मणभोजनम् · परिहितान्हतवस्त्रदानमध्वर्यवे · ब्रह्मचर्याग्निधारणादिनियमा भवन्ति ॥ ॥ अत्र शतपथोक्तं (२.२.३.१२-२७) हौत्रं लिख्यते । आचमनादि · आवाहने आवह देवान्यजमानाय अग्निमग्नऽआवह अग्निं पवमानमावह अग्निमिन्दुमन्तमावहेति वा अग्निमावह अग्नीनाज्यपानावह अग्निं होत्रायावहेत्यादि प्राकृतम् । प्रयाजेषु · प्रथमे अग्नीन्यजेत्युक्ते ये यजामहे अग्नऽआज्यस्य व्यन्तू३ वौ३षट् १ ये यजामहेऽग्निमाज्यस्य वेतू३ वौ३षट् २ ये यजामहेऽग्निनाज्यस्य व्यन्तू३ वौ३षट् ३ ये यजामहेऽग्निराज्यस्य वेतू३ वौ३षट् ४ ये यजामहे स्वाहाग्निम् स्वाहाग्निं पवमानम् स्वाहाग्निमिन्दुमन्तमिति वा स्वाहाग्निं स्वाहाग्नीनाज्यपान् जुषाणोऽअग्निराज्यस्य वेतू[३] वौ[३]षट् । अग्निᳬ स्तोमेन बोधयेत्याग्नेयाज्यभागस्य पुरोऽनुवाक्या ये यजामहेऽग्निम् जुषाणोऽअग्निराज्यस्य वेतू३ वौ३षट् · द्वितीय आज्यभागोऽग्नये पवमानाय वा अग्नयऽइन्दुमते वा तत्र प्रथमपक्षे अग्नऽआयूᳬषि पव° हुनो३म् [ये यजाम]हेऽग्निं पवमानम् जुषाणोऽअग्निः पवमान आज्यस्य वेतू३ वौ३षट् द्वितीये पक्षे एहू षु ब्रवाणि° ढुभो३म् ये यजामहेऽग्निमिन्दुमन्तम् जुषाणोऽअग्निरिन्दुमानाज्यस्य वेतू३ वौ[३]षट् । आग्नेययागे अग्निं तं मन्ये° भरो३म् पुरोऽनुवाक्या ये °हेऽग्निम् सो अग्निर्यो° भरो३म्[1] (१५.४२) वौ३षट् याज्या । स्विष्टकृति[2] अग्ने तमद्या° अोहो३म् (१५.४४) पुरोऽनुवाक्या · ये° हेऽग्निं स्विष्टकृतम् अयाडग्निरग्नेः प्रि[या

1) भरा३ १. 2) See १.७.३.१०.

धामा]न्ययाडग्नेः पवमानस्य प्रि॰ अथवा अयाडग्नेरिन्दुमतः प्रियेति [धामा]न्यया-
डग्नेः प्रिया॰ याडग्नीनामाज्यपानां प्रिया धामानि यन्नद[ग्नेर्होतुः प्रिया॰ जुषतां]
हविः अधा ह्यग्ने क्रतो॰ भूयोऽम् [1] (१५.४५) वौऽषट् [याज्या] । अनुयाजेषु [2]
देवं बर्हिरग्नेर्वसुवने वसुधेयस्य वेतू३ वौ[३] कक् १ देवो नराशंसोऽग्नाऽड [3]
वसुव[ने वसुधेयस्य वे]तू३ वौ[३]कक् २ देवोऽग्निः स्विष्टकृदिति प्रकृति-
वत् ३ अयमनुयाज उच्चैः अन्यत्सर्वमुपांशु । सूक्तवाके [4] अग्निर्हविः ॰कृत
अग्निः पवमानो ह[वि] ॰ष[ता॰ध]त ॰कृत अथवाग्निरिन्दुमान्हवि॰ षता॰धत॰ कृत
अग्निर्ह॰ कृत अग्नय आज्यपा हविरजुषन्ता॰ धन्त ॰कृत अग्निर्होत्रेणेत्यादि ॥ ॥
एकोऽयं पुनराधेयस्य पक्ष उक्तः · अथ पुनराधेयस्य पक्षान्तरमुच्यते । पूर्वेद्युरप-
राह्णे मैत्रावरुणीं वशामालभ्यास्तमयात्पूर्वं पुरोडाशेडान्तं कर्म कृत्वा रात्रौ पशु-
विशसनादि श्रपणान्तं कुर्यात् · प्रातर्जुह्वा पृषदाज्यमादायेत्यारभ्य प्रचरणादि
कर्मापवर्गान्तं कुर्यात् · ततः सद्योऽग्नीनुत्सृज्य यथोक्तं पुनराधेयमिष्ट्यन्तं कुर्यात्
नात्र त्रिरात्रावरमुत्सर्गो नापूपाविति कर्कः । मैत्रावरुण्यां वशायां विशेषः · नि-
रूढपशुवद्विगुरणादि कर्मापवर्गान्ता · मित्रावरुणाभ्यां जुष्टं [5] नियुनज्मि मित्राव-
रुणाभ्यां त्वा जुष्टमिति प्रोक्षामि · मित्रावरुणाभ्यामुस्राया वपायै मेदसोऽनुब्रू-
हि मित्रावरुणाभ्यामुस्राया वपां मेदः प्रेष्य · वपायामाज्यभागौ · पशुपुरोडा-
शयागे मैत्रावरुण एकादशकपालः मित्रावरुणाभ्यां पुरोडाशस्यानुब्रूहि मि-
त्रावरुणाभ्यां पुरोडाशं प्रेष्य · हविर्यागे मित्रावरुणाभ्यामुस्राया हविषोऽनु-
ब्रूहि मित्रावरुणाभ्यामुस्राया हविः प्रेष्य · मित्रावरुणयोर्वनस्पतेरुज्जितिम्
मित्रावरुणौ वनस्पतिस्तमपनुदन्त्विति · शेषमनुक्तं निरूढवत् ॥ ॥ ११ ॥

इति चतुर्थस्यैकादशी कण्डिका ॥ ॥

पुनराधेयमुक्तम् । इदानीं श्रुतिक्रमानुसारेणाग्निहोत्रं कर्तव्यम् तदनादृत्य
शाखान्तरदृष्टक्रमेण तदङ्गभूतमुपस्थानमाह ·

---

1) भूया३ ई. 2) See १.८.२.११. 3) ग्ना ई. 4) See १.३.१.३. 5) जुष्टां ?

सायमाहुत्यां हुतायां यजमानोऽग्नीऽउपतिष्ठते वात्सप्रेण ॥ १ ॥[1] सायमाहुत्यां हुतायां सत्याम् शाखान्तरात् समिदसीति समिदाधानानन्तरम् यजमानो वात्सप्रेण वक्ष्यमाणेन वात्सप्रसंज्ञकेन उपस्थानेन अग्नीऽउपतिष्ठते · काण्वानां[2] समिदसीति समिदाधानमन्त्रसमनन्तरमुपप्रयन्त इत्याद्युपस्थानमन्त्राणां पाठादयं क्रमोऽवसीयते पर्युक्षणात्प्राक् तस्याग्निविसर्गार्थत्वादविसृष्टस्य चोपस्थानार्हत्वात् · अत एव वाग्विसर्गात्पूर्वमुक्तम् वाग्यमस्य कर्तृधर्मस्य सकलप्रयोगार्थत्वादिति ।

न वा ॥ २ ॥ अथवा वात्सप्रेण नोपतिष्ठते · विकल्पः विहितप्रतिषिद्धत्वात्[3] । अत्रोपप्रयन्तोऽअध्वरमित्यत (३. ११) आरभ्य परि ते दूडभ इत्यन्तं (३. ३६) वात्सप्रोपस्थानं समाम्नायक्रमेणैव कर्तव्यम् · तत्र विशेषमाह ·

तिस्रस्त्रिरुपप्रयन्तो (३. ११) ऽस्य प्रजाम् (३. ३७) परि ते (३. ३६) चित्रावसविति च (३. १८) ॥ ३ ॥ तिस्र ऋचो यथास्थानस्थिता एव त्रिर्जपति · चित्रावसो स्वस्ति तऽइत्यपि स्वस्थानपठितमेव त्रिर्जप्तव्यम् · नामग्रहणादेव त्रित्वे सिद्धे तिस्र इति यद्ग्रहणं स्वस्थानपठितानामेव त्रिर्जपप्राप्त्यर्थम् ।

सं त्वमित्युपविश्य (३. १९) ॥ ४ ॥ उपप्रयन्त इत्यारभ्य (३. ११) स्वस्ति ते पारमशीयेत्यतत्पर्यन्तम् (३. १८) आहवनीयसमीपे तिष्ठञ्जपित्वा अथ चाहवनीयसमीपऽएवोपविश्य सं त्वमग्ने सूर्यस्येति जपति ।

गां गच्छत्यन्ध स्थेति (३. २०-२१) ॥ ५ ॥ मापगातेत्यन्तेन यजमानो गां प्रति गच्छति । गौश्चाग्निहोत्र्येव संनिधानादिति केचित् अन्यापीत्यन्ये · अग्निहोत्रीपक्षे तु पयोहोमपक्षऽएवैतदुपस्थानम् नान्यद्रव्ययवागूादिहोमपक्षऽइति[4]· अन्यपक्षे सर्वदापीति विशेषः । गोष्ठमुपतिष्ठन्तऽइत्यापस्तम्बः तत्साधुतरम् मन्त्रे बहुवचनस्य दर्शनात् गामित्येकवचनस्य जात्यपेक्षयाप्युपपत्तेः ।

---

[1] आग्नेयी सायमाहुतिः सौरी प्रातराहुतिरिति · उभयोरप्यग्निहोत्रसंज्ञा · नैते द्वे कर्मणी अग्निहोत्रं जुहोत्येकवचननिर्देशात् · सायमारम्भं प्रातरपवर्गमिदमेकं कर्म Mahád. यद्यपि च हुतायामित्युक्तम् तथापि तु समिदाधानमन्त्रक्रमानन्तर्यात्तदनन्तरमेव कर्तव्यम् · हुतशब्दश्च हुतप्रायविषयः तथा हुते च धारावर्ज्ञमिति (४. १३. १२) Karka. [2] See Váj. S. pag. ९५ [3] See २. ३. ४. ५—६. [4] एते गमनाभिमर्शने उत्तरे च (८ and ९) पयोहोमपक्षे Mahád.

सꣳहितेत्यालभते (३. २२) ॥ ६ ॥ गोष्ठे गत्वा गां हस्तेन गृह्णाति ।

गार्हपत्यं गत्वोपतिष्ठतऽउप त्वेति (३. २२-२६) ॥ ७ ॥ ततो गार्हपत्यं प्रति गत्वा अयाधतः समस्मादित्यन्तेन मन्त्रगणेन गार्हपत्यमुपतिष्ठते । अत्र गार्हपत्यमुपतिष्ठतऽइति (२. ३. ४. २८) विशेषोपादानात्पूर्वोक्तमुपस्थानमाहवनीयस्येति ज्ञायते अग्नीऽइत्युभयोरग्न्योरुपस्थानविधानात् (१) ।

गां गच्छतीडऽएह्वीति (३. २७) ॥ ८ ॥ पुनस्तामेव गां प्रति गच्छति ।

काम्या एतेत्यालभते (३. २७) ॥ ९ ॥[1] तां गाम् । अत्र शाङ्खायनः (२. १४. ७) अग्न्युपस्थानस्यानर्थलुप्तं प्रवसञ्जपेदिति · याजमानं जपेत्सर्वम् न वन्ध स्थ न संहिता नेले न काम्या नो देवः प्रोषितो यच्चनातुरः इति तद्भाष्ये[2] ।

सोमानमित्यनुदकं (३. २८-३६) व्रतोपायनवत् ॥ १० ॥ व्रतोपायनवत् इत्यनेन अपरेणाहवनीयं प्राङ् तिष्ठन्नग्निमीक्षमाण इत्येतावदतिदिश्यते (२. १. ११) · तत्र चाप उपस्पृश्येत्येतदपि (२. १. ११) प्राप्नोति तन्निषेधत्यनुदकमिति । येन रक्षांसि दाशुष इत्यन्तम् · त्रिरेतज्जपति । अन्तरेणापराग्नी गत्वेत्यस्याप्यत्रानतिदेशः (२. १. ११) अत्राश्रुतत्वात् पूर्वमेवानेन यथाप्रविष्टत्वाच्च ।

पौर्णमासवत्पुत्रनामग्रहणम् ॥ ११ ॥ पौर्णमासवत् ततोऽसीत्यादि (३. ८. २५) । पुत्रस्य नाम गृह्णाति पुत्रयोः पुत्राणां वा प्रियतमस्येति लौगाक्षिरिति[3] [काठके] · ज्येष्ठपुत्रस्य नामाभिव्याहृत्य यावन्तो वा भवन्तीति शाङ्खायनः (२. १२. ११) ॥ अस्यैवोपस्थानस्य स्थाने वैकल्पिकं क्षुल्लकोपस्थानमाह ·

भूर्भुवः स्वरिति वोभौ (३. ३७) ॥ १२ ॥ [यजमान उपतिष्ठते] · समिदाधानान्तरं पूर्वमाहवनीयम् ततो गार्हपत्यम् ॥ अथोपस्थानप्रसङ्गात् श्रुतिमन्त्रक्रमानुसाराच्च प्रवत्स्यदुपस्थानमाह ·

प्रवत्स्यन्त्सर्वान्नर्येति (३. ३७) प्रतिमन्त्रम् ॥ १३ ॥ स्वाग्निसमन्वितग्रामात्सीमामतिक्रम्यान्यत्र रात्रौ वासं करिष्यन्यजमानः प्रवत्स्यदुपस्थानार्थमग्नीनुपतिष्ठते नर्य प्रजां मऽइति प्रतिमन्त्रं सर्वानग्नीन्गार्हपत्याहवनीयदक्षिणाग्नीन्ज्वलत

---

1) एतेति Karka's gloss. 2) न वम्भ स्थ (see Çâṅkh. २. ११. ५) schol. at Çâṅkh. For देव: see Çâṅkh. २. १२. १०. 3) लोगा° २.

उत्पत्तिक्रमेणोपतिष्ठते प्रवत्स्यन्ज्वलत उपतिष्ठेतेति मानवे · गार्हपत्यमेवाग्नि परिशेषादन्ते दक्षिणाग्निम् शंस्येत्याहवनीयम् अथर्येति दक्षिणाग्निम् ।

गच्छति ॥१४॥ ततः सभ्यावसथ्यौ तूष्णीमग्नये नम इति वा नमस्कृत्य यथार्थं गच्छति गृहाच्चलति · वाहनरहितश्चेत् पद्भ्याम् वाहनसहितश्चेदश्वरथादीन्प्रधावयति ।

मत्या वाग्विसर्जनम् ॥१५॥[1] यत्र वाग्विसर्गस्येच्छा जायते तत्र ॥ प्रोषितस्य यजमानस्य कर्तव्यमाह ·

प्रवसन्याजमानं कुर्याद्यथाकालमात्मसंस्काराद्धर्ममात्रत्वाच्छ्रुतेश्च ॥१६॥ प्रवसन्यजमानो यथाकालं याजमानं कुर्यात् · अग्निहोत्रकाले अग्निहोत्रसम्बन्धि उदकभक्षणादि पौर्णमासकाले तदीयं वपनफलमूलादिव्रत्याशनव्रतग्रहणादिकम् · एवं सर्वेष्वपि नित्यकर्मसु ज्ञेयम् । कुतः आत्मसंस्कारात् अयं हेतुरुपदेशश्च याजमानमपि न सर्वम् किंतु यद्यदात्मसंस्कारकं मुण्डनव्रत्याशनाधःशयनव्रतग्रहणादिकम् येन फलप्राप्तियोग्यः क्रियते · तथा धर्ममात्रत्वात् अयमपि हेतुरुपदेशश्च यद्यद्धर्ममात्रं याजमानमाराडुपकारकम् विष्णुक्रमणं मयीदमिति जपादिकम् तत्कर्तव्यम् न संनिपत्योपकारकं वेदबन्धनादि इत्युपदेशः · श्रुतेश्च तदप्येते श्लोकाः कि७ स्विद्विद्वानित्यादिः (११.३.१.५-६) । अतः प्रवसता नित्यं कर्म यथाकालं सर्वं मनसा चिन्तनीयम् याजमानं चाराडुपकारकमात्मसंस्कारकं च देवतोद्देशेन द्रव्यत्यागरूपं च विहाराभिमुखेन कर्तव्यमिति · व्रत्याशने विशेषः स्मृतावुक्तः इन्धं हीरित्यादि तथा नोपवासः प्रवासे स्यात्पत्नी धारयेत व्रतम् असामर्थ्ये शरीरस्य भक्तद्रव्याद्यभावतः स्वसत्तया पचेदन्नमश्नीयात्प्रोषितोऽपि सन्निति · त्यागे विशेषः स्मृतावुक्तः संनिधौ यजमानः स्यादुद्देशत्यागकारकः असंनिधौ तु पत्नी स्यादुद्देशत्यागकारिका असंनिधौ तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया उन्मादे प्रसवे चार्तौ कुर्वीतानुज्ञया विना सर्वदा यजमानो वा त्यजेत्तद्दिङ्मुखः शुचिरिति ॥ आगतोपस्थानमाह ·

---

१) वाग्विसर्गोऽवसरविधित्सयोच्यते वाग्यमस्तूपस्थानसमनन्तरमेव भवति अवसरान्तराविधानात् Karka.

एत्य च मत्या वाग्यमनम् ॥१७॥ मत्या इच्छाकल्पिते देशे प्रवासाद्ग्रामसमीपमागत्य ; वेलाशब्देन (२. ४. १. १२) स्वनिवासग्राममर्यादाभिधीयतऽ इति केचित् ।

समित्पाणिरनुपेत्य कंचिदुपतिष्ठतऽ आहवनीयगार्हपत्यदक्षिणाग्नीनागन्मेति (३. ३८-४०) प्रतिमन्त्रम् ॥१८॥ कंचिद्गुरुपितृराजादिकमनुपेत्य तत्समीपमग्निगतमनस्क अग्रेव स्नात्वा आगतोपस्थानार्थमग्नीनुद्धृत्य आहवनीऽग्नीन् उपदेशक्रमेण उपतिष्ठते · एतत्प्रसङ्गादग्निहोत्राद्यर्थे अग्नयो विहृताश्चेत् तत्रैव कर्तव्यम् अन्यथा तूद्धृत्यैव ।

समित्परिसमूहनानि चोपविश्य ॥१९॥[1] उपविश्य तूष्णीं समिदाधानम् परिसमूहनं [तृणानामपलुम्पनं] च काण्डानुसमयेन सर्वेषु कर्तव्यम् । तृणान्यपलुम्पतीति (२. ४. १. १३). अपनयतीति हरिस्वामिनः · अग्नेस्तृणान्यपचिनोतीति शाखान्तरे च · परितः पतितानि तृणोपलक्षितानि समिदादीनि प्रक्षिप्याग्निमध्ये प्रक्षिपतीति माधवः ॥ अधुना प्रवत्स्यदुपस्थाने आगतोपस्थाने च पक्षान्तरमाह ·

तूष्णीं वोपस्थानं पूर्ववत् ॥२०॥ अथवा प्रवत्स्यंस्तूष्णीमेव गार्हपत्याहवनीयदक्षिणाग्नींस्तेनैव क्रमेणोपतिष्ठते न मन्त्रेण ।

एत्य च ॥२१॥

गृहा मा बिभीतेति (३. ४१) गृहानुपैति ॥२२॥ ततो यजमानः सभ्यावसथ्यौ नमस्कृत्य गृहेषु न इत्यन्तेन (३. ४३) गृहान्स्वनिवासं गृहमुपगच्छति उपतिष्ठते प्रोष्येत्य गृहानुपतिष्ठते पूर्ववदिति गृह्यकारेण (पारस्कर॰ १. १८) उपस्थानस्योक्तत्वात् ।

क्षेमाय व इति (३. ४३) प्रविशति ॥२३॥ गृहान् । अतः परं गृह्योक्तं (पार॰ १. १८) पुत्रदर्शनजपादि · तत्र पुत्रदर्शनेऽङ्गादङ्गादिति जपः · तद्धिरोऽवघ्राणं प्रजापतेरिति अत्र मन्त्रेऽसावित्यस्य स्थाने सम्बुद्ध्यन्तपुत्रनामग्रहणम् ·

---

[1] चशब्दादनन्तरमेव · तिष्ठन्त्समिधः सर्वत्रेत्युक्तौ (१८. ४. १०) सतिध्युपवेशनं वाचनिकम् Karka.

गवां त्वेति च सकृत्पुत्रशिरोऽवघ्राणम् द्विस्तूष्णीम् · पुत्रस्य दक्षिणे कर्णे अस्मे प्रयंधीति जपः सव्ये कर्णे इन्द्र श्रेष्ठानीति · एवं प्रतिपुत्रमावर्तनीयम् पुत्र्यास्तु शिरोऽवघ्राणमात्रमिति ।

न हिꣳस्यादृह्यान्कामꣳ श्वः ॥ २४ ॥ तस्मिन्गृहागमनदिवसे गृह्यान्गृहे भवान्भार्यापुत्रभृत्यादीनपराधे सत्यपि न हिंस्यात् अनिष्टविरूपभाषणताडनादिना नोच्चाटयेत् ॥ ॥ द्वादशी कण्डिका ॥ १२ ॥ ॥

अथ पद्धतिः ॥

अत्र सूत्रक्रमेणाग्निहोत्राङ्गं वात्सप्रोपस्थानमुच्यते । सायमग्निहोत्रहोमे समिदसीति समिदाधानानन्तरं यजमानो वात्सप्रेणाग्नीऽउपतिष्ठते नोपतिष्ठते वा । तत्रोपस्थानपक्षे आहवनीयसमीपे स्थित्वोपप्रयन्त इति (३. ११) त्रिः पठित्वा अग्निर्मूर्धा (१२) उभा वाम् (१३) अयं ते (१४) अयमिहेत्येता (१५) ऋचो जपित्वास्य प्रत्नामिति (१६) त्रिर्जपेत् · ततस्तनूपा अग्नेऽसि (१७) इन्धानास्त्वेति (१८) सकृज्जपित्वा चित्रावसो (१८) इति त्रिर्जपेत् · अथाहवनीयसमीपऽएवोपविश्य सं त्वमग्नऽइति (१९) जपेत् · ततोऽन्ध स्थेति (२०-२१) गां प्रति गच्छति · ततः सꣳहितासीति (२२) गामालभते · ततो गार्हपत्यसमीपऽआगत्य गार्हपत्यमुपतिष्ठते उप त्वाग्नऽइत्यत (२२) आरभ्याघायतः समस्मादित्यन्तेन (२६) · तत इडऽएहीति (२७) पुनर्गां प्रति गच्छति · ततः काम्या एतेति (२७) गामालभते · तत आगत्यापरेणाहवनीयं प्राङ् तिष्ठन्नग्निमीक्षमाणः सोमानꣳ स्वरणमित्यारभ्य (२८) तत्सवितुरित्यन्तं (३५) जपित्वा परि ते दूडभ इति (३६) त्रिर्जपेत् · ततस्ततोऽसि तनुरसीति (३. ८. २५) पठित्वा इदं मे कर्मेदं वीर्यं पुत्रो यज्ञदत्तशर्मानुसंतनोत्वित्येवं पुत्रनाम गृह्णाति · अविद्यमाने पुत्रे इदं मे कर्मेदं वीर्यममुकशर्मानुसंतनोत्विति स्वं नाम गृह्णीयात् अथवा इदं मे कर्मेदं वीर्यममुकशर्माहमनुसंतनवानीति प्रयोगः तन्तवे त्वा ज्योतिषे त्वानुसंतनोत्विति वा (३. ८. २७) । एतद्वात्सप्रोपस्थानम् । अथवास्योपस्थानस्य स्थाने भूर्भुव स्वः सुप्रजा इत्यनेन (३. ३७) आहवनीयमुपस्थाय गार्हपत्यमप्यनेनैवोपतिष्ठेत · एतदुपस्थानद्वयं सायमेव भवति

१) परदिने इच्छया क्रोधादि Mahâd.

न प्रातः ॥ ॥ अथोपस्थानप्रसङ्गात्प्रवत्स्यदुपस्थानं प्रवासधर्मा आगतोपस्थानं चाभिधीयते · तत्र प्रवासशब्दार्थमाह कारिकाकारः ग्रामान्तरे नगर्यां वा पल्ल्यां वान्यत्र वा क्वचित् सीमामतीत्य चेद्रात्रौ वासः प्रवसनं स्मृतमिति । तत्र प्रवासं करिष्यन्यजमानो भूसंस्कारपूर्वकम् प्रवत्स्यदुपस्थानार्थमिति गार्हपत्यादाहवनीयदक्षिणाग्नी उद्धृत्य प्रदीप्तान्कृत्वा नर्य प्रजामिति (३. ३७) गार्हपत्यमुपतिष्ठते शंस्य पशूनित्याहवनीयम् अथर्य पितुमिति दक्षिणाग्निम् ततः सभ्याय नम इति सभ्यम् तत आवसथ्याय नम इत्यावसथ्यम् · ततो वाग्यमनम् · यथार्थं गमनम् · अग्निसम्बन्धिगृहस्य छदिषां दर्शनं यावत् गतस्य वाग्यमनं भवति तत ऊर्ध्वं गत्वा वाग्विसर्गः · तथा चोक्तम्[1] अग्न्यन्तिकं समारभ्य तावन्मौनी प्रतिष्ठते यावच्छदींषि दृश्यन्ते हव्यवाहनसद्मन इति · अनलादर्शनं यावत्तावद्व्राह्मायनश्रुतेः[2] स्वबुद्धिकल्पितो देश इति वाजसनेयिनः । बलाद्राजादिपुरुषा[3] यजमानं नयन्ति चेत् न प्रयच्छन्त्युपस्थानावसरं क्रूरचेष्टिताः तदा कुर्यादुपस्थानं तद्देशगत[4] एव सन् · तत्र प्रकारद्वयम् होमाद्यर्थमुद्धृतान्सम्भाव्य प्रवत्स्यदुपस्थानेनैवोपस्थानमिति कठसूत्रे · अनेन वा मन्त्रेण इहैव संस्तत्र सन्तं त्वाग्ने हृदा वाचा मनसा वा बिभर्मि तिरो मा सन्तमायुर्मा प्रदासीर्ज्योतिषा वैश्वानरेणोपतिष्ठऽइति मन्त्रेणाग्नीनुपतिष्ठेत । शाङ्खायनोऽपि (३. २१. ७-८) अनुपस्थाय प्रसर्गे प्रतिदिशमुपस्थानम् उपस्थायाप्रसर्गे यथा प्रोष्येति · आगमिष्यामि[5] चाद्येवेत्यनुपस्थाय निर्गतः दैवात्तत्र स्थितः कुर्यादिदमेवेति केचन विस्मृत्याबुद्धिपूर्वं वा यातेऽप्येष विधिर्भवेत् वाग्यमनस्य लोपोऽत्र भाष्यकारेण दर्शितः अरण्यारोपिते वह्नौ प्रवसेद्वा व्रजेत्तु वा उभयत्राप्युपस्थानं नास्ति कौषीतकिस्मृतेरिति ॥ ॥ अथ प्रोषितस्य यजमानस्य कर्तव्यमुच्यते । प्रवसन्नग्निहोत्रकालेऽग्निहोत्रस्य विहाराभिमुखो भूत्वा सर्वं याजमानं करोति पौर्णमासकाले पौर्णमासस्य दर्शकाले दर्शस्य · याजमानमपि न सर्वम् किंतु यदा-

---

1) कारिकायाम् schol. at ४. १२. १५. 2) See Çánkh. २. १४. ६. 3) From the कारिका, according to the schol. at ४. १२. २१. 4) Thus १. तद्देश्यगत the schol. at ४. १२. २१. 5) From the कारिका, according to the same.

त्मसंस्कारकम् धर्ममात्रं च तदेव यथा वपनविष्णुक्रमणव्रतग्रहणमयीदमितिजपादि नान्यत् यथा वेदवन्धनपात्रासादनादि · अन्यत्सर्वं कर्माध्वर्युादिभिर्गृहे क्रियमाणं मनसा चिन्तनीयम् । तथा च कात्यायनः (कर्मप्रदीप° २.१०.१-३) निक्षिप्याग्निं स्वदारेषु परिकल्प्यऽर्त्विजं तथा प्रवसेत्कार्यवान्विप्रो वृथैव न चिरं क्वचित् मनसा नैत्यकं कर्म प्रवसन्नप्यतन्द्रितः उपविश्य शुचिः सर्वं यथाकालमनुद्रवेदिति · तेन प्रवसताग्निहोत्रादि नित्यं कर्म स्वस्वकाले सर्वं चिन्तनीयम् । तत्राग्निहोत्रे मन्त्रेणाचमनम् यथादैवतं त्यागाः उपस्थानम् पुनराचमनम् एतावत्समन्त्रकं कर्तव्यम् अन्यत्सर्वं मनसा चिन्तनीयम् । दर्शपूर्णमासयोरपि पर्वणि इक्षुक्षीरविकारांश्च भ्राष्ट्रभृष्टान्यवांस्तथा[1] फलमूलानि चाश्नीयात्पर्वणि प्रोषितोऽग्निमान् तथा पराग्निपक्वं नाश्नीयादुडगोरसमन्तरा इत्याद्युक्तानुसारेण व्रतं कुर्यात् · रात्रौ भूमौ शयीत · तथा असामर्थ्ये शरीरस्य भक्ष्यद्रव्याद्यभावतः[2] स्वसत्तया पचेदन्नमश्नीयात्प्रोषितोऽग्निमानिति[3] · प्रातरिष्टिकाले सर्वं कर्म मनसा चिन्तयेत् प्राङ्मुखो व्रतग्रहणं कुर्यात् पूर्णपात्रमासाद्य देव्यायेति प्रोक्षेत् इदं त्रितायात्ययेत्यारभ्य सर्वास्त्यागान्कुर्यात् प्रयाजानुमन्त्रणानि च वाग्वयं मयीदमिति जपश्च स्वस्वकाले ततः सं वर्चसेति केनचिन्निनीयमानं पूर्णपात्रं प्रतिगृह्य मुखं विमृष्टे ततो विष्णुक्रमणादि व्रतविसर्गान्तं कुर्यात् · प्राच एव विष्णुक्रमाः न विहाराभिमुखाः तथा चापस्तम्बः प्रवसन्विहाराभिमुखो याजमानं जपति प्राचो विष्णुक्रमान्क्रमतीति · तत्र भागभूम्याहवनीयदक्षिणागार्हपत्योपस्थानानां[4] मनसैव चिन्तनम् नानुष्ठानम् । एवमिष्टिगतानामपि वेदवन्धनाववाधनात्रपितरोवेद्यालम्भादीनां च मनसैव चिन्तनम् । एवं यज्ञादिकर्मणोऽपि याजमानं कार्यम् · याजमाने कृतेऽपि यदा गृहे इष्टियज्ञादिकर्मणः समाप्तिं चित्ते जानाति तदनन्तरं भुञ्जीत न ततः प्राक् । एवं पितृयज्ञाष्टकादेरपि नित्यस्य गृहे क्रियमाणस्य याजमानं मनसा चिन्तनं च कार्यम् । बह्वृचानां शाङ्खायनसूत्रभाष्ये च सर्वेषां नित्यकर्मणामाग्रयणाचातु-

---

1) ? °ष्ट्रभ्र° १. 2) °व्याग्निभावतः १. but see pag. ३१४,२०. 3) Thus १.
4) ? भूमि आह° १.

र्मास्यपशुबन्धाग्निष्टोमानां प्रवसति यजमाने[1] याजमानं च प्रवसता कर्तव्यमित्युक्तमस्ति ॥ . ॥ आगच्छता यजमानेन यथालाभं यज्ञियवृक्षसमिधो हस्ते गृहीत्वा छर्दिर्दर्शने वाग्यतेन सता आगन्तव्यम् । उपस्थानादर्वाक्पितरं गुरुं वा राजानं वा नोपगच्छेत् स्वयमेव समीपमागतानामेषां नमस्कारादिकं न कुर्यात् । तत्कालमेव स्नात्वा शुचिर्भूत्वा भूसंस्कारपूर्वकमाहवनीयदक्षिणाग्नी ऽआगतोपस्थानार्थमिति विहृत्य समिधो हस्ते गृहीत्वा स्फ्योपग्रह आगन्मेति (३. ३८) मन्त्रेणाहवनीयमुपस्थायोपविश्य तूष्णीं समिधमाधाय परितः पतितानि तृणान्यपसार्याग्निमध्ये प्रक्षिपेत् · ततोऽयमग्निर्गृहपतिरिति (३. ३९) गार्हपत्यमुपस्थायोपविश्य तूष्णीं समिधमाधाय परितः पतितानि तृणानि परिसमुह्याग्नौ प्रक्षिपेत् · ततोऽयमग्निः पुरीष्य इति (३. ४०) दक्षिणाग्निमुपस्थायोपविश्य तूष्णीं समिधमाधाय तृणानि परिसमुह्याग्नौ प्रक्षिपेत् · ततः सभ्याय नम इति सभ्यं नमस्कुर्यात् · आवसथ्याय नम इत्यावसथ्यं नमस्कुर्यात् । ततो गृहा मा बिभीतेति (३. ४१) वासार्थान्गृहानुपतिष्ठते क्षेमाय व इति (३. ४३) गृहान्प्रविशति । तत्र पुत्रं दृष्ट्वा अङ्गादङ्गात्सम्भवसीति जपति · ततोऽस्य पुत्रस्य मस्तकमवजिघ्रति प्रजापतेष्ट्वेति असावित्यस्य स्थाने अमुकशर्मन्निति सम्बुद्ध्यन्तं पुत्रस्य नाम गृह्णाति · ततो गवां त्वा हिंकारेणावजिघ्रामि सहस्रायुषाममुकशर्मन्जीव शरदः शतमिति मन्त्रेण सकृत्पुत्रशिरोऽवघ्राय तूष्णीं द्विरवजिघ्रति · ततः पुत्रस्य दक्षिणे कर्णेऽस्मे प्रयंधीति जपति · ततः सव्ये कर्णे इन्द्र श्रेष्ठानीति जपति · पुत्रदर्शनजपादि प्रतिपुत्रमावर्तनीयम् पुत्रस्याशीःप्रार्थनार्थत्वात् · पुत्र्याश्च तूष्णीं मूर्धावघ्राणमात्रमेव ॥ ॥ कठसूत्रे विशेषः प्रवसत उपस्थानं याजमानं चेत्येके नेति लौगाक्षिः प्रवसन्यदा हुतं मन्येताथ भुञ्जीत पर्वण्युपोष्य यदा सꣳस्थितं मन्येताथ भुञ्जीतेति · तथा अनुपस्थाय प्रवसन्प्रवत्स्यदुपस्थानेन प्रतिदिशमुपतिष्ठेतेति · तथा यदाग्निहोत्रे सꣳस्थिते वा तन्त्र[2] ऽआगच्छेदागतोपस्थानमेवास्य तदहः स्यान्न नित्यमग्न्युपस्थानं न याजमानमित्येके विसꣳस्थिते[3] वा तन्त्र ऽआगच्छेदागतोपस्थानेनोपस्थाय यदतीतं याजमानं तज्जपेन्नातीतं जपेदिति लौगा-

१) ? ॰मानेन यथालाभं १. २) तंत्रे १. ३) ?? विचिसंस्थिते १.

ह्निरिति ॥ ॥ अथवा प्रवत्स्यता प्रवासादागहता चाग्नीनामुपस्थानं तूष्णीमेव कर्तव्यम् · गृहा मेत्यादि तूष्णींपक्षेऽपि भवत्येव । प्रवासादागमनदिने गृह्याणां पुत्रभार्याभृत्यादीनामपराधे सत्यपि क्रोधादिकं न कर्तव्यम् किमपि न वक्तव्यम् सति कारणे श्वः सर्वं कर्तव्यम् ॥ ॥१२॥

इति चतुर्थस्य द्वादशी कण्डिका ॥ ॥

अथाग्निहोत्रमुच्यते[1] ·

उद्धरेति यजमानो ब्रूयात्सायम्प्रातरग्निहोत्रे ॥१॥ अग्निहोत्रसंज्ञके कर्मणि सायंकाले प्रातःकाले च यजमानः उद्धरेतीमं प्रैषमध्वर्युं प्रति ब्रूयात् · एतच्चान्यकर्तृकहोमपक्षे स्वयंहोमपक्षे तु प्रैषाभावः । अग्निहोत्रऽइत्युक्तत्वादिष्ट्यर्थोद्धरणे नायं प्रैषः[2] । सत्यप्येककर्मत्वे कालभेदात्सायं प्रातश्चाङ्गावृत्तिर्भवतीति सायम्प्रातर्ग्रहणम् ।

गार्हपत्यादाहवनीयस्योद्धरणमनस्तमितानुदितयोः ॥२॥[3] अनस्तमिते अनुदिते च सूर्ये गार्हपत्यादग्निहोत्रहोमार्थं ज्वलत आहवनीयस्योद्धरणं कृत्वा प्राञ्चं नीत्वाहवनीयखरे स्थापनं कर्तव्यम् ततः पूर्वं स्मार्तान्परिसमूहनादीन्पञ्च भूसंस्कारानाहवनीयखरे कृत्वा ।

प्रत्यङ्मुखो वा सायं निदध्यात्तस्मिन्त्सायम्प्रातर्होममेके ॥३॥ अथवा सायंकाले प्रातर्वा प्रत्यङ्मुख एव स्थापयेत् · तथा तस्मिन्प्रत्यङ्मुखस्थापिते आहवनीये एके सायम्प्रातर्होममिच्छन्ति तदा च प्रातर्होमार्थं तस्य धारणं कर्तव्यम् अन्ये प्रातर्होमार्थं पुनरुद्धरन्ति ।

नित्यो दक्षिणाग्निः ॥४॥ दक्षिणा वा सञ्हरेदन्वाहार्यपचनश्चेदित्यस्मिन्पक्षे (४. ८. १५) दक्षिणाग्निर्नित्यो भवति सर्वदा स एव भवति न प्रतिकर्म आह्रियते । नित्यपदानुवृत्तिलोभेनाह[4] ·

---

1) शाखान्तरपाठक्रमाद्धात्सप्रोपस्थानमुक्तम् इदानीमवसरप्राप्तमाग्निहोत्रमनुविधीयते Karka. 2) सत्यप्युद्धरणे पौर्णमासादिषु न भवति Karka. 3) अनस्योरिति शास्त्रात् उदितहोमिनामपि अनुदितऽएवोद्धरणम् Karka. उद्धरणशब्दस्त्वाहवनीयस्थापनऽएव प्रवर्तते Mahâd. 4) नित्याधिकारोपजिज्ञोविषयेदमाह Karka.

सर्वे गतश्रियः ॥५॥ गता प्राप्ता श्रीर्येनासौ गता श्रीर्यमिति वा
तस्य गतश्रियः प्राप्तसमृद्धेः यजमानस्य सर्वेऽग्नयो नित्या भवन्ति आहवनीय-
दक्षिणाग्नी अपि गार्हपत्यवत्सदा धार्यौ । नित्यधृतानामपि प्रादुष्करणमनस्तमित
ऽएव कर्तव्यम् · तदुक्तम् (कर्मप्रदीप° १.१.१) सूर्येऽस्तशैलमप्राप्ते षट्त्रिंशद्भिः
सदाङ्गुलैः प्रादुष्करणमग्नीनां प्रातर्भासां च दर्शनादिति · पुरा छायानां संसर्गात्
उद्धरणम् प्रादुष्करणं नित्यधृत इति शाङ्खायनः (२. ६. २-४) ।

सदा वाहरणम् ॥६॥ दक्षिणाग्नेः सदा[1] वा आहरणमाहवनीयवदेव
कर्तव्यम् ।

एकेषामुपवसथे ॥७॥ एकेषां मते (२. ३. २. ७) उपवसथे पौर्णमास्याम-
मावास्यायां वा दक्षिणाग्नेराहरणम् न सर्वदा · अस्मिन्पक्षेऽर्थादुपवसथान्तराले
तस्य धारणं कार्यम् ।

नवावसिते वा ॥८॥ नवगृहे वा (२. ३. २. ८) एनं दक्षिणाग्निमाहरेयुः ·
अस्मिन्नपि पक्षे तस्य धारणं तद्गृहवासं यावत् ।

तस्मिन्पचेयुरमाछसम् ॥ ९ ॥ तस्मिन्नवावसिताहृते दक्षिणाग्नौ सर्वमन्नं
पाकयोग्यं पचेयुः · पाकानन्तरं तत्पक्वमन्नं ब्राह्मणाः प्राश्नीयुः ।

पाकाभावे गोः पयोऽधिश्रयितवै ब्रूयात् ॥१०॥ पचनार्हस्य तण्डुल-
पिष्टादेरभावे यजमानोऽध्वर्यु[2] प्रति गोः पयोऽधिश्रयितवाऽइति प्रैषं ब्रूयात् ततो
ऽध्वर्युस्तत्पयो दक्षिणाग्नौ अधिश्रयेत्[3]

तद्ब्राह्मणं पाययितवै ब्रूयात् ॥११॥[4] ततोऽध्वर्युः यजमानं प्रत्याह
तद्ब्राह्मणं पाययितवाऽइति · एवमध्वर्युणा प्रेषितस्तत्पयो ब्राह्मणं पाययेत् ॥ ॥
अधुना प्रकृतमुच्यते ।

अन्तरेणापराग्नी गत्वा दक्षिणेन वापदक्षिणमाहवनीयं[5] परीत्योपविशति यज-
मानः ॥ १२ ॥[6] यजमानः संध्यावन्दनानन्तरमपराग्नी गार्हपत्यदक्षिणाग्नी

---

१) प्रतिदिनम् · सायम्प्रातरित्यनुवर्तते · आहरणशब्दस्तु दक्षिणाग्निस्थापनऽएव प्रवर्तते Mahád. २) पत्नीं Mahád. ३) °पयेत् २. ४) पत्नीं प्रति स्त्रिया अधिकारात् Mah. ५) ? Thus २., M., Karka, and Sâyaṇa (at २. ३. ३. १३), वाप्रदक्षि° १., Mahád. and the paddhati. ६) दक्षिणेन वा इति माध्यन्दिनानामवधारणा युक्ता Karka.

अन्तरेण गत्वा तयोर्मध्येनान्तरालेन गत्वा अथवा तौ दक्षिणेन गत्वा अपदक्षिणमाहवनीयं परीत्य[1] स्वस्थानऽउपविशति · पूर्वेणाहवनीयं परीत्यान्तरेण गार्हपत्यं चेतीति श्रुतेः (२.३.३.१३) अपदक्षिणमाहवनीयं परीत्य गार्हपत्याहवनीययोरन्तरालेन दक्षिणतः स्वासनं प्रति गच्छतीत्यर्थः · अयं स्वश्रुत्योक्तः संचरः वक्ष्यमाणस्तु (४.१५.२) शाखान्तरीयः । दक्षिणेन प्रवेशनमग्निहोत्रेष्टिष्विति (४.१५.२१) वचनात् पूर्वं गार्हपत्यागारस्य दक्षिणेन द्वारेण प्रविश्यैतत्कर्तव्यम् । संध्यावन्दनानन्तरं पूर्वमग्निहोत्रहोमः ततः स्मार्तेऽग्नौ · तदुक्तम् होमं वैतानिके कृत्वा स्मार्ते कुर्याद्विचक्षणः स्मृतीनां वेदमूलत्वात्स्मार्ते केचित्पुरा विदुरिति ।

पत्नी च पूर्ववत् ॥ १३ ॥ पत्न्यपि पूर्ववदुपविशति पूर्ववदिति प्रत्यग्दक्षिणतो गार्हपत्यस्येति (२.७.१) । चशब्दाद्यजमानोऽपि पूर्ववदिति तेन दक्षिणतो ब्रह्मयजमानयोरासनेऽइति (१.८.२७) दर्शपूर्णमासविषयं परिभाषितं वतिनातिदिश्यते[2] · अपरेषां तु यजमान[स्य] परिभाषिकनुप्रवेशनं सिद्धमेव तेन चशब्दात् अन्तरेणापराग्नी गत्वा दक्षिणेन वाप्रदक्षिणमाहवनीयं[3] परीत्योपविशतीत्याकृष्यते युक्तरूपमिव चैतत् ।

अपरेणाहवनीयं कूर्चं निदधाति कुशान्वा ॥ १४ ॥ प्रागग्रमुदगग्रं वा कूर्चम् अथवा कुशानेव न कूर्चम् · कूर्चशब्देन 'आसनपट्ट[4] उच्यते अत्र च स्रुच एतदासनम् तेन बाहुप्रमाणो वारण आसनपट्टसदृशः कूर्चो भवति ।

परिस्तरणं वा सर्वेषां प्रागुदग्भिरुदगग्रान्दक्षिणाग्रान्करोतीति श्रुतेः ॥ १५ ॥[5] श्रुतेरुदगग्रतानुवादस्तदेवोपपद्यते यदाग्निहोत्रे प्रागुदगग्रैः स्तरणं भवति · मृताग्निहोत्रे आहवनीयस्यैव परिस्तरणादर्शनात्परिस्तरणादिकमपि तस्यैव भवती-

1) अप्रदक्षिणं परिगमनम् Karka. अप्रदक्षिणेन Ss. 2) ? चेतिनाति° २. 3) Thus २, not वापद° 4) ? °पद्द २. 5) परिस्तरणमाहवनीयस्य प्रागुदग्भिर्दर्भैः प्रागग्रैरुदगग्रैश्च । एवं हि मृतकाग्निहोत्रऽआहवनीयं प्रकृत्य श्रूयते अथ यान्यमून्युदीचीनाग्राणि तानि करोतीति वचनात् (१२.५.२.१२) अमूनीति चाग्निहोत्रतृणान्युच्यन्ते · तद्यदि तत्र प्रागुदग्भिस्तदैतदुपपद्यतऽइति । मृतकाग्निहोत्रे आहवनीयस्यैव दृष्टम् (दृष्टं Cod.) इहापि तस्यैव परिस्तरणमित्याशङ्क्य वा सर्वेषामित्युच्यते सर्वेषामेवैतत्परिस्तरणम् कार्याविशेषात् Karka.

त्याशङ्क्य वा सर्वेषामित्युच्यते सर्वेषामेवैतत्परिस्तरणम् होमस्य सर्वेषु विहितत्वात् परिस्तरणस्य होमार्थत्वाच्च ।

आहवनीयं पर्युक्ष्योदधारां निनयत्या गार्हपत्यात् ॥ १६ ॥ आहवनीयं गार्हपत्यं दक्षिणाग्निं परिस्तीर्य ततस्तेनैव क्रमेण प्रथममाहवनीयं पर्युक्ष्य हस्तगृहीतेनोदकेन समन्तात्सिक्त्वा तत्र आहवनीयादारभ्य उदधारामुदकस्य धारां गार्हपत्यं यावत्प्रत्यक्संस्थां निनयति ।

तं च ॥ १७ ॥ ततो दक्षिणाग्निम् ॥ १८ ॥[1]

हुते च धारावर्ज्जम् ॥ १९ ॥[2] हुते चाग्निहोत्रे यजमानस्योपस्थानाचमनानन्तरं प्राग्विसर्गादेवमेवाग्नीन्पर्युक्षति धारां वर्ज्जयित्वा वाग्यमस्य कर्तृधर्मत्वेन पदार्थाङ्गत्वात् पर्युक्षणमपि पदार्थ इति ॥ ॥ त्रयोदशी कण्डिका ॥ १३ ॥ ॥

• अथ पद्धतिः ॥

अथाग्निहोत्रमुच्यते । तत्र सायम्प्रातर्यजमानो होमकर्तारं प्रत्युद्धरेति प्रैषं ब्रूयात् स्वयंकर्तृत्वे प्रैषाभावः । अनस्तमिते सूर्ये उद्धरणं कर्तव्यम् · तत्र सायमग्निहोत्रहोमार्थं गार्हपत्यादाहवनीयमुद्धरामीति संकल्प्याहवनीयं ज्वलन्तमुद्धरति · सायमग्निहोत्रहोमार्थं गार्हपत्याद्दक्षिणाग्निमाहरामीति संकल्प्य दक्षिणाग्निमुद्धरति । सायंकाले प्रत्यङ्मुखो वा आहवनीयं स्थापयेत् · अस्मिन्पक्षे सायमुद्धृतऽएव प्रातर्होममप्येके कुर्वन्ति एके प्रातः पुनरुद्धरन्ति । दक्षिणा संहृतो दक्षिणाग्निश्चेत् सर्वदा नित्य एव न कदापि तस्योद्धरणम् · अनुगतस्य च स्वयोनेराहरणम् । गतश्रियस्तु सर्वेऽग्नयः सदा धार्यन्ते त्रयो ह वै गतश्रियः शुश्रुवान्ब्राह्मणः क्षत्रियो विजयी राजा वैश्यो ग्रामणीरिति । अथवा सदाहवनीयवदेव दक्षिणाग्नेरप्याहरणमेव कर्तव्यम् · केषांचिन्मते पौर्णमास्यमावास्ययोरेवाहरणम् न सर्वदा उपवसथान्तरं यावत् तस्यैव धारणम् । अथवा यदा नवगृहं कृतं भवति तदा तत्र नवगृहे दक्षिणाग्निराहरणीयः न सर्वदा नाप्युपवसथे ·

---

[1] प्राक्संस्थेऽपि पर्युक्षणे गार्हपत्यसमनन्तरमेव दक्षिणाग्नेः पर्युक्षणम् अतस्ततो दक्षिणाग्निमित्युक्तम् Karka. [2] पर्युक्षतीति वाक्यशेषः · तच्च प्राग्व्रतविसर्गात् व्रतस्य हि पदार्थधर्मत्वात् पर्युक्षणमपि हि पदार्थ इति Karka.

अस्मिन्पक्षे तस्मिन्नवगृह्याहृते दक्षिणाग्नौ यत्किंचित्सम्पद्यते तत्सर्वं पचेन्मांसवर्जम् पक्का च ब्राह्मणान्भोजयेत् · पाकद्रव्याभावे गोः पयोऽधिश्रयितवाऽइति यजमानोऽध्वर्युं प्रेष्यति ततोऽध्वर्योर्दक्षिणाग्नौ गोदुग्धस्याधिश्रयणम् ततस्तद्ब्राह्मणं पाययितवाऽइति प्रैषं यजमानं प्रति ब्रूयात् ततस्तत्पयो ब्राह्मणांस्त्रीन्पाययेत् । अन्यार्थमुद्धृतेष्वग्निहोत्रकालऽआगते तेष्वेवाग्निहोत्रहोमः · पशुवरुणप्रघासादावुत्तरवेदावाहवनीये प्रणीते होमकालऽआगतेऽतिप्रणीतऽएव होमः[1] · तथा चापस्तम्बः प्रणीते चेदग्निहोत्रस्य काल एतस्मिन्नेवाग्निहोत्रं जुहुयादेवमन्यत्रेति पशुप्रकरणे सूत्रम्[2] ॥ ॥ अथ प्रकृतमुच्यते । अनस्तमिते आहवनीयदक्षिणाग्न्योरुद्धरणानन्तरं संध्यावन्दनं कृत्वा प्रथ[म]मग्निहोत्रं जुहुयात् । तत्र यजमानो गार्हपत्यदक्षिणाग्न्योरन्तरालमार्गेणाहवनीयं प्रति गत्वा अथवा अनयोर्दक्षिणतो गत्वा अप्रदक्षिणमाहवनीयं परीत्य स्वस्थानऽउपविश्याचामति वृष्टिरसीति (४. १५. ४) · ततो वाग्यमनम् पुनराचमनं यावत् · पत्न्यपि यजमानवदेव संचरेण प्रविश्य गार्हपत्यस्य प्रत्यग्दक्षिणत ईशानाभिमुखी उपविश्य तूष्णीमेवाप आचम्य वाचं यच्छति उपवेशनव्यतिरिक्तं पत्नी किमपि न करोतीति सम्प्रदायः तच्च साधुतरम् । ततोऽध्वर्युराहवनीयस्य पश्चात्प्रागग्रमुदगग्रं वा बाहुमात्रमासनपदृसदृशं कूर्चं निधाय प्रदक्षिणमाहवनीयस्य परिस्तरणं दर्भतृणैः कुर्यात् · तानि दर्भतृणानि पुरस्तात्पश्चाच्चोदगग्राणि दक्षिणोत्तरयोः प्रागग्राणि · प्रथमं पुरस्तात्परिस्तरणम् ततो दक्षिणतः पश्चादुदगिति क्रमः · तत एवमेव गार्हपत्यस्य परिस्तरणम् ततो दक्षिणाग्नेः । ततो हस्तेनोदकमादाय प्रथममाहवनीयस्य पर्युक्षणम् ईशानदिश आरभ्य प्रदक्षिणमुदक्संस्थम् · तत आहवनीयादारभ्य गार्हपत्यं यावत्प्रतीचीमुदधारां निनयन्गच्छति · ततो गार्हपत्यस्य प्रदक्षिणं पर्युक्षणम् ततो दक्षिणाग्नेः पर्युक्षणम् · अथवा पूर्वं गार्हपत्यं दक्षिणाग्निं च पर्युक्ष्य गार्हपत्यादारभ्याहवनीयं यावत्प्राचीमुदधारां संततां निन-

---

1) The schol. at ४. १३. २. reads: ऽतिप्रणीते त्वग्निहोत्रं होतव्यम् 2) The schol. at ४. १३. २. proceeds thus: सम्प्रदायपद्धतौ त्वन्यथोक्तम् अतिप्रणीते नाग्निहोत्रहोमः अनङ्गत्वादग्निहोत्रहोमस्येति · तत्तु युक्तिमात्रम् इदं तु वचनम् नास्ति वचनस्य किंचिदृदुष्करम् तस्मादतिप्रणीतऽएव होतव्यम् ।

यन्गहति तत आहवनीयस्य[1] पर्युक्षणं कुर्यात् · उदस्थालीं वैवोदकमण्डलुं वादाय गार्हपत्याद्ग्रऽआहवनीयान्निनयन्नियादिति (१२.४.१.५) प्रायश्चित्तप्रकरणे गहतो धारानिनयनदर्शनादिहापि तथैव कल्पना[2] ॥ ॥१३॥

इति चतुर्थस्य त्रयोदशो कण्डिका ॥ ॥

अग्निहोत्रीं दोहयति पुंवत्सामशूद्रेण स्थाल्यामार्यकृत्यामूर्ध्वकपालायां दक्षिणतः प्राचीमुदीचीं वा ॥१॥ अग्निहोत्रशब्देन कर्मवाचिना तत्साधनं पयो लक्ष्यते तदस्यां गव्यस्तीति गौरग्निहोत्रिणी तत इनिप्रत्ययलोपे कृते अग्निहोत्रीति सिध्यति · पुमान्वत्सो यस्याः (११.३.२.१) · विहाराद्दक्षिणस्यां[3] प्राङ्मुखीमुदङ्मुखीं वा स्थिताम् । आर्यस्य त्रैवर्णिकस्य कृतिः आर्यकृतिः[4] · ऊर्ध्वकपालायाम् न तिर्यक्कपालायाम् · यदि वा भिद्येतेति (१२.४.१.६) लिङ्गात् मृत्तिकामाय्याम् । अत्र गोर्दिङ्नियमविधानात् सांनाय्ये गवां दिङ्नियमो न भवति ।

पूर्वेणाहवनीयमाहृत्य गार्हपत्येऽधिश्रयत्युत्तरतो निरूह्याङ्गारान् ॥२॥ तद्दोग्धा दुग्धस्थालीस्थं पयो हस्ते गृहीत्वा आहवनीयं पूर्वेण आहृत्य आहरणात्पूर्वमेव गार्हपत्यस्याङ्गारानुत्तरतो निरूह्योदुह्य अपनार्य पृथक्कृत्वा ततः पयस्तेष्वधिश्रयति ।

एवमन्यत्रापि होमार्थस्याहरणम् ॥३॥ इतोऽन्यत्रापि पञ्चवातीयहोमादौ होमार्थस्याज्यादिगव्यस्यैवमेव पूर्वेणाहवनीयमाहरणं कार्यम् ।

दक्षिणेन वौषधम् ॥४॥ औषधं व्रीहियवादिकम् तदाहवनीयं दक्षिणेन वानीयते आहवनीयं पूर्वेण वा उत्तरेण वा ।

तृणेनावज्योत्यासिच्यापः पुनरवज्योत्य निधायं त्रिरुद्वासयत्युदक् ॥५॥ तदधिश्रितं पय एकेन ज्वालायुक्तेन दर्भाग्रेणावाङ्मुखं प्रकाशयेत् · तच्च तृणं परिस्तृततृणेभ्योऽन्यदेव ग्राह्यम् · ततः स्रुवेणापो गृहीत्वा पयोमध्यऽआसिञ्चेत् तस्य शमनाय · ततः पुनरवज्योत्य निधायम् निधाय-निधाय मुक्त्वा-मुक्त्वा त्रिरुद्वास-

1) ? यन्गाहव° १. 2) नात् १. 3) आहवनीयागाराद्दक्षिणतः Mahád. 4) but see Pânini 8. १. ३०.

यत्युदक् । प्रथममवज्योतनं दृष्टार्थम् शृतं वेदानीति (२.३.१.१६) · अतोऽत्राधिश्रयणं अपणार्थमेव · शृतं कथं ज्ञायतऽइत्यत आह यर्ह्युद्वन्तं तर्हि जुहुयादिति (२.३.१.१४) यस्मिन्काले तत्पय उद्वन्तं पावकवशादुद्गतान्तं[1] बुद्बुद्वद्भवति तर्हि तस्मिन्काले तद्भृतं भवति तदवस्थापन्नेन पयसा जुहुयादित्यर्थः · इमं पक्षं निषेधति तद्ध नोद्वन्तं कुर्यादिति (२.३.१.१४) · कथं तर्हि जुहुयादिति अधिश्रित्यैव जुहुयादिति (२.३.१.१६) अधिश्रयणमात्रेणैव तद्भृतम् तादृशेनैव होमः कार्य इत्यर्थः · अतश्च विकल्पः उद्वन्तं कुर्यान्न वेति · अवज्योतनस्य च शृतवेदनार्थत्वात्तण्डुलदध्यादावभावः[2]। उदकासेचनमपि दृष्टार्थम् तापेन उदकस्यैव क्षयो यथा स्यान्न पयस इति · अतस्तण्डुलादावासेचनाभावः । पुनरवज्योतनमप्यासिक्तस्योदकस्य क्षयज्ञानार्थम् अतस्तस्यापि तण्डुलादावभावः · यवागा[दी]नां प्रथमावज्योतनमेव भवति · घृतेऽप्युदकासेको न भवति अवज्योतनं तु भवति[3]। निधायमिति णमुलयम् ततश्च निधाय-निधायेत्यर्थः · अत एव मृताग्निहोत्रे प्रतिषेधो न त्रिः प्रतिष्ठापञ्च हरतीति (१२.५.१.८) तत्र निषेधादत्र विधिरुन्नीयते । उद्वासनानन्तरं पृथक्कृतानामधिश्रयणार्थानामङ्गाराणां गार्हपत्यमध्ये प्रेरणम् शाखान्तरात् ।

अस्तमिते जुहोति ॥६॥ अस्तमिते सूर्ये सायमग्निहोत्रं जुहोति · अत्रास्तमितऽइत्युक्तत्वात्प्राचीनमनस्तमितऽइति न शङ्कनीयम्[4] अङ्गानां प्रधानकालत्वस्य न्याय्यत्वादुद्धरणादूर्ध्वमस्तमितऽएव कर्तव्यम् उद्धरणमात्रस्यैवानस्तमिते श्रवणात् · अस्तमितलक्षणमाह कात्यायनः (कर्मप्रदीप° १.१.३) यावत्सम्यङ्न भाव्यन्ते नभस्यृक्षाणि सर्वतः न च लोहितिमापैति तावत्सायं च हूयतऽइति ।

वैकङ्कतञ्च स्रुक्स्रुवं प्रतप्य पाणिना संमार्ष्टि ॥७॥ शोधयति हस्तस्पर्शनेन तत्संलग्नं रक्षोऽपनीय निर्मलीकरोति · पूर्वं स्रुवस्य संमार्गप्रतपने पश्चा-

---

१) °उद्गन्तं २· २) अधिश्रयणाभावे तण्डुलादावनवज्योतनम् Karka. ३) न च यवाग्वामुदकासेको विरोधात् अवज्योतनं तु तत्रेण भवति · घृते पुनरुदकासेको न भवत्येव विरोधात् Karka. ४) Thus Mahâdeva: अस्तमितऽइति ग्रहणात् पूर्वं सर्वमनस्तमितऽएव प्रत्येतव्यम् · ५) होमार्थत्वाद्वैकङ्कती स्रुक्प्राप्नोत्येव स्रुवार्थोऽयमारम्भः Karka.

स्रुचः · आपस्तम्बसूत्रे विशेषः वैकङ्कत्यग्निहोत्रहवणी बाहुमात्र्यरत्निमात्री वा प्रसृताकृतिरिति ।

पुनः प्रतप्योन्नेष्यामीत्याह ॥ ८ ॥ यजमानं पृच्छेत् ।

ओ३मुन्नयेति यजमानस्तिष्ठन् ॥ ९ ॥

चतुरः स्रुवानुन्नयति ॥ १० ॥ स्थाल्याः सकाशाच्चतुरः स्रुवान् स्रुच्युन्नयति । इदं चतुर्गृहीतमाहुतिद्वयार्थम् · अतश्च पूर्वाहुत्यनन्तरं द्रव्यनाशादौ उत्तराहुत्यर्थं पुनश्चतुर्गृहीतं ग्राह्यम् · मन्त्रार्थस्य नाशादौ मन्त्रलोप एव न तदर्थं पुनर्ग्रहणम् । पञ्चावत्तिनां पञ्च स्रुवानुन्नयति पञ्च जमदग्नीनामित्यापस्तम्बवचनात् ।

स्थाल्यां परिशिनष्टि तद्ब्राह्मणः पिबेत् ॥ ११ ॥[१] नायं ब्राह्मणस्य पाने नियमः किं तर्ह्यब्राह्मणस्य प्रतिषेधोऽयम् (२. ३. ८. ३१) ।

उपरि समिधं धारयन्वाहीमिध्यधि गार्हपत्यादाहवनीयं हरति मुखमात्रे धारयन् ॥ १२ ॥ स्रुग्दण्डस्योपरि[२] चतुर्गृहीतपयस उपरि पालाशादिवृक्षोद्भवां[३] प्रादेशमात्रीं समिधमङ्गुल्याद्यन्तरितां धारयन् · अध्यधिशब्दः सामीप्ये उपरिभावे च · तेन स्रुचं हस्ते गृहीत्वा प्रथमं गार्हपत्यस्योपरि समीपऽएव धारयति ततो मुखमात्रे स्रुचं धारयन् आहवनीयं प्रति होमार्थं हरति · स्रुग्दण्डे समिधमुपसंगृह्येति शाखान्तरात्समिध उपरि धारणम् उपरिष्टात्स्रुग्दण्डे समिधमुपसंग्रह्येति मनुः ।

मध्ये निगृह्योद्गृह्योपविश्य समिधमादधात्यग्निज्योतिषं त्वा वायुमतीं प्राणवतीं स्वर्ग्यां स्वर्गायोपदधामि भास्वतीमिति ॥ १३ ॥[४] गार्हपत्याहवनीययोर्मध्ये अन्तराले स्रुचं मुखमात्रधृतां नाभिप्रदेशं यावन्निगृह्य नीचैर्गृहीत्वा पुनरुद्गृह्य मुखमात्रऽएव पुनर्धृत्वा आहवनीयसमीपं प्राप्य उपविश्य आहवनीयमध्ये समिधमादधाति कूर्चे स्रुचमनुपसाद्यैव सव्यहस्ते स्रुचं धृत्वा · दृष्टार्थमेतत्समिदाधानम् इन्धनार्थत्वात् अतो ब्राह्मणहस्तादिष्वर्थलोपादस्याभावः[५] ।

---

१) न क्षत्रियवैश्यौ स्वगृहेऽपि Mahád.　२) अस्पर्शयन् Mahád.　३) वृक्षग्रहणं गुल्मलताव्युदासार्थम् Mah.　४) See Káṇva Váj. S. pag. ६३.　५) See २५. ४. २. — अतश्च नैमित्तिकेषु कशास्तम्बादिषु (२५. ४. ६) न भवति Karka.

प्रदीतामभिजुहोत्यग्निर्ज्योतिरिति (३. १) सजूरिति (३. १०) वा ॥१४॥ प्रकर्षेण दीप्तायाः समिध उपरि शाखान्तरात्समिधो मूलाद्व्यङ्गुलं परित्यज्य मध्यभागे प्रथमाहुतिमग्निर्ज्योतिरित्यल्पेन द्रव्येण जुहोति · अथवा सजूर्देवेनेति मन्त्रेण रात्रिपदयुक्तेन[1]।

अग्निर्वर्च इति (३. ९) ब्रह्मवर्चसकामस्य ॥१५॥ अयं मन्त्रगतस्तृतीयो विकल्पः काम्यः · सत्कर्मानुष्ठानवेदाध्ययनादिजनितं ब्राह्मं तेजो ब्रह्मवर्चसम्।

कूर्चे निधाय गार्हपत्यमवेक्षते होष्यन्नस्मिन् ॥१६॥[2] अस्मिन्गार्हपत्ये होमं करिष्यन्पूर्वाहुतिहोमानन्तरं स्रुचं कूर्चे मुक्त्वा गार्हपत्यमवेक्षते · होष्यन्नस्मिन्नित्यपराग्निहोमस्य पाक्षिकतां दर्शयति · तथा शाखान्तरे आहवनीयऽएव जुहुयादिति सर्वेषु चैव जुहुयादिति च। होष्यन्नित्युक्तत्वान्मृताग्निहोत्रे अग्निहोत्रावृता हुत्वेत्यत्र (२६.६.२०) वचनात् न गार्हपत्यावेक्षणम्।

तूष्णीमुत्तरां भूयसीम् ॥१७॥ उत्तरामिति कालतो देशतश्च व्याख्येयम् द्वितीयाम् पूर्वाहुतिहोमस्थानादुत्तरस्मिन्नग्निप्रदेशे[3] · मन्त्रस्याविधानादप्राप्तः तेन तूष्णीमिति स्वाहाकारनिवृत्त्यर्थम्। शाखान्तरात् पूर्वाहुत्या असंसृष्टामिति च · तथा शाङ्खायनः (२. १. ४) उपसाध्योत्तरामसंसृजंस्तूष्णीं भूयसीं पूर्वस्या इति · अथ योत्तरा स्विष्टकृद्भाजनमेव सेति (२. ३. १. २३) स्विष्टकृद्भाजनत्वोक्तेरेवासंस्पृष्टत्वमपि शाखान्तरीयं सूचितम्। अत्र प्रजापतिर्देवता यदग्नये च प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये च प्रातरिति शाखान्तरात्।

भूयिष्ठ७ स्रुचि ॥१८॥ भक्षार्थं परिशिनष्टि।

द्विः प्रकम्प्य निदधाति ॥१९॥ स्रुचं द्विरुत्क्षिप्य कूर्चे निदधाति · प्रकम्पनमत्रोदिङ्गनम् मृताग्निहोत्रे नोदिङ्गयतीति (१२. ५. १. १२) प्रतिषेधात् · तथा च शाङ्खायनः (२. १. ६) द्विरुदीचीं स्रुचमुद्यम्योपसादयतीति।

उपमृज्य स्रुचं कूर्चे निमार्ष्टि नमो देवेभ्यः ॥२०॥[4] स्रुक्प्रणालिकां[5]

---

1) ? रात्रिप्रयु॰ २. 2) कालद्वयोपादानसामर्थ्याद्विकल्पः होष्यन्वास्मिन्वा कालऽइति (!) · होष्यतः अवेक्षणम् अनुपसाद्यैव स्रुचम् (२.३.१.१७) Karka. होष्यन्निति शब्दसामर्थ्याद्होष्यन्नावेक्षतऽइत्यार्थिको व्यतिरेकः इति ज्ञापितं सम्प्रदायेनापि प्रवर्ग्ये Mahâd. 3) उत्तराशब्दश्च देशपरोऽपि द्रष्टव्यः अथ योत्तरार्धे जुहोतीति (२. ३. १. २३) Karka. 4) कूर्चस्योत्तरदेशे हस्तं निमार्ष्टि प्रोञ्छति Mahâd. 5) स्रुगग्रं Karka.

हस्तेन उपमृज्य तद्द्रव्यलिप्तं हस्तं कूर्चे निमार्ष्टि निमार्जनेन तद्धस्तलिप्तं द्रव्यं कूर्चेन योजयति ।

स्वधा पितृभ्य इति दक्षिणत उत्तानम् ॥२१॥ पाणिं निदधाति · उत्तानेनैव हस्तेन पुनः स्रुगग्रमुपमृज्य हस्तस्याधोभागमेव द्रव्यलिप्तं कृत्वा कूर्चस्य दक्षिणतो भूमावेवोत्तानं पाणिं निदधाति । उपमार्जनमपि सायं मुखात्प्रत्यक् प्रातः प्राक्संस्थम् · तथा चापस्तम्बः मुखादर्वाचीनꣳ सायं लेपमवमार्ष्टूर्ध्वं प्रातरिति ।

अप उपस्पृश्येतरयोश्च पुष्टिकामः ॥२२॥[1] पित्र्यं मन्त्रमुक्त्वेति (१.१०.१४) प्राप्तमप्यपामुपस्पर्शनं पुनरुच्यते अपसव्यदक्षिणामुखतादिधर्मनिरासार्थम् । तत इतरयोः गार्हपत्यदक्षिणाग्न्योः पुष्टिकामः जुहोति · चकारादपुष्टिकामोऽपि[2] । तत्र गार्हपत्ये होममाह ·

स्थाल्याः स्रुवेणेह पुष्टिं पुष्टिपतिर्दधात्विह प्रजाꣳ रमयतु प्रजापतिः अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहेति गार्हपत्ये ॥२३॥[3] स्थाल्याः सकाशात्स्रुवेण पयो गृहीत्वेह पुष्टिमिति गार्हपत्येऽग्नौ स्रुवेणैव जुहोति · तिष्ठन्समिधः सर्वत्र मध्यऽइति (१८.४.१०) पूर्वं तिष्ठता अग्नेर्मध्यप्रदेशे समिदाधानं कर्तव्यम् ततस्तस्याः पार्श्वे आहुतिहोमः अन्तेषाहुतीरुपविश्येति (१८.४.११) वचनात् अन्तराः समिधो भवन्ति बाह्या आहुतय इति श्रुतेश्च (१.२.३.४६) ।

तूष्णीं द्वितीयाम् ॥२४॥ स्थाल्याः सकाशात्स्रुवेणैव जुहोति · तूष्णीमिति स्वाहाकाराभावः ।

अग्नयेऽन्नादायान्नपतये स्वाहेति दक्षिणाग्नौ तूष्णीं द्वितीयाम् ॥२५॥[4] गार्हपत्यहोमानन्तरं दक्षिणाग्नौ समिधमाधाय स्थाल्याः स्रुवेण पयो गृहीत्वा अग्नयेऽन्नादायेति प्रथमामाहुतिं जुहोति ।

---

१) अपामुपस्पर्शनं पित्र्यत्वेऽपि सति अन्यधर्मव्युदासार्थम् । चकारात् जुहोति · अपुष्टिकामश्चेति केचित् तन्नातीव युक्तम् [तदा स्ववक्ष्यत्] पुष्टिकामश्चेति Mahâd. २) Thus also Karka: चशब्दादपुष्टिकामस्य · ३) See Kâṇva, Vâj. S. pag. १४. ४) See Kâṇva, Vâj. S. pag. १४.

अनामिकया द्विः प्राश्नाति ॥ २६ ॥ अनामिकया स्रुक्स्थं हुतशेषं[1] द्विवारं प्राश्नाति एकवारं गृहीत्वा प्राश्याचम्य पुनरप्येवं करोतीत्यर्थः ।

उत्सृप्य निर्लेह्याचम्योत्सिञ्चति देवान्जिन्व पितॄन्जिन्व तृतीयामुदुक्षति सप्तऋषीन्जिन्वेति ॥ २७ ॥[2] स्रुक्स्थं हुतशेषमुत्सृप्य पात्रान्तरे नीत्वा हस्ते वा कृत्वा आचम्य भक्षयित्वा ततस्तत्पात्रं हस्तं वा निर्लेढि जिह्वयासकृदास्वादयति · उत्सृप्य बहिर्निर्गम्येति माधवः तदा पानमर्थाद्धस्ते कृत्वा द्रवत्वात्पात्रान्तरे कृत्वा वा · किं पूर्वं प्राशीः किं द्वितीयं किमुत्सृप्यापा इति श्रुतेः (११. ५. ३. ४) उत्सृप्य वेदिसमीपादुत्सर्पणं कृत्वा किमपाः[3] पानं कृतवानसीत्यर्थः । ततः प्राशनानन्तरमग्निहोत्रहवणीं स्रुचमुदकेन पूरयित्वा उत्सिञ्चति स्रुचैवोर्ध्वं सिञ्चति देवान्जिन्वेति मन्त्रेण उत्तरतः ततो द्वितीयवारं तामग्निहोत्रहवणीं पूरयित्वा पित्र्यत्वाद्दक्षिणत उत्सिञ्चति प्राचीनावीती दक्षिणामुखः पितॄन्जिन्वेति मन्त्रेण ततो यज्ञोपवीत्यपः स्पृष्ट्वा तृतीयवारमग्निहोत्रहवणीं पूरयित्वा तृतीयां[3] स्रुचं प्रागुदीच्यामैशान्यामुदुक्षति ऊर्ध्वमुक्षम्योदकमूर्ध्वमुच्चालयति[4] ।

चतुर्थीं कूर्चस्थाने त्रिर्निषिञ्चत्यग्नये पृथिवीक्षिते स्वाहा पृथिव्या अमृतं जुहोमि स्वाहामृतेऽमृतं जुहोमि स्वाहेति ॥ २८ ॥ चतुर्थीं स्रुचं पूरयित्वा कूर्चस्थाने कूर्चमपसार्यैव आहवनीयस्य पश्चात्प्राक्संस्थमुदक्संस्थं वा त्रिवारमपो नीचैर्निनयति · शाखान्तरे अप्रक्षालितयैव स्रुचोदुक्षणत्रयं कृत्वा ततः स्रुचं दर्भैः प्रक्षाल्याग्नय इति निनयनं विहितमस्ति ।

स्रुक्स्रुवमाहवनीये प्रतप्य निदधाति ॥ २९ ॥ स्रुक्स्रुवं शाखान्तरादाहवनीये[5] सहैव प्रतप्य कूर्चे निदधाति अथवा निदधाति सुगुप्ते देशे स्थापयति कृतकार्यत्वात् ।

समिध आदधाति सर्वेषु यथापर्युक्षितं समिदसि समिद्धो मेऽग्ने दीदि-

१) स्रौचं होमावशिष्टम् Mahâd. २) उत्सृप्य स्रौचं मुखेनोपरि वायुबलेन पीत्वा निर्लेढि जिह्वयास्वादयति तत आचम्य स्रुचोदकमुत्सिञ्चति देवानिति प्रथमाम् पितॄनिति द्वितीयाम् तृतीयां स्रुचं पूरयित्वोदुक्षति ऊर्ध्वं क्षिपति Mahâd. उत्सृप्येति पात्रान्तरे नीत्वा · चमु भक्षने भक्षयित्वा द्रव्यपात्रं निर्लेढि · तत उत्सिञ्चति Karka. ३) तृतीयं २. ४) ? °मुच्छालयति २. See *Westergaard* sub शल्. ५) प्रतपनस्य संस्कारत्वाद्गार्हपत्ये प्राप्ते आहवनीये विधीयते Mahâd.

हि समेद्धा तेऽअग्ने दीद्यासमिति ॥ ३० ॥[1] ततो यथापर्युक्षितं होमारम्भे कृतपर्युक्षणक्रमेण आहवनीयगार्हपत्यदक्षिणाग्निषु गार्हपत्यदक्षिणाग्न्याहवनीयेष्विति क्रमेण वा [सर्वेषु] समिध आदधाति · एकैकेन मन्त्रेण एकैकां समिधं प्रत्यग्नि[2] ॥ अत ऊर्ध्वं यजमानस्य वात्सप्रोपस्थानं क्षुल्लकोपस्थानं वा · ततस्तूष्णीमाहवनीयस्योपस्थानम् तत्समीपऽआसनं च · ततो गार्हपत्यसमीपे शयनमासनं वा · ततः सर्वेषामग्नीनां पर्युक्षणं प्राग्वत् · ततो वाग्विसर्ग आचमानं च · ततोऽतीत्य निष्क्रमणं कुर्वतो दक्षिणाग्नेर्मनसा ध्यानम् । अथाध्वर्योर्होमे वाग्यमनकालं सावधिमाह ·

वाग्यतो दोहप्रभृत्या होमात्क्षीरहोता चेत् ॥ ३१ ॥[3] क्षीरहोता चेद्यदि वाग्यतो जुहोति तदा गोदोहप्रभृति आ होमाद्वाग्यतो भवेत् · क्षीरहोतेति योगमनपेक्ष्यैव रूढ्याध्वर्युरुच्यते[4] · तेनाध्वर्युकर्तृकहोमपक्षे तस्य दोहप्रभृत्या होमाद्वाग्यमस्य विकल्पः । अथवा यदि क्षीरहोता जुहोति तदा दोहप्रभृत्या होमात् वाग्यतो भवतीत्येवं योजना · यजमानस्य तु प्रथमाचमनानन्तरं वाग्यमो वाचं विसृज्य द्वितीयमाचमनमिति · अस्मिन्पक्षे क्षीरहोतुर्वाग्यमनम् ॥

॥ चतुर्दशी कण्डिका ॥ १४ ॥

अथ पद्धतिः ॥

ततोऽग्निहोत्रीं धुक्ष्वेति दोग्धारं प्रति प्रैषः , दोग्धा च शूद्रव्यतिरिक्तो भवति · ततः प्रेषितो दोग्धा वितानस्य दक्षिणतः प्राङ्मुखीं वोदङ्मुखीं वाग्निहोत्रीं गामवस्थाप्य वत्सं संसृज्यापनीय च त्रैवर्णिकघटितायामूर्ध्वकपालायां मृन्मय्यां स्थाल्यां पयो दोग्धि · अध्वर्योर्दोहप्रभृति होमसमाप्तिपर्यन्तं विकल्पेन

1) See Káṇva, Váj. S. pag. १५. 2) समिध इति बहुवचनसामर्थ्यात्तिस्रस्तिस्र एकैकस्मिन्निति देवः कर्काशयोऽपि · ब्राह्मणहस्तादिषु (२५. ४. २) न समिदाधानम् अश्रयभावात् ऊहितेन समिदाधानमिति कर्कः Mahád. स चायं मन्त्रो ब्राह्मणहस्तादिषु समवेतवचनवाद्विपरिणाम्यते · ननु च प्रकृतौ विपरिणामो न युज्यते यागसाधनभूताग्निविकारत्वाददोषः Karka. 3) यद्यध्वर्युः क्षीरहोता भवति तदा दोहात् वाग्यतो भवेत् Mah. 4) क्षीरहोता प्रत्यस्तमितावयवार्थवृत्तितयाध्वर्युरुच्यते · चेच्छब्दो यद्यर्थः यदि वाग्यतो यद्यवाग्यत इति अतश्चाध्वर्योर्दोहप्रभृति वाग्यमविकल्पः Karka.

वाग्यमनं भवति नियमेनेति केचित् दक्षिणाग्निहोमानन्तरं वाग्विसर्गः। ततोऽध्वर्युर्गार्हपत्यात्कतिपयानङ्गारान्दुग्धश्रपणार्थमुत्तरतः पृथक्करोति खरमध्य एवोत्तरतो भूमिसंलग्नानेव प्रेरयति न तूत्पाद्य · ततो गोः समीपे गत्वा दुग्धस्थालीमादाय तामभ्यन्तरे[1] कुर्वन्नाहवनीयं पूर्वेणाहृत्य गार्हपत्यस्य पश्चादुपविश्य पृथक्कृतेष्वङ्गारेषु तां दुग्धस्थालीमधिश्रयति · ततो गार्हपत्ये परिस्तृतेभ्योऽन्यदर्भतृणमेकं प्रदीप्तं कृत्वा तेन तृणेन स्थालीस्थं पयोऽवज्योत्य स्रुवेणापः प्रत्यानीय पुनस्तथैवावज्योत्योदगुद्वास्य निदधाति · ततो हस्तं विसृज्य पुनः स्थालीमादाय तत उत्तरतो निदधाति पुनरपि स्थालीमादाय ततोऽप्युत्तरतो निदधाति। एतत्त्रिरुद्वास्य वैकङ्कतं स्रुक्स्रुवं गार्हपत्ये प्रतप्य हस्तेनोभयं सहैव तथा संमार्ष्टि यथोभयोरप्युपरि अधस्ताच्च सर्वहस्तेन संमर्शनं भवति · अथवा पूर्वं स्रुवमन्तर्बहिश्च हस्तेन संमृज्य पश्चात्स्रुचमपि तथैव संमार्ष्टि। ततः पुनः स्रुक्स्रुवं गार्हपत्ये प्रतप्योन्नेष्यामीति यजमानं पृच्छति · यजमानश्च तिष्ठन्नोश्मुन्नयेत्यध्वर्युमनुजानाति · ततोऽध्वर्युः सव्ये हस्तेऽग्निहोत्रहवणीमुत्तानां निधाय दक्षिणेन स्रुवमादाय[2] स्थालीतोऽग्निहोत्रहवण्यां चतुरुन्नीय स्रुवं[3] स्थाल्यामेव निदधाति पञ्चावत्तिनः पञ्चकृत्व उन्नयनं कार्यम्। ततः प्रादेशमात्रीं पालाशादियज्ञियवृक्षोद्भवां समिधं स्रुग्दण्डस्योपर्यङ्गुल्याद्यन्तरितां धारयंस्तां स्रुचं गार्हपत्यस्योपरि समीप एव नीचैः कृत्वा ततो मुखमात्रे स्रुचं धारयन्नाहवनीयं प्रति हरति · गार्हपत्याहवनीययोर्मध्यदेशे स्रुचं नीचैर्गृहीत्वा पुनरप्युद्धृत्य मुखमात्र एव धारयित्वाहवनीयं गत्वा तत्समीपे वायव्यां प्रागुपविश्य दक्षिणं जान्वाच्य सव्येन स्रुचं गृहीत्वा दक्षिणेन समिधमादधाति अग्निज्योतिषमिति। ततो दक्षिणेन स्रुचमादायाग्निं प्रदीप्तं कृत्वा प्रदीप्तायां समिधि समिधो मूलभागादङ्गुलद्वयं त्यक्त्वा समिध उपर्याहुतिं जुहोति · अग्निर्ज्योतिरिति (३. ९) मन्त्रेण गृहीतस्य पयसश्चतुर्थांशं जुहोति इदमग्नय इति त्यागः · अथवा सजूर्देवेनेति (३. १०) मन्त्रेण रात्र्यग्निपदयुक्तेन पूर्वामाहुतिं जुहोति · ब्रह्मवर्चसकामस्याग्निर्वर्च इति (३. ९) मन्त्रेण पूर्वामाहुतिं जुहोति · इति पूर्वाहुतौ त्रयो मन्त्रविकल्पाः। एवं पूर्वा-

१) तमाभ्यं° १. २) ? स्रुचमा° १. ३) च चतुरुन्नीय १.

हुतिं स्वल्पां हुत्वा स्रुचं कूर्चे निधाय हस्तं विसृज्य गार्हपत्यमवेक्षते · पुनः स्रुचमादाय प्रजा[प]तिं मनसा ध्यायन् तूष्णीमुत्तराहुतिमग्नेरुत्तरभागे पूर्वाहुत्या संसर्गमकुर्वन्पूर्वाहुतितो भूयसीं जुहोति तूष्णीमिति श्रुतेः स्वाहाकारस्याप्यत्राभावः इदं प्रजापतयऽइति त्यागः · भक्षार्थं द्वितीयाहुतितोऽप्यतिबहु पयः स्रुचि परिशेषयेत् · ततः स्रुचमुदीचीं द्विरुत्क्षिप्य कूर्चे निदधाति । ततः स्रुगग्रमधोमुखेन हस्तेन प्रत्यगुपमृज्य कूर्चस्योत्तरभागे पयोलेपं निमार्ष्टि नमो देवेभ्य इति · तत उत्तानेनैव हस्तेनाङ्गुल्यधोभागेनैव पुनः स्रुगग्रं प्रत्यक्परिमृज्य कूर्चस्य दक्षिणतो भूमावुत्तानं पाणिं निदधाति स्वधा पितृभ्य इति ततः केवलमुदकोपस्पर्शनम् नात्रापसव्यम् न दक्षिणामुखता । ततो गार्हपत्यं गत्वा तिष्ठन्त्समिधमाधाय वायव्यां प्राङुपविश्य दक्षिणं जान्वाच्य स्थाल्याः स्रुवेण पयो गृहीत्वेह पुष्टिमिति समित्पार्श्वे जुहोति गार्हपत्येऽग्नौ इदमग्नये गृहपतये रयिमते पुष्टिपतये · ततो द्वितीयं स्रुवं गृहीत्वा तूष्णीं द्वितीयामाहुतिमुत्तरतो जुहोति इदं प्रजापतये । तत उत्थायापरेण गार्हपत्यं दक्षिणाग्निं गत्वा तस्माद्वायव्यां स्थितः समिधमाधाय तत्रैवोपविश्य स्थाल्याः स्रुवेण पयो गृहीत्वा दक्षिणाग्नौ समित्पार्श्वे जुहोति अग्नयेऽन्नादायेति मन्त्रेण इदमग्नयेऽन्नादायान्नपतये · पुनः स्थाल्याः स्रुवेण पयो गृहीत्वा द्वितीयामाहुतिमुत्तरतस्तूष्णीं जुहोति इदं प्रजापतये । सर्वत्र होमः प्रदीप्तेऽग्नौ कर्तव्यः · योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः मन्दाग्निरामयावी च दरिद्रश्च स जायतऽइति दोषस्मरणात् (कर्मप्रदीप॰ १.१.१२) · समिद्धहोमेन स्वेव समृद्धा आहुतय इति श्रुतेश्च (१.५.३.७) । ततः स्रुचमादाय भक्षार्थं बहिरागत्योपविश्यानामिकया स्रुक्स्थं पयो गृहीत्वा भक्षयित्वाचम्य पुनरनामिकयैव गृहीत्वा भक्षयित्वाचामति · ततः सर्वं पयो दक्षिणहस्ते कृत्वा प्राश्य पयोलिप्तं हस्तं सकृदेव निर्लेढि जिह्वयास्वादयतीत्यर्थः । ततो हस्तं प्रक्षाल्य द्विराचम्य गत्वाहवनीयसमीपऽउपविश्य दक्षिणहस्तेनोदपात्रमादाय स्रुचमुदकेन पूरयित्वा तदुदकमाहवनीयादुत्तरस्यां दिशि स्रुचोत्सिञ्चति देवाञ्जिन्वेति · ततः पुनः स्रुचमुदकेन पूरयित्वाहवनीयस्य दक्षिणतः स्रुचा तदुदकमुत्सिञ्चति पितृतीर्थेन प्राचीनावीती दक्षिणामुखः पितॄञ्जिन्वेति · ततो

ऽप उपस्पृश्य पुनस्तृतीयवारं स्रुचं पूरयित्वा प्रागुदीच्यां दिश्यूर्ध्वमुदकमुत्सिञ्चति · ततश्चतुर्थीं स्रुचं पूरयित्वाहवनीयस्य पश्चात्कूर्चस्थाने प्राक्संस्थमुदक्संस्थं वा त्रिर्निषिञ्चति निनयति अग्नये पृथिवीक्षितऽइत्यादिभिस्त्रिभिर्मन्त्रैः स्वाहान्तैः · ततः स्रुक्स्रुवमाहवनीये प्रतप्य कूर्चे निदधाति । ततः पर्युक्षणाक्रमेण सर्वेष्वप्यग्निषु तिस्रस्तिस्रः समिध आदधाति · पर्युक्षणस्य प्राक् द्वौ पक्षावुक्तौ पूर्वमाहवनीये ततो गार्हपत्ये ततो दक्षिणाग्नाविति अथवा गार्हपत्ये दक्षिणाग्नौ आहवनीये चेति · अतो येन क्रमेणादौ पर्युक्षणं कृतम् तेनैव क्रमेण समिध आदधातीत्यर्थः तत्र समिदसीत्येतावता मन्त्रेण प्रथमाम् समिद्धो मेऽअग्ने दीदिहीति द्वितीयाम् समेद्धा तेऽअग्ने दीद्यासमिति तृतीयाम् अथवा सकृदेव तिस्रस्तिस्रः समिधः सर्वेष्वप्यग्निषु आदधाति तदा समिदसि समिद्धो मेऽअग्ने दीदिहि समेद्धा तेऽअग्ने दीद्यासमित्येतावता मन्त्रेण ॥ ततो यजमानः पूर्वोक्तेन वात्सप्रेणाग्नीऽउपतिष्ठते न वा · अथवा वात्सप्रोपस्थाने भूर्भुवः स्वरित्यनेनैवाहवनीयं गार्हपत्यं चोपतिष्ठते पूर्वमाहवनीयम् ततो गार्हपत्यमिति । ततः पुनराहवनीयं तूष्णीमुपस्थाय तत्समीपे क्षणमुपविशति इन्द्रायाहवनीयाय नम इति चाह · तत उत्थाय गार्हपत्यसमीपे शयीत उपविशति वा यमाय राज्ञे गार्हपत्याय नम इति चाह । ततोऽध्वर्युः पूर्वपर्युक्षणाक्रमेण सर्वेषामग्नीनां पर्युक्षणं करोति · ततो यजमानो वाचं विसृज्य विद्युदसीत्यप आचामति[1] पत्न्यपि तूष्णीमाचामति । ततो यजमानो यथाप्रविष्टं निष्क्रामति · तत्र यद्यपराग्नीऽअन्तरेण प्रविष्टस्तदाहवनीयं प्रदक्षिणं परीत्य दक्षिणाग्निमुत्तरेण गत्वा गार्हपत्यदक्षिणाग्न्योरन्तरालेन प्रत्यङ्निष्क्रामेत् · अथ यद्यपराग्नी दक्षिणेन प्रविष्टस्तदाहवनीयं प्रदक्षिणीकृत्यापराग्नी दक्षिणेनैव प्रत्यङ्निष्क्रामेत् · तत्र निष्क्रमणं कुर्वन्नडाय नैषिधायान्वाहार्यपचनाय नम इति मनसा दक्षिणाग्निमुपस्मरेत् । तत आवसथ्येऽग्नौ होमं कुर्यात् । ततो वैश्वदेवम् । तदुक्तम् होमं वैतानिके कृत्वा स्मार्तं कुर्याद्विचक्षणः स्मृतीनां वेदमूलत्वात्स्मार्तं केचित्पुरा विदुः · तथा पालाश्यः समिधः कार्याः खादिर्यस्तदभावतः शमीरोहितकाश्वत्थ्यास्तदभावे

1) See ४.१५.५.

ऽर्कवेतसौ · तथा पालाशखदिराश्वत्थशम्युदुम्बरजा अपि अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुरिति । होमद्रव्याण्याह कात्यायनः[1] तैलं दधि पयः सोमो यवागूरोदनं[2] घृतम् तण्डुला मांसमापश्च दश द्रव्याण्यकाम[त] इति ॥ ॥ इति सायंहोम उक्तः ॥ ॥१४॥

इति चतुर्थस्य चतुर्दशी कण्डिका ॥ ॥

प्रातर्जुहोत्यनुदिते ॥१॥[3] अग्निहोत्रम् · अनुदितस्तु द्विविधः अनुदितश्च समयाध्युषितश्च · मनुः (२. १५) उदितेऽनुदिते चैव समयाध्युषिते तथेति · कात्यायनः[4] रात्रेश्च षोडशे भागे ग्रहनक्षत्रभूषिते कालं त्वनुदितं ज्ञात्वा होमं कुर्याद्विचक्षणः तथा प्रभातसमये नष्टे नक्षत्रमण्डले रविर्यावन्न दृश्येत समयाध्युषितं च तत् । अस्यां कण्डिकायां यत्र-यत्र प्रातरित्युच्यते तत्प्रातर्होमऽएव भवति अन्यत्सर्वं साधारणं सायम्प्रातर्होमयोः[5] कर्मैकत्वज्ञपनाय सायारम्भं प्रातरपवर्गमिदमेकं कर्मेति · उक्तम् (कर्मप्रदीप° २. ३. १) सायमादि प्रातरन्तमेकं कर्म प्रचक्षते दर्शान्तं पौर्णमासादि एकमेव मनीषिण इति ।

अन्तरेणापराग्नी गत्वा दक्षिणेन वा प्रदक्षिणं गार्हपत्यं परीत्योपविशति यजमानः ॥ २ ॥ यजमानः[6] पूर्वेणाहवनीयं प्रदक्षिणमागत्य दक्षिणाग्नेरुत्तरेण अपराग्नी अन्तरेण गार्हपत्यदक्षिणाग्न्योरन्तरालेन प्रत्यङ् गत्वा अथवा तौ दक्षिणेन गत्वा गार्हपत्यं प्रदक्षिणं परीत्य स्वस्थानऽउपविशति · अयं संचरः सायम्प्रातर्होमयोः साधारणः प्रागुक्तसंचरेण (४. १३. १२) सहास्य विकल्पः ।

पत्नी च यथादेशम् ॥३॥ पत्न्यपि एवमेव प्रविश्य यथादेशमादेशस्यानतिक्रमेण उपविशति तत्र गार्हपत्यान्नैरृत्यां दिशीशानाभिमुखीत्यर्थः[7] ।

---

1) not in the Karmapradipa. 2) °गोचनं Cod., but see schol. at ४. १५. २६. 3) सायंहोमोऽनुविहितः इदानीं प्रातर्होमस्य विशेषानुकथनम् Karka. 4) not in the Karmapradipa. 5) केचिद्धर्माः सायंहोमसंनिधौ विहिताः केचित्प्रातर्होमसंनिधाविति कर्मैकत्वज्ञापनायैव Karka. 6) यजमानग्रहणं सायम्प्रातरुभयत्राचमनकालप्रापणार्थम् Mahâd. 7) ? °शानामभि° २.

अप आचामति वृष्टिरसि वृश्च मे पाप्मानꣳ सत्येन व्रतमुपैम्यापः सत्यं मयि व्रतमिति ॥ ४ ॥ यजमानोऽन्यतरेण संचरेण विहारं प्रविश्य स्वस्थान उपविश्याप आचामति उदकं भक्षयतीत्यर्थः · अग्रे (५) विसर्गोपदेशादाचमनानन्तरं यजमानस्य वाग्यमनम् · पत्न्यपि तूष्णीमाचामति ।

वाचं विसृज्य पुनराचामति विद्युदसि वि मे पाप्मानं जह्यपोऽवभृथमभ्युपैमि मयि सत्यं गोपु मे व्रतमिति ॥ ५ ॥ हुते च धारावर्जमित्येतत्पर्युक्षणानन्तरं (४. १३. १९) यजमानो वाचं विसृज्य[1] विद्युदसीति पुनरप आचामति[2] · वाग्यमस्य पदार्थधर्मत्वात्तदन्ते विसर्गः । सत्येन व्रतमुपैमीति (४) व्रतशब्देन वाङ्नियम उच्यते · अतो मन्त्रलिङ्गादेवं ज्ञायते यदाचमनानन्तरं वाग्यमनमिति ।

उन्नयामीत्याह प्रातः ॥ ६ ॥ उन्नेष्यामीत्यस्य स्थाने उन्नयामीत्याह यजमानं प्रति क्षीरहोता ।

प्राक्सꣳस्थꣳ समित्पर्युक्षणं धारा च ॥ ७ ॥ प्रातरित्यनुवर्तते[3] · समिदसीत्येतत्समिदाधानम् (४. १४. ३०) होमात्पूर्वभावि पश्चाद्भावि पर्युक्षणं च धारा च (४. १३. १६-१९) प्राक्संस्थं भवति प्रथमं गार्हपत्यस्य पर्युक्षणं ततो दक्षिणाग्नेः ततः प्राक्संस्था धारा तत आहवनीयस्य पर्युक्षणमिति · एवं प्राच्यां संस्था भवति · तथोदकधारा प्राक्संस्थैव गार्हपत्यादारभ्याहवनीयं यावन्निनेया ।

उभयत्र वा ॥ ८ ॥[4] सायं प्रातश्च विकल्पेन ।

अग्निशब्दे सूर्यः ॥ ९ ॥ सायंहोममन्त्रेषु यत्र-यत्राग्निशब्दः प्रातर्होममन्त्रेषु तत्स्थाने सूर्यशब्दः प्रयोज्यः । अनेन सूत्रेण मन्त्रसमाम्नायः प्रकटीक्रियते अग्निहोत्रमन्त्रप्रकरणे ये सूर्यलिङ्गका मन्त्रास्ते प्रातर्होमे प्रयोक्तव्या इति · तेन गार्हपत्यदक्षिणाग्निपदस्थाने सूर्यपदप्रयोगो न भवति समाम्नायाभावात् · सूर्यज्योतिषम्[5] सूर्यो ज्योतिः सूर्यो वर्च इति ।

रात्र्युषसाह्नेति वा ॥ १० ॥[6] सजू रात्र्येन्द्रवत्येत्यत्र (३. १०) रात्र्येत्यस्य

---

१) विष्णुशब्दोच्चारणादिना Mahâd. २) आचमनम् अवभृथमभ्युपैमीति मन्त्रलिङ्गात् ततोऽतीत्य निष्क्रमणम् Mahâd. ३) चकारात्प्रातः Mahâd. ४) उभयत्र वा प्राक्संस्थं Karka. ५) See Kâṇva Vâj. S. pag. ६४. ६) रात्रिशब्दे उषसेति वा प्रयोगः अह्नेति वा Karka. We expect रात्रा (i. e. रात्रिशब्दे) ऽउष° !

स्थाने सजूरूपसेन्द्रवत्येति वा सजूरह्नेति वा प्रातर्होमे प्रयोज्यम् ।

ज्योतिः सूर्य इति वा (३. १) प्रातः ॥ ११ ॥[1] अथवा प्रातर्होमे ज्योतिः सूर्य इत्यनेन मन्त्रेण वा आहवनीये पूर्वामाहुतिं जुहोति · सूर्यो ज्योतिरिति वा ॥ ॥ अथ काम्यान्होमकालानाह ·

प्रथमास्तमिते पर्युदयं च स्वर्गकामस्य ॥ १२ ॥[2] अस्तमितमात्रऽएव सायं जुहुयात् सूर्योदयसमीपऽएव प्रातः · कालादेवैतत्फलम् न त्वग्निहोत्रात्[3] ।

तमोऽभ्यये सायं जुहुयाद्वियति प्रातरायुष्कामस्य ॥ १३ ॥[4] तमसोऽन्धकारस्यागमे · विगछति तमसि ।

अन्तःपशौ पशुकामस्य सायम्प्रातः ॥ १४ ॥ अन्तःपशौ काले ग्राममध्ये पशवो यस्मिन्काले · सायम् पशुषु ग्राममध्यऽआगतेषु · प्रातश्च ग्रामाद्निःसृतेषु ।

शयाने श्रीकामस्य प्रातः ॥ १५ ॥ शयाने सुप्तऽएव समस्तलोके अप्रबुद्धे ।
[एवं काम्या होमकाला उक्ताः अधुना काम्या अग्न्यवस्था आह ·]

प्रथमसमिद्धे धूप्यमाने प्रजासु निहत्येव सहसान्नमत्स्यतः ॥ १६ ॥ यो यजमानः प्रजासु स्वदेशनिवासिषु लोकेषु निहत्य-इव नितरां प्रजाः हत्वा-इव अत्यर्थं ताडयित्वा-इव ताभ्यः सकाशात्सहसा बलेनान्नमत्तुमिछति[5] धनधान्यादि ग्रहीतुमिछति तस्य प्रथमसमिद्धे प्रथममेव ज्वालाप्राडुर्भावे धूप्यमाने सधूमेऽग्नौ[6] जुहोति · तच्चैतत्क्षत्रियविषयम् ब्राह्मणवैश्ययोर्जनपदासम्भवात् ।

भूयिष्ठार्चिषि गृहीत्वेव सहसा ॥ १७ ॥ यो यजमानः प्रजाः गृहीत्वा-इव उपरुध्य-इव लोहकटकादिना बद्ध्वा-इव न तु निहत्य सहसा बलेन ताभ्यः अन्नं धनधान्यादि स्वीकर्तुमिछति · तस्य बहुलज्वालायुक्ते वह्नौ जुहोति · एतदपि क्षत्रियविषयम् ।

---

१) सायमग्निर्ज्योतिरिति पक्षे प्रातः ज्योतिः सूर्य इति · वाशब्दात्सूर्यो ज्योतिरिति Mah. See २. ३. १. ३४. २) यजमानस्य · पश्चात्त्वाजोताध्वर्युरेव Mahád. ३) स चायं गुणफलसम्बन्धो न कर्मफलसम्बन्धः Karka. ४) अध्वर्युरायुष्कामस्य गृहे Mahád. ५) Thus Ss. बलात्स्वन्न° २. ६) Thus Ss. समिध्येऽग्नौ २.

प्रदीप्ततमे श्रीयशस्कामस्य ॥१८॥ श्रीकामस्य च यशस्कामस्य च · एतच्च ब्राह्मणादीनां त्रयाणां वर्णानां साधारणम् ।

अर्चिःप्रत्यवाये मैत्रेणान्नमत्स्यतः ॥१९॥ ज्वालापसरणे जायमाने · एतदपि त्रैवर्णिकस्य साधारणम् ।

अङ्गारेषु चाकश्यमानेषु ब्रह्मवर्चसकामस्य ॥२०॥[1] देदीप्यमानेषु · ब्राह्मणस्यैव ॥ एवं काम्या अग्न्यवस्था उक्ताः अधुना काम्यानि होमद्रव्याण्याह ·

पयसा स्वर्गकामः पशुकामो वा ॥२१॥[2]

यवाग्वा ग्रामकामः ॥२२॥ तण्डुलैः[3] शिथिलपक्वा यवागूरित्युच्यते[4] · पेया यवागूरिति धूर्तस्वामिनः ।

तण्डुलैर्बलकामः ॥२३॥ व्रीहियवश्यामाकादिहविष्यान्नतण्डुलैः ।

दध्नेन्द्रियकामः ॥२४॥[5] इन्द्रियं चक्षुःश्रोत्रादि तत्कामः ।

अनधिश्रयणं च श्रुतिसामर्थ्याभ्याम् ॥२५॥[6] न दध्यधिश्रयतीति श्रुतेः · तथा सामर्थ्यात् यदि दध्नोऽधिश्रयणं क्रियते तर्हि तापसंयोगाद्दधित्वमेवापगच्छति आमिक्षात्वं सम्पद्यते ।

घृतेन तेजस्कामः ॥२६॥ स्मृत्यन्तरे दश द्रव्याणि नित्यान्युक्तानि तैलं दधि पयः सोमो यवागूरोदनं घृतम् तण्डुला मांसमापश्च दश द्रव्याण्यकामत इति ।

संवत्सरं जुहुयादेतेषामेकैकेन कामसंयोगे ॥२७॥ एतेषां प्रथमास्तमिते पर्युदयं चेत्यादिसूत्रोक्तानां (१२) कालाग्न्यवस्थाद्रव्याणां मध्ये कामसंयोगे कामसम्बन्धनिमित्तं स्वर्गादिकामसिद्ध्यर्थमेकैकेन संवत्सरं जुहुयात् · संवत्सरेणैकैकस्य कामसिद्धिर्भवतीत्यर्थः[7] ।

---

1) अग्निर्वर्चं इति मन्त्रेण सायम् सूर्यो वर्च इति प्रातः Mahád. 2) दुग्धेन अग्निहोत्रं जुहुयात् Mahád. 3) °लै २. °ला: Mahád. 4) Thus २. यवागूशब्देनोच्यते Mahád. 5) इन्द्रियाणां पाट[व]कामः Mahád. 6) तण्डुलानां च सामर्थ्यात् Mahád. श्रुत्युपादाने सति सामर्थ्यग्रहणं क्रियमाणं तण्डुलार्थं भवति Karka. 7) संवत्सरसंमिता वै व्रतचर्येति श्रुतवात् (१.५.३.२) Karka.

सायम्प्रातर्वा ॥२८॥ अथवा कामसंयोगे सति एकैकेन कामादिना सायम्प्रातर्होमः कर्तव्यो न संवत्सरम् · सायारम्भे प्रातरपवर्गे इदमेकमग्निहोत्रम्[1] तत्र चायं गुणफलसम्बन्धः तस्मात्सायम्प्रातरेवेति · तत्राप्यग्न्यवस्थासु[2] एकैकेन कामेन संवत्सरमेव होतव्यम् । अथ काम्यहोमद्रव्यपक्षेऽपि सायंहोमे येन द्रव्येण हुतम् तेनैव प्रातर्होमः कार्यः · अलाभे तत्प्रतिनिधिभूतं सदृशं द्रव्यान्तरम् न तु वैकल्पिकम् ।

दक्षिणेन प्रवेशनमग्निहोत्रेष्टिषु ॥२९॥ अग्निहोत्रे सायम्प्रातर्होमे इष्टिषु च सर्वासु[3] दक्षिणेन द्वारेण गार्हपत्यागारे कर्मार्थं प्रवेशनम् ।

सायम्प्रातराहवनीयस्यासनोपस्थाने ॥३०॥[4] आहवनीयस्योपस्थानं तूष्णीं कर्तव्यम् ततस्तत्समीपऽएवोपवेशनं च · सूत्रे तु अल्पाच्तरत्वादासनपदस्य पूर्वनिपातः ।

शय्यासनं वा गार्हपत्ये ॥३१॥ ततो गार्हपत्यं प्रत्यागत्य तत्समीपे शय्या शयनं कर्तव्यम् आसनमुपवेशनं वा कर्तव्यम् · तच्च पर्युक्षणात्पूर्वं भवति हुते हि पर्युक्षणमुक्तम् हुते च धारावर्जमिति (४. १३. १९) · वात्सप्रोपस्थानं च सायमस्मादपि पूर्वतरं भवतीति प्रागुक्तम् ।

संव्रजन्मनसोपस्मृत्य दक्षिणाग्निम् ॥३२॥[5] अत्रायं क्रमः · आहवनीयगार्हपत्योपस्थानानन्तरं पर्युक्षणम् वाग्विसर्गः विद्युदसीत्याचमनम् प्रागुक्तसंचरद्वयमध्ये येन संचरेणादौ प्रविष्टो भवति अतीत्यं निष्क्रमणमिति वचनात् (१. ८. २५) तेनैव संचरेण संव्रजन्निष्क्रामन्दक्षिणाग्निं मनसा उपस्मृत्य मनसैव ध्यात्वोपतिष्ठेतेति अथ यत्रैव संव्रजन्नित्यादिश्रुतेः (२. ३. २. ४) ।

अनशित्वा प्रातर्मुहूर्तं सभासनं सभ्यस्य ॥३३॥ यजमानः सभायां तस्य समीपे उपवेशनं करोति[6] ।

---

१) अग्निहोत्रं हि सायम्प्रातःपरिसमापनम् Karka. २) अग्निविकल्पेषु संवत्सर इष्यते · तत्र ह्यग्निविकल्पान्प्रकृत्याह एतेषामेकं संवत्सरमुपेत्सेदिति (२. ३. २. १४) Karka. ३) अयं च द्वारनियमोऽग्निहोत्रेष्ट्यां च तत्रैव हि श्रूयते Karka. यस्य कस्य चित् हविर्यजमानपत्नीद्रव्यादीनाम् Mahâd. ४) पूर्वमुपस्थानं श्रुतौ (२. ३. २. ४) आसनं सूत्रे · एतदुपस्थानं क्षुल्लकोपस्थानोत्तरं भवति Mahâd. ५) अनाहरणपक्षेऽपि मनसोपस्मरणं तु भवत्येव Mahâd. ६) See २. ३. २. ५.

भस्मोद्धृतमुपेयात् ॥३४॥[1] गार्हपत्यादिभ्यो भस्मोद्धृत्य यत्र राशिः कृतो भवति तत्समीपं गच्छेत्। अत्रोपस्थानं चोपस्थेयस्य मनसा वाचा कर्मणा चाराधनम्· ततश्चात्रोपस्थानस्योपक्रमे ब्राह्मणे आहवनीयादीनां यदिन्द्रादिरूपत्वमुक्तम् तद्याऽएष एवेन्द्र इत्यादिना (२.३.२.२) तदत्रोपस्थानकाले एतेषामिन्द्रादिरूपत्वेन चिन्तनार्थम्· दक्षिणाग्नेर्मनसोपस्मरणविधानादितरेषां वाचापि आराधनं कार्यमिति प्रतीयते ततश्चेन्द्रायाहवनीयाय नम इत्युक्त्वाहवनीयं नमस्कुर्यात् यमाय राज्ञे गार्हपत्याय नम इति गार्हपत्यं नमस्कुर्यात् नडाय नैषिधायान्वाहार्यपचनाय[2] नम इति दक्षिणाग्निं मनसैव न तु वाचा अनग्नते सांगमनाय सभ्याय नम इति सभ्यम् असते पांसवाय भस्मोद्धापाय नम इति भस्मराशिं नमस्कुर्यादिति एतच्च तत्तदुपस्थानकालऽएव।

स्वयं वा जुहुयात् ॥३५॥[3] सर्वदा स्वयमेव वाग्निहोत्रं जुहुयात् अन्यो वा विकल्पेन।

उपवसथे नियमः ॥३६॥ उपवसथशब्देन पौर्णमास्यमावस्येऽउच्येते[4]· तत्र स्वयमेव एते रात्री अग्निहोत्रं जुहुयादित्ययं नियमः[5]। सूतके मृतकेऽपि तत्कालमेव स्नात्वा स्वयमेव होमः कार्यः॥ ॥ पञ्चदशी कण्डिका ॥१५॥

इति श्रीश्रोत्रियग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतेन याज्ञिकदेवदत्तकृते कात्यायनसूत्रव्याख्याने चतुर्थोऽध्यायः समाप्तः ॥ ॥

अथ पद्धतिः ॥

अथ प्रातर्होमे विशेष उच्यते। यजमानेनोद्धरेत्युक्ते अनुदिते प्रातरग्निहोत्रहोमार्थं गार्हपत्यादितराग्न्योरुद्धरणम्[6]· अनुदितऽएव संध्यामुपास्य होमः कर्तव्यः· य एव रात्रौ संचरो गृहीतः स एव प्रातरिति सम्प्रदायः· पर्युक्षणं प्राक्संस्थमेव धारापि प्राक्संस्थैव न सायंहोमवत्प्रत्यक्संस्थमेतद्द्वयम्· उन्नेष्यामीत्यस्य

---

1) सायम्प्रातः प्रातःशब्दाभावात्· प्रातरेवेति कर्कः Mahâd. 2) नैषधाया° २. 3) यावज्जीवमग्निहोत्रम्· वाध्वर्युरिति Mahâd. 4) Thus Mahâd. °स्या उच्यते २. See ११.१.७.४. 5) सामगे यजमानेऽध्वर्युरेव जुहुयात् तच्छाखायामनाम्नातत्वात् Mahâd. 6) °त्यादित्यग्न्यो° १.

स्थाने उन्नयामीति वक्तव्यम् · सूर्यज्योतिषं त्वेत्याहवनीये समिदाधानम् · सूर्यो ज्योतिरिति पूर्वाहुतिहोममन्त्रः सजूर्देवेनेत्ययं वा उषःसूर्यपदयुक्तः अथवो-षसेत्यस्य स्थाने अग्नेन्द्रवत्येति[1] प्रातः प्रयोज्यम् ब्रह्मवर्चसकामस्य सूर्यो वर्च इति वा · इति चत्वारो मन्त्रविकल्पाः प्रातः पूर्वाहुतौ इदं सूर्यायेति त्यागः · स्रुगग्रस्योपमार्जनं प्राक्संस्थमेव वारद्वयमपि · समिदसीति समिदाधानम् · भूर्भुव इत्युपस्थानं च प्रातर्न भवत्येव केवलं तूष्णीमाहवनीयस्योपस्थानं तत्समीप ऽआसनं च इन्द्रायाहवनीयाय नम इति च · ततो गार्हपत्यं प्रति गत्वा तत्स-मीपे शयनमासनं वा यमाय राज्ञऽइति च · ततः प्राक्संस्थमेव पर्युक्षणम् वाचं विसृज्याचमनम् अतीत्य निष्क्रामतो दक्षिणाग्नेर्मनसा ध्यानम् · ततो भोजनात्प्राक्सभ्यसमीपे मुहूर्तमुपविश्यानश्नते सांगमनाय सभ्याय नम इति वदेत् · ततः सर्वाग्निभ्यो भस्मोद्धृत्य यत्र राशिः कृतो भवति तत्समीपं गत्वा आसते पांसवाय भस्मोद्वापाय नम इति च वदेत् अथ यत्रैव भस्मोद्धृतमुपनि-गच्छेदिति श्रुतेः (२. ३. २. ५) भस्मोद्धृतमुपेयादिति सूत्राच्च (४. १५. ३४) · तत आव-सथ्येऽग्नौ प्रातर्होमं कुर्यात् ॥ ॥ अथ सायम्प्रातर्होमे वैकल्पिकं संचरान्तर-मुच्यते · उत्तरतः सकाशात्पूर्वेणाहवनीयं प्रदक्षिणमागत्य दक्षिणाग्नेरुत्तरतो गार्हपत्यदक्षिणाग्न्योरन्तरालेन प्रत्यङ्गत्वा गार्हपत्यं प्रदक्षिणं परीत्य स्वस्थान ऽआगत्योपविश्याचामति · अथ वोत्तरतः सकाशादाहवनीयं पूर्वेण दक्षिणाग्निं गार्हपत्यं च दक्षिणेनागत्य गार्हपत्यं प्रदक्षिणं परीत्य अपराग्न्योरन्तरालेन प्रत्य-ङ्निष्क्रम्य स्वस्थाने गत्वोपविश्याचामति · होमान्ते च यथाप्रविष्टं निष्क्रमणम् · एवमग्निहोत्रे वैकल्पिकं संचरचतुष्टयमुक्तम् ॥ ॥ अथाग्निहोत्रहोमस्य काम्याः काला उच्यन्ते · स्वर्गकामस्यास्तमितमात्रे उदयसमीपे च होमकालः · आयुष्का-मस्य सायमन्धकारागमे प्रातरन्धकारे विगच्छति होमकालः · पशुकामस्य सायं पशुषु ग्राममध्ये समागतेषु प्रातर्ग्रामादनिष्क्रान्तेषु होमकालः · श्रीकामस्य सर्व-स्मिन्लोके सुप्ते अप्रबुद्धऽएव प्रातर्होमकालः सायंहोमकालस्तु श्रीकामस्य प्राकृत एव · निष्कामस्य तु यावत्सम्यङ् भाव्यन्ते नभस्यृक्षाणि सर्वतः न

[1] sic! Thus also Mahád. at ४. १५. १०.

च लोहितिमपैति तावत्सायं च हूयतऽइत्यादि (कर्मप्रदीप° १.१.३) ॥ ॥
अथ काम्या अग्न्यवस्था अभिधीयन्ते · यो राजा प्रजाभ्यो बलात्कारेण प्रजा हत्वे-वान्नादिकं ग्रहीतुमिच्छति तस्य प्रथमत एव समिद्धे धूममिश्रेऽग्नौ होमः · यो राजा प्रजा बलेन गृहीत्वेवोपरुध्यैव ताभ्योऽन्नं ग्रहीतुमिच्छति तस्यातिबहुलज्वा-लायुक्ते प्रदीप्ततरेऽग्नौ होमः · सर्वेषां ब्राह्मणादीनां श्रीकामाणां यशस्कामानां वा प्रदीप्ततमेऽग्नौ होमः · यो मित्रभावेन प्रजाभ्योऽन्नादिकं ग्रहीतुमिच्छति तस्य ज्वालापसरणे जायमाने होमः · यो ब्रह्मवर्चसकामस्तस्य चाकश्यमानेषु देदीप्य-मानेष्वङ्गारेषु होमः · निष्कामस्य तु समिद्धतमऽएव होमः यत्रोऽएव समिद्ध-तमं मन्येत तदाहुतीर्जुहुयादिति श्रुतेः (१.५.३.७) ॥ ॥ अथ काम्यानि होमद्र-व्याण्युच्यन्ते · स्वर्गकामः पशुकामो वा पयसाग्निहोत्रं जुहोति · ग्रामकामो यवा-ग्वा · बलकामस्तण्डुलैः व्रीहिश्यामाकनीवारा यवगोधूमशालयः एतेषां तण्डुला होम्या यावनालाः प्रियङ्गवः · इन्द्रियकामो दध्ना तस्य दध्नोऽधिश्रय-णाभावः तण्डुलानां च · यवाग्वां घृते चोदकासेकपुनरवज्योतनवर्जितं सर्वं भवति · तेजस्कामो घृतेन जुहोति ॥ ॥ एतेषां प्रागुक्तानां कालानामग्न्यव-स्थानां होमद्रव्याणां च मध्ये एकैकेन कालादिनाङ्गेन संवत्सरं निरन्तरं होमे कृते उक्तफलसिद्धिः सायम्प्रातर्होममात्रेण वा · तत्राग्न्यवस्थानां संवत्सरनि-यमो नान्येषाम् । अग्निहोत्रहोमे सर्वास्विष्टिषु च गार्हपत्यागारस्य दक्षि-णद्वारेण प्रवेशनं कर्तव्यम् · अयं प्रवेशने सदा नियमः ॥ ॥ सर्वदा यजमानः स्वयमग्निहोत्रं जुहुयात् अध्वर्युणा वा होमयेत् · तत्र स्वयंहोमपक्षे उन्नयने उद्धरणे च प्रैषाभावः अन्यत्समानम् । अमावास्यायां पौर्णमास्यां च नियमेन स्वयं होमः कर्तव्यः । तदुक्तम् संध्याकर्मावसाने तु स्वयं होमं समाचरेत् . स्वयंहोमे फलं यत्स्यान्न तदन्येन जायते · किं तर्ह्यन्येन हुते फलमित्यपेक्षिते स एवाह होमे यत्फलमुद्दिष्टं जुह्वतः स्वयमेव तु हूयमाने तदन्येन फल-मर्धं प्रपद्यतऽइति । तथा[1] ऋत्विक्पुत्रौ गुरुर्भ्राता भागिनेयोऽथ विट्पतिः

1) From Daxa, according to Mahâd. at ४. १५. ३५.: — quoted also in २, with the additional remark: भागिनेयः सुतापतिरिति वा पाठः, see pag. ४२३,३

एतैरेव हुतं यत्स्यात्तद्धुतं स्वयमेव तु · विट्पतिर्जामाता अन्यत्प्रसिद्धम् । स्मृत्यर्थसारे यजमानः प्रधानं स्यात्पत्नी पुत्रश्च कन्यका ऋत्विक्शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु पत्नी कन्या च जुहुयाद्विना पर्युक्षणक्रियामिति · न वै कन्या[1] न युवती नाल्पविद्यो न बालिशः होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथा नरके हि पतन्त्येते जुह्वतः स च यस्य तत् तस्माद्वितानकुशलो होता स्याद्वेदपारगः · प्रोषिते ऽप्यथवाशक्ते स्वामिन्यनधिकारिणि पुत्रो भ्राताथवा पत्नी शिष्यो वा जुहुयादिति · सूतके[2] च प्रवासे चाशक्तौ श्राद्धभोजने एवमादिनिमित्तेषु हावयेद्धेति योजयेत्[3] · जन्महानौ[4] वितानस्य कर्मत्यागो न विद्यते शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः · शिवविष्ण्वर्चनं दीक्षा यस्य चाग्निपरिग्रहः स तत्कर्माणि कुर्वीत स्नातः शुद्धिमवाप्नुयात् · सूतके[5] कर्मणां त्यागः संध्यादीनां विधीयते होमः श्रौते तु कर्तव्यः शुष्कान्नेनापि वा फलैः · श्रौते[6] कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् · वैतानौपासनाः[7] कार्याः क्रियाश्च श्रुतिचोदनादित्यादिवचनात् सूतकदिनके[8] च तत्कालं स्नात्वा श्रौतस्मार्तहोमः स्वयं शुष्कान्नफलादिना कर्तव्यः दुग्धदध्यादिना त्वसगोत्रेणैव कारयितव्यः · न[9] वर्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रियाः न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् । शङ्खोऽपि अग्निहोत्रार्थं स्नानोपस्पर्शनात्तत्कालं शौचमिति ॥ सुहुतान्यग्निहोत्राणि नयन्ति परमां गतिम् अत्र स्वर्गश्च मोक्षश्च यो यथा गन्तुमिच्छति संनिधौ[10] यजमानः स्यादुद्देशत्यागकारकः असंनिधौ तु पत्नी स्यादुद्देशत्या-

---

1) From Manu ११. ३६-३७. 2) From the Karmapradîpa ३. ५. ४. 3) ? See Mitâxarâ III fol. 7ᵇ lin. 9: बृहस्पतिनाप्युक्तम् सूतके मृतके चैव अशक्तौ श्राद्धभोजने प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत् । 4) This hemistich belongs to Jâvâla, according to Kullûka at Manu ५. ८४. 5) From the Karmapradipa ३. ५. १, quoted as the Chandogapariçish/a by Kullûka l. cit. with the reading मृतके, but सूतके is the reading also of the Mitâxarâ III fol. 7ᵇ lin. 6. 6) This hemistich is quoted in the Mitâxarâ III fol. 7ᵃ lin. 15 as taken from Vaiyâghrapâda. 7) This hemistich is taken from Yâjnavalkya ३. १७. 8) ? सूतकादिनके ?. 9) From Manu ५. ८४. 10) See schol. at ४. १२. १६. pag. ३९४,२१ foll.

गकारिका असंनिधौ तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया उन्मादे प्रसवे च[ऽर्तौ] कुर्वीतानुज्ञया विना सर्वदा यजमानो वा त्यजेत्तद्दिङ्मुखः शुचिरिति · तथा चापस्तम्बः प्रवसन्विहाराभिमुखो याजमानं जपति प्राचो विष्णुक्रमान्क्रामतीति · मण्डनः त्यागं तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः उभावप्यसमर्थौ चेन्नियुक्तः कश्चन त्यजेत् ॥ ॥१५॥ ॥

इति चतुर्थस्य पञ्चदशी कण्डिका ॥ ॥

इति श्रोत्रियग्निचित्सम्राट्स्थपतित्रिंशत्क्रतुकृन्महायाज्ञिकश्रीप्रजापतिसुतेन याज्ञिकदेवेन कृतायां कात्यायनसूत्रपद्धतौ चतुर्थोऽध्यायः समाप्तः ॥ ॥

इति कातीये श्रौतसूत्रे चतुर्थोऽध्यायः ॥४॥ ॥

अाचार्येण श्रुतिमन्त्रपाठक्रमेण पौर्णमासादीन्यग्निहोत्रान्तानि कर्माण्युक्तानि। इदानीं श्रुतिपाठक्रमेणैव चातुर्मास्यानि वक्तुं तेषामारम्भकालमाह ·

चातुर्मास्यप्रयोगः फाल्गुन्याम् ॥१॥ चातुर्मास्यशब्देन वक्ष्यमाणानि वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयसंज्ञानि चत्वारि पर्वाण्यभिधीयन्ते · चतुर्षु चतुर्षु मासेषु भवानि चातुर्मास्यानीति व्युत्पत्त्या · तत्रभवाधिकारे चतुर्मासाण्ण्यो यज्ञे तत्र भवे इति वार्त्तिकम् (पा॰ ५.१.९४)। तत्राप्याग्नेयादियागा एव चातुर्मास्यशब्देनाभिधीयन्ते न करम्भपात्रदर्विहोमत्रैयम्बकादयो जुहोतयः · अतश्चात्र यागा एव प्रधानम् जुहोतयश्च तदङ्गम् · [प्रयोजनम्] अाग्नेयादिसौर्यान्तानां यागानां मध्ये यदि कश्चिद्विस्मृतः समाप्तेरूर्ध्वं ज्ञातः तदा तस्य विस्मृतस्य साङ्गोपेतस्य करणम् जुहोतीनां विस्मरणे तु समाप्तेरूर्ध्वं ज्ञाते तस्याकरणमिति · तदुक्तं कात्यायनेन (कर्मप्रदीप १.३.६) प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः तदङ्गस्याक्रियायां तु नावृत्तिर्नैव तत्क्रियेति · विस्मरितमङ्गमपि समाप्तेः पूर्वं क्रियतऽएव तदुक्तं निदानसूत्रे अङ्गमपरिसमाप्ते प्रधाने क्रियतऽइति अन्तरितं प्राक्समापनात्कुर्यादिति मानवे। तेषां चातुर्मास्यानां प्रयोगः प्रारम्भः फाल्गुन्यां पौर्णमास्यां भवति। अत्र फाल्गुनीशब्देन गौणी फाल्गुनी प्रतिपदुच्यते शाखान्तरे तथा दर्शनात् ऋतुमुखऽऋतुमुखे चातुर्मास्यैर्यजेतेति प्रतिपदेव ऋतुमुखम् न पौर्णमासी · स्मृतावपि चैत्रप्रतिपदि वसन्तारम्भस्योक्तत्वात् · तथा च शाङ्खायनः (३.१३.१-५) फाल्गुन्यां पौर्णमास्यां प्रयोगश्चातुर्मास्यानां चैत्र्यां वा वैश्वानरपर्जन्येष्टिः[1] पूर्वस्यां पौर्णमास्याम् उत्तरस्यां

1) वैश्वानरीयपा॰ Çânkh.

वैश्वदेवमिति · स्वशाखायामपि (२. ६. ३. १३) अथ पुनः प्रयुञ्जानस्य पूर्वेद्युः फाल्गुन्यै पौर्णमास्यै शुनासीर्येण यजेताथ प्रातर्वैश्वदेवेनाथ पौर्णमासेनेति प्रतिपद्येव पर्व विदधाति · कात्यायनाचार्या अप्याहुः (११. १७-१८) फाल्गुन्युपवसथे शुनासीरीयं प्रातर्वैश्वदेवमिति · वरुणप्रघाससाकमेधेषु च (२५. २. ४८ ६. २. १७) गृह्यानित्वा निर्मथ्याग्नी पौर्णमासेन यजतऽइति पर्वसमनन्तरमेव पौर्णमासानुष्ठानश्रुतेश्च · आपस्तम्बः फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन यजते पूर्वस्मिन्पर्वणि पञ्चहोतारं मनसानुद्रुत्याहवनीये सग्रहं हुत्वारम्भणीयामिष्टिं निर्वपति वैश्वानरं द्वादशकपालं पार्जन्यं चरुमिति प्रकृत्य हिरण्यं वैश्वानरे ददाति धेनुं पार्जन्ये सिद्धेष्टिः संतिष्ठते प्राचीनप्रवणे वैश्वदेवेन यजेतेति पञ्चदश्यामेव वैश्वदेवमुपक्रम्य सायंदोहान्तं कृत्वा श्वो भूते पात्रसंसादनपूर्वकालऽइत्यादिना प्रतिपद्येव पर्वकरणमाह · मानवेऽपि चातुर्मास्यानारप्स्यमानः पूर्वां पौर्णमासीमुपोष्याग्नये वैश्वानराय द्वादशकपालं पुरोडाशं निर्वपति पार्जन्यं चरुमिति प्राचीनप्रवणे वैश्वदेवेन यजेत फाल्गुन्यां चैत्र्यां वसन्ते वा नोपवसथे चातुर्मास्येषु केशश्मश्रु यजमानो वापयतऽइति प्रकृत्यापस्तम्बसूत्रवत्प्रतिपद्येव वैश्वदेवविधानात् · कठसूत्रेऽप्येवमेवोक्तमस्ति श्वो भूते तुल्यमा निर्वपणादिति · अतः प्रतिपद्येव वैश्वदेवपर्व कर्तव्यम् ।

वैश्वानरपार्जन्यौ निरुप्येष्टन् ॥२॥ इष्टन् वैश्वान्यौ निरुप्य चातुर्मास्यानां प्रयोगः प्रारम्भः कर्तव्यः · अयमन्वारम्भणीयया सह विकल्पः इष्ट्या वैश्वान्यौ इष्ट्यान्वारम्भणीयेति शाखान्तरात् ।

वैश्वानरो द्वादशकपालः ॥३॥ गुणिनो देवता अग्निरत्र द्रष्टव्यः शाखान्तरे तथा दर्शनात् · तथा काठके अग्नये वैश्वानराय द्वादशकपालमिति · मनुरपि पूर्वां पौर्णमासीमुपोष्याग्नये वैश्व द्वा॰लमिति · श्रुतावपि अभ्युदृष्टेष्ट्याम् अग्नये वैश्व द्वा॰ लमिति (११. १. ५. ५) पठ्यते सूत्रकारेणात्रापि (२५. ४. ४६) इन्द्राय वृत्रघ्नऽएकादशकपालो वैश्वानरश्चेति निर्गुण एवोक्तः · एवं च सति यत्र-यत्र श्रुतौ सूत्रे वा निर्गुणं वैश्वानरपदश्रवणम् तत्र सर्वत्राग्निर्गुणिनी देवता अनुक्तापि ज्ञेया ।

चरुरुत्तरः ॥ ४ ॥ उत्तरः पार्जन्यः चरुर्भवति शाखान्तरात् । अस्यां चापस्तम्बसूत्रे दक्षिणा पठितास्ति हिरण्यं वैश्वानरे ददाति धेनुं पार्जन्यऽइति · चोदकप्राप्त्या चान्वाहार्यः प्राप्नोति · मानवे च धेनुरनड्वांश्च दक्षिणेति ॥ ॥ अथ वैश्वदेवपर्वणि हवींष्याह ·

आग्नेयः ॥ ५ ॥ अष्टाकपालः पुरोडाशः प्रथमं हविर्भवति ।

सौम्यश्चरुः ॥ ६ ॥ [२. ५. १. २] ।

सावित्रो द्वादशकपालोऽष्टाकपालो वा ॥ ७ ॥ उपांशु (४. ५. ५) ।

सारस्वतश्चरुः ॥ ८ ॥ योषा वै सरस्वतीत्यर्थवादात् (२. ५. १. ११) अत्र सरस्वत्या देवतात्वम् न तु सरस्वतः ।

पौष्णश्चरुः प्रपिष्टानाम् ॥ ९ ॥ प्रकर्षेण पिष्टानां व्रीहितण्डुलानाम् । यत्र पूषा तत्र पेषणं प्राप्यते. । इदानीमिदं विचार्यते राजसूये त्रिषंयुक्तेष्वैन्द्रापौष्णश्चरुरस्ति (१५. २. १२) सोऽपि किं प्रपिष्टानां भवति उत नेति ·

द्विदेवतोऽपि नियमसामर्थ्यात् ॥ १० ॥ [द्विदेवतोऽपि[1] पौष्णश्चरुः प्रपिष्टानामेव भवति] · अत्र हीन्द्रसहितस्य पूष्णो देवतात्वम् तत्र पूष्णो नियमेन पिष्टं प्राप्नोति इतरस्येन्द्रस्यानियमः · तत्र कांस्यभोजिन्यायेन नियमानियमयोर्नियमस्य बलवत्त्वाद्द्विदेवत्यः प्रपिष्टानामेव भवति · इति प्राप्ते आह ·

अर्धपिष्टं वोभयसामर्थ्यात् ॥ ११ ॥ पूष्णः पिष्टम् इतरस्य चापिष्टमिति[2] · विक्लिन्नप्रायेषु तण्डुलेषु पिष्टानामावापः करिष्यते [अतः पाकवैषम्यं नाशङ्क्यम्] ।

सौमापौष्णादर्शनाच्च ॥ १२ ॥ [सौमापौष्णं चरुं निर्वपेन्नेमपिष्टानमिति] नेमपिष्टतादर्शनात् · वो नेम इत्यर्धस्येति यास्कोक्तेः (३. २०) ।

अपिष्टो वा देवतान्यत्वात् ॥ १३ ॥ वा पूर्वोक्तपक्षद्वयनिरासार्थः · केवलात्पूष्णः सकाशात्सद्वितीयस्य पूष्णो देवतान्यत्वात् · इति सिद्धान्तः[3] ।

---

1) द्वयोः समुदितयोर्देवतात्वं यस्मिन्नसौ द्विदेवतः Ss. 2) उभयोरनुगृहीतो भवति Ss. 3) वा सिद्धान्ते · द्विदेवतश्चरुः न प्रपिष्टानाम् कुतः देवतान्यत्वात् केवलोऽन्यः सद्वितीयो ऽन्य एव Ss.

सौमापौष्णो वचनात् ॥१४॥ [सौष्णो या नेमपिष्टता सा वचनात्]।

एतानि सर्वत्र ॥१५॥ एतानि पञ्च हवींषि सर्वत्र सर्वेषु पर्वसु भवन्ति· सर्वशब्देन वरुणप्रघासमहाहविःशुनासीरीयं च गृह्यते।

मरुद्भ्यः स्वतवद्भ्यः सप्तकपालः ॥१६॥ षष्ठं हविः। स्वतवद्भ्यो विशेषणम् मरुद्भ्यो विशेष्यम्। स्वतवद्भ्य इति छान्दसं रूपम्[1]।

मारुतो वा ॥१७॥ सप्तकपालः पुरोडाशः

वैश्वदेवी पयस्या ॥१८॥ सप्तमं हविः। उपांशु (४.५.६)। अस्यां दाक्षायणपयस्याया धर्मप्रवृत्तिः (४.४.७) · अतोऽग्न्यन्वाधानानन्तरं शाखाछेदानुमार्जनपरिवासनोपवेषकरणपवित्रबन्धनवत्सापाकरणविश्वेभ्यो-देवेभ्यो-भागमिति-गोःस्पर्शनशाखोपगूहनानि कृत्वा ब्रह्मवरणादि · निरुप्याज्यं दोहं कृत्वा तप्ते पयसि दधिप्रक्षेपो दधनि वा दोहः · तत्रस्याभिघारमदत्त्वा वा[2] वाजिननिषेकादि तस्योत्करे सादनम् वाजिनयागोऽपि भक्षान्तो भवति।

द्यावापृथिवीय एककपालः ॥१९॥ अष्टमं हविः। उपांशु (४.५.३)। अत्राहापस्तम्बः अलंकरणकालेऽज्येनैककपालमभिपूरयित्वा विपृष्ठं चेति · एतच्चाचार्येणाग्रयणेऽउपनिबद्धम् (४.६.५) उद्वास्यालांश्छादयेदपिदाज्येनेति।

एतद्वैश्वदेवम् ॥२०॥ एतदाग्नेयाद्यष्टहविष्कं कर्म वैश्वदेवसंज्ञकं भवति।

प्राचीनप्रवणे ॥२१॥ प्राचीनं प्रवणं निम्नं यस्मिन्नसौ प्राचीनप्रवणो देशः · तस्मिन्प्राचीनप्रवणे वैश्वदेवेन यजेतेति शाखान्तरात्।

अहतवासाः ॥२२॥ अस्मिन्वैश्वदेवपर्वणि यजमानोऽहतवासा भवति अहते वाससी यस्यासावहतवासाः एकं परिधानीयम् द्वितीयमुत्तरीयम् · परिधास्याऽइति परि[धानीयस्य परि]धानमन्त्रः यशसा मेत्युत्तरीयस्य[3]· परिधानानन्तरं द्विराचमनं च · उद्धरणात्प्रागेवैतत्परिधानं कर्तव्यम्।

पत्नी च ॥२३॥ अहतवासा भवति।

तेऽएव वरुणप्रघासेष्वपि ॥२४॥ तेऽएव वाससी · नाशदोषादावन्ययोरपि वंसेषु परिधानम् दानं च।

---

1) The Bráhmaṇa has स्वतवोभ्यः (२.५.१.१४) 2) see ४.४.१०. 3) See Pâraskara २.६.

त्रेधा बर्हिः संनह्य पुनरेकधा ॥ २५ ॥ बर्हिः पूर्वं त्रेधा त्रिविधं संनह्य एकैकेन संनहनेन पृथक्पृथक्त्रीन्पूलकान्बद्धा पुनरेकधा एकविधं संनह्य[ति] त्रीनपि पूलकानेकेन चतुर्थेन महता संनहनेनैकत्र बध्नीयादित्यर्थः ।

कुशप्रस्वः प्रस्तर उपसंनद्धः ॥ २६ ॥ कुशप्रस्वः प्रसूनाः[1] पुष्पिताः कुशाः दर्भमञ्जर्यः प्रस्तरोऽत्र भवति · कीदृशः उपसंनद्धः उप बर्हिषः समीपे संनद्धः बद्धो भवति चतुर्थसंनहनमध्ये सोऽपि बद्धो भवति · प्रस्व उपसंनद्धा भवन्ति तं प्रस्तरं गृह्णाति तस्मात्प्रसूः प्रस्तरं गृह्णातीति (२. ५. १. १८) च श्रवणात् ।

आसाद्याग्निमन्थनम् ॥ २७ ॥ हवींष्यासाद्याग्निमन्थनं कर्तव्यम्[2] [तत्र हविरासादनोत्तरकालं पूर्वं प्राकृतानि] हविरालम्भात्मालम्भोदकस्पर्शनानि [पश्चाद्विकृतमग्निमन्थनम्] · तच्च प्राकृतं च विकृतावित्यनेन (१. ५. ४) न्यायेन[2]। अथाग्निमन्थनस्येतिकर्तव्यतामाह ·

अग्नेर्जनित्रमिति (५. २) शकलमादाय वेद्यां करोति ॥ २८ ॥ यज्ञियवृक्षशकलम् · तूष्णीं वेद्यामुदगग्रं करोति ।

वृषणाविति (५. २) कुशतरुणे तस्मिन् ॥ २९ ॥ दर्भतृणे प्रागग्रे तस्मिन् शकले निदधाति । मानवे उत्तरस्य पश्चात्परिधिसंधेरग्नेर्जनित्रमसीत्यग्निमन्थनं शकलमवस्थापयति वृषणौ स्थ इति तत्र प्राञ्चावच्छिन्नप्रान्तौ दर्भावुर्वश्यसीति तयोरुदक्तूलामरणिं पश्चात्प्रजननां मूलत उत्तरारणिमायुरसीत्याज्यस्थाल्या बिले स्नेहयन् त्रिः सुमनक्तीत्यादि · आपस्तम्बोऽपि प्राञ्चौ दर्भाविति ।

उर्वश्यसीत्यधरारणिं (५. २) तयोः ॥ ३० ॥ एतयोः[3] कुशतृणयोरुपर्युत्तराग्रामधरारणिं निदधाति ।

आयुरसीत्युत्तरयाज्यस्थालीं (५. २) संस्पृश्य पुरूरवा इत्यभिनिधानं (५. २) तया ॥ ३१ ॥ उत्तरयारण्या प्रमन्थमूलेन आज्यस्थालीस्थमाज्यं संस्पृश्य तया उत्तरारण्या अधरारणेरुपरि निधानं करोति ॥ ॥ प्रथमा कण्डिका ॥ १ ॥

अथ पद्धतिः ॥

अथ चातुर्मास्यानां पद्धतिर्लिख्यते ॥ ॥ तत्र प्रथमप्रयोगे मातृपूजापूर्वकमा-

१) Thus Ss. प्रसूताः २. २) See the schol. at १.५.४. pag. ८४. ३) ? स्तृतयोः २.

भ्युदयिकं श्राद्धम् । तेषां प्रारम्भः फाल्गुन्यां पौर्णमास्याम् शाखान्तरे चैत्र्यां वैशाख्यां वा ॥ तत्र पौर्णमास्यामिष्ट्यान्वारम्भणीया इष्ट्या वैश्वानरपार्जन्येष्टिः · तत्र वैश्वानरो द्वादशकपालः पुरोडाशः पार्जन्यश्चरुरिति द्वे हविषी भवतः । उद्धरणादिकर्मापवर्गान्ते विशेषः · वैश्वानरपार्जन्येष्ट्यर्थमित्युद्धरणे वैश्वानरपार्जन्येष्ट्याहमिति वरणे · पात्रासादने द्वादश कपालानि एका चरुस्थाली दक्षिणान्वाहार्य एव विंशतिरिध्मकाष्ठानि एका पुरोडाशपात्री अन्यत्सर्वं प्रकृतिवत् · यवमयपुरोडाशपक्षे नानाबीजधर्मा उक्ताः[१] · ग्रहणे अग्नये वैश्वानराय जुष्टं गृह्णामि पर्जन्याय जु॰ गृ॰ · प्रोक्षणे अग्नये वैश्वानराय त्वा जुष्टम् पर्जन्याय त्वा जुष्टमिति · व्रीहिमयपुरोडाशपक्षे कणान्ते विभज्यालम्भः इदमग्नेर्वैश्वानरस्य इदं पर्जन्यस्य · प्राणदाने अग्निं वैश्वानरं गच्छ पर्जन्यं गच्छ · इदमहं० सप्तदशेन वज्रेणेत्यवबाधने · उत्तमप्रयाजे इदमग्नये सोमायाग्नये वैश्वानराय पर्जन्याय देवेभ्य इत्यादि · प्रधानयागे अग्नये वैश्वानरायानुब्रूहि अग्निं वैश्वानरं यज इदमग्नये वैश्वानराय पर्जन्यायानुब्रूहि पर्जन्यं यज इदं पर्जन्याय · ततः स्विष्टकृदादि · प्राशित्रचतुर्धाकरणाद्युभयोः सर्वम् · व्यूहने अग्नेर्वैश्वानरस्य पर्जन्यस्योज्जितिम् अग्निर्वैश्वानरः पर्जन्यस्तमपनुदतामिति · प्रस्तरत्यागे इदमग्नये सोमायाग्नये वैश्वानराय पर्जन्याय देवेभ्य इत्यादि ॥ एवं पूर्वस्यां पौर्णमास्यामिष्टिं कृत्वा प्रतिपदि प्राक्पौर्णमासाद्वैश्वदेवं पर्व भवति । तत्राष्टौ हवींषि भवन्ति आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रो द्वादशकपालोऽष्टाकपालो वा उपांशु सारस्वतश्चरुः पौष्णश्चरुः मरुद्भ्यः स्वतवद्भ्यः सप्तकपालः पुरोडाशः मारुतो वा वैश्वदेवी पयस्या उपांशु द्यावापृथिवीय एककपालः उपांशु । अत्र प्राचीनप्रवणायां भूमौ कर्तव्यम्[२] । पूर्वं पत्नीयजमानावहते वाससी परिदधाते · तत ऋत्विजां वरणम् अमुकगोत्र अमुकशर्मन् ऐष्टिकेन प्रथमजगवदक्षिणेन वैश्वदेवपर्वणाहं यक्ष्ये तत्र मे त्वं ब्रह्मा होता अध्वर्युराग्नीध्रो भवेति प्रत्येकं वरणम् ततो यथासम्भवं तानर्चयेत् · ततोऽध्वर्युः पञ्चभूसंस्कारपूर्वकमाहवनीय-

१) See the paddhati at ४. ५ pag. ३४१. ११. ff. २) वितानसाधनं B.

दक्षिणाग्न्योरैष्टिकवैश्वदेवपर्वार्थमिति विहरणं करोति ततोऽग्न्यन्वाधानम्[१] · ततः शाखाछेदः . संनमनम् शाखापरिवासनं तूष्णीम् शाखामूलान्मलेणोपवेषकरणम् शाखायां पवित्रबन्धनं च · ततो वैश्वदेवपयस्यार्थं वत्सापाकरणम् विश्वेभ्यो देवेभ्यो भागमिति विशेषः · शाखोपगूहनम् · षडासनोपकल्पनम् · ब्रह्मवरणम् °गोत्र °शर्मन्नैष्टिकवैश्वदेवपर्वणाहं यक्ष्ये तत्र भूपतऽइति विशेषः · व्रतग्रहणमत्र वा · प्रणीताप्रणयनम् · परिस्तरणम् · पात्रासादने शूर्पाग्निहोत्रहवणि स्फ्यकपालम् तत्र कपालान्यष्टाविंशतिश्चतुर्विंशतिर्वा चरुस्थाल्यस्तिस्रः शम्याकृष्णाजिनम् उलूखलमुसलम् दृषदुपलम् पात्रीधान्यम् पवित्रछेदनानि पवित्रे शाखोपवेषः संयवनोदकम् दधिस्थाली आज्यं च वेदश्च दोहनचतुष्टयम्[२] दक्षिणार्थे प्रथमजगवः[३] उदक्तृणमश्रिः[४] विंशतिकाष्ठक इध्मः कुशप्रसूप्रस्तरेणोपसंनद्धं[५] त्रेधा बर्हिः तत्र पूर्वं त्रीन्पूलकानेकैकेन संनहनेन पृथक्पृथग्बद्ध्वा प्रस्तरमपि पृथग्बद्ध्वा पुनस्तान्सप्रस्तरांस्त्रीनपि दर्भपूलकान्महता एकेन[६] संनहनेनैकत्र बध्नीयात् स्रुवो जुहूः उपभृद्ध्रुवा च द्वे प्राशित्रहरणे शृतावदानम् मेक्षणं च वाजिनभाण्डम् चतस्रः पात्र्यः योक्त्रम् सूनकुशाश्च पक्षे परिधयः मन्थनचतुष्टयम् तत्राधरारणिः प्रमन्थः शकलं द्वे तृणे च कुशास्तीर्णपीठम्[७] इडापात्री षडवत्तं च अन्तर्धानकटः पूर्णपात्रम् कर्मापवर्गा च [समित्][८] क्षुरचतुष्टयं च पक्षे तत्र क्षुरः नवकुशतृणानि[९] श्येणी शलली आपश्चेति क्षुरचतुष्टयम् · ततः स्फ्योपहितपात्रीकरणम् शूर्पाग्निहोत्रहवण्योरादानम् वाग्यमनम् प्रतपनम् गमनम् पात्रीबिले जपः · नानावीजपक्षे उरु वातायेत्युभयोः प्रेक्षणम् उभयोरपद्रव्यमादाय तन्त्रेण निरसनम् अन्यतरस्मिन्नपद्रव्याभावे तस्याभिमर्शनम् उभयोरपद्रव्याभावे पृथक्पृथङ्मन्त्रेणाभिमर्शनम् ततो यज्ञस्तामित्यालम्भनं भेदेन । ब्रह्मणे अग्नये जुष्टम् [पुरो-

---

१) आहवनीयाग्निस्थाने भूसंस्कारः ऐन्द्र्यर्थमिति द्वयोरुद्धरणम् अग्न्यन्वाधानं त्रिषु B.
२) i. e. शाखा उखा पवित्रं दोहनपात्रं च B. ३) ऋषभः marg. प्रथमजो गौः B. ४) ? उदक्तृणाम° १. उदक्तृणमश्रिः B. See pag. ११०, १७. where I now prefer this same reading. ५) ? कुशाप्रस्वप्र° १. कुशप्रस्वप्र° B. ६) ? एकैकेन १. ७) होतृपीठं B.
८) deest in १, but see pag. ११०,२१. ९) Thus B. नवकुशात्° १.

डाशः] सोमाय जुष्टम् चरुः सवित्रे जुष्टम् पुरोडाशः सरस्वत्यै जुष्टम् चरुः पूष्णे जुष्टम् पिष्टानां चरुः मरुद्भ्यः स्वतवोभ्यो[1] जुष्टम् पुरोडाशः अथवा मरुद्भ्यो जुष्टमिति देवताविकल्पः द्यावापृथिवीभ्यां जुष्टम् पुरोडाशः · एवं सप्त हवींषि गृहीत्वा भूताय त्वेति शेषाभिमर्शनं भेदेन कुर्यात् · प्राडीक्षणम्[2] उत्थानम् उत्तरतो गमनम् हविरासादनम् पवित्रकरणम् · प्रोक्षण्युत्पवनम् सव्यहस्ते कृत्वा दक्षिणेनोदिङ्गनम् प्रोक्षणीनामिव प्रोक्षणम् ब्रह्मन्हविः प्रोक्षिष्यामीति प्रैषः प्रोक्षेत्यनुज्ञातः अग्नये त्वा जुष्टम् सोमाय त्वा जुष्टम् सवित्रे त्वा जुष्टम् सरस्वत्यै त्वा जुष्टम् पूष्णे त्वा जुष्टम् मरुद्भ्यः स्वतवोभ्यस्त्वा[3] जुष्टम् अथवा मरुद्भ्यस्त्वा जुष्टम् द्यावापृथिवीभ्यां त्वेति हवींषि प्रोक्ष्य दैव्यायेति सर्वाणि पात्राणि प्रोक्षति · ततोऽसंचरे[4] प्रोक्षणीनां निधानम् कृष्णाजिनादानम् अवधूननम् प्रत्यग्ग्रीवस्यास्तरणम् सव्याशून्यऽउलूखलनिधानम् · पुरोडाशसम्बन्धिनां यवानामावपनम् मुसलादानम् मुसलावधानम् कण्डनादि फलीकरणान्तं कण्डनम् तुषास्तु तावत्स्याप्यन्ते · ततश्चरुसम्बन्धिनां व्रीहीणां मन्त्रेणोलूखलावपनम्[5] स इदमिति मुसलावधानम् अस्मिन्नवसरेऽध्वर्युयजमानयोर्वाग्विसर्गः वितुषीकरणम् शूर्पमात्रमेव प्रति त्वेति हविरुद्वपनादि स्थापितान्पूर्वांस्तुषानेकत्र कृत्वा सहैव तुषनिरसनम् भेदेन वा निष्पवनादि फलीकरणान्तं भेदेन पात्र्यामोप्याभिमन्त्रणादि कणनिधानान्तं कण्डनम् · व्रीहिमयपुरोडाशपक्षे पुरोडाशार्थचर्वर्थांश्च तण्डुलान्विभज्य तेषामालम्भनम् इदमग्नेः सवितुः पूष्णो मरुतां स्वतवसाम्[6] अथवा मरुताम् द्यावापृथिव्योश्च इदं सोमस्य सरस्वत्याश्च · ततोऽग्नीधः कपालोपधानम् अध्वर्योः पेषणम् · आग्नेयस्याष्टौ कपालानि तत एकं चरुस्थानं परिशिष्य सावित्रस्याष्टौ द्वादश वा कपालानि ततश्चरुस्थानद्वयम् ततो मरुद्भ्यः[7] सप्त कपालानि तत उत्तरत एकम् तत्पयस्यास्थानम्[8] ततो द्यावापृथिवीयस्यैककपालम् तच्च पाणिमात्रम् तत्र तपसा तप्यस्वेत्यूहः · उपसर्जन्यधिश्रयणम्

---

1) Thus १. and B. sec. m. °तवद्भ्यो B. pr. m. 2) Thus १! प्राडोक्षणादि प्राकृतं B. We expect प्राशो°; see २.१.११. 3) Thus १. °तवद्भ्यस्त्वा B. 4) ततः ऽसंचरे १. See २.३.४०. 5) °म्बन्धिनामुलूखले अग्नेस्तनूरावपनम् B. see २.४.६. 6) Thus B. also. 7) मरुद्भ्यः स्वतवद्भ्यः B. 8) ? ततोत्तरत एकं । ततः पयस्यानं । १.

यजमानस्याज्यनिर्वापो वेदबन्धश्च · प्रोक्षणान्ते उपसृष्टादिपरिक्षालनान्तो दोहः · तत ईक्षणादि .नानाबीजे उभयोरीक्षणम् · ईक्षणानन्तरं पूष्णः पिष्टानि पृथक्कृत्यालम्भः[१] इदमग्नेः सवितुर्मरुतां स्वतवसाम्[२] अथवा मरुताम् द्यावापृथिव्योश्च इदं पूष्णः पिष्टानि पृथक्कृत्यालम्भः[३] इदं सोमस्य इदं सरस्वत्याः · ततः पात्र्यां पिष्टान्योप्य चरुपात्रे पवित्रं कृत्वा चर्वोः संवापः त्रिः प्रक्षालनम् · पूष्णश्चरोः पिष्टानां स्थाल्यामावापः प्रक्षालनाभावोऽर्थलोपाद्विरोधाच्च · तत उपसर्जन्यानयनादि · सर्वचरुषु भेदेनोपसर्जनीनां निनयनं क्रमेण · ततः पिष्टसंयवनम् · विभज्यालम्भः इदमग्नेः इदं सवितुः इदं मरुतां स्वतवसाम्[४] अथवा मरुताम् इदं द्यावापृथिव्योः · सवितुः पुरोडाश[५] इतरापेक्षया महान्कार्यः स वै वर्षिष्ठः पुरोडाशो भवतीति श्रवणात् । ततः सर्वेषां क्रमेणाधिश्रयणादि चरूणां प्रथनाद्विरभिमर्शनयोरभावः · पयोवर्जं पर्यग्निकरणम् श्रपणम् चरूणामधस्ताद्रूपणादानम् नोपरि पयस्यायाश्च · तप्ते पयसि दधिप्रक्षेपः · मा भेरित्यालम्भः · शृताभिवासनं पुरोडाशानामेव · न चरूणाम् · आज्योदकनिनयनम् । वेदिमानादिप्राणदानान्ते विशेषः · सर्वाणि संनहनानि विसज्य[६] श्रोणौ निधेयानि · शृतावदानानन्तरं[७] मेक्षणस्य संमार्गप्रतपने · ततो वाजिनभाण्डस्य संमार्गः केचिदस्य संमार्गं नेच्छन्ति उपदेशातिदेशाभावात् · तत्रस्याभिघारमदत्त्वा वा वाजिननिषेकः ततोऽभिघारादि · प्राणदाने अग्निं गच्छ सोमं गच्छ सवितारं गच्छ सरस्वतीं गच्छ पूषणं[८] गच्छ मरुतः स्वतवसो[९] गच्छ अथवा मरुतो गच्छ विश्वान्देवान्गच्छ द्यावापृथिव्यौ गच्छ वाजिनो गच्छेति · प्राणदानानन्तरं द्यावापृथिवीयस्याज्येनान्ताच्छादनम् उत्करे वाजिनस्यासादनम् आलम्भश्च[१०] । हवींष्यासाद्यालभ्यात्मानमालभ्यापः स्पृष्ट्वाग्निमन्थनं करोति · तत्राग्नेर्जनित्रमसीति (५. २) शकलं गृहीत्वा तूष्णीं वेदिमध्यऽउदगग्रं निदधाति · ततो वृषणाविति दर्भतृणे प्रागग्रे निदधाति · तत उर्वश्यसीति तयोस्तृणयोरुपर्यधरारणिमुत्तराग्रां

१) ईक्षणान्ते पूषपिष्टं प°म्भः B. २) Thus B. also. ३) इदं पूष्णः ततस्तण्डुलानां विभज्यालम्भः B. ४) Thus B. also. ५) °डाशो १. ६) i. e. विस्रंस्य see २. ७. २२. ७) पात्रप्रतपने शृतावदानम् मेक्षणम् वाजिनभाण्डमिति B. see २. ६. ४१. ८) Thus १. B. ९) Thus B. also. १०) आसादनक्रमेणालम्भः B.

निदधाति · तत आयुरसीति प्रमन्थमुखेन स्थालीस्थमाज्यं स्पृष्ट्वा पुरूरवा इति तीर्थस्योपरि प्रमन्थं निदधाति[1] · ततश्चात्रफलकस्योपर्यौवीलीमुदगग्रां[2] निधाय कश्चिदन्यो यत्नं धारयति ॥ ॥१॥

इति पञ्चमस्य प्रथमा कण्डिका ॥ ॥

अग्नये मथ्यमानायानुवाचयति ॥१॥ अनुवाचनं होत्रा कारयति · अत्राहापस्तम्बः अग्नये मथ्यमानायानुब्रूहीति सम्प्रेष्यति मथ्यमानायानुब्रूहीति वेति ।

मन्थति गायत्रेणेति (५.२) प्रतिमन्त्रं त्रिः प्रदक्षिणम् ॥२॥ अध्वर्युः ।

जाते जातायेति ॥३॥ अग्नौ जाते जातायानुब्रूहीत्यनुवाचयति ।

प्रह्रियमाणायेति प्रास्यन् ॥४॥ आहवनीयेऽग्नौ जातस्याग्नेः प्रक्षेपं करिष्यन्प्रह्रियमाणायानुब्रूहीत्यनुवाचनं होत्रा कारयति ।

भवतं न इति (५.३) प्रास्यति ॥५॥ अत्र यज्ञपतिशब्दोऽनेकयजमानके विपरिणम्यते यज्ञपती यज्ञपतीन् ।

अग्नावग्निरिति (५.४) जुहोति स्थाल्याः स्रुवेण ॥६॥ प्रक्षिप्तस्याग्नेरुपरि स्थाल्याः सकाशात् आज्यं जुहोति · इदमग्निभ्यामिति त्यागः ॥ एवमन्तमग्निमन्थनम् । ततो होतुरामन्त्रणादि ·

नवप्रयाजं नवानुयाजम् ॥७॥ वैश्वदेवं भवति (२.५.१.२०) । अत्र च पञ्चमप्रयाजस्याभ्यासेन नवसंख्या पूरणीया उत्पन्नशिष्टत्वात् ततश्च पञ्चमषष्ठसप्तमाष्टमनवमानां पञ्च ममेत्यनेनैवानुमन्त्रणम् पञ्चमस्य स्थाने होम इति · पञ्चमस्येदं बार्ह इति त्यागः इदमुषासानक्ताभ्यामिति षष्ठस्य इदं दैव्याभ्यां होतृभ्यामिति सप्तमस्य इदं तिसृभ्यो देवीभ्य इत्यष्टमस्य नवमस्य तु अग्न्यादिसर्वदेवताभ्यो याज्यामध्ये पठिताभ्य इति ।

वरुणप्रघासा महाहविश्च ॥८॥ उभयत्र तथा श्रुतत्वात् (२.५.२.४१. ४.२) ।

त्रीणि समिष्टयजूंषि जुहोति देवा गातुविदो (८.२१) यज्ञ यज्ञम् (८.२२)

1) विद॰ १. 2) ॰त्रकलकस्यौपर्यौपवीलीमुदगग्रां १.

एष तऽइति (८. २२) ॥ ९ ॥　त्रयाणां क्रमेण इदं वाताय इदं यज्ञाय इदं यज्ञपतयऽइति त्यागाः । अत्राभ्यासेन संख्यापूरणम् उत्पन्नयोगात्संख्यायाः । अनेकयजमानके चोहः यज्ञपती गह यज्ञपतीन्गाह एष वां यज्ञो यज्ञपती ॰तं जुषेथाम् एष वो यज्ञो यज्ञपतयः ॰तं जुषध्वम् इति च ।

पशौ च ॥ १० ॥　त्रीणि समिष्टयजूंषि जुहोति । विकल्पेन मन्त्रान्तरमाह ·

याँ२॥ऽआवह[1] इति (८. १९) वा पशौ ॥ ११ ॥　यां आवह इत्यादिभिर्वा त्रिभिर्मन्त्रैः (८. १९-२१) · अत्र पूर्वयोरिदमग्नयऽइति तृतीयस्येदं वातायेति [त्यागः] ।

एकं वा वैश्वदेवे ॥ १२ ॥　[यद्वा] वैश्वदेवे पर्वणि एकं समिष्टयजुर्जुहोति · तच्च देवा गातुविद इत्यनेन मन्त्रेण (८. २१) · शुनासीरीयेऽप्येकमेव (२. ६. ३. ३)। अत्र तस्य प्रथमजो गौर्दक्षिणेति (२. ५. १. २१) श्रूयते ।

पर्वसᳫस्थासु वपनं वा प्रागन्त्यात् ॥ १३ ॥　पर्वसंस्थासु प्रागन्त्यात्पर्वणस्त्रयाणां संस्थासु समाप्तिषु कर्मापवर्गान्ते यजमानस्य वपनं वा भवति · तत्त्र्येनी[2] शलली भवति लोहः क्षुरस्तेन परिवर्तयतऽइति (२. ६. ४. ५-७) [वैश्वदेवे वरुणप्रघासेषु साकमेधेषु च श्रुतेः] परिवर्तनं च केशश्मश्रूणां वपनं मुण्डनमुच्यते । शाखान्तरसूत्रेषु पौर्णमास्यनन्तरं वपनं विहितम् ·.तथा काठके · मानवे च सद्यः पौर्णमासीं संस्थाप्य केशान्वपति श्मश्रूणीति [तथा] त्रिःश्वेतया शलल्या लोहायसेन क्षुरेण निवर्तयतीति · आपस्तम्बोऽपि श्वो भूते पौर्णमास्या ॰इत्युपोद्य[3] त्र्येण्या शलल्या काण्डेनेक्षुशलाकया वा लौहेन च क्षुरेणौदुम्बरेण केशान्निवर्तयते वपयते श्मश्रूणीति । अथ वपनस्येतिकर्तव्यतामाह ·

अपरेण दक्षिणाग्निं दक्षिणं गोदानमुन्दति सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूं दीर्घायुत्वाय वर्चसऽइति ॥ १४ ॥　दक्षिणाग्नेरपरस्यां दिशि प्राङ्मुखोपविष्टस्य यजमानस्य दक्षिणं गोदानम् शयनकाले गवि पृथिव्यां दीयते निधीयते स्थाप्यतऽइति गोदानम् दक्षिणकर्णसमीपवर्तिनं शिरःप्रदेशमित्यर्थः

---

१) यां२ आवह १. २.　२) तत्त्र्येणी २.　३) ? ॰ष्या प्रमूतर्नास इत्युपोद्य २.

तमुन्दति उन्दी क्लेदने अद्भिः क्लेदयति आर्द्रं करोति सवित्रेत्यादिना[1] मन्त्रेणोदङ्मुख उपविष्टोऽध्वर्युः ।

त्र्येण्या शलल्या विनीय त्रीणि कुशतरुणान्यन्तर्दधात्योषधऽइति (४. १) ॥ १५ ॥ त्र्येण्या शलल्या क्लिन्नान्केशान्विनीय पृथक्कृत्य विश्लथान्कृत्वा[2] त्रीणि कुशानि दर्भतृणान्यन्तर्दधाति । त्रिषु स्थानेषु एनी श्वेता कर्बुरा त्र्येणी[3] शलली सेधाशलाका श्वाविद्रोम · त्रिः श्वेतयेति सूत्रान्तरात्[4] · वर्णादनुदात्तात्तोपधात्तो न इति (पा° ४. १. ३९) ङीप् तकारस्य च नकारः एतशब्दः कर्बुरवर्णवाची अनुदात्तान्तस्तोपधः ।

त्र्यायुषमिति (३. ६२) यजमानो जपति ॥ १६ ॥ स्वरेण ।

शिवो नामेति (३. ६३) लोहक्षुरमादाय निवर्तयामीति (३. ६३) वपति ॥ १७ ॥ अध्वर्युः लोहक्षुरं लोहेन ताम्रेण परिष्कृतमयोमयमेव क्षुरं हस्तेन गृहीत्वा कुशतृणान्तर्हितान्केशांश्छिनत्ति · तृणानामपि छेदनं कर्तव्यम् सकेशानि प्रछिद्येति (पारस्कर २. १) क्वचिद्दर्शनात् । लोहमत्र ताम्रमुच्यते लोहित इवाग्निरिति वचनात् (२. ६. ४. ५) · तद्वान् लोहः लोहपरिष्कृतः मरुदेशे तादृशस्यैव[5] प्रसिद्धत्वाद्वपनसामर्थ्याच्च लोह इति मतुब्लोपेन निर्देश इति हरिस्वामिनः ।

एवं पश्चादुत्तरतश्च ॥ १८ ॥ यथा दक्षिणगोदानस्योन्दनादि वपनान्तमुक्तम् एवं पश्चाद्गोदाने शिरसः पश्चात्प्रदेशे उत्तरगोदाने उत्तरस्मिञ्छिरःप्रदेशे · जपक्षुरादानयोरभावः कृतत्वात् ।

गृहेषु पौर्णमासं समारूढनिर्मथितयोस्तथा चेत् ॥ १९ ॥ ततः पर्वकरणप्रदेशादागत्य[6] गृहेषु समा°तयोः अग्न्योः पौर्णमासं कर्तव्यम् · चेद्यदि तथा कृतं भवति समा°तयोः पर्व कृतं[7] भवति तदा पर्वसमाप्त्यनन्तरं समा°तयोः पौर्णमासं कर्तव्यम् नान्यथेत्यर्थः । तत्र चतुर्णां पर्वणां मध्ये वरुणप्रघासाः साकमेधाश्चोदवसाय समा°तयोः क्रियन्ते · तथा गृहानित्वा निर्मथ्याग्नी पौर्णमासेन यजतऽइति वरुणप्रघासान्ते (२. ५. २. ४८) साकमेधान्ते (२. ६. २. १९) च श्रुतम् न

1) See Pâraskara २. १. 2) ? विवरान्कृत्वा २. 3) Thus Ss. त्र्येनी २. and the Brâhmaṇa throughout. 4) the Mânavam, see at १३. 5) ?? मरुद्देशे ताद° २. 6) ? पर्वकर्णप्र° २. पर्वदेशादा° Ss. 7) Thus Ss. पूर्वकृतं २.

वैश्वदेवशुनासीरीययोरन्ते · अतो वरुणप्रघाससाकमेधसमाप्त्यनन्तरमेवाग्नी समारोह्य गृहमागत्य मथित्वा तत्कालमेव सद्यः पौर्णमासं कर्तव्यम् वैश्वदेवान्ते प्राचीनप्रवणाद्गार्हपत्यमेव स्वस्थाने नीत्वा पौर्णमासेष्टिः कर्तव्या साकमेधानन्तरं समारोह्य निर्मथ्य तत्रैव शुनासीरीयं कृत्वा गार्हपत्यं स्वस्थानमानीय पौर्णमासं कर्तव्यम् · फाल्गुन्युद्दिष्टे शुनासीरीययागेऽप्येवमेव पक्षान्तरेषु शुनासीरीयान्ते पौर्णमासस्य प्रसङ्ग एव नास्ति ।

प्रजाकामस्यापि वैश्वदेवम् ॥ २० ॥ पर्व केवलं भवति ।

एकेऽधःप्राङ्शायी मध्वाश्यृतुजायोपायी मांसस्त्र्यनृतानि वर्जयेदुदकाभ्यवायं च प्रागवभृथात् ॥ २१ ॥ एके शाखिन एवमाहुः · चातुर्मास्ययाजी वैश्वदेवानन्तरं यजमानोऽधःप्राङ्शायी स्यात् अध इति खरस्थिताग्न्यपेक्षया नीचः न वनास्तृतायां भूमौ प्राक्शिरा शेते · मधुना मिश्रान्नमश्नीयात् · ऋतुकाल एव जायां स्वभार्यामुपगच्छेत् नान्यथा अथवा ऋतुकाले जायामुपेयादेव न कदाचित्प्रमादान्नोपेयात् · चातुर्मास्यपर्यन्तमेते नियमा भवन्ति · उदकमध्ये प्रवेशं च [वर्जयेत्] प्रागवभृथात् वरुणप्रघासान्ते ह्यवभृथो भवति · [एके-ग्रहणात्सर्वस्य विकल्पः]। केचिदेक इत्येतत्प्रजाकामस्यापि वैश्वदेवमित्यनेन योजयन्ति · तेषां मतेन एषां नियमानां] नियोगतोऽनुष्ठानं भवति · एतेन वै प्रजापतिरित्यस्यां कण्डिकायां (२.५.१.२२) हरिस्वामिभिरेवं व्याख्यातम् स यः प्रजाकाम[इत्यादि श्रुतेः (२.५.१.७)] प्रजाकामस्य पृथगेव वैश्वदेवं भवतीत्येके मन्यन्तऽइति सूत्रकार आह उत्तरैश्च पर्वभिः सहैकवाक्यतादर्शनादुत्तरेष्विव समुदायान्तर्गतस्यैवापृथग्भूतस्यैतत्फलमिति स्वयं मन्यते इदमेवात्र युक्तम् अन्यथा तु वरुणप्रघासा अपि प्रजानामारोग्याय पृथग्भूता एव स्युः साकमेधाश्च द्विषतां पराजयाय तस्मादयमनुवादमात्रमेतदिति[1] [मन्यतऽइति]। तथा चाहापस्तम्बः तस्य पर्वस्वन्तरालव्रतानि न मांसमश्नाति न स्त्रियमुपैत्यृतौ वा जायाम् नोपर्यास्ते जुगुप्सतेऽनृतात् प्राङ् शेते मध्वश्नाति मध्वशनः स्यादित्येकम् व्यञ्जनार्थमित्यपरम् ऋतुयाज्यन्यश्चातुर्मास्ययाज्यन्यो वसन्तोऽभूत्प्रावृडभूच्छरदभूदिति यजते स ऋतुयाजी अथ यश्चतुर्षु-चतुर्षु

1) एतत् refers to २.५.१.७.

मासेषु स चातुर्मास्ययाजी वसन्ते वैश्वदेवेन यजेत प्रावृषि वरुणप्रघासैः शरदि साकमेधैरिति विज्ञायते · काठके च ब्रह्मचारिव्रतो भवत्या समापनादधःशायी माꣳसꣳ स्त्रियश्च वर्जयेत्काममृतौ जायामुपेयादिति लामकायनिनां ब्राह्मणमिति · मानवे च चतुरो मासान्न माꣳसमश्नाति न स्त्रियमुपैति नोपर्यास्ते जुगुप्सेतानृतात्प्राङ् शेते मधश्नात्यृतौ भार्यामुपैतीति ॥ ॥ द्वितीया कण्डिका ॥ २ ॥

अथ पद्धतिः ॥

ततश्चात्रं नेत्रेण त्रिरुद्वेष्टयाध्वर्युरग्नये मथ्यमानायानुब्रूहीति होतारं प्रत्युक्त्वा गायत्रेणेति (५. २) प्रतिमन्त्रं त्रिः प्रदक्षिणं मन्थति · तत ऊर्ध्वं प्रदक्षिणं चाप्रदक्षिणं चाग्निजन्मपर्यन्तं मन्थति · अग्नौ जाते जातायानुब्रूहीति होतारं प्रेष्यति[1]· तत आयं हस्तेनेति[2] होत्रोच्यमाने हस्तेनाग्निसंयुक्तेऽरणी गृहीत्वा प्रह्रियमाणायानुब्रूहीति होतारं प्रेष्य भवतं न इत्याहवनीये (५. ३) ऽग्निं प्रक्षिपति · ततः समिधमाधाय तस्मिन्प्रज्वलितेऽग्नावग्नावग्निरिति (५. ४) मन्त्रेण स्थाल्याः सकाशाद्गृहीत्वा स्रुवेणाज्यं जुहोति इदमग्निभ्याम् । ततः एहि होतरित्यामन्त्रणादि · इदमहꣳ सप्तदशेनेत्यववाधनम् · नव प्रयाजाः चतुर्थसप्तमयोः समानयनम् · चतुर्णां प्रयाजानां त्यागा अनुमन्त्रणानि च प्रकृतिवत् · पञ्चमप्रयाजे इदं द्वार्भ्यः पञ्च मम न तस्येति अन्नादो भूयासमिति चानुमन्त्रणे पञ्चमादीनां नवपर्यन्तानां सर्वेषाम् षष्ठे इदमुषासानक्ताभ्याम् सप्तमे इदं दैव्याभ्यां होतृभ्याम् अष्टमे इदं तिसृभ्यो देवीभ्यः नवमे इदमग्नये सोमायाग्नये सोमाय सवित्रे सरस्वत्यै पूष्णे मरुद्भ्यः स्वतवोभ्योऽथवा मरुद्भ्यो विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां देवेभ्य आज्यपेभ्यो वाजिभ्यश्च न मम पञ्च ममेत्यादि पूर्ववत् · प्रत्येत्य वाजिनान्तानां हविषां प्रयाजशेषेणाभिघारणम् · तत आज्यभागौ । प्रधानयागे अग्नयेऽनुब्रूहि अग्निं यज इदमग्नये १ सोमायानुब्रूहि[3] सोमं यज इदꣳ सोमाय २ सवित्रे उपांशु अनुब्रूहि[4] सवितारम् उपांशु यज इदꣳ सवित्रे ३ सरस्वत्या अनुब्रूहि[5] सरस्वतीं

1) प्रेषयति १. 2) see शाङ्खायन ३. १३. २८. 3) Thus ५. °ब्रूहि इहि १. 4) अनुब्रू॒इहि १. अनुब्रू३हि ५. (pluta!). 5) °ब्रूइहि १. here and in all the following cases; of course °ब्रू३हि is meant, but I see no reason for the प्लवनम् ·

यज्ञ इदꣳ सरस्वत्यै ४ पूष्णोऽनुब्रूहि पूषणं[1] यज्ञ इदं पूष्णो ५ मरुद्भ्यः स्वतवोभ्यो ऽनुब्रूहि मरुतः स्वतवसो यज्ञ इदं मरुद्भ्यः स्वतवोभ्यः अथवा मरुद्भ्यो ऽनुब्रूहि मरुतो यज्ञ इदं मरुद्भ्यः ६ इदं विश्वेभ्यो देवेभ्यः उपांशु अनुब्रूहि विश्वान्देवान् उपांशु यज्ञ इदं विश्वेभ्यो देवेभ्यः ७ द्यावापृथिवीभ्याम् उपांशु अनुब्रूहि द्यावापृथिव्यौ उपांशु यज्ञ इदं द्यावापृथिवीभ्याम् ८ · द्यावापृथिवीयः सर्वहुतः कार्यः अप[र्या]वर्तनं च[2]। अग्नये स्विष्टकृतऽइत्यादि · सप्तकपालस्य पयस्यायाश्च चतुर्धाकरणभागानामभावः अन्येषां सर्वं[3] भवति · समस्य मार्जनम् · दक्षिणालम्भे ऊर्गसीत्यस्य स्थाने प्रथमजो गौरसीत्यूहः अस्यैष्टिकवैश्वदेपर्वणः समृद्ध्यर्थं प्रथमजं गां दक्षिणां ब्रह्मणे इत्यादि ब्राह्मणा अयं वः प्रथमजो गौः प्रतिगृह्णीतेति द्यौस्त्वा ददात्विति प्रतिग्रहमन्त्रः। अनुयाजा नव · चतुर्थे सप्तमे चोपभृतः समानयनम् · प्रथमस्य पूर्वार्धे होमः इदं देवाय बर्हिषे १ द्वितीयप्रभृतिनाराशंसान्तानां मध्ये होमः अन्त्यस्य पश्चाद्धोमः · द्वितीये इदं देवीभ्यो द्वार्भ्यः २ इदं देवीभ्यामुषासानक्ताभ्याम् ३ इदं देवीभ्यां जोष्ट्रीभ्याम् ४ इदं देवीभ्यामूर्जाहुतिभ्याम् ५ इदं देवाभ्यां दैव्याभ्यां होतृभ्याम् ६ इदं देवीभ्यस्तिसृभ्यस्तिसृभ्यो देवीभ्यः ७ इदं देवाय नराशꣳसाय ८ इदं देवायाग्नये स्विष्टकृते ९ · ततो धारानुयाजः इदं देवेभ्यः। स्रुचोरासादनम् · व्यूहने अग्नेः सोमस्य सवितुः सरस्वत्याः पूष्णो मरुताꣳ स्वतवसाम् अथ वा मरुताम् विश्वेषां देवानां द्यावापृथिव्योरुज्जितिम °मि अग्निः सोमः सविता सरस्वती पूषा मरुतः स्वतवसः अथवा मरुतः विश्वे देवा द्यावापृथिव्यौ तमपनुदन्तु° उपांशुदेवतानामुपांशूच्चारणम् अन्येषामुच्चैः। प्रस्तरहोमे इदमग्नये सोमायाग्नये सोमाय सवित्रे सरस्वत्यै पूष्णो मरुद्भ्यः स्वतवोभ्यः अथवा मरुद्भ्यो विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यां देवेभ्य आज्यपेभ्योऽग्नये होत्राय वाजिभ्यश्चेति · सह शाखया प्रस्तरानुप्रहरणम् · ततस्तृणं प्रास्यात्मानमालभ्यापः स्पृष्ट्वा वाजिनेन यागः कार्यः · तत्र वेदिमध्ये जुहूं[4] निधाय वाजिनस्थालीमुखेनैव बर्हिषि स्कन्दनं कुर्वन् जुह्वां वाजिनस्य निनयनं करोति · ततोऽनुवाचनम् वाजिभ्योऽनुब्रूहीति · उत्थायातिक्रम्याश्राव्य वाजिनो

---

१) Thus १. B. २) See schol. at ४. ६. ४. ३) ? सव १. ४) ? जुह्वां १.

यजेति प्रैषः · अग्नेः पूर्वार्धे होमः स वै प्रागेवाग्ने जुहोतीति श्रुतेः (२. ४. ४. २३) · अनुवषट्कारेऽपि पूर्वार्धऽएव होमः स वै प्रागेव जुहोतीति श्रुतेः (२. ४. ४. २३) · तत उत्तरत उपविश्य स्रुक्स्थेन वाजिनशेषेण दिशो व्याघारयति दिशः स्वाहा अग्नेः पूर्वभागे इदं दिग्भ्यः प्रदिशः स्वाहा दक्षिणतः इदं प्रदिग्भ्यः आदिशः स्वाहा पश्चात् इदमादिग्भ्यः विदिशः स्वाहा उत्तरतः इदं विदिग्भ्यः उद्दिशः स्वाहा अग्निमध्ये इदमुद्दिग्भ्यः दिग्भ्यः स्वाहा पूर्वार्धे इदं दिग्भ्यः · ततो बहिर्गत्वा स्रुच्यवशिष्टं वाजिनशेषं भक्षार्थं हस्ते कृत्वा होता अध्वर्यऽउपह्वयस्व[1] ब्रह्मन्नुप° अग्नीदुप° यजमानोपह्वयस्वेत्येवं कर्मसम्बन्धिभिर्नामभिरेतान्पृष्ट्वा · उपहूत इति तैरनुज्ञातो भक्षयति · ततोऽध्वर्युर्वाजिनमादायैवमेव होतारं ब्रह्माणमग्नीधं यजमानं च पृष्ट्वा ऋतूनां त्वा वाजिनामिति मन्त्रेण तं वाजिनशेषं भक्षयति वाज्यहं वाजिनस्येति वा वाजे वज्रीति वा · ततो ब्रह्मा होतारमध्वर्युमग्नीधं यजमानं च पृष्ट्वा भक्षयति · ततोऽग्नीद्धोतारमध्वर्युं ब्रह्माणं यजमानं च पृष्ट्वा भक्षयति · ततो यजमानो वाजिनं हस्ते कृत्वा होतारमध्वर्युं ब्रह्माणमग्नीधं च पृष्ट्वा ऋतूनामिति भक्षयति · मन्त्रास्तु सर्वेषां पूर्वोक्ता एव · अथवा यजमानः प्रथमो भक्षयति उत्तमश्च अस्मिन्पक्षे सर्वैः यजमानः पूर्वं पश्चाच्च वारद्वयं प्रष्टव्यः यजमानोपह्वयस्व होतरुपह्वयस्वेत्येवम् · ततः संवदस्वेत्यादि · स्रुग्विमोकानन्तरं वा वाजिनयागः परिधिभिः संहोपवेषहोमः । एकं समिष्टयजुः त्रीणि वा · अस्मिन्पक्षे देवा गातुविदो यज्ञ यज्ञम् एष तऽइति त्रयाणां क्रमेण मन्त्राः इदं वाताय इदं यज्ञाय इदं यज्ञपतयऽइति क्रमेण त्यागाश्च । नमः कृतायेति कर्मापवर्गान्ते वपनं वा · तत्र वपनपक्षे दक्षिणाग्निमपरेण प्राङ्मुखं यजमानमुपवेश्य स्वयमुदङ्मुखो यजमानस्य दक्षिणं गोदानं मस्तकस्य दक्षिणं प्रदेशं सवित्रा प्रसूता इत्यनेनाद्भिरार्द्रं करोति · ततस्त्र्येण्या शलल्या कतिपयकेशान्पृथक्कृत्वा त्रीणि कुशतृणान्यन्तर्दधाति ओषधऽइति · ततस्त्र्यायुषमिति यजमानो जपति · ततः शिवो नामेति ताम्ररचितं क्षुरमादाय निवर्तयामीति केशांश्छिनत्ति · एवं पश्चात् एवमेवोत्तरतः तत्र तु त्र्यायुषमिति[2] जपस्य क्षुरा-

1) अध्वर्ड उप° १. 2) ? ततःस्त्र्यायु° १.

दानस्य चाभावः · ततो नापितो वपनं करोति । ततः शतं ब्राह्मणान्भोजयेत् चातुर्मास्येषु चत्वारि शतं-शतं पर्वणि-पर्वणीति परिशिष्टात् · अस्य हैष्टिकवैश्वदेवपर्वणः समृद्ध्यर्थं यथासम्पन्नेन तृप्तिपर्यन्तभोजनपर्याप्तेनान्नेन शतं ब्राह्मणानहं तर्पयामीति संकल्पः · ततः सद्यःपक्षेण पौर्णमासेष्टिः · ततः पश्वादिकर्म · ततो वैश्वदेवादि नित्यं कर्म · ततो भोजनम् । अकृतवाससां वरुणप्रघासार्थे यत्नेन रक्षणम् नाशादावन्येऽप्यकृते ग्राह्ये । प्रजाकामस्यापि केवलं वैश्वदेवं पर्व भवतीति केचित् नेत्यपरे । अथ यजमानश्चातुर्मास्यसमाप्तिं यावत् भूमौ प्राक्शिराः शयीत मधश्नीयात् ऋतुकाले स्त्रियं गच्छेदेव मांसं नाश्नीयात् अनृतौ स्त्रियं न गच्छेत् अनृतं न वदेत् · वरुणप्रघासावभृथपर्यन्तमुदकमध्ये प्रवेशमपि वर्जयेत् ॥ ॥२॥

इति पञ्चमस्य द्वितीया कण्डिका ॥ ॥

अधुना वरुणप्रघासानाह ·

आषाढ्यामयं ते योनिरिति (३.१४) समारोह्योदवसाय निर्मथ्य वरुणप्रघासाः ॥१॥ आषाढीशब्देनात्र गौणी प्रतिपदुच्यते ऋतुमुखऽऋतुमुखे चातुर्मास्यैर्यजेतेति शाखान्तरे श्रुतत्वात् न पञ्चदशीति । आषाढ्यामाषाढशुक्लप्रतिपदि · गार्हपत्याहवनीयावग्नी अरण्योः समारोह्य प्रतपनेन अरण्योरारूढौ कृत्वा अर्थादेव पूर्वतरमाहवनीयमुद्धृत्य · उदवसाय स्वस्थानात्प्रांचीनप्रवणे गत्वा उत्पूर्वोऽवस्यतिः प्रदेशान्तरगमने वर्तते · तत्र गार्हपत्यं निर्मथ्य स्थापयित्वा तत आहवनीयदक्षिणाग्नी च विहृत्य वरुणप्रघासाः कर्तव्याः । तत्र प्रथमं गार्हपत्यस्य समारोपः सकृन्मन्त्रेण द्विस्तूष्णीम् तत एवमेवाहवनीयस्य शाङ्खायनसूत्रे (२.१७.२ ४) ऽस्य विशेषस्य दर्शनात् ।

पूर्वेद्युर्दक्षिणाग्नौ निस्तुषामभृष्टयवानां करम्भपात्रकरणम् ॥२॥ पूर्वेद्युर्यजनीयकालात्प्रतिपदः पूर्वस्मिन्दिने पञ्चदश्याम् · निर्मुक्तास्तुषा येभ्यो निस्तुषाः अकृतफलीकरणाः · आमा अपक्वाः भृष्टाः पक्वाः आमाश्च ते भृष्टाश्चामभृष्टा ईषद्भृष्टा इत्यर्थः · करम्भो दध्ना संयुताः सक्तवः तन्मयानां पात्राणां करणम् ।

दक्षिणाग्नेरेवात्र श्रपणत्वात्पात्रासादनमत्र तस्योत्तरत उदक्संस्थं कर्तव्यम् · ग्रहणं तु गार्हपत्यस्य पश्चादेव गृहीतानामासादनं तु दक्षिणाग्नेः पश्चादेव · भर्जनोपधानं त्वध्वर्योरेव दक्षिणाग्नौ विरोधाभावात् पर्यग्निकरणं तु गार्हपत्यादेव गार्हपत्ये संस्कारा इति (१. ८. ३४) वचनात् । पात्रेषु ह्यशनमश्यत ऽइत्यर्थवादाच्चाशनार्थानि पात्राणि भाजनानि भवन्ति तादृशान्येतान्यपि कर्तव्यानि आसादनादौ च पात्रीपूत्तानानि निधेयानि भाजनवदेव ।

यावन्तो यजमानगृह्या एकाधिकानि ॥ ३ ॥ या° य° तावन्ति करम्भपात्राणि ।

प्रजायां वा जातश्रुतेः ॥ ४ ॥ अत्र गृह्यशब्दः प्रजायां वर्तमानो ग्राह्यः न भृत्यभार्यपश्चादौ · या अस्य प्रजा जातास्ता वरुणपाशात्प्रमुञ्चतीति श्रुतेः (२. ५. २. २२) अपत्यानि यावन्ति पुत्रपौत्रपुत्रीपौत्र्यादिरूपाणि न च भृत्याः नात्मा [1] न च बन्धवः न च पुत्र्यः सुवासिन्यः जातत्वेऽप्यगृह्यत्वादिति हरिस्वामिनः ।

त्रीणि वा नित्यवात् ॥ ५ ॥ अनपत्यस्य एकापत्यस्य द्व्यपत्यस्य च त्रीण्येवैकाधिकानि कर्तव्यानि · करम्भपात्राणि कुर्वन्तीति (२. ५. २. १४) बहुवचनस्य नित्यमेव श्रवणात् नित्यं च बहुवचनं त्रिषु ।

मेषमिथुनं च ॥ ६ ॥ तदपि पूर्वेद्युरेव तंत एव निस्तुषामभृष्टयवकरम्भ[शिष]स्येव मेषं मेषाकारं प्रतिरूपकम् मेषीं मेष्याकारां प्रतिकृतिं च करोति · यवमयौ भवत इति श्रुतेः (२. ५. २. १६) । अत्र कठसूत्रम् आमयवपिष्टानां करम्भपात्राणि यावन्तो यजमानस्य पुत्रपौत्रा यजमानः पत्नी च प्रतिषिद्धे ऽएकमधिकम् शृङ्गिणं मेषमशृङ्गीं मेषीम् [2] शुक्लोर्णाभिरावेष्ट्येति · मानवे च विशेषः उत्तरतो गार्हपत्यस्य प्रतिप्रस्थाता आमयवपिष्टानां दध्ना करम्भपात्राणि करोत्येकोर्धान्यङ्गुष्ठपर्वमात्राणि [3] मेषं कृत्वा मेषीं च करोति यावन्ति पुंलिङ्गानि शक्नुयुरन् स्त्रीलिङ्गानि मेष्याः प्रतिप्रस्थाता प्रक्षाल्योर्णाः श्लेषयत इति · आपस्तम्बोऽपि एतस्मिन्काले प्रतिप्रस्थाता तूष्णीं करम्भपात्रार्थान्यवान्निर्वपति यजुषाध्वर्युर्नि-

1) Thus २. if नामात्याः? 2) °मशृंगां मेषीं च paddh. (५. ४) 3) करोत्यंगु°ष्ठाण्येकोर्ध्वानि paddh. (५. ४)

षार्थान् मेष्यर्थान्प्रतिप्रस्थाता तयोरग्निप्रावर्द्देवतम् आमपिष्टयवानां पत्नी करम्भपात्राणि करोति यावन्तो यजमानस्यामात्याः सस्त्रीकास्तावन्त्येकातिरिक्तानि आमपेष्याणां[1] मेषप्रतिकृती भवतो मेषमध्वर्युः करोति मेषीं प्रतिप्रस्थाता स्त्रियाः स्त्रीव्यञ्जनानि पुंसः पुंव्यञ्जनानि अपि वा पूर्वेद्युरन्वाहार्यपचने वितुषानिव यवान्कृत्वा तेषामीषदुपतप्तानां पत्नी करम्भपात्राणि करोत्यत्रापि मेषं च मेषीं च करोतीति वाजसनेयकम्[2] ऐन्द्राग्नपर्यन्तानधिश्रित्यैकादशसु कपालेषु मेषीमधिश्रयति अष्टासु मेषं कुम्भीपक्वौ वा भवत इति । एतेषां कठादीनां वारुणप्रघासिकहविर्ग्रहणकालऽएवैन्द्राग्ननिर्वापानन्तरं करम्भपात्रादीनां निर्वपणं विहितमस्ति माध्यन्दिनानां त्वथ पूर्वेद्युरिति (२. ५. २. १४) वचनात्पूर्वेद्युरेव । तत्र करम्भपात्रमेषीकरणं प्रतिप्रस्थातुः मेषकरणमध्वर्योः · पूर्वं तूष्णीं करम्भपात्रार्थानां यवानामेकाधिकापत्तिसंख्यानां[3] चतुर्मुष्टिकानां ग्रहणम् करम्भपात्राणि जुहोतीति (५. ५. ११) जुहोतिवात्तूष्णीम् ततो वरुणाय जुष्टमिति मन्त्रेणाध्वर्योर्मेषार्थानाम् ततो मरुद्भ्यो जुष्टमिति प्रतिप्रस्थातुर्मेष्यर्थानाम् · पृथक्पृथगुपयुक्तानि पात्राण्यासाद्योर्णाप्रक्षेपणान्तं मेषमेष्योः समन्त्रकं सर्वं यथास्वमध्वर्युप्रतिप्रस्थातृभ्यां कर्तव्यम् · तत्र प्रतिप्रस्थात्रा करम्भपात्रमेषीसाधारणाः पदार्थाः समन्त्रकाः कर्तव्याः शूर्पाग्निहोत्रहवण्यादानाद्यासादनान्ताः[4] कण्डनश्रपणपेषणासंयवनान्ताश्च करम्भपात्राणां यदसाधारणम् ग्रहणं प्रोक्षणमभिमर्शनाधिश्रयणाद्यालम्भनान्तं च तूष्णीमेव कुक्कुटाहननं चात्र न भवत्येव · अदृष्टार्थवपक्षे न प्रणीताप्रणयनम् यदा सर्वार्थत्वसंयवनार्थत्वपक्षस्तदा प्रणीताप्रणयनं भवत्येव · तत्र सर्वार्थत्वपक्षे अपां दध्नश्च समन्त्रकं प्रणयनम् ब्रह्मन्नब्दधिनी प्रणेष्यामीति चोदः संयवनार्थत्वपक्षे च केवलस्य दध्नः तत्र ब्रह्मन्दधि प्रणेष्यामीत्येतावदेव । अत्र पूर्वेद्युरग्नी समारोह्योदवसाय निर्मथ्य वरुणप्रघासार्थमाहवनीयदक्षिणाग्नी विहृत्य समन्त्रकमग्न्यन्वाधानं ब्रह्मवरणं च कृत्वा यजमान वाचं

---

१) ? Thus paddh. (५.४) · आपेषाणां २· आमयवाणां २· २) ? कुर्वतीतिवा° paddh. (५. ४)· °तीति । वाजस° २· A marginal gloss inserts अत्रापि before वाज° ३) ? °पत्यसंख्यानां २· ४) ? °ण्यादानादेद्यासा° २·

यहेति चोक्ताध्वर्युप्रतिप्रस्थातृभ्यां यथास्वं पात्रासादनाद्यास्योदकनिनयनादर्वाक्सर्वं कर्तव्यम् आस्योदकनिनयनं तु प्रातस्तनपाय्यङ्गुलिप्रक्षालनेन सह कर्तव्यम् नाद्य ।

अनेडकीर्णाः प्रक्षाल्याश्लेषयेत्तयोः ॥७॥ एडको नाम दक्षिणापथे मेषाकृतिः पशुः एडकस्येमा ऐडक्यः न ऐडक्यः अनेडक्यः अनेडकीर्णाः मेषरोमाणि[1] प्रकर्षेणाद्भिः क्षालयित्वा तयोः मेषमेष्योः पिष्टमययोः शरीरे आश्लेषयेत् संश्लेषयेत् यद्यनेडकीर्णा विन्देत्ताः प्रणिह्य निश्लेषयेदिति श्रुतेः (२. ५. २. १५) ।

कुशोर्णा वाभावे ॥८॥ दर्भाणां मञ्जरीतूलानि तथा चापस्तम्बः उद्वासनकालेऽनेडकाभिर्णाभिर्मेषप्रतिकृती लोमशौ कुरुतस्तदभावे कुशोर्णाभिरिति ॥ एष वै प्रत्यक्षं वरुणस्य पशुर्यन्मेष इति (२. ५. २. १६) वाक्यशेषात् पयस्यावदानाभ्यां सह स्रुच्यवधानवचनाच्च (२. ५. २. ३७ ३८) मेषमेष्योर्यागार्थत्वमवसीयते तेन युक्तं तयोः समन्त्रकमेव निर्वपणादि कुर्वन्तीति (२. ५. २. १५) बहुवचनाच्चाध्वर्युप्रतिप्रस्थात्रग्नीदादिबहुकर्तृकतापि युक्ता अथाहुः पितृभूत्याचार्याः यागद्रव्यसंस्कारैर्मेषमिथुनं संस्कुर्वन्त्येके एके न ये संस्कुर्वन्ति तेषामभिप्रायः पयस्यावदानेन सह मेषमिथुनमप्यवधीयते[2] अतस्तदपि देवतोद्देशेन त्यज्यतऽइति यागसाधनमेवेति ये तु न संस्कुर्वन्ति तेषामयमभिप्रायः नैव यागद्रव्यं मेषमिथुनम् वारुणो मेषो भवति मारुती मेषीत्यश्रुतत्वात् न च वरुणं मरुतश्चोद्दिश्य मेषमिथुनं त्यज्यते यदेव वारुणं मारुतं च हविस्तदर्थे नैव स देवतोद्देश इति मिश्रणे त्वदृष्टो हविषोः संस्कारः तस्मादधर्मकमिति जुहोतिधर्मेण मेषमिथुनं संस्करणीयमिति श्रीअनन्तयाज्ञिकाः हरिस्वाम्यभिमतश्चायं पक्षः यतः स एवाह अवदानेन सह मेषमवदधातीति (२. ५. २. ३७) होमसम्बन्धोऽवदानसम्बन्धान्मेषस्य होतव्यत्वाद्ध्यवदानस्य ततश्च सोऽपि वरुणायैव होतव्यः यागसम्बन्धाभावाच्च न यागहविर्धर्माः कार्या इति कर्काचार्यसम्प्रदायकारादिमते यागसम्बन्ध एव तेषां मते समन्त्रकास्तयोर्यागधर्मा भवन्ति ।

---

१) मेषशिरोरोमाणि Ss. २) ? ॰दीयते २. See २. ५. २. ३७ and ३८.

आहवनीयस्य पुरस्ताद्वेदी करोति ॥ ९ ॥ आहवनीयस्य पूर्वस्यां दिशि · एका दक्षिणतः अपरा उत्तरतः · तत्र प्रधानत्वाद्धविषां सादनार्थत्वाच्चोत्तरवेदिः पुरस्तादाहवनीयस्यार्धवेन । तथा च मानवे अग्रेणाहवनीयं त्रिषु प्रक्रमेष्वपरिमिते वावकाशे पृष्ठ्याशङ्कुं[1] निहत्य वद्धादानप्रभृति वेदिं विदधाति षट्शयां प्राचीं चतुःशयां पश्चात्त्रिशयां पुरस्तात् पूर्वार्धे वेद्या वितृतीय[मा]त्रेऽरत्निमात्रीं चतुर्दिष्टिमुत्तरवेदिं[2] विधायाग्रेणोत्करं प्रक्रममात्रे वेदेरुद्धत्यावोक्ष्य चात्वालऽ शम्यया परिमिमीतऽइति ।

प्रादेशोऽन्तरा ॥ १० ॥ वेद्योरन्तरालं भवति · अङ्गुष्ठतर्जनीभ्यां प्रसारिताभ्यां प्रादेश उच्यते ।

पृथो वा ॥ ११ ॥ शाखान्तरादेव · आहापस्तम्बः द्यङ्गुलं त्र्यङ्गुलं चतुरङ्गुलं पृथमात्ररथवर्त्ममात्रस्तीतामात्रप्रादेशमात्रेण वा तिर्यक्सम्भिन्ने वेदी भवत इति · प्रसारिताङ्गुलिरा मणिबन्धनाद्धस्तः पृथशब्देनोच्यते । मानवे च प्रतिप्रस्थाता दक्षिणां वेदिं करोत्योत्तरस्मात्परिग्रहादरत्निमात्रमन्तरा समे प्राची[3] भवतः यथा हवींऽषि सम्भवेयुस्तथा तिरश्ची[3]ऽएक उत्करोऽपरेणोत्तरवेदिऽ स्तम्बयजुर्हरतीति ।

रथमात्र्युत्तरा ॥ १२ ॥ दक्षिणा तु प्रकृतिवदपरिमितप्रमाणा वा व्याम-त्रीं पश्चादित्यादिप्रमाणा (२. ६. ३) वा । रथप्रमाणं च स्पष्टं शुल्वकृतोक्तम् (२) अङ्गुले रथसंमितायाः प्रमाणम् तत्राष्टाशीतिशतमीषां १८८ चतुःशतमक्षः १०४ षडशीतिर्युगं ८६ चत्वारोऽष्टकाः शम्येति · अरत्नेश्चतुर्विंशो भागोऽङ्गुलम् पुरुषस्य पञ्चमो भागोऽरत्निः अथवा कूर्परादारभ्य कनिष्ठिकाग्रान्तः · तेन चतुरङ्गुलाधिकं शताङ्गुलं पश्चात्तिर्यक्प्रमाणम् अष्टाशीत्यङ्गुलैरधिकं शताङ्गुलं[4] प्राची षडशीत्यङ्गुलं पुरस्तात्तिर्यक्प्रमाणमिति · तत्रायं साधनोपायः अष्टाशीतिशताङ्गुलां १८८ रज्जुं मित्वा तत्र लक्षणं कृत्वा ततश्चतुर्णवत्यङ्गुलां ९४ रज्जुं मूलरज्ज्वा अर्धप्रमाणामभ्यस्य तस्या अभ्यस्ताया रज्जोराद्ये षष्ठे भागे अङ्गुलत्रिभागद्-

---

1) ? Thus २. पृष्ठ्नीशंकुं २. 2) ? चातुर्दि° २. (त्रं अरत्नि°—°प्रकम at the margin.)
3) i. e. प्राच्यौ, तिरश्च्यौ! 4) ? °ला २.

याधिकपञ्चदशाङ्गुलप्रमाणे १५ २/३ लक्षणमाकर्षणार्थं कर्तव्यम् ततोऽभ्यासर-ज्जोस्त्रिंस्त्रयश्चत्वारिंशत्तमे ४३ऽङ्गुलेऽंसाङ्कनार्थं द्वापञ्चाशत्तमे ५२ऽङ्गुले च श्रोण्य-ङ्कनार्थं लक्षणं कुर्यादिति । एतदेकमुत्तरवेदेः प्रमाणमुक्तम् · अथ द्वितीयं प्रमा-णमाह ·

चतुररत्निर्वा पश्चात् सप्त प्राची षड्वा त्रयः पुरस्तात् ॥ १३ ॥ उत्तरवेदिः चतुररत्निः पश्चात्तिरश्ची भवति सप्तारत्निः षडरत्निर्वा प्राची प्रागायता त्रयो ऽरत्नयः पुरस्तात्तिरश्ची भवति · शाखान्तरादेव । षडरत्निः प्राचीति पक्षे अयं साधनश्लोकः नवारत्निर्मिता रज्जुर्लक्षिता षट्स्वतः परम् अर्धेऽर्धे त्रिषु पाशः स्यात्पशुवेदेः प्रसाधनमिति · अस्यार्थः · नवभिररत्निभिर्मिता रज्जु षट्सु अरत्निषु लक्षिता चिह्नयुक्ता कार्या तच्च लक्षणं प्राच्या अङ्कनार्थम् अतः परम् अस्मात्ष-डरत्निमिते स्थाने[1] कृताल्लक्षणात्परम् त्रिषु स्थानेषु अर्धे-अर्धे अर्धारत्नावर्धारत्नौ लक्षणं कृत्वा पशुवेदेः प्रसाधनं कार्यमिति तत्र प्रथमेऽर्धारत्नौ आकर्षणार्थम् द्वितीयेऽर्धारत्नौ श्रोण्यङ्कनार्थम् तृतीयेऽर्धारत्नौ अंसाङ्कनार्थमिति पाशविपर्यासेनायं साधनोपायः · द्व्यरत्नौ २ लक्षणं कुर्यादर्धे १/२ सार्धत्रये ३ १/२ तथा अर्धे १/२ ऽरत्नौ १ ततः सार्धे १ १/२ पशुवेदेः प्रसाधनी[2] अयं च पाशाविपर्यासेन साधनोपायः । सप्तारत्निप्राच्यां पक्षे तु सप्तारत्निपरिमितां रज्जुं तत्र लक्षितां ७ तदर्धेनाभि-वर्ध्य ३ १/२ वर्धिताया आद्ये षष्ठे भागे १ ३/४ लक्षणमाकर्षणार्थं कृत्वा प्रान्तादरत्नि-द्वये ८ १/२ प्रान्तात्सार्धारत्नौ ९ च श्रोण्यंसाङ्कनार्थे लक्षणे कुर्यादिति ।

तेषां मध्ये शङ्कुः ॥ १४ ॥ त्रयः पुरस्तादिति प्रागुक्तम् (१३) तेषां त्रयाणा-मरत्नीनां मध्ये शङ्कुर्निहन्तव्यः · तत्र हि शङ्कुना कार्यमस्ति पूर्वार्धे शङ्कुसहि-तमित्यत्र (२८) ।

अपरिमिता वा ॥ १५ ॥ वा उत्तरवेदिरुक्तप्रमाणद्वयादतिशयेनाधिकप्र-माणा भवति अपरिमितं प्रमाणाद्भूय इति शुल्वकृतोक्तत्वात् (१) · अतश्चैका-हिकचातुर्मास्यादौ हविरासादनपर्याप्ता अपरिमिता वेदिराश्रयणीया अन्यथा हवि-

---

1) ? मितेस्थाने २· मितस्थाने २. 2) i. e. २ श्रोण्यङ्कनार्थम् १/२ आकर्षणार्थम् ३ १/२ प्राच्यङ्कनार्थम् १/२ आकर्षणार्थम् १ अंसाङ्कनार्थम् १ १/२ अत्रलक्षणपरङ्कवक्तपाशः ।

षामासादनासम्भवात् · अत्रापि यावती दीर्घा क्रियते तत्प्रमाणां रज्जुं मित्वा तत्र लक्षणं कृत्वा दीर्घप्रमाणार्धमभ्यस्य तस्याद्ये षष्ठे भागे लक्षणमाकर्षणार्थं कृत्वा पश्चात्तिर्यक्प्रमाणार्धे श्रोण्यङ्कनार्थं प्राक्तिर्यक्प्रमाणार्धेऽंसाङ्कनार्थं च लक्षणं कुर्यात् ।

स्फ्याद्या संमर्शनात्करोति ॥१६॥ अत्र द्वयोर्वेद्योः स्फ्यादि स्फ्यादाना-दारभ्य आ संमर्शनात् स्रुवाग्नीध्रीयावाः संमृशतीत्येवमन्तं (२.६.१३–२७) करोति । तत्रायं क्रमः · तत्र यदि प्रागग्न्यन्वाधानात्करम्भपात्रकरणं कृतम् तदा इह्लाग्न्य-न्वाधानम् · उभयोः शाखाच्छेदः संनमनम् शाखापरिवासनं च · अध्वर्योरिवोपवे-षकरणम् · पवित्रबन्धनमुभयोः · वत्सापाकारणमुभयोः वरुणाय भागमित्यध्वर्योः मरुद्भ्यः भागामिति प्रतिप्रस्थातुः · उपगूहनमुभयोः · ततो ब्रह्मवरणम् · यजमान वाचं यच्छेति प्रैषः वाग्यमनम् · पात्रासादनम् वज्रः पवित्रच्छेदनानि पवित्रे अग्निहोत्रहवणी अन्तर्धानतृणं शम्या चेति षड्कासादनमध्वर्योः शम्यावर्जितं पञ्चकासादनं प्रतिप्रथातुः अपणस्य पश्चादुत्तरतो वा · तत उभयोर्वाग्यमः · ततः पवित्रच्छेदनादिभिः प्रोक्षणीः संस्कृत्य वज्रान्तर्धानतृणयोः प्रोक्षणमुभयोः अध्वर्योः शम्याप्रोक्षणमधिकम् प्रोक्षणीनां स्थापनमुभयोः · तृणं गृहीत्वा यथोक्तं वेदिमानमुभयोः ततः स्फ्यादानादि संमर्शनान्तमुभयोरिति । केचिदध्वर्योश्चात्वा-लमानार्थायाः शम्याया आसादनं प्रोक्षणं च नेच्छन्ति अप्राकृतकार्यार्थत्वात् · मेषमेष्योर्यथास्वं समन्त्रकनिर्वपणं चाग्न्यन्वाधानं ब्रह्मवरणं च पूर्वं कृतमेव स्फ्याद्यासादनं च · प्रोक्षण्यः संस्कृता एव सन्ति केवलमत्र तृणशम्येऽआसाद्य तयोः प्रोक्षणमात्रं कार्यम् · ततो वेदिमानादि · यजमानस्य वाग्यमः सप्रैषो ऽत्रापि भवत्येव · पूर्वेद्युरेव इन्ना वसतीत्येतत्पर्यन्तस्यानुष्ठाने (५.४.१) तृण-शम्ययोरपि मेषमेषीनिर्वपणसम्बन्धिपात्रैः सहासादनप्रोक्षणे भवतो न पृथक् ।

उभयोरेक उत्करः ॥१७॥ उभयोर्वेद्योः · उत्तरस्या वेदेः समीपे ।

अपरेण वेदिं प्रतिप्रस्थातुः संचरः ॥१८॥ स्तम्बयजुर्हरणार्थमुत्करं प्रति गच्छतः प्रतिप्रस्थातुर्मार्गः · गोचरसंचरेत्यादिना (पा॰ ३.३.११९) संचरत्यनेनेति

संचरः · तथा चाह्वापस्तम्बः अन्तरा वेदी प्रतिप्रस्थातुः संचरोऽपरेणोत्तरवेदिं स्तम्बयजुर्हरन्नाधर्युं परिहरत्युत्करे निवपति समान उत्कर इति[1] · मानवे च अन्तरेणोत्तरां स्तम्बयजुर्हरतीति · अतः स्तम्बयजुर्हरणायैवायं संचरनियमो नान्यत्रेति अन्यत्र वन्तरा वेदी । अत्राह्वापस्तम्बः अग्रेण गार्हपत्यं समे प्राची वेदी भवत उत्तरामधर्युः करोति दक्षिणां प्रतिप्रस्थातोत्तरे विहारेऽधर्युश्चरति दक्षिणे प्रतिप्रस्थातोभयत्र कृत्स्नं तन्त्रमपि पत्नीसंयाजा[2] एकवत्सप्रैषो द्विवद्धस्यानुज्ञानातीति · तथा यदेवाधर्युः करोति तत्प्रतिप्रस्थाता यत्किं च वाचा-कर्मीणामधर्युरेव तत्कुर्याद्युगपत्कालान्वा निगदान्साधारणद्रव्यांश्च संस्कारानिति ।

उत्तरवेदिं निवपत्युत्तरस्याम् ॥१९॥ वक्ष्यमाणेन प्रकारेण उत्तरस्यां वेदौ उ॰दिं नि॰ · उत्तरवेदिरिति वक्ष्यमाणसंस्कारसंकृतस्य चात्वालमृदा कृतस्य स्थण्डिलस्य नामधेयम् ।

शम्यामादाय चात्वालं मिमीते पूर्वेणोत्करं संचरं परिहाप्य ॥२०॥ द्वात्रिंशदङ्गुलप्रमाणां शम्यां वारणीं हस्तेन गृहीत्वा उत्करात्पूर्वस्यां दिशि संचरणार्थं मार्गमन्तराले मुक्त्वा चात्वालं मिमीते · चात्वाल इति मानादिसंस्कारसंस्कृतस्य गर्तस्य नामधेयम् तच्च संव्यवहारार्थम् चात्वाले मार्जयन्तऽइत्यादौ (६. ६. २१) · पूर्वं शम्याया आदानम् ततः स्फ्यस्यादानम् ततश्चात्वालमानम् । मानप्रकारमाह (२१–२४) ·

शम्यामुदीचीं निदधाति ॥२१॥ उत्तरस्माद्वेद्यन्ताउदीचीमुत्तराग्राम् · तथा चापस्तम्बः उत्तरस्माद्वेद्यन्तादुदक्प्रक्रमे चात्वाल इति प्रकृत्य परिलिख्य तूष्णीं जानुदघ्नं त्रिवितस्तं[3] वा खात्वोत्तरवेद्यर्थान्पांसून्हरतीति · काठके च उत्तरतश्चात्वालं बहिर्वेदि सम्प्रत्युत्तरवेदेस्त्रिप्रक्रमेऽपरिमिते वेति जानुदघ्नं खात्वेति च ।

पुरस्ताच्च ॥२२॥ शम्यामात्रमेवान्तरालं त्यक्त्वा वेद्यन्तादेव पुरस्तात्पूर्वस्यां दिशि उदगग्रां शम्यां निदधाति ।

1) ? उत्करः । पंचज इति २· 2) ? ॰ज्या २· 3) ॰तस्तिं *Roer* Taitt. Saṃh. pag. ४६४.

दक्षिणतः प्राचीम् ॥२३॥ उत्तरवेद्यन्तमनुलक्षीकृत्य दक्षिणतो दक्षिणस्यां दिशि प्रागग्रां शम्यां निदधाति ।

उत्तरतश्च ॥२४॥ उत्तरस्यां दिशि प्राचीं श॰ नि॰ · एवं चतुर्दिक्षु शम्याया निधानेन चात्वालस्य मानमुक्तम् ।

स्फ्येनान्तर्लिखति तप्तायनीति (५. १) प्रतिमन्त्रम् ॥२५॥ प्रतिदिशं शम्यां निधाय निहितायाः शम्याया मध्यपार्श्वे अभ्यन्तरं स्फ्येन रेखां करोति · एवं द्वात्रिंशदङ्गुलः समचतुरश्रश्चात्वालः परिलिखितो भवति ।

विदेदग्निरिति (५. १) चात्वाले प्रहरति स्फ्येनान्वारब्धे ॥२६॥ अन्वारब्धे यजमाने[1] · अध्वर्युः प्रहरति प्रहारं करोति पुरीषोत्खननार्थम् · अन्वारम्भस्तु प्रहरणमात्र एव भवति ।

अग्नेऽअङ्गिर इति (५. १) पुरीषꣳ हरति हस्तेन च ॥२७॥ उत्खातं पुरीषमध्वर्युर्वेदिपूर्वार्धे निहितशङ्कुसमीपे निन्नापाय नयति हस्तेन च स्फ्येन च ।

योऽस्यामिति (५. १) निवपति पूर्वार्धे शङ्कुसहितम् ॥२८॥ तदुद्धृतं पुरीषमुत्तरस्या वेदेः पूर्वभागे प्राङ्निहितशङ्कुसंलग्नं निवपति राशिं करोति · प्राङ्मुख उत्तरवेद्यां निवपतीति मानवे ।

अग्नीदुत्करवत्तूष्णीꣳ हृतम् ॥२९॥ हृतं तत्पुरीषं पाणिद्वयेनाभिन्यस्यति (२. ६. २२) अभिनिदधाति हस्ताभ्यामवबाधते ।

एवं द्विरपरम् ॥३०॥ [प्रहरणादि] ।

द्वितीयस्यां तृतीयस्यामिति (५. १) विशेषः ॥३१॥ [मन्त्रस्य] ।

अनु त्वेति चतुर्थं यथार्थमाहृत्य सिꣳहसीति (५. १०) व्यूहत्युत्तरवेदिꣳ शम्यामात्रीम् ॥३२॥ यथार्थं यावता पुरीषेणार्थः उत्तरवेदिनिष्पत्तिरूपं प्रयोजनम् तावत्पुरीषमाहृत्य शङ्कुसमीपऽआनीय सिंहसीति मन्त्रेण कल्पस्वेति पदवता उत्तरवेदिं व्यूहति पुरीषं भूमिसंलग्नमेव हस्तेन सर्वतः प्रेरयित्वोत्तरवेदिं शम्यामात्रीं द्वात्रिंशदङ्गुलपरिमाणशम्याप्रमाणां निष्पादयति · व्यूहतीत्यस्यान्यत्रापि हस्तप्रेरणार्थस्यैव दृष्टार्थत्वात् स्रुचौ व्यूहतीत्यादौ (१. ८. ३. १) · अथा-

१) अन्वारम्भश्च चात्वालस्य marg.

नुव्यूहतीति श्रुतत्वात् (३.५.१.३३) दिशं-दिशमनु विभागेनोहति प्रेरयति चतुरस्रामुत्तरवेदिं कर्तुमिति हरिस्वामिनः तां वै युगशम्येन, विमिमीतऽइति (३.५.१.२४) श्रुतत्वात् शम्यामात्रीमित्युक्तम् [ततश्चोत्तरवेदिः] द्वात्रिंशदङ्गुला समचतुरश्रा। उत्तरवेदेः प्रमाणान्तरमाह

वितृतीयामपरिमितां युगमात्रीं यजमानदशपद्यां वा ॥३३॥ विकल्पे वाशब्दः प्रत्येकमभिसम्बध्यते। वितृतीयामिति वेदेस्तृतीयभागसंमितामित्यर्थः यत्प्रमाणायां वेदावुत्तरवेदिः क्रियते तद्वेदिक्षेत्रं सर्वं क्षेत्रफलेन चतुरश्रीकृत्य त्रिधापच्छिद्यैकं तृतीयं भागं पृथक्चतुरश्रीकृत्य तत्प्रमाणामुत्तरवेदिं कुर्यात् तदुपायश्च शुल्वकृतोक्तः (२) पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी तस्याक्ष्णया रज्जुर्दशकरणीति एवं च क्षेत्रफलेन दशपद्या भवति दशपद्येव दशपदेत्युच्यते पद्यापदयोः पर्यायत्वस्य दृष्टत्वात् द्वादशाङ्गुलं पदम्। केचिच्च दशपद्यामिति पुरुषप्रमाणां शतपदक्षेत्रफलामाहुः. कुतः तां वै युगमात्रीं वा सर्वतः करोतीत्यतः सर्वत इत्यनुवर्तमाने यजमानस्य वा दश-दश पदानीति (३.५.१.३४) श्रुतेः अतश्च सर्वतः सर्वासु दिक्षु दश-दश पदानीत्यर्थो भवति परिशिष्टकारवचनस्य तु शाखान्तरप्रालम्बवचनं मूलं भविष्यति हरिस्वामिनस्त्विमां श्रुतिं पदं तिर्यङ्मानीत्यादिपरिशिष्टकारवचनानुरोधेनैव व्याख्यातवन्तः तथा हि युगप्रमाणां चतुर्ष्वपि पार्श्वेषु करोति अथवा यजमानस्य दश-दश पदानि सर्वतः करोति कथम् पदं तिर्यङ्मानी त्रिपदा पार्श्वमानी यस्य क्षेत्रस्य तस्य याक्ष्णया तया यन्मीयते रज्ज्वा तद्दशपदं भवति तानि च प्राच्यां पिण्ड्यमानानि दश भवन्ति दक्षिणतोऽपि प्रत्यगुदक्चेत्येवं यजमानस्य दश-दश पदानि सम्पाद्यानि एकशतविधेऽप्येवमेवाग्निवेदिमानं करिष्यति सा यावत्येषा सप्तविधस्य वेदिस्तावतीं चतुर्दश कृत्व एकशतविधस्य वेदिं विमिमीतऽइति (१०.२.३.७) अथाग्नेर्विधा अष्टाविꣳशतिः प्राचः पुरुषा अष्टाविꣳशतिस्तिर्यञ्च इति (१०.२.३.११) चेति ॥ उत्तरवेदिः सधर्मिका सोमे समाम्नाता[1] उत्तरवेदिशब्दश्च संस्कारवाची अतोऽत्र नामधेयेन ते सर्वऽउत्तरवेदिसंस्कारा इह प्राप्यन्ते तत्र

1) See ३.५.१.१२. ff.

यावन्त्युत्तरवेदिप्रमाणानि सोमे श्रुतानि तान्यपि सर्वाण्यत्र प्राप्नुवन्ति न च तानि सर्वाण्यपीष्यन्ते · अत आह ·

सोमे वोत्तरे व्यपस्फुरणश्रुतेः ॥३४॥ उत्तरे अन्तिमे द्वे सोमऽएव भवतो नान्यत्र · यतश्चातुर्मास्येषु वेद्युत्तरवेद्योर्व्यपस्फुरणं[१] श्रूयते यदि युगमात्रीं दशपदीं वोत्तरवेदिं कुर्याद्वेदिश्चोत्तरवेदिश्च व्यपस्फुरेयातामिति · अत उत्तरयोः प्रमाणयोरिह प्रतिषिद्धत्वात्परिशिष्टानि त्रीणि प्रमाणानीह भवन्ति ।

असम्भवाच्च ॥ ३५ ॥ उत्तरवेदिं निवपत्युत्तरस्यामित्युत्तरवेद्याधारत्वेन वेदिः श्रुता (५. ३. १३) न च महाप्रमाणाया अल्पप्रमाणा वेदिराधारत्वेन सम्भवति ।

मध्ये नाभिं करोति प्रादेशसमां चतुःस्रक्तिम् ॥३६॥ उत्तरवेदिमध्ये · प्रादेशप्रमाणां चतुःकोणाम् · अथास्या मध्ये प्रादेशमात्रीं गोपदमात्रीमश्वशफमात्रीं वोत्तरनाभिं चतुःस्रक्तिं कृत्वेत्यापस्तम्बः · काठके परिमण्डलां वेति ।

प्रोक्षत्युत्तरवेदिं सिकताश्च प्रकिरति सिंहयसीति (५. १०) प्रतिमन्त्रम् ॥३७॥ अद्भिः प्रोक्षति शुन्धस्वेति मन्त्रेण सिकताः प्रकिरति शुम्भस्वेति मन्त्रेण · उत्तरवेदौ प्रकिरति उपरि क्षिपति ॥ ॥ तृतीया कण्डिका ॥ ३ ॥

अथ पद्धतिः ॥

अथ वरुणप्रघासा लिख्यन्ते · ते च फाल्गुन्यां प्रारम्भपक्षे आषाढ्याम् चैत्र्यामारम्भपक्षे श्रावण्याम् वैशाख्यामारम्भे भाद्रपद्याम् । तत्र पूर्वेद्युः पौर्णमास्यां वैश्वदेवपर्वणि परिहिताहतवस्त्राणि प्रक्षाल्य शोषयित्वा पत्नीयजमानौ परिदधाते । तत्र ऋत्विग्वरणम् ॰गोत्र॰शर्मन्नैष्टिकेन धेनुदक्षिणेन वरुणप्रघासपर्वणाहं यक्ष्यऽइति अश्वदक्षिणेनेति वा षड्गवदक्षिणेनेति वा । ततोऽध्वर्युः पञ्चभूसंस्कारपूर्वकं समारोपार्थमाहवनीयमुद्धृत्यारणी गृहीत्वायं तऽइति मन्त्रेण गार्हपत्ये प्रतपति ततो द्विस्तूष्णीम् सकृत्सकृन्मन्त्रेण द्विर्द्विस्तूष्णीमिति शाङ्खायनसूत्रात् (२. १७. २) · एवमाहवनीयेऽरणी प्रतप्योदवसाय प्राचीनप्रवणे वितानं साधयित्वा गार्हपत्यखरे संस्कारः मन्थनम् स्थापनम् · ततो भूसंस्कारपूर्व-

१) व्यपस्फुरणं स्पर्धोच्यते Ss.

कमाहवनीयदक्षिणाग्न्योरुद्धरणम् ऐष्टिकवरुणप्रघासार्थमिति संकल्प्य · ततो वरुणप्रघासार्थमेव सर्वेष्वग्न्यन्वाधानं मन्त्रेण · तत उभयोः समन्त्रकः शाखाछेदः अनुमार्जनम् अग्नीनन्वाधाय पृथक्शाखेऽआहरेत इत्यापस्तम्बवचनात् · अत्र वा व्रतग्रहणम् · चतुरासनम् · ब्रह्मवरणम् धेनुदक्षिणेनैष्टिकेन वरुणप्रघासपर्वणाहं यक्ष्ये तत्र भूपतेऽइत्यादि · ब्रह्मणः समन्त्रकमुपवेशनम् · अत्र वा व्रतग्रहणम् । ततः करम्भपात्रकरणम् मेषमेषीकरणं च · तत्र मेषकरणमध्वर्योः समन्त्रकम् प्रतिप्रस्थातुः करम्भपात्रकरणं तूष्णीम् मन्त्रेण मेषीकरणं च · तत्र सर्वार्थवपक्षसंयवनार्थवपक्षयोरध्वर्योरेव प्रणीताप्रणयनम् नादृष्टार्थवपक्षे · दक्षिणाग्नेरुत्तरतो विप्रकृष्टमध्वर्योः पात्रासादनम् शूर्पाग्निहोत्रहवणी स्फ्यकर्परम् शम्याकृष्णाजिनम् उलूखलमुसलम् दृषदुपलम् पात्रीधान्यम् मेष्यर्था यवा एव पवित्रे पवित्रछेदनानि च धृष्टिः संयवनार्थं दधि ऊर्णाश्च · ग्रहपक्षे उदकतृणं[1] शम्या च सद्यःपक्षे तनयोः श्व एवासादनप्रोक्षणे · प्रतिप्रस्थाताप्यासादितपात्राणां दक्षिणतो दक्षिणाग्नेरुत्तरत एवैतान्येव पात्राण्यासादयति विशेषस्तु महत्कर्परम् मेषीकरम्भपात्रनिष्पत्तिपर्याप्ता यवाः ग्रहपक्षे उदकतृणाम्[2] · उभयोः स्फ्योपहितपात्रीकरणम् । उभयोः शूर्पाग्निहोत्रहवण्यादानादि सर्वं समन्त्रकम् · प्रतिप्रस्थातुर्यदसाधारणं करम्भपात्रसम्बन्धि कर्म ग्रहणप्रोक्षणविभज्यालम्भप्राणदानासादनालम्भादिकं तत्सर्वं तूष्णीम् यच्च साधारणं मेष्या सह शूर्पाग्निहोत्रहवण्यादानंप्रतपनपात्र्यादिसंस्कारकण्डनपेषणसंयवनादिकं तन्मन्त्रेणैव। तत्र प्रथमं प्रतिप्रस्थाता तूष्णीं करम्भपात्रार्थान्यवान्गृह्णाति यजमानस्य यावन्त्यपत्यानि पुत्रपुत्रीपौत्रप्रपौत्रादीनि तावत्संख्यान्येकाधिकानि करम्भपात्राणि भवन्ति · प्रत्येकं तूष्णीं चतुर्मुष्टिग्रहणम् प्रतिग्रहणं च शूर्पे निवापः · द्विप्रजाप्रजैकप्रजानां चत्वारि भवन्ति · ततोऽध्वर्युर्मेषार्थं यवान्गृह्णाति वरुणाय जुष्टमिति प्रतिप्रस्थाता मेष्यर्थान्यवान्गृह्णाति मरुद्भ्यो जुष्टमिति · गार्हपत्यस्य पश्चादेवोभयोर्ग्रहणम् पृथिव्यास्त्वेति सादनं तु दक्षिणाग्नेः पश्चात् तस्यात्र अपणावात्[3] · ततः पवित्रछेदनाद्युभयोः · प्रोक्षणीसंस्कारः · अध्वर्योरेव ब्रह्मन्हविषी

1) उदकतृणं १. उदकातृणं B. 2) Thus (उदकातृणं) १. B. 3) ? अवणावात् १.

प्रोक्षिष्याव इति प्रैषः ओं३ प्रोक्षंतं यज्ञं देवता वर्धयतं युवां नाकस्य पृष्ठे यज्ञं यजमानं च धत्तम् ओं३ प्रोक्षतमित्यूहः[1] हरिस्वामिमते वरुणप्रघासेषु क्वचिदप्यूहो न भवति · वरुणाय त्वा जुष्टमित्यध्वर्योर्हविःप्रोक्षणम् · प्रतिप्रस्थाता तूष्णीं करम्भपात्रार्थान्यवान्प्रत्येकं ग्रहणसंख्यया प्रोक्ष्य मेष्यर्थान्प्रोक्षति मरुद्भ्यस्त्वा जुष्टमिति मन्त्रेण · उभयोः पात्रप्रोक्षणम् असंचरे निधानं च । कृष्णाजिनादानाद्युभयोः · नात्र कुक्कुटाह्ननम् अध्वर्युणाहूतैव पत्नी क्रमेणोभयत्र कण्डनं करोति अग्नीद्वा · शूर्पादानादि तुषनिरसनान्तमुभयोः फलीकरणं न भवत्येव · स्वयमेवोभयोर्दक्षिणाग्नौ कर्पराधिश्रयणं मन्त्रेण तत्र नाङ्गाराणां प्राकुरणम् स्वस्थानस्थेष्वेवाङ्गारेषु ध्रुवमसीति (१.१७) कर्परोपधानम् सव्याशून्ये ऽङ्गारनिधानम् अभ्यूहनाभावः · घर्मा स्थ विश्वायुष इति (१.२२) मन्त्रेणोभयोर्यवतण्डुलानामधिश्रयणम् · गार्हपत्यादङ्गारमादाय यथास्वमुभयोर्मन्त्रेण पर्यग्निकरणम् · अङ्गारस्य गार्हपत्ये प्रतिप्रक्षेपः · देवो वः सविता श्रपयतु वर्षिष्ठेऽधि नाकऽइत्युभयोः (१.२२) कर्परस्याधः श्रपणप्रेरणम् · ईषत्ततान्कृत्वा मा भेष्ट मा संविग्धमित्युभयोरालम्भः (१.२३) · उद्वासनम् · पात्र्यामोप्याभिमन्त्रणादि कृष्णाजिनादानादि संयवनान्तमुभयोः । अध्वर्योर्मेषकरणम् मेषः सशृङ्गः आण्डयुग्मपुंलिङ्गयुतः · प्रतिप्रस्थातुर्यावद्गृहीतं करम्भपात्रकरणम् पत्न्या वा तानि चाङ्गुष्ठपर्वमात्राणि एकद्वीनि भाजनाकृतीनि कार्याणि उत्तानानि च निधेयानि पात्रत्वात् · ततो मेषीकरणम् मेषी अशृङ्गा द्विस्तनी पुच्छस्याधः स्त्रीप्रजननयुक्ता च कार्या · उभावप्यनैडकीरूर्णाः प्रक्षाल्य यथास्वं मेषमेष्योः शरीरेऽआश्लेषयतः अनैडकीनामूर्णानामभावे दर्भमञ्जरीतूलानि प्रक्षाल्याश्लेषयतः · करम्भपात्राणां प्रत्येकं तूष्णीमालम्भः इदं वरुणायेति मेषस्य इदं मरुतामिति मेष्याः · पात्र्यङ्गुलिप्रक्षालनस्थापनम् · द्व्यहपक्षे ततः शाखाच्छेद उभयोः प्रगुणीकरणं च शाखापरिवासनमुभयोः उपवेषकरणमध्वर्योरेव पवित्रबन्धनमुभयोः । तत आहवनीयस्य पुरस्ताद्वेदिमानमुभयोः · तत्र ब्रह्मयजमानयोर्दक्षिणवेदिं दक्षिणेनोपवेशनम् · तत्राध्वर्योरुत्तरा वेदिः प्रतिप्रस्थातुर्दक्षिणा · तत्रोत्तरा वेदिश्चतुररत्निः

1) See २.२.८ and १०.

पश्चात्तिर्यक् षडरत्निः सप्तारत्निर्वा प्राची दीर्घा त्र्यरत्निः पुरस्तात्तिर्यक् तेषां मध्ये शङ्कुः एतदेकं प्रमाणम् · अथवा चतुःशतमङ्गुलानि पश्चात्तिर्यक् अष्टाशीतिशतमङ्गुलानि प्राची दीर्घा षडशीत्यङ्गुलानि पुरस्तात्तिर्यक् अत्रारत्नेश्चतुर्विंशो भागोऽङ्गुलम् अत्रापि पुरस्तात्प्रमाणमध्ये शङ्कुः एतद्वेदेर्द्वितीयं प्रमाणम् · अथवोक्तमानद्वयादतिशयेनाधिकप्रमाणा सर्वतो वेदिर्भवति अयं तृतीयः प्रकारः · प्रतिप्रस्थातुर्दर्शपूर्णमासवद्वेदेः प्रमाणम् · तत्र प्राचीनप्रवणे गार्हपत्याहवनीयदक्षिणाग्नीनां खरान्पूर्ववत्प्रसाध्याहवनीयस्य पुरस्तात्प्रक्रमत्रयमधिकं वा परित्यज्य ततः पुरस्तादध्वर्योरुत्तरा वेदिः कार्या · तस्याः साधनश्लोकः षडरत्निप्राचीपक्षे नवारत्निर्मिता रज्जुर्लक्षिता षट्स्वतः परम् अर्धेऽर्धे त्रिषु पाशः स्यात्पशुवेदेः प्रसाधनमिति साधयित्वा प्रकृतिवत्संग्रहौ साधनीयौ · तस्यां वेदावाहवनीयखरस्थाने समचतुरश्रा द्वात्रिंशदङ्गुलोत्तरवेदिः साधनीया यावत्प्रमाणेत्याद्युपायेन[1] · वेदिसाधने प्रकारान्तरं च द्व्यरत्नौ लक्षणं कुर्यादर्धे सार्धत्रये तथा अर्धेऽरत्नौ ततः सार्धे वेदिः सा पाशुकी म[ति]ति अयं पाशाविपर्यासेन साधनोपायः · ततस्तस्या वेदेः प्रादेशमात्रमन्तरालं पृथमात्रं[2] वा शाखान्तराद्द्व्यङ्गुलं त्र्यङ्गुलं चतुरङ्गुलं रथवर्त्मसीतावर्त्माद्यन्तरालं परित्यज्य प्रतिप्रस्थातुरैष्टिकी वेदिः साधनीया तन्मध्येऽरत्निमात्रमाहवनीयखरं कुर्यात् · अत्र पूर्वमध्वर्युः कर्म करोति तमनु प्रतिप्रस्थाता समंत्रकमेव सर्वम् । उभयोर्वेदिमानानन्तरमग्नीदुभयोर्वेद्योः परिसमूहनं करोति · उत्करकरणमुत्तरस्यामेव · उभयोः सतृणवज्रादानादि सतृणपुरीषस्योत्करे प्रक्षेपान्तम् · प्रतिप्रस्थातुरुत्तरामध्वर्युवेदिमपरेण उत्करे पुरीषप्रक्षेपार्थः संचरो नान्यत्र · ततोऽध्वर्युरेवाह ब्रह्मन्पूर्वौ परिग्रहौ परिग्रहीष्याव इति ओं३ बृहस्पती परिगृह्णीतं वेदी सुगा वो देवाः सदनानि सन्त्वनयोर्बर्हिषी प्रथेताꣳ साध्वन्तरहिꣳते पृथिव्यौ देव्यौ-देव्यौ स्तां देवता वर्धयतं युवां नाकस्य पृष्ठे [यजमानो]ऽस्तु सप्त° यजमानं च धत्तम् ओं३ परिगृह्णीतमित्यूहः[3] हरिस्वामिमते वरुणप्रघासेषूहाभावः · तत उभयोः पूर्वपरिग्रहः · उभयोर्वेद्योस्त्रिरुल्लेखनम्[4] · ततोऽध्वर्युरेवाह हर-

1) See pag. ४५५,२५. 2) ? पृथुमा° १. 3) See २. २. १२ and ८. 4) Thus B. र्वेद्या त्रि° १.

त्रिस्त्रिरिति · अग्नीदुभयत्र लेखाह्रणसंमर्शनानि करोति पूर्वमधर्योर्ह्रत्वा संमृश्य तत इतरस्य हृत्वा संमृशति · अग्नीध उत्तरवेदिं पूर्वेण वेद्योरन्तरा च प्रतिप्रस्थातृवेदौ गमनागमनाय संचरः । ततोऽध्वर्युरेव शम्यां स्फ्यं चादायोत्करात्पूर्वदेशे गमनागमनायान्तराले मार्गं मुक्त्वा वेदिसंलग्नं चात्वालं मिमीते वेदेरुत्तरतः प्रक्रममात्रे प्रक्रमत्रये वाऽपरिमिते वेति शाखान्तरसूत्रेषु · तत्र प्रथमं पश्चादुदगग्रां शम्यां दक्षिणेन हस्तेन निधाय तदन्तरतः ततायनीति (५. १) स्फ्येनोदक्संस्थां लेखां परिलिखेत् · ततः शम्यामात्रमन्तरालं परित्यज्य पुरस्तादुदगग्रां शम्यां वेदिसंलग्नां निधाय वित्तायनीत्यन्तरतः (५. १) स्फ्येन परिलिखति · तत[ः दक्षिण]पार्श्वे वेद्यन्तसंलग्नां प्रागग्रां शम्यां निधाय तदन्तरतोऽवतान्मा नाथितादिति (५. १) स्फ्येन परिलिखति · तत उत्तरपार्श्वे प्रागग्रां शम्यां निधाय तदन्तरतोऽवतान्मा व्यथितादिति (५. १) मन्त्रेण स्फ्येन प्राक्संस्थं परिलिखति · एवं शम्याप्रमाणं चतुष्कोणं चात्वालं परिलिख्य यजमानेऽन्वारब्धे विदेदग्निरिति (५. १) मन्त्रेण स्फ्येन चात्वाले प्रहारं कुर्यात् · प्रहरणानन्तरमेव विसर्गः · ततोऽध्वर्युर्हस्तेन स्फ्येन च पुरीषमादायाग्नेऽअङ्गिर इत्युत्तरवेदिं (५. १) प्रति हरति हरणे मन्त्रः · ततो योऽस्यामिति (५. १) मन्त्रेण[1] शङ्कुसंनिधौ वेदेः पूर्वार्धे पुरीषं निवपति · अग्नीत्तन्निहितं पुरीषमुत्करवत्पाणिद्वयेन तूष्णीमभिनिदधाति हस्ताभ्यामधः पीडयतीत्यर्थः · ततः पुनः प्रत्यागत्य यजमानेऽन्वारब्धे विदेदग्निरिति चात्वाले प्रहृत्य हस्तेन च स्फ्येन च पुरीषमादायाग्नेऽअङ्गिर इति हृत्वा यो द्वितीयस्यामिति वेदिपूर्वार्धे निवपति · अग्नीदुत्करवत्तूष्णीमभिन्यस्यति · पुनरप्येवं प्रहरणं हरणं च कृत्वा यस्तृतीयस्यामिति निवपति अग्नीच्चाभिन्यस्यति । ततोऽभ्रिं गृहीत्वाध्वर्युश्चात्वालं खनति · ततश्चात्वालादुत्तरवेदिनिर्माणपर्याप्तं पुरीषं पिटकादौ गृहीत्वानु त्वेत्युत्तरवेदिं (५. १) प्रति हरति · ततो निवापमकृत्वैव तेन पुरीषेणोत्तरवेदिं शम्याप्रमाणां व्यूहति सिंहीरसीति मन्त्रेण कल्पस्वेत्यन्तेन (५. १०) सर्वतः पुरीषं प्रेरयित्वा निष्पादयतीत्यर्थः द्वात्रिंशदङ्गुला शम्या तन्मात्रीम् · वेदेस्तृतीयांशं क्षेत्रफलेन निष्काश्य समचतुरश्रीकृतं यावत्प्रमाणं

---

[1]) मंत्रे पूर्वार्धे १.

भवति तावतीं वा उक्तप्रमाणादधिकतरप्रमाणां वा · तत उत्तरवेदिमध्ये प्रादेशमात्रीं समचतुरस्रां नाभिं करोति · उत्तरवेद्या नाभिश्च पूर्वत आरभ्य प्रदक्षिणं शम्यया प्रादेशेन चतुर्ष्वपि पार्श्वेषु मानं कार्यम् · ततो लौकिकोदकेन सिंह्यसीति (५.१०) मन्त्रेण शुन्धस्वेत्यन्तेनोत्तरवेदिं प्रोक्षति · ततः सिकता उत्तरवेदौ प्रकिरति सिंह्यसीति मन्त्रेण (५.१०) शुम्भस्वेत्यन्तेन · तत उदुम्बरशाखाभिः प्लक्षशाखाभिर्वा दर्भैर्वा उत्तरवेदिं सकलां छादयेत् ॥ ॥३॥

इति पञ्चमस्य तृतीया कण्डिका ॥ ॥

छन्ना वसति ॥१॥ सा उत्तरवेदिर्दर्भतृणकटादिना यज्ञियेन छन्ना सती रात्रौ वसति । विकृतीनां सद्यस्कालत्वेऽपीह वचनाद्व्यहकालता भवति · तथा च काठके श्वोऽग्नी प्रणयत इति · एवमन्येष्वपि सूत्रेषु · आपस्तम्बसूत्रे तु विशेषः सद्यस्काला वा वरुणप्रघासा इति विकल्पेन सद्यस्त्वस्याप्युक्तत्वात् · उदुम्बरशाखाभिः प्लक्षशाखाभिर्वा प्रछाद्य वसति [यद्य]सद्यस्कालः[1] पशुर्भवतीत्यापस्तम्बः ।

प्रातः पञ्चगृहीतं गृहीत्वाग्नी प्रणयतीध्माभ्यामुपयम्य ॥२॥ श्वो भूते आज्यसंस्कारपूर्वकं जुह्वां पञ्चगृहीतमाज्यं गृहीत्वा अग्नी प्रणयति इध्माभ्याम् उपयम्योपयमनीभिरुपगृह्य संतापपरिहारार्थं क्वचित्पात्रस्थाभिरग्नेरधस्ताद्धारणं कृत्वा । अग्निप्रणयनं च सधर्मकं सोमऽउपदिष्टम् इध्ममभ्यादधत्युपयमनीरुपकल्पयन्तीत्यादौ (३.५.१.१) · [तत्र तु] एकोऽग्निः प्रणीयते [इह तु वेदिद्वित्वात्] द्वावग्नी [अतश्च इध्मद्वित्वम्] · अपरिमितं प्रणयनीयं त्रियूनमित्युक्तत्वात् (१.३.२.१) एकैक इध्मोऽपरिमितकाष्ठकस्त्रियूनबद्धश्च भवति तावेवंविधाविध्मौ मध्याहवनीयेऽभ्याधत्तोऽध्वर्युप्रतिप्रस्थातारौ · उपयम्यतऽउपगृह्यतेऽग्निराभिरित्युपयमन्यः सिकता अग्न्युद्धरणार्थे पात्रे संतापपरिहारायोप समीपे कल्पयन्ति स्थापयन्तीति हरिस्वामिनः । आपस्तम्बः उदुम्बरशाखाभिः प्लक्षशाखाभिर्वा प्रछाद्य वसति यद्यसद्यस्कालः पशुर्भवति आहवनीये प्रणयनीयमिध्ममादीप्य सिकताभिरुप-

---

१) यद्य deest here, but see the schol. at २.

यम्याग्नये प्रणीयमानायानुब्रूहीति सम्प्रेष्य प्रणीयमानायानुब्रूहीति वेति · मानवे च चात्वालादुपयमनीः कुरुते वेदिपुरीषात्प्रतिप्रस्थाताग्नये[1] प्रणीयमानायानुब्रूहीत्यनुवाचयत्यग्निभ्यां वेति · अत उपयमन्यः सिकता वा चात्वालमृत्तिका वा ग्राह्याः उभयीनामपि समूलत्वात् ।

सर्वं वा विभज्य प्राकृतत्वात् ॥३॥ सर्वं वाहवनीयं द्वेधा विभज्य कर्पराभ्यां प्रणयतः कुतः प्राकृतत्वात् तस्य प्रकृतितः प्राप्तत्वात् · प्रकृतौ हि दर्शपूर्णमासयोरेवमेव प्रणयनं दृष्टम् सोमे च धर्मवद्धिष्ण्येन प्रणयनमाम्नातम् न च वरुणप्रघासानां सोमः प्रकृतिः किं तु दर्शपूर्णमासावेव · अतः प्रकृतिवदेव कर्पराभ्यां सर्वमाहवनीयं विभज्य प्रणयनं कर्तव्यम् । अथवा सर्वमाहवनीयं विभज्य द्वेधा कृत्वा द्वयोर्वेद्योः प्रणयनं कर्तव्यम् कुतः अप्राकृतत्वात् अस्य प्रणयनस्यापूर्वत्वात् इत्यर्थः इत्यकारप्रश्लेषेण व्याख्येयम् शकन्ध्वादित्वाच्च (पा॰ ६.१.९४) पररूपेण सूत्रे निर्देशः · यथाधिकं वा प्रकृत्यनुग्रहादित्यत्र (२२.१.१७) कर्काचार्यैरकारप्रश्लेषेण व्याख्यातम् सर्ववेदसं प्रकृत्य सहस्रेणानुग्रहदर्शनादिति[2] तथात्रापि व्याख्येयमिति । पक्षान्तरमाह ·

प्रणयनं च सोमाद्वाच्यत्वात् ॥४॥ अथवा सोमात् सौमिकधर्मेणात्राग्न्योः प्रणयनं भवेत् न प्राकृतम् · कुतः वाच्यत्वात् एवं ह्येतद्वाच्यं वक्तव्यं विधेयं भवति यदि सौमिकम् तस्याप्राप्तत्वात् · प्राकृतं तु चोदकेन प्राप्नोत्येव न विधेयम् · विधीयते च द्वयोः प्रणयन्तीति (११.५.१.८) · तस्माद्यन्न प्राप्नोति तदेवैतत्प्रणयनमिति · सौमिकमेव स्यादिति प्रातः आह ·

प्रकृतेर्वानामत्वात् ॥५॥ वा पक्षव्यावृत्तौ · प्रकृतेः प्रकृतिवदेव गार्हपत्यादुद्धरणम् न सोमात् न सौमिकम् इध्माभ्यामाहवनीयादिति · कुतः अनामत्वात् नामधेयं हि धर्मान्प्रापयति न चैतन्नामधेयम् तिङन्तत्वात् प्रणयन्तीति । ननु प्राकृतं चेदेतत्प्रणयनम् तर्हि तस्य चोदकादेव प्राप्तत्वात् किमिति पुनर्विधानम् द्वयोः प्रणयन्तीति · एवमाशङ्क्याह ·

---

1) वेदिं २. but see at ७. 2) Karka says l. c.: प्रकृत्य हि सर्ववेदसं सहस्रेणानुग्रहं दर्शयति ·

ग्रहणं गुणार्थमुत्तरवेद्यग्निनिधानात् ॥ ६ ॥ प्रकृतितः प्राप्तस्यैव प्रणयनस्य [यत्] पुनर्ग्रहणं पुनर्विधानम् एतद्गुणार्थम् · को गुण इति चेत् अस्ति हि गुणः उत्तरवेद्यग्निनिधानात् प्रकृतौ हि आहवनीयखरेऽग्निर्निधीयते इह तूत्तरवेदौ · तेनोत्तरवेदिनिधानार्थमग्नेर्नयनस्य इतरनयनरूपाद्गुणात् द्वयोः प्रणयन्तीति (११.५.२.८) वचनम् द्वयोर्मध्यमयोः पर्वणोः प्रणयन्ति प्रकर्षेण दूरमग्निं नयन्ति उत्तरवेदौ निधानविधानादिति · तस्मात्प्राकृतमेवेदं प्रणयनमिति । सिद्धान्तस्तु ·

आज्यप्रोक्षणीरुद्यम्याग्नी चाह्नाग्निभ्यां प्रह्रियमाणाभ्यामनुब्रूह्येकस्फ्ययानूदेहीति ॥ ७ ॥ पञ्चगृहीतमाज्यं प्रोक्षणीश्चोद्यम्य ऊर्ध्वमुत्थाप्य द्वावग्नी चोद्यम्य होतारं प्रेष्यति अग्निभ्यां प्र॰भ्यामनुब्रूहीति एकस्फ्ययानूदेहीत्येतच्च प्रतिप्रस्थातारं प्रत्याह · आज्यं चात्रेध्माधिश्रयणानन्तरं पूर्णाहुतिवत्संस्कृत्य जुह्वां पञ्चगृहीतं ग्राह्यम् प्रोक्षण्यश्चासंस्कृता आप एव क्वचित्पात्रस्थाः । अथोद्यहन्तीध्ममित्यादिश्रुतौ (३.५.२.२) उद्यहन्ति हस्ताभ्यामुत्क्षिपन्ति सामर्थ्यप्राप्तस्त्रापेक्षं बहुवचनम् तत्राध्वर्युः प्रधानत्वादग्निमुद्गृह्णाति आज्यप्रोक्षण्यादि सामर्थ्यादन्ये गृह्णीयुः । एकः स्फ्यः साधनमस्याः सेयमेकस्फ्या रेखा तया युक्तस्त्वं पश्चादुदङ् उद्वहो यज्ञस्योर्ध्व भागं प्राचीं दिशं द्योतयति · इत्थम्भूतलक्षण ऽइति (पा॰ २.३.२१) तृतीया तया युक्तः प्रतिप्रस्थाताग्निमनुगच्छति स्फ्येन भूमौ लेखां कुर्वन्नित्यर्थः । [एवं सिद्धान्तत्वेन] सौमिकं प्रणयनमुपदिशति · सूत्रकारस्याप्ययमेवाभिप्रायः येन सौत्रामण्याम् (१९.२.४) स्फ्यादि करोति दक्षिणस्यां वरुणप्रघासवदित्याह · तत्र हि श्रूयते (१२.९.३.१३) तद्यदेतावग्नी ऽआहवनीयाद्विह्रियेतेऽइति एतच्च तदेवोपपद्यते यदा वरुणप्रघासेष्वपि प्रतिप्रस्थातुराहवनीयात्प्रणयनं भवतीति प्राकृतत्वे चैतन्न स्यादिति तस्मादत्र सधर्मकं सौमिकमेवाग्न्योः प्रणयनमिति सिद्धान्तः · ततश्चात्र सूत्रकारेणोपयमन्युपनिवपनान्तं (२०) तदेवोपनिबद्धम् । तथा चाह शाङ्खायनः (३.१४.८) आहवनीयाद्याग्नी प्रणयन्ति (११) इलायास्त्वेति साद्यमानयोरिध्मयोरिति च प्राकृते हि

सत्याहवनीयादिति इध्मयोरिति [च] वचनं [न] स्यात्[1] · काठके च श्वो भूते ऽग्नी प्रणयते यथा पशुबन्ध ऽइति · मानवे च आहवनीये ऽग्निप्रणयनानि प्रत्याधत्त इति प्रकृत्य चात्वालादुपयमनीः कुरुते वेदिपुरीषात्प्रतिप्रस्थाताग्निये प्रणीयमानायानुब्रूहीत्यनुवाचयत्यग्निभ्यां वा त्रिरनूक्तायामग्निप्रणयनान्युद्यच्छत इति सधर्मकमेव सौमिकं प्रणयनमुक्तम् · आपस्तम्बसूत्रे विशेषः काले पशुबन्धवद्गार्हपत्यादग्नी प्रणयतो नोद्यतहोमौ जुहुतो ऽन्तरा वेदी प्रतिप्रस्थाता प्रतिपद्यत ऽउत्तरेणोत्तरां वेदिमध्वर्युः पूर्वो ऽध्वर्युरुत्तरवेद्यामग्निं प्रतिष्ठापयति जघन्यः प्रतिप्रस्थाता दक्षिणस्यामिति ।

त्रिरुक्तायां यथावेदि हरणम् ॥ ८ ॥ होत्रा प्रथमायामृचि त्रिरुक्तायां सत्यां स्वस्ववेदिं प्रत्यग्न्योर्हरणं कुरुतः ।

प्रतिप्रस्थाता स्फ्येन लिखत्या वेदिश्रोणेः ॥ ९ ॥ एकस्फ्ययानूद्देहीत्येवमध्वर्युणा प्रेषितः प्रतिप्रस्थाता स्फ्येन आहवनीयादारभ्य दक्षिणां वेदिश्रोणिं यावल्लिखति लेखां करोति · अत्राह लाट्यायनः (५. १. ४–५) अध्वर्युश्चेद्ब्रूयाद्दक्षिनेकस्फ्ययोपसम्भिन्द्धीति स्फ्येनाहवनीयात्पांसून्समुद्धृत्योत्तरस्या[2] वेदेर्दक्षिणादन्तात्कर्षन्नियादावेदि मध्यादेका चेदिति · तेन वेदिद्वित्वे वरुणप्रघासेषु सौत्रामण्यां च दक्षिणवेदिश्रोणिं यावल्लेखाकरणम् एकवेदिके महाहविःपशुबन्धसोमादौ तु वेदिमध्यस्यापरशङ्कुपर्यन्तमेव · तथा च श्रुतावुक्तम् (३. ५. २. २) एतस्मान्मध्यमाच्छङ्कोर्य एष वेदेर्जघनार्धे भवतीति ।

उत्तरवेदेर्वा[3] ॥ १० ॥

वेद्यन्तरे स्थित्वोदङ्ङुत्तरवेदिं प्रोक्षतीन्द्रघोष इति (५. ११) प्रतिमन्त्रं प्रतिदिशं यथालिङ्गम् ॥ ११ ॥ अध्वर्युः अग्नीदग्निमन्यस्मै प्रदाय वेद्योरन्तराले [अथवा] उत्तरवेदेर्दक्षिणपार्श्वे वेदिमध्ये उदङ् स्थित्वा उत्तरवेदिं प्रसिञ्चति मन्त्रलिङ्गक्रमेण पुरस्तादेवाग्र ऽइन्द्रघोष इति पश्चात्प्रचेता इति दक्षिणतो मनोजवा इति उत्तरतो विश्वकर्मेति ।

दक्षिणाच्छसहितं वहिर्वेदि शेषं निषिञ्चतीदमहं तप्तं वारिति (५. ११) ॥ १२ ॥

---

1) ? हि स आहव॰रिति वचनस्यात् २. 2) ॰यात्पांसूनुपहत्योत्त॰ *Lāṭy.* 3) श्रोत्त॰ ?.

ततोऽध्वर्युः प्रोक्षणीशेषमुत्तरवेदेर्दक्षिणांससंलग्नमेव वेदेर्बहिःप्रदेशऽएव निनयति। यदा तु चयने अग्न्यात्मन्युत्तरवेदिः संस्क्रियते तदा बहिर्वेद्येवोत्तरवेदेर्दक्षिणांसस्थानीयेन निनयनम्।

अमुमित्यभिचरन्॥१३॥ अमुमभि निःसृजामीति श्रुतिपठितेन (३.५.२.८) मन्त्रेणाभिचारं कुर्वन् बहिर्वेदि शेषं निषिञ्चति· कर्मबलेन परस्य पीडनमभिचारः।

नाभ्याः श्रोण्यंसेषु पञ्चगृहीतं जुहोत्यक्ष्णया दक्षिणेऽंसे श्रोण्यां श्रोण्यामंसे मध्ये च हिरण्यं पश्यन्त्सिंहयसीति (५.१२) प्रतिमन्त्रम्॥१४॥ ततो ऽध्वर्युरुत्तरवेदेरुत्तरत उपविश्य नाभ्याः श्रोण्यंसेषु द्वयोः श्रोण्योर्द्वयोरंसयोश्चाक्ष्णया कौटिल्येन तत्पञ्चगृहीतमाज्यं जुह्वां गृहीत्वा जुहोति· तत्र क्रममाह नाभेर्दक्षिणेऽंसे उत्तरश्रोण्याम् दक्षिणश्रोण्याम् उत्तरेऽंसे नाभिमध्ये· सुवर्णं विलोकयन्नध्वर्युर्जुहोति· हिरण्यमन्तर्धाय पञ्चगृहीतेन नाभिं व्याघारयतीति मानवे।

भूतेभ्यस्त्वेति (५.१२) स्रुचमुद्गृह्णाति॥१५॥ होमार्थं नीचैः कृतामुद्गृह्णाति ऊर्ध्वां करोति।

नाभिं पैतुदारवैः परिदधाति पूर्ववद्ध्रुवोऽसीति (५.१३) प्रतिमन्त्रम्॥१६॥ पैतुदारवैः देवदारुवृक्षजैः प्रादेशमात्रैः परिधिभिः· पूर्ववदिति मध्यमदक्षिणोत्तरैः (२.८.१)· तथा च काठके त्रीन्परिधीन्पैतुदारवान्प्रादेशमात्रांस्तैरुत्त[रवेदि]नाभिं परिदध्यादिति।

अग्नेः पुरीषमिति (५.१३) निवपति गुल्गुलुसुगन्धितेजनवृष्णोस्तुकाश्चोपरि शीर्षण्या अभावेऽन्याः॥१७॥ निदधाति। गुल्गुलुः प्रसिद्धः· सुगन्धितेजनं रोहीतः। वृष्णो(ः)स्तुकाः शिरोरोमाणि· ताश्च शीर्षण्याः शीर्ष्णि भवाः शृङ्गयोरन्तराले भवानि मेषरोमाणि· अन्या अन्यस्मिन्मेषस्य शरीरप्रदेशे जाताः।

तेष्वग्निं निदधाति॥१८॥ तेषु सम्भारेषु।

उद्धतावोक्षिते दक्षिणम्॥१९॥ उक्षितेऽरत्निमात्रे चतुरश्रे खरे दक्षिणमग्निं निदधाति प्रतिप्रस्थाता· स्मार्ताः पञ्च भूसंस्काराः प्राप्नुवन्त्येव तेषामग्र्यर्थत्वात्· उद्धतमुल्लेखनम् अवोक्षितमभ्युक्षणम् एतत्संस्कारद्वयमत्र विधीयते।

केचित्स्मार्तानामुपलक्षणार्थमुक्तावोक्षितग्रहणमिछन्ति । तत्रैकेनोपलक्षणसिद्धेः इतरवैयर्थ्यं स्यात् । अतोऽधिकविधानमेवेदमिति । अग्निहोत्रदर्शपूर्णमासादावुपलक्षणं विनापि स्मार्तानां संस्काराणां सर्वैरादृतत्वाच्च ।

उपयमनीरुपनिवपति ॥२०॥ अग्नेरुपयमनउपयुक्ता मृत्तिकाः सिकता वा उप समीपे अग्नेर्नीचैः प्रक्षिपति । प्रतिपत्तिरियम् चरितार्थत्वात् । एतदिध्मादानाद्युपयमन्युपनिवपनान्तं सर्वं सौमिकं धर्मजातमत्र भवत्येव । सर्वेषु शाखान्तरसूत्रेष्वत्रैव तस्योपदिष्टत्वात् ।

प्रणीताद्यतः ॥२१॥ प्रणीताप्रणयनादि । अत्र कर्कमते चोदकपरिप्राप्त्या ततः पूर्वमेवाग्न्यन्वाधानशाखाछेदनादि षड्गोपाकरणान्तमुभाभ्यां कर्तव्यम् । तत्र शाखाछेदनानुमार्जनशाखापरिवासनमुभयोः । उपवेषकरणमध्वर्योरेव । न प्रतिप्रस्थातुः । ततः शाखायां पवित्रबन्धनमुभयोः । वत्सापाकरणमुभयोः । वरुणाय भागमित्यध्वर्योः । मरुद्भ्यो भागमिति प्रतिप्रस्थातुः । शाखोपगूहनं द्वयोः । अत्र प्रणीतादीत्युपदेशाद्ब्रह्मवरणं वैकल्पिकव्रतग्रहणान्तं पूर्वं कर्तव्यमिति प्रतीयते ।

व्रतोपायनं वाकृतं चेत् ॥२२॥ पूर्वदिने व्रत्याशनानन्तरं वा ब्रह्मवरणोत्तरकालं वा यदि व्रतोपायनमकृतम् कृतं चेन्न भवति । तदा अतोऽग्निनिधानानन्तरम् न कृत्वा प्रणीताप्रणयनादि । तत्कर्तव्यम् । अत्राह पितृभूतिः व्रतोपायनं पूर्वम् ततः प्रणीतादि । यद्येष पक्षोऽङ्गीकृतः प्राक्प्रणीताप्रणयनाद्व्रतोपायनमिति प्राप्तस्यैव स्मरणार्थमिदमिति । तदेतन्नोपपद्यते । वैकल्पिकानामादाववधारितत्वात् । यदा च ब्रह्मवरणोत्तरकालता व्रतोपायनस्य निर्धारिता तदा तदुत्तरकालीनानां पदार्थानां व्रतोपायनमङ्गम् तेषु च वेदिकरणादिष्वपकृष्टेषु तदङ्गस्यापकर्षो भवत्येव । ततस्तत्रैव व्रतोपायनं भवति । नात्रेति । तस्मादिदमपूर्वं कालान्तरविधानं व्रतोपायनस्य वैकल्पिकम् । पूर्वेद्युरुत्तरवेदिछादनान्तकरणपक्षे शाखाछेदादि वत्सापाकरणान्तमपि पूर्वेद्युरेव कर्तव्यम् । तत्र वत्सापाकरणं रात्रौ । पयोविकारत्वात्पयस्ययोः । तथा चाहापस्तम्बः । अग्नीनन्वाधाय पृथक्शाखेऽआहरतस्तयेध्माबर्हिषी । मारुत्याः प्रतिप्रस्थाता वत्सानपाकरोति

वारुण्या अध्वर्युः शमीमय्यो हिरण्मय्यो[1] वा स्रुचो भवन्ति यथादेवतं सायंदोहौ दोहयतः सद्यस्काला वा वरुणप्रघासा एवं सति लौकिकेन दध्नामिक्षाकर्म स्यात् प्रातर्दोहविकारमेकऽआमिक्षापयसमाहुरिति[2]।

नित्येभ्योऽधिकान्यैन्द्राग्नः पयस्ये वारुणी मारुती काय एककपालः ॥२३॥ अत्र प्रणीताप्रणयनानन्तरमुपयुक्तानि पात्राणि आसाद्य स्फ्योपहितपात्रीकरणादि क्रियते। तत्र हवींष्याह[3] · नित्येभ्यः आग्नेयादिभ्यः पञ्चभ्योऽधिकानि एतानि हवींष्यत्र भवन्ति · तत्र षष्ठं हविरैन्द्राग्नः द्वादशकपालः पुरोडाशो भवति। वारुणी अध्वर्योः मारुती प्रतिप्रस्थातुः। काय एककपालः उपांशु सावित्रश्च नित्येषूपांशु · कशब्दोऽकारान्तः प्रजापतिदेवताया वाचकः कस्येदिति (पा° ४.२.२५) रूपम् · अतश्चात्र सम्प्रैषादौ कायानुब्रूहि इदं कायेति चतुर्थ्यन्तं रूपं भवति न तु कस्माऽइति महाभाष्ये पदमञ्जर्यां च दर्शितम् · तथा चापस्तम्बः कायानुब्रूहि कं यजेत्येककपाले सम्प्रैषाविति। एवमष्टौ हवींष्यध्वर्योः एकं प्रतिप्रस्थातुः · अतश्च प्रतिप्रस्थातुरपि तदुपयुक्तपात्रासादनादि सर्वं भवति। अत्राहापस्तम्बः निर्वपणकालऽआग्नेयमष्टाकपालमिति नवोत्तराणि हवींषि निर्वपति सर्वे यावा भवन्त्यपि वा पौष्णः करम्भपात्राणि मेषाविति यवानां व्रीहीणामितराणीति।

नानाज्यनिर्वपणम् ॥२४॥ आज्यं नाना पृथग्भवति। देशभेदात्तन्त्रभेदे सत्यपि गार्हपत्यस्य साधारण्येनाज्यस्य पत्न्यवेक्षणं तन्त्रेण भविष्यतीति शङ्कानिवृत्त्यर्थमिदं सूत्रम्।

दक्षिणं प्रतिप्रस्थातुः ॥२५॥ अध्वर्योराज्याद्दक्षिणमाज्यं प्रतिप्रस्थातुर्भवति · अवरोत्तमुत्तरमित्यस्यापवादो (१.१०.५) वचनात् · अतश्च मारुत्या अधिश्रयणादि वारुण्या दक्षिणत एव कर्तव्यम्। आज्यनिर्वापानन्तरं यथास्वं दोहौ · प्रथममध्वर्युः ततः प्रतिप्रस्थाता · तत्रोपसृष्टां प्रब्रूतादां धुक्ष्वेत्यादीन्प्रैषान्स्वयमेव कुर्यात् भिन्नकालत्वेन प्रसङ्गसिद्धेरभावात् · तथा च काठके अध्वर्युरेव सम्प्रै-

---

1) ? हिरण्मय्यो २. 2) ? °पयःसमा° २. 3) See २.५.२.७–१३.

NEW ABBREVIATIONS.

I. For the text of the sûtra's and for the vyâkhyâ.

२ my copy of E. I. H. 747 (adhy. II). 749 (adhy. III. IV). 750 (adhy. V). — २ sec. hand.

३ Chambers 790s (text of adhy. II. III). ३ sec. hand.

४ or Ss. Chambers 639, Sa*m*xiptasâra.

५ or Mah. E. I. H. 2714 Mahâdeva's commentary on adhy. II-IV.

Mahîdh. Mahîdhara's vedadîpa.

Karka, Codex Mill. in the Bodleyan library, adhyâya IV.

M. Codex Mill. in the Bodleyan library (text of the whole sûtra). To Dr. Aufrecht's kindness I am indebted for a passim comparison of this excellent copy.

II. For the paddhati (Adhyâya V).

१ Chambers 391ª, 1. — १ sec. hand.

B. Chambers 737.

The passages or words given in crochets [ ] are my own addition; for a part they consist directly from what is given in Ss.: others have been composed out of fragmentary notes taken from the vyâkhyâ (२), where I had not copied the whole text of it: finally there are some, especially in the paddhati, supplied by mere conjecture, in order to render the connexion of the sentences more clear and intelligible or to make good for direct defects of the copies.

Berlin, April 1857.

CORRECTIONS AND ADDITIONS.

Read: ८. ६ पितुः सत्यप्यनुज्ञाने. – १३. ११ तथा (१. ३५). – २५ ऋभव इति (ऋक्संहि° १. ११०. ४). – १४. १ यथेति (ऋक्संहि° ४. ६४. ५). – ५२. २१ चोक्तम् (२. ६. ५) अपरिमितां वेति. – ५९. २० °र्विशेषः (कर्मप्रदीप° २. ५. १६). – २४ हविर्धारणी. – ६२. १२ तदुक्तम् (कर्मप्रदीप° १. ७. ६). – ९०. २४ °धानमगत्या°. – १६९. १ परिभाषाः. – १७९. ११ °अह्नोष्याव. – १८२. १२ [अब्दधीनि]. – १८३. १७ कात्यायनः (कर्मप्रदीप° १. ८. २५). – १८६. १० and ११ प्राङीह्न°. – १८८. ३ हविर्ग्रहण्याम°. – १९०. १७ उदक्तृणा°. – २०५. ४ मा भैष्ट. – २५२. ६ माहेन्द्रं. – २८१. २३ एतदर्थकर्म. – २८२. १९ °ह्रुतादौ. – २१ °वर्तते. – २८४. १७ पूर्वमुपदिष्टः. – ३३६. ८ (९२. ४. १५). –

षान्माहृतीवर्तमिति · आपस्तम्बोऽपि युगपत्कालत्वान्निगदान्साधारणद्रव्यांश्च संस्कारानध्वर्युरिति ।

ध्रुवायाः पुरस्तात्पृषदाज्यमाज्यं दधिमिश्रं पञ्चगृहीतं ज्योतिरसीति (५.३५) समिदन्तेन ॥२६॥ विश्वेषां देवानां समिदित्यन्तेन मन्त्रेण गृह्णाति । पृषदाज्यशब्दस्याप्रसिद्धत्वात्स्वयमेव पर्यायोपादानेन तं व्याचष्टे आज्यं दधिमिश्रमिति · अत्र दध्नो मिश्रणश्रवणात् न तस्य प्राधान्यम् प्राधान्यं त्वाज्यस्यैव · दध्ना तु तस्य पृषत्ता विचित्रता कर्बुरता क्रियते अतो गुणभूतं दधि · प्रयोजनम् केवलेन घृतेनानुयाजेषु कृतेषु नावृत्तिः । अत्रापि ज्योतिरसीति मन्त्रः सकृत्त्रिर्वा प्रयोज्यः प्रकृतिवत् अनुयाजस्याज्यप्रकृतावेवमेव दृष्टत्वात् · ज्योतिरसि विश्वरूपमित्यत्रैव वाक्यस्य परिसमाप्तत्वात्समिदन्तो मन्त्रो न प्राप्नोति तेन समिदन्तेनेत्युक्तम् · न चात्र परादिना पूर्वान्त इति (१.३.१) न्यायः अप्रकरणस्थत्वादिति चतुर्गृहीते जुह्वां चोपभृति च गृह्णाति पञ्चगृहीतं पृषदाज्यं ज्योतिरसीत्यादिश्रुतेः (३.६.३.७) · अतश्चात्र जुह्वामुपभृति च चतुर्गृहीतम् पञ्चगृहीतं पृषदाज्यम् ध्रुवायां चतुर्गृहीतमिति · तदुक्तम् चतुरन्यत्र प्रतिविभागादिति (२.७.१४) ।

अनुयाजार्थं सर्वत्र ॥२७॥ एतत्पृषदाज्यमनुयाजार्थं भवति न केवलमत्र किंतु सर्वत्र [यत्र क्व चन भवति] · अतश्चास्यामुपभृति पृषदाज्यं ग्राह्यम् अनुयाजार्थद्रव्याधारतया तस्याः प्रकृतौ दृष्टत्वात् · प्रयाजार्थं चतुर्गृहीतमाज्यं ततोऽन्यस्यां ग्राह्यम् अन्यथा संकरः स्यादिति ।

औपभृतासादनम् ॥२८॥ अस्य पृषदाज्यस्याधारस्यौपभृतमुपभृत्सम्बन्ध्यासादनं[1] भवति घृताच्यसुपभृदित्येतेन मन्त्रेण (२.६) ।

प्रियेण धाम्नेति वाविशेषोपदेशात् ॥२९॥ अथवा प्रियेण धाम्नेत्यनेन मन्त्रेण पृषदाज्यस्यासादनं भवति यतोऽविशेषेणायं मन्त्र उपदिश्यते प्रियेण धाम्नेति यदन्यद्धविरिति (१.३.४.१४)। प्रकृतौ तिसृषु स्रुक्ष्वासादितास्वेतत्पठ्यते यदन्यद्धविरिति भवति च पृषदाज्यं ताभ्योऽन्यत् तस्मात्प्रियेण धाम्नेत्यासादनमित्येवं प्राप्तेऽनेनैव सूत्रेण परिह्रियते · अविशेषोपदेशात्प्रियेण धाम्नेति

1) ? Thus Ss. °दाज्याधार° २.

मन्त्रेण पृषदाज्यस्यासादनं स्यात् · न चात्राविशेषः अयं ह्यन्यशब्दः प्रकृतानामेव हविषां मध्ये अनासादितस्य पुरोडाशादेरेव वाचको न हविरन्तरमात्रस्य · तस्मात्प्रकृतस्थानापत्त्यौपभृतमेवासादनमिति स्थितम् । तथा चोक्तं मानवे समान७ संमार्जनमुपभृतः पृषदाज्यधान्याश्चेति · आपस्तम्बोऽपि पात्रासादनेऽप्याह पृषदाज्यधानीं द्वितीयामुपभृतमिति · तथा संमार्जने उपभृ[द्व]त्पृषदाज्यधानीमिति · तथा वेद्यामासादनेऽपि उपभृद्वत्पृषदाज्यधानीमिति · तथा पृषदाज्यं जुह्वामानीय पृषदाज्यधानीमुपभृतं कृत्वा तेनानुयाजान्यजतीति ।

उत्तरं वापरकालत्वात् ॥३०॥ एतत्पृषदाज्यग्रहणं ध्रुवाया उत्तरं वा भवति · कुतः अपरत्वात् ध्रौवाज्यविनियोगादपरकाले पश्चात्पृषदाज्यस्यानुयाजेषूपयोगः · अत उपयोगक्रमेण ध्रौवग्रहणानन्तरं वा पृषदाज्यग्रहणमिति शङ्कामात्रम् · ध्रौवात्पूर्वमेव ग्राह्यम् न तु उत्तरम् . वचनाभावे प्रकृतिवदित्यस्य बाधायोगात् · न हि प्रकृतावनुयाजार्थमाज्यं ध्रुवाया उत्तरं गृहीतम् किंतु पूर्वमेव ततोऽत्रापि पूर्वमेव ग्राह्यम् ।

प्रतिप्रस्थाता च ॥३१॥ प्रतिप्रस्थाताप्यत्र पृषदाज्यं गृह्णाति ।

न वा ॥३२॥ गृह्णाति । अथ देशभेदात्प्रतिप्रस्थातुः समग्रं तन्त्रस्य पृथक्प्राप्तावाह ·

प्रणीतापत्नीसंनहनाग्निमन्थनाश्रुतप्रत्याश्रुतप्रैषयजमानवाचनहोतृषदनवरणप्राशित्राङ्गुलिपर्वाञ्जनावान्तरेडाभागापराग्न्यवभृथान्न प्रतिप्रस्थाता ॥३३॥ सूत्रोक्तान्पदार्थान्प्रतिप्रस्थाता न करोति । प्रणीतानां दृष्टार्थत्वपक्षे अध्वर्युकृताभिरेव तस्यार्थस्य सिद्धेर्न पृथक्प्रणयनम् अदृष्टार्थत्वपक्षे तु प्रसङ्गन्यायादेवाभावः । पत्नीसंनहनस्य [अकरणम्] कृतत्वात् · एतच्च प्रोक्षण्यासादनादेः प्रैषार्थस्याध्वर्युकर्तृकत्वपक्षे पत्नीसंनहनेऽध्वर्युणा कृते कृतानुकरत्वेन प्रतिप्रस्थातुर्यत्प्राप्नोति तस्यायं निषेधः अग्नीत्कर्तृकत्वपक्षे तु द्विर्वारं पत्नीसंनहनस्य भावनापि नास्ति · ततश्च कृत्वा-चिन्तेयम् । अग्निमन्थनं तु प्रतिप्रस्थाता न करोति तस्य पञ्चहविःसम्बन्धात् प्रतिप्रस्थातुश्च तेषामभावात् । आश्रुतमाश्रावणम् प्रत्याश्रुतमस्तु श्रौषडिति ·

तदुभयं न करोति। प्रैषाः   होतः त्रिरग्नये समिध्यमानायानुब्रूहीत्येवमादयः · यत्किं च वाचा कर्तव्यं तदध्वर्युः करोति[1]। यजमानवाचनम् सपशुषु रेवति यजमान इति वाचयतीत्येतत् (६. ५. ११) कृतानुकरतया प्राप्तं प्रतिषिध्यते। होतृषदनमप्युत्तरस्यामेव। ब्रह्मवरणम् · संमर्शनं तु प्रतिप्रस्थातुरपि होत्रा कर्तव्यम् · संमृष्टस्योपवेशनं च। अध्वर्युः प्राशित्रमवद्यति। अध्वर्युर्होतुरङ्गुलिपर्वणीऽअनक्ति। होतुः पाणाववान्तरेडावदानं न करोति   इडावदानऽउत्तरस्यापि पृथक्प्राप्तत्वात्। षडवत्तब्रह्मयजमानभागादीन्न करोति · अग्न्यनुगमनादिनिमित्तवशात्प्राप्तासु नैमित्तिकेष्टिष्वग्नयेऽग्निमतऽइत्यादिषु (१२. ४. ३. ५) प्राप्तानां भागानामेष प्रतिषेधः। यद्वा अवान्तरेडारूपं भागमध्वर्युरेवावद्यति। अपराग्निहोमान् पत्नीसंयाजदक्षिणाग्निहोमानध्वर्युः। अवभृथं न करोति   वारुणीशेषसाध्यत्वात्। ·

कृतानुकरोऽन्यत्र दक्षिणस्याम् ॥३४॥   दक्षिणस्यां वेदौ · उक्तेभ्यः प्रणीतादिभ्योऽन्येषु पदार्थेषु अध्वर्युणा प्रथमं कृतस्य पदार्थस्य केवलमनुकर्तैव प्रतिप्रस्थाता भवति[2] ॥   ॥ चतुर्थी कण्डिका ॥४॥

अथ पद्धतिः ॥

सा उत्तरवेदिरेवमाच्छादिता सकलां रात्रिं वसति। ततो रात्रौ स्वयमेवाग्निहोत्रहोमः पूर्वपरिवासितया शाखया पयस्यार्थं वत्सापाकरणमुभयोः   वरुणाय भागमित्यध्वर्योः   मरुद्भ्यो भागमिति प्रतिप्रस्थातुः ·, उभयोः शाखोपगूहनम्[3]। प्रातःकाले[4] अहतवस्त्रपरिधानम् · ततोऽष्टाविंशतिप्रभृतिकाष्ठकमिध्मं त्रियूनबद्धमध्वर्युराहवनीयेऽधिश्रयति   प्रतिप्रस्थाता चैवंविधमेव दक्षिणतो द्वितीयमाहवनीयऽएवाधिश्रयति · उभयोश्चात्वालादाहृत्योपयमनीनामुपकल्पनम् · ततोऽध्वर्युराज्यस्थाल्यां तूष्णीमाज्यं निरुप्य गार्हपत्येऽधिश्रित्य स्रुवं दर्भैरन्तरतो बाह्यतश्च संमृज्य जुहूमपि तथैव संमृज्याज्यमुद्वास्य पवित्राभ्यामुत्पूय जुह्वां पञ्चगृहीतं गृहीत्वा कस्यचिद्धस्ते धारणार्थं समर्पयेत् · देवदारुपरिधित्रयगुग्गुलुरोहीत्यपुष्पमेष-

---

1) See २. ५. २. ३३.   2) See २. ५. २. ३४.   3) इति पूर्वेद्युःकर्म प्रतिपर्वपक्षे · पक्षाहिकपक्षे वैश्वदेवपर्वसमाप्त्युत्तरं तस्मिन्दिने करम्भपात्रकरणाद्युत्तरवेद्याच्छादनान्तम् B. · 4) Thus B. ततः काले १.

शिरोरोममपि[१] कस्यचिद्धस्ते समर्पयेत् · एकस्मिन्पूर्णपात्रे प्रोक्षण्यर्थं लौकिकमुदकं च कृत्वा तदपि कस्यचिद्धस्ते समर्पयेत् · ततः प्रदीप्ताविध्मौ यथास्वमुल्मुकाभ्यां प्रज्वाल्याग्नी ... ततः प्रदीप्ताविध्मौ ययास्वमुख्म्योपयमनीभिः सिकताभिर्मृद्भिर्वा युक्तकर्परादिकमग्न्योरधस्ताद्धारयति दाहनिवारणाय · एवमाज्यप्रोक्षणीरग्नी चोद्यम्याध्वर्युरेव होतारं प्रत्याह अग्निभ्यां प्रह्रियमाणाभ्यामनुब्रूहीति · तत एकस्फ्ययानूद्देहीति प्रतिप्रस्थातारं प्रेष्यति[२] · ततो होत्रा प्र देवं देव्येत्यस्यां[३] प्रथमायामृचि त्रिः पठितायां सत्यामध्वर्युः स्ववेदिं प्रति स्वमग्निं हरति प्रतिप्रस्थाता च स्ववेदिं प्रति स्वमग्निं हरति उभौ स्वस्ववेदीऽउत्तरेण गच्छतः · ततः प्रतिप्रस्थाता स्वाग्निं हरन्नेव सव्यहस्ते कृत्वा आहवनीयखरादारभ्याध्वर्युवेदिमध्यं यावत्स्फ्येन लेखां करोति अथवोत्तरवेदिं[४] यावत् उत्तरस्या वेदेर्दक्षिणां श्रोणिं यावद्वा[५] इति त्रयो विकल्पाः · ततोऽध्वर्युरुत्तरवेदिसमीपे गत्वा विरोधादसामर्थ्यादग्निमन्यस्मै प्रदायान्यहस्तात्पूर्णपात्रादिस्थं प्रोक्षण्युदकमादायोत्तरवेदेर्दक्षिणतो वेदिमध्ये उत्तरामुखः स्थित्वा इन्द्रघोषस्त्वा वसुभिरिति (५.११) मन्त्रेण तेन लौकिकेन प्रोक्षण्युदकेन पूर्वभागे उत्तरवेदिं प्रोक्षति ततः प्रचेतास्त्वेति पश्चात्प्रोक्षति मनोजवास्त्वेति दक्षिणतः प्रोक्षति ततो विश्वकर्मा त्वेत्युत्तरतः प्रोक्षति · तत उत्तरवेदेर्दक्षिणांससंलग्नं बहिर्वेदि इदमहमिति (५.११) प्रोक्षणीशेषं निनयति · अभिचरतः इदमहं तं वारमुं वैरिणमभि निःसृजामीति मन्त्रे विशेषः अमुमित्यत्र शत्रोर्नामग्रहणम् · तत उदकस्पर्शः अभिचाराभावे उदकोपस्पर्शनाभावः · तत उत्तरत उपविश्य दक्षिणं जान्वाच्य नाभिं दर्भैः परिस्तीर्य यत्र क्वचन स्थितं हिरण्यं विलोकयन्नाभ्याः श्रोण्योरंसयोर्मध्ये च पञ्चसु स्थानेषु पञ्चगृहीतमाज्यं कुशोपग्रहोऽध्वर्युर्जुहोति सिंह्यसीति (५.१२) नाभेराग्नेयकोणे इदं सिंह्यै १ सिंह्यस्यादित्यवनिः स्वाहा उत्तरश्रोण्याम् इदं सिंह्याऽआदित्यवन्यै २ सिंह्यसि ब्रह्मवनिरिति दक्षिणश्रोण्यां इदं सिंह्यै ब्रह्मवन्यै ३ सिंह्यसि सुप्रजावनिरित्युत्तरेंऽसे जुहोति इदं सिंह्यै सुप्रजावन्यै रायस्पोषवन्यै ४ सिंह्य-

---

१) ? रोहीष्यमुष्यमेष्यशि° १. २) प्रेषयति १. ३) See Çânkhây. ३. १४, १.
४) °दि १. ५) ? °णाश्रोणिया° १.

स्यावद्धेति नाभिमध्ये जुहोति ३८७ सि७६ये ५ · ततो होमार्थ नीचैः कृतां स्रुचमूर्ध्वां करोति भूतेभ्यस्त्वेति (५. १२) · ततो नाभिं प्रादेशमात्रैर्दैवदारुपरिधिभिः परिदधाति ध्रुवोऽसीति (५. १३) पश्चात् ध्रुवक्षिदसीति दक्षिणतः अच्युतक्षिदसीत्युत्तरतः · ततोऽग्नेः पुरीषमसीति (५. १३) मन्त्रेण गुग्गुलुसुगन्धितेजनवृष्णीस्तुका [नाम्यां निदधाति · वृष्णी स्तुका] मेषरोमाणि तानि मेषस्य शृङ्गान्तराले वर्तमाना मस्तकाद्ग्राह्याः तदभावेऽन्यस्मात्प्रदेशात् · ततस्तेषु सम्भारेष्वग्निं स्थापयति · उपयमनीरग्निसंनिधावेवोत्तरत उत्तरवेदावेव निवपति · प्रतिप्रस्थाताप्याहवनीयखरे पञ्च भूसंस्कारान्कृत्वा पुनरुल्लेखनाभ्युक्षणे चाधिके कृत्वा तत्राग्निं स्थापयति · अग्निसंनिधौ खरस्योपर्येवोपयमनीर्निवपति ॥ सद्यस्काला वा वरुणप्रघासा भवन्तीति आपस्तम्बवचनात्स्वशाखोक्तद्व्यहकालतासम्भवाभावे सद्यस्काला यदा क्रियन्ते तदा पूर्वेद्युः करम्भपात्रमेषमेषीकरणान्तं कृत्वा वस्रप्रोक्षण्यादिकं सुगुप्ते देशे निधाय प्रातरहतवस्त्रपरिधानादि · अध्वर्युप्रतिप्रस्थात्रोः शाखाछेदनादि उपगूहनान्तम् · ततो यजमान वाचं यच्छेति प्रैषः ·१अध्वर्योस्तृणशम्ययोरासादनम्[1] प्रतिप्रस्थातुस्तृणस्य · पूर्वसंस्कृतप्रोक्षणीभिर्दैव्यायेत्युभयोः प्रोक्षणम् · तृणाग्रहणम् · ततो वेदिमानाद्युपयमन्युपनिवपनान्तमिति विशेषः । अत्र कर्कमते पूर्वेद्युः समारोपाद्यकृत्वैव करम्भपात्रकरणार्थमेव केवलं दक्षिणाग्निमुद्धृत्याध्वर्योस्तूष्णीं करम्भपात्रकरणं निधानान्तम् · उदकेनैव संयवनम् · नेदानीं मेषमेष्योः करणम् · तदन्ते दक्षिणाग्निर्लौकिकः · प्रातः समारोपः केवलस्य गार्हपत्यस्य · ततो मन्थनम् · नोद्धरणम् · अन्वावरणम् · प्रणीताप्रणयनम् · पञ्चकासादनाद्युपयमन्युपनिवपनान्तं कृत्वा दक्षिणाग्निमुद्धृत्याद्यन्वाधानशाखाछेदपरिस्तरणपात्रसादनादि · ऐन्द्राग्नानन्तरमध्वर्योर्मन्त्रेण मेषार्थयवग्रहणम् तमनु प्रतिप्रस्थातुर्मेष्यर्थं यवग्रहणम् · इतरहविर्भिः सहैव कण्डनपेषणसंयवनमेषमेषीकरणोर्णाक्षेपणानि कृत्वा श्रपणाकाले कुम्भ्योरुदकमध्येऽवधाय[2] श्रपणमिति विशेषः । मेषमेष्योर्यागसाधनत्वमेव कर्कमते शाखान्तरीयसर्वसूत्रेषु च हरिस्वामिश्रीअनन्तयाज्ञिकमते च होमसाधनत्वम्[3] · उभयमतेऽपि मेषकर्तृत्वमध्वर्योरेव युज्यते मेषीकर्तृत्वं च

---

१) ? ०र्व्योः स्तृणाश्र० १. २) ? कुम्भ्यो० १. ३) See schol. at ५. ३. ८.

प्रतिप्रस्थातुरेव समल्लकमात्रे विशेषः[1] · शाखान्तरीयस्पष्टवचनात्करम्भकर्तृत्वमपि प्रतिप्रस्थातुः पत्न्या वा · करम्भपात्राणां च निःसंदिग्धं होमसाधनत्वमेव तेन तूष्णीमेव · तत्रापि जुहोतीनामपूर्वत्वपक्षाश्रयणे निर्वपणवितुषीकरणोपत्तापनपेष[ण]संयवनानि कृत्वा पात्राणि कार्याणि प्रतिप्रस्थात्रा पत्न्या वा नाध्वर्युणा · पात्रनिर्वापे प्रतिप्रस्थातुः कर्तृत्वम् पात्रकरणे तु पत्न्या इत्यापस्तम्बः तन्मते पात्रघटनमात्रे पत्न्याः नाधिकम् · तत्र पयस्यया सह प्रदाने मेषमेष्योरपि यागसाधनत्वमेव युज्यते अन्यथैकस्यैव वारुणयागस्य यागत्वं होमत्वं चेत्युभयरूपतापत्तेः · अत्राहापस्तम्बः एतस्मिन्काले °कुम्भीपाक्यौ वा भवत इति[2] · काठके यावन्तो °वेष्येति[2] · मानवे उत्तरतो °श्रेपय[त इ]ति[2] ॥ अथ प्रकृतमुच्यते । उपयमनीनां निवपनानन्तरमध्वर्युः प्रणीतार्थमासनद्वयमुपकल्प्य प्रणीताप्रणयनं करोति · ब्रह्मवरणोत्तरकालं. ततः प्राग्वा व्रतग्रहणमकृतं चेदत्र कर्तव्यम् · प्रणीताप्रणयनात्पूर्वं यजमानः करोति · प्रतिप्रस्थातुः प्रणीतापत्नीसंनहनादीनां सूत्रोक्तानामभावः तद्वर्जितं सर्वमध्वर्युकरणानन्तरं समल्लकमेवं करोति · अध्वर्योर्मध्यमाहवनीयवर्ज्जं त्रयाणामग्नीनां परिस्तरणम् प्रतिप्रस्थातुः स्वाहवनीयस्यैव · अध्वर्योः पात्रासादनम् शूर्पम् कपालानि त्रयस्त्रिंशदेकोनत्रिंशद्वा स्थाल्यस्तिस्रः[3] शम्याकृष्णाजिनम्[4] उलूखलमुसले दृषदुपलम् पात्रीधान्यम् शाखोपवेषः वस्त्राग्निहोत्रहवणीपवित्राणि पूर्वमेवासादितप्रोक्षितानि विद्यन्ते तेन नात्र पुनरासाद्यन्ते संयवनोदकम् स्थाली आज्यं च वेदश्च दोहनचतुष्टयम् दक्षिणार्थे धेनुर्वाश्वो वा षड्वा गावो द्वादश वा अश्विः विंशतिकाष्ठक इध्मः कुशप्रसूप्रस्तरोपसंनद्धं[5] त्रेधा बर्हिः स्रुवो जुहूः उपभृद्द्वयम् एका ध्रुवा संमार्गार्हाणि यानि चेत्यत्र प्राशित्रहरणे शृतावदानमेक्षणे वाजिनभाण्डम् चतस्रः पुरोडाशपात्र्यः योक्त्रम् पृषदाज्यार्थं दधि यूनकुशाः पक्षे परिधयः शमीपत्त्रमिश्राणि करीराणि मन्थनचतुष्टयम् कुशास्तृतं पीठम् इडापात्री षडवत्तं च अन्तर्धानकटः पूर्णपात्रम् पक्षे

1) See १.२.५–७. 2) See schol. at ५.३.६· 3) Thus B. °स्त्रियः १. 4) Thus B. शेव्यांक° १. 5) ? कुशप्रस्वप्र° १. कुशप्रस्वप्रस्तर उप° B.

कर्मापवर्गा समिदिति तुरचतुष्टयं वा · प्रतिप्रस्थातुः पात्रासादनमुच्यते स्फ्याग्निहोत्रहवणीपवित्राणि सन्त्येव शेषमासाद्यते तद्यथा स्थाली आज्यं च वेदश्च दोहनचतुष्टयम् अभ्रिः इध्मो विंशतिकाष्ठकः बर्हिः प्राकृतमेव न त्रेधा स्रुवो जुहूः करम्भपात्रहोमार्थमैषीकं शूर्पम् अर्थपरिमाणादीर्घा एका करम्भपात्री च उपभृद्ध्रुवा शृतावदानम् यूनकुशाश्च परिधयः वाजिनभाण्डम् शमीपलाशमिश्राणि करीराणि पक्षे पृषदाज्योपभृत् पृषदाज्यार्थं दधि · ततोऽध्वर्युः पात्रीमपरेण गार्हपत्यं प्रागग्रां निधायाधस्तादुदञ्चं स्फ्यं प्रेरयति · ततः पात्रान्तरे प्रोक्षणीरुन्नीय शूर्पाग्निहोत्रहवण्यादानादि । नानाबीजधर्माश्चरुधर्माश्च वैश्वदेवपर्वण्युक्ता एव [1] तेनात्र विशेषमात्रं लिख्यते । ग्रहणे अग्नये जुष्टम् सोमाय जुष्टम् सवित्रे जुष्टम् सरस्वत्यै जुष्टम् पूष्णे जुष्टम् इन्द्राग्निभ्यां जुष्टम् काय जुष्टमिति · प्रोक्षण्यः संस्कृता एव सन्त्युभयोरपि · पात्रान्तरात्प्रोक्षणीरग्निहोत्रहवण्यां कृत्वा हविषः प्रोक्षणम् तत्र चतुर्थ्यन्तदेवतापदोच्चारणानन्तरं त्वा जुष्टमिति विशेषः · उभयोः पात्रप्रोक्षणादि · ततः कृष्णाजिनादानादि अध्वर्युतन्त्र एव कुक्कुटाहननम् · कणान्ते विभज्यालम्भो व्रीहिमयपुरोडाशपक्षे इदमग्नेः सवितुः पूष्ण इन्द्राग्न्योः कस्य च इदꣳ सोमस्य सरस्वत्याश्च · अग्नीधः कपालोपधाने आग्नेयस्याष्टौ सवितुर्द्वादशाष्टौ वा ऐन्द्राग्नस्य द्वादश कस्यैकम् तस्मिंस्तप्यस्वेत्यूहः · पूर्वमध्वर्योराज्यं निरुप्य ततः प्रतिप्रस्थातुराज्यं निर्वपेत् एवमेव क्रमेण वेदौ करोति · प्रोहणान्तेऽध्वर्योर्वारुणीपयस्यार्थमुपसृष्टादिपरिक्षालनान्तो दोहः ततः प्रतिप्रस्थातुर्मारुत्यर्थमुपसृष्टादि परिक्षालनान्तो दोहः तत्र उपसृष्टां प्रब्रूतादित्यादीन्प्रैषान्प्रतिप्रस्थातैव ब्रूयादित्यापस्तम्बसूत्रे · तत ईक्षणं पिष्टानां तण्डुलानां च ईक्षणान्ते पौष्णाविवेकः तत्र इदमग्नेः सवितुरिन्द्राग्न्योः कस्य च इदं पूष्णः · चर्वोर्विभज्यालम्भः इदꣳ सोमस्य इदꣳ सरस्वत्याः · ततो यथाक्रमं संवापः · संयवनानन्तरं विभज्यालम्भे इदमग्नेः इदꣳ सवितुः इदमिन्द्राग्न्योः इदं कस्येति · यथाक्रममधिश्रयणम् अग्नीदध्वर्योराज्यमधिश्रित्य दक्षिणतः प्रतिप्रस्थातुरधिश्रयति · ऐन्द्राग्नादुत्तरं वारुण्याः पयस्या-

---

१) See pag. ४३१,२० ff.

याः स्थानम् तदनन्तरं मारुत्याः प्रतिप्रस्थातुराज्याद्दक्षिणतः तदुत्तरं कायस्येति सम्प्रदायः · पयस्ये वर्जयित्वा पर्यग्निकरणम् · यथाक्रमं श्रपणमुभयोः · तप्ते पयसि दधिप्रक्षेप उभयोः · शृतालम्भनम् · पुरोडाशानामभिवासनम् · पात्र्यङ्गुलिप्रक्षालनस्थापनपक्षे पूर्वस्थापितपात्र्यङ्गुलिप्रक्षालनेन सहोभयोः पृथगाप्योदकनिनयनम् · ततोऽग्निमादाय वेदिखननमुभयोः · ततोऽध्वर्योरिव ब्रह्मन्नुत्तरौ परिग्रहौ परिग्रहीष्याव इति प्रैषः ब्रह्मणः पूर्वपरिग्रहवद्ग्रहः हरिस्वामिमतऽऊहाभावः · परिगृहीतमित्यनुज्ञातौ उत्तरं परिग्रहं कुरुतः · दक्षिणतः पुरीषमुद्धृत्य प्रत्यक्संस्थमनुमार्जनमुभयोः · अग्नीदध्वर्योः प्रोक्षणीर्धारयति प्रतिप्रस्थाता च स्वयम्[1]। ततोऽध्वर्युः स्फ्यमुद्यम्य प्रेष्यति तत्रोक्तः प्रोक्षणीरासादयेध्मौ[2] बर्हिषी ऽउपसादय स्रुचः संमृड्ढि पत्नीं संनह्याज्याभ्यामुदेहीति । स्फ्योदक्प्रहरणमुत्कर ऽउभयोः · अग्नीदुभयत्र प्रोक्षण्याद्यासादयति प्रतिप्रस्थातुर्दशस्फ्येध्माबर्हिषासादनं[3] प्रणीताभावेऽपि । ततः पात्रसंमार्गः · उभयोर्वेद्योस्तृणाग्राणि मूलानि च गृहीत्वा पृथक्पृथक्स्थापयति · यथास्वं तृणैरुभयोः पात्राणि संमार्ष्टि पूर्वमध्वर्योः स्रुवम् ततः प्रतिप्रस्थातुः स्रुवम् पूर्वमध्वर्योर्जुहूम् ततः प्रतिप्रस्थातुर्जुहूम्[4] तूष्णीं शूर्पं च ततोऽध्वर्योरुपभृतं च ततः प्रतिप्रस्थातुरुपभृतं पृषदाज्योपभृतं च[5] ततो ऽध्वर्योर्ध्रुवाम् ततः प्रतिप्रस्थातुर्ध्रुवाम् ततस्तूष्णीं प्राशित्रहरणे शृतावदानं मेक्षणं चाध्वर्योः प्रतिप्रस्थातुः शृतावदानस्य[6] · ततः करम्भपात्र्याश्च ततो वाजिनभाण्डस्याध्वर्योः ततः प्रतिप्रस्थातुर्वाजिनभाण्डस्य ततः पुरोडाशपात्रीणाम् · ततः संमार्जनान्युत्करे निरस्यति आहवनीयप्रासनपक्षे यथास्वं प्रासनम् । ततः पत्नीसंनहनम् · आज्येऽउद्वास्य पत्न्याज्येऽअवेक्षस्वेति प्रैषेण द्वेऽआज्ये प्रदर्श्य यथास्वं वेद्योरासादयति । ततोऽध्वर्युराज्यमुत्पूय प्रोक्षणीश्चोत्पूयाज्यमवेक्षते · ईक्षणान्ते पृषदाज्यार्थं स्थाल्यन्तरे दधि प्रक्षिप्य दध्न्येवाज्यं प्रक्षिपेत् दध्न्याज्यमानीयेत्यापस्तम्बवचनात् ततो जुह्वामुपभृति च चतुर्गृहीतं गृहीत्वा पृषदाज्योपभृति पञ्चगृहीतं गृह्णीयात् ज्योतिरसि विश्वरूपं विश्वेषां देवानां

1) ? चत्तां १. 2) Thus १. प्रोक्षण्याद्या॰ B. 3) दश i. e. दशगण See २. ३. ८
4) ? ॰तुस्रुवंजुहूं १. 5) अध्वर्योरुपभृद्द्वयं प्रतिप्रस्थातुरुपभृत् B. 6) i. e. संमार्जनम्.

समिदित्यन्तेन अत्रापि सकृन्मन्त्रस्त्रिर्वा इति कर्कः अपूर्वस्यैव मन्त्रस्य संख्यायाश्च विधानात्पञ्चकृत्वोऽपि भवतीति याज्ञिकाः · ध्रुवायां चतुर्गृहीतमेव · प्रतिप्रस्थातुराज्योत्पवनादि प्राकृतमेवाज्यग्रहणम् पृषदाज्यपत्नेऽध्वर्युवत् । अध्वर्योरिध्मविस्रंसनादि · ब्रह्मन्निध्मौ प्रोक्षिष्याव इत्यध्वर्योरेव प्रैषः · ब्रह्मा च प्रोक्षतं यज्ञं देवता वर्धयतं युवां नाकस्य° यजमानं च धत्तम् ओं३ प्रोक्षतमित्यूह्तितेन मन्त्रेणानुजानाति · यथास्वमिध्माविध्योः प्रोक्षणम् · उभयोर्बर्हिःसमर्पणम् प्रतिगृह्य वेद्यां प्राग्ग्रन्थ्यासादनम् ब्रह्मन्बर्हिषी प्रोक्षिष्याव इति प्रैषः · बर्हिषः प्रोक्षणमुभयोः · मूलावसेक उभयोः · पवित्रयोः कृतचिह्नयोः प्रणीतासु स्थापनमुभयोः · चत्वार्यपि संनहनानि विस्रंस्य श्रोणौ निधेयानि · पञ्चधातुभिर्वा वेदिं[1] स्तृणीयादध्वर्युः प्रतिप्रस्थाता च प्रकृतिवत् · तत इध्मात्समिधमादायोभयोः प्रस्तरादानादि प्रस्तराभिन्यासान्तम् । प्रतिप्रस्थाता जुहूमासाद्य दक्षिणवेदौ तूष्णीं शूर्पमासादयति प्रस्तर एव प्रतिग्रहपूर्वकं च · अग्नीदुभाभ्यां स्रुचोऽर्पयति · उपभृदनन्तरं तद्वदेव पृषदाज्योपभृतमासादयति. उपभृद्वत्पृषदाज्यधानीमित्यापस्तम्बवचनात् · ततो ध्रुवासादनान्तमुभयोः · ततः पुरोडाशानां विभस्मीकरणम् · प्रतिप्रस्थातुः करम्भपात्र्याः स्थापनम् वाजिनपात्रस्य स्थापनमुभयोः पुरोडाशपात्रीणां स्थापनमध्वर्योः · एकस्यामेव[2] करम्भपात्रसंख्यस्थानेपूपस्तारः यथास्वं वाजिनपात्रयोः पुरोडाशपात्रीषु च · ततस्तत्रस्याभिघारमदत्वा वा वाजिननिषेक उभयोर्यथास्वम् ॥ ॥४॥

इति पञ्चमस्य चतुर्थी कण्डिका ॥ ॥

वाजिने निषिच्योभयोः[3] करीराण्यावपति शमीपलाशमिश्राणि ॥१॥ यथास्वं द्वयोः पयस्ययोः वाजिने निषिच्य पृथक्पात्रयोरवस्राव्य उभयोः पयस्ययोर्मध्ये । शमी नाम कण्टकी वृक्षः तस्य पर्णानि शमीपलाशानि · करीरोऽपि अपर्णः कण्टकी वृक्षः तस्य फलानि करीराणि । शमीपर्णानां करीरफलानां च तुल्य-

---

1) ? विदि १. 2) sc. पात्र्यां B. 3) वाजिने निषिच्य ॥४॥ उभयोः १. and the paddhati.

त्वम् न तु[4]) मिश्राणीति सूत्रणात्पलाशानां गौणत्वम् सहप्रत्नेपार्थं तु मिश्राणीति सूत्रितम् · तुल्यतायाः प्रयोजनम् पर्णावापविस्मरणे प्राक्पयस्यायागात्ते न्युप्यन्तऽएव · गुणभावे तु तथा न स्यात् । वाजिने निषिच्यावपतीति ल्यवादेशात्तत्रस्थाभिघारात्प्रागेव निर्वापो यथास्वमेव · एतानि च पयस्ययोः संस्कारकाणि न प्रदेयद्रव्यभूतानि अतश्चैषां प्रदेयद्रव्यधर्मा न भवन्तीति ।

मेषमिथुनं च ॥२॥ यथास्वं पयस्ययोरावपति । तत्र विभागार्थधर्ममाह ·

मारुत्यां मेषम् ॥३॥ अध्वर्युः · परिशेषात्प्रतिप्रस्थाता वारुण्यां मेषीम् । पुरोडाशधर्मप्राप्त्या पात्र्योरासादनं मेषमिथुनयोः प्राप्नोति वचनाच्च तत्पयस्ययोः क्रियते · ततश्च पूर्वं पयस्ययोरुपस्तीर्य यथास्वं मेषमेष्योरावापः पयस्ययोः प्राणदानानन्तरं यथास्वं प्राणदानं च · प्रदेयधर्मास्तु तयोर्भवन्त्येव पयस्यावदानेन सह तयोरवदानविधानेन तद्वदेव प्रदेयतानिश्चयात् ।

सर्वाणि हवींष्युत्तरस्यामासादयति ॥४॥ अध्वर्युराग्नेयादीनां तत्रस्थाभिघारादि कपालोद्वासनान्तं कृत्वा मारुतीकरम्भवर्जितानि सर्वाणि हवींषि आग्नेयादीन्यष्टौ कायपर्यन्तान्युत्तरस्यां वेदावासादयति वाजिनं चोत्करे सादयति ।

मारुतीं सहार्यां प्रतिप्रस्थाता दक्षिणस्याम् ॥५॥ प्रतिप्रस्थाता स्वकीयपयस्यायास्तत्रस्थाभिघारादि वाजिनस्य प्राणदानान्तं कृत्वा आज्यस्थालीसहितां दक्षिणस्यां वेदावासादयति वाजिनमुत्करऽएव । करम्भपात्राणां तु पुरोडाशधर्मकत्वात्तत्पात्रीणां संमार्गोपस्तरणादिकं भवति · करम्भपात्राणामप्यभिघारणोपस्तीर्णासु-पात्रीषु-निधानप्राणदानदक्षिणस्यां-वेद्यामासादनालम्भास्तूष्णीं[2]) भवन्ति प्रतिप्रस्थातृकर्तृकाः अध्वर्युकर्तृकनिर्वापपक्षेऽध्वर्युकर्तृकाः । मेषयोरपि यथास्वं प्राणदानं तूष्णीं मन्त्रेण वा यथाङ्गीकारं भवत्येव समन्त्रकपक्षे च प्रियाभ्यां धामभ्यामित्यूहितेन मन्त्रेण · पयस्ययोर्यथास्वमासादनम् यथास्वं [मिथु]मिष्योरालम्भः ।

संमार्जनाय प्रेषितेऽसंमृष्टे प्रतिप्रस्थाता पत्नीमानेष्यन्नाह केन चरसीति ॥६॥ हविरासादना[लम्भात्मा]लम्भोदकालम्भाल्तिऽग्निमन्थनहोतुरामन्त्रणादि · पूर्वाघा-

---

1) ? ननु २. 2) °त्राण्याणामथभिघारणोपस्तीर्णापस्तीर्णास्तुपा° २.

रानन्तरं संमार्जनाय प्रेषिते अग्निसंमार्गार्थं प्रैषे दत्तेऽसंमृष्टे अग्निसंमार्गे अकृते प्रतिप्रस्थाता गार्हपत्यसमीपे गत्वा करम्भपात्रहोमार्थं[१] पत्नीमानेष्यन्नाह · केन पुंसा सह त्वं चरसि · किमनेनैव भर्त्रा आहोस्विदन्येनापीत्यर्थ इति हरिस्वामिनः । केन जारेण सह त्वं चरसीति मानवे ।

सꣳस्तुतानाचष्टे[२] ॥७॥ संस्तुताः[३] भर्तृव्यतिरेकेण ये संगताः परिज्ञाताः[४] जारा इत्यर्थः · पत्नी एतावन्तो मे जारा इति नामग्राहं वा कथयतीत्यर्थः · अमुना अमुना सह चरामीति नो चेन्नान्येनेति पितृभूतिः ।

तृणानि वोद्गृह्णाति यथासꣳस्तुतम् ॥८॥ यदि लज्जादिवशाद्वा संस्तुताञ्जारान्न कथयति तदा प्रतिसंस्तुतं प्रतिजारं तृणानि उद्गृह्णाति भूमिस्थाद्दर्भपूलान्निष्काश्योर्ध्वानि गृह्णाति · प्रतिसंस्तुतमेकैकतृणोद्ग्रहणम् ।

अनाख्यातमहितं ज्ञातिभ्य इति श्रुतेः (२. ५. २. २०) ॥९॥ तथा च मानवे प्रतिप्रस्थाता गार्हपत्यान्ते पृच्छति पत्नि कति ते कान्ता यदि मिथ्या वक्ष्यसि प्रियतमस्ते सꣳस्थास्यतीति यं निर्दिशेत्तं वरुणो गृह्णात्विति ब्रूयादिति · काठके च प्रतिप्रस्थाता पत्नीमाह कति ते कान्ता इति सत्यं वदेन्निर्दिष्टांस्तान्वरुणो गृह्णात्विति [ब्रूयादिति] · तैत्तिरीयकेऽपि पृच्छति कति ते जारा इति यानाचष्टे तान्वरुणो गृह्णात्विति निर्दिशति यज्जारꣳ सन्तं न प्रब्रूयात्प्रियं[५] ज्ञातिꣳ सꣳरुन्ध्यादसौ मे जार इति निर्दिश्यैवैनं वरुणपाशेन ग्राहयतीति विज्ञायतऽइति ।

आख्याते प्रघासिन इत्येनां (३. ४४) वाचयति नयन् ॥१०॥ आख्याते पत्न्या असौ मे जार इति प्रतिवचने दत्ते तृणोद्ग्रहणे वा कृते नो चेत् भर्तृव्यतिरेकेण न केनापि केवलेन स्वभर्त्रेत्याख्याते[६] । अस्याश्च [ऋचः] पुरोऽनुवाक्यास्थानीयत्वम् यथा पुरोऽनुवाक्येत्यादिना श्रुतत्वात् (२. ५. २. २१) · ततश्च करम्भपात्रहोमे मरुतां देवतात्वम् तेनेदं मरुद्भ्य इति त्यागः ।

करम्भपात्राणि जुहोति शूर्पेण मूर्धनि कृत्वा दक्षिणेऽग्नौ प्रत्यङ्मुखी जाया-

---

[१] °पात्रकोसार्थं २. [२] Thus १. M. Ss. Sâyana at २. ५. २. २०. साꣳस्तुतान् २. [३] ? संस्तुता २. [४] ? परितेताः २. परिज्ञाताः Sâyana l. c. [५] Thus Sâyana l. c. न ब्रू° २. [६] ? न केनापीकेन स्वभर्त्रेत्या° २.

पती वा दक्षिणेनाहृत्य तीर्थेन पूर्वेण वेदिमपरेण वा यद्ग्रामऽइति (३.४५) ॥ ११ ॥ क॰णि पत्नी जुहोति जुहूस्थानापन्नेन शूर्पेण मस्तकस्योपरि शूर्पं कृत्वा · यद्वा पत्नीयजमानौ जुहुतो नैकाकिनी पत्नी · उपस्तारस्रुवावधानद्विरभिघारणसंस्कृतानि शूर्पस्थानि करम्भपात्राणि वितानं दक्षिणेन ब्रह्मयजमानयोरग्न्योश्चान्तरेणाग्न्योः पुरस्ताद्दक्षिणमाहृत्य आनीय तीर्थेन चात्वालोत्करावन्तरेण प्रवेश्य वेदिचात्वालयोरन्तरालेन पूर्वेणोत्तरवेदिं दक्षिणस्याग्नेः पुरस्तादाहृत्य अथवा तीर्थेन प्रवेशनानन्तरमुत्तरां वेदिमपरेण चानीय वेद्योरन्तरालेन दक्षिणस्याग्नेः पुरस्तदानीय जुहोति पत्नी · [जायापतीपक्षे] होममन्त्रपाठ उभयोः त्यागश्च पूर्वसूत्रऽएवोक्तः । अत्राहापस्तम्बः अन्तरा वेदी गत्वा यजमानः पत्नी चोत्तरेण वोत्तरां वेदिमैषीके[१] शूर्पे करम्भपात्राण्योप्य शीर्षन्नधिनिधाय पुरस्तात्प्रत्यञ्चौ तिष्ठन्तौ दक्षिणाग्नौ[२] शूर्पेण जुहुतो मो पू ण इन्द्रेति यजमानः पुरोऽनुवाक्यामन्वाह यद्ग्रामऽइत्युभौ याज्यामक्रन्कर्म कर्मकृत इति प्रतिपरायतो[३] ऽपि वाध्वर्युः प्रतिप्रस्थाता वा जुहुयादप्यग्रेण दक्षिणमग्निं पुरस्तात्प्रत्यञ्चाववतिष्ठेते[४] शूर्पं शिरसोरवधाय मो[५] षू ण इन्द्रेति जपति यजमान उत्तरस्तिष्ठन् यद्ग्रामे यदरण्यऽइति जुहुतः शूर्पेण करम्भपात्राण्यक्रन्कर्म कर्मकृत इति व्युत्क्रामत इति · काठके च तानि शूर्पेण शूर्पहस्ता पत्न्यादित्यमुपतिष्ठते नमस्तऽआतानेत्यन्तर्वेदि गच्छति अपरेणं विहारं परिक्रम्य दक्षिणेन वेद्यन्तेन गत्वा पूर्वेण दक्षिणमग्निं प्रत्यञ्चौ तिष्ठन्तौ पत्नीयजमानौ शूर्पमन्वारभ्य जपं प्रधास्यान् इति द्वे[६] यद्ग्रामऽइति हुत्वाक्रन्निति जपित्वा यथार्थं प्रव्रजत इति । करम्भपात्रनिर्वपणमध्वर्युणा[७] कृतं चेत् तदाध्वर्युरेव स्वाज्याहूर्वे उपस्तारकरम्भपात्रावधानद्विरभिघारणानि कृत्वा शूर्पं पत्न्या हस्तेऽर्पयति · प्रतिप्रस्थात्रा चेदादितः[८] कृतम् तदात्रापि स एव तदा आज्यमपि तदीयमेवोपस्तारादौ । शूर्पस्य जुहूस्थानापत्त्या तूष्णीमासादनप्रोक्षणसंमार्जनप्रतपनप्रस्तरे-सादनव्यूहनादयः सर्वे जुहूसंस्काराः कार्याः ।

---

१) वोत्तरवेदिमै॰ quot. in paddh. २) दक्षिणेऽग्नौ paddh. ३) मो षू॰ रायतो deest in paddh. ४) जुहुयादन्वारभेयातामितराविति paddh. जुहुयादप्याग्रेण॰ प्रयेत्यंचाव॰ २. ५) ? भुमौ २. ६) ? स्यानिति द्वे २. ७) ? ॰र्वपणांध्व॰ २. ८) चेदादादितः २.

मो षू ण इति (३.४६) यजमानो जपति ॥१२॥ त्यागानन्तरम् ।

अक्रन्कर्मेत्येनां वाचयति प्रतिनयन् ॥१३॥ प्रतिप्रस्थाता · करम्भपात्रहोमदेशात्स्वस्थानं प्रतिनयन् तेनैव मार्गेण येन पूर्वमानीता प्रतिशब्दसामर्थ्यात् ।

आगते संमार्जनाद्याऽऽज्यभागाभ्याम् ॥१४॥ स्ववेदिं प्रत्यागते प्रतिप्रस्थातरि अग्न्योः संमार्जनादि आज्यभागान्तम् । प्रतिपराणीयोदिति 'वषट्कृते जुहुत इति श्रुतत्वात् (२.५.२.३०–३१) · संमृजन्त्यग्निमित्यत्र यजमानादिहेतुकर्त्रपेक्षं बहुवचनम् अग्निमित्येकवचनम् देशभेदकृतस्याग्निभेदस्याविवक्षितत्वात् · आघारावित्येककर्मत्वेऽपि प्रयोगभेदाद्द्विवचनम् अथाध्वर्युरेवेति देशकर्त्रभेदादतन्त्रत्वे सति प्रसङ्गात्सिद्धार्थस्य प्रतिप्रस्थातुरवरणं दर्शयति · उत्तरस्यै वेदेर्होतृषदनऽउपविशतीति मुख्यत्वात्प्राप्तेऽनुवादः · उपविश्य प्रसौतीत्यध्वर्यू एकवचनेन घृतवतीमध्वर्यो स्रुचमास्यस्वेत्यनेनैव प्रतिप्रस्थातुः प्रासङ्गिकत्वात् · ताऽउभाविव प्रसूतावित्यत्रापि प्रासङ्गिकः प्रसवस्तस्यैवाभिप्रेतः अन्ये तत एवोभयप्रसववचनात्प्रसवमन्त्रमूहन्ति घृतवतीऽअध्वर्यू स्रुचावास्येथां देवयुवौ विश्ववारेऽइति [1]· चतुर्थे-चतुर्थेऽइति वीप्सार्थे विधीयते सकृदेव सर्वसमानयनस्य प्राप्तत्वात् · ताऽउभाविवेत्यादि प्रसङ्गनिवृत्त्यर्थम् · अत्र वषट्कारानन्तरमेव होमः सर्वत्र वषट्कृते जुहुत इति (°३१) पुनः श्रुतत्वात् न तु वषट्कारेण सह पक्षान्तरे आदानस्येतरपक्षनिवृत्त्यर्थत्वात् · एवमाज्यभागान्तं यथोपदेशमुभाभ्यां कर्तव्यम् ।

स्रुक्पाणिरास्ते प्रतिप्रस्थाता ॥१५॥ आज्यभागानन्तरं जुहूपभृतौ हस्ते कृत्वा।

हविर्भिश्चरति ॥१६॥ ततोऽध्वर्युराग्नेयादिभिर्हविर्भिश्चरति ऐन्द्राग्नपर्यन्तैः क्रमेण ।

पयस्याप्रचरणकाले मेषौ व्यतिहरतः ॥१७॥ पय°काले अवसरे आयाति अध्वर्युप्रतिप्रस्थातारौ यथास्वं मेषौ व्य°तः स्वस्वपयस्यामध्ये तौ निधत्तः स्थापयत इत्यर्थः · अध्वर्युर्मेषं वारुण्याम् प्रतिप्रस्थाता मेषीं मारुत्याम् ।

अन्यतरेणावदानेन सह मेषम् ॥१८॥ स्रुच्यवद्धाति · अध्वर्युर्वरुणाया-

---

१) See १.५.२.१ and ३.

नुब्रूहीत्युक्त्वा जुह्वामुपस्तीर्य द्वयोः पयस्यावदानयोर्मध्येऽन्यतरेण प्रथमेन द्वितीयेन वा पयस्यावदानेन सह कृत्स्नं मेषं जुह्वामवदधाति · ततः सकृदभिघार्यावदाने प्रत्यभिघार्यैत्यायातिक्रम्याश्राव्य वरुणं यजेत्युक्त्वा वषट्कृते जुहोति[1]। आपस्तम्बः ऐन्द्राग्नपर्यन्तैः प्रचर्यारमत्यध्वर्युरथ प्रतिप्रस्थाता पूर्वेण सहावदानेन मारुत्याः सर्वां मेषीमवद्यत्युत्तरेण शमीपर्णकरीराण्यथ प्रचर्यारमत्यथाध्वर्युः पूर्वेण सहा[वदा]नेन वारुण्याः सर्वं मेषमवद्यत्युत्तरेण शमीपर्णकरीराण्यथ प्रचरतीति।

सव्येन स्रुचौ गृहीत्वा प्रतिप्रस्थातुर्वाससो दक्षिणेन मरुद्भ्योऽनुवाचयति ॥१९॥ वारुणीयागानन्तरमध्वर्युः · सव्येन हस्तेन स्रुचावन्वारभ्य।

वारुणीवदवदानम् ॥२०॥ वारुणीवदित्यन्यतरेण पयस्यावदानेन सह मेषीं स्रुच्यवदध्यात्।

हविर्भिश्चरितेऽभौ स्विष्टकृत्प्रभृति ॥२१॥ अध्वर्युणा सर्वैः कायान्तैः हविर्भिश्चरिते उभौ प्रकृतिवत् स्वि॰ति कुरुतः।

इडामवदाय प्रतिप्रस्थात्रे प्र[यच्छ]ति ॥२२॥ अध्वर्युः · अनभिघार्यैव।

तत्र प्रतिप्रस्थाता मारुत्याः ॥२३॥ तस्यामेव समवत्तायामिडायां प्र॰ता मारुत्याः द्विरवद्यति उपरिष्टाद्विरभिघारणं त्वध्वर्युरेव करोति · अत्रेडोपह्वानानन्तरं पूर्वं मार्जनम् तत इडादिभक्षणम् गृहमेधीयायामेवमेव श्रुतेः[2]।

स्रुचो व्यूहतोऽध्वर्यू ॥२४॥ प्राशित्रेडादिभक्षणानन्तरं धेन्वादिदक्षिणां दत्त्वोल्मुकसमासादिनवानुयाजाधारानुयाजान्ते कृते अध्वर्युप्रतिप्रस्थातारौ स्रुचो व्यूहतः[3]। अध्वर्युग्रहणं यजमानव्युदासार्थम् अतोऽत्र यजमानो व्यूहनं पत्नेऽपि न करोति। स्फ्ये सादयत इत्यनेन (२. ५. २. ४४) अत्र पात्र्या हविर्ग्रहणम् नानस इति ज्ञायते · द्विवचनात्प्रतिप्रस्थातुरपि हविर्ग्रहणमस्तीति प्रतीयते तच्च करम्भपात्रमेष्यर्थमेव ना[न्य]स्यासम्भवात् · हविर्ग्रहणाभावे च तस्य देशऽएव निधानं स्यात् न स्फ्ये इति। परिधिभिः सहाध्वर्युसक्त उपवेषोऽपि होतव्यः प्रतिप्रस्थातुस्तु नास्त्येव।

समासिच्य वाजिनभक्षः ॥२५॥ आत्मालम्भोदकालम्भान्ते स्रुग्विमो-

---

1) See २. ५. २. ३७. 2) See ५. ६. २६ and २७. 3) See २. ५. २. ४१ and ४२.

काले वा यथास्वं वाजिनयागं व्याघारणान्तं कृत्वा स्रुक्स्थौ वाजिनशेषविकस्थां जुह्वां समासिच्य संयोज्योत्तरस्या वेदेरुत्तरतः समीपे समुपह्वय तल्लेण वाजिनयागः सर्वैः पूर्ववत्कर्तव्यः · तथा चापस्तम्बः उभौ वाजिनाभ्यां प्रचरतः शेषौ समवनीयोत्तरे विहारे पूर्ववद्भक्षयन्तीति ।

अधर्युविकारात्प्रतिप्रस्थाता भक्षेषु ॥२६॥ पश्चिडादिभक्षेषु प्र॰ता कर्ता अधिकारी भवति स ह्यधर्योर्विकारः तत्प[दार्थाव]दानस्य[१] तेन क्रियमाणत्वात् · यतोऽधर्युपदार्थमवदानं कुर्वन्नधर्युविकारो भवति अतस्तद्भक्षेषभक्षेष्वप्यधिकारी भवति ।

मैत्रावरुणश्च होत्रधर्युविकारात् ॥२७॥ पशौ मैत्रावरुणोऽपि पुरोडाशेडापश्चिडाभक्षेषु · पुरोऽनुवाक्यानुवचनेन हि स होतारं विकरोति होतृप्रेषणेन चाधर्युम् ।

समिष्टयजूंष्यपि तूष्णीं दक्षिणस्याम् ॥२८॥ अत्र पूर्वं वेद्यालम्भपत्नीसंयाजदक्षिणाग्निहोमवेद्योन्नविमोकवेदस्तरणान्ते कृतेऽधर्युस्त्रीणि स॰पि समन्त्रकाणि जुहोति प्रतिप्रस्थाता तु दक्षिणस्यां वेदौ दक्षिणेऽग्नौ ध्रौवेणाज्येन तूष्णीमेव त्रीणि स॰पि जुहोति ।

वारुणीनिष्कापेणावभृथम् ॥२९॥ वारुण्याः निष्कापः तापवशादधःस्थालीतललग्नः पयस्याशेषः तेनावभृथं कर्तुमपः प्रति यन्ति · अथास्यै वारुण्यै पयस्यायै क्षामकर्षमिश्रमादायेति श्रुतेः (२. ५. २. ४६) पात्रे संसक्तः कृष्यते विक्षिप्यतऽइति कर्षः क्षामश्चासौ कर्षश्चेति क्षामकर्षः तेन मिश्रं हविरादायावभृथमुदकं यन्ति ऋत्विग्यजमानाः । अत्र च नाम्ना सौमिकादवभृथाद्धर्मप्राप्तिः · तत्रानेन निष्कापेण पुरोडाशस्य निवृत्तिः प्रत्याम्नानात् · तत्र न साम गीयतऽइति (२. ५. २. ४६) तत एव प्रातस्याग्निष्टपतीति साम्नः[२] प्रतिषेधः अतः सोमवदेवात्र सर्वं कर्तव्यम् · तेन प्रथमं चात्वालसमीपऽउरुंहि राजेति वाचनम्[३] ततो निष्कापाज्यस्थालीस्रुक्समिद्दर्भिःशृतावदानस्कपरिधानवस्त्राद्युपयोक्ष्यमाणमादाय चात्वालोत्करावन्तरेण निष्क्रम्योदकसमीपं गच्छति ।

१) ? तत्पदानस्य १. अवदानस्य Ss. २) See ४. ४. ५. ८. ३) See १०. ८. १५.

तूष्णीमित्याभ्यवेत्य मज्जयत्यवभृथेति (३.४८) ॥३०॥ तूष्णीं गृहादपः प्रत्यागत्येत्यनेन सामगानं प्रतिषिध्यते · अभ्यवेत्य तूष्णीमेवापः प्रविश्येत्यनेन चापोऽवक्रमणवाचनं प्रतिषिध्यते · ततश्चतुर्गृहीतग्रहणाद्यनुयाजान्तं दशाहुतिकं षडाहुतिकं वा स्विष्टकृदन्तं कर्म कृत्वा[1] निष्कासस्थालीं जलमध्ये मज्जयति बोलयति[2] ।

जायापती स्नातोऽमज्जन्तौ ॥३१॥ जलमध्ये शिरसः प्रवेशनं ब्रुडनमकुर्वन्तौ[3] स्नानमाचरतः · मज्जनप्रतिषेधेऽपि केनचित्पात्रेणाञ्जलिना [वा] जलमुद्धृत्य शिरः क्षालयत एव · तथा चापस्तम्बः अपः प्रगाह्य सशिरस्कावनुपमज्जन्तौ स्नातः पत्नी यजमानश्चेति ।

अन्योऽन्यस्य पृष्ठे धावतः ॥३२॥ शोधयतः अद्भिः क्षालयतः ।

अन्ये वाससी परिदधाति ॥३३॥ स्नानानन्तरम् · ततो जलमध्यान्निःसरतः ।

पूर्वे दद्यादधिकृतेभ्यो यस्माऽइहेत् ॥३४॥ ब्रह्मादिपञ्चभ्यः · एकस्मै ऋत्विजे · पूर्वकरणसमये वैश्वदेवपर्वसम्बन्धिनी पत्नीयजमानाभ्यां परिहिते वाससी[4] ।

यथेतमित्याहवनीये समिदाधानं देवानाᳬ समिदसीति (८.२७) ॥३५॥ यथेतं यथागतं चात्वालोत्करावन्तरेण तूष्णीमेव एत्य गृहमागत्य तूष्णीमाहवनीयजपप्रतिषेधः[5] । समिदाधानमध्वर्योरिति केचित् पुनरेत्याहवनीये समिधमभ्यादधातीत्येकवचनात् (४.४.५.२३) समाख्यानात् यजमानमेवैतया समिन्द्धऽइति लिङ्गाच्च (४.४.५.२३) · यजमान एवेत्यन्ये पत्नी च गार्हपत्ये तूष्णीमिति (३६) पत्न्याः समिदाधानविधानेन तत्सहचरितस्य यजमानस्यैतत्समिदाधानमिति प्रतीतिः · सर्वेषामृत्विजां सयजमानानामाहवनीयऽएतत्समिदाधानमित्यन्ये च[6] स येनैव निष्क्रामन्ति तेन पुनरायन्ति पुनरेत्याहवनीये समिधमभ्यादधातीति श्रुतेः (४.४.५.२३) अत्रागमनं बहूनामुक्तागत्य च यत्समिदाधानमुच्यते तदपि

---

1) See ४. ४. ५. १८ and १९. 2) ? बोलयति २. Or are we to read चोलयति ?
3) See Westergaard s. r. ब्रुड्. 4) ? परिहितेऽभूतान्ते वाससी २. 5) See १०. २. ७.
6) ? °त्ययवो २.

तेषामागमनकर्तृणां प्रतीयते · तथापस्तम्बः   एधोऽसीति समिध आधायाहवनीयमुपतिष्ठन्तऽइति · एवमेव मानवकठसूत्रयोरपि   अनपेक्षमाणा आयन्ति समिधः समिन्द्ध[1] ऽएधोऽसीत्यग्नौ समिधमादधातीति काठके ।

पत्नी च गार्हपत्ये तूष्णीम् ॥३६॥   समिदाधानं करोति शाखान्तरात् ।

धेनुर्दक्षिणा ॥३७॥   सवत्सा गौः ।

अश्वः ॥३८॥   वा ।   षट् ॥३९॥   षड्गु ।

द्वादश वा ॥४०॥   गावः · शाखान्तरीया एते दक्षिणाविशेषाः ॥   अत्र मानवसूत्रेऽवभृथे विशेषः   आज्यशेषे समानीय स्रुक्स्रुवमाज्यस्थालीमादत्ते प्रतिप्रस्थाता तुषनिष्काषमाग्नीध्रः स्रुवमध्वर्युरुरुꣳ हि राजा वरुणश्चकारेति वाचयति[2] शतं ते राजन्नित्यपः पराद्दश्य तिष्ठन्तोऽवभृथे प्रचरन्ति स्थावरासु तृणं प्रास्याप्सु जुहोत्यग्नेरनीकमिति चतुर्गृहीतस्य स्रौवमाघारयत्यपबर्हिषः प्रयाजानुयाजान्यजत्याज्यभागाभ्यां प्रचर्य तुषनिष्काषस्यावदाय वरुणं यजेति शेषेणाग्नीवरुणौ स्विष्टकृत्स्थाने तदन्ता संतिष्ठतऽइति । काठके च   वारुण्या निष्काषेणावभृथं यन्त्युदञ्चं प्राञ्चमुरुꣳ[3] हि राजेति द्वाभ्याꣳ स्थावरमुदकं गत्वा तस्य पश्चादुपविश्याग्नेरनीकमित्यप्स्वाघारमाघारयति तृणे दारुणि वा शेषेण चतुरोऽपबर्हिषः प्रयाजान्यजत्याज्यभागाविष्ट्वा निष्काषस्यावदाय वरुणं यजत्यग्नीवरुणौ स्विष्टकृद्धर्मेणोत्तरावनुयाजाविष्ट्वा[4] देवौ यजेति प्रथमस्य सम्प्रैष आयन्ति यथा पशुबन्धऽइति । आपस्तम्बोऽपि   पूर्णपात्रवर्जं पूर्ववदिष्टिꣳ सꣳस्थापयतीति पूर्णपात्रस्य स्थाने सौमिकोऽवभृथश्चतुर्गृहीतान्याज्यानि वारुण्ये निष्काषेण तुषैश्चावभृथमभ्यवयन्ति तुषा ऋजीषधर्मं लभन्ते   वारुणमेककपालमेके समामनन्ति   नायुर्दानानि न प्रजननमत्र[5] न साम गायति   सर्वा दिशोऽवभृथगमनमाम्नातम् नोदीचीरभ्यवेयादित्येके[6]   यां दिशं गच्छेयुस्तयामुखाः प्रचरेयुरित्येके   वहन्तीनां स्थावरा अभ्यवेत्या[प]स्तदभावे यथाकाम्युदकान्ते स्तरणान्तां[7] वेदिं कृत्वा तस्याꣳ

---

1) ? संधित्वा २.   2) See १०. ८. १५ ff.   3) ? °दंवन्धाचमु° २.   4) ? °त्तरा अनुयाजा इष्ट्वा २.   5) ? नायुर्दानानि प्रजननमंत्रं २.   6) ? गमनयाम्नानं नादाचीर° २.   7) ? °स्तरणातां २.

हुत्वोऽपि सादयत्यपि वा न वेदि[ः] शतं ते राजन्भिषजः सहस्रमित्यपो दृष्ट्वा-यमभिष्ठितो वरुणस्य पाश इत्युदकान्तमभितिष्ठन्तोऽपः[1] प्रगाह्य तिष्ठन्तोऽवभृथेन चरन्ति तृणं प्रहृत्य स्रौवमाघारमाघारयति[2] यदि वा पुरा तृणं स्यात्तस्मिन्जुहुयात् अग्नीदपस्त्रिः संमृड्ढीति सम्प्रेष्यत्यापो वाजजितो वाजं वः सरिष्यन्तीर्वाजं जेष्यन्तीर्वाजिनीर्वाजजितो वाजजित्यायै संमार्ज्म्यपामन्नादामन्नाद्यायेति[3] मन्त्रं संनमत्यग्नेरनीकमप आविवेशेति स्रुच्य[घार]माघारयति वागस्त्वाग्नेयीत्यनुमन्त्रयते यजमानौ लुप्येत प्रवरान् अपबर्हिषः प्रयाजानिष्ट्वाप्सुमन्तावाज्यभागौ यजत्यप्स्वग्नऽइत्येषाप्सु भेषजोरित्यप्सुमन्तौ निष्कासस्यावदाय वरुणमिष्ट्वा कृत्स्नं निष्कासमवदायाग्नीवरुणौ स्विष्टकृदर्थे यजति नोत्तरं क्रियते ऽपि वोपभृज्जुह्वावानीयापबर्हिषावनूयाजौ[4] यजति देवौ यजेति प्रथमं सम्प्रेष्यति यजेत्युत्तरमिति । हरिस्वामिनापि दशाहुतिपक्षऽएतावन्तः पदार्थाः क्रियन्त इत्युक्तमस्ति षडाहुतिपक्षे तु यथाश्रुतमिति[5] ज्योतिष्टोमान्तऽएव प्रकटीकृत्य वक्ष्यते ॥ अवभृथादागत्य समिद्धाधानानन्तरमुभयोर्बर्हिर्होमः · प्रणीताविमोकोऽध्वर्योः · राजसभाग उभयोः प्रतिप्रस्थातुर्नैषीकरम्भपात्रकरणपक्षे · पूर्णपात्रनिनयनमध्वर्योः · वेद्योरन्तराले विष्णुक्रमा इत्याथर्वणे पठ्यते · वेदिद्वयस्याप्यवेक्षणमध्योश्च ब्रह्मणः कर्मापवर्गाधानाद्येकस्मिन्नेवौत्तरवेदिके[6] · तदन्ते यजमानस्य वपनम् · ततोऽग्नी गार्हपत्याहवनीयौ समारोह्याग्निहोत्रशालायामागत्य गार्हपत्यं मथित्वा पौर्णमासेष्टिः सद्य एव कर्तव्या अथ केशश्मश्रूप्त्वा॰ पौर्णमासेन यजतऽइति श्रुतत्वात् (२. ५. २. ४८) · तथा चापस्तम्बः पौर्णमासवदुन्दनादि[7] पूर्ववन्निवर्तनं सर्वं वा वापयेदित्युक्त्वाह अपि वा स्नात्वोप्त्वा केशश्मश्रुरण्योरग्नीन्समारोप्योदवसाय निर्मथ्य पौर्णमासेन यजतऽ[उत्सन्न]यज्ञो[8] ह वाऽएष यद्वरुणप्रघासा न ह्यवकल्पते यदुत्तरवेद्यामग्निहोत्रं जुहुयादिति वाजसनेयकमिति · समाप्त्यनन्तरमग्निहोत्रार्थमुत्तरवेद्यामुद्धृत्य होमेऽयं दोषः समाप्तेः

---

1) ? दृष्ट्वाजयमिष्ठिनोवरुणस्यपा इत्युद्कांतमितिष्ठंतोपिः २. 2) ? स्रौचमा॰ २. 3) ? वाजतित्मायै संमार्ड्यपामन्नादा अन्नाधायेति २. 4) ? वोपभृयुह्वामानीयापबर्हिषावभूपातौ २. 5) ? यथास्तुत॰ २. — See १०. ८. २१ and the paddhati pag. ४८७,१० ff. 6) ? ॰ज्न्योश्च । ब्राह्मणः कर्मा॰दिको २. 7) ? स्येब्द्वोन्द्नादि २. 8) ?? यजेतेयज्ञो २. See २. ५. २. ४८.

प्रागग्निहोत्रकालश्चेदायाति[1] तदा उत्तरवेदावेवाग्निहोत्रं होतव्यम् · तदाहाप-स्तम्बः प्रणीते चेदग्निहोत्रस्य काल एतस्मिन्नेवाग्निहोत्रं जुहुयादेवमन्यत्रापि प्रक्रान्तऽइति पशुबन्धप्रकरणे ॥ ॥ पञ्चमी कण्डिका ॥५॥ ॥

अथ पद्धतिः ॥

ततो यथास्वमुभयोः पयस्ययोः करीरावापः ततः शमीपत्त्राणां च यथास्वं मेषमिथुनस्य च · अध्वर्युर्मारुत्यामुपस्तीर्य मेषमवदधाति प्रतिप्रस्थाता वारुण्यामुपस्तीर्य मेषीमवदधाति · प्रतिप्रस्थातुः करम्भपात्राणामभिघारः अध्वर्योराग्नेयादीनामभिघारः यथास्वं पयस्ययोर्वाजिनयोश्च । ततो यथाक्रमं यथास्वं हवींष्युद्वास्य कपालानि गणयित्वा प्राणदानं कुर्यात् · पूर्वं तूष्णीं करम्भपात्राणां प्रत्येकं प्राणदानं प्रतिप्रस्थाता करोति · ततोऽध्वर्युराग्नेयादीनां प्राणदानं करोति अग्निं गह सोमं गह सवितारं गह सरस्वतीं गह पूषणं गह इन्द्राग्नी गह वरुणं गह स्वपयस्याञ्जनानन्तरमध्वर्युर्मेषस्य[2] प्राणदानं करोति वरुणं गहेति · ततो मरुतो गहेत्युक्त्वा [प्रतिप्रस्थाता स्वपयस्यायाः प्राणदानं कृत्वा][3] अनेनैव मन्त्रेण मेषीमनक्ति · ततः कं गहेत्येककपालस्याध्वर्युः ततः कायस्य घृतेनाच्छादनम् · ततो वाजिनो गहेत्युभयोर्वाजिनस्याञ्जनम् । कपालाञ्जनाद्यात्मालम्भनान्ते विशेषः · अध्वर्युरुत्तरस्यां वेदौ आज्यस्थाल्यादीनि सर्वाणि हवींष्यासादयति · प्रतिप्रस्थाता स्थालीमासाद्य करम्भपात्राण्यासादयति ततो मारुतीम् · मेषमेष्योः समन्त्रककरणपक्षे प्रियाभ्यां धामभ्यां प्रियऽ सद आसीदतमित्यूहितेन मन्त्रेण पयस्ययोर्यथास्वमासादनम्[4] · काले यथास्वं मेषमेष्योरालम्भः · तत उभावुत्करे वाजिनयोरासादनं कुरुतः · ततो ध्रुवा असदन्निति वाजिनान्तानामालम्भः · प्रतिप्रस्थाता आज्यस्थालीस्थमाज्यमालभ्य करम्भपात्राण्यालभते · ततो जौहवादीनि वाजिनान्तानि · तत आत्मालम्भोदकालम्भावुभयोः । ततोऽध्वर्योरेव शकलादानादि · अग्नावग्निरिति होमान्तमग्निमन्थनम् · ततो होतृषदनस्थापनमुत्तरस्या

---

1) ? श्चेद्वेवांदायाति २. 2) ? °र्येर्मे° १. 3) deest in १., supplied by conjecture. प्रतिप्रस्थाता पयस्याया मरुतो गह । मेषीं मरुतो गह । अध्वर्युः कं गह । B. 4) ? यथास्वयोर्यथास्वं आ° १.

वेदेः पश्चात् · ततो होतुरामन्त्रणम् · इध्मात्समिदादानमुभयोः अध्वर्योरिवाग्निभ्याम् समिध्यमानाभ्यामनुब्रूहीति प्रैषः · सप्तदशेनेत्यवबाधनम् उभयोः प्रतिप्रणवमिध्मप्रक्षेपः · समित्परिशेषणमुभयोः · आहवनीयोपवाजनं पूर्वाघारश्चोभयोः · संमार्गप्रैषोऽध्वर्योरिव अग्नी अग्नीत्संमृड्ढीति । ततः संमार्गेऽकृतऽएव प्रतिप्रस्थाता पत्नीसमीपे गत्वा पत्नीं पृछति केन चरसीति स्वभर्तृव्यतिरिक्तेन केन पुंसा सह त्वं मैथुनसुखमनुभवसीति प्रश्नार्थः · सा प्रत्याहामुकेनेति · यदि लज्जया जारस्य नाम न गृह्णाति तदा प्रतिजारमेकैकं तृणं हस्तेन गृह्णाति · जारश्चेन्न भवति तदा भर्तृव्यतिरिक्तेन न केनापि चरामीति कथयति · पत्न्या प्रचिवचने कृते प्रतिप्रस्थाता पत्नीमुत्थाप्य स्वाहवनीयं प्रति नयन्प्रघासिन इत्यमुं मन्त्रं वाचयति · ततः प्रतिप्रस्थाता स्वाया ध्रुवायाः[1] शूर्पऽउपस्तीर्य सर्वाणि करम्भपात्राण्यवधाय ध्रुवाया एवोपरिष्टाद्द्विरभिघार्य पत्नीहस्ते समर्पयति सा च शूर्पं मूर्धनि निदधाति · जुहोतीनामपूर्वत्वपक्षाश्रयणे उपस्ताराद्यभावः यथाश्रुतमेव तदा क[र्त]व्यम् · ततः प्रतिप्रस्थात्रा[2] बाहुगृहीता पत्नी ब्रह्मयजमानयोरुत्तरतोऽग्नेश्च दक्षिणत इत्येवमन्तरालमार्गेण नीत्वा स्वयं च ब्रह्मयजमानयोर्दक्षिणतो गत्वा द्वयोरप्याहवनीययोः पूर्वमार्गेण नीत्वा चात्वालोत्करयोरन्तरालेन वेदिमध्ये प्रवेश्य[3] चात्वालवेद्योरन्तरालेन पूर्वेणोत्तरवेदिं गत्वा अथवा तीर्थेन प्रवेश्योत्तरवेदिमपरेण[4] वेद्योरन्तरालेन प्राङ्नीत्वा दक्षिणेऽग्नौ पुरस्तात्प्रत्यङ्मुखी तिष्ठन्ती शूर्पमवतार्य हस्तेनादाय यद्ग्रामे यदरण्यऽइति मन्त्रेण शूर्पेणैव जुहोति · अथवा जायापती प्रत्यङ्मुखौ तिष्ठन्तौ अनेनैव मन्त्रेण जुहुतो नैकाकिनी पत्नी · मूर्धस्थितेनैव शूर्पेण होम इति मन्वापस्तम्बौ · इदं प्रघासिभ्यो मरुद्भ्यो रिशादोभ्यः करम्भेण सजोषोभ्य इति त्यागो मन्त्रवर्णात् इदं मरुद्भ्य इत्येव वा प्रघासिनो मारुती गायत्रीति कात्यायनोक्तेः (अनुक्रमणी° १. २०) · ततो यजमानस्य मो षू ण इति जपः · दम्पत्योर्होमपक्षे उभयोरपि संचरः · तदुक्तमापस्तम्बसूत्रे अन्तरा वेदी°शूर्पेण[5] जुहुतोऽपि वाध्वर्युः प्रतिप्रस्थाता [वा] जुहुयादन्वारभेयाता-

1) ? स्वीया ध्रु° १. स्वद्ध्रु° B. 2) Thus B. °स्याता १. 3) प्रविश्य B. 4) प्रविश्य उत्त° B. pr. m. प्रवे° sec. m. and १. 5) See schol. at ५. ५. ११.

मितराविति · तत्राध्वर्योर्होमपक्षे करम्भपात्राणामध्वर्युरेव निर्वपणादिहोमपर्यन्तं कर्तृत्वं निःसंदेहम् · ततो येन मार्गेण पत्नी होमार्थमानीता तेनैव मार्गेण प्रतिनयन्प्रतिप्रस्थाताक्रन्कर्मेत्यमुं मन्त्रं पत्नीं वाचयति · प्रतिगमने ब्रह्माणमन्तरा यजमानाद्बहिश्च नेयेति विशेषः · ततः पत्नी स्वस्थान उपविशति । ततः प्रतिप्रस्थात्रा[1] वेदिसमीपमागते आग्नीध्रोऽध्वर्युसंनहनेनोत्तरवेदिकमाहवनीयं संमृज्य प्रतिप्रस्थात्रासक्तेनेध्मसंनहनेन दक्षिणमाहवनीयं प्रकृतिवत्संमार्ष्टि · ततोऽञ्जलिकरणमुभयोः · उत्तराघार उभयोः · ध्रुवासमञ्जनं च · स्रुक्सादनमुभयोः · होतृवरणमध्वर्युरेव · प्रतिप्रस्थाता अध्वर्योः पश्चात्तथा तिष्ठति यथा होता तस्योभयोरंससंमर्शनं कर्तुं शक्नोति[2] द्वयोरप्यंसयोरुपरि सहैव प्रादेशं निदधातीत्यर्थः · ततस्त्रयाणां संमृष्टानामुपवेशनम् । ततः स्रुगादापनादि · उभावपि जुहूपभृतावादाय होमार्थं गच्छतः · आश्रावणं प्रेषणं च सर्वत्राध्वर्युरेव करोति न प्रतिप्रस्थाता · उभयोर्नव प्रयाजाः चतुर्थसप्तमयोः समानयनमुभयोः अध्वर्योः सप्तमे निःशेषं समानयनम् पृषदाज्यग्रहणपक्षे प्रतिप्रस्थातुरपि · त्यागास्तु वैश्वदेवपर्वण्युक्ता एव · उत्तमप्रयाजे इदमग्नये सोमायाग्नये सोमाय सवित्रे सरस्वत्यै पूष्णऽइन्द्राग्निभ्यां वरुणाय मरुद्भ्यः काय देवेभ्य आज्यपेभ्यो वाजिभ्यः पञ्च मम न तस्येत्यादि · प्रत्येत्य वाजिनान्तानां प्रयाजशेषेणाभिघारणमुभयोः · तत आज्यभागौ सर्वत्र वषट्कारानन्तरमेव क्रमेण होमो न सह वषट्कृते जुहुत इति पुनःश्रवणात् (२. ५. २. ३१) · आज्यभागानन्तरं प्रतिप्रस्थाता स्रुक्पाणिरास्ते स्रुचौ हस्ते धारयित्वोपविशतीत्यर्थः । ततोऽध्वर्युर्हविर्भिः प्रचरति[3] अग्नयेऽनुब्रूहि अग्निं यज इदमग्नये १ सोमायानुब्रूहि[4] सोमं यज इद७ सोमाय २ सवित्रे उपांशु अनुब्रूहीति प्रथमस्वरेण सवितारं यज इद७ सवित्रे ३ सरस्वत्याऽअनुब्रूहि सरस्वतीं यज इद७ सरस्वत्यै ४ पूष्णोऽनुब्रूहि पूषणं यज इदं पूष्णे ५ इन्द्राग्निभ्यामनुब्रूहि इन्द्राग्नी यज इदमिन्द्राग्निभ्याम् । ततोऽध्वर्युप्रतिप्रस्थातारौ मेषौ व्यतिहरतः · ततोऽध्वर्युः स्वपयस्यायाः सकाशान्मेषीं निष्काश्य प्रतिप्र-

---

1) ? ॰स्थाता १. 2) Thus B. कर्त्तुं without शक्नोति १. 3) ? अध्वर्युर्हविर्भिः प्रंति १. 4) here, and in the following cases, ॰ब्रूःहि १.

स्यात्रे समर्पयति प्रतिप्रस्थाता च मेषमध्वर्यवे समर्पयति · ततोऽध्वर्युर्मेषं वारुण्यामवदधाति प्रतिप्रस्थाता मारुत्यां मेषीम् · ततोऽध्वर्युर्वरुणायानुब्रूहीत्युक्त्वा[1] जुह्वामुपस्तीर्य वारुण्याः पयस्याया द्विरवद्यति · तत्र प्रथमावदानेन सहाखण्डं मेषमवदधाति द्वितीयावदानेन सह वा · अत्र जुह्वां प्रक्षेपऽएव साहित्यम् . ग्रहणे अनियमः · पुनरुपरिष्टात्सकृदभिघार्यावदाने प्रत्यभिघार्यातिक्रम्याश्राव्य वरुणं यजेत्युक्त्वा वषट्कृते जुहोति इदं वरुणाय · ततोऽध्वर्युः सव्यहस्ते स्रुचौ कृत्वा दक्षिणहस्तेन प्रतिप्रस्थातुरुत्तरीयं वस्त्रमन्वारभ्य मरुद्भ्योऽनुब्रूहीत्याह[2] · ततः प्रतिप्रस्थाता जुह्वामुपस्तीर्य मारुत्या द्विरवद्यति · तत्र प्रथमेन वा द्वितीयेन वावदानेन सहाखण्डां मेषीमवदधाति जुह्वां सह प्रक्षिपतीत्यर्थः · तत उपरिष्टात्सकृदभिघार्यावदाने प्रत्यभिघार्यातिक्रामति · अथाध्वर्युरेवाश्राव्य मरुतो यजेत्याह · वषट्कृते प्रतिप्रस्थाता जुहोति इदं मरुद्भ्यः । ततोऽध्वर्युः काय उपांशु अनुब्रूहीत्याह[3] उपस्तीर्य सर्वं पुरोडाशं जुह्वामवधाय द्विरभिघार्येत्याद्याश्राव्याह कम् उपांशु यजेति प्रथमस्वरेण [इदं काय] · ततो ध्वर्युरेवाग्नये स्विष्टकृतेऽनुब्रूहीत्याह · उभयोर्जुह्वामुपस्तारः · यथास्वं सर्वहविषामुत्तरार्धादिकप्रत्यवायमवदानम् · द्विरभिघार उभयोः अतिक्रमणं च · ततोऽध्वर्युरेवाश्राव्याग्निं स्विष्टकृतं यजेत्याह · वषट्कृते उभौ जुहुतः अपां स्पर्शः । इत्य स्रुचावासाद्य संचराभ्युक्षणमुभयोः · ततोऽध्वर्युरेव सर्वहविर्भ्यः प्राशित्रमवद्यति न प्रतिप्रस्थाता · प्राशित्रं ब्रह्मणे दत्त्वा इडापात्र्यामुपस्तीर्य सर्वहविर्भ्य इडामवदाय प्रतिप्रस्थात्रे समर्पयति · प्रतिप्रस्थाता स्वपयस्याया द्विरुपर्यवदायाध्वर्यवे इडां प्रत्यर्पयति · ततोऽध्वर्युर्द्विरभिघार्य आग्नेभ्यः पञ्चभ्यो हविर्भ्यः षडवत्तब्रह्मयजमानभागचतुर्धाकरणान्करोति नैन्द्राग्नपयस्ययोः · ततो होतुरिडासमर्पणादि मयीदमिति जपान्तम् · इडामुपहूय पवित्रे समस्य पूर्वं मार्जनम् तत इडाभक्षणादि उपहूय मार्जयन्तऽइति गृह्यमेधीयवदत्रापि श्रवणात् (२. ५. २. ४०) सूत्रकृता तु केनाभिप्रायेण[4] न सूत्रितमिति स एव वेद · प्रतिप्रस्थाता स्ववेदिमपरेण स्वकीये पवित्रे समस्य मार्जनं करोति तत इडाभक्षः · प्रस्तरे

[1] °ब्रूश्हो° १. [2] °ब्रूश्हो° १. [3] ? °ब्रूश्हो १. [4] केनाप्यभि° १.

पवित्रकरणमुभयोः भागपरिहारोऽध्वर्व्योः । दक्षिणां चात्वालोत्करावन्तरेण वेद्यामानीयालभते · ऊर्गसीत्यस्य स्थाने धेनुरसीति विशेषः अश्वोऽसीति वा षड्गवमसीति वा द्वादशगवमसीति वा · अस्य वरुणप्रघासपर्वणः समृद्ध्यर्थं धेनुं दक्षिणां ब्रह्मणे॰ इत्यादि · ब्राह्मणा इयं वो धेनुः प्रतिगृह्णीतेति अयं वो ऽश्वः इदं वः षड्गवम् इदं वो द्वादशगवमिति वा । वारुण्याः स्थापनमवभृथार्थम् · ततो हविःशेषानुदगुद्वास्योल्मुकसमासाद्युभयोर्धारानुयाजान्तम् · तत्र विशेषः · ब्रह्मन्प्रस्थास्यावः समिधावाधायाग्नीऽअग्नीत्संमृड्ढीति प्रैषः · अग्नीध उभयत्र समिदाधानम् संमार्गश्च · ओं प्रतिष्ठतमिति ब्रह्मणोऽनुज्ञाया ऊहः · यजमानस्य समिदनुमन्त्रणं चेत् एते वामग्नी समिधौ ताभ्यां वर्धेथां चा च प्यायिषामित्यूहः · पृषदाज्योपभृतः पृषदाज्यं जुह्वामुपभृति च विभज्यानीयाज्योपभृतमधः कृत्वानुयाजा यष्टव्या इति स स्रुचोरेवाध्वर्युः पृषदाज्यं व्यानयतऽइत्यादिस्वश्रुत्यर्थः (२.५.२.४१) · आपस्तम्बसूत्रे तु विशेषः पृषदाज्यं जुह्वामानीय पृषदाज्यधानीमुपभृतं कृत्वा तेन नवानुयाजान्यजतीति · उभयोर्नवानुयाजाः · चतुर्थसप्तमयोः समानयनम् · प्रतिप्रस्थातुः स्वाज्येनैवानुयाजाः पक्षे तस्यापि पृषदाज्येन भवति · द्वितीयानुयाजप्रभृति यज-यजेति प्रैषः अविशेषश्रवणादिति सम्प्रदायः नेति श्रीअनन्तयाज्ञिकाः · त्यागास्तु वैश्वदेवपर्वण्युक्ताः · धारानुयाज उभयोः । अत्र नियमेनाध्वर्व्योरेव स्रुग्व्यूहनम् न यजमानस्य अग्नेः सोमस्य सवितुः सरस्वत्याः पूष्ण इन्द्राग्न्योर्वरुणस्य कस्य उज्जितिमिति अग्निः सोमः सविता सरस्वती पूषेन्द्राग्नी वरुणः कः तमपनुदन्तु यमयमिति अत्रोपांशुदेवतानामुपांशूच्चारणम् अन्येषामुत्तमस्वरेण · शूर्पं जुह्वा उपरि[1] निधाय प्रतिप्रस्थातुर्व्यूहनम् मरुतामुज्जितिम् मरुतस्तमपनुदन्तु यमयम् · अभ्युद्य परिध्यञ्ज[नाद्युभयोः · सहशाखया प्रस्तरहोमान्तमुभयोः · इदमग्नये सोमायाग्नये सोमाय सवित्रे सरस्व]त्यै[2] पूष्णाऽइन्द्राग्निभ्यां वरुणाय मरुद्भ्यः काय देवेभ्य आज्यपेभ्योऽग्नये होत्राय वाजिभ्यो न मम · तृणप्रहरणप्रैषोऽनुप्रहरतमिति · तृणप्रक्षेपात्मालम्भोदकालम्भा उभयोः । तत उभयोर्वाजिनयागौ व्याघारणान्तः · उभौ वाजिनशेषावेकत्र कृत्वा तत्रेण वाजि-

1) Thus १. जुह्वामुपरि B. 2) Thus B. [ ] deest in १.

नभक्षः · अध्वर्योरनन्तरं प्रतिप्रस्थाता उपहवे भक्षेषु च । ततः संवदस्वेत्यादि अध्वर्योरेव परिधिपक्षे उभयोः · अध्वर्युसक्तस्यैवोपवेषस्य होमः · संस्रवाहुति-रुभयोर्धुरि निधानं च · अध्वर्योस्तिसृभिः स्रुग्भिः संस्रवहोमः · तत्र धुरि निधाने घृताच्य स्थ धुर्यौ पात सुम्ना स्थ सुम्ने मा धत्तेति तिसृणामपि धुरि निधानम् · पृषदाज्यग्रहणपक्षे प्रतिप्रस्थातुरप्येवम् · यजमानस्योत्तरां वेदिमालभ्य दक्षिणस्या आलम्भः · प्रतिप्रस्थाता स्ववेदिसमीपऽएवोपविशति । अध्वर्युरेव गार्हपत्यं गत्वाद्व्याहुतिपर्यन्तं[1] पत्नीसंयाजादि कृत्वा सव्येनावृत्य दक्षिणाग्नौ आहुतित्रयं जुहोति · पिष्टलेपहोमपक्षे पूर्वदिनस्थापितपिष्टलेपात्सर्वानद्यतनपिष्टलेपैः सहाध्वर्युरेव जुहोति प्रतिप्रस्थातुरपराग्निहोमप्रतिषेधात् · विश्वेभ्यो देवेभ्य इत्येवोच्चार्य त्यागः । ततो वेद्योक्त्रविमोकादि समिष्टयजुरन्तम् · अध्वर्युरुत्थाय ध्रुवया त्रीणि समिष्टयजूंषि जुहोति देवा गातुविद इति प्रथमम् इदं वाताय यज्ञ यज्ञं गच्छेति द्वितीयम् इदं यज्ञाय एष ते यज्ञ इति तृतीयम् इदं यज्ञपतये · प्रतिप्रस्थाता त्रीणि समिष्टयजूंषि तूष्णीमेव जुहोति ॥ ॥ ततोऽवभृथगमनार्थं चात्वालसमीपे आगत्योरुं हीति (८.२३) यजमानं वाचयति 'विधश्चिदिति ब्रूहीत्येवम् यजमानः स्वरेण पठति · ततो वारुणीनिष्कासं जुहूं स्रुवमाज्यस्थालीं समिधं[2] शृतावदानं स्फ्यं बर्हिर्मुष्टिं परिधानार्थानि वस्त्राणि चादाय तूष्णीमेव नद्यादिस्थवहदुदके यत्स्थावरोदकं तत्प्रति यन्ति नद्यादिस्थस्थावरोदकाभावेऽन्यदुदकमभि प्रतिगमनम् · नात्र सामगानम् · अत्र स्रुक्स्रुवाज्यादि पूर्वसंस्कृतमेव ग्राह्यम् अनपवृक्तत्वादिति हरिस्वामिनः अवभृथस्यापूर्वत्वादेव संस्काराभाव इत्यपरे । तत्राध्वर्युर्बाहुगृहीतं यजमानं तूष्णीमेवोदकमध्ये प्रवेशयति · ततः स्वयमप्सु प्रविश्य हस्तगृहीताया एवाज्यस्थाल्याश्चतुर्गृहीतमाज्यं जुह्वां गृहीत्वापः परिस्तीर्य समिधमाधाय तस्या उपर्यग्नेरनीकमित्यप्स्वाहुतिं (८.२४) जुहोति इदमग्नये · पुनश्चतुर्गृहीतं गृहीत्वा स्रुगादापनान्ते जुहूमादायाश्राव्य समिधो यजेत्याह ततो यज-यजेति बर्हिर्वर्जितांश्चतुरः प्रयाजान्यजति समानयनाभावः · षडाहुतिपक्षे उत्तमप्रयाजत्यागे इदं वरुणाय देवेभ्य आज्यपेभ्य

1) See ३.७.१७. 2) ? समित्. १.

इति पञ्च ममेति दशाहुतिपक्षे चेदमग्नये सोमाय वरुणाय देवेभ्य आज्यपेभ्य इति । ततो जुह्वामाज्यस्थाल्या एवोपस्तीर्य निष्कापं द्विरवद्यन्वरुणायानुब्रूहीति प्रेष्यति · सकृदुपरिष्टादभिघार्यावदाने प्रत्यभिघार्याश्राव्य वरुणं यजेत्युक्त्वा वषट्कृते जुहोति इदं वरुणाय · पुनर्जुह्वामुपस्तीर्य सर्वनिष्कापं जुह्वां प्रक्षिपन्नग्नीवरुणाभ्यामनुब्रूहीति प्रेष्यति · तत उपरिष्टाद्द्विरभिघार्याश्राव्याग्नीवरुणौ यजेत्युक्त्वा वषट्कृते जुहोति इदमग्नीवरुणाभ्याम् । अयं षडाहुतिपक्षो वाजसनेयिनां नियमेन इतरेषां तु यजमानेच्छया दशाहुतिपक्षोऽपि भवति · तत्र बर्हिर्वर्जितास्त्रयः प्रयाजाः ततो द्वावाज्यभागौ प्रकृतिवद्ध्रुवायाः तदर्थं ध्रुवाप्यत्र प्रयोज्या ततो वरुणाग्नीवरुणयागौ ततो द्वावनुयाजौ तावपि विशेषानुपदेशात्प्रकृतिवदौपभृतेन तदर्थमुपभृदपि प्रयोज्या एवं दशाहुतयः · अत्र हरिस्वामिभाष्ये विशेष उक्तः एतदङ्गिरसामयनमिति (४. ४. ५. २०) एतद्दशाहुत्यात्मकमयनमङ्गिरसाम् अङ्गिरसः पुत्रपौत्राणां मनुष्याणाम् अत्रापि संस्कृतैरेवाज्यपुरोडाशमन्त्रैरपो गत्वा चतुर्गृहीतं गृहीत्वा जुह्वामुपभृति ध्रुवायां च क्रमेण प्रकृतिवत्त्रीणि चतुर्गृहीतानि गृहीत्वा तिष्ठन्त एवाङ्गप्रधानसाधारणानग्निसंस्कारान्परिधिपरिवाजनसंमार्गानप्सु कुर्वन्तो हस्तधृतैरेवाज्यहविर्भिश्चरेयुस्तत्रापि चेध्मसामिधेनीहोत्रार्षेयवरणानि न कुर्युः शाखान्तरे तदभावस्य स्पष्टत्वात् अत्रापि (४. ४. ५. १३) तमेतया च समिधेतया चाहुत्या समिन्द्धे समिद्धे देवेभ्यो जुहवानीतीध्मसामिधेन्यर्थस्यान्यथासिद्धत्वादिति · तेनास्मिन्पक्षे प्रकृतिवद्ध्रौवेणाज्यभागौ औपभृतेनानुयाजौ प्रयाजप्रधानयागादिकं तूक्तप्रकारेण भवति । अनयोः पक्षयोर्यजमानेच्छया एकं कं चन पक्षं कृत्वा निष्कापस्थालीमवभृथेति (३. ४८) मन्त्रेणोदकमध्ये मज्जयति · ततः पत्नीयजमानौ मज्जनमकुर्वन्तौ स्नानं कुर्वाते अन्योऽन्यं पृष्ठशोधनं क्षालनं कुरुतः · ततोऽन्ये वाससी परिदधाते · पूर्वपरिहिते वाससी प्रक्षाल्य पञ्चानामृत्विजां मध्ये यस्मै दातुमिच्छति तस्मै दद्यात् । ततस्तूष्णीमेव प्रत्यागत्य चात्वालोत्करावन्तरेण प्रविश्याहवनीये देवानां समिदसीति (८. २७) मन्त्रेणैकां समिधमादधाति पत्नी च तूष्णीं गार्हपत्ये समिधमादधाति ।

ततो बर्हिर्होम उभयोः · प्रणीताविमोकरान्तसभागावध्वर्योरेव १) · पूर्णपात्रनिनयनं चाध्वर्योरेव । वेद्योरन्तराले प्राञ्चो विष्णुक्रमाः अन्तरा वेदी विष्णुक्रमा इत्याथर्वणे दर्शनात् · एकस्या उत्तरस्या वेदेरस्यै प्रतिष्ठायै इत्यवेक्षणम् औत्तरवेदिकाहवनीयस्यैव सं ज्योतिषेति (२.२५) केचित् द्वयोरपि वेद्योर्द्वयोरप्यग्न्योरवेक्षणमिति युक्तम् · ब्राह्मणां तर्पयितवाऽइत्येव प्रैषः एकस्यैव तर्पणम् वचनं विना आराडुपकारकाङ्गस्य प्रतिप्रस्थातुरप्राप्तेः · औत्तरवेदिकऽएवाहवनीये उपस्थानमाहुतिर्वा समिदाधानं चेति । ततः पाक्षिकं वपनम् · शतब्राह्मणसंकल्पः । ततो गार्हपत्याहवनीयौ समारोह्य स्वस्थानं गत्वा निर्मथ्य पुनरुद्धृत्य पौर्णमासेष्टिं कृत्वा पक्षादिकर्म वैश्वदेवादि नित्यं च कुर्यात् ॥ ॥५॥

इति पञ्चमस्य पञ्चमी कण्डिका ॥ ॥

अथ तृतीयं पर्व चातुर्मास्यानां साकमेधाख्यम् ॥

कार्त्तिक्याᳮ साकमेधा द्व्यहम्. ॥१॥ कार्त्तिकीशब्देनात्र गौण्या वृत्त्या प्रतिपदुच्यते ऋतुमुखेऽऋतुमुखे चातुर्मास्यैर्यजेतऽइत्युक्तत्वात् प्रतिपदश्चर्तुमुखत्वाच्च । साकमेधा इति तदवयवभूतयागबहुत्वापेक्षं नाम्नि बहुवचनम् नाम च संव्यवहारार्थम् मासᳮ साकमेधैरिति साकमेधा दर्शपूर्णमासवदिति (२४.४.३१) च । ननु पूर्वेद्युः पूर्वाह्णऽइत्याद्युक्त्वा (२) प्रातर्हुत्वेति (३५) वक्ष्यमाणपर्यालोचनयैव द्व्यहकालतासिद्धेः न वाच्यम् द्व्यहमिति · उच्यते · पूर्वेद्युः क्रियमाणानामानीकवत्यादीनामपि साकमेधसंज्ञा यथा स्यात् न महाहविष एव एतदर्थं द्व्यहमित्युक्तम् ।

पूर्वेद्युः पूर्वाह्णेऽग्नयेऽनीकवते पुरोडाशः ॥२॥ अष्टाकपालः · पूर्वेद्युः महाहविषः कालात्प्रतिपदः पूर्वदिने पञ्चदश्याम् त्रिधाविभक्तस्याह्नः पूर्वभागे · कार्त्तिक्यां पौर्णमास्यां पूर्वाह्णमध्याह्नसायाह्नेषु तिस्र इष्टयो विधीयन्तऽइति हरिस्वामिनः । अग्नयेऽनीकवते अग्निमनीकवन्तम् अग्नेरनीकवतः अग्निरनीकवानिति विभक्तयः · चतुर्धाकरणादि सर्वं भवति · अत्र च प्रथममग्नी समारोह्योदवसाय

१) अ॰कोऽध्वर्योः रा॰गत्र B. अ॰कः । रा॰गाव॰ १.

निर्मथ्यानीकवदिष्ट्यर्थमित्यग्नौ विहृत्येष्टिः कर्मापवर्गान्ता कर्तव्या ।

मरुद्भ्यः सांतपनेभ्यो मध्यन्दिने चरुः ॥ ३ ॥ ततः पुनः सांतपनेष्ट्यर्थमग्नी विहृत्य · मध्यन्दिनकालस्यातिसूक्ष्मत्वात्प्रधानयागमात्रं तत्र कर्तव्यम् · अथवा मध्यन्दिनशब्देन त्रिमुहूर्ता[त्मकालस्योक्तत्वा]त्सकलस्याप्यनुष्ठानम् अनेकदेवतत्वाच्चतुर्धाकरणाभावः अन्यत्सर्वं भवत्येव ।

समिष्टयजुरन्तं भवति ॥ ४ ॥ सांतपनीयाकर्म · गृहमेधीये (२.५.३.५) सैव स्तीर्णा वेदिर्भवतीति सांतपनीयाबर्हिषा स्तीर्णैव वेदिः श्रूयते अतोऽत्र बर्हिर्होम उत्क्रष्टव्यः · तदुत्कर्षे च तत ऊर्ध्वस्य प्रणीताविमोकादिकर्मापवर्गान्तस्यापि उत्कर्ष एव युक्तः क्रमानुरोधात् ।

बर्हिरनुप्रहरणवर्ज्जं वा ॥ ५ ॥ अथवा बर्हिरनुप्रहरणं बर्हिर्होममात्रं वर्जयित्वान्यत्सर्वं ब्राह्मणतर्पणप्रैषतर्पणकर्मापवर्गान्तं समापनीयम् · आपस्तम्बकठमानवसूत्रेषु चायमेव पक्ष उक्तोऽस्ति । अत्र केचिदाहुः · सांतपनीया७ स७स्याप्येति (३१) सूत्रे गृहमेधीयान्ते [सं]स्थायुक्तपदार्थविधानाद्ब्राह्मणतर्पणं स्थाप्यते तदर्थः प्रैषोऽपि तदुत्तरकालीनत्वात्कर्मापवर्गा च · एवं च सति पदार्थचतुष्टयस्योत्कर्षो भवति बर्हिर्होमः ब्राह्मणतर्पणप्रैषः ब्राह्मणतर्पणम् नमः कृतायेति च । केचिच्च बर्हिर्होमवर्जितं प्रणीताविमोकादि नमः कृतायेत्यन्तं सर्वं कुर्वन्ति अपरे तु बर्हिर्होमादि सर्वमपि आपयन्ति ।

इध्मस्थाने शकलपरिधि निधाय मरुद्भ्यो गृहमेधिभ्यः सायं चरुः पयसि ॥ ६ ॥ इध्मस्थाने प्रणीताभ्योऽपरस्यां दिशि शकलपरिधि निधाय अनियतसंख्यान्पलाशादियज्ञियवृक्षशकलान्प्राकृतान्परिधींश्च सादयित्वा · पयसि श्रपणसाधनभूते । तस्यावृत्सैव स्तीर्णा° निदधतीति श्रुतेः (२.५.३.५) · अत्र हरिस्वामिनः · तस्य गृहमेधीयस्यावृत् परिकर्म वक्ष्यतऽइति शेषः · सैव स्तीर्णा वेदिरिति सांतपनीयवेद्यां गृहमेधीयं विदधत्सांतपनीयातन्त्रमध्ये गृहमेधीयविधिं दर्शयति एवं हि स्तीर्णायामेव वेदौ शक्यते गृहमेधीयं कर्तुम् वेदिबर्हिर्न हूयतऽइति तस्मिंश्चाहूयमानेऽपरेऽपि पदार्था उत्कृष्यन्ते ततश्च सामर्थ्यात्तन्त्रमध्ये विधानमितदापद्यते · न च सांतपनीयाबर्हिःप्रहरणमात्रप्रतिषेध एवायं विज्ञायते प्रतिषेधाभावात्

अस्य च विधानस्यान्यथाप्युपपत्तेः अपवृक्तायाश्च समाप्ते सांतपनीये अचोदित-
त्वप्रसङ्गात् · तस्मात्सांतपनीयतन्त्रमध्ये गृहमेधीयं विधीयते · ततः सांतपनीयत-
न्त्रमेव गृहमेधीयस्य प्रसङ्गादुपाकरोतीति सामवायिकमात्रस्य निर्वापादेरावृत्तिः
नारादुपकारकस्याघारादेर्नैव सामवायिकस्यापि लभ्यमानस्य वेद्यादेरिति प्राप्ते
वचनात् (१३) यावदुच्यते तावद्भवत्येव सामवायिककर्मकम् इतरद्वा · जैमिनिना
तु आज्यभागयोर्नैर्गुण्यात्पुनःश्रवणार्थत्वाच्चापूर्वत्वं[1] गृहमेधीयस्याभ्युपगतम् (१०.
७. ३१) अपूर्वतां तु दर्शयेद्ग्रहणस्यार्थवत्त्वादिति[2] न त्वेवं सति[3] प्रसङ्गकृताना-
मावृत्तिनिवृत्त्यर्थमर्थवादत्वमिति[4] नापूर्वतां कुर्यात् अपि चापूर्वे सति ग्रहणा-
दयोऽपि हविर्धर्मा अत्र न स्युः तस्मात्प्रसङ्गऽएव प्राप्ते पुनर्वचनमावृत्त्यर्थमि-
त्येतदेव युक्तम् । अत्र च पूर्वमिध्मस्थाने शकलपरिधिनिधानम् · आहवनीये
ऽग्न्यन्वाधानमिति केचित् · शाखाछेदनं संनमनान्तम् पवित्रबन्धनम् तयैव यज-
मानसम्बन्धिनीनां गवां वत्सानामपाकरणम् · चतुरासनम् ब्रह्मोपवेशनम् ·
पात्रासादनादि · अत्राग्न्यन्वाधानब्रह्मवरणाव्रतग्रहणप्रणीताप्रणयनपरिस्तरणदक्षि-
णासादनानामभावः सांतपनीयातन्त्रमध्यपातात् · आज्यनिर्वापानन्तरं हस्तगृ-
हीतऽएव पवित्रवति चरुपात्रे यावत्स्वं गा दोहयित्वा तण्डुलानामीक्षणं प्रक्षा-
लनं च कृत्वा दुग्धमध्ये संवापं कृत्वा घर्मोऽसीत्यधिश्रित्य पर्यग्निकुर्यात् । अत्राप-
वृक्तानां पात्रादिद्रव्याणामासादनप्रोक्षणादिसंस्कारा भवन्ति · कुतः · स्थालीपक्षे
तदेव प्रतिवेशमाज्यमधिश्रयति (२. ५. ३. ११) स्थाल्यामाज्यमासादयतीति (°११) आज्यस्य
चरुसंनिकृष्टाधिश्रयणविधिपरे वाक्ये आसादनक्रमविधिपरे वाक्ये [चा]धिश्रयणा-
दिसंस्कारस्य दर्शनात् तथा स्रुवं च स्रुचं च संमार्ष्टीति (°११) संमार्गावसर-
विधिपरे वाक्ये स्रुक्स्रुवस्यापि संस्कारदर्शनात् · दक्षिणादानं तु न भवति
तन्त्रान्तःपातात् · होत्रामन्त्रणावरणे तु पृथग्दक्षिणाभावेऽपि सोमान्तर्भूतेष्टिपशु-
ष्विवाविरुद्धे । अत्राहापस्तम्बः मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायम्
यत्सांतपनस्य बर्हिस्तद्गृहमेधीयस्यापि वा त्रेधा बर्हिर्भवति न सामिधेनीरन्वाह
न प्रयाजा इज्यन्ते नानुयाजाः अयजुष्केण वत्सानपाकृत्य पवित्रे गा दोहयति

1) ? °योर्निर्णयन्पु° २. 2) Thus Jaimini. च दर्शयेद्गुण° २. 3) ? नचेवं संति २.
4) °द्वे सति २.

स वै¹⁾ खलु पर्णशाखया वत्सानपाकृत्य पवित्रवति संदोह्य यथैतदमावास्यायां क्रियते तं चरुं श्रपयतीत्येकेऽग्नीनन्वाधाय वेदं कृत्वाग्नीन्परिस्तीर्य प्रक्षालनादि कर्म प्रपद्यते यथार्थ पात्राणि प्रयुणक्ति स्थालीं कपालानां स्थाने निर्वपणकाले चतुरो मुष्टीन्निरुप्य बह्विवावपति²⁾ कपालानामुपधानकाले ध्रुवासीति³⁾ मन्त्रं संनमति पिष्टानामुत्पवनकाले तण्डुलानुत्पुनात्यधिश्रयणकाले प्रातर्दोहवत्सर्वा यजमानस्य गा दोहयित्वा तस्मिञ्छ्रपयति सम्प्रैषकाले यदन्यद्ध्मावर्हिषस्तत्सम्प्रेष्यतीति · मानवसूत्रे हुते सायमग्निहोत्रे मरुद्भ्यो गृहमेधिभ्यः स सर्वासां दुग्धेऽओदनं श्रपय[ती]ति · सायमिति काठके · मरुद्भ्यो गृहमेधिभ्योऽपराह्णे चरुरिति शाखान्तरे · माध्यन्दिनानां त्वग्निहोत्रहोमात्प्रागेव गृहमेधीया तदन्ते यवाग्वैतां रात्रिमग्निहोत्रं जुहोतीति (२. ५. ३. १६) श्रुतत्वात् तदन्तेऽएव यवाग्वाग्निहोत्रहोम इति सूत्रकरणाच्च (३४)। अत्र हरिस्वामिनः शाखया यया कयाचिद्वत्सान् तूष्णीमपाकृत्य (२. ५. ३. ४) पवित्रवति पात्रे संदोह्य (°४) तत्राग्रे मातृभिर्वत्सान्समवार्जन्ति (°१६) यवाग्वैतां रात्रिमग्निहोत्रम् (°१६) यदि बहुरोदनः स्यादिति (°१६) वाक्यशेषेभ्यो यावत्स्वं गाः दोहयेत् तदनुरूपांश्च व्रीहीन्निर्वपेदिति गम्यते · तस्मिन्पयसि चरुं श्रपयति न पायसम् चरुरु होवेति (२. ५. ३. ४) पायसत्वाशङ्कां निवर्तयति · मानवे पलाशशाखया सर्वान्वत्सानपाकरोतीति · एवमन्येष्वपि सूत्रेषु। शकलानि च पूर्वापूर्वाण्येव विधीयन्ते नेध्मस्थाने⁴⁾ इध्मकार्यस्य सांतपनीयातन्त्रान्तःपातित्वेनैव सिद्धत्वात् · गृहमेधीयस्यापूर्वत्वपक्षे तु इध्मस्य प्राप्तिरेव नास्ति कुतस्तत्स्थानापत्तिः शकलानाम् अत एव तेषामासादनप्रोक्षणादिरपीध्मधर्मस्याभावः · शकलनिधानमप्येतदपूर्वमेव न प्राकृतम् तेनाप्रैषमेव तूष्णीं कर्तव्यम्। इदानीमिदं पयः सांनाय्यधर्मकम् उताधर्मकमिति · तत्र सूत्रकारः स्वयमेव पक्षं परिगृह्णाति ·

सांनाय्यवत् ॥७॥ तदेतत्पयः सांनाय्यवत् सांनाय्यधर्मकं भवति · कुतः प्रदेयत्वात् चरौ प्रदीयमाने पयोऽपि देवतोद्देशेनैव प्रदीयते · अतो धर्मवद्भवतीति प्रातऽआह ·

१) ? सावे २. २) ? विह्ववाव° २. ३) ? कपालामुपधानि ध्रुवोऽसीति २. — See २. ४. २७. ४) ? नेध्मास्थाने २.

तूष्णीं वैकचोदनात् ॥ ८॥ वा पूर्वोक्तपक्षनिरासे । एतत्पयस्तूष्णीमेव संस्कर्तव्यम् न सांनाय्यवत् समन्त्रकं तद्धर्मकं वा । कुतः एकचोदनात् यतः कारणादियमेका चोदना अथ मरुद्भ्यो पवित्रवति संदोह्य चरुं श्रपयतीति (२. ५. ३. ४) एका च सती नोभे विकर्तुमर्हति । तस्माद्धर्मकमेवैतत्पयः । तथापि यावन्तो वाचनिकाः सांनाय्यधर्मास्तावन्तस्तूष्णीं कर्तव्याः शाखया वत्सानपाकृत्येत्यादयः । तथा च शाखान्तरे अयजुषा वत्सानपाकरोतीति ।

श्रुतेश्च ॥ ९॥ केषांचिद्धर्माणां पुनः श्रुतेश्चाधर्मकमेवैतत्पय इत्यवसीयते । सांनाय्यधर्मकत्वे तु सर्वधर्माणां प्राप्तेः केषांचित्पुनःश्रवणं न स्यात् अतोऽप्यधर्मकमेवैतत्पय इति ।

अपपित्वाभिघार्योद्धास्य शरावयोरुद्धरति ॥ १०॥ ततस्तं चरुं अपपिद्धास्य प्राणदानानन्तरं शरावयोः द्वेधा विभज्य उद्धरति ।

पात्र्योर्वा ॥ ११॥ मरुत्योर्निर्णिक्तयोः पात्र्योः । अथ द्वे पिशीले वा पात्र्यौ वा निर्णेनिक्ति तयोरेनं द्वेधोद्धरन्तीति वचनात् (२. ५. ३. ६) । निर्णेजनं संमार्ग उच्यते । स च गृहमेधिपिशीलकस्यैव प्राप्नोति न सौविष्टकृतस्य शेषकार्यार्थत्वेन धर्माणामप्रयोजकत्वात्[1] परं तु वचनादन्ये[2] क्रियन्ते । अथ निर्णेनिक्ति[3] प्रक्षालयतीत्यर्थ इति माधवः तच्च सामर्थ्यपरिप्राप्तत्वान्नोपनिबद्धम् ।

आसेचने मध्ये कृत्वा सर्पिरासिञ्चत्याज्यार्थम् ॥ १२॥ आसेचने घृतासेकार्थं गर्तौ तयोः शरावस्थयोः पात्रीस्थयो[र्वा] मध्ये कृत्वा तत्र सर्पिः संस्कृतं घृतमाज्यभागोपस्तरणाद्याज्यकार्यार्थमासिञ्चति ।

यावदुक्तमतः ॥ १३॥ यतः कारणात् सैव स्तीर्णा वेदिरित्यादिना (२. ५. ३. ५) सांतपनीयातन्त्रमध्य एव गृहमेधीयं विधीयते अत एव कारणात् यावदुक्तं भवति यावदुच्यते तावदेव भवति न न्यूनाधिकं चोदकप्राप्तम् । अन्ये त्वेवं व्याचक्षते । येन प्रकृतितः प्राप्तावप्याज्यभागौ पुनर्विधीयेते तेनाज्यभागसदृशमाराडुपकारकमन्यदत्र न भवति तद्यथा कुक्कुटाद्धननस्फ्योदकप्रहरणाद्या-

---

1) ? कृतस्याशेषकार्यार्थेनधर्मा° २. 2) ? वचनाद्वयोः क्रियन्ते २. 3) निर्णेजयति २.

रप्रयाजानुयाजपत्नीसंयाजदक्षिणाग्निहोमपूर्णपात्रब्राह्मणतर्पणाकर्मापवर्गादिकम्
द्रव्यसंस्कारास्तु भवन्त्येव प्रतिपत्तयश्च ।

स्तरणयजुषा वेदिमभिमृश्य तूष्णीं वा कृतत्वात् परिधिपरिधानम् ॥ १४ ॥
वेदिस्तरणयजुषा (२. २) तूष्णीं वा · अतः पूर्वमोदनौ स्रुक्स्रुवौ चादाय वेदि-
समीपे आगत्य तूष्णीमेव वेदिमभिमृश्य प्रागासादितप्रोक्षितमेकमिध्मकाष्ठं
प्रस्तरं चादायाहवनीयेक्षणान्तं परिधिपरिधानं मन्त्रेण करोति · प्रथमं परिधिमु-
पस्पृश्य तस्येध्मस्य निरसनम् नाहवनीयेऽआधानम् तदर्थसिद्धत्वात् ।

शकलान्याधाय मन्त्योद्धृतावासादयति ॥ १५ ॥ मन्त्या इहासंख्यानि यज्ञि-
यवृक्षशकलान्याहवनीये आधाय सूर्यस्त्वेति जपान्ते आहवनीये प्रक्षिप्य शरा-
वयोः पिशीलकयोर्वा उद्धृतावोदनावासादयति · श्रुतिक्रमेणैवासादनम् स्रुवा-
सादनं तु वचनात् सम्प्रदायकारादयस्तु पूर्वं स्रुवासादनं तत ओदनयोरासाद-
नमित्याहुः · सौविष्टकृतस्यौदनस्यानासादनम्[1] शेषकार्यार्थत्वेनाप्राप्तेः अतश्च
वचनाभावे पशौ त्र्यङ्गानां प्राणदानासादनालम्भा न भवन्ति शेषकार्यार्थत्वादेव ।
अत्रोभयोरासादनमन्त्रस्योहः प्रियाभ्यां धामभ्यां प्रिय७ सद आसीदतमिति आज्यौ-
दनयोरुभयोरपि मन्त्रस्य प्रयोजकत्वात् ।

स्रुक्स्रुवं च संमार्ष्टि ॥ १६ ॥ श्रुत्युक्तेऽवसरे · स्वशाखायामोदनयोः सर्पि-
रासेकानन्तरं स्रुक्स्रुवसंमार्जनमुक्तम् (२. ५. ३. ६) ।

अनुद्वास्य वा संमार्जनम् ॥ १७ ॥ वा अवधारणे · काण्वपाठाच्चरुमनु-
द्वास्यैव चोदकप्राप्ते काले स्रुक्स्रुवसंमार्जनं कर्तव्यम् · अतश्च प्राकृतऽएव काले
स्रुवजुहूमेक्षणपिशीलकद्वयेडापात्रीणां संमार्गः ततः पत्नीसंनहनादि ।

आज्यभागाभ्यां चरति ॥ १८ ॥ आसादनानन्तरमात्मालम्भोदकस्पर्शौ कृत्वा-
हवनीयोपवाजनाग्निसंमार्गौ च कृत्वा समन्त्रकं होतृवरणं कर्तव्यमिति कर्कादि-
मतम् · हरिस्वामिमते त्वेतानि न भवन्ति सांतपनीयाकृतानामेवात्र प्रसङ्गात् ·
होत्रामन्त्रणावरणे तन्त्रमध्यपातेऽपि भवत एव होतुरप्रवृत्तत्वादित्यपरे । ततो
ऽध्वर्युराज्यभागाभ्यां चरति वचनात् · तत्प्रकारमाह ·

---

१) ? ० स्यौदनादासा° २.

अग्नेयं दक्षिणात् ॥ १९ ॥ दक्षिणौदनस्थात्सर्पिरासेचनात् घृतपूर्णाद्वर्तात् चतुराज्यमवदायाग्नेयमाज्यभागं करोति · अत्र च स्रुवं स्रुचं चाददानेनानुवाचनं कार्यम्[1] अत्रापि वषट्कारानन्तरमेव होमो न तु वषट्कारेण सह पुनर्वचनात् ।

सौम्यमुत्तरात् ॥ २० ॥ आज्यभागं यजति ।

गृहमेधिस्विष्टकृतौ चाज्यभागवत् समावदानौ ॥ २१ ॥ गृहमेधियागस्विष्टकृद्यागौ च यथाक्रममाज्यभागवत् [दक्षिणादुत्तराच्च] भवतः · तुल्यसंख्यावदानौ स्विष्टकृत्यप्यवदानद्वयमेवावदेयम् उपरिष्टात्सकृदभिघारश्च इत्यर्थः · स्थालीपक्षे एकप्रत्यवायात् स्विष्टकृदित्ययं पक्षो भवति [अत्र तु] एकप्रत्यवायात् स्विष्टकृत इत्यस्यापवादः (१.९.१) पञ्चावत्तिनां तु त्रिस्त्रिरवदानमुभयत्र भवति ।

अप्रत्यभिघारणं च ॥ २२ ॥ प्रधानयागावदानान्तरं स्विष्टकृदर्थावदानानन्तरं चावदाय यदवदानस्थानयोः प्रत्यभिघारणमुक्तम् तन्न · न संचराभ्युक्षणम् न प्राशित्रम् न चतुर्धाकरणम् · इडावदानं षडवत्तब्रह्मयजमानभागावदानं च दक्षिणादोदनात् अथेडामेवावद्यति न प्राशित्रमिति श्रुतेः (२.५.३.१०) · इडाग्रहणं भागानामुपलक्षणम् चोदकानुवृत्तेः प्राशित्रस्य तु वचनात्प्रतिषेधः · न यजमानभक्ष इत्यापस्तम्बः । एवं पिशीलकपक्ष उक्तः अधुना स्थालीपक्षमाह ·

अनुद्धृत्य वा ॥ २३ ॥ विकल्पे · अथवा चरुं पिशीलकयोः पात्र्योर्वा अनुद्धृत्यैवासादनादि स्विष्टकृदन्तं करोति । तत्र विशेषमाह ·

सहितमाज्यमधिश्रयति ॥ २४ ॥ अनुद्धरणपक्षे चरुसहितमेव चरुसंलग्नमेवाज्यमधिश्रयति · आहवनीय एवेत्यर्थः ।

उद्वास्योभयमासादयति ॥ २५ ॥ चरुमभिघार्योद्वास्य प्राणदानं च कृत्वा उभयम् आज्यस्थालीं चरुं च वेदौ आसादयति · अस्मिन्पक्षे आज्यस्थाल्या एव चतुर्गृहीताभ्यामाज्यभागौ गृहमेधिस्विष्टकृद्यागौ च प्रकृतिवद्विषमावदानौ · प्रत्यभिघारणमपि भवति स्विष्टकृति द्विरभिघारणं च · अन्यत्सर्वं पूर्वपक्षवत् · पञ्चावत्तिनां तु प्रकृतिवदुभयत्र पञ्चावत्तता कार्या ।

न प्राशित्रम् ॥ २६ ॥ अत्रोभयोः पक्षयोः प्राशित्रं न भवति उभयत्र

1) अत्र स्रुवं हस्तेनाददानेना° २. See २.५.३.६.

अथेडमेवावद्यति न प्राशित्रमिति श्रुतेः (२.५.३.१० १६) · अत्र हरिस्वामिनः इडामेवावद्यतीत्ययमनुवादः अप्राप्तत्वाद्धि तस्याः प्राप्तमेवावदानम् न प्राशित्रमिति तु प्राप्तस्य प्रतिषेधः ततश्च ब्रह्मभागाद्योऽप्रतिषिद्धत्वादिडावद्वद्वेया इति ।

इडान्तं भवति ॥२७॥ एतद्गृहमेधीयम् न्यायस्य प्रायणीयखण्डे[1] वक्ष्यमाणत्वात् ।

पूर्वं मार्जनमुपहूय ॥२८॥ पूर्वे पक्षे इडामुपहूय प्रथमं मार्जनं सर्वैः कार्यम् [ततो] भक्षणमिति · द्वितीये तु पक्षे भक्षणानन्तरमेव मार्जनम् पूर्वं इति विशेषोपादानात् ।

प्राञ्जलि युक्ताः ॥२९॥ ब्रह्माद्याश्चत्वार ऋत्विजः इडां प्राञ्जलि · युक्तग्रहणं यजमानस्येडाप्राशनवारणार्थम् ।

यजमानगृह्या हविरुच्छिष्टाशा ऋत्विजो ब्राह्मणाश्चान्ये बटुश्चेत् ॥३०॥ यजमानगृह्या हविःशाः ये कृतोपनयनास्ते तमोदनं शरावोद्धृतम् स्थालीपक्षे स्थालीस्थितं प्राञ्जलि अनुपनीतस्य शूद्रतुल्यत्वेनाग्न्यधिश्रितहविःशेषभक्षणेऽधिकाराभावात् । बटुश्चेत् ओदनः स्यात् ।

अरिक्ताᳬ स्थालीं निदधाति ॥३१॥ अशेषां स्थालीं सुगुप्ते प्रदेशे क्वचित्स्थापयति । पूर्णदर्वायेति (२.५.३.१६) पूर्णा दर्वी यस्मिन्कर्मणि तत्पूर्णदर्वम् अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः ।

सांतपनीयाᳬ सᳬस्थाप्य ॥३२॥ ततो गृहमेधीयाशेषसमाप्त्यनन्तरं सांप्यवक्ष्यमाणां कुर्यात् · सांतपनीयासमाप्तिश्च केषांचिद्बर्हिर्होममात्रेण केषांचिद्बर्हिर्होमब्राह्मणतर्पणप्रैषब्राह्मणतर्पणाकर्मापवर्गाधानरूपपदार्थचतुष्टयेन केषांचिद्बर्हिर्होमादि-नमः-कृतायेत्यन्तेन समस्तेनेति · [अथ ये बर्हिर्होममात्रेण] तेषां गृहमेधीयायां ब्रह्मवरणं दक्षिणादानमाहवनीयकल्पनमुपवाजनसंमार्गादि सर्वं पुनर्भवति [इतरेषाम्] एते न भवन्ति ।

प्रातर्वा शेषभावात् ॥३३॥ वा अवधारणे · प्रातः प्रतिपद्येव दर्विहो-

---

[1]) See ७. ५. २२ ff.

मानन्तरं सांतपनीयां संस्थापयेत् नेदानीम् · कुतः शेषभावात् गृहमेधीयाशेषस्य दर्विहोमस्य विद्यमानत्वात् ततो दर्विहोमे कृते गृहमेधीयासमाप्तिः प्राप्नोति तदन्ते च सांतपनीया समापनीयेति · अतश्च दर्विहोमस्यापि सांतपनीयातन्त्रम-ध्यपातित्वात्परतन्त्रोत्पत्तयो जुहोतिमात्रा इति (६. १०. २८) होममात्रं भवति नान्या जुहोतिसम्बन्धिनी दार्शपौर्णमासिकी इतिकर्तव्यतेति · येषां च बर्हिर्होम-मात्रोत्कर्षस्तेषां सर्वं भवत्येव दर्विहोमे ।

मातृभिर्वत्सान्त्सऽसृज्य निवान्यावत्सं बध्नाति ॥३४॥ गृहमेधीयासमा-प्त्यनन्तरं निवान्याया गोर्वत्सं बध्नाति · तस्य रात्रौ संसर्गो न कर्तव्यः पितृयज्ञे तत्पयसा प्रयोजनमस्ति यतः । स्वयं नष्टवत्सा परकीयेण वत्सेन या गौर्दुह्यते सा निवान्येत्युच्यते । यजमानगृहवर्तिनां सर्वेषां वत्सानां संसर्जनप्राप्तौ प्रातः पितृयज्ञार्थं दोह्यायाः[1] निवान्याया गोर्वत्सस्य बन्धनं कर्तव्यम् वत्सांश्च रात्रौ[2] मातृभिः सह वासयेतेति छन्दोगसूत्रे (लाट्यायन ५. ९. १२) । अग्निहोत्रहोमार्थ-मप्यस्यां रात्रौ पयो न दोग्धव्यमित्यभिप्रेत्य द्रव्यान्तरं विधत्ते ·

यवाग्वाग्निहोत्रहोमः ॥३५॥ अस्यां रात्रौ सायं प्रातः · तण्डुलैः शिथिलपक्वा यवागूः । अथ दर्विहोममाह ·

प्रातर्हुत्वाहुत्वा वा स्थाल्या दर्व्यादत्ते पूर्णा दर्वीति (३. ४१) ॥३६॥ प्रातः प्रतिपदि अग्निहोत्रं हुत्वा अहुत्वा वा सशेषायाः गृहमेधीयाचरोः स्थाल्याः सकाशात् स्थालीस्थमोदनं गृह्णाति · दर्व्याः चतुष्ककार्यापत्त्या संमार्गप्रतपने पूर्वं कार्ये ।

ऋषभमाह्वयितवै ब्रूयात् ॥३७॥ ग्रहणानन्तरमध्वर्युर्यजमानं प्रति ऋषभ-माह्वयितवाऽइति प्रैषं ब्रूयात् · ऋषभो यथा रौति शब्दं करोति तथा त्वं तस्या-ह्वानं कुर्वित्यर्थः ।

रुते जुहोति ॥३८॥ रुते ऋषभे कृतशब्दे सति तयैव दर्व्याहव-नीये जुहोति ।

अव्याहरति ब्रह्मा जुहुधीत्याह ॥३९॥ अव्याहरति ऋषभे ।

1) See ५. ८. १८. 2) रात्रौ deest in Lâtyâyana.

देहि मऽइति (३.५०) जुहोति ॥४०॥ दर्व्या गृहीतमोदनम् · इदमिन्द्रायेति त्यागः ।

ऋषभो दक्षिणा ॥४१॥ अध्वर्यवे । अकृते चेद्दर्विहोमः तदा दर्विहोमान्ते सांतपनीयां संस्थाप्य पुनरुद्धृत्याग्निहोत्रहोमः कार्यः · कृते चेत् तस्मिन्नेव विहारे ॥ ॥ षष्ठी कण्डिका ॥६॥

अथ पद्धतिः ॥

अथ साकमेधा उच्यन्ते · ते च फाल्गुन्यां प्रारम्भे कृते कार्त्तिक्यां भवन्ति चैत्र्यामारम्भे मार्गशीर्ष्याम् वैशाख्यामारम्भे पौष्याम् । तत्र पौर्णमास्यामृत्विग्वरणम् ॰गोत्र ॰शर्मन्निष्टिकेन ऋषभदक्षिणेन साकमेधपर्वणाहं यक्ष्ये तत्र मे त्वं ब्रह्मा भवेत्यादिना ब्रह्महोत्रध्वर्य्वग्नीध्राणां वरणम् । ततो गार्हपत्यात्समारोपार्थमाहवनीयमुद्धृत्यायं ते योनिरिति वरुणप्रघासवद्गार्हपत्याहवनीययोः समारोपः उदवसानम् देशान्तरे गमनम् मन्थनम् स्थापनम् साकमेधार्थमित्यग्न्योर्विहरणम् · अस्मिन्पक्षे तस्मिन्नेव विहारे त्र्यम्बकान्तं सकलं पर्व कार्यम् अग्न्यन्वाधानं तु प्रतीष्टि पृथगेव प्रतीष्टि पृथगेवोद्धरणमिति सम्प्रदायः । अत्र पूर्वाह्णे ऽग्नयेऽनीकवते पुरोडाशोऽष्टाकपाल उद्धरणादिकर्मापवर्गान्तः · अन्वाहार्यो दक्षिणा · तत्रानीकवदिष्ट्यर्थमित्युद्धरणे साकमेधार्थसाधारणोद्धरणपक्षे प्रतीष्ट्युद्धरणाभावः · अनीकवदिष्ट्याहं यक्ष्यऽइति[1] वरणे · पात्रासादनेऽष्टौ कपालानि विंशतिरिध्मकाष्ठानि अन्यत्सर्वं प्रकृतिवत् · ग्रहणे अग्नयेऽनीकवते जुष्टम् · प्रोक्षणे अग्नयेऽनीकवते त्वा जुष्टम् · अग्निमनीकवन्तं गह · सप्तदशेन वर्ग्रेणेत्यवबाधनम् · उत्तमप्रयाजे इदमग्नये सोमायाग्नयेऽनीकवते देवेभ्य आज्यपेभ्य इति · प्रधानयागे अग्नयेऽनीकवतेऽनुब्रूहि अग्निमनीकवन्तं यज · प्राशित्रादि सर्वम् · व्यूहने अग्नेरनीकवत उज्जितिम् अग्निरनीकवांस्तमपनुदत्विति · शेषं कर्मापवर्गान्तं प्रकृतिवत् · इत्यनीकवदिष्टिः । प्रतीष्टि विहारपक्षे पुनरुद्धृत्य मरुद्भ्यः सांतपनेभ्यो मध्यन्दिने चरुः · सांतपनीयेष्ट्यर्थमित्युद्धरणपक्षे · सांतपनीयेष्ट्याहं यक्ष्यऽइति वरणे · पात्रासादने कपालस्थाने चरुस्थाली दक्षिणा

1) Thus B. ॰ष्ट्यार्थं यक्ष्यामाह १.

अन्वाहार्यः नोपवेषः विंशतिरिध्मकाष्ठानि शृतावदानस्थाने मेक्षणम् पात्र्या अभावः शेषं प्रकृतिवत् । ग्रहणे मरुद्भ्यः सांतपनेभ्यो जुष्टम् । प्रोक्षणे मरुद्भ्यः सांतपनेभ्यस्त्वा जुष्टम् । मरुतः सांतपनानावह । सप्तदशेन वज्रेणेत्यवबाधने । उत्तमप्रयाजे इदमग्नये सोमाय मरुद्भ्यः सांतपनेभ्यो देवेभ्य इत्यादि । मध्यन्दिने प्रधानयागः मरुद्भ्यः सांतपनेभ्योऽनुब्रूहि मरुतः सांतपनान्यज इदं मरुद्भ्यः सांतपनेभ्यः । ततः स्विष्टकृदादि । चतुर्धाकरणानामभावः । व्यूहने मरुतां सांतपनानामुज्जितिम् मरुतः सांतपनास्तमपनुदन्त्विति । प्रस्तरहोमे इदमग्नये सोमाय मरुद्भ्यः सांतपनेभ्यो देवेभ्य इत्यादि । समिष्टयजुरन्तं कर्म स्थाप्यते बर्हिर्होमादि कर्मापवर्गान्तं श्वो भूते दर्विहोमानन्तरमेव भवति नेदानीम् । अथवा बर्हिर्होमो ब्राह्मणतर्पणप्रैषो ब्राह्मणतर्पणं नमः कृतायेति चेति पदार्थचतुष्टयवर्जमन्यत्सर्वं कार्यम् । बर्हिर्होममात्रवर्जं कर्मापवर्गान्तं समापनीयमिति कर्कः । तत्राद्य एव पक्षो युक्त इति हरिस्वामिभिरतिप्रबलयुक्तिभिर्दृढीकृतमस्तीति स एव पक्षोऽस्माभिरादियते । इति सांतपनीया समिष्टयजुरन्ता ॥ ॥ ततः सायंकाले प्रागग्निहोत्रहोमाद्गृहमेधीयेष्टिः । तत्र मरुद्भ्यो गृहमेधिभ्यश्चरुर्भवति । तत्र पूर्वम् इध्मस्थाने प्रणीतानां पश्चादनियतसंख्यानां यज्ञियवृक्षशकलानां परिधीनां च निधानम् । नाग्न्यन्वाधानम् पशुपुरोडाशवत्तन्त्रमध्यपातात् आहवनीय एवाग्न्यन्वाधानमित्यन्ये [1] । शाखां तूष्णीं छित्वा तया यावत्त्वं गवां वत्सानामपाकरणं तूष्णीम् । अमन्त्रकं ब्रह्मण उपवेशनम् आसनस्य संस्कृतत्वात् । न व्रतग्रहणम् अविसृष्टत्वात् । परिस्तरणाभावः । पात्रासादने शूर्पाग्निहोत्रहवणी स्थालीकृष्णाजिनम् उलूखलमुसलम् पात्रीधान्यम् पवित्रच्छेदनानि पवित्रे स्थाली आज्यं च वेदश्च दोहनपवित्रम् एकमिध्मकाष्ठम् प्रस्तरमात्रं बर्हिः स्रुवो जुहूः मेक्षणम् द्वे शरावे पात्र्यौ वा योक्त्रम् पूनकुशाश्च परिधयः कुशास्तृतं पीठम् इडापात्री । स्फ्योपहितपात्रीकरणादि । ग्रहणे मरुद्भ्यो गृहमेधिभ्यो जुष्टम् पयोबाहुल्यापेक्षया बहूनां व्रीहीणां ग्रहणम् । प्रोक्षणे मरुद्भ्यो गृहमेधिभ्यस्त्वा जुष्टम् । कुक्कुटाहननवर्जितं कृत्वा-

1) ? नाग्न्यन्वाधा आह॰न्ये नं पक्ष॰तात्. १.

त्रिनादानादि कणनिधानान्तं कण्डनम् · आज्यनिर्वापवेदबन्धौ · ईक्षणान्ते चरुस्थालीमादाय तस्यां दोहनपवित्रं निधाय तत्रैव पवित्रवति चरुपात्रे यावत्स्वं गा दोहयित्वा तण्डुलान्प्रक्षाल्य पवित्रवति चरुपात्रे पयोमध्ये संवापः · घर्मोऽसीत्यधिश्रयणम् · पर्यग्निकरणम् · उदकस्पर्शः[1] · देवस्त्वेति श्रपणम् · मा भेरित्यालम्भः · स्फ्यमुद्यम्य प्रोक्षणीरासादयेध्मं बर्हिरुपसादय स्रुचः संमृड्ढीत्यादिप्रैषः · न स्फ्योदकप्रहारः · न पाण्योरवनेजनम् · अपरेण प्रणीतानां स्फ्येध्मबर्हिषां सादनम् · स्रुवजुहूमेक्षणसंमार्गः शरावयोः पात्र्योर्वा संमार्गः संमार्जनापासनम् · पत्नीसंनहनाद्याज्यावेक्षणान्तम् · इध्मवेद्योः[2] प्रोक्षणम् · बर्हिः प्रतिगृह्य वेद्यां निधाय ब्रह्मन्बर्हिः प्रोक्षिष्यामि बर्हिरसि स्रुचे त्वा जुष्टमिति प्रस्तरमात्रबर्हिषः प्रोक्षणम् मूलावसेकः · प्रणीतासु पवित्रनिधानम् · बर्हिर्विस्रस्य तूष्णीं प्रस्तरग्रहणम् ब्रह्मणे समर्पणम् संनहनं विस्रस्य दक्षिणस्यां वेदिश्रोणौ निधायान्यैर्बर्हिर्भिरवच्छादयति । ततो गार्हपत्यसमीपे गत्वा शरावयोः पात्र्योर्वा स्थापनम् · चरुमभिघार्योदगुद्वास्य प्राणदानम् मरुतो गृहमेधिनो गच्छेति प्राकृतं च विकृताविति (१. ५. ४) न्यायात् · ततः शरावयोः पात्र्योर्वा सशेषं चरोरुद्धरणम् · उद्धृतयोर्मध्ये गर्तौ कृत्वा तयोराज्यस्थाल्याज्यस्य विभज्यासेकः · तत ओदनौ स्रुक्स्रुवं चादाय वेदिसमीपे आगत्य बर्हिर्वेदि ओदनादेः स्थापनम् · तूष्णीं स्तृताया एव वेदेरभिमर्शनम् · समित्प्रस्तरादानम् · कल्पनोल्मुकोद्वहनाभावः · परिधिपरिधानं समन्त्रकम् · परिधिमुपस्पृश्य समिन्निरसनम् · सूर्यस्त्वेति (२. ५) जपः · शकलाधानम् · आवृत्यौदनयोरासादनम् प्रियाभ्यां धामभ्यां प्रियं सद आसीदतमिति प्रियेण धाम्नेत्येवमनूहितेनैवेत्यपरे · ततः स्तृताया एव वेदेर्द्वे तृणेऽआदाय विधृत्योः[3] स्तरणम् सवितुरिति (२. ५) · प्रस्तरस्तरणम् · अभिन्यासः · प्रतिगृह्य सव्याशून्ये प्रस्तरे असि जुहूर्नाम्नेति (२. ६) स्फ्योपग्रहेण जुह्वा आसादनम् · सर्वालम्भे पूर्वमोदनस्थयोराज्ययोरालम्भः ततो दक्षिणौदनस्य[4] आत्मालम्भोदकालम्भौ[5] । होतृषदनस्थापनम् एहि होतरिति

---

१) उदकोपः B. (°कोपस्पर्शः ?) २) ? Thus B. नध्म° १. ३) धृत्यो B. धृत्यौ, १.
४) °णौद° १. B. ५) ? नात्मा° १. आत्मोदकालम्भौ B.

[होतु]रामन्त्रणम् समन्त्रकं होतृवरणम् होतुरपवृक्तत्वात् · होतुरामन्त्रणावरणे न भवत इति केचित् · होतर्यासनं संस्कृत्योपविष्टे सत्यध्वर्युः स्रुवं स्रुचं चाददान एवाग्नयेऽनुब्रूहीत्याह · ततो दक्षिणादोदनाच्चतुर्गृहीतमाज्यं जुहूमवदायातिक्रम्याश्राव्याग्निं यजेत्युक्त्वा वषट्कृते जुहोति · ततः सोमायानुब्रूहीत्युक्त्वोत्तरौदनस्यादाज्याच्चतुर्जुहूं गृहीत्वातिक्रम्याश्राव्य सोमं यजेत्युक्त्वा वषट्कृते जुहोति · ततो मरुद्भ्यो गृहमेधिभ्योऽनुब्रूहीत्युक्त्वा दक्षिणौदनस्यादाज्याज्जुहूमुपस्तीर्य तत एव मध्यात्पूर्वार्धाच्चावदाय तत एव सकृदुपर्यभिघार्यातिक्रम्याश्राव्य मरुतो गृहमेधिनो यजेत्युक्त्वा वषट्कृते जुहोति इदं मरुद्भ्यो गृहमेधिभ्यः · ततोऽग्नये स्विष्टकृतेऽनुब्रूहीत्युक्त्वा उत्तरौदनस्यादाज्यादुपस्तीर्य उत्तरस्यैवौदनस्य द्विरवदाय तत्स्थादेवाज्यादुपरि सकृदभिघार्यातिक्रम्याश्राव्याग्निं स्विष्टकृतं यजेत्युक्त्वा वषट्कृते जुहोति इदमग्नये स्विष्टकृते · उदकस्पर्शः · एत्य जुह्वा आसादनम् · न संचराभ्युक्षणम् न प्राशित्रावदानम् · इडावदानम् षडवत्तस्य च ब्रह्मयजमानयोश्चेति[1] न इवाभाति[2] · ततश्च पवित्रप्रतिपत्त्यन्ते भागपरिहारः · राक्षसभागान्ते भागावेक्षणं भागप्राशनं च क्रियते · दक्षिणादोदनादिडापात्र्यामुपस्तारः · तत एव दक्षिणतो मध्याच्चावदानम् · तत एव द्विरभिघारः · नात्र चतुर्धाकरणभागादि · इडासमर्पणादि मयीदं-जपान्तम् · उपहूय पूर्वं मार्जनम् तत इडाभक्षणम् ऋत्विजामेव न यजमानस्य · तत उपनीतानां यजमानगृह्याणामृत्विजां च नियमेनौदनप्राशनम् बहुश्चेदोदनस्तदान्येषामपि ब्राह्मणानां प्राशनम् · ततः सशेषां स्थालीमपिधाय दर्विहोमार्थं सुगुप्तदेशे निदधाति। ततः पवित्रप्रतिपत्तिः नाग्निसंमार्गः · मरुतां गृहमेधिनामुज्जितिमिति जुह्वा एव व्यूहनम् · अभ्युक्ष्य परिध्यञ्जनम् · आश्राव्य सूक्तवाकप्रैषः · प्रस्तरग्रहणम् · मध्यमूलयोरपि जुहूमिवाञ्जनम् · नीचैर्हरणम् · तृणग्रहणम् · प्रस्तरहोमः · अग्नये सोमाय मरुद्भ्यो गृहमेधिभ्योऽग्नये होत्रायेति त्यागः · अनुप्रहरेति प्रैषः · तृणप्रक्षेपः · आत्मालम्भः · उदकालम्भः · संवदस्वेत्यादेरभावः · परिधिप्रक्षेपः · संस्रवाहुतिः · धुरि

---

1) इडाषडवत्तयोरवदानम् ब्रह्मयजमानभागौ च इदं सर्वं दक्षिणौदनात् न चतुर्धाकरणं B. 2) ? °श्चेति पुस्तकांत्समीतोर (पुस्तकान्तरसमधीतं ?) न इवाभाति १.

निधानमेकस्या एव घृताच्यसि धुर्यौ पाहि सुम्नासि सुम्ने मा धेहीति विशेषः · न वेद्यालम्भः · वेद्योक्तविमोकः · आ वेदेः स्तरणम् · अन्यैरवहादनबर्हिर्होमः · राक्षसभागः · एवं पिशीलकपक्षे बर्हिरादिसर्वोत्कर्षपक्षे च गृहमेधीयोक्ता ।

अथ स्थालीपक्षे विशेष उच्यते · इध्मस्थाने शकलपरिधिनिधानादि चरोरुद्वासनान्तं पूर्ववत् · अत्राहवनीयश्रापिण आहवनीय एव प्रथममेवाज्याधिश्रयणम् · उद्वास्य स्थालीस्थस्यैवौदनस्य प्राणादानम् नोद्धृत्य · ततश्चरुस्थालीमाज्यस्थालीं स्रुक्स्रुवं चादाय वेदिसमीपे आगत्य तूष्णीं वेदिमभिमृश्य समित्प्रस्तरादानपरिधिपरिधानसूर्यस्त्वेति-जपान्ते शकलानाधायावृत्य चरुस्थालीमाज्यस्थालीं स्रुवं चासाद्य स्तृताया एव वेदेर्द्वे तृणे आदाय विधृत्योः स्तरणम् · प्रस्तरस्तरणम् अभिन्यासः पूर्ववज्जुह्वा आसादनम् आज्यचर्वोरालम्भः · आत्मालम्भादि होतुरुपवेशनान्तं पूर्ववत् · स्थाल्या एव चतुर्गृहीताज्यभागौ · गृहमेधियागे स्थाल्या एव जुह्वामुपस्तारः चरोर्मध्यात्पूर्वार्धाच्चावदानम् स्थाल्या एवोपर्यभिघारः क्षताभ्यङ्गः गृहमेधियागः · स्विष्टकृति स्थाल्या एवाभिघारः उत्तरार्धात्सकृदवदानम् द्विरभिघारः न क्षताभ्यङ्गः स्विष्टकृद्यागः · इडाभक्षणानन्तरं मार्जनम् चतुर्धाकरणानामभावः षडवत्तब्रह्मयजमानभाग-भागपरिहार-भागावेक्षण-भागप्राशनानि[1] पूर्ववद्भवन्तीति · अरिक्तायाः स्थाल्या अपिधाय निधानम् · अन्यत्सर्वं पूर्ववत् । पदार्थचतुष्टयपरिशेषपक्षे व्रतग्रहणम् सर्वार्थपक्षे प्रणीताप्रणयनं विमोचनं च भवति व्रतविसर्गश्च अन्यत्सर्वं सर्वोत्कर्षपक्षवत् तन्त्रमध्यपाताविशेषात् · बर्हिर्होममात्रपरिशेषपक्षे च सांतपनीयायाः समाप्त्यैव तन्त्रमध्यपाताभावादग्न्यन्वाधानब्रह्मवरणसमन्त्रकासनसंस्कारोपवेशनव्रतग्रहणसर्वार्थप्रणीताप्रणयनव्रतग्रहणान्वाहार्यपचनाहवनीयकल्पनोपवाजनसंमार्गाग्न्यग्निसंस्कारहोत्रामन्त्रणवरणदक्षिणादानसंमार्गप्रणीताविमोकव्रतविसर्गा भवन्ति । इति गृहमेधीया ॥ रात्रौ यवाग्वा सायम्प्रातरग्निहोत्रहोमः · वत्सानां स्वस्वमातृभिः संसर्गः · निवान्यावत्सस्य पृथग्बन्धनम् तस्याः पित्र्येष्टौ मन्थार्थदुग्धार्थत्वात् · या स्वयं मृतवत्सा परकीयेण[2] वत्सेन दुह्यते सा निवान्येत्युच्यते · प्रातरहुते

[1] ? प्राशीना । नीति १. [2] °कीयेन १.

ऽग्निहोत्रे हुते वा दर्विहोमः · तत्र ब्रह्मणस्तूष्णीमासनसंस्कारः · दक्षिणतो ब्रह्मयजमानयोरुपवेशनम् · वैकङ्कतदर्व्याः संमार्गप्रतपने · आहवनीयं परिस्तीर्य समिधमाधाय स्थाल्याः सकाशाद्दर्व्या ओदनं गृह्णाति पूर्णा दर्वीति · ऋषभमाह्वयितवाऽइति यजमानपुरुषं प्रति प्रैषः स प्रेषित ऋषभेण शब्दं कारयति · ऋषभेण शब्दे कृते जुहोति · ऋषभे[1] शब्दमकुर्वति ब्रह्मा जुहुधीत्याह · ततो यद्दर्व्या गृहीतम् तत् देहि मऽइति मन्त्रेण आहवनीये जुहोति इदमिन्द्राय · स एव ऋषभो दक्षिणा ब्रह्माध्वर्युभ्याम् अस्य दर्विहोमस्य समृद्ध्यर्थमृषभं दक्षिणां ब्रह्मणेऽध्वर्यवे चाहुः सम्प्रददे । तदेवमयं दर्विहोमो होममात्र एव भवति सांतपनीयतन्त्रान्तःपातात् परतन्त्रोत्पत्तयो जुहोतिमात्रा इत्युक्तत्वात् (६.१०.२८)· बर्हि[र्हो]मात्रोत्कर्षपक्षे तु सर्वजुहोतिधर्मयुक्तोऽयं दर्विहोमो भवति तन्त्रान्तःपाताभावात् । अतः परं सांतपनीयासमाप्तिः · बर्हिर्होमादि नमः कृतायेत्यन्तं सर्वम् पदार्थचतुष्टयं वा बर्हिर्होममात्रं वा कर्कमते । अहुतं चेत् उद्धृत्याग्निहोत्रहोमः प्रतीच्युद्धरणपक्षे । इति सांतपनीया ॥ ॥६॥

इति पञ्चमस्य षष्ठी कण्डिका ॥ ॥

मरुद्भ्यः क्रीडिभ्यः सप्तकपालः ॥१॥ ततः पुनरुद्धृत्य · चतुर्धाकरणवर्जं सर्वम् ।

अदित्यै चरुः ॥२॥ ·चतुर्धाकरणादि सर्वम् ।

अन्यत्रापि ॥३॥ न केवलमत्र अदित्यै चरुर्भवति अन्यत्रापि अदित्यै चरुस्तृतीयेत्यादौ (४.१०.१०)। अथवा अयमर्थः · अन्यस्मिन्नपि शाखान्तरोक्ते काले त्र्यम्बकान्ते अदित्यै चरुर्भवति · तदाह शाङ्खायनः (३.१७.१०-११) त्र्यम्बकान्तऽस्थाप्य मैत्रश्चरुरदितये वेति · एवमपि च मैत्रकठतैत्तिरिसूत्रेष्वपि उक्तमस्ति । अथवा यत्रादित्य इति चरुः श्रूयते तत्रादित्यै भवति न त्वादित्यायेत्येवं नियमः[2] अर्थात्[3] किमत्रादितेर्देवतात्वम् आदित्यस्य वेति संदेहः स्यात् आदित्यश्चरुस्ते

---

[1] वत्से B. [2] But see ६.६.१.२. (Kâty. १६.४.२३. आदित्येभ्यः) · [3] ? अथा २.

चेत्यादौ (११. १. ५-६) · यद्येवम् आदित्ये मह्यिष्या इत्यत्र (१५. ३. ६) कथं चरुत्वम् उच्यते अस्य सूत्रस्य श्रुतिवाक्योपलक्षणार्थत्वात् तत्र च आदित्यं चरुं निर्वपतीति (५. ३. १. ४) चरोः प्रकठितत्वादिति । अयमेवावाङ् प्राण आदित्येष्टिरिति (११. ५. २. ४) पृथगिष्टिव्यपदेशाद्भिन्नतन्त्रत्वे प्राप्तऽआह ·

समानबर्हिषी वा कालकर्मैकत्वात् ॥ ४ ॥ [किंडिनमादित्यश्चरुश्चेमे समानतन्त्रे भवतः · कुतः कालैकत्वात् एककालत्वात्][1] एकस्मिन्नेव प्रतिपदः प्रातःकाले द्वयोर्विधानात् कर्मणोऽपि पञ्चप्रयाजत्र्यनुयाजादेरेकत्वात् समानत्वात् ॥

॥ अथ महाहविरुच्यते ·

महाहविरुदवसाय निर्मथ्य ॥ ५ ॥ कर्तव्यम् । निर्मथ्येत्युपदेशात् अर्थात् पूर्वमग्नी समारोप्योदवसायैव श्वेतेन यजतऽइति श्रुतेः (२. ६. २. १२) · एतेनेति साकमेधपर्वणा तच्छब्दवाच्यं च महाहविः · कुतः · न हि तदवकल्पते यदुत्तरवेदावग्निहोत्रं जुहुयादित्यग्निहोत्रस्योत्तरवेद्यधिकरणता मा भूदिति पुनस्तदन्तऽउदवसानमुच्यते उत्तरवेदिश्च महाहविष्येव · तस्मात्पूर्वमप्युदवसानं महाहविष्येव तस्य संनिकृष्टत्वादित्यभिप्रायेणैतदुक्तम् । सिद्धान्तमाह ·

पूर्वेद्युर्वा ॥ ६ ॥ अथ वा पूर्वेद्युरेवानीकवत्याः पूर्वमेव समारोपोदवसानमन्थनानि कृत्वा पर्वारम्भणीयम् एतेनेति (२. ६. २. १२) शब्दस्य साकमेधाख्यसकलपर्ववाचित्वात् · आनीकवत्यादेः त्रैयम्बकान्तस्य हि साकमेधसंज्ञा न त्वेकस्य महाहविषः अथैतैः साकमेधैरिति प्रकृत्य (२. ५. ३. १) आनीकवत्यादीनां विधानात् तस्मात्तानि सर्वाणि साकमेधशब्दवाच्यानि · अतो वाशब्दोऽवधारणे पूर्वेद्युरेवेत्यर्थः · अयमेव सर्वेषां भाष्यकृतां सिद्धान्तः · अस्मिन्पक्षे केचिदेवमाहुः समारोप्योदवसाय गार्हपत्यं निर्मथ्य साकमेधार्थमेव साधारणावग्नी विहृत्यानीकवतीयादतिप्रणयनम् तावन्मात्रार्थत्वाच्च तदन्ते तस्यातिप्रणीतस्यैव लौकिकत्वम् ततश्च पित्र्यादिषु पूर्वौ मध्याह्नवनीय एवोपस्थानादौ तस्य साधारणत्वात् · अयमपि पक्षो युक्ततर एव दृश्यते अन्तेऽग्न्योः समारोपविधानात् अग्नी समारोह्येति । अथ महाहविषि दर्वीष्वाह ·

1) [to] from Ss.

नित्येभ्योऽधिकानि ॥७॥ आग्नेयादिभ्यः पञ्चभ्यः ।

ऐन्द्राग्नः ॥८॥ द्वादशकपालः पुरोडाशः षष्ठं हविः · चतुर्धाकरणाभावः ।

माहेन्द्रश्चरुः ॥९॥ सप्तमं हविः ।

वैश्वकर्मण एककपालः ॥१०॥ अष्टमं हविः · उपांशु सर्वहुतश्च भवति । सावित्रो नित्येषूपांशु ।

उत्तरवेद्यग्निप्रणयनमन्थनपृषदाज्यं च वरुणप्रघासवत् ॥११॥ अग्निमन्थनं पृषदाज्यग्रहणं च वैश्वदेविकमेव तद्वदेवात्रापि भविष्यति कथं वरुणप्रघासवत् · वरुणप्रघासेषु महाहविःषु चैन्द्राग्नादीनामधिकहविषां मन्थनसम्बन्धज्ञापनार्थमेतदुक्तम् इतरथाग्निमन्थनस्य पञ्चहविःसम्बन्धादधिकैः सह सम्बन्धो न स्यात् तथा च यदाधिकं हविर्विस्मृतं सत्स्वतन्त्रं क्रियते तदा मन्थनं न स्यात् ।

ऋषभो दक्षिणा ॥१२॥ महाहविषि शाखान्तरात् · ततो महाहविः कर्मापवर्गान्तं समापनीयं सिद्धम् इष्टिः संतिष्ठतऽइत्यापस्तम्बवचनात् · केचित्तु महाहविषो व्रतविसर्गात्प्राक्पितृयज्ञं त्रैयम्बकांश्चेहन्ति तस्य किं मूलमिति तऽएव विदुः ॥ ॥ सप्तमी कण्डिका ॥७॥

अथ पद्धतिः ॥

अथ क्रैडिनीया[1]) द्विहविष्केष्टिरुच्यते · तत्र मरुद्भ्यः क्रीडिभ्यः सप्तकपालः अदित्यै चरुः इमे हविषी समानतन्त्रे भवतः · प्रतीष्युद्धरणपक्षे क्रैडिन्यादित्येष्ट्यर्थमित्युद्धरणे · क्रैडिन्यादित्येष्टिभ्यामहं यक्ष्यऽइति वरणे · पात्रासादने सप्त कपालानि एका चरुस्थाली दक्षिणा अन्वाहार्यः शृतावदानानन्तरं मेक्षणाम् विंशतिरिध्मकाष्ठानि पुरोडाशपात्र्येका अन्यत्सर्वं प्रकृतिवत् · ग्रहणे मरुद्भ्यः क्रीडिभ्यो जुष्टम् अदित्यै जुष्टम् · प्रोक्षणे मरुद्भ्यः क्रीडिभ्यस्त्वा जुष्टम् अदित्यै त्वा जुष्टम् · नानाबीजपक्षे तद्धर्मा उक्ताः एकबीजपक्षे कणान्ते विभज्यालम्भः इदं मरुतां क्रीडिनाम् इदमदित्याः · प्राणादाने मरुतः क्रीडिनो गह अदितिं गह · सप्तदशेन वज्रेणेत्यवबाधने · उत्तमप्रयाजे इदमग्नये सोमाय मरुद्भ्यः क्रीडिभ्योऽदित्यै देवेभ्य इत्यादि · प्रधानयागे मरुद्भ्यः क्रीडिभ्योऽनुब्रूहि

[1]) ? क्रीडनीया ?·

मरुतः क्रीडिनो यज इदं मरुद्भ्यः क्रीडिभ्यः अदित्याऽअनुब्रूहि अदितिं यज इदमदित्यै · मेक्षणेन चरोरवदानम् · स्विष्टकृदादि पुरोडाशस्य प्राशित्रेडाव्यतिरिक्तं न भवति॑ चरोस्तु सर्वं भवत्येव · व्यूहने मरुतां क्रीडिनामदित्या उज्जितिम् मरुतः क्रीडिनोऽदितिस्तमपनुदन्तु · प्रस्तरहोमे इदमग्नये सोमाय मरुद्भ्यः क्रीडिभ्योऽदित्यै देवेभ्य इति · अन्यत्कर्मापवर्गान्तं प्रकृतिवत् · इति क्रैडिन्यादित्येष्टी ॥ ॥ अथ महाहविरुच्यते । तत्राष्टौ हवींषि भवन्ति आग्नेयोऽष्टाकपालः पुरोडाशः सौम्यश्चरुः सावित्रो द्वादशकपालोऽष्टाकपालो वा उपांशुदेवतः सरस्वत्यै चरुः पूष्णे चरुः ऐन्द्राग्नो द्वादशकपालः माहेन्द्रश्चरुः वैश्वकर्मण एककपाल उपांशुदेवतः । तत्र पूर्वमहृतवस्त्रपरिधानम् · प्राचीनप्रवणेऽग्नीनां नयनम् प्रतीच्युद्धरणपक्षे गार्हपत्यस्यैव नयनम् आहवनीयदक्षिणाग्न्योरुद्धरणम् तत्र महाहविरर्यं गार्हपत्यादिति संकल्पः · अग्न्यन्वाधानम् · व्रतग्रहणं वा · चतुरासनम् · ब्रह्मवरणम् महाहविषाहं यक्ष्ये तत्र भूयतऽइति · अत्र वा व्रतग्रहणम् · ततः पद्मासादनाद्युपयमन्युपनिवपनान्तं वरुणप्रघासवत् · एकस्फ्येति प्रैषोऽग्नीधं प्रति · एकोत्तरा वेदिर्न दक्षिणा · एकस्यैवाग्नेः प्रणयनम् · तत्राग्नये प्रह्रियमाणायेति प्रैषः · ततो द्विरासनम् · प्रणीताप्रणयनम् पूर्वमकृतं चेत् प्रणीताप्रणयनात्पूर्वं व्रतग्रहणम् । पात्रासादनेऽग्निहोत्रहवणीस्फ्यपवित्राणि सन्त्येव अन्यदासाद्यते · शूर्पं कपालानि त्रयस्त्रिंशदेकोनत्रिंशद्वा चरुस्थाल्यश्चतस्रः · शम्याकृष्णाजिनम् उलूखलमुसलम् दृषदुपलम् पात्रीधान्यम् धृष्टिः संयवनोदकम् स्याली आज्यं च वेदश्च दक्षिणार्थ ऋषभः अग्निर्विंशतिरिध्मकाष्ठानि कुशप्रसूप्रस्तरोपसंनद्धं[1] त्रेधा बर्हिः स्रुवो जुहूः उपभृत्पृषदाज्योपभृच्च ध्रुवा संमार्गार्हाणि यानि चेत्यत्र द्वे प्राशित्रहरणे शृतावदानम् मेक्षणम् पुरोडाशपात्र्यश्चतस्रः योक्त्रं यूनकुशाश्च पक्षे परिधयस्त्रयः मन्थनचतुष्टयम् कुशास्तृतं पीठम् इडापात्री षडवत्तं च अन्तर्धानकटः पूर्णपात्रम् पक्षे कर्मापवर्गा समित् वपनपक्षे क्षुरचतुष्टयं च · ततः स्फ्योपहितपात्रीकरणम् · पात्रान्तरे प्रोक्षणीः कृत्वा शूर्पाग्निहोत्रहव-

१) °प्रस्व° १. °प्रस्वः B.

णयोरादानादि । ग्रहणे अग्नये जुष्टम् सोमाय जु° सवित्रे जु° सरस्वत्यै जु° पूष्णे जु° इन्द्राग्निभ्यां जु° महेन्द्राय जु° विश्वकर्मणे जुष्टम् । नानाबीजपक्षे तद्धर्मा वैश्वदेवपर्वण्युक्ताः · प्रोक्षण्यः संस्कृता एव · हविःप्रोक्षणे अग्नये त्वा जुष्टम् सोमाय° सवित्रे° सरस्वत्यै° पूष्णे° इन्द्राग्निभ्यां° महेन्द्राय° विश्वकर्मणे त्वा जुष्टम् · एकबीजपक्षे कणान्ते विभज्यालम्भः इदमग्नेः सवितुः पूष्ण इन्द्राग्न्योर्विश्वकर्मणश्च इदꣳ सोमस्य सरस्वत्या महेन्द्रस्य च । कपालोपधाने आग्नेयस्याष्टौ कपालानि सावित्रस्याष्टौ द्वादश वा ऐन्द्राग्नस्य द्वादश विश्वकर्मण एकम् तत्र तपसा तप्यस्वेत्यभ्यूहनम् · ईक्षणाम् पिष्टानां तण्डुलानां च · ततः पूष्णे पिष्टानि पृथक्कृत्यालम्भः इदमग्नेः सवितुरिन्द्राग्न्योर्विश्वकर्मणश्च इदं पूष्णः · ततश्चरूणां तण्डुलान्विभज्य प्रत्येकमालम्भः इदꣳ सोमस्य इदꣳ सरस्वत्याः इदं महेन्द्रस्य · संयवनानन्तरं विभज्य पुरोडाशानामालम्भः इदमग्नेः इदꣳ सवितुः इदमिन्द्राग्न्योः इदं विश्वकर्मणः · सपृषदाज्यं वरुणप्रघासवदाज्यग्रहणम् · प्राणदाने अग्निं गच्छ सोमं° सवितारं°. सरस्वतीं° पूषणं° इन्द्राग्नी° महेन्द्रं° विश्वकर्माणं गच्छेति · प्राणदानानन्तरं घृतेनैककपालाच्छादनम् । हवींष्यासाद्यालभ्यात्मालम्भोदकालम्भौ कृत्वाग्निमन्थनं शकलादानादि होमान्तं वैश्वदेववत् · ततो होतृषदनस्थापनहोतुरामन्त्रणादि · अवबाधने सप्तदशेन वज्रेणेति । नव प्रयाजा वैश्वदेववत् त्यागास्तत्रैवोक्ताः · उत्तमे प्रयाजे इदमग्नये सोमायाग्नये सोमाय सवित्रे सरस्वत्यै पूष्णऽइन्द्राग्निभ्यां महेन्द्राय विश्वकर्मणे देवेभ्य इत्यादि · तत आज्यभागौ · प्रधानयागे अग्नयेऽनुब्रूहि[1] अग्निं यज सोमाया° सोमं° सवित्रऽउपांशु अनु° सवितारं° सरस्वत्याऽअ° सरस्वतीं° पूष्णेऽनु° पूषणं° इन्द्राग्निभ्याम° इन्द्राग्नी° महेन्द्राया° महेन्द्रं° विश्वकर्मणऽउपांशु अनुब्रूहि जुह्वामुपस्तीर्य सर्वमवधाय द्विरभिघार्यातिक्रम्याश्राव्य विश्वकर्माणं यज सर्वहोमः अपर्यावर्तनं च इदं विश्वकर्मणे · ततः स्विष्टकृदादि ऐन्द्राग्नस्य चतुर्धाकरणभागषडवत्ताभावः अन्येषां सर्वं भवति · दक्षिणालम्भे ऋषभोऽसीति · अनुयाजा नव पृषदाज्येन त्यागा वैश्वदेवपर्वण्युक्ताः · व्यूहने अग्नेः सोमस्य

1) °ब्रू३हि १ throughout.

सवितुः सरस्वत्याः पूष्ण इन्द्राग्न्योर्महेन्द्रस्य विश्वकर्मण उन्निनितिमनू॰ अग्निः सोमः सविता सरस्वती पूषेन्द्राग्नी महेन्द्रो विश्वकर्मा तमपनुदन्त्विति उपांशुदेवतानामुपांशूच्चारणम् अन्येषामुच्चैः · प्रस्तरहोमे इदमग्नये सोमायाग्नये सोमाय सवित्रे सरस्वत्यै पूष्णऽइन्द्राग्निभ्यां महेन्द्राय विश्वकर्मणे देवेभ्य इत्यादि · त्रीणि समिष्टयजूंषि · उक्तादन्यत्सर्वमत्र वरुणप्रघासवत्कर्मापवर्गान्तम् । इति महाहविः ॥ ॥७॥

इति पञ्चमस्य सप्तमी कण्डिका ॥ ॥

अथ पितृयज्ञमाह ·

पितृयज्ञऽउपांशु चरणम् ॥१॥ सर्वं प्रैषादिकमुपांशु भवति ।

पुरस्तादुपचारः ॥२॥ दिग्विपर्यासादिह पुरः [उत्तरत-उपचारो (१.८.२६) बाध्यते] · आहवनीयस्य पुरस्तात् नोत्तरतः यथा ब्रह्मवरणम् आत्योदकनिनयनादिकं च · दक्षिणा दिक्प्राची अपरा दक्षिणा उत्तरा चापरा पूर्वा चोत्तरेति । तेन अपणस्य पश्चाद्यत्पात्रसादनं विहितम् तद्गार्हपत्यदक्षिणाग्न्योरुत्तरतः प्राक्संस्थं च कर्तव्यम् · हविरासादनमप्युत्तरत एव · ब्रह्मयजमानयोर्यद्दक्षिणतउपवेशनमुक्तम् (१.८.२७) तत्पश्चाद्भवति । यत्र तु प्राग्ग्रन्थि बर्हिरित्येवमादौ (२८) दिश उद्दिश्यन्ते तत्राविपर्यस्ता एव मुख्या ग्राह्याः ।

ब्रह्मयजमानयोश्च ॥३॥ चकारात्पुरस्तादुपचारः · दक्षिणाग्नेः पुरस्तात्प्राच्यां दिशि प्रत्यङ्मुखावुपविशतः दक्षिणतो ब्रह्मा उत्तरतो यजमानः ।

पूर्ववद्वा ॥४॥ ब्रह्मयजमानयोरुपवेशनं भवति पूर्ववत् प्रकृतिवत् अपरस्यां प्राङ्मुखौ [1] ।

अपत्नीकः ॥५॥ पितृयज्ञो भवति · केवलस्यैकाकिनो यजमानस्यैवात्राधिकारो न तु पत्नीसहितस्य · अतोऽत्र पत्न्याः प्रतिषेधात् पत्नीं संनह्येति प्रैषस्याभावः आज्यावेक्षणं त्वाज्यसंस्कारत्वादध्वर्युः करोति ।

दक्षिणाग्निराहवनीयवत् ॥६॥ तेनान्वाहार्याधिश्रयणं भुव इति नैमित्तिकहोमकर्मापि [2] (२५. ८. ६) स्वकार्यमत्र भवति आहवनीयसम्बन्धि च ।

१) प्रकृतिवदेव दक्षिणतो विपर्यस्तायां दिशि अपरस्यामित्यर्थः Ss. २) ? °माकमपि २.

पूर्वेणाहवनीयं प्रणीताः परिहरति [1] ॥७॥ गार्हपत्यस्य पुरस्ताद्दक्षिणाग्रं चमसं निधायालभ्य दक्षिणाग्नेः पुरस्तान्निधानार्थं पूर्वेणाहवनीयं परिहरति गार्हपत्याहवनीययोर्व्यवायो मा भूदित्येवमर्थमिदमुच्यते [2]। ननु हविर्ध्यात्रेत्यादिना (१. ८. ३१) सिद्धिः पुनरुक्तमिदम् सत्यम् पित्र्यत्वात्कर्मणोऽप्रादक्षिण्येन गार्हपत्यमपरेणैव हरणं प्राप्नोति नाहवनीयं पूर्वेण अनेन नियमः क्रियतऽइति न पुनरुक्तम्। अत्र च पूर्वं दक्षिणाग्नावग्न्यन्वाधानम् षडासनोपकल्पनम् ब्रह्मवरणम् तदुपवेशनं च · ब्रह्मवरणं चाहवनीयस्य पुरस्तात् दक्षिणाभिमुखो ब्रह्मा पूर्वाभिमुखो यजमानः · ततो व्रतग्रहणमन्तरेणापराग्नी गत्वा दक्षिणाग्नेरुत्तरतः स्थितो दक्षिणाग्निमीक्षमाणः प्राचीनावीती करोति ततः प्रणीताप्रणयनादि · प्राग्व्रतविसर्गात्पित्र्याकरणपक्षे ब्रह्मवरणव्रतग्रहणयोरभावः · अध्वर्युर्यजमानो वा यः पिण्डदानं करिष्यन्भवति तेन पूर्वं नीवीबन्धनं कर्तव्यम् अग्रे (१. २४) विस्रंसनोपदेशात् · पित्र्यत्वाच्च सर्वं कर्मापसव्येन दक्षिणाभिमुखैर्दक्षिणासंस्थं सर्वैर्यथास्वं कर्तव्यम् · प्रतीच्युद्धरणपक्षे यज्ञोपवीतिनाहवनीयस्योद्धरणं कर्तव्यम् प्राचीनावीतिना दक्षिणाग्नेः सर्वसाधारणार्थोद्धरणपक्षे तु तेष्वेव · आसनान्यपि सर्वेषां दक्षिणाग्राणि दक्षिणाग्नेर्दर्भैरास्तृतानि चेत्येवमादि सर्वमूह्यम्।

अर्थवच्च ॥८॥ पूर्वेणाहवनीयं परिहरतीति चकारेणानुकृष्यते · अर्थः प्रयोजनमस्यास्तीति अर्थवत्प्रयोजनवत् · यद्वस्तु स्फ्यस्रुक्स्रुवाज्यस्थाल्यादिकम् तत्सर्वमपि पूर्वेणाहवनीयं परिहरति दक्षिणवेदिं प्रति नयति अव्यवायार्थमेव। नन्वेतदवाच्यम् व्यवायनिषेधादेव प्राप्तिः · सत्यम् गार्हपत्यस्य पश्चात्परिहरन्ति तथा-परिहरणे च पित्र्यमप्रादक्षिण्यं चानुगृहीतं भवत्यव्यवायश्च तन्मा भूदित्येवमर्थम् पूर्वेण परिहरतीति प्रादक्षिण्येन नयनं नियमेनोक्तम् न व्यवेयादिति (१. ८. २३) कर्तृव्यवायनिषेधात्पात्राणामन्तरालेन [3] नयनेऽव्यवायो न भविष्यतीति शङ्कानिरासार्थं च · पात्राणामन्तरालेन नयनेऽव्यवायो भवत्येव · तान्यपि गार्हपत्याहवनीययोरन्तरेण न नेयानीत्यर्थः।

1) Thus M. प्रहरति २, but परिह° at ८. 2) See १. ८. २३. 3) ? कर्त्रव्य° २.

पितृभ्यः सोमवद्भ्यः षट्कपालः ॥९॥ पश्चात्तस्मात्

सोमाय पितृमते ॥१०॥ ग्रहणं गार्हपत्यस्य पश्चादुपविष्टेन दक्षिणामुखेन प्राचीनावीतिना कार्यम् ।

पितृभ्यो बर्हिषद्भ्यो धानाः ॥११॥ भृष्टयवाः द्वितीयं हविः ।

पितृभ्योऽग्निष्वात्तेभ्यो मन्थः ॥१२॥ निवान्यायै दुग्धे सकृदुपमथित एकशलाकया मन्थो भवति (२.६.१.६) । यदसकृद्देवानां तत्सकृत्पित्र्यऽइति पित्र्यत्वादत्र सकृद्ग्रहणे प्राप्तऽआह

चतुर्वा ग्रहणम् ॥१३॥ वा निर्धारणे ।

गार्हपत्यस्य पुरस्तादवहननपेषणे ॥१४॥ अध्वर्युणाग्नीध्रेण वावहननं दक्षिणामुखेन तिष्ठता कर्तव्यम् फलीकरणं च सकृत् न त्रिः ।

दक्षिणार्धे कपालोपधानम् ॥१५॥ गार्हपत्यस्य दक्षिणभागे ततश्चोपवेषेणाङ्गारानुत्तरतः कृत्वा षण्णां कपालानामुपधानं दक्षिणामुखेन कर्तव्यम् ।

धानाभर्जनं दक्षिणाग्नौ ॥१६॥ धानानां पचनम् अतस्तदर्थं कर्परोपधानमपि दक्षिणाग्नौ कर्तव्यम् प्रथमकपालधर्मेण तत्र नाङ्गाराणां प्राचां करणम् देशरेचनस्यानुपयोगात् । प्रकृतौ पूर्वं पेषणं ततः श्रपणमिति क्रमः

श्रपणपेषणविपर्यासेऽपि धर्माः ॥१७॥ धानानां श्रपणपेषणयोर्विपर्यासे क्रमान्यत्वेऽपि धर्मा भवन्ति प्राकृताः मन्त्रेणाधिश्रयणपर्यग्निकरणकृष्णाजिनास्तरणादृषदुपधानादयो भवन्त्येव कुतः यतो धर्माः प्रधानभूताः क्रमस्तु गुणभूतः ।

अभिमृश्यार्धाः पिष्ट्वा निवान्यादुग्धे सकृन्मथित एकशलाकया मन्थः ॥१८॥ पुरोडाशधानाश्चाभिमृश्य मा भेरित्यभिमर्शनानन्तरं धाना उद्वास्य द्वेधा विभज्येदं पितॄणां बर्हिषदाम् इदं पितॄणामग्निष्वात्तानामित्यभिमृश्य अग्निष्वात्तसम्बन्धिनीरर्धा धानाः पिष्ट्वा प्रकृतिवत्पेषणेन चूर्णीकृत्य निवान्याया गोर्दुग्धे क्षीरमध्ये एकशलाकया सकृन्मथितः एकवारमेवाप्रदक्षिणं मथितो विलोडितो मन्थो निष्पादयितव्यः स्वयं मृतवत्सा परकीयेण वत्सेन या गौर्दुह्यते सा निवान्या मन्थ आडालिताः[1] सक्तवः एका चासौ शलाका चैकशलाका शीर्षकरहिता

---

1) मंथ अड्डा॰ २. See *Westergaard* s. v. डल् .

इत्यर्थः पूर्वकालैकेति (पा॰ २. १. ४९) समासः। आपस्तम्बसूत्रेऽपि उद्वासनकाले धाना उद्वास्य विभागमन्त्रेण विभज्यार्धा आज्येन संयौत्यर्धाः पिष्टानामावृता सक्तून्कृत्वाभिवान्याये दुग्धस्यार्धशरावे सक्तूनोप्यैकया शलाकयैजुकाण्डेन वा दक्षिणामुखस्त्रिः प्रसव्यमन्वारभ्योपमन्थति शलाकालोडितं[1] मन्थं कृत्वैकैकशो हवीꣳष्यासादयतीति · काठके सपवित्रे निवान्या[या] गोर्दुग्धꣳ सक्तूꣳश्चेषीकया प्रसव्यमन्वारभ्योपमन्थतीति · मानवे अभिवान्यायाः पयस्यूर्धपात्रे प्रसव्यमिनुशलाकयाद्वाल्य शलाकामुद्धरतीति · स्वश्रुतावपि (२. ६. १. ६) निवान्याये दुग्धे सकृदुपमथित इति दुग्धे पयसि प्रक्षिप्तो[2] धानाचूर्ण इति माधवाचार्या व्याख्यातवन्तः[3]। इदानीमिदं विचार्यते किं मन्थस्य पृथग्ग्रहणम् उताग्रहणमिति · किं तावत्प्राप्तम् · तत्र सूत्रकार एव पक्षं परिगृह्णाति ·

अग्रहणं मन्थस्य ततोऽर्धाः पिꣳषन्तीति (२. ६. १. ५) श्रुतेः[4] ॥ १९॥ ततो॰ श्रुतेरिति व्यवहितेन सम्बन्धः अत्रैव हेतुविनान्वयात् · तत्र मन्थस्याग्रहणम् पृथगग्निष्वात्तोद्देशेन स्वतन्त्रं चतुर्मुष्टिकग्रहणं[5] न भवति। कुतः ततोऽर्धाः पिꣳषन्तीति श्रुतेः · यत एवं श्रूयते अथ पितृभ्यो बर्हिषद्भ्योऽन्वाहार्यपचने धानाः कुर्वन्ति ततोऽर्धाः पिꣳषन्तीति · अस्यार्थः · ततस्ताभ्यो बर्हिषद्भ्यो गृहीताभ्योऽन्वाहार्यपचने भृष्टाभ्यो धानाभ्यः सकाशात् अर्धाः धाना आदाय पिंषन्ति चूर्णयन्ति। ततो बर्हिषद्भ्यो गृहीतानामेव धानानां मध्यान्मन्थार्थमर्धानां पेषणस्य विधानात्तदर्थं पृथग्ग्रहणं न कर्तव्यमिति प्राप्तऽआह ·

ग्रहणं वा चोदितत्वात् ॥ २०॥ वा पक्षव्यावृत्तौ[6] · पृथगेव मन्थस्य ग्रहणम् अग्निष्वात्तोद्देशेन स्वतन्त्रं चतुर्मुष्टिकग्रहणं[5] कर्तव्यमित्यर्थः · कुतः चोदितत्वात् शाखान्तरे पृथग्ग्रह[णा]स्य विहितत्वात् स्वशाखायामपि एतानि हवीꣳषि भवन्तीति (२. ६. १. ६) त्रयाणां हविषां विधानात् · अवहननश्रपणयोः सह क्रियमाणत्वात् ततोऽर्धाः पिꣳषन्तीत्येतदर्थप्राप्तस्य प्रकृतितः प्राप्तस्य समवि-

1) ? ॰कालोस्थं २. 2) ? ॰थित इति दुग्धे इति समौ दुग्धे प्र॰ २. 3) see Editio pag. ३१७, lin. २०. 4) ? ततो॰ श्रुतेः deest in २. as part of the text, but see the scholion. M gives it not here, but between २० and २१. Ss. reads अग्रहणं॰ श्रुतेः। ग्रहणं॰ त्वात्. 5) ? ष्टीक॰ २. 6) सिद्धान्ते Ss.

CENTRAL ARCHAEOLOGICAL LIBRARY (New Delhi)

Col 29.8.74.

Soc
24/3/60

CENTRAL ARCHAEOLOGICAL LIBRARY,
NEW DELHI

Catalogue No. Sa2Vs1/Kat/Web - 16245

Author— Weber, Albrecht. Ed.

Title— Śrautasūtra of Kātyāyana, vol. 1.

Borrower No.	Date of Issue	Date of Return
K.R. Sen Gupta	24.2.69	16/8/69

"A book that is shut is but a block"

CENTRAL ARCHAEOLOGICAL LIBRARY
GOVT. OF INDIA
Department of Archaeology
NEW DELHI.

Please help us to keep the book clean and moving.

S. B., 148. N. DELHI.